THE

# ŚĀRNGADHARA-SAMHITĀ

BY

## PANDIT S'ĀRNGADHARĀCHĀRYA

SON OF

## PAṆḌIT DĀMODARA

WITH THE COMMENTARY

**Aḍhamalla's Dīpikā and Kās'irama's Gūḍhārtha-Dīpikā.**

EDITED WITH FOOT NOTES

BY

PAṆḌIT PARAS'URĀMA S'ĀSTRĪ, VIDYĀSĀGAR

AUTHOR OF ENCYCLOPIDIA OF VEDIC LITERATURE, ETC. AND

SON OF PAṆḌIT HĪRĀLAL S'ARMA, AYURVEDĀCHĀRYA.

**Second Edition.**

PUBLISHED BY

PĀNDURANG JĀWAJĪ,

PROPRIETOR OF THE "NIRṆAYA-SĀGAR" PRESS,

BOMBAY.

1931.

Price [illegible] Rs

[All rights reserved by the publisher.]

PUBLISHER:—Pandurang Jawaji, } at the "Nirnaya-sagar" Press,
PRINTER:—Ramchandra Yesu Shedge, } 26–28, Kolbhat Lane, Bombay.

ॐ

श्रीमत्पण्डितदामोदरसूनु–शार्ङ्गधराचार्यविरचिता

# शार्ङ्गधरसंहिता ।

भिषग्वराढमल्लविरचितदीपिका–पण्डितकाशिरामवैद्यविरचित-
गूढार्थदीपिकाभ्यां टीकाभ्यां संवलिता ।

यत्रौषधीः समग्मत राजानः समिताविव ।
विप्रः स उच्यते भिषग् रक्षोहामीवचातनः ॥ ६ ॥ (ऋ. सं. १०।९७)
यश्चकार स निष्करत् स एव सुभिषक्तमः ॥ ५ ॥ (अथ. २।९)

सेयम्—

आयुर्वेदाचार्यपण्डितहीरालालशर्मणां सूनुना
वेदवाचस्पत्यबृहदभिधानप्रणेत्रा विद्यासागर–पण्डितपरशुरामशास्त्रिणा
संशोधिता ।

द्वितीयं संस्करणम् ।

मुम्बय्यां
पाण्डुरङ्ग जावजी श्रेष्ठिभिः
स्वीये "निर्णयसागराख्य" मुद्रणयन्त्रालयेऽङ्कयित्वा
प्राकाश्यं नीता ।

शाकः १८५३, सनाब्दः १९३१.

मूल्यं [illegible]

येषां पादरजःस्पर्शैर्वेदानामुदयो हृदि ।
जातः सत्यव्रतान्वन्दे, श्रीसामश्रमिणो गुरून् ॥

येषां सततमुद्योगाज्जीर्णोद्धारोऽभवत्पुनः ।
सर्वशास्त्रेषु, तत्त्वस्य येषां पादोपसेवया ॥
स्फूर्तिर्मे जायते बुद्धौ, ये महापदभूषिताः ।
शिवदत्ता दाधिमथास्तान्नमामि महागुरून् ॥

श्रीमत्पञ्चनदे देशे ध्वस्तवैद्यागमे पुनः ।
स्थापनाद्रसशालाया आयुर्वेदाश्रमस्य च ॥
शिष्यान्संपाद्य संपाद्य, आयुर्वेदः प्रवर्तितः ।
आयुर्वेदसमुद्धर्ता हीरालालो भिषग्वरः ॥
तेषामेवाज्ञया सेयं श्रीशार्ङ्गधर-संहिता ।
सम्पादिता मया भूयाद्विदुषां प्रीतये सदा ॥

श्रीधन्वन्तरये नमः ।

# आयुर्वेदालोचनम् ॥

पुरा सत्य[1]युगान्ते खलु पञ्च[2]नदप्रदेशे आर्या असुरत्रस्ताः प्रकृतिसौन्दर्यविलुब्धा गिरिनद्युपाश्रिता, ब्राह्मणादिचातुर्वर्ण्याः समाजस्थितिबन्धनपुरःसरं मनुष्यपशुपक्षिणां निखिलस्थावरजंगमादिचतु[3]र्योनिसमुद्भूतानां विज्ञानपुरःसरं तेषां श्रेयसे पांच[4]भौतिकशरीराणां स्वास्थ्य[5]समालोचनया सर्ववेदाङ्ग[6]भूतमायु[7]र्वेदमुपवेदं ऋ[8]ग्वेदस्याथर्ववेदोपाङ्ग[9] चिन्तयामासुः । तथा चोक्तम्—"इह खल्वायुर्वेदो नाम यदुपाङ्गमथर्वस्यानुत्पाद्यैव प्रजाः श्लोकशतसहस्रमध्यायसहस्रं च कृतवान् स्वयम्भूः" इति ( सु. सू. १ ) ॥

आयुर्वेदावतरणं चेत्थं दृश्यते चरकसंहितायां—

'अथात आयुर्वेदसमुत्थानीयं रसायनपादं व्याख्यास्यामः—इति ह स्माह भगवानात्रेयः । ऋषयः खलु कदाचित् शालीना यायावराश्च ग्राम्यौषध्याहाराः सन्तः साम्प[10]न्निका मन्दचेष्टा नातिकल्या-

---

१ ऐतरेयब्राह्मणेद्र ष्टव्यम् ।

२ तथाच चरकसंहितायामपि—'जनपदमण्डले पाञ्चालक्षेत्रे द्विजातिवराध्युषिते काम्पिल्यराजधान्यां भगवान् पुनर्वसुरात्रेयोऽन्तेवासिगणपरिवृतः' ( च. वि. ३ ) ।

३ जरायुजाण्डजस्वेदजोद्भिज्जानां चतुरशीतिलक्षयोनयोऽप्यत्रैवाऽन्तर्भवन्ति । तथाहि कर्मविपाके—
स्थावरास्त्रिंशल्लक्षाश्च जलजा नवलक्षकाः । कृमिजा दशलक्षाश्च रुद्रलक्षाश्च पक्षिणाम् ॥
पशवो विंशतिलक्षाश्च चतुर्लक्षाश्च मानवाः । एतेषु भ्रमणं कृत्वा द्विजत्वमुपजायते ॥ इति ।

४ पृथिव्यप्तेजोवाय्वाकाशात्मनां, तथाहि—वैकारिकादहंकारात्तैजससहायात् तल्लक्षणान्येवैकादशेन्द्रियाण्युत्पद्यन्ते । तद्यथा—श्रोत्र-त्वक्-चक्षु-जिह्वा-घ्राण-वाग्-हस्तो-पस्थ-पायु-पाद-मनांसीति । तत्र पूर्वाणि पंच बुद्धीन्द्रियाणि । इतराणि पंच कर्मेंद्रियाणि । उभयात्मकं मनः । **भूतादेरपि तैजससहायात् तत्लक्षणान्येव पञ्चतन्मात्राण्युत्पद्यन्ते** । तद्यथा—'शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, गन्धतन्मात्रमिति' इत्यादि ( सु. शा. १ ) द्रष्टव्यम् ।

५ तदुक्तम्—'आयुःकामयमानेन विज्ञेयमिदमादरात्' इति ।

६ तदुक्तम्—'ऋग्यजुःसामाथर्वाख्यान् दृष्ट्वा वेदान्प्रजापतिः ।
विचिन्त्य तेषामर्थंश्चैवायुर्वेदं चकार सः ॥' ब्र. वै. पुरा. ब्रह्मखण्डे १६ अध्याये ।

७ 'आयुर्हिताहितं व्याधेर्निदानं शमनं तथा । विद्यते यत्र विद्वद्भिः स आयुर्वेद उच्यते' इति । ( सुश्रु. सू. १ ) ।

'हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् । मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते' इति चरके ( सु. अ. १ ) ।

८ तथाच कात्यायनः—ऋग्वेदस्यायुर्वेद उपवेदः ( चरणव्यूहे ) ।

९ अथर्ववेदस्योपाङ्गत्वेऽन्यत्रापि चरके 'भिषजा पृष्टेनैवं चतुर्णां वेदानामात्मनोऽथर्ववेदे भक्तिरादेश्या' ( सूत्र० ३० ) इत्यादि ।

'अथर्वान्तर्गतं सम्यगायुर्वेदं च लब्धवान्' इति भावमिश्रश्च ।

१० नत्विदानीमिव दरिद्राः । उपनिषत्सु च बहुत्रैव धनसम्पत्तिमन्तो दृश्यंते तदानींतना आर्याः ।

णाश्च प्रायेण बभूवुः। ते सर्वासामितिकर्तव्यतानामसमर्थाः सन्तो ग्राम्यवासकृतं दोषं ज्ञात्वा पूर्वनिवासमपगतग्राम्यदोषं मत्वा शिवं पुण्यमक्षरं मेध्यमगम्यमसुकृतिभिर्गङ्गाप्रभवममरगन्धर्वयक्षकिन्नरानुचरितमनेकरत्ननिचयमचिन्त्याद्भुतप्रभावं ब्रह्मर्षिसिद्धचारणानुचरितं दिव्यतीर्थौषधिप्रभवमतिशरण्यं हिमवन्तममराधिपतिगुप्तं जग्मुर्भृग्वङ्गिरोऽत्रिवसिष्ठकश्यपागस्त्यपुलस्त्यवामदेवासितगौतमप्रभृतयो महर्षयः। तानिन्द्रः सहस्रदृगमरवरोऽब्रवीत्—'स्वागतं ब्रह्मविदां ज्ञानतपोधनानां ब्रह्मर्षीणामस्ति। ननु वो ग्लानिरप्रभावत्वं वैस्वर्यं वैवर्ण्यं च ग्राम्यवासकृतसुखानुबन्धं च। ग्राम्यो हि वासो मूलमशस्तानाम्। तत् कृतः पुण्यकृद्भिरनुग्रहः प्रजानां स्वशरीरमरक्षिभिः। कालश्चायमायुर्वेदोपदेशस्य ब्रह्मर्षीणामात्मनः प्रजानां चानुग्रहार्थम्। आयुर्वेदमश्विनौ मह्यं प्रायच्छतां, प्रजापतिरश्विभ्यां, प्रजापतये ब्रह्मा, प्रजानामल्पमायुर्जराव्याधिबहुलमसुखानुबन्धं, अल्पत्वादल्पतपोदमनियमदानाध्ययनसञ्चयं मत्वा। तं पुण्यतममायुःप्रकर्षकरं, जराव्याधिप्रशमनं, ऊर्जस्करं, अमृतं, शिवं, शरण्यमुदारं भवन्तो मत्तः श्रोतुमर्हन्ति, उपधारयितुं प्रकाशयितुं च प्रजानुग्रहार्थम्' इति। तच्छ्रुत्वा विबुधपतिवचनमृषयः सर्व एवामरवरमृगुभिस्तुष्टुवुः प्रहृष्टास्तद्वचनमभिननन्दुश्च' इति। (चर० चिकि० १ अ.)

ब्रह्मवैवर्तपुराणादिषु सोऽयमवतरणक्रमो भेदेन प्रतिपादितस्तदलं पुराणचिन्तया। तत्र धन्वन्तरिनाम्नां दिवोदासादीनामपि पृथक्त्वेन पृथगेव दिशा दर्शिता।

तदेतदवितथं नाम यत्—कस्यापि संप्रदायस्य धर्मग्रन्थे न विद्यते स्वास्थ्यरक्षणविधौ उपदेशविज्ञानं च। आर्याणां तु प्राणसमे वेदे सर्वा विद्याः, सर्वं शास्त्रं, किं ब्रूमः सर्वमेव भूतं भविष्यमपि प्रतिष्ठितम्, अत एवोक्तम् 'भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यति' इति।

यथैव अथर्ववेदो गांधर्ववेदो धनुर्वेदाश्चोपवेदा वेदानाम्, एवमेवायुर्वेदोऽप्यस्ति अथर्ववेदस्योपाङ्गभूतः प्रधानतमः। अत्रैवान्तर्भवति कामशास्त्रं, शिल्पशास्त्रं, सूपशास्त्रं च। अतएवाथर्ववेदस्य भिषक्शास्त्रे महामहिमा दृश्यते 'भिषजा पृष्टेनैवं चतुर्णां वेदानामात्मनोऽथर्ववेदे भक्तिरादेश्या' इति चरकः। अथर्ववेदे दृश्यन्त एव बहूनि सूक्तानि भेषजपराणि।

## आयुर्वेदसंहिताः।

इहोक्तावतरणक्रमे याः संहिताः स्मृतास्ता इदानीं कथावशेषतां प्राप्ताः, काश्चन लुप्तकल्पाः, इतराश्च विप्लवात्कथमप्यवशिष्टाः साम्प्रतमप्यलंकुर्वन्ति संसारम्। विशेषतश्चार्याणां विद्यादिसद्गुणगरिमाः ख्यापयन्त्येवाखिलां भारतभुवः कीर्तिमिति।

अत्र च तेषां प्रातःस्मरणीयानां पुण्यात्मनां महर्षीणां, तेषां तन्त्राणां चायुर्वेदसमयसमालोचनं करिष्यामः। तत्र सुश्रुतनिर्दिष्टा अश्विनीसंहिता अद्यापि विद्यत एव मद्रासनगरे नाहनराजधान्यां च। किंच सुश्रुतादिपूर्वतनः कालः सूत्राणां। आयुर्वेदसूत्राण्यपि मद्रासनगरे दक्षिणापथे चेदानीमुपलभ्यन्ते।

अत्रिसंहिता च पञ्जापराजधान्यां लवपुरे विद्यते। काश्यपसंहिता तु मैसूरराजधान्यामस्ति। ब्रह्मसंहिता अप्यत्रैव मन्मित्रपार्श्वे। भेलसंहिताया अपूर्णं पुस्तकमसत्संग्रहे तंजोरनगरे च विद्यते।

अथ मुद्रितेषु तन्त्रेषु सुश्रुततन्त्रं बहुतरं प्रसिद्धम्। तच्च समुपलभ्यमानं न पुनरिदं साक्षात्सुश्रुतश्रुतं अपि तु चरकस्येवेदमपि प्रतिसंस्कृतम्। तथाच डल्हनः—'प्रतिसंस्कर्ता अपीह नागा-

१ दृश्यतां ब्र. वै. पुराणस्य ब्रह्मखण्डीयोऽध्यायः १६।

र्जुन एव' इति । ( सुश्रुतटीकायाम् ) । अनेके आचार्याः नागार्जुननामानो बभूवुरिति विदितमेव सूचीपत्राणां सूचीपत्रेण ऑफ्रेक्टप्रकाशितेन । सत्येवं कतमेन नागार्जुनेन कदा वा प्रतिसंस्कृता सेयं सुश्रुतसंहिता इति तु न निश्चीयते । परंतु सुश्रुते चरकपाठोद्धरणाद्विषयसन्निवेशाच्चरकप्रतिसंस्कर्तुर्दृढबलादवरेण केनचिन्नागार्जुनेन प्रतिसंस्कृता इति प्रतीयते । वृद्धसुश्रुतसंहिता चेदानीं जीर्णशीर्णा लब्धा कुरुक्षेत्रे । न जाने द्वितीयमप्यादर्शमस्याः कदाचिल्लभ्येत न वा ।

## चरकसंहिता ।

इदं पुनरग्निवेशतन्त्रं चरकमुनिना प्रतिसंस्कृतं चरकसंहितात्वमापन्नम् । तथाहि—'चिकित्सा वह्निवेशस्य सुस्थातुरहितं प्रति । यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥ अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते' इत्यवसाने द्रष्टव्यम् । चरकश्चायं भगवान्पतञ्जलिरेवेति सर्वसंमतम् ।

भगवान् पतञ्जलिश्च व्याकरणमहाभाष्यप्रणेता । भाष्येऽपि 'अनड्वलोदकं पादरोगः' 'दधित्रपुषं प्रत्यक्षो ज्वरः' 'आयुषे घृतं' इत्यादिसूचनात्सूच्यत एवास्यायुर्वेदज्ञत्वमिति ।

किञ्चानेनान्यदपि पातञ्जलतन्त्रं रसशास्त्रे निर्मितं इति गूढार्थदीपिकायामेवोक्तं 'पातञ्जले तथा तन्त्रे लोहा बहुविधा मताः' इति । ( लोहमारणप्रकरणे शार्ङ्गधरे ) चक्रदत्तोऽपि 'पातञ्जले तु स्पर्शादिनाऽपि पाकज्ञानमुक्तम्' इत्याह । पुनश्च जीर्णशीर्णे विकले चरकसंस्कारे दृढबलेन केनचिद्विदुषा पञ्चनदपुरवास्तव्येन पुनरपि संस्कृता । तथाहि—'अखण्डार्थं दृढबलो जातः पञ्चनदे पुरे' इति 'सिद्धिस्थानेऽष्टमे प्राप्ते तस्मिन्दृढबलेन तु । सिद्धिस्थानं स्वसिद्ध्यर्थं समासेन समापितम्' इति च स्वयमेवाह ।

दृढबलश्चायं वाग्भटात्प्राक्तनः । वाग्भटो हि दृढबलपूरितपाठानष्टाङ्गहृदये समुद्धरति । वाग्भटश्च विक्रमचतुर्थशताब्द्यां बभूवेत्यैतिहासिकाः । अतश्च दृढबलो द्वितीयशताब्द्यां बभूवेति । लभ्यमानचरकसुश्रुतयोः पारदलोहादिव्यवहारोऽपि दृश्यत एव । तथाहि चरकसंहितायां—'सर्वव्याधिनिबर्हणमद्यात् कुष्ठी रसं च निगृहीतम्' ( च. चि. ७ ) । सुश्रुतेऽपि—'रक्तं श्वेतं चंदनं पारदं च काकोल्यादिः क्षीरपिष्टश्च वर्गः' ( सु. चि. २५ ) 'त्रपुसीसताम्ररजतकृष्णलोहसुवर्णानि लोहमलश्च' ( द्रव्यसंग्रहाध्यायः ) इति ।

किञ्च-सुश्रुते सर्वत्रैव 'पुनर्वसुः' इति पदं दृश्यते । 'तिष्यपुनर्वस्वोरेकवचनं ( अष्टा० )' इति पाणिनिसूत्रेण यद्यपि छन्दस्येवैकवचनस्यानुविधानं दृश्यते परन्त्वत्राप्यनुकरणमेव ॥

## वाग्भटसंहिता ।

वाग्भटस्य कालनिर्णयस्तु प्रागुक्तः । क्वचिदस्य 'वाभट' इत्यपि नामान्तरं दृश्यते । रसरत्नसमुच्चयकारस्तु पृथगेव वाग्भटः । अयं च वैक्रमद्वादशशताब्द्यां बभूव । सोमदेवपरिभाषायाः रसहृदयस्य च पाठा अत्र गृहीताः ।

---

१—पतदञ्जलिः पतञ्जलिरिति व्युत्पत्त्या शतपथोक्तमत्स्यावतार एवेति केचन ।

२—तथाहि—'पातञ्जलमहाभाष्यचरकप्रतिसंस्कृतैः । मनोवाक्कायदोषाणां हन्त्रेऽहिपतये नमः ।

इति चक्रपाणिः । 'इति चरके पतञ्जलिः' नागेशः ।

'सूत्राणि योगशास्त्रे वैद्यकशास्त्रे च संहितामतुलाम् ।

कृत्वा पतञ्जलिमुनिः प्रचारयामास जगदिदं सर्वम्' इत्यादि । पतञ्जलिचरितं सर्ग ५.

ब्रह्मवैवर्तपुराणे तु भास्करसंहिता, धन्वन्तरिप्रणीतं चिकित्सातत्वविज्ञानतन्त्रं, चिकित्सादर्शनं, चिकित्साकौमुदी; अश्विप्रणीतं चिकित्सासारतन्त्रं, भ्रमघ्नं, नकुलप्रणीतं वैद्यकसर्वस्वं; सहदेवप्रणीतं व्याधिसिन्धुविमर्दनं, यमराजप्रणीतं ज्ञानार्णवं, च्यवनप्रणीतं जीवदानं, जनकप्रणीतं वैद्यसन्देहभञ्जनं, जाबालप्रणीतं तन्त्रसारं इत्यादि लिखितं दृश्यते ।

आयुर्वेदस्याष्टाङ्गविभागेन तदन्तःपातिन एव सर्वचिकित्साविषयः । आयुर्वेदस्याष्टविधत्वम् । अष्टाङ्गविभागो यथा—

काय, शल्य, शालाक्य, भूत, कौमारभृत्य, अगद, रसायन, वाजीकरणाश्चेति । अत्र दिङ्मात्रमुदाह्रियते—

१ कायचिकित्सायां (आत्रेयसांप्रदायिकाः) ।
- १ अग्निवेशतन्त्रम्
- २ भेळसंहिता
- ३ जातूकर्णसंहिता
- ४ हारीतसंहिता
- ५ खरनादसंहिता
- ६ विश्वामित्रसंहिता
- ७ आत्रेयसंहिता
- ८ पराशरसंहिता
- ९ क्षारपाणिसंहिता

२ शल्यचिकित्सायां—
- १० औपधेनवतन्त्रम्
- ११ औरभ्रतन्त्रम्
- १२ वृद्धसुश्रुतसंहिता
- १३ पौष्कलावततन्त्रम्
- १४ वैतरणतन्त्रम्
- १५ भोजसंहिता
- १६ करवीर्यतन्त्रम्
- १७ गोपुररक्षिततन्त्रम्
- १८ भालुकितन्त्रम्
- १९ कपिलतन्त्रम्
- २० गौतमतन्त्रम्

३ शालाक्यचिकित्सायां—
- २१ विदेहतन्त्रम्
- २२ निमितन्त्रम्
- २३ काङ्कायनतन्त्रम्
- २४ गार्ग्यतन्त्रम्
- २५ गालवतन्त्रम्
- २६ सात्यकितन्त्रम्
- २७ शौनकतन्त्रम्
- २८ करालतन्त्रम्
- २९ चक्षुष्यतन्त्रम्
- ३० कृष्णात्रेयसंहिता

४ भूतविद्यायां तु न कस्यापि सत्ता ज्ञायते । सुश्रुतादौ भूतविद्याबीजं तु लभ्यत एव ॥

५ कौमारभृत्ये
- ३१ जीवकतन्त्रम्
- ३२ पार्वतकतन्त्रम्
- ३३ बन्धकतन्त्रम्
- ३४ हिरण्याक्षतन्त्रम्

६ अगदचिकित्सायां—
- ३५ काश्यपसंहिता
- ३६ अलम्बायनसंहिता
- ३७ उशनसंहिता
- ३८ सनकसंहिता

| | |
|---|---|
| ३९ लाट्यायनतन्त्रम् | ८ वाजीकरणे |
| ७ रसायनचिकित्सायाम्— | वात्स्यायनप्रणीते |
| ४० पातञ्जलं तन्त्रम् | कामसूत्रे एवं समुपलभ्यते |
| ४१ व्याडितन्त्रम् | 'कौचुमारः औपनिषदिकम्' |
| ४२ वसिष्ठतन्त्रम् | इति |
| ४३ माण्डव्यतन्त्रम् | तदेतत् कुचुमारतन्त्रं ४५ |
| ४४ नागार्जुनतन्त्रम् | अस्माभिः सम्पादितम् । |

यथैव मनुष्यचिकित्सायां अष्टाङ्गविभाग एवमेवास्मदाचार्यवर्यैश्चिकित्सायां पश्वादिचिकित्साविषयेपि निर्मिताः प्रबन्धाः

यथा— पशुचिकित्सायां—

१ अश्वायुर्वेदे—शालिहोत्रसंहिता । नकुलकृतं अश्ववैद्यकम् । ( कलिकातायां मुद्रितम् )

२ गजायुर्वेदे—हस्त्यायुर्वेदः ( पुण्यपत्तने मुद्रितम् )

३ पशुचिकित्सा च

वृक्षचिकित्सायां—

४ वृक्षायुर्वेदः ( भा. र. गङ्गुलालशास्त्रिणां पुस्तकालये विद्यते )

५ अग्निपुराणे, गारुडे च ।

रत्नपरीक्षणम्—

६ रत्न-खनिज-वसुन्धरादिविज्ञानम् । एतद्विषयका बहवो निबन्धाः पुराणादिष्वपि ।

धातृविद्या तु—

कौमारभृत्ये एवान्तर्भवति ।

प्रसूतिशास्त्रस्य—

सत्ताऽपि सुश्रुतादौ दृश्यते । एवमेव गर्भशास्त्रस्यापि ।

अत्रेदं बोद्धव्यम्—न केवलमेव द्रव्यादीनामेव गुणा बोधिता भिषग्भिः, प्रत्युत ओषधीनां तैलघृतयोर्गुणाविष्कारः, वीरुधां, खनिजानां च सत्वनिर्गमप्रकारः, द्रुति, जारण, मारण, शोधनादिविधयश्च निर्दिष्टाः । कीटाणुशास्त्रं च सुविदितमेव स्यादार्याणां । प्रदर्शितं चाऽस्माभिराथर्वणे खण्डे । ओषधीनां त्वचि प्रवेशोऽपि नारायणतैलादीनां निर्दिष्टः । बालानां शीतलानिवृत्त्यै स्कन्धोल्लेखनं च दृश्यते—'धेनुस्तन्यमसूची वानराणां च मसूचिका' । इत्यादि शैवतन्त्रे । एवं च पाकशास्त्रस्याऽपि सत्ता विद्यते नकुलकृतं सूपशास्त्रं प्रसिद्धमेव । नेत्रकर्मणि उपनेत्रस्य सत्ता तु सर्वप्रसिद्धैव ।

एवं रञ्जनशास्त्रोऽप्यायुर्वेदान्तर्गत एव । क्षाराणि वस्त्रगात्रस्वच्छकराणि अन्येषां चोपकरणानामायुर्वेद एव परिस्थितिः ।

एतेनायुर्वेदशास्त्रे वर्तमानरसायनशास्त्रस्यान्येषां च प्राणिमात्रव्यवहारोपयोगिनां शास्त्राणां द्रव्याणां च परिस्थितिरिति स्फुटम् ॥

इह हि आयुर्वेदशास्त्रे चराचरप्राणिनामनुग्रहार्थं महर्षिभिर्नानाचिकित्सा अभिहिता दृश्यन्ते । तथाहि—

हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम् ।
औषधान्नविहाराणामुपयोगः सुखावहः ॥

पद्येनानेन वर्तमानहोम्योपैथिक, एलोपैथिक, जलचिकित्सा-व्रतचिकित्सादयः सर्वविधयः सूचिताः ।

चरकादिष्वार्षग्रन्थेषु लौहादिप्रयोगाः सूचितमात्रा एवासन् । ततश्च यवनसाम्राज्यकाले क्वाथा-वलेहचूर्णघृततैलादीनां भूयसीं मात्रां विलोक्यातुराणां च ग्लानिमनुभूय रसायनशास्त्रे रसाचार्यैः लौहादीनां भस्मानि, वसंतकुसुमाकरादयश्चानेके रसाः प्रत्यक्षफलदाः अत्यल्पमात्रात्मका इह प्रसा-रिताः स्वबुद्धिविभवानुसारिभिः । बहवः प्रादुर्बभूवुः किल रसतन्त्रप्रणेतारः । केषांचन सूची रसर-त्नसमुच्चये सूचिता—

आदिमश्चन्द्रसेनश्च लङ्केशश्च विशारदः । कपाली मत्तमाण्डव्यौ भास्करः शूरसेनकः ॥
रत्नघोषश्च शम्भुश्च तथार्को नरवाहनः । इन्द्रदो गोमुखश्चैव कम्बलिर्व्याडिरेव च ॥
नागार्जुनः सुरानन्दो नागबुद्धिर्यशोधनः । चण्डः कापालिको ब्रह्मा गोविन्दो लम्पको हरिः॥
सप्तविंशतिसंख्याका रससिद्धिप्रदायकाः । रसांकुशो भैरवश्चैव नन्दी स्वच्छन्दभैरवः ॥
मन्थानभैरवश्चैव काकचण्डीश्वरस्तथा । वामदेव ऋष्यशृङ्गः क्रियातन्त्रसमुच्चयी ॥
रसेन्द्रतिलको योगी भालुकिर्मैलयाह्वयः । महादेवो नरेन्द्रश्च वासुदेवो हरीश्वरः ॥
एतेषां क्रियतेऽन्येषां तन्त्राण्यालोच्य संग्रहः ॥' इति ।

इत्थमष्टाङ्गविभक्तमायुर्वेदशास्त्रं दृष्ट्वा स्वल्पायुषः संक्षिप्तप्रियान्पुरुषानाकलय्य बहूनि तन्त्राणि च लुप्तकल्पान्यवगम्य बभूवुः केचन संग्रहकाराः, वृन्दमाधव-भावमिश्र-चक्रपाणि-मल्लिनाथ-शिवदा-स-वङ्गसेन-प्रभृतयः, अन्ये टीकाकाराश्च, आचार्या विक्रमदशमशताब्द्याः परं लब्धजन्मानो मुगल-साम्राज्ये । एतेष्वेवान्यतमः शार्ङ्गधराचार्यः । अनेनायुर्वेदे स्वनाम्नैव संहिता सम्पादिता । इयं किल लघुत्रय्यां भिषग्भिः सादरं गणिता । अत्र च चरकादिभ्यः शारीरकविज्ञानं स्वल्पतरं संगृहीतम् । परिभाषा, नेत्र-मुख-मूत्र-नाडीपरीक्षा च प्रयोजनीयतया लिखिता । रोगाणां तु संख्यामात्रपरिचयः प्रदत्तः । इह तु महाव्याध्यवान्तर्भूता व्याधयः, नूतनाश्च संक्रामकरोगाः प्रादुर्भवन्त्येव, तदा सं-ख्यामात्रे किं फलमिति न जानीमः । निघण्टुविषयस्त्वत्र सर्वथैवास्पृष्टः क्वाथावलेहचूर्णगुटीरसा-सवारिष्टादयः सर्वे प्रयोगाः प्रायः अनुभूता एव ।

शार्ङ्गधरेण सुभाषितेऽपि शार्ङ्गधरपद्धतिः प्रणीता । तस्यामित्थं परिचयोऽस्य लभ्यते—

'पुरा **शाकम्बरीदेशे** श्रीमान्**हम्मीर**भूपतिः ।
**चाहुवाणा**न्वये जातः ख्यातः शौर्ये इवार्जुनः ॥ २ ॥

१ सेयं संक्षिप्तप्रियता महाभाष्यकाले लब्धप्रचारा आसीदिति पस्पशायां द्रष्टव्यम्—'वेदान्नो वैदिकाः सिद्धाः, लोकाच्च लौकिकाः, अनर्थकं व्याकरणम्' 'वेदमधीत्य त्वरितं वक्तारो भवन्ति' इत्यादि ।

तस्याऽभवत्सभ्यजनेषु मुख्यः परोपकारव्यसनैकनिष्ठः ।
पुरन्दरस्येव गुरुर्गरीयान् द्विजाग्रणी **राघवदेव**नामा ॥ ३ ॥
**गोपाल-दामोदर-देवदास**-संज्ञा बभूवुस्तनयास्तदीयाः ।
नेत्रावतारा इव चन्द्रमौलेरपाकृतध्वान्तगणास्त्रयोऽपि ॥ ४ ॥
तेषां मध्ये यस्तु दामोदरोऽभूदुत्पाद्य श्रीनात्मजान्वीतरागः ।
भागीरथ्यां शुद्धदेहं विधाय ज्ञानादात्मन्येव निष्ठां जगाम ॥ ५ ॥
ज्येष्ठः शार्ङ्गधरस्तेषां लघुर्लक्ष्मीधरस्ततः ।
कृष्णोऽनुजस्ततस्तेषां त्रयस्तेताऽग्नितेजसः ॥ ६ ॥' इति

प्रारम्भे स्वयमेव वक्ति । इह च शार्ङ्गधरसंहितायां प्रत्यध्यायसमाप्तौ 'इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण' इत्यादि स्वयमुल्लिखति दामोदरसूनुत्वं इतश्च पद्धतिकारः संहिताकारश्चैक एवाचार्य इति सिध्यति । आफ्रेख्टमुद्रिते सूचिपत्राणां सूचीपत्रे अन्येऽपि शार्ङ्गधरनामानो विद्वांसो बभूवुरिति निश्चीयते इति त्वन्यत्[1] ।

शाकम्भरीदेव्याश्च मन्दिरमत्रैवासन्निवासे अम्बालयमण्डले, कुरुक्षेत्रप्रान्ते उत्तरदिशि विद्यते साम्प्रतमपि । हम्मीरस्य राज्यमप्यत्रैवासीदित्यैतिहासिकाः ॥ अस्य च ग्रन्थस्य सुगमत्वात्सर्वत्र शीघ्रमेव प्रचारः संवृत्तः । अस्य च संग्रहस्य टीकात्रयं समुपलब्धम् ।

१—दीपिका ।

२—गूढार्थदीपिका ।

३—आयुर्वेददीपिका च । तत्र दीपिका तु आढमल्लप्रणीता । आढमल्लश्च हस्तीकान्तपुर्यां श्रीजैत्रसिंहप्रभो राजवैद्य आसीदिति भूमिकास्थश्लोकेन ज्ञायते । अस्य चाभिजनः शार्ङ्गधरकर्तुर्हम्मिरपुर एव शाकम्भरीदेशे । केचिच्चैनं 'श्रीवास्तव्य' विशेषणाद्वैश्यं मन्यन्ते । सुप्रसिद्धश्चक्रदत्तप्रणेता, चरकटीकाप्रणेता च चक्रपाणिरपि अस्यैव पूर्वजः इत्यपि प्रारम्भतो ज्ञायते । मद्दृष्टासु तिसृष्वपि मातृकासु तृतीयखण्डान्ते खण्डितमिदं पद्यं दृश्यते—

एकादश सहस्राणि तथा························ ।
शकानामाढमल्लो हि पञ्जिकायां विनिर्ममे ॥

त्रुटितेनानेन पद्येन शकाब्दैकादशे निर्मिता सेयं दीपिका इति निश्चीयते । अस्याश्चादर्शपुस्तकानि—

१—अस्मत्संग्रहस्थम् । कलिकातामुद्रितम् । खण्डद्वयात्मकम् । परिवर्तित—। परिवर्द्धित—परिवर्जितपाठम् ।

२—खण्डद्वयात्मकं प्रायः शुद्धं हस्तलिखितं मुजफ्फरनगरमण्डलान्तर्गतब्राह्मणपुरवास्तव्यानां पण्डितवर**परमानन्द**शास्त्रिणाम् ।

३—श्रीहरिद्वारसमीपकनखलवास्तव्यानां राजवैद्यपण्डितयागेश्वरशर्मणाम् ।

---

१ द्वितीयशार्ङ्गधरो देवराजस्य पुत्रो वैकुण्ठाश्रमस्य शिष्यः । तृतीयः शार्ङ्गधरमिश्रश्चतुर्थः शेषशार्ङ्गधर इति ॥

४—बीकानेरराज्यपुस्तकालयस्य तृतीयं खण्डम् । इदं च श्रीमद्राजाधिराजश्रीबीकानेरप्रभो-राज्ञया तेषां मन्त्रिप्रवरैः श्रीमन्महाराजभैरवसिंहजी ( Lt. Cal., K. C. S. I. इत्यादि ) वर्मणां कृपया समाधिगतम् । अतस्तेषां कृतज्ञतां शिरसा वहामि ।

२—गूढार्थदीपिका । इयं च काशिरामवैद्यैः प्रणीता । इमे च तृतीयखण्डान्ते स्वपरिचय-मित्थमुद्घोषयन्ति—

श्रीमत् शाहसलेमस्य राज्ये कन्यागते रवौ ।

त्रुटितेनानेन पद्येन शाहसलेमराज्यसमये भारते काशिरामवैद्याः प्रादुरभवन् । शाहसलेमस्य नगरी चाधुना कर्णालयमण्डले कुरुक्षेत्रप्रान्ते अम्बालयतो दक्षिणस्यां चतुर्योजनान्तराले 'सलेमा-बाद' इति विराजते । शाहसलेमश्च देहलीनगर्यामगरनगर्यां च खृस्तीये सपञ्चाशत् पञ्चदशशा-ताब्द्यां ( १५५० ) राज्यमकरोत् । कलिकातातः पुरुषपुर ( पेशावर )पर्यंतं भारतवर्षे अस्य पिता शेरशाहः राजपथकर्तासीत् । अस्याश्चादर्शपुस्तकानि यैर्महाशयैः प्रदत्तानि तेषां कृतज्ञतां सधन्यवादं प्रकाशयामि—

१—नालागढाभिजनमण्डीराजन्वत्यां राजवैद्यानां स्वर्गतानां पण्डितवरविद्यासागरशर्मणाम् । शुद्धं नवीनं च ।

२—मुजफ्फरनगरमण्डले मीरांपुरग्रामवास्तव्यानां पण्डितरामाधीनवैद्यवर्याणाम् । प्राचीनतरं शुद्धं च ।

३—मुम्बईवास्तव्यासन्मित्रवर्याणां यादवरामशर्मणां तृतीयखण्डम् । इयं पुण्यपत्तनस्य दक्षि-णकालिजवर्तमानपुस्तकालयस्य पुस्तकस्य प्रतिकृतिः ।

मूलपाठशोधने चास्माभिष्टीकाभिरेव पाठं संवाद्य पाठान्तराणि च कचित्कचित् संगृहीतानि । साहाय्यभूतानि पुस्तकानि—

१—मूलपुस्तकं हस्तलिखितम् । अस्मत्संग्रहस्थम् ।

२—कलिकातायां मुद्रितं अतिप्राचीनम् ।

३—निर्णयसागरयन्त्रालयमुद्रितम् ।

४—श्रेष्ठिक्षेमराज-श्रीकृष्णदासमुद्रितम् ।

३—आयुर्वेददीपिका । इयं कोनेरीभट्टवैद्यात्मजरुद्रभट्टेन प्रणीता । बहुषु स्थलेषु समीचीन-तरा च । आढमल्लीटीकया सह अस्या अतिसादृश्यं परस्परं प्रमाणोद्धृतत्वं च सर्वत्र दृश्यते । द्वितीयतृतीयखण्डयोरेवास्या आदर्शपुस्तकं वैद्यराजयागेश्वरशर्मणां सकाशाल्लब्धम् ।

तदत्र कृतेऽपि बहुप्रयत्ने मद्दृष्टिदोषात्, वेदवाचस्पत्यबृहदभिधानप्रणयने च व्यग्रत्वात् स्ख-लितत्वं स्यादेव । तत्संशोध्य पाठयन्तु सन्त इति निवेदयति—

अम्बालये
ज्येष्ठशुक्ल द्वितीया १९७६ वै. } परशुरामं शास्त्री.

# वर्णक्रम-सूची ।


| विषयः | पृष्ठं. |
|---|---|
| **अ** | |
| अंकोटकल्कः ( अतिसारे ) | १७६ |
| अगस्तिहरीतकी० ( क्षये ) | २१० |
| अग्नितुण्डवटी ( अजीर्णे ) | २७९ |
| अग्निदग्धे-लेपः | ३६७ |
| अग्निविकारसंख्या | ८७ |
| अङ्गारतैलम् ( ज्वरेषु ) | २२३ |
| अजमोदादिचूर्णम् ( अतिसारे ) | १८४ |
| " " ( आमवाते ) | १९१ |
| अजीर्णकण्टकरसः ( अजीर्णे ) | २७९ |
| अजीर्ण-संख्या | ७९ |
| अञ्जन-भेदाः | ३९३ |
| **अञ्जनविधिः** | " |
| अञ्जन-शलाका | ३९५ |
| अञ्जनाऽनर्हाः | ३९३ |
| अतिवान्तेर्लक्षणम् | ३०८ |
| अतीसार-संख्या | ७८ |
| अधूमार्हाः | ३४७ |
| अनुक्रमणिका ( शार्ङ्गधरस्य ) | ५ |
| अनुवासन-मात्रा | ३२० |
| अनुवासनयोग्याः | " |
| **अनुवासन-विषयः** | **३२३** |
| अनुवासनायोग्याः | ३२१ |
| अनुलोमनम् | ३५ |
| अपराजितधूपः | ३५१ |
| अपस्मारसंख्या | ८६ |
| अपामार्गकल्कः ( अर्शसि ) | १७६ |
| अपामार्गक्षारतैलम् ( कर्णरोगे ) | ३७१ |
| अभयादिकल्कः ( दीपनः ) | १७७ |
| अभयादिक्वाथः | १४९ |
| अभयादिमोदकाः ( विरेचनकराः ) | ३१६ |
| अभिष्यन्दिद्रव्यम् | ३९ |
| **अभ्यङ्गबस्तिप्रकारः** | **३६८** |
| अभ्रक-भस्मविधिः | २५० |
| " द्वितीयविधिः | २५० |
| " शोधनम् | २४९ |
| " सत्वविधिः | २५० |
| अमृताघृतम् ( वातरक्ते ) | २९७ |
| अमृतादिक्वाथः ( " ) | १६१ |
| " " ( नेत्ररोगे ) | १६३ |
| अमृतार्णवरसः ( कासे ) | २७४ |
| अमृताष्टकम् | १४९ |
| अमृतास्वरसः | १३८ |
| अरलुपुटपाकः | १४२ |
| अरुंषिकायां लेपाः | ३५७ |
| अरोचकसंख्या | ८३ |
| अर्कतैलम् ( कण्ड्वादौ ) | २२७ |
| अर्बुद-संख्या | ९३ |
| अर्शो-रोग-संख्या | ७९ |
| अलम्बुषा-स्वरसः | १४० |
| अवपीडननस्यम् | ३४१ |
| **अवलेह-कल्पना** | २०६ |
| अवलेहस्य सिद्धलक्षणम् | २०७ |
| अवलेहे अनुपानम् | २०७ |
| अवाम्याः | ३०५ |
| अश्मरीसंख्या | ८९ |
| अश्वगन्धादिचूर्णम् ( वाजीकरणे ) | १९५ |
| अष्टगुणमण्डः | १६९ |
| अष्टवर्गः | १८१ |
| अष्टादशाङ्गक्वाथः | १५० |
| अष्टाविंशतिगणः | १५० |
| अस्वेदार्हाः | २९९ |
| अहंकारनिरूपणम् | ६४ |
| **आ** | |
| आकारकरभादिचूर्णम् ( स्तम्भनम् ) | १९६ |
| आनन्दभैरवरसः ( अतीसारे ) | २७० |
| आनाहरोगसंख्या | ८७ |
| आमलक्यादिगुटिका ( तृषायाम् ) | १९८ |
| आमलक्यादिचूर्णम् ( ज्वरे ) | १७८ |
| आमवातसंख्या | ८६ |
| आम्रादितैलम् ( कर्णरोगे ) | ३७२ |
| आम्रादिफाण्टः ( अतीसारे ) | १७१ |
| आम्रादिहिमः ( रक्तपित्ते ) | १७२ |
| आरग्वधादिक्वाथः | १४८ |
| आरभस्मविधिः | २४३ |
| " द्वितीयविधिः | २४४ |
| आर्द्रकस्वरसः | १४० |
| **आश्च्योतनकर्म** | **३८१** |
| आश्च्योतन-योग्याः | ३८२ |
| आसवारिष्टयोर्जल-प्रमाणम् | २३३ |
| आसवारिष्टयोर्भेदः | २३३ |
| **आसवारिष्ट-विधिः** | **२३३** |
| आहारस्य अन्यधातुषु क्रमः | ७० |
| " रक्तक्रमः | ६८ |
| " रसक्रमः | ६८ |
| आहारादिगतिरध्यायः | ६६ |
| **इ** | |
| इक्षुशुक्तम् | २३४ |
| इच्छाभेदी रसः ( वैरेचनः ) | २७२ |
| इन्द्रयवादिक्वाथः | १५४ |
| इन्द्रलुप्ते लेपाः | ३५८ |
| इन्द्रियाणां विषयाः | ४६ |

| विषयः | पृष्ठं. |
|---|---|
| इन्द्रियाणि | ६३ |
| इरिमेदादितैलम् ( दन्तरोगे ) | २२९ |
| इष्टिकाविधानम् | ३४९ |
| **उ** | |
| उत्क्लेशन-बस्तिः | ३३३ |
| **उत्तरबस्तिविधिः** | **३३६** |
| उदयादित्यरसः ( श्वेतकुष्ठे ) | २७६ |
| उदर-रोगसंख्या | ८८ |
| उदरशूले लेपः | ३६५ |
| उदर्दादिरोगसंख्या | १०२ |
| उद्गारलक्षणम् | ७६ |
| उन्मत्तरसः ( सन्निपाते ) | २७२ |
| उन्मादसंख्या | ८५ |
| उपदंशसंख्या | ९६ |
| उपदंशे लेपाः | ३६७ |
| उपधातवः | २४९ |
| उपनाहस्वेदः | ३०१ |
| उशीरासवः ( रक्तपित्ते ) | २३५ |
| **उष्णोदकविधिः** | **१६६** |
| उष्णोपद्रवरोगसंख्या | १३२ |
| **ऊ** | |
| **ऊष्मस्वेदविधिः** | **३००** |
| **ए** | |
| एरण्डक्काथः | १५७ |
| एरण्डसप्तकम् | १५६ |
| एलादिक्काथः | १५८ |
| एलादिचूर्णम् ( छर्दिरोगे ) | १९४ |
| **ओ** | |
| ओष्ठरोगसंख्या | १०८ |
| **औ** | |
| औषधव्यवस्था | ७१ |
| **क** | |
| कट्फलादिक्काथः | १५० |
| कट्फलादिचूर्णम् ( ज्वरे ) | १८३ |
| कण्टकारिक्काथः | १४९ |
| कण्टकारीपुटपाकः | १४३ |
| कण्टकार्यवलेहः ( कासादौ ) | २०७ |

| विषयः | पृष्ठं. |
|---|---|
| कण्ड्वादौ लेपाः | ३६० |
| कनकसुन्दररसः ( सन्निपाते ) | ३६७ |
| कन्दर्पसुन्दररसः ( वाजीकरणे ) | २८२ |
| कपित्थाष्टकचूर्णम् ( ग्रहण्यां ) | १८५ |
| कफरोगसंख्या | १०७ |
| करञ्जतैलम् ( इन्द्रलुप्ते ) | २२८ |
| करवीरादितैलम् ( लोमशातनम् ) | २३१ |
| कर्णकीटे हरितालयोगः | ३७२ |
| ,, शिग्रुस्वरसयोगः | ३७२ |
| कर्णपूरणविधिः | ३७० |
| कर्णरोगसंख्या | ११२ |
| कर्णशूले योगाः | ३७० |
| कर्णस्रावे योगाः | ३७२ |
| ,, खर्जिकारसयोगः | ३७२ |
| कलादिकाख्यानाध्यायः (५) | ४० |
| **कल्ककल्पना** | **१७३** |
| कल्के मध्वादिमानपरिभाषा | १७४ |
| कांकायनगुटिका (गुल्मादौ) | २०१ |
| काञ्चनारगुग्गुलुः ( गण्डमालायां ) | २०५ |
| **काञ्जिकविधिः** | **२३५** |
| कालिङ्गपरिभाषा | १० |
| कामदेवघृतम् ( रक्तपित्तादौ ) | २१६ |
| कामलारोगसंख्या | ८१ |
| कासरोगसंख्या | ८२ |
| कासीसादितैलम् ( अर्शःसु ) | २२६ |
| कासीसाद्यं घृतम् ( कुष्ठेषु ) | २१८ |
| कीटघ्नलेपः | ३५६ |
| कुंकुमनस्यम् | ३४३ |
| कुटजपुटपाकः | १४१ |
| कुटजारिष्टः ( ज्वरेषु ) | २३७ |
| कुटजावलेहः ( अर्शःसु ) | २११ |
| कुटजाष्टकम् | १५३ |

| विषयः | पृष्ठं. |
|---|---|
| कुटजाष्टकावलेहः ( अतीसारादौ ) | २११ |
| कुमार्यासवः ( उदरेषु ) | २५३ |
| कुष्ठकुठाररसः | २७५ |
| कुष्ठरोगसंख्या | ९८ |
| कुष्ठाद्यं तैलम् ( छिक्कायां ) | २३१ |
| कूष्माण्डस्वरसः | १४१ |
| कूष्माण्डावलेहः (रक्तपित्ते) | २०९ |
| कैशोरगुग्गुलुः ( वातरक्ते ) | २०३ |
| **क्वाथकल्पना** | **१४४** |
| क्वाथपर्यायनामानि | १४५ |
| क्रिमिरोगसंख्या | ८० |
| क्षयरोगसंख्या | ८२ |
| क्षारतैलम् ( कर्णरोगे ) | २३० |
| **क्षारविधिः** | **२५६** |
| क्षाराः | १८२ |
| क्षारोपद्रवरोगसंख्या | १३२ |
| **क्षीरपाकविधिः** | **१६७** |
| क्षीरषट्पलघृतम्(ज्वरादौ) | २१५ |
| क्षुद्ररोगसंख्या | ९८ |
| क्षुद्राक्वाथः | १५४ |
| **ख** | |
| खदिरादिक्वाथः ( भगन्दरे ) | १६१ |
| खदिरारिष्टः ( कुष्ठेषु ) | २३८ |
| खर्जूरादिमन्थः ( मद्यविकारे ) | १७१ |
| **ग** | |
| गण्डमालारोगसंख्या | ९२ |
| गण्डूष-कवल-प्रतिसारण-विधिः | ३५२ |
| गन्धकजारणम् ( सूते ) | २६२ |
| गन्धकशोधनम् | २६१ |
| गर्भरोगाः | १२९ |
| गलगण्डे लेपः | ३६६ |
| गलरोगसंख्या | ११० |
| गांगेरुकीस्वरसः | १४१ |
| **गुटिकाकल्पना** | **१९६** |
| गुटिकानां मात्रा | १९७ |

| विषयः | पृष्ठं. |
|---|---|
| गुटिकासु गुडादिमानम् | १९७ |
| गुडगुटिका (श्वासादौ) | १९८ |
| गुडचतुष्टयगुटिका (आमादौ) | १९९ |
| गुडादिनस्यम् | ३४१ |
| गुडूचीहिमः (जीर्णज्वरे) | १७३ |
| १. गुडूच्यादिक्वाथः (ज्वरेषु) | १४६ |
| २. ,, ,, (तृतीयकज्वरे) | १५१ |
| गुडूच्यादितैलम् (अनुवासनम्) | ३२७ |
| गुल्मरोगसंख्या | ८८ |
| गृध्रस्यादिषु लेपः | ३६६ |
| गृहधूमतैलम् (नासार्शःसु) | २३१ |
| गोक्षुरादिगुग्गुलुः (प्रमेहे) | २०४ |
| गौराद्यं घृतम् (व्रणेषु) | २२० |
| ग्रन्थिरोगसंख्या | ९२ |
| ग्रहणीकपाटरसः | २८१ |
| ग्रहणीवज्रकपाटरसः | ,, |
| 'ग्राहि' औषधनिरूपणम् | ३७ |
| 'ग्लानि' लक्षणम् | ७५ |
| **घ** | |
| **घृतसाधनविधिः** | **२१२** |
| **च** | |
| चतुर्विंशतितत्त्वनिरूपणम् | ६५ |
| चन्दनादितैलम् (क्षयादौ) | २३२ |
| चन्द्रप्रभावटिका (प्रमेहेषु) | २०० |
| चन्द्रोदयावर्तिः (नेत्रेषु) | ३९० |
| चांगेरीघृतम् (गुदभ्रंशे) | २१६ |
| चातुर्जातकम् | १८० |
| चित्रकादिचूर्णम् (मन्दाग्न्यादौ) | १९१ |
| **चूर्णकल्पना** | **१७८** |
| चूर्णस्य मात्रा | ,, |
| चव्यादिक्वाथः | १५९ |
| चूर्णे गुडादिमानम् | १७८ |
| चूर्णे भावनापरिमाणम् | ,, |
| च्यवनप्राशावलेहः (क्षयक्षीणादौ) | २०८ |

| विषयः | पृष्ठं. |
|---|---|
| **छ** | |
| छर्दिरोगसंख्या | ८४ |
| 'छेदन' औषधम् | ३६ |
| **ज** | |
| जम्ब्वादिस्वरसः | १३९ |
| जलबन्धुरसः (सन्निपाते) | २७९ |
| जातीफलादिचूर्णम् (ग्रहण्याम्) | १८७ |
| जात्यादिघृतम् (व्रणेषु) | २१९ |
| जात्यादितैलम् (नाडिव्रणे) | २२९ |
| जिह्वारोगसंख्या | ११० |
| जीवनीयगणः | १८० |
| 'जृम्भा' लक्षणम् | ७५ |
| जैपालशोधनम् | २८४ |
| ज्वरगणना | ७६ |
| ज्वरघ्नी गुटिका | २६५ |
| ज्वराङ्कुशरसः (ज्वरे) | २६४ |
| ज्वरारिरसः (,,) | ,, |
| **त** | |
| **तण्डुलजलम्** | **१४२** |
| तण्डुलीयकल्कः (प्रदरे) | १७६ |
| 'तन्मात्रा' निरूपणम् | ६४ |
| तर्पणम् | ३८४ |
| तापस्वेदः | २९९ |
| ताम्रशोधनम् | २४४ |
| ,, भस्मविधिः | ,, |
| तालशुद्धिः | २५१ |
| तालीसादिचूर्णम् (अरोचके) | १९३ |
| तालुरोगसंख्या | ११० |
| तित्तिरपुटपाकः | १४२ |
| 'तिल' वर्णनम् | ५७ |
| तिलकल्कः (अर्शसि) | १७७ |
| तुत्थशोधनम् | २४९ |
| तुम्बुरादिचूर्णम् (शूले) | १९० |
| तुलसीस्वरसः | १३९ |
| तुषाम्बुकाञ्जिकम् | २३४ |
| तृष्णासंख्या | ८४ |

| विषयः | पृष्ठं. |
|---|---|
| तैल्ययोग्याः प्राणिनः | २८८ |
| **तैलसाधनपद्धतिः** | **२१२** |
| त्रिकण्टकपयः (कफज्वरे) | १६[illegible] |
| त्रिनेत्ररसः (शूले) | २१८ |
| त्रिफलाक्वाथः (प्रमेहे) | १[illegible] |
| त्रिफलाचूर्णम् (मेदआदौ) | १[illegible] |
| १. त्रिफलादिक्वाथः (कृमिरोगे) | १५[illegible] |
| २. ,, ,, (कामलादौ) | ,, |
| ३. ,, ,, (पित्तशूले) | १[illegible] |
| ४. ,, ,, (व्रणशोथे) | १[illegible] |
| त्रिफलादिगुग्गुलुः (भगन्दरे) | [illegible] |
| त्रिफलादिघृतम् (नेत्रेषु) | [illegible] |
| त्रिफलादितैलम् (कुष्ठे) | [illegible] |
| त्रिफलादिमोदकाः (कुष्ठे) | २[illegible]५ |
| त्रिविक्रमरसः (अश्मर्याम्) | २[illegible] |
| त्रिवृतादिकल्कः (कृमिषु) | २[illegible] |
| त्रिवृतादिचूर्णम् (वैरेचनम्) | ३[illegible] |
| त्रिषष्टिरसभेदाः | [illegible] |
| त्रिसुगन्धम् | १८[illegible] |
| त्र्यूषणचूर्णम् (दीपनम्) | १[illegible] |
| **द** | |
| दन्तरोगसंख्या | १०८ |
| दन्तवर्तिः (लेखनी) | ३[illegible] |
| दरदशोधनम् | २६१ |
| दरदाद्रसाकृष्टिः | २६१ |
| १. दशमूलक्वाथः (ज्वरे) | १[illegible] |
| २. ,, ,, (गृध्रस्याम्) | १५[illegible] |
| ३. ,, ,, (हृद्रोगे) | १५[illegible] |
| दशमूलारिष्टः (प्रसूतिरोगादौ) | २[illegible] |
| दशाङ्गलेपः | ३[illegible]६ |
| दाडिमाष्टकम् (दीपनम्) | १८[illegible] |
| दाडिमीपुटपाकः | १[illegible] |
| दारुणे लेपाः | ३[illegible] |
| दार्व्यादिक्वाथः | १[illegible]८ |

| विषयः | पृष्ठं. |
|---|---|
| दाहसंख्या | ८५ |
| दीपनपाचनाध्यायः (४) | ३४ |
| दीपिकातैलम् (कर्णशूले) | ३७१ |
| दुर्वान्तलक्षणम् | ३०८ |
| दूतलक्षणम् | २९ |
| देवदार्वादिक्वाथः (ज्वरादौ) | १५१ |
| ,, ,, (चातुर्थिकज्वरे) | १५२ |
| देवदार्वाद्यरिष्टः (मेहघ्नः) | २३७ |
| द्रवस्वेदः | ३०२ |
| द्रव्य–व्यवस्था | ११–१६ |
| द्रव्येषु रसादीनां व्यवस्था | १८ |
| द्राक्षारिष्टः (उरःसंधानकृत्) | २३८ |
| द्रोणपुष्पीस्वरसः | १३९ |
| **ध** | |
| धत्तूरतैलम् (वाते) | २३२ |
| धातुशोधनम् | २४१ |
| धान्यनागरक्वाथः | १५२ |
| धान्यपञ्चकक्वाथः | १५२ |
| धूमनाडीविधानम् | ३४९ |
| **धूमपानविधिः** | **३४७** |
| धूमसंख्या | ३४७ |
| **न** | |
| नयनामृताञ्जनम् | ३९० |
| नवायसचूर्णम् (पाण्डुरोगे) | १९६ |
| नस्यधारणमात्रा | ३४५ |
| नस्यभेदाः | ३३९ |
| नस्ययोग्या अयोग्या नराः | ३४० |
| **नस्यविधिः** | **३३८** |
| नस्यशुद्धिलक्षणम् | ३४५ |
| नागशोधनम् | २४५ |
| नागभस्मविधिः | ,, |
| ,, द्वितीयविधिः | ,, |
| १. नागरादिक्वाथः (पाचनः) | १५२ |
| २. ,, ,, (वातशूले) | १५७ |
| **नाडीपरीक्षा** | २८ |
| नाडीपरीक्षादिविधि-रध्यायः (३) | २८ |
| नाराचचूर्णम् (आध्माने) | १८९ |

| विषयः | पृष्ठं. |
|---|---|
| नाराचरसः (शूलेषु) | २७२ |
| नारायणचूर्णं (उदरघ्नं) | १८८ |
| नारायणतैलम् (वातरोगे) | २२३ |
| नासारोगसंख्या | ११४ |
| 'निद्रा'-लक्षणम् | ७४ |
| निम्बकल्कः (व्रणे) | १७४ |
| निम्बबीजतैलम् (पलिते) | २२८ |
| **निरूहबस्तिविधिः** | **३३०** |
| निरूह्याः प्राणिनः | ३३१ |
| निदिग्धिकादिक्वाथः | १५० |
| नीलाञ्जनशोधनम् | २५१ |
| नीलिकातैलम् (केशकल्पे) | २२८ |
| नीलोत्पलादिहिमः (वातपित्तज्वरे) | १७३ |
| नेत्ररोगसंख्या | ११७ |
| नेत्ररोगे लेपः | ३६० |
| नेत्रप्रसादनाञ्जनम् | ३९५ |
| नेत्रप्रसादनकर्माणि | ३७९ |
| न्यग्रोधादिक्वाथः | १५८ |
| **प** | |
| पञ्चकर्मजरोगाः | १३२ |
| पञ्चकोलम् | १८० |
| पञ्चतिक्तघृतम् (विषमज्वरे) | २२२ |
| पञ्चनिम्बचूर्णम् (कुष्ठादौ) | १९४ |
| पञ्चभद्रक्वाथः | १४८ |
| पञ्चवल्कलक्वाथः (व्रणे) | १६४ |
| पञ्चमूलकषायः (मेदोरोगे) | १५९ |
| पञ्चमूलीपयः (सर्वज्वरेषु) | १६७ |
| पञ्चवक्त्ररसः (सन्निपाते) | २७१ |
| पञ्चसमचूर्णम् (शूले) | १८९ |
| १. पटोलादिक्वाथः (ज्वरे) | १५१ |
| २. ,, ,, (उपदंशे) | १६१ |
| ३. ,, ,, (वातरक्ते) | ,, |
| पथ्यादिक्वाथः (यकृत्प्लीहादौ) | १६० |
| पथ्यादिषडङ्गक्वाथः (शिरोरोगे) | १६२ |

| विषयः | पृष्ठं. |
|---|---|
| पलिते नस्यम् | २२८ |
| ,, लेपाः | ३५८ |
| पश्चात्स्वेद्याः | २९८ |
| 'पाचनं' औषधम् | ३६ |
| पाठादितैलम् (पीनसे) | २३० |
| पाण्डुरोगसंख्या | ८१ |
| पादरोगसंख्या | १३१ |
| **पानकल्पना** | **१६५** |
| पानीयकल्याणघृतम् (अपस्मारादौ) | १७२ |
| पारदशोधनम् | २५८ |
| ,, भस्मनः १ विधिः | २६३ |
| ,, ,, २ विधिः | २६४ |
| ,, ,, ३ विधिः | ,, |
| ,, ,, ४ विधिः | ,, |
| पारदस्य मुखकरणम् | २६१-२ |
| **पिच्छलबस्तिविधिः** | **३३४** |
| पिंडतैलम् (वातरक्ते) | २२७ |
| **पिंडिकाप्रयोगाः** | **३८२** |
| ,, विधानम् | ३८२ |
| पिप्पलीचूर्णम् (ज्वरे) | १७९ |
| ,, ,, | १८३ |
| पिप्पल्यादिकल्कः (ऊरुस्तम्भे) | १७५ |
| पिप्पल्यादिचूर्णम् (ग्रहण्याम्) | १८६ |
| पिप्पल्यादिनस्यम् | ३४१ |
| पिप्पल्यादिमोदकाः (ज्वरघ्नाः) | २०० |
| पिप्पल्यासवः (क्षयादिषु) | २३६ |
| पित्तरोगसंख्या | १०६ |
| पित्तरक्ते लेपः | ३६१ |
| पुंस्त्वदोषाः | १२५ |
| **पुटपाकविधिः** | **३४१** |
| १. पुनर्नवादिक्वाथः (शोथोदरे) | १५५ |
| २. ,, ,, (शोथे) | १६० |
| ३. ,, ,, (पाण्डुरोगे) | १५४ |

| विषयः | पृष्ठं. |
|---|---|
| पुष्पवर्तिः | ३९१ |
| पुष्पहरलेखनाञ्जनम् | ३९२ |
| **पेयाविधिः** | **१६८** |
| पेशीवर्णनम् | ५६ |
| प्रकृतिविवरणम् | ६५ |
| प्रकृतिवृत्तान्तः | ७३ |
| प्रतिमर्शनस्यम् | ३४१ |
| प्रधमननस्यम् | ३४१ |
| **प्रमथ्याविधिः** | **१६४** |
| 'प्रमाथि' द्रव्यम् | ३९ |
| प्रमेहरोगसंख्या | ९० |
| प्रमेहपिडकासंख्या | " |
| प्रतिसारणचूर्णम् ( मुखपाके ) | ३५४ |
| **प्रतिमर्शनस्यविधिः** | **३४४** |
| **प्रलेपविधिः** | **३५५** |
| **प्रलेपस्यान्यविधिः** | **३६२** |
| प्राक्स्वेदाः | २९७ |
| प्राणहरद्रव्यम् | ३९ |
| प्लीहासंख्या | ५७ |
| **फ** | |
| फलघृतम् ( वन्ध्यादोषे ) | २२१ |
| **फाण्टकल्पना** | **५७** |
| 'फुप्फुस' वर्णनम् | ५७ |
| **ब** | |
| बब्बूल–स्योनाक-कुटजानां स्वरसाः | १३९ |
| बब्बूलारिष्टः ( क्षये ) | २३८ |
| बलादितैलम् ( वायुरोगे ) | २२४ |
| बस्तिकरणप्रकारः | ३२१ |
| बस्तिमात्रा | ३२३ |
| **बस्तिविधिः** | **३१९** |
| बस्तिव्यापच्चिकित्सा | ३२८ |
| बस्तेः कालनियमः | ३२२ |
| बालरोगसंख्या | १३० |
| बाहुशालगुडः ( अर्शोरोगे ) | १९७ |
| बिभीतकपुटपाकः | १४३ |
| बिल्वादितैलम् ( बाधिर्ये ) | २३० |
| बीजपूर-पुटपाकः | १४२ |
| बीजपूर–स्वरसः | १४० |
| बीजपूरादिक्वाथः | १४७ |
| 'बुद्धि' प्रभृतिवर्णनम् | ६३ |
| ब्राह्मीस्वरसः | १४० |
| बृंहण–नस्यकल्पना | ३४२ |
| **बृंहणबस्तिः** | **३३४** |
| बृहत्कट्फलादिचूर्णम् ( कासे ) | १८३ |
| बृहत्क्षुद्रादिक्वाथः | १५१ |
| बृहद्गङ्गाधरचूर्णम् ( प्रवाहिकायां ) | १८४ |
| बृहद्दाडिमाष्टकचूर्णम् ( अतीसारे ) | १८६ |
| बृहन्मधूकफाण्टः ( रक्तपित्ते ) | १७१ |
| बृहद्गुडूच्यादिक्वाथः | १५२ |
| **भ** | |
| **भक्तसाधनविधिः** | **१६८** |
| भगन्दरसंख्या | ९६ |
| भगसंकोचनलेपः | ३६७ |
| भूनिम्बादिक्वाथः | १४८ |
| भृङ्गराजतैलम् ( पलिते ) | २२९ |
| 'भेदन' औषधम् | ३५ |
| भैषज्यग्रहणकालः | १६ |
| भैषज्याख्यानकाध्यायः ( २ ) | १६ |
| **म** | |
| मज्जायोग्यप्राणिनः | २८९ |
| **मण्डविधिः** | **१६८** |
| मण्डूरशोधनम् | २५६ |
| ,, भस्मविधिः | ,, |
| ,, वटकाः (कामलादौ) | २०० |
| मदकारिद्रव्यम् | ३९ |
| मदनकामदेवरसः ( वाजीकरः ) | २८२ |
| मदरोगसंख्या | ८५ |
| मद्यभेदानां लक्षणम् | २३३ |
| मधुतैलबस्तिः | ३३५ |
| मधुशुक्तम् | २३० |
| मधूकसारादिनस्यम् | ३४२ |
| मनःशिलाशोधनम् | २५१ |
| **मन्थविधिः** | **१७१** |
| मन्थानभैरवरसः ( कफरोगे ) | २७९ |
| मरिचादिगुटिका ( कासादौ ) | १९८ |
| ,, चूर्णम् ( उदरे ) | १८४ |
| ,, नस्यम् | ३४२ |
| मरीच्यादितैलम् ( कुष्ठे ) | २२७ |
| ,, हिमः ( तृष्णादौ ) | १७२ |
| १. मसूरघृतम् ( शिरोरोगे ) | २२१ |
| २. ,, ,, ( अतीसारे ) | २१६ |
| मसूरादिमन्थः ( छर्द्यां ) | १७१ |
| महाखाण्डवचूर्णम् ( रुचिदं ) | १८७ |
| महाज्वरांकुशरसः ( विषमज्वरे ) | २७० |
| महातालेश्वररसः | २७५ |
| महातिक्तघृतम् (वातरक्ते) | २१८ |
| महानिम्बकल्कः ( गृध्रस्यां ) | १७४ |
| महावह्निरसः ( विरेचने ) | २७८ |
| महारास्नादिक्वाथः | १५६ |
| माक्षिकशोधनमारणम् | २४९ |
| मागधपरिभाषा | ६ |
| **मानपरिभाषा** | **१२** |
| माषादितैलम् ( वातघ्नं ) | २२५ |
| ,, नस्यम् | ३४४ |
| ,, मोदकाः ( पुष्टिकराः ) | २०६ |
| मुक्ताञ्जनम् (नेत्रप्रसादनम्) | ३९५ |
| मुखरोगसंख्या | १०८ |
| मुण्डीस्वरसः | १०४ |
| मुशल्यादिचूर्णम् ( पुष्टिदं ) | १९६ |
| मुस्तादिक्वाथः | १५१ |

| विषयः | पृष्ठं. |
|---|---|
| मूत्रकृच्छ्रसंख्या | ८९ |
| मूत्राघातसंख्या | ,, |
| मूर्च्छासंख्या | ८४ |
| **मूर्धतैलविधिः** | **३६२** |
| मृगशृङ्गपुटपाकः | १४४ |
| मृगांकपोटलीरसः ( क्षये ) | २६८ |
| मृद्वीकारिष्टः ( क्षये ) | २३६ |
| मेदोरोगसंख्या | ९० |
| मेहवज्ररसः ( मेहेषु ) | २७७ |
| **य** | |
| यकृन्निरूपणम् | ५७ |
| यवक्षारादिचूर्णम् ( कासे ) | १८४ |
| यवशक्तुमन्थः | १७२ |
| यवागूः | १६४ |
| **यवागूप्रक्रिया** | **१६७** |
| यवानीखांडवचूर्णम् ( रुचिकरं ) | १९२ |
| यष्टीमधुकतैलम् ( पलिते ) | ३२८ |
| यष्टीवसापूरणम् ( कर्णशूले ) | ३७१ |
| **यापनबस्तिः** | **३३५** |
| **युक्तरथबस्तिः** | **३३५** |
| यूषः | १६५ |
| **यूषविधिः** | **१६८** |
| योगराजगुग्गुलुः | २०२ |
| योनिद्रावणलेपः | ३६८ |
| योनिरोगसंख्या | १२७ |
| **र** | |
| रक्तजनकानि | ३८ |
| रक्तपित्तसंख्या | ८१ |
| रक्तरोगसंख्या | १०७ |
| रक्तलक्षणम् | ३७४ |
| रक्तस्रावयोग्याः | ३७५ |
| **रक्तस्रावविधिः** | **३७३** |
| रक्तस्रावाऽयोग्याः | ३७६ |
| रजतशुद्धिः | २४३ |
| ,, भस्मविधिः | ,, |
| ,, २ विधिः | ,, |
| रन्ध्राणि | ५७ |
| रसक्रिया ( नेत्रयोः ) | ३९२ |
| रसकशुद्धिः | २५१ |
| रसशोधनम् | २५८ |
| १. रसस्य मुखकरणम् | २६१ |
| २. ,, ,, | २६२ |
| ३. ,, ,, | ,, |
| 'रसायन' निरुक्तिः | ३७ |
| १ रसोनकल्कः ( वाते ) | १७४ |
| २ ,, ,, ( ,, ) | १७५ |
| राजमृगांकरसः ( क्षयेषु ) | २७३ |
| रास्नादिक्वाथः ( अन्त्रवृद्धौ ) | १६० |
| रास्ना-पञ्चकम् | १५५ |
| ,, सप्तकम् | ,, |
| 'रेचन' द्रव्यम् | ३६ |
| रेणुकाक्वाथः | १५५ |
| रोगगणनाध्यायः ( ७ ) | ७६ |
| रोहितकारिष्टः ( ग्रहण्याम् ) | २३९ |
| **ल** | |
| लघुक्षुद्रादिक्वाथः | १४८ |
| ,, गंगाधरचूर्णम् ( अतीसारे ) | १८४ |
| ,, फलघृतम् ( योनिदोषे ) | २२२ |
| ,, मञ्जिष्ठादिक्वाथः ( वातरक्ते ) | १६२ |
| ,, मधुकपुष्पादिफांटः ( तृषादौ ) | १७१ |
| ,, सूचिकाभरणरसः ( त्रिदोषे ) | २७० |
| लवंगादिचूर्णम् ( राजार्हम् ) | १८६ |
| लवणत्रितयचूर्णम् ( यकृति ) | १९० |
| ,, पञ्चफलम् | १८१ |
| ,, भास्करचूर्णम् | १९४ |
| 'लेखन' द्रव्यम् | ३७ |
| लेखनपुटपाकः | |
| **लेखनबस्तिः** | **३३४** |
| लोकनाथरसः ( क्षयेषु ) | २६६ |
| लोहशुद्धिः | २४६ |
| ,, भस्म | ,, |
| ,, ,, २ विधिः | २४७ |
| ,, ,, ३ विधिः | ,, |
| लोहरसायनम् | २८३ |
| लोहासवः ( पांडुरोगे ) | २३६ |
| **व** | |
| वंगशोधनम् | २४५ |
| ,, भस्मविधिः | ,, |
| ,, ,, २ विधिः | ,, |
| वचातैलम् ( गंडमालायां ) | २३२ |
| वज्रशोधनम् | २५३ |
| ,, १ मारणम् | ,, |
| ,, २ विधिः | ,, |
| वज्रीतैलम् ( कुष्ठे ) | २३१ |
| वत्सकादिक्वाथः | १५३ |
| वदरीमूलकल्कः ( अतीसारे ) | १७६ |
| वमनद्रव्यम् | ३६ |
| **वमनविधिः** | **३०४** |
| ,, वेगाः | ३०७ |
| वमनार्हरोगाः | ३०५ |
| वमने क्वाथमानम् | ३०६ |
| ,, ,, पानमात्रा | ,, |
| ,, क्वाथे कल्कादिमानम् | ३०७ |
| ,, प्रस्थादिमानम् | ३०७ |
| ,, पथ्यापथ्यम् | ३१० |
| वमनोत्पन्नरोगचिकित्सा | ३०८ |
| वरादिक्वाथः | १५८ |
| वरुणादिक्वाथः ( विद्रधौ ) | १६० |
| वर्धमानपिप्पल्यः ( जीर्णज्वरे ) | १७४ |
| वर्ण्यलेपः | ३५७ |
| वशीकरणलेपः | ३६८ |
| वसन्तकुसुमाकररसः ( मेहेषु ) | २७२ |
| वसायोग्याः प्राणिनः | २८९ |
| वाकुचीक्वाथः ( श्वित्रे ) | १६२ |
| ,, बीजप्रयोगः ( ,, ) | ३५९ |

| विषयः | पृष्ठं. |
|---|---|
| 'वाजीकरण' द्रव्यम् | ३८ |
| **वाट्यमंडः** | **१६९** |
| वातरक्ते लेपः | ३६१ |
| वातविसर्पादौ लेपाः | ३६१ |
| वातव्याधिसंख्या | १०३ |
| वातादिदोषविवरणम् | ४९–५२ |
| वाताशनरसः ( वातव्या० ) | २७९ |
| वान्तलक्षणम् | ३१७ |
| वाम्याः | ३०४ |
| वारुणीविधिः | २३४ |
| वारुणीतैलम् ( कम्पे ) | २२४ |
| वासकादिस्वरसः | १३९ |
| १. वासादिक्वाथः ( नेत्रे ) | १६३ |
| २. ,, ,, ( कासे ) | १५४ |
| ३. ,, ,, ( रक्तपित्ते ) | ,, |
| वासापुटपाकः | १४३ |
| 'विकाशि' द्रव्यम् | ३९ |
| विडङ्गारिष्टः ( विद्रधि० ) | २३७ |
| **विडालविधिः** | **३८३** |
| विद्याधररसः ( गुल्मे ) | २७८ |
| विद्रधिसंख्या | ९३ |
| ,, रोगे लेपः | ३६५ |
| विरेकातियोगचिकित्सा | ३१८ |
| विरेचनकालः | ३१२ |
| ,,—मात्रा | ३१३ |
| ,,—फलम् | ३१८ |
| ,,—विधिः | ३११ |
| विरेचनद्रव्याणां परिमाणम् | ३१४ |
| विरेचनाऽयोग्याः | ३१३ |
| विरेचनार्हाः | ,, |
| विरेचने एरण्डतैलप्रयोगः | ३१५ |
| **विलेपीविधिः** | **१६८** |
| विषघ्नलेपः | ३५६ |
| विषरोगसंख्या | १३२ |
| विषशोधनम् | २८४ |
| विष्णुकान्ताकल्कः ( शूले ) | १७५ |
| विसर्परोगसंख्या | १०२ |
| वीरतर्वादिगणः | १५७ |

| विषयः | पृष्ठं. |
|---|---|
| वृद्धदारुमोदकाः ( अर्शोघ्नाः ) | १९९ |
| वृद्धिरोगसंख्या | ९२ |
| वृषणौ | ५९ |
| वैकान्तभस्म | २५३ |
| वैरेचननस्यम् | ३०४ |
| 'व्यवायि' द्रव्यम् | ३८ |
| व्याघ्रीचूर्णम् ( ऊर्ध्ववाते ) | १९४ |
| व्याघ्रीतैलम् ( पीनसेषु ) | २३१ |
| व्योषादिगुटिका ( ,, ) | १९९ |
| व्रणरोगसंख्या | ९३ |
| व्रणलेपविषयाः | ३६३ |
| व्रणस्य सप्तविषये लेपाः | ३६४ |
| **श** | |
| शतावरीचूर्णम् ( वाजीकरणम् ) | १९५ |
| ,,—तैलम् ( वाते ) | २२६ |
| ,,—स्वरसः | १४० |
| शम्बूकतैलम् ( कर्णशूले ) | ३७२ |
| शरीरपोषणादि-व्यापारक्रमः | ५९–६३ |
| शल्योपद्रवरोगसंख्या | १३२ |
| शाखोटकादिक्वाथः ( श्लीपदे, मेदोरोगे च ) | १६० |
| शालिपर्णीकाश्मरीकट्फलद्राक्षाणां क्वाथः | १४६ |
| शालिपर्ण्यादिक्वाथः | १५३ |
| सिराविभागः | ५४ |
| शिरोरोगसंख्या | ११५ |
| शिरोरोगघ्ना लेपाः | ३६१ |
| १. शिलाजतुशोधनम् | २५४ |
| २. ,, ,, २ प्रकारः | २५५ |
| शीतोपद्रवरोगसंख्या | १३३ |
| शीतज्वरारिरसः | २६५ |
| शुक्रम् | २३४ |
| शुक्रदोषाः | १२६ |
| १. शुंठीकल्कः ( शूले ) | १७६ |
| २. ,, ,,( संग्रहण्याम् ) | १७७ |
| शुंठीचूर्णम् ( श्वासे ) | १९२ |

| विषयः | पृष्ठं. |
|---|---|
| १. शुंठीपुटपाकः | १४३ |
| २. ,, ,, | ,, |
| शूकदोषसंख्या | ९७ |
| शूलगजकेसरीरसः | २७८ |
| शूलसंख्या | ८६ |
| शृंगीचूर्णम् ( कासे ) | १८३ |
| शेषरत्नानां शोधन-मारणम् | २५४ |
| **शोणितस्रावविधिः** | **३७३** |
| शोथ-संख्या | ९१ |
| 'शोधन'–द्रव्यम् | ३६ |
| शोधन–बस्तिः | ३३४ |
| श्वाससंख्या | ८७ |
| श्वित्रे लेपाः | ३५९ |
| श्लीपदसंख्या | ९३ |
| श्लीपदे लेपः | ३६६ |
| **ष** | |
| षडङ्गपानम् | १६५ |
| षड्ऋतुषु विरेचनम् | ३१५ |
| षड्बिन्दुघृतम् ( वैरेचनम् ) | २१९ |
| **स** | |
| 'संशमन' औषधम् | ३५ |
| सञ्जीवनीवटी ( त्रिदोषे ) | १९८ |
| **सण्डाकीविधानम्** | **२३५** |
| **सत्वप्रकारः** | **२५२** |
| **सन्धानकल्पना** | **२३२** |
| सन्निपातभैरवरसः | २८० |
| सन्निपाते–अञ्जनम् | २७२ |
| सप्त–आशयाः | ४४ |
| ,,—कलाः | ४२ |
| ,,—त्वचः | ४९ |
| ,,—धातवः | ४५ |
| ,,—धातुमेदाः | ४७ |
| ,,—मलाः | ४६ |
| सप्तोपधातवः | ,, |
| सर्पविषे–जयपालवर्तिः | |
| सर्पियोग्या नराः | २८८ |

| विषयः | पृष्ठं. |
|---|---|
| सर्वेश्वररसः ( कुष्ठे ) | २७६ |
| सितोपलादिचूर्णम् (कासादौ) | १९३ |
| सितादिपरिमाणम् | २०६ |
| **सिद्धबस्तिः** | **३३५** |
| सिध्मे लेपाः | ३६० |
| **सीधुलक्षणम्** | **२३३** |
| सुदर्शनचूर्णम् ( ज्वरेषु ) | १८२ |
| **सुरालक्षणम्** | **२३४** |
| सूक्ष्मद्रव्यम् | ३८ |
| सूरणपिंडी ( अर्शस्सु ) | १९९ |
| ,,–पुटपाकः ( ,, ) | १४३ |
| ,,–वटकाः ( ,, ) | १९९ |
| सूरणावलेहः (,,) | २१० |
| सूर्यावर्तरसः ( श्वासे ) | २७४ |
| सृष्टिक्रमः | ६२ |
| **सेक-विधिः** | **३७९** |
| सैंधवादिनस्यम् ( तंद्रायाम् ) | ३४२ |
| 'स्तम्भन' औषधम् | ३७ |
| स्त्रीरोगसंख्या | १२६ |
| स्नायूनां विवरणम् | ५२ |
| स्नेहः केवलद्रवैः साधनम् | २१४ |
| स्नेहः पुष्पकल्केन साधनम् | २१४ |
| स्नेहपानमात्रा | २८६ |
| स्नेहपानविधिः | २८५ |
| **स्नेहपरिभाषा** | **२१२** |
| स्नेहनपुटपाकः | २९१ |
| स्नेहसिद्धिलक्षणम् | २१४ |
| स्नेहाऽजीर्णे चिकित्सा | २९० |
| स्नेहाऽयोग्याः | २९२ |
| स्नेहस्य चतुर्विधत्वम् | २१४ |
| स्नेहस्य चतुःषष्टिर्विचारणाः | २९१ |
| स्नेहे क्वाथपाकलक्षणम् | २१३ |
| स्नेहे जलपरिमाणम् | २१२ |
| स्योनाकतैलम् ( कर्णशूले ) | ३७१ |
| 'स्रंसन' औषधम् | ३५ |
| स्वच्छन्दभैरवरसः ( वाते ) | २७४ |
| स्वप्नलक्षणानि | ३२ |
| स्वरभेदसंख्या | ८४ |
| स्वर्जिकातैलम् ( कर्णे ) | ३७१ |
| स्वर्णशुद्धिः | २४१ |
| १. ,, भस्म | ,, |
| २. ,, ,, | २४२ |
| ३. ,, ,, | ,, |
| ४. ,, ,, | ,, |
| ५. ,, ,, | ,, |
| स्वर्णक्षीरीरसः (कुष्ठे) | २७७ |
| स्वेदकालः | २९४ |
| स्वेदयोग्याः | २७९ |
| ,, अयोग्याः | २९९ |
| **स्वेदविधिः** | **२९४** |
| स्वेदसंख्या | २९५ |
| स्वेदे अवगाहनकालनियमः | ३०२ |
| ,, ,, फलम् | ३०३ |
| **ह** | |
| हंसपोट्टलीरसः (ग्रहण्यां) | २७४ |
| हपुषादिचूर्णम् (अजीर्णे) | १८९ |
| हरीतक्यादिक्वाथः | १५७ |
| ,, चूर्णम् (आमातीसारे) | १८४ |
| हलीमकसंख्या | ८१ |
| हिक्कासंख्या | ८३ |
| हिंग्वादिचूर्णम् (शूले) | १९२ |
| हिंग्वादितैलम् (कर्णे) | २२९ |
| **हिमकल्पना** | **१७२** |
| हृद्रोगसंख्या | ८७ |
| १. हेमगर्भपोट्टलीरसः ( क्षयेषु ) | २६९ |
| २. ,, ,, ,, | ,, |
| ह्रीबेरादिक्वाथः | १५३ |

श्रीधन्वन्तरये नमः ।

भिषग्वरेण श्रीदामोदरसूनुना श्रीशार्ङ्गधरेण विरचिता

# शार्ङ्गधरसंहिता ।

## भिषग्वराढमल्लविरचितदीपिकाख्यटीकया तथा श्रीकाशीरामवैद्यविरचित-गूढार्थदीपिकाख्यटीकया च समुद्दीपिता ।

करशिरसाच्युतमीशं भवभवपुष्टिक्षयालयमुपायम् । स्वर्गापवर्गयोरपि तापत्रयनाशनार्थमभिवन्दे ॥ १ ॥
सगणगणेशं मतिदं विघ्नसमूहांश्च हन्ति यः स्मरणे । तदनु गुरोरपि चरणं गदहान्यै दीनमनुजानाम् ॥ २ ॥

ये दुर्जनाः परगुणाननुसूचयन्ति तेऽपि स्वभाववशगाः किमु वारणीयाः ।
ये शास्त्रबोधगुणदोषविचारदक्षास्ते सज्जनाः प्रणुतिभिः खलु वन्दनीयाः ॥ ३ ॥

श्री**वास्तव्य**कुलप्रकाशमणयो ये पूर्वजा विश्रुताः श्री**हम्मीरपुरे** महाजनतले येषां स्थितिः कथ्यते ।
ये कामं मदविह्वलामिव रवैः क्षीराब्धिपारंगतामत्याश्चर्यसुचन्द्रकान्तिविततां प्रख्यातकीर्तिं गताः ॥ ४ ॥

तदन्वये किं बहुना प्रसिद्धः श्री**चक्रपाणिः** कुलकैरवेन्दुः ।
नानागुणालीयमभूच्च यस्य समस्तवैद्योद्धटनादिरूपा ॥ ५ ॥

तस्य बुद्धिसुभगस्य तनूजो **भावसिंह** इति भूपतिमान्यः ।
सुश्रुतादिकरहस्यविधिज्ञो यो यशांसि विपुलानि (चै) लेभे ॥ ६ ॥

तस्यात्मजो दीर्घमतिः प्रहृष्टो नाम्नाऽऽ**ढमल्लो**ऽल्पनिबन्धदर्शी ।
तेन स्वगुर्वर्चनतत्परेण विधास्यते **शार्ङ्गधर**प्रकाशः ॥ ७ ॥

केचिच्छास्त्रविशारदाः कतिपये दिव्यौषधीकोविदा
नानाव्याधिपरीक्षणेषु चतुराः कर्मोत्सुकाश्चापरे ।
कामं तानधिकर्तुमुत्सुकमना नाहं समर्थो यत-
स्तेषां सन्निधिमेत्य चात्र रचितं यत्किञ्चिदेव श्रुतम् ॥ ८ ॥

**हस्तीकान्तपुरी** पुरा पुरजिता काशीव विद्वज्जनै-
र्व्याप्ता यत्र सरःसरिद्गुणवरा **चर्मण्वती** पापहा ।
यस्यां हृद्गतवासुदेवचरणद्वन्द्वाम्बुजः क्ष्मापतिः
ख्यातो धर्म इवास्ति धर्मगतिषु **श्रीजैत्रसिंहः** प्रभुः ॥ ९ ॥

तस्यां **शार्ङ्गधरो**क्तानां योगानां च प्रकाशिनी । क्रियते साऽऽ**ढमल्लेन** संहितायाः **प्रदीपिका** ॥ १० ॥
अभिनवनिबन्धरचनां श्रोतुं कः कोऽत्र लोलुपो भवति । यः कृपया परकाव्यं पश्यति सर्वं स वै वीरः ॥ ११ ॥

---

१—'मदविह्वलेऽम्बदरिक्षीराद्धिकृष्यो गतः' इति पाठान्तरम् । २—'सत्साश्चर्यं' पाठान्तरम् । ३—'च' त्रुटितो भवेत् ।

अथेह पृथुतरदुरधिगमायुर्वेदतत्त्वाङ्कितसद्ग्रन्थपरिसमाप्त्यर्थं श्रोतृणामपि प्रत्यूहव्यपोहार्थं मनसि विशिष्टेष्टदेवताप्रणामपूर्वकमाशीर्वृत्तमादौ निबद्धवान् ग्रन्थकारः । तद्यथा—

मङ्गलाचरणम् ।

**श्रियं स दद्याद्भवतां पुरारि-**
**र्यदङ्गतेजःप्रसरे भवानी ।**
**विराजते निर्मलचन्द्रिकायां**
**महौषधीव ज्वलिता हिमाद्रौ ॥ १ ॥**

श्रियमित्यादि । यदङ्गतेजःप्रसरे भवानी विराजते स पुरारिर्भवतां श्रियं दद्यादित्यन्वयः । यथा हिमाद्रौ ज्वलिता महौषधी राजते । क्व सत्यां । निर्मलचन्द्रिकायां निर्मला या चन्द्रिका ज्योत्स्ना तस्यामित्यर्थः । निर्मलचन्द्रिकायामित्यस्य स्थाने निर्मलचन्द्रिकात इति केचित् पठन्ति व्याख्यानयन्ति च । पुरारिः पुरनामा दैत्यविशेषः स एवारिर्यस्य, यद्वा पुरस्यारिः पुरारिः शिव इत्यर्थः । श्रियमिति कल्याणं लक्ष्मीं वा । भवतामित्यत्र यस्मै दित्सा रोचते धारयते वा तत् सम्प्रदानमित्यनेन चतुर्थी न स्यादित्यत आह—'विवक्षातः कारकाणि भवन्ति' इति न्यायादिह दित्सार्थे षष्ठ्यपि भवतीत्यर्थः । यदङ्गतेजःप्रसरे तेजःसमूहे अर्धाङ्गे इति सम्बन्धः । एतेन विभूत्यलिप्ताङ्गस्यापि शुभ्रत्वादद्रिसाम्यम् । 'भवानी पार्वती चण्डी'त्यमरः । अनेनाशीर्निर्देशं कथितवानाचार्यः । यतः—'आशीर्नमस्क्रियावस्तुनिर्देशो वाऽपि तन्मुखम्' इति त्रिविधं प्रबन्धमुखलक्षणं भवति । आशीर्ग्रहणमत्र दुष्कृतादीनां विपाकजन्यदुःखस्वरूपरोगनिवृत्त्यर्थं तन्निवृत्त्या सुखश्रियःप्राप्तिरिति भावः ॥ १ ॥

ॐ **गू०**—शार्ङ्गधरसंहितार्थमहं व्याख्यातुमारभे । तत्र सिद्धिं दिशतु मां विघ्नाधीशो गणाधिपः ॥ परमनिपुणो ग्रन्थकृत्प्रारिप्सितनिर्विघ्नपरिसमाप्तये तदध्येतृणामपि प्रत्यूहव्यूहोपशान्तये अध्ययननिर्वाहाय व्युत्पत्तये च आशीर्वादरूपमङ्गलमाचरति । तस्य च कर्तव्यतायां शिष्टाचारः प्रमाणम् । श्रियं स दद्यादित्यादि । सः भवतां श्रियं लक्ष्मीं दद्यात् पुरो दैत्यस्तस्यारिः श्रीमान्महादेवः, अथवा श्रीशब्देन संपत् । यदुक्तं 'लक्ष्मीसरस्वतीधात्रिवर्गसंपद्विभूतिशोभासु । उपकरणवेशरचनाविधासु च श्रीरिति प्रथिते'ति व्याडिः । स कः । यदङ्गतेजःप्रसरे भवानी विराजते, यस्य शंभोर्यदङ्गं तस्य तेजःप्रसरः प्रचारः तस्मिन्भवानी पार्वती विराजते शोभते । कस्मिन् कस्यां केव ? हिमाद्रौ निर्मलचन्द्रिकायां ज्वलिता महौषधीव हिमाद्रौ हिमपर्वते निर्मलचन्द्रिकायां चन्द्रज्योत्स्नायां मध्ये यथा ज्वलिता महौषधी राजते तद्वदियमपि कर्पूरगौरवत्तया हिमाद्रिवत् शम्भो प्रतीतस्य पार्श्वे महौषधीव भवानी विराजते इत्यर्थः ॥ १ ॥

**गू०**—आदौ चिकित्सानिमित्तमुत्कृष्टयोगसंहारार्थं पद्यमाह—

**प्रसिद्धयोगा मुनिभिः प्रयुक्ता-**
**श्चिकित्सकैर्ये बहुशोऽनुभूताः ।**
**विधीयते शार्ङ्गधरेण तेषां**
**सुसंग्रहः सज्जनरञ्जनाय ॥ २ ॥**

**दीपिका**—अथ ग्रन्थोऽयं सकलजनोपकारार्थं भवतु इति मत्वा सद्ग्रन्थस्य सम्बन्धः कथनीयः । तद्यथा 'सिद्धिः श्रोतृप्रवृत्तीनां सम्बन्धकथनाद्यतः । तस्मात् सर्वेषु शास्त्रेषु सम्बन्धः पूर्वमुच्यते ।' इति । अनेन तावत् पूर्वं तमाह—प्रसिद्धयोगा इत्यादि । ये प्रसिद्धयोगाः सन्ति तेषां सुसंग्रहः सज्जनरञ्जनाय मया शार्ङ्गधरेण विधीयते विशेषेण क्रियत इत्यभिप्रायः । ननु क्रियते यतश्चरकसुश्रुतादिमुनिभिरितस्ततो विस्तृता मया संहृत्य प्रकारान्तरेण लिख्यत इति भावः । एतेन ग्रन्थस्य विशिष्टत्वं दर्शितम् । कीदृशा योगाः ? मुनिभिः प्रयुक्ता इति । त्रैकालिकदर्शी पुरुषातिशयो हि मुनिरुच्यते । तैः पूर्वं कथिता इत्यर्थः । एतेन ग्रन्थस्य प्रामाण्यं कथितम् । पुनः कीदृशाः ? चिकित्सकैर्वैद्यैर्बहुशो वारंवारमनुभूता । नामरूपप्रयोजनादिभिर्दृष्टप्रत्यया इत्यर्थः । एतेनात्र सज्जनानां दर्शनाद्युत्कण्ठा स्यादित्यभिप्रायः ॥ २ ॥

**गू०**—प्रसिद्धेति । मुनिभिः प्रयुक्ता ये सिद्धयोगाः चिकित्सकैर्बहुशः अनुभूताश्च योगाः चिकित्साधिकारिणः तेषां योगानां सुसंग्रहः **शार्ङ्गधरेण** विधीयते कथ्यते । युज्यत इति योगः क्वाथचूर्णादिगणः ॥ २ ॥

**गू०**—औषधयोगानां प्रयोगस्तु हेत्वादिभिर्व्याधिं ज्ञात्वा कर्तव्यस्तद्विज्ञानार्थं श्लोकमाह—

**हेत्वादिरूपाकृतिसात्म्यजाति-**
**भेदैः समीक्ष्यातुरसर्वरोगान् ।**
**चिकित्सितं कर्षणबृंहणाख्यं**
**कुर्वीत वैद्यो विधिवत्सुयोगैः ॥ ३ ॥**

**दी०**—इदानीं 'रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्' इत्यादि मतमालोच्य **शार्ङ्गधरो**ऽप्याह—हेत्विति । वैद्य आतुरसर्वरोगान् समीक्ष्य पश्चात् चिकित्सितं विधिवत् कुर्वीतेति । अन्यथा दोषः स्यात् । तथाह्युक्तम्—'यस्तु रोगमविज्ञाय कर्माण्यारभते भिषक् । न स सिद्धिमवाप्नोति न सुखं न परां गतिम्' इति । कैः कृत्वा समीक्ष्येत्याह—हेतुर्निदानम्, आदिरूपं पूर्वरूपम्, आकृतिः स्वरूपम्, सात्म्यमुपशयः, जातिः सम्प्राप्तिरिति; एषां भेदैः नानात्मकत्वेन एते व्यस्ताः समस्ताश्च व्याधिबोधका ज्ञेया इत्यर्थः । यद्वा हेतुरादिर्येषां ते हेत्वादयः, ते च रूपादयश्च तैरित्यर्थः । एतेन हेत्वादिपञ्चभिः रूपादिभिश्च आतुररोगान् परीक्ष्येति भावः । तथाहि वाग्भटे—'दर्शनस्पर्शनप्रश्नैः परीक्षेताथ रोगिणम् । रोगं निदानप्राग्रूपलक्षणोपशयाप्तिभिः' इति । हेत्वादिपञ्चकं पूर्वं व्याख्यातमेव । रूपादित्रयं यथा—रूपमिति चाक्षुषं तेन शरीरस्य स्थूलकृशतावर्णविकारादयः, एतेन दर्शनज्ञानमलङ्करोति । आकृतिरिति आसमन्तादेव कृतिः कृतिकारणमिति ससुचितकौशल्येनैव नाड्यादिभिः शीतोष्णादिकज्ञानरूपमित्यर्थः, एतेन स्पर्शनज्ञानमलङ्करोति । सात्म्येन हितं कथ्यते भवतां किं सात्म्यमित्यादिवाक्येन प्रश्नज्ञानमलङ्करोति । अथवा सात्म्यमभिलषितं वदन्त्यन्ये यतो येन यद्वाञ्छितं भवति तस्य तेनैव दोषादीनां क्षीणवृद्धत्वं ज्ञायते, इति दर्शनादिकं त्रयं कथितम् । जातिशब्देन विशिष्टेन्द्रियज्ञानमभिधीयते । यतः—सुश्रुते 'षड्विधो हि रोगाणां विज्ञानोपायः, तद्यथा पञ्चभिः श्रोत्रादिभिः प्रश्नेन चेति' । अतो दर्शनादयस्त्रय एवादौ व्याख्याताः, शेषाः श्रोत्रादयो जातिभेदेन कथिताः । तदुक्तं **सुश्रुता**चार्येण 'तत्र श्रोत्रेन्द्रियविज्ञेया विशेषा रोगेषु प्रणष्टशल्यविज्ञानीयादिषु वक्ष्यन्ते सफेनं रक्तमीरयन्ननिलः सशब्दो निर्गच्छतीत्येवमादयः । स्पर्शनेन्द्रियविज्ञेयाः शीतोष्णश्लक्ष्णकर्कशमृदुकठिनत्वादयः स्पर्शविशेषा ज्वरशोथादिषु । चक्षुरिन्द्रियविज्ञेयाः शरीरोपचयापचयायुर्लक्षणबलवर्णविकारादयः । रसनेन्द्रियविज्ञेयाः प्रमेहादिषु रसविशेषाः । गन्धेन्द्रियविज्ञेया रिष्टलिङ्गादिषु व्रणानामव्रणानां च गन्धविशेषाः' । इति हेत्वादयो व्याख्याताः, तत्राद्यः पक्षो व्यवहारसिद्धो द्वितीयस्तु कल्पितोऽपि साधुः । समीक्ष्येति सम्यक् प्रकारेण विचार्य, एतद्ग्रहणं तज्ज्ञानविच्छेदार्थम् । यतः 'मिथ्यादृष्टा विकारा हि दुराख्यातास्तथैव च । तथा दुःपरिदृष्टाश्च मोहयेयुश्चिकित्सकम्' इति । चिकित्सा रोगापनयनं कर्म व्याधिप्रतीकारः धातुसाम्यार्था क्रिया चेत्यादिपर्यायवाचकैः शब्दैश्चिकित्सा कथिता । तथाचोक्तं—'चतुर्णां भिषगादीनां शस्तानां धातुवैकृते । प्रवृत्तिर्धातुसाम्यार्था चिकित्सेत्यभिधीयते' इति । तच्चात्र द्विविधं कर्म कर्षणबृंहणाख्यमिति । कर्षणमिति प्रवृत्तदोषाणां, बृंहणमिति क्षीणानाम्; तथाच—'क्षीणा वर्धयितव्या' इत्यादि । तथा—'रोगस्तु दोषवैषम्यं दोषसाम्यमरोगिता' इति वचनात् । सुयोगैरिति शोभनद्रव्यकृतप्रयोगैः शीघ्रमारोग्योत्पादकैरित्यर्थः ॥ ३ ॥

**गू०**—हेत्वादीत्यादि । हेत्वादिरूपाकृतिसात्म्यजातिभेदैः आतुरस्य सर्वरोगान् समीक्ष्य दृष्ट्वा वैद्यः कर्षणबृंहणाख्यं चिकित्सितं कुर्वीतेत्यन्वयः । कर्षणं कृशीकरणं बृंहणं बलवर्धनं आख्या नाम यस्य तत् चिकित्सितं हेत्वादिसरूपं च आकृतिश्च सात्म्यं च जातिभेदश्च ते हेत्वादिरूपाकृतिसात्म्यजातिभेदास्तैः हेत्वादीनि निदानपञ्चकहेतुर्निदानं, रूपं गौरादिर्वर्णविशेषः । तथा चक्षुषा यद्ग्राह्यं वस्तुजातं संस्थानादि तदपि रूपम् । आकृतिस्तु चक्षुरादीन्द्रियस्वरप्रतिच्छायाक्रियादिषु अन्येष्वपि भावेषु प्राकृतेषु निमित्ततः विकृतिर्या समासेऽरिष्टं तदिति लक्षयेत् । सात्म्यं देशादि तैः, आदिशब्दात्प्राग्रूपारूपोपशयसंप्राप्तयो गृह्यन्ते हेत्वादिरूपं हेत्वादिकास्तन्वैः तेन आकृत्या च सात्म्येन च जातिः संप्राप्तिः तस्या ये भेदाः संख्याविकल्पप्राधान्यबलकालाः । वैद्यः आतुरस्य सर्वरोगान् समीक्ष्य प्रोक्तं चिकित्सितं कुर्वीत व्याधेः कियन्तोऽप्युपाया भवन्ति ॥ ३ ॥

**दी०**—इदानीं द्रव्याणां विविधप्रभावाः सन्ति तेषां हेतुभिः परीक्षां निराकर्तुमाह—

**दिव्यौषधीनां बहवः प्रभेदा**
**वृन्दारकाणामिव विस्फुरन्ति ।**
**ज्ञात्वेति संदेहमपास्य धीरैः**
**संभावनीया विविधप्रभावाः ॥ ४ ॥**

**टी०**—दिव्यौषधीनामिति । दिव्यौषधीनां बहवो भेदा वृन्दारकाणामिव विस्फुरन्ति प्रकटीभवन्ति इत्यर्थः–इति ज्ञात्वा विचार्य तदा सन्देहमपास्य दूरीकृत्य विविधप्रभावा अपरिमितशक्त्योऽविच्छिन्नशक्त्यो वा सम्भावनीयाः तेषां सम्भावना कर्तव्येत्यर्थः । धीरैरिति ज्ञेयम् । एतेनाऽचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इति तात्पर्यार्थः । दिव्यौषधीनामिति दिव्यग्रहणमत्र द्रव्याणां विशिष्टत्वज्ञानार्थम् । वृन्दारकाणामिति यथा देवानां भेदा अपरिमितास्तथैव द्रव्यभेदा इत्यभिप्रायः । प्रभावाश्चेत्यचिन्तनीयाः । धीरैरिति गम्भीरबुद्धिभिः । धीरा हि बाह्याध्यात्मिकानां हिताहितपरिच्छेदकारिणो भवन्ति, अतो धीरग्रहणमत्रानिश्चयार्थज्ञापकत्वव्यवच्छेदार्थम् ॥ ४ ॥

**गू०**—दिव्येति । अस्यार्थः-दिव्यौषधीनां बहवः प्रभेदाः विस्फुरंति तान् ज्ञात्वा संदेहं वापास्य धीरैः विविधप्रभावाः संभावनीया विचारणीयाः । वृन्दारका देवास्तेषामिव यथा देवानां बहवः प्रभेदास्तथौषधीनामिति । दिव्या या ओषध्यः तासां बहवः प्रभेदा विस्फुरन्ति । केषामिव ? वृन्दारकाणामिव तान्भेदान् वनस्थानादिभ्यः ज्ञात्वा संदेहं अपास्य दूरीकृत्य कर्म कारयेदित्यर्थः ॥४॥

**टी०**—अथ प्रयोजनमपि सर्वस्यैव स्यात् तथाहि—'सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित् । यावत् प्रयोजनं नोक्तं तावत् केन न गृह्यते' इति, अत एव तदधिकृत्याह—

**स्वाभाविकागन्तुककायिकान्तरा**
**रोगा भवेयुः किल कर्मदोषजाः ।**
**तच्छेदनार्थं दुरितापहारिणः**
**श्रेयोमयान्योगवरान्नियोजयेत् ॥ ५ ॥**

**टी०**—स्वाभाविकेति—स्वाभाविकादयो रोगाः कर्मदोषजा भवेयुः । किलेत्यागमनिश्चयार्थम् । तच्छेदनार्थं तेषामुपशमननिमित्तम् । योगवरान् प्रयोगश्रेष्ठान् नियोजयेत्; एतेन समस्तार्थतन्त्राभ्यन्तरस्थान् योगान् विचिन्त्य आचार्येणात्र ते योज्यन्त इति भावः । स्वाभाविका इति स्वभावेन भवाः स्वाभाविकाः, ते क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः । आगन्तुका इति अभिघातनिमित्ताः; ते व्यालादिकृताश्च । कायिकान्तरा इति शारीरा अन्तर्जाताश्च शारीरास्तेऽन्नपानमूलाः । वातादिदोषद्वाराऽस्रक्पित्तकासादयः, अन्तःशब्देन मनोऽभिधीयते, तदुद्भवा मानसा इत्यर्थः । ते कामक्रोधादिनिमित्ता मदमूर्च्छासंन्यासग्रहभूतोन्मादादय इति । सुश्रुते स्वाभाविकादयो दर्शिताः । **कर्मदोषजा** इति । एके कर्मजाः, एके दोषजाः, अपरे कर्मदोषजाश्च । तथा चोक्तम्—'कर्मप्रकोपेण कदाचिदेके दोषप्रकोपेण भवन्ति चान्ये । तथाऽपरे प्राणिषु कर्मदोषप्रकोपजाः कायमनोविकाराः' इति । कर्मजादीनां संज्ञा केषाञ्चिज्ज्ञापनार्थं लिख्यते यथा—'ये चामयाः स्युरपरद्रविणापहाराद्गुर्वङ्गनागमनविप्रवधादिभिर्ये । दुष्कर्मभिस्तनुभृतामिह कर्मजास्ते नोपक्रमेण भिषजामुपयान्ति शान्तिम् ॥' किञ्च—'दानैर्दयादिरतिथिद्विजदेवतानां गुर्वर्चनाप्रणतिभिश्च जपैस्तपोभिः । इत्युक्तपुण्यनिचयैरुपचीयमानाः प्राक्कर्मजा अपि रुजः प्रशमं प्रयान्ति' इति । अथ दोषजा यथा—'स्वहेतुदुष्टैरनिलादिदोषैरुपप्लुतैः खेषु परिस्खलद्भिः । भवन्ति ये प्राणभृतां विकारास्ते दोषजा भेषजसिद्धिसाध्याः' । उभयोत्पन्ना यथा—'दानादिभिः कर्मभिरौषधैश्च कर्मक्षये दोषपरिक्षये च । सिध्यन्ति ये रत्नवतां कदाचित् ते कर्मदोषप्रभवा विकाराः ॥' इति । दुरितापहारिण इति दुरितशब्देन दुःखमभिधीयते तत्संयोगा व्याधय इत्युक्तत्वात् । श्रेयोमयानिति पुण्यस्वरूपान् । येऽन्येपि पुण्यमयास्ते दुःखच्छेदनाय सम्भवन्ति, उच्यते—'परदुःखविनाशार्थं महान्तो निजशक्तिभिः । कर्म कुर्वन्ति यत् पुण्यं तेन पुण्यमयाः स्मृताः' इति ॥ ५ ॥

**गू०**—स्वाभाविकागन्तुककायिकान्तरा रोगाश्चतुर्धा भवेयुः कर्मजा दोषजाः कर्मदोषजाश्चेति त्रिधा भवेयुः । स्वभावेन भवन्तीति स्वाभाविकाः क्षुत्पिपासाजरानिद्रामृत्युप्रभृतयो भवेयुः । किलेति निश्चयेन कर्मदोषजा भवेयुः । तच्छेदनार्थं दुरितापहारिणो योगान्नियोजयेदित्यन्वयः । किंविशिष्टान्योगान् ? श्रेयोमयान् तत्र स्वाभाविका रोगाः क्षुत्पिपासादयः, आगन्तुका भूताभिषङ्गादयः, कायिका अजीर्णादयः, आन्तराः मानसिकाः कामादयः, कर्मजा दोषजाः कर्मदोषजाः, यथा 'ब्रह्महा क्षयरोगी स्यात्' दोषवातपित्तकफजन्याः, तच्छेदनार्थं तेषां दोषाणां छेदनार्थं दुरितापहारिणः रोगापहारिणः वरान् श्रेष्ठान् योजयेत् । किंविशिष्टान् ? श्रेयोमयान् कल्याणदायिन इत्यर्थः ॥ ५ ॥

**टी०**—इदानीं प्रत्यक्षसिद्धयोगानां कथनेन संक्षेप-

करणेन च निजग्रन्थस्य माहात्म्यमाह—

**प्रयोगानागमात्सिद्धान्प्रत्यक्षादनुमानतः ।**
**सर्वलोकहितार्थाय वक्ष्याम्यनतिविस्तरान्[1] ॥ ६ ॥**

**दी०**-प्रयोगानिति । आगमादिसिद्धान् प्रयोगान् सर्वलोकहितार्थाय अनतिविस्तरान् वक्ष्यामि कथयिष्यामीत्यर्थः । अनतिविस्तरं यथा स्यादित्येके पठन्ति । आगमादीनां लक्षणं तु जैज्जटादिभिराचार्यैरुक्तं तदेव सुबोधार्थं लिख्यते । यथा—आगमो वेदः, आप्तानां शास्त्रं वा । तथाहि—'सिद्धं सिद्धैः प्रमाणैस्तु हितं चात्र परत्र च । आगमः शास्त्रमाप्तानामाप्ताः सत्यार्थवेदिनः' इति । आगमात् सिद्धाः श्रूयन्ते-यथा-'जीवेद्वर्षसहस्राणि योगस्यास्य प्रभावतः । वृद्धा च शतवर्षीया भवेत् षोडशवार्षिकी' इत्यादि । प्रत्यक्षमिति यत्किंचिदेवार्थस्य साक्षात्कारि ज्ञानं तदेव प्रत्यक्षं, तथाहि—'मनोक्षिगतमभ्रान्तं वस्तु प्रत्यक्षमुच्यते । इन्द्रियाणामसंज्ञानं वस्तु नह्रि भ्रमः स्मृतः ।' इति । तत् सिद्धा यथा वमनवैरेचनादिकयोगाः प्रत्यक्षफलाः । अनुमानत इति अनु पश्चादव्यभिचारिलिङ्गाल्लिङ्गी ज्ञायते येन तदनुमानम् । तत् सिद्धा यथा मृत्पाण्डुरोगेण मृद्भक्षणमनुमीयते, छर्द्यां मक्षिकादिभक्षणं, त्वक्परिपाटनादिभिः पक्वामव्रणमिति । केन हेतुना त्वया क्रियते इति विवक्षायां सर्वलोकहितार्थायेतिग्रहणं कृतम् । सर्वलोक इति लोको हि द्विविधः स्थावरजङ्गमात्मकभेदेन । अत्र पुरुषप्राधान्याज्जना एव लोकशब्देन गृह्यन्ते । आर्षेणाऽपि ग्रन्थेन ज्ञानं भविष्यति किमनेन तदुपजीविना ग्रन्थेनेत्याशङ्क्यानतिविस्तरानिति ग्रहणं कृतम् न अतिशयेन विस्तरो यत्र तानिति । यतो बहुप्रपञ्चरचितान्यूहापोहपूर्वपक्षसमाधानादिना तन्त्राणि सोद्वेगकराणि भवन्ति तस्मात् संक्षिप्याभुलिखामीत्यर्थः ॥ ६ ॥

**गू०**-प्रत्यक्षादनुमानतः आगमात्सिद्धान् प्रयोगान् अनतिविस्तरान् अल्पानित्यर्थः ॥ ६ ॥

**दी०**—अथानुक्रमणिकामाह—

**प्रथमं परिभाषा स्याद्भैषज्याख्यानकं तथा ।**
**नाडीपरीक्षादिविधिस्ततो दीपनपाचनम् ॥ ७ ॥**
**ततः कलादिकाख्यानमाहारादिगतिस्तथा ।**
**रोगाणां गणना चेति पूर्वखण्डोऽयमीरितः[2] ॥ ८ ॥**

**दी०**-अथेति । अथशब्द आनन्तर्यार्थे मङ्गलार्थे वा । अनुक्रमणिका इति अध्यायानामनुक्रमणं त्रिखण्डानामित्यर्थः । इदानीं तामनुक्रमणिकां दर्शयितुमाह —प्रथममित्यादि । परिभाषादिरोगगणनान्तैः सप्तभिरध्यायैः कृत्वा पूर्वखण्डोऽयमीरितः कथित इत्यर्थः, आचार्येण इति शेषः । ते के अध्याया इत्याह—प्रथममिति । प्रथममादौ परिभाषा तुलनादिकम् । द्वितीये भैषज्याख्यानकम् । भैषज्याख्यानकमित्यौषधभक्षणविधिः । तथेति ग्रहणात् द्रव्यरसगुणविपाकादीनां कथनं ऋतुषट्कथनं च । नाडीपरीक्षादिविधिरिति तृतीयम् । आदिग्रहणादिह स्वप्नादीनां कथनम् । ततोऽनन्तरं दीपनपाचनादिलक्षणकथनं चतुर्थम् । आदिशब्दात् स्रंसनभेदनानुलोमनवमनलेखनस्तम्भनादिकथनम् । ततोऽनन्तरं कलादिकाख्यानमिति पञ्चमं, आदिग्रहणात् सृष्टिक्रमशारीरादिकथनम् । तथैवानन्तरं आहारादिगतिरिति षष्ठम् । आदिशब्दात् गर्भोत्पत्तिकुमारपोषणोक्तप्रकृतिलक्षणकथनं च । रोगाणां गणना चेति इतिशब्देनावशिष्टं सप्तममित्यर्थः, एतेन साध्याय उक्ता रोगा ज्वरादयस्तेषां गणना संख्याकथनमिति पूर्वखण्डाध्यायानुक्रमः कथितः ॥ ७-८ ॥

**गू०**—अत्र प्रथमं परिभाषा स्यात् भवेत् । कुतः यतः मानेन विना द्रव्याणां गतिः क्वचिन्न ज्ञायते । अतः औषधसंख्याज्ञापनाय आदौ मानमुच्यते, ततो भैषज्याख्यानकं, औषधग्रहणपञ्चकालद्रव्यादिषड्ऋतुकथनं, ततः नाडीपरीक्षा आदिशब्दात्स्वप्नलक्षणं दूतलक्षणं शकुनं रोगिलक्षणं च ततो दीपनपाचनं दीपनमग्निदीपनं पाचनं आमादिशमनं ततः कलादिकशारीरं सृष्टिक्रमं च ततः आहारादिगतिः आदिशब्दाद्गर्भोत्पत्तिकुमारादिपोषणप्रभृतिलक्षणानि रोगाणां गणना इति पूर्वखण्ड ईरितः कथितः । इतिपदं समाप्त्यर्थं द्योतयति ॥ ७-८ ॥

**दी०**—अथ मध्यमखण्डानुक्रमणिकां दर्शयन्नाह—

**स्वरसः क्वाथफाण्टौ च हिमः कल्कश्च चूर्णकम् ।**
**तथैव गुटिकालेहौ स्नेहः सन्धानमेव च ॥ ९ ॥**
**धातुशुद्धी रसाश्चैव खण्डोऽयं मध्यमः स्मृतः ।**

**दी०**—स्वरस इत्यादि । स्वरसादिरसान्तैर्द्वादशभिरध्यायैर्मध्यमः खण्डः स्मृतः, कथित इत्यर्थः । स्वरसादयो विख्याता एव ते चाग्रे वक्ष्यमाणाः सन्ति ।

[1]—'विस्तराद' पा० । [2]—'चैव' पा०

तत्र स्वरसेषु पुटपाकविधिकथनम् । क्वाथे प्रमथ्यायुष्णोदकक्षीरपाकाद्यक्रियाविधिकथनम् । फाण्टे मन्थविधिकथनम् । स्नेहग्रहणाद्घृतकल्पना तैलकल्पना च । सन्धानमित्यनेन मद्यभेदकथनम् । धातुशुद्धिरित्यत्र समस्तधातूपधातूनां शोधनमारणादिकथनम् । रसा इति बहुवचनेन सर्वेषां रसोपरसादीनां शोधनमारणादिकथनम् । इति मध्यमखण्डस्याध्यायानुक्रमो व्याख्यातः ॥ ९ ॥

**गू०**—तदादौ स्वरसः पुटपाकश्च ततः क्वाथादि ततः फाण्टः द्विवचनात्पयो(?) पि । ततः हिमः, ततः कल्कः, ततः चूर्णं, ततः गुटिका, ततोऽवलेहः, स्नेहः घृततैले, ततः संधानं आसवारिष्टं, ततः धातुशुद्धिः द्विवचनान्मारणरसकथनं इत्ययं मध्यमः खण्डः स्मृतः कथितः ॥ ९ ॥

**दी०**—इदानीमुत्तरखण्डानुक्रममाह—

**स्नेहपानं स्वेदविधिर्वमनं च विरेचनम् ॥ १० ॥**
**ततस्तु स्नेहबस्तिः स्यात्ततश्चापि निरूहणम् ।**
**ततश्चाप्युत्तरो बस्तिस्ततो नस्यविधिर्मतः ॥ ११ ॥**
**धूमपानविधिश्चैव गण्डूषादिविधिस्तथा ।**
**लेपादीनां विधिः स्यात्तस्तथा शोणितविस्रुतिः॥१२॥**
**नेत्रकर्मप्रकारश्च खण्डः स्यादुत्तरस्त्वयम् ।**

**दी०**—स्नेहपानमिति । स्नेहपानादिनेत्रकर्मप्रकारान्तैस्त्रयोदशभिरध्यायैरुत्तरः खण्डः स्यात् । तत्र धूमपाने व्रणधूपनं गृहधूपनं च, गण्डूषे कवलादीनां लक्षणग्रहणात् कवलप्रतिसारणकथनम् । प्रलेपेत्यादिग्रहणान्मूर्धतैलकर्णपूरणविधिकथनम् । शेषं सुबोधम् । इत्युत्तरखण्डाध्यायानुक्रमः कथितः ॥ १०–१२ ॥

**गू०**—तत्रादौ चतुर्विधस्नेहपानं ततः स्वेदविधिः ततश्च वमनं ततो विरेचनं ततः स्नेहबस्तिः, ततो निरूहणबस्तिः ततोऽप्युत्तरबस्तिः, ततो नस्यविधिः ततो धूमपानविधिः ततो गण्डूषः आदिशब्दात्कवलविधिश्च ततो लेपविधिः आदिशब्दान्मूर्धतैलकर्णपूरणविधिः ततो शोणितमोक्षः ततो नेत्रकर्मप्रकारः इत्येवमुत्तरखण्डः ॥ १०–१२ ॥

**दी०**—इदानीं संहितानिरुक्तिपूर्वकं श्लोकसंख्यामाह—

**द्वात्रिंशत्संमिताध्यायैर्युक्तेयं संहिता स्मृता ॥ १३ ॥**
**षड्विंशतिशतान्यत्र श्लोकानां गणितानि च ।**

**दी०**—द्वात्रिंशदिति । यतः पूर्वोक्तानां त्रिखण्डानां द्वात्रिंशदध्यायैर्युक्तेयं तस्मात् संहिता कथिता । संमितस्थाने संहित इति केचित् पठन्ति । तत्रापि स एवार्थः । अत्र संहितायां श्लोकानां गणितानि गणनानि षड्विंशतिशतानि भवन्तीत्यध्याहार्यम् । अध्याय इति पदसमूहो वाक्यं, वाक्यसमूहः प्रकरणं, प्रकरणसमूहोऽध्याय इति ॥ १३ ॥

**गू०**—इयं **शार्ङ्गधर**नाम्नी संहिता स्मृता कथिता । किंविशिष्टेयं? द्वात्रिंशदध्यायैः संमिता च सम्यक् प्रकारेण रचिता च । अत्र अस्यां गणितानि षड्विंशतिशतानि श्लोकानां संतीति शेषः ॥ १३ ॥

## अथ मागधपरिभाषा ।

**न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित् ॥१४॥**
**अतः प्रयोगकार्यार्थं मानमत्रोच्यते मया ।**

**दी०**—अथेदानीं तावत् पूर्वं परिभाषां दर्शयितुमाह—न मानेनेति । मानेन परिमाणेन विना द्रव्याणां युक्तिः कर्तव्यविधिः क्वचित् कुत्राऽपि न जायते नोत्पद्यते अत इत्यस्मात् प्रयोगकार्यार्थं प्रयोगाणां योगानां कार्यार्थं कर्तव्यविधिनिमित्तं मानं तुलनादि अत्र संहितायां मया आचार्येण उच्यते कथ्यते इत्यर्थः । भक्ष्यमानव्यवच्छेदार्थमुक्तं तद्भक्ष्यमानं वक्ष्यमाणमप्यस्ति इति ॥ १४ ॥

**गू०**—अथ परिभाषामानेन विना द्रव्याणां युक्तिः न ज्ञायते नोत्पद्यते अतः अस्मात्प्रयोगकार्यार्थं मया मानं उच्यते । तन्मानं द्विविधं, तदुक्तं ग्रन्थान्तरे-'कालिङ्गं मागधं चेति द्विविधं मानमुच्यते । मागधं प्रवरं प्राहुः कालिङ्गं च तदुत्तरम्' इति ॥ १४ ॥

## मागधीयं मानम्—

**त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः ॥ १५ ॥**
**त्रसरेणुस्तु पर्यायनाम्ना वंशी निगद्यते ।**

**दी०**—इदानीं परमाण्वादिगम्यमानार्थं लक्षणान्याह—त्रसरेणुरिति । परमाणुभिर्यस्त्रिंशता स एव त्रसरेणुः प्रोक्तः कथितो बुधैस्तद्वेदिभिः पुरुषैः । परमाणुः सुसूक्ष्मः स्वभावतो ग्राह्यो न चक्षुषा अनुमानेन चेति केचित् । तथाहि—'जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः । तस्य त्रिंशत्तमो भागः परमाणुः स उच्यते ॥' इति । त्रिंशतेति परमाणूनां दशत्रिसंख्यैरित्यर्थः । त्रसरेणुरेव पर्यायनाम्ना एकार्थवाचक-

शब्देन कृत्वा ध्वंसीति निगद्यते कथ्यते । यत्र समानार्थकता शब्दानां तत्र ते पर्याया उच्यन्ते इत्यर्थः । ध्वंसीलक्षणं तु एतस्मात्रे केचित् पठन्ति । यथा—'जालान्तरगतैः सूर्यकरैर्ध्वंसी विलोक्यते' इति । सूर्यकरैरादित्यरश्मिभिः ॥ १५ ॥

**गू॰**—बुधैस्त्रिंशत्परमाणुभिः त्रसरेणुः प्रोक्तः स एव त्रसरेणुः पर्यायशब्देन वंशी निगद्यते ॥ १५ ॥

**जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः ॥१६॥**
**तस्य त्रिंशत्तमो भागः परमाणुः स कथ्यते ।**
**जालान्तरगतैः सूर्यकरैर्वंशी विलोक्यते ॥ १७ ॥**

**गू॰**—त्रिंशतेत्यत्र विंशत्याद्याः सदैकत्वे भवन्ति तस्माद्बहुवचनान्तपरमाणोर्लक्षणं दर्शयति'जालान्तरगते सूर्ये यत्सूक्ष्मं दृश्यते रजः । तस्य त्रिंशत्तमो भागः परमाणुः स उच्यते' भवेदिति शेषः । वंशरंध्रं प्रविष्टं यद्रजस्तद्वंशी तस्मात्त्रिंशता परमाणुना या संख्या सा वंशीत्यर्थः ॥ १६ ॥ १७ ॥

**दी॰**—अथ मरीचिप्रभृतीनां परम्परामाह—

**षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिस्तु राजिका ।**
**तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः ॥ १८ ॥**
**यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम् ।**
**षड्भिस्तु रक्तिकाभिः स्यान्माषको हेमधान्यकौ ॥१९॥**

**दी॰**—षड्वंशीभिरिति । षड्वंशीभिरेका मरीचिर्भवेदिति । मरीचिभिर्मानसंज्ञकाभिर्मरीचिभिः षड्भिः संख्याभिरेका राजिका कथिता इत्यध्याहारः । राजिका सर्षपभेदः, तिसृभी राजिकाभिरिति राजिकात्रितयेनैकः सर्षपः प्रोच्यते कथ्यते बुधैरिति । सर्षपग्रहणेनात्र गौरसर्षपो ज्ञेय इति प्रसिद्धिः । अष्टसर्षपैः कृत्वा एको यवः कथितः । यवोऽन्नविशेषः । गुञ्जामाह—तच्चतुष्टयमानेन गुञ्जा स्यात्, तेन एका गुञ्जा कथिता इत्यभिप्रायः, गुञ्जा रक्तिका वाच्या । अथ माषकमाह—षड्भिः षट्संख्याभी रक्तिकाभिर्गुञ्जाभिरेको माष इति ख्यातः, स एव हेमधान्यकपर्यायनाम्ना कथित इति लभ्यते, क्वचित् सप्तभिः क्वचित् पञ्चभिर्दशभिर्वा गुञ्जाभिः कृत्वा माषकः कथितः स एव माषको मरीच्यादिभिर्विचार्यमाणोऽत्र न विरुद्धः, तच्च विस्तरभयान्न लिख्यते ॥ १८ ॥ १९ ॥

**गू॰**—बुधैः तिसृभिः राजिकाभिः सर्षपः प्रोच्यते अष्टसर्षपैर्यवः प्रोक्तः तच्चतुष्टयं गुञ्जा स्यात् षड्भी रक्तिकाभिः माषकः स्यात् स एव माषकः पर्यायशब्देन हेमश्च निगद्यते धान्यकश्च निगद्यते ॥ १८ ॥ १९ ॥

**दी॰**—इदानीं शाणपरिमाणं कोलपरिमाणं च वक्तुमाह—

**माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते ।**
**टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते ॥ २० ॥**
**क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ।**

**दी॰**—माषैरिति । चतुर्भिर्माषकैरेकः शाणो धरणं टङ्कश्च कथितः । माषोऽत्र षड्भिर्गुञ्जाभिस्तुलित इति सर्वत्र । तद्द्वयमिति शाणद्वयेनैवैकः कोलः । कोलो बदरसंज्ञ इति केचित् । तस्य पर्यायवाचकाः क्षुद्रमोटरकद्रंक्षणादयः, तेऽत्र टङ्कद्वयमानसंज्ञका बोद्धव्याः ॥२० ॥

**गू॰**—चतुर्भिर्माषैः शाणः स्यात् स एव धरणो निगद्यते स एव शाणः पर्यायशब्देन टङ्कः कथितः, तद्द्वयं टङ्कद्वयं कोल उच्यते स एव कोलपर्यायशब्देन क्षुद्रक उच्यते वटकश्चोच्यते द्रंक्षणश्च निगद्यते अमूनि टङ्कद्वयस्य नामानीत्यभिप्रायः ॥ २० ॥

**दी॰**—कर्षमाह—

**कोलद्वयं च कर्षः स्यात्स प्रोक्तः पाणिमानिका ॥२१॥**
**अक्षं पिचुः पाणितलं किंचित्पाणिश्च तिन्दुकम् ।**
**बिडालपदकं चैव तथा षोडशिका मता ॥ २२ ॥**
**करमध्यो हंसपदं सुवर्णं कवलग्रहः ।**
**उदुम्बरं च पर्यायैः कर्ष एव निगद्यते ॥ २३ ॥**

**दी॰**—कोलद्वयमिति । कोलद्वितयमेव कर्षः

---

१—दीपिकामते प्रक्षिप्तमिदम् । २—सूर्ये इति पाठः । ३—शार्ङ्गधरमते इत्यर्थः ।

१—यत्र माषकः पञ्चभिर्गुञ्जाभिस्तत्र पञ्चवंशीभिर्मरीचिका, पञ्च मरीचिभिरेका राजिका, सार्धद्वयराजिकाभ्यामेकः सर्षपः, सप्तसर्षपैरेको यवः, त्रियवैनैका गुञ्जा, पञ्चगुञ्जाभिरेको माषक इत्युत्तरोत्तरं ज्ञेयम्, सप्तभिर्गुञ्जाभिरेको माषक इति पक्षे किंचिद्वर्धनीयम्, दशभिर्गुञ्जाभिरेको माषक इति पक्षे च दशवंशीभिर्मरीचिकेत्याद्यूह्यम् । २—'क्षुद्रमोटरकश्चैव द्रंक्षणं तन्निगद्यते' इति दीपिकासंमतः पाठः ।

स्यात्, स चतुःशाण इत्यर्थः । तस्य पर्यायसंज्ञका पाणिमानिकादयः । पाणिमानिका करतलं बिडुरिति भावः । अक्ष इति बिभीतकफलं तच्च कर्षमानसंज्ञम् । तिन्दुकं तिन्दुकफलम् । बिडालपदकं अङ्गुलित्रयग्राह्यं चूर्णद्रव्यं तत् कर्षसंज्ञमित्यर्थः । षोडशिका षोडशमाषकपरिमितेत्यर्थः । शेषं सुगमम् ॥ २१-२३ ॥

**गू०**—कोलद्वयं कोलयोः द्वयं कर्षः स्यात् पाणिमाणिकाद्या उदुंबरान्तं कर्षस्य पर्यायवाचकाः चतुर्भिष्टङ्कैः कर्षः स्यादित्यर्थः ॥ २१-२३ ॥

**दी०**—अर्धपलं पलमानं चाह—

**स्यात्कर्षाभ्यामर्धपलं शुक्तिरष्टमिका तथा ।**
**शुक्तिभ्यां च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका ॥ २४ ॥**
**प्रकुञ्चः षोडशी बिल्वं पलमेवात्र कीर्त्यते ।**

**दी०**—स्यात् कर्षाभ्यामिति । कर्षद्वयेनार्धपलं कथितं, तदेव शुक्तिः । अष्टमिका च शुक्तिः प्रसिद्धा, अष्टमिका अष्टशाणसंज्ञमानविशेषः । पलमप्याह—शुक्तिभ्यामिति । शुक्तिद्वयेनैव पलं बोद्धव्यम् । पलं प्रसिद्धम् । एतस्यापि मुष्ट्यादयः पर्यायवाचका ज्ञेयाः । अत्र मुष्ट्यादिषु पलमेव कीर्त्यते नान्यत् । मुष्टिर्नखान्तमुष्टिः । आम्रं फलम् । चतुर्थिकेति चतुःकर्ष इति भावः । षोडशी षोडशशाणमितः, शाणोऽत्रैवोक्तो ज्ञातव्यः, न तु व्यावहारिकः । बिल्वं बिल्वफलं एतत् संज्ञा पले बोद्धव्या ॥ २४ ॥

**गू०**—द्वाभ्यां कर्षाभ्यामर्धपलं स्यात् अर्धपलमेव शुक्तिः अष्टमिका च सैव पर्यायशब्देन अष्टटङ्कमिता शुक्तिरिति द्वाभ्यां शुक्तिभ्यां पलं ज्ञेयं मुष्ट्याद्याः षट्पलस्य पर्यायवाचकाः षोडशटङ्कं पलं ज्ञातव्यमिति शेषः ॥ २४ ॥

**दी०**—इदानीं प्रसृतिपूर्वकं मानिकान्तं मानमाह—

**पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते ॥ २५ ॥**
**प्रसृतिभ्यामञ्जलिः स्यात्कुडवोऽर्धशरावकः ।**
**अष्टमानं च स ज्ञेयः कुडवाभ्यां च मानिका ॥२६॥**
**शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ।**

**दी०**—पलाभ्यामिति । पलद्वयेनैका प्रसृतिर्ज्ञेया प्रसारिताङ्गुलिकरतलं प्रसृतिः सैव द्वात्रिंशत् शाणमिता । प्रसृतिभ्यामिति प्रसृतिद्वयेनैकाञ्जलिः, अञ्जलिस्तु करद्वयमिलितसम्पुटकाकारः प्रसिद्धः, स एव कुडवः अर्धशरावकश्च कथितः, कुडवः प्रसिद्धश्चतुःपलप्रमितः अर्धशरावकश्चतुःषष्टिशाणसंज्ञः । कुडवाभ्यामिति । कुडवद्वयेनैका मानिका सैव शरावः । अष्टपलं च शरावः स तु साष्टाविंशतिशतसंख्याकशाणैः कथितः ॥२५॥२६॥

**गू०**—द्वाभ्यां पलाभ्यां प्रसृतिर्ज्ञेया द्वात्रिंशत् टङ्कानां प्रसृतिः पर्यायशब्देन प्रसृतिश्च निगद्यते द्वाभ्यां प्रसृतिभ्यामञ्जलिः स्यात् स एवाञ्जलिः कुडवोऽर्धशरावकश्च पर्यायशब्देन स एव मानमप्यञ्जलिर्ज्ञेयः चतुःषष्टिकानामञ्जलिरित्यभिप्रायः । द्वाभ्यां कुडवाभ्यां मानिका, मानिकापर्यायवाचकः शरावः अष्टपलं च अष्टाविंशच्छतोत्तरटङ्कानां मानिकेत्यर्थः ॥ २५ ॥ २६ ॥

**दी०**—अथ प्रस्थाऽढके दर्शयितुमाह—

**शरावाभ्यां भवेत्प्रस्थश्चतुःप्रस्थैस्तथाढकम् ॥ २७ ॥**
**भाजनं कंसपात्रं च चतुःषष्टिपलं च तत् ।**

**दी०**—शरावाभ्यामिति । शरावद्वयेन एकः प्रस्थः स च षोडशपलपरिमितो भवति । चतुःप्रस्थैः कृत्वा आढकमेकं तच्च भाजनं कंसपात्रं च कथितं, भाजनादयोऽप्याढकस्यैव पर्याया इत्यर्थः । एतच्चतुःषष्टिपलपरिमितं बोद्धव्यम् ॥ २७ ॥

**गू०**—द्वाभ्यां शरावाभ्यां प्रस्थो भवेत् षट्पञ्चाशदुत्तरद्विशतटङ्कानां प्रस्थः, चतुःप्रस्थैः आढकं भवेत् चतुर्विंशोत्तरसहस्रटङ्कानामाढकं, तदेव भाजनं कांस्यपात्रं च तदेव पर्यायशब्देन चतुःषष्टिपलं चोच्यते ॥ २७ ॥

**दी०**—अथ द्रोणप्रभृति द्रोणीपर्यन्तमानमाह—

**चतुर्भिराढकैर्द्रोणः कलशो नल्वणोर्मणः ॥ २८ ॥**
**उन्मानश्च घटो राशिर्द्रोणपर्यायसंज्ञकाः ।**
**द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिशरावकाः ॥ २९ ॥**
**शूर्पाभ्यां च भवेद्द्रोणी वाही गोणी च सा स्मृता ।**

**दी०**—चतुर्भिरिति । चतुर्भिश्चतुःसंख्याकैराढकैः कृत्वा एको द्रोणः, स च कलशादिपर्यायनामभिरुपलक्षितो द्वात्रिंशच्छरावतुलितो ज्ञेयः । द्रोणाभ्यामिति । द्रोणद्वयेन शूर्पकुम्भौ कथितौ, शूर्पश्च कुम्भश्चेति । शूर्पश्चतुःषष्टिशरावको ज्ञेयः । शूर्पाभ्यामिति । शूर्पद्वयेन एका द्रोणी सैव वाही गोणी च कथिता, अत्र चतुःषष्टिप्रस्था भवन्तीति तात्पर्यार्थः ॥ २८ ॥ २९ ॥

**गू०**—चतुर्भिराढकैर्द्रोण उच्यते स एव कलशः, नल्वणः, अर्मणश्च, उन्मानश्च, घटश्च, राशिश्च पर्यायशब्देन स एवेत्युत्तरचतुःसहस्रटङ्कानां द्रोणः ॥२८॥२९॥

**दी०**—इदानीं खारीपरिमाणमाह—

**द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः ॥ ३० ॥**
**चतुःसहस्रपलिका षण्णवत्यधिका च सा ।**

**दी०**—द्रोणीचतुष्टयमिति । द्रोणीचतुष्टयं सम्भारं तत् खारीशब्दवाच्यं, तेन षण्णवत्यधिकचतुःसहस्रपलमानेन सा ज्ञातव्या, अत एव सूक्ष्मबुद्धिभिरिति ग्रहणम् ॥ ३० ॥

**दी०**—अथ भारपरिमाणं तुलापरिमाणमप्याह—

**पलानां द्विसहस्रं च भार एकः प्रकीर्तितः ॥ ३१ ॥**
**तुला पलशतं ज्ञेया सर्वत्रैवैष निश्चयः ।**

**दी०**—पलानामिति । पूर्वप्रतिपादितानां पलानां यत् सहस्रद्वयं तेन एको भारः प्रकीर्तितः कथितः । एतेन भारो विंशतितुलाभिः परिमितो भवति । तुला च पलशतपरिमिता ज्ञेया । तथाचोक्तम्—'तुला पलशतं तासां विंशतिर्भार उच्यते । खारी भारद्वयेनैव स्मृता षड्भाजनाधिका' इति । एष निश्चयः सर्वत्रैव सर्वदेशेष्वेव प्रयोगेषु वा ज्ञेय इत्यर्थः, नतु केवलं मगधदेशे । एवेति निश्चयार्थबोधकः ॥ ३१ ॥

**दी०**—इदानीं सकलमानज्ञापनार्थं श्लोकेनैकेन मानमाह—

**माषटङ्काक्षबिल्वानि कुडवः प्रस्थमाढकम् ॥ ३२ ॥**
**राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणाः ।**

**दी०**—माषेत्यादि । माषादिखार्यवसाना यथोत्तरं चतुर्गुणा ज्ञेयाः । यो यस्मादुत्तरो यथोत्तरं, एतेन किमुक्तं भवति—माषाच्चतुर्गुणः शाणः शाणात् कर्षश्चतुर्गुणः कर्षाच्चतुर्गुणं बिल्वमित्याद्या अपरे मिता इति । बिल्वमत्र पलं, राशिर्द्रोणसंज्ञः, गोणीत्यनेन द्रोणी कथिता ॥ ३२ ॥

**दी०**—इदानीं द्रवार्द्रशुष्कद्रव्याणामनुक्तानां मानं निर्देष्टुमाह—

**गुञ्जादिमानमारभ्य यावत्स्यात्कुडवस्थितिः ॥ ३३ ॥**
**द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम् ।**

**दी०**—गुञ्जाप्रभृतिमानमारभ्य यावत् कुडवस्थितिः स्यात् तावद्द्रव्यादीनां मानं समं ज्ञेयम् । गुञ्जा आदिर्येषां ते माषककोलाक्षशुक्तिप्रसृताः कुडवपर्यन्ताः । द्रवं तोयादि, आर्द्रं तत्क्षणोद्धृतं; शुष्कं सूर्यांशुभिः शोषितं चिरकालं भृतं च । एके यावन्न कुडवस्थितिरिति पठन्ति तत्र कुडवादर्वाक् सममिति । तथाहि—'रक्तिकादिषु मानेषु यावन्न कुडवो भवेत् । शुष्के द्रवार्द्रयोस्तावत् तुल्यं मानं प्रकीर्तितम्' इति । एतदपि तन्त्रान्तरे यथा—'प्रस्थादि मानमारभ्य द्विगुणश्च द्रवार्द्रयोः । कुडवोऽपि क्वचिद्दृष्टो यथा दन्तीघृते मतम्' इति ॥ ३३ ॥

**प्रस्थादिमानमारभ्य द्विगुणं तद्द्रवार्द्रयोः ॥ ३४ ॥**
**मानं तथा तुलायाश्च द्विगुणं न क्वचित्स्मृतम् ।**

**दी०**—प्रस्थादिमानमिति । प्रस्थादिपरिमाणमारभ्य यावत् तुला पूर्यते तावद्द्रवार्द्रयोर्द्विगुणपरिमाणं ज्ञेयम् । द्विगुणं तु शुष्कद्रव्यादित्यर्थः । तथाच—'शुष्कद्रव्यस्य या मात्रा त्वार्द्रस्य द्विगुणा हि सा । शुष्कस्य गुरुतीक्ष्णत्वात्तस्मादर्धं प्रयोजयेत्' । प्रस्थादिमानमित्यादिशब्दात् षोडशपलमारभ्य यावत् पलशतं पूर्यते तावदित्यर्थः । (न तथा तुलायाः ।) तुलाया उपरि मानं क्वचित् कुत्रापि द्विगुणं न तत्कार्यं द्रवार्द्रयोरिति शेषः । उपरिमानमिति द्रोणादिकम् । तथाच—'द्वैगुण्यं न तुलामानादिति मानविदो विदुः । यतो द्रवार्द्रशुष्कादेः प्रसिद्धिश्चात्र लोकतः' । एतदभिप्रायं स्नेहपाकविषये प्रायशो मन्यन्ते क्वचित् ॥ ३४ ॥

**दी०**—इदानीं द्रवमानार्थं कुडवपात्रनिर्माणमाह—

**मृद्वृक्षवेणुलोहादेर्भाण्डं यच्चतुरङ्गुलम् ॥ ३५ ॥**
**विस्तीर्णं च तथोच्चं च तन्मानं कुडवं वदेत् ।**

**दी०**—मृदिति । मृदादिवस्तुभिर्निर्मितं यद्भाण्डं भवति तत् परमितं द्रवद्रव्यं कुडवसंज्ञितं वदेत् । कथंभूतं? आयामपरिमाणाभ्यां चतुरङ्गुलप्रमाणं, तथा उच्चेनापि चतुरङ्गुलम् । वेणुं वंशं, लोहमष्टविधं तच्च सुवर्णरजतताम्रारघोषत्रपुसीसकलोहसंज्ञम् । आदिग्रहणाच्चर्मशृङ्गदन्तोपलादयः । अङ्गुलशब्देनात्राङ्गुष्ठनखतलभागं गृह्णन्ति । केचित् 'मध्यमाङ्गुलिकायास्तु मध्यमपर्वमिताङ्गुलमि'ति । यद्वा चतुर्भिरङ्गुलिभिः परिमितं चतुरङ्गुलमिति प्रसिद्धम् । एतत् परिमाणं द्रवद्रव्यार्थं बोद्धव्यम् ॥ ३५ ॥

---

१—'द्रवार्द्रे द्विगुणं मतम्' पा० । २—वन्धनीधृतपाठो नास्ति 'ख' पुस्तके । ३—द्रव्याणां गुरुलघुत्वात्तरतमाभ्यां ततोऽप्यर्समवादिदं कुडवभाण्डं समद्रवद्रव्यार्थं बोद्धव्यम् । वस्तुतस्तु 'आर्द्रद्रव्यस्य कुडवः पलैरष्टाभिरेव च । शुष्कद्रव्यचतुष्केण कुडवः समुदाहृतः' इति हारीतोक्तमिहापि स्मर्तव्यम् ॥

**गू०**—तद्द्विगुणं न, तर्हि तुलया विना कुतः? तदाह—मृद्वृक्षवेणुलोहादेः चतुरङ्गुलं विस्तीर्णं चोच्चं च यद्भाण्डं तन्मानं कुडवं वदेत् मृण्मयं, वृक्षकाष्ठकृतं, वैणवं वृक्षवद्वेणुकृतं, लोहमायसं चतुरङ्गुलीकृतं तन्मानं कुडवमित्यर्थः, पूर्वदेशे प्रसिद्धमिति ॥ ३५ ॥

**दी०**—अथ प्रयोगाणामादिद्रव्याङ्कितसंज्ञा निर्देष्टुमाह—

**यदौषधं तु प्रथमं यस्य योगस्य कथ्यते ॥ ३६ ॥**
**तन्नाम्नैव स योगो हि कथ्यतेऽत्र विनिश्चयः ।**

**दी०**—यदिति । यस्य योगस्य गणस्वरूपस्य प्रथममादिपठितमौषधं भवति तन्नाम्नैव स योगः कथ्यते इत्यत्र विनिश्चयो ज्ञातव्यः । यथा-क्षुद्रादि, गुडूच्यादीति तात्पर्यार्थः । मगधदेशे प्रायशः प्रचरतीत्यतो मागधपरिभाषा कथ्यते ॥ ३६ ॥

**गू०**—यस्य योगस्य यत्प्रथमं औषधं कथ्यते स योगस्तन्नाम्नैव भवेदिति निश्चयः ॥ ३६ ॥ इति मागधपरिभाषा ॥

## अथ कालिङ्गपरिभाषा ।

**दी०**—इदानीं कालिङ्गपरिभाषां दर्शयितुमाह—

**स्थितिर्नास्त्येव मात्रायाः कालमग्निं वयो बलम् ३७**
**प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत् ।**

**दी०**—अथेति । तत्रादौ मात्राव्यवच्छेदार्थं श्लोकमेकं पठन्ति केचित् तमाह—स्थितिरिति । मात्रायाः परिमाणस्य स्थितिर्व्यवस्था नास्ति, यतः कालादिकमवेक्ष्य परिमाणं युञ्ज्यादित्यभिप्रायः । कालं शीतोष्णवर्षालक्षणं, भेषजग्रहणकालं वा । अग्निरपि चतुर्विधो मन्दतीक्ष्णविषमसमभेदेन । वयोऽपि त्रिविधमादिमध्यान्तम् । बलमपि हीनोत्तममध्यमम् । प्रकृतिरपि त्रिधा हीनमध्योत्तमा, अथवा देशजातिशरीरादिभिः प्रकृतेर्बहवो भेदाः । दोषोऽपि त्रिविधो वातादिभेदेन । देशोऽपि द्विविधो भूमिदेहप्रभेदेन । भूमिदेशस्तु त्रिधा जाङ्गलानूपसाधारणभेदेन, देहदेशोऽपि त्रिधैव पूर्वोक्तः ॥ ३७ ॥

**गू०**—अत्र मात्रायाः स्थितिर्नास्त्येव—

**दी०**—अथ भक्षणार्थं प्रागुक्ता कालिङ्गपरिभाषाऽस्ति अतस्तामपि दर्शयन्नाह—

**यतो मन्दाग्नयो ह्रस्वा हीनसत्त्वा नराः कलौ ॥३८॥**
**अतस्तु मात्रा तद्योग्या प्रोच्यते सुज्ञसम्मता ।**

**दी०**—यत इति । यतः कारणात् कलौ कलियुगे ईदृशा नराः सन्ति, अतः स्थितिहेतोः तद्योग्यैषा नराणां विहिता मात्रा भक्षणद्रव्यपरिमाणं प्रोच्यते कथ्यते इत्यर्थः । कथम्भूता? सुज्ञसम्मता इति मानवेदिभिः पुरुषैर्विचार्यमाणा इत्यर्थः । कीदृशास्ते नराः । मन्दाग्नय इति स्वल्पाहारिणः, ह्रस्वाश्चेत्यल्पकायाः, हीनसत्त्वा इति स्वल्पबलाः ॥ ३८ ॥

**गू०**—कुतः? यतः कलौ मन्दाग्नयो नराः ह्रस्वाः हीनसत्त्वाश्च, अतः कालमग्निं वयः बलं प्रकृतिं दोषं देशं दृष्ट्वा या तु तत्सम्मता तद्योग्या मात्रा प्रोच्यते सा योज्येति शेषः ॥ ३८ ॥

**दी०**—इदानीं तत्तुलनमाह—

**यवो द्वादशभिर्गौरसर्षपैः प्रोच्यते बुधैः ॥ ३९ ॥**
**यवद्वयेन गुञ्जा स्यात्त्रिगुञ्जो वल्ल उच्यते ।**
**माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत्क्वचित् ॥४०॥**
**स्याच्चतुर्माषकैः शाणः स निष्कष्टङ्क एव च ।**
**गद्याणो माषकैः षड्भिः कर्षः स्याद्दशमाषिकः ॥४१॥**
**चतुष्कर्षैः पलं प्रोक्तं दशशाणमितं बुधैः ।**
**चतुष्पलैश्च कुडवं प्रस्थाद्याः पूर्ववन्मताः ॥ ४२ ॥**

**दी०**—यव इत्यादि । द्वादशभिर्द्वादशसंख्याकैर्गौरसर्षपैरेको यवः, गौरग्रहणं तदन्यजातिव्यवच्छेदार्थम् । ईदृशेन यवद्वयेन एका गुञ्जा स्याद्भवेत् । त्रिगुञ्जो गुञ्जात्रयः, एको वल्लः वल्लसंज्ञः प्रसिद्धः परिमाणः । अष्टाभिरष्टसंख्याभिर्गुञ्जाभिः कृत्वा एको माषः कथितः, माषोऽत्र टङ्कस्य चतुर्थांशः । क्वचिदिति कुत्रापि सप्तभिर्गुञ्जादिभिः कृत्वा माषको ज्ञेय इति तन्त्रान्तरीयमतं, तच्च विषकल्पे प्रचरितमिति वदन्ति केचित् सर्वत्राप्रसिद्धत्वात् । गुञ्जाप्यत्रैवोक्ता ज्ञेया । चतुर्माषकैः कृत्वा एकः शाणः स एव निष्कः टङ्कश्च पर्यायनाम्ना कथितः । षड्भिः

---

१—स्वकल्पित इत्यर्थः । क्वचित्तु योगस्यैव महिमज्ञापनार्थं नामान्तरं कल्पितं भवति । यथा सुदर्शनचक्रवज्ज्वरेषु चूर्णमिति लुप्तोपमा । एतेन लेहतैलरसादिषु न दोषः । २—'°मादिमध्योत्तरम्' पा० । ३—आदिशब्देन पित्तकफग्रहणम् ।

१—मानमिति मूलपाठं त्यक्त्वा सामेति शोधनं कलिकातामुद्रकाणां पाण्डित्यमूलकम् ।

संख्याकैर्माषकैः कृत्वा एको गद्याणः, स च सार्धटङ्केन परिमितो भवति । गद्याण इति परिमाणसंज्ञाशब्दः । दशमाषकैरेव एकः कर्षः स्यात्, कर्षोऽक्षः कथितः स च सार्धद्विशाणमितः । चतुष्कर्षैः कृत्वा पलमेकं प्रोक्तं कथितम्; पलं प्रसिद्धं कर्षेणैवोक्तं, मानतस्तत् पलं दशशाणमितं बोद्धव्यम् । ईदृशैश्चतुर्भिः पलैः कृत्वा कुडवमेकं तच्चत्वारिंशच्छाणपरितुलितं भवति । प्रस्थाद्याः पूर्ववन् मताः । इति प्रस्थाद्यवशिष्टं मागधपरिभाषावज्ज्ञेयमनुक्रमेणेत्यर्थः । न तु तत्तुल्यमानं; एतेन कुडवाच्छेषमानमप्यत्रैव प्रतिपादितपलेन परिमितं बोद्धव्यम् । न तु मागधपरिभाषोक्तपलेनेति तात्पर्यार्थः ॥ ३९–४२ ॥

**गू०**—द्वादशगौरसर्षपैः कृत्वा बुधैर्यवः प्रोच्यते; गौरसर्षपैः पीतसर्षपैः । यवद्वयेन गुञ्जा स्यात् भवेत् त्रिगुञ्जो वल्ल उच्यते अष्टभिः गुञ्जाभिः सप्तभिर्वा क्वचिद्भवेत् चतुर्माषकैः शाणः स्यात् स एव निष्कः टङ्कश्च; षड्भिः माषकैर्गद्याणः स्यात् दशमाषिकः कर्षो भवेत् चतुष्कर्षैः पलं प्रोक्तं किं विशिष्टं दशशाणमितं चतुःपलैः कृत्वा कुडवं प्रोक्तं प्रस्थाद्याः पूर्ववज्ज्ञेयाः ॥ ३९–४२ ॥ इति कालिङ्गपरिभाषा ॥

**दी०**—यद्यपि देशान्तरे बहूनि मानानि सन्ति तथापि द्वे परिमाणे प्रसिद्धे इति विचार्याह—

**कालिङ्गं मागधं चेति द्विविधं मानमुच्यते ॥ ४३ ॥**
**कालिङ्गान्मागधं श्रेष्ठं मानं मानविदो विदुः ।**

**दी०**—कालिङ्गमिति । कलिङ्गमिति केचित् पठन्ति । कालिङ्गमिति कलिङ्गदेशे प्रचुरं प्रसिद्धं यत् तत् कालिङ्गं; मगधदेशे प्रायशः प्रचरतीति मागधमानम् । इति द्रव्याणां परिमाणमिति, द्विविधं द्विप्रकारमुच्यते मानवेदिभिः कथ्यत इत्यर्थः ॥४३॥ इति कालिङ्गपरिभाषा ॥

**दी०**—इदानीं द्रव्याणां युक्तायुक्तविचारमाह—

**नवान्येव हि योज्यानि द्रव्याण्यखिलकर्मसु ।**
**विना विडङ्गकृष्णाभ्यां गुडधान्याज्यमाक्षिकैः ॥४४॥**

**दी०**—नवानीति । अखिलकर्मस्विति दशधा द्रव्यकल्पनाविषयेषु नूतनद्रव्याणि योज्यानीति भावः । यतः–'सर्वं च क्षीरवद्वीर्ययुक्तं भवति भेषजम् । तेषामलाभे गृह्णीयादनतिक्रान्तवत्सरम्' इति । विडङ्गादिद्रव्यं विना तेन विडङ्गप्रभृतिकं पुरातनं गुणकरमिति तात्पर्यार्थः । पुरातनत्वं संवत्सरादुपरि भवति । तत्र धान्यं धान्यकं, आज्यं घृतं तदत्रापक्वं ज्ञेयं, पक्वं तु हीनवीर्यं स्यात् । तथाहि—'घृतमब्दात् परं पक्वं हीनवीर्यं प्रजायते । तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम्' इति पुराणं रूक्षादिगुणसंयुक्तत्वात् ॥ ४४ ॥

**गू०**—हीति निश्चयेन अखिलकर्मसु नवान्येव द्रव्याणि योज्यानि । विडङ्गकृष्णाभ्यां विना, गुडधान्याज्यमाक्षिकैश्च विना ॥

**दी०**—इदानीं ये सर्वकालेष्वार्द्रा अद्विगुणा द्रव्यविशेषा योज्यास्तानाह—

**गुडूची कुटजो वासा कूष्माण्डं च शतावरी ।**
**अश्वगन्धा सहचरी शतपुष्पा प्रसारिणी ॥४५॥**
**प्रयोक्तव्या सदैवार्द्रा द्विगुणा नैव योजयेत् ।**

**दी०**—गुडूचीति । गुडूचीपूर्विकाः प्रसारिणीपर्यन्ता ओषध्यः सदैव सर्वस्मिन् काले ऋतौ वा तत्कालीनोद्धृताः प्रयोक्तव्याः, एते च द्रव्यविशेषा द्विगुणा न कार्या वीर्योत्कृष्टत्वात् । गुडूची प्रसिद्धा; कुटजो वृक्षविशेषः स च कौरैयाशब्दवाच्यः । वासा आटरूषकः, सहचरः कुरण्टकः पियावासा इति शेषः । प्रसारिणी स्वनामख्याता । एतस्याग्रे 'शुष्कं नवीनं यद्द्रव्यं योज्यं सकलकर्मसु । आर्द्रं च द्विगुणं युञ्ज्यादेष सर्वत्र निश्चयः' इति श्लोकं पठन्ति केचित् स चोक्तमेवार्थं द्रढयति[3] न दोषः पौनरुक्त्या । द्विगुणमत्र एकद्रव्यभागापेक्षया तत् पूर्वमुक्तं न तु समसमानात् । सर्वत्रेति कल्पनासु ॥ ४५ ॥

**गू०**—गुडूच्याद्याः प्रसारिण्यन्ताः सदैवार्द्राः प्रयोक्तव्याः, द्विगुणा नैव कारयेत् ॥ ४५ ॥

**शुष्कं नवीनं यद्द्रव्यं योज्यं सकलकर्मसु ॥ ४६ ॥**
**आर्द्रं च द्विगुणं युञ्ज्यादेष सर्वत्र निश्चयः ।**

**गू०**—याभिः पूर्वोक्ताभिर्विना शुष्कं नवीनं यद्द्रव्यं

---

१—इयं टिप्पणिर्द्वादशे पृष्ठे द्रष्टव्या । २—'तस्यास्तुलितेन' पा० । ३—'प्राहुर्मानविदो जनाः' पा० ।

१—'वासानिम्बपटोलकेतकबलाकूष्माण्डकेन्दीवरी वर्षाभूकुटजाश्च कन्दसहिताः सापूतिगन्धामृताः । ऐन्द्रीनागबलाकुरण्टकपुरश्छन्नामृता सर्वदा सार्द्रा एव तु न क्वचिद्द्विगुणिताः कार्येषु योज्या बुधैः ॥' इति भावमिश्रोक्तमपीह ध्येयम् ॥ २—'कुदैया' पा० । ३—'अतो' इति वर्धितं कलिकातानिवासिभिः । ४—दीपिकामते प्रक्षिप्तमिदम् ।

# १—मानचक्रम् ॥

### सर्षपादिमानम् ।
### ( कालिङ्गमानम् )

१२ सर्षपाः—१ यवः ।
२ यवौ—१ रक्तिः ।
३ रक्तयो—१ वल्लः ।
४ वल्लाः—१ माषः ।
४ माषाः—१ शाणः ।
२ शाणौ—१ कर्षः ।
२ कर्षौ—१ शुक्तिः ।
२ शुक्ती—१ पलम् ।
२ पले—१ प्रसृतिः ।
२ प्रसृती—१ कुडवः ।
२ कुडवौ—१ मानिका ।
२ मानिके—१ प्रस्थः ।
४ प्रस्थाः—१ आढकः ।
४ आढकाः—१ द्रोणः ।
२ द्रोणौ—१ शूर्पः ।
२ शूर्पौ—१ खारिका ।
१०० पलानि—१ तुला ।
२० तुलाः—१ भारः ।

### परमाण्वादिमानम् ।
### ( मागधपरिभाषामानम् । )

३० परमाणवः—१ त्रसरेणुः ।
६ त्रस०—१ मरीचिः ।
६ मरी०—१ राजिका ।
३ राजिकाः—१ सर्षपः ।
८ सर्षपाः—१ यवः ।
४ यवाः—१ गुञ्जा ।
५ गुञ्जाः—१ पणः ।
६ गुञ्जाः—१ माषः ।
४ माषाः—१ शाणः=।। तो० ।
४ शाणः—१ कोलः=१ तो० ।
२ कोलौ—१ कर्षः ।
२ कर्षौ—१ अर्धपलं=२ तो० ।
२ अर्धप०—१ पलं=४ तो० ।
२ पले—१ प्रसृतिः=८ तो० ।
२ प्रसृती—१ कुडवः=१६ तो० ।
२ कुडवौ—१ मानिका ३२ तो० ।
२ मानिके—१ प्रस्थः ६४ तो० ।
४ प्रस्थाः—१ आढकः=२५६तो० ।
४ आढकाः—कलसः=१०२४तो० ।
२ कलसौ—१ शूर्पः=२०४८तो० ।
२ शूर्पौ—१ द्रोणी=४०९६ तो० ।
४ द्रोण्यः—खारी=१६३८४ तो० ।
१०० पलानि—१ तुला ४००तो० ।
२,००० पलानि=१ भारः=८,००० [ तो० ।

### व्रीह्यादिमानम् ।

४ व्रीहयः—१ गुञ्जा ।
५ गुञ्जाः—१ पणः ।
८ पणाः—१ धरणः ।
२ धरणौ—१ कर्षः ।
४ कर्षाः—१ पलं ।
१०० पलानि—१ तुला ।
२० तुलाः—१ भारः ।

१—एकादशपृष्ठस्याद्या टिप्पणिरियम् ।

तत्सकलकर्मसु योज्यं । आर्द्रं यद्द्रव्यं तद्द्विगुणं युञ्ज्यात्प्रस्थादिमानेषु तुलाया विना द्रवार्द्रद्रव्यं यदुक्तं भवति तदा द्विगुणं कार्यं नान्यत्र एषो मया निश्चयः कृतः॥४६॥

**दी०**—इदानीमनुक्तप्रयोगे तल्लक्षणकालादिकमाह—

**कालेऽनुक्ते प्रभातं स्यादङ्गेऽनुक्ते जटा भवेत्॥ ४७ ॥**
**भागेऽनुक्ते तु साम्यं स्यात्पात्रेऽनुक्ते च मृण्मयम् ।**
**[1]द्रवेऽनुक्ते जलं ग्राह्यं तैलेऽनुक्ते तिलोद्भवम् ॥४८॥**

**दी०**—काले[2] भेषजभक्षणसमयेऽनुक्ते अप्रकाशिते सति प्रभातं प्रातःकाल एव स्यात्, तथाङ्गे द्रव्यावयवेऽनुक्ते सति जटा मूलं स्यादित्यर्थः । भागे द्रव्याणां परिमाणेऽनुक्ते सति साम्यं स्यात् सर्वेषां समता भवतीत्यर्थः । पात्रे इति द्रव्यस्य करणार्थं स्थापनार्थं च भाजनेऽनुक्ते सति तदा मृण्मयं मृत्पात्रं ग्राह्यम् । चकाराद्द्रवानुक्तविषये पानीयं, तथाचोक्तं 'द्रवेऽप्यनुक्ते जलमेव देयं भागेऽप्यनुक्ते समता विधेया । अङ्गेऽप्यनुक्ते विहितं तु मूलं कालेऽप्यनुक्ते दिवसस्य पूर्वम्' इति॥

**गू०**—औषधभक्षणार्थमनुक्ते काले सति प्रभातं स्यात्। अङ्गे अनुक्ते सति जटा भवेत्। अनुक्ते माने सति साम्यं स्यात्। क्राथादिकथनसमये अनुक्ते पात्रे सति मृण्मयं स्यात् भवेत् ॥ ४७ ॥ ४८ ॥

**दी०**—अथ योगेषु पुनरुक्तद्रव्यस्य मानमाह—

**एकमप्यौषधं योगे यस्मिन्यत्पुनरुच्यते ।**
**मानतो द्विगुणं कार्यं तद्द्रव्यं तत्त्वदर्शिभिः ॥४९॥**

**दी०**—एकमिति । यत्र योगे एकं वापि द्रव्यं द्विपर्यायनाम्ना कथितं तदेवौषधं मानतः परिमाणात् द्विगुणं कार्यं द्विगुणिता च एकद्रव्यभागापेक्षया इति तत्त्वदर्शिभिरायुर्वेदरहस्यज्ञापकैः प्रोक्तमित्यर्थः। तथाहि—'घृते तैले च योगे च यद्द्रव्यं पुनरुच्यते । तज्ज्ञातव्यमिहार्येण मानतो द्विगुणं भवेत् ॥' इति ॥ ४९ ॥

**गू०**—यस्मिन्योगे एकमप्यौषधं पुनरुच्यते तद्द्रव्यं तत्त्वदर्शिभिः वैद्यैर्मानतः द्विगुणं प्रोक्तं । अन्यदपि सांप्रदायिकं प्रयोगं वदन्ति ग्रन्थान्तरात्–'चूर्णस्नेहासवा लेहाः प्रायः स्युश्चन्दनान्विताः । कषायलेपयोश्चात्र युज्यते रक्तचन्दनम्' ॥ ४९ ॥

**दी०**—इदानीं सामान्यचन्दनग्रहणं योगविशेषेषु विभजन्नाह—

**चूर्णस्नेहासवा लेहाः प्रायशश्चन्दनान्विताः ।**
**कषायलेपयोः प्रायो युज्यते रक्तचन्दनम् ॥ ५० ॥**

**दी०**—चूर्णेति । चूर्णादयः कल्पनाः चन्दनग्रहणेन श्वेतचन्दनान्विता ज्ञेयाः । आसवग्रहणेन सर्वे सन्धानकाश्च । अवलेहग्रहणेन गुटिकाग्रहणं, यथा लवङ्गादिचूर्णे लाक्षादितैले त्रिफलाघृते द्राक्षासवे च्यवनप्राशावलेहे द्रष्टव्यम् । कषायलेपयोस्तु चन्दनग्रहणेन रक्तचन्दनं योज्यमित्यर्थः । कषायं स्वरसादिपञ्चकं तेन स्वरसक्काथफाण्टहिमकल्कादयः। लेपो दशाङ्गप्रभृतयः। प्राय इति ग्रहणात् कुत्रापि व्याध्यनुरूपं बोद्धव्यम् । नचात्र नियमार्थं प्रायःशब्दः, यतो न्यूनमाचष्टे क्वचित् । तथाहि—'प्रायःशब्दो विशेषार्थे क्वचिन्न्यूनेऽपि दृश्यते' इति । छर्द्यर्थमेलादिचूर्णे रक्तचन्दनान्वितमिति प्रसिद्धिः, व्याधिविहितत्वात् । तथाचोक्तं—'रक्तं शीतं गुरु स्वादु छर्दितृष्णास्रपित्तजित् । तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहम्' इति ॥ ५० ॥

**दी०**—इदानीं प्रसिद्धद्रव्याणां कालातिक्रमेण हीनगुणत्वमाह—

**गुणहीनं भवेद्वर्षादूर्ध्वं तद्रूपमौषधम् ।**
**मासद्वयात्तथा चूर्णं हीनवीर्यत्वमाप्नुयात् ॥ ५१ ॥**
**हीनत्वं गुटिकालेहौ लभेते वत्सरात्परम्[1] ।**
**हीनाः स्युर्घृततैलाद्याश्चतुर्मासाधिकात्तथा ॥ ५२ ॥**
**ओषध्यो लघुपाकाः स्युर्निर्वीर्या वत्सरात्परम् ।**
**पुराणाः स्युर्गुणैर्युक्ता आसवा धातवो रसाः ॥५३॥**

**दी०**—गुणहीनमिति । वर्षादूर्ध्वं संवत्सरादुपरि तद्रूपमौषधं गुणहीनं भवेत् स्वकार्यकरं न भवतीत्यर्थः। तद्रूपमिति यादृशं द्रव्यस्वरूपं तादृशमेव तद्रूपं कथितं न तु चूर्णादिकल्पितम् । तथाच—'धातुरूपं द्रव्यवर्जं न श्रेष्ठं वत्सरोषितमि'ति । तथा चूर्णं तालीसाद्यादिकं मासद्वयादुपरि हीनवीर्यस्य भावः हीनवीर्यत्वमाप्नुयात्, वीर्यहानिरप्यत्र भावमात्रं न तु सर्वथा वीर्यरहितत्वम्, यतस्तन्त्रान्तरे दृश्यते हि लवणभास्करादीनां बहुपरिमाणं चिरकालसेवनार्थम् । तदुक्तं–'पिप्पली पिप्पलीमूलं धान्याकं कृष्णजीरकम् । सैन्धवं च विडं[2]

१—प्रक्षिप्तमिदम्। २—कलिकातामुद्रितपुस्तके 'काल' इति ।

१—अत एवाकल्कस्य सप्तवर्षपर्यन्तमपि गुणा न हीयन्ते । २—'चविकं' पा० ।

चैव पत्रं तालीसकेशरम् ॥ एषां द्विपलिकान् भागान् पञ्च सौवर्चलस्य च । मरिचाऽजाजिशुण्ठीनामेकैकस्य पलं पलम् ॥ त्वगेले चार्धभागे च सामुद्रात् कुडवद्वयम् । दाडिमात् कुडवं चैव द्वे पले चाम्लवेतसात् ॥' इति । एतत् सम्भारं बहुकालोपयोगिकम्, अन्यथा व्यर्थमेतत् तस्माद्भावमात्रं चूर्णस्य मासद्वयादुपरि हीनत्वं स्यादित्यभिप्रायः । गुटिका विजयादिगुटिका, लेहाः खण्डखाद्या अवलेहप्रभृतयश्चिरकालस्थिता अपि स्वगुणं न परित्यजन्ति किन्तु किञ्चिद्गुणरहिता इति भावः । तथा तैलघृताद्याश्चतुर्मासाधिकादपि वत्सरात् परं स्वगुणं न परित्यजन्ति किन्तु किञ्चिद्गुणरहिता इति भावः, चतुर्मासाधिकाद्वत्सरात् परं षोडशमासादुपरीत्यर्थः । एके चतुर्मासाधिकास्तथेति पठन्ति । तत्र चतुर्मासग्रहणेन वर्षाकालं मन्यन्ते, 'वर्षायामुषितं स्नेहं पक्वं हीनत्वमाप्नुयात्' इति वचनात् । तथेति ग्रहणात् अत्रापि न भावमात्रं किन्तु द्रव्यसमूहपाकजस्य गुणस्य हानिर्नतु प्रकृतिगुणहानिः । तथाच 'लेहः सिद्धो गुडादीनां गुणहीनो भवेद्ध्रुवम् । स्नेहाद्याः पूर्ववीर्याः स्युस्ते चतुर्मासतस्तथा' इति । केचित्तु 'हीनं च स्याद् घृतं पक्वं तैलं वा वत्सरात् परम्' इति केषाञ्चिन्मतमवलोक्य पठन्ति तन्न सर्वसम्मतं । यतः सर्वसम्मतं वाक्यमिदं दृश्यते 'घृतमब्दात् परं किञ्चिद्धीनवीर्यत्वमाप्नुयात् । तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम्' इति । लघुपाका ओषध्यो वर्षादुपरि निर्वीर्याः स्युः, निःशेषेण वीर्यरहिता इत्यर्थः । नतु हीनत्वम् । ताश्च यवगोधूमप्रमुखाः । तथाच 'एतेषु यवगोधूमतिलमाषा नवा हिताः । रूढाः पुराणा विरसा न तथा गुणकारिणः ।' इति । अथ चिरकालस्थिता ये उत्कृष्टगुणाः स्युस्तानाह–पुराणा इत्यादि । पुराणाश्चिरकालस्थिता बहुसंवत्सरोषिता अपीत्यर्थः । गुणैर्युक्ता इति ते आसवादयो विशिष्टगुणान्विता भवन्तीत्यध्याहार्यम् । आसवा मद्यभेदाः, आसवा इति बहुवचनेन सर्वे सन्धानकाश्च ज्ञेयाः । धातव इति सुवर्णरजतादयः, बहुवचनाच्च संसिद्धमृगाङ्कादयोऽपि बोद्धव्याः ॥ ५१–५३ ॥

**गू०**—वर्षात्संवत्सरादूर्ध्वं तद्रूपं औषधं गुणहीनं भवेत् । वर्षादूर्ध्वं संवत्सरादनन्तरं न तु वर्षाऋतुभ्य ऊर्ध्वं । तथा तेन प्रकारेण मासद्वयानन्तरं चूर्णं हीनवीर्यत्वमायात् । गुटिकावलेहौ एतौ द्वौ संवत्सरात्परं हीनत्वं लभेते । तथा तेन प्रकारेण वर्षादधिकाः घृततैलाद्याः हीनाः स्युः भवेयुः । चतुर्मासाधिकाः चातुर्मास्याधिकाः लघुपाकाः ओषध्यः वत्सरात्परं निर्वीर्याः स्युः । आसवा धातवो रसाः पुराणा एव गुणैर्युक्ताः स्युः ॥५१–५३॥

**दी०**—इदानीं रोगाणामुक्तानुक्तद्रव्यविशेषमाह—

**व्याधेरयुक्तं यद्द्रव्यं गणोक्तमपि तत्त्यजेत् ।**
**अनुक्तमपि यद्युक्तं योजयेत्तत्र तद्बुधः ॥ ५४ ॥**

**दी०**—व्याधेरिति । यस्य व्याधेरयुक्तमसात्म्यं यद्द्रव्यं गणेषूक्तमपि तत्त्याज्यम्, यथा अतीसारे पथ्या । यद्गणेऽनुक्तमपि व्याधेः सात्म्यं तत्र तद्योज्यमिति व्यवहारः । यथाऽतीसारे स्तम्भनार्थं वत्सकपाठादि । तथा चोक्तम्—'गणोक्तमपि यद्द्रव्यं भवेद्व्याधौ न यौगिकम् । तदुद्धरेद्यौगिकं तु प्रक्षिपेदन्ययौगिकम्' इति ॥ ५४ ॥

**गू०**—व्याधेः रोगस्य यत् अहितं अयुक्तं द्रव्यं तत् गणोक्तमपि त्यजेत् । गणेष्वनुक्तं द्रव्यं युक्तं भवति चेदायोजयेत् ॥ ५४ ॥ इति युक्तायुक्तविचारः ॥

**दी०**—इदानीं द्रव्याहरणार्थं देशादिकथनमाह—

**आग्नेया विन्ध्यशैलाद्याः सौम्यो हिमगिरिर्मतः ।**
**अतस्तदौषधानि स्युरनुरूपाणि हेतुभिः ॥ ५५ ॥**
**अन्येष्वपि प्ररोहन्ति वनेषूपवनेषु च ।**

**दी०**—आग्नेया इति । यतो विन्ध्यशैलाद्या आग्नेयाः अग्निगुणभूयिष्ठाः । आदिग्रहणान्मलयसह्यपारियात्रा-(पर्वता)दयः । हिमगिरिस्तु सौम्यो मतः, सौम्यगुणभूयिष्ठ इत्यर्थः । अतो हेतोस्तदुद्भवानि द्रव्याणि तद्रूपाणि स्युरुष्णशीतवीर्याणि भवन्तीत्यर्थः । न केवलं शैलजातानि अन्येष्वपि वनेषूपवनेषु च यानि प्ररोहन्ति तान्यपि हेतुभिः कृत्वा शीतोष्णवीर्याणि भवन्तीति तात्पर्यार्थः । हेतुरपि ऋतुस्वरूपमिति, एतेन यादृशं ऋतुरूपं शीतोष्णादिकं भवति तादृशमेव तज्जातद्रव्यस्य वीर्यमित्यर्थः । आगमेऽपि 'अग्नीषोमीयत्वाज्जगतः' इति । वनमुद्यानं, उपवनं पुरुषव्यापारकृतं पूर्वमुक्तम् ॥ ५५ ॥

**गू०**—विन्ध्यशैलाद्याः ओषध्यः आग्नेयाः, हिमगिरिः सौम्यो मतः, हिमगिरौ या ओषध्यः ताः सौम्याः शीतगुणयुक्ताः, अतो हिमगिरिः पर्वतः सौम्यो मतः । कुतः ? यतः तदौषधानि तेषां पर्वतानामौषधानि हेतुभिः अनुरूपाणि स्युः यथा शीतहेतुभिरुत्पन्नानां

१—'काल०' पा० ।

रोगाणां उष्णान्यौषधान्युष्णहेतुरूपाणि शीतलहेतुनाशकानि भवन्ति एवं शीतान्यौषधानि उष्णहेतुरूपाणि उष्णहेतुनाशकानि भवन्तीत्यर्थः । नचाग्नेयाः सौम्याश्चौषध्यः पर्वतेष्वेवोत्पद्यन्ते नान्यत्र नह्यन्येष्वपि तदाह ॥ ५५ ॥

दी०—इदानीं द्रव्याणामाहरणक्रममाह—

**गृह्णीयात्तानि सुमनाः शुचिः प्रातः सुवासरे ॥५६॥**
**आदित्यसंमुखो मौनी नमस्कृत्य शिवं हृदि ।**
**साधारणधराद्रव्यं गृह्णीयादुत्तराश्रितम् ॥ ५७ ॥**

दी०—गृह्णीयादिति । सुमनाः शोभनचित्तः पुरुष इति शेषः, तानि पूर्वोक्तानि द्रव्याणि प्रातररुणोदये गृह्णीयादुत्पाट्य धारयेदिति भावः । कथंभूतः ? शुचिरिति बाह्याभ्यन्तरेण, आदित्यसुख इति पूर्वाभिमुखः, मौनीत्यजल्पकः, सुवासरे इति विशिष्टनक्षत्रादिसंयुक्ते दिने । किं कृत्वा ? चित्ते ईश्वरं नमस्कृत्य । साधारणधराद्रव्यमिति साधारणधरा जाङ्गलानूपमिश्रिता पृथ्वी तत्रोत्पन्नद्रव्यम् । उत्तराश्रितमिति उत्तरदिग्विभागस्थितं मूलं द्रव्यमिति शेषः । एतेन द्रव्याणां सवीर्यत्वं दर्शितम् । केचिदुत्तराश्रित इति पुरुषविशेषणं पठन्ति । स च उत्तराभिमुखोभूत्वा गृह्णीयादिति । गृह्णीयादिति द्विरुक्तिर्निश्चयार्थज्ञापनार्थम्, नान्यथा गृह्णीयादित्यस्य तात्पर्यार्थः । एके तु गृह्णीयादिति पदं पूर्वश्लोकेन योजनीयमिति वदन्ति ॥ ५६ ॥ ५७ ॥

गू०—अन्येषु वनेषु पर्वतेषु यान्यौषधानि प्ररोहन्ति तानि शुचिर्भूत्वा सुमनाः पुमान् प्रातरेव सुवासरे गृह्णीयात् । ग्रहणविधानमाह-मौनयुक्तः स पुमान् आदित्यसंमुखो भूत्वा शिवं हृदि नमस्कृत्य उत्तराश्रितं साधारणधराद्रव्यं औषधं गृह्णीयादित्यर्थः । ग्रन्थान्तराद्भूमेर्लक्षणमाह 'वर्णगन्धरसोपेता षड्विधा भूमिरुच्यते'। तत्र समां गौरां कृष्णां लोहितां दृषद्वतीं बहुजलां कठिनां च भूमिमौषधग्रहणाय परीक्षेत । तत्र साधारणा भूमिः श्रेष्ठा । सुश्रुतः साधारणां भूमिमाह-'सर्वलक्षणसंपन्ना भूमिः साधारणा स्मृता । द्रव्याणि यत्र तत्रैव तद्गुणाश्च विशेषतः' ॥ ५६ ॥ ५७ ॥

दी०—इदानीं कुत्सितस्थानजातद्रव्यस्य परित्यागमाह—

**वल्मीककुत्सितानूपश्मशानोषरमार्गजाः ।**
**जन्तुवह्निहिमव्याप्ता नौषध्यः कार्यसिद्धिदाः ॥५८॥**

दी०—वल्मीकेति । वल्मीकादिषु स्थानेषु जाता उत्पन्ना ओषध्यो न कार्यकराः तथा जन्तुवह्निहिमव्याप्ताश्च, इत्यत्र व्याप्तशब्दो जन्त्वादिभिः प्रत्येकमभिसंबध्यते । कुत्सितं बीभत्सस्थानं, आनूपं जलप्रायस्थानं जलव्याप्तमित्यर्थः । जन्तुव्याप्ता इति कृमिजग्धाः, वह्निव्याप्ता दावाग्निदग्धाः, हिमव्याप्तास्तुषाराभिव्याप्ताः । ओषध्य इति बहुवचनेनात्र पुष्पफलमूलत्वक्सारनिर्यासादयो बोद्धव्याः ॥ ५८ ॥

गू०—वल्मीककुत्सितानूपश्मशानोषरमार्गजाः जन्तुवह्निहिमव्याप्ताश्चौषध्यः कार्यसिद्धिदा न । वल्मीकर्ज तु मृण्मयं, जलप्रायमानूपः । सुगममन्यत् ॥ ५८ ॥

दी०—इदानीमृतुविशेषेण विरेकवमनार्थमपि द्रव्याहरणकालमाह—

**शरद्यखिलकार्यार्थं ग्राह्यं सरसमौषधम् ।**
**विरेकवमनार्थं च वसन्तान्ते समाहरेत् ॥ ५९ ॥**

दी०—शरदीति । शरदि शरत्काले अखिलकार्यार्थं सकलप्रयोगनिमित्तं ग्राह्यम् । वसन्तान्ते ग्रीष्मकाले समाहरेद्गृह्णीयादित्यर्थः । यद्यपि अखिलकार्यग्रहणेनापि विरेकवमनमपि प्राप्तमेव तथापि वाक्यानां द्वैविध्येन सामान्यविशिष्टत्वं दर्शितमिति न दोषोऽखिलग्रहणेन । तथाच 'ग्रीष्मे मञ्जरिकाग्रेषु वर्षासु दलचर्मणी । वसन्ते मूलमाश्रित्य वृक्षाणां च रसस्य च' ॥ ५९ ॥

गू०—शरदि अखिलकार्यार्थं सर्वकार्यार्थं सरसं औषधं ग्राह्यं । विरेकवमनार्थं वसन्तान्ते वसन्तमध्ये समाहरेत् ॥ ५९ ॥

दी०—अथानुक्तावयवानां द्रव्याणामङ्गग्रहणमाह—

**अतिस्थूलजटा याः स्युस्तासां ग्राह्यास्त्वचो बुधैः ।**
**गृह्णीयात्सूक्ष्ममूलानि सकलान्यपि बुद्धिमान् ॥६०॥**
**न्यग्रोधादेस्त्वचो ग्राह्याः सारः स्याद्बीजकादितः ।**
**तालीसादेश्च पुष्पाणि फलं स्यात्त्रिफलादितः ॥ ६१ ॥**
**धातक्यादेश्च पुष्पाणि स्नुह्यादेः क्षीरमाहरेत् ।**

इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां
शार्ङ्गधरसंहितायां पूर्वखण्डे परिभाषा नाम
प्रथमोऽध्यायः ॥ १ ॥

१—'रहिता' पा० ।

१—'साधिकाः' पा० ।

दी०—अतिस्थूलेति। या ओषध्यः अतिस्थूलजटाः पृथुतरमूलाः तासामोषधीनां त्वचो वल्कला ग्राह्याः, ताश्च वटनिम्बाम्रप्रभृतयः। ध्रुवमिति निश्चयेन। यानि सूक्ष्ममूलानि द्रव्याणि तान्यपि सकलानि गृह्णीयात्, बुद्धिमानिति सद्वैद्यः। सूक्ष्ममूलानि गोक्षुरकण्टकारिप्रभृतीनि। सकलानीति मूलपत्रपुष्पशाखान्वितानीत्यर्थः। 'अतिस्थूलजटायाः स्यु'रिति केचित् पठन्ति। तत्रातिस्थूलजटानां त्वचो ग्राह्या इति दशमूलपक्षे प्रचारः॥ अथ द्रव्याणां प्रसिद्धाङ्गाहरणत्वेन विशेषमाह—न्यग्रोधादेरिति। न्यग्रोधादेरित्यनेन विशेषो दर्शितः, न्यग्रोधो वटवृक्षस्तदादेर्द्रव्यस्यानुक्तत्वात् त्वचो वल्कला ग्राह्याः, आदिशब्दात् प्लक्षाम्रजम्बूकपीतनकाश्वत्थप्रभृतयः। बीजकादित इति। बीजको विजयासारो वृक्षविशेषस्तदादितस्तत्प्रभृतेः सारो* मध्यस्थितः काष्ठविशेषो ग्राह्यः, आदिशब्दात् खदिरासनबन्धूकबब्बूलादीनां ग्रहणम्। तालीसादेरिति तालीसः स्वनामख्यातः तदादेस्तत्पूर्वकात् पत्राणि पलाशानि ग्राह्याणि आदिग्रहणात् पत्रककौमारीनागवल्लीपत्रशाकादयः। त्रिफलादित इति त्रिफला प्रसिद्धा। तदादितस्तत्प्रभृतेः फलं ग्राह्यं आदिग्रहणात् प्रियङ्गुकक्कोलमदनफलादयः। तालीसादेश्चेति। चकारादनुक्तान्यपि पुष्पनिर्यासशृङ्गादीन्यनुमानतो बोद्धव्यानि॥ ६०॥ ६१॥

इति श्रीवात्सव्यन्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां प्रथमखण्डे परिभाषा नाम प्रथमोऽध्यायः॥ १॥

---

गू०—या औषध्यः अतिस्थूलजटाः स्युर्ध्रुवमिति निश्चयेन तासां त्वचो ग्राह्याः। बुद्धिमान्पुमान् सूक्ष्ममूलानि औषधानि गृह्णीयादित्यर्थः। न्यग्रोधादेः स्थूलवृक्षस्य त्वचो ग्राह्याः बीजकादितः विजयसारखदिरादेः सारः स्यात् त्रिफलादितः फलं स्यात् आदिशब्दाजातीफलकट्फलादयोऽपि॥ ६०॥ ६१॥

इति श्रीकाशीरामवैद्यरचितायां गूढार्थदीपिकायां सूत्रस्थाने परिभाषाध्यायः प्रथमः॥ १॥

दी०—पूर्वमुक्तं 'भैषज्याख्यानकं तथा' इति, इदानीं तद्दर्शयन्नाह—

## अथ भैषज्याख्यानकाध्यायः।

दी०—भैषज्यस्य आख्यानकं भक्षणकालादिकथनम्॥

दी०—तदधिकृत्याह—

**भैषज्यमभ्यवहरेत्प्रभाते प्रायशो बुधः।**
**कषायांश्च विशेषेण तत्र भेदस्तु दर्शितः॥ १॥**

दी०—भैषज्यमिति। बुधो भैषज्यं प्रायशो बाहुल्येन प्रभाते अभ्यवहरेत् भक्षयेदित्यर्थः। भिषजा संस्तुतं द्रव्यं भैषज्यम्। बुध इत्यनेन औषधकालान् वीक्ष्य स्वबुद्ध्या शीलयेदित्यर्थः। नात्र प्रभातमेव सर्वेषां नियतकालं। अत एव वक्ष्यन्ते अत्रैव विशेषाः। यथा—कषायांश्च विशेषेणेति। विशेषग्रहणेन कषायान् प्रातरेवाभ्यवहरेत् नान्यत्र। कषायानिति बहुवचनेन स्वरसादयः पञ्चकषायसंज्ञका ज्ञातव्याः, तद्यथा—'स्वरसः कल्पनिर्यूहौ हिमफाण्टौ च विश्रुताः' इति। तत्र औषधभक्षणे भेदः कालभेदो दर्शितः कथित इत्यर्थः। वक्ष्यमाण इति शेषः॥ १॥

गू०—प्रायशो बाहुल्येन प्रभाते भैषज्यं अवहरेत् प्रयोजयेत् विशेषतः कषायांश्च प्रयोजयेत्। तत्र भेदस्तु दर्शितः 'कालेनुक्ते प्रभातं स्या'दित्यत्र॥ १॥

गू०—अथ पञ्चविधकालः—

**ज्ञेयः पञ्चविधः कालो भैषज्यग्रहणे नृणाम्।**
**किञ्चित्सूर्योदये जाते तथा दिवसभोजने॥ २॥**
**सायन्तने भोजने च मुहुश्चापि तथा निशि।**

दी०—इदानीं तद्भेदमाह—ज्ञेय इति। भैषज्यग्रहणे औषधभक्षणनिमित्ते नृणां पञ्चविधः पञ्चप्रकारः कालः समयो ज्ञेयः। एतच्चातिपातिव्याधिषु न कालनियम इत्येके भाषन्ते, यतः 'अतिपातिषु रोगेषु नेच्छेद्विधिमिमं भिषक्। प्रदीप्तागारवच्छीघ्रं ततः कुर्यात् प्रतिक्रियाम्' इति। सत्यं, तथापि कर्तव्यमेतत्। अथ पञ्चप्रकारानाह—किञ्चिदिति। तत्र किंचित् सूर्योदये जाते सति एकः कालः, स तु प्रायशः कषायार्थमादौ प्रतिपादितः; 'कषायार्थं विशेषेण' इति वचनात्। द्वितीयस्तु दिवसभोजने भेषजकालः स पञ्चविधो भवति। भोजनाग्रे यथा लवणार्द्रकं भोजनमिश्रं यथा हिङ्गुघृतादिकं, भोजनमध्ये यथा पानीयादिकं, भोजनान्ते यथा लवङ्गहरीतक्यादि भोजनपू-

र्भान्ते चेति यथा धात्रीलोहमलपित्ते । तृतीयकालस्तु सन्ध्यासमयभोजने ज्ञेयः, सोऽपि त्रिविधः ग्रासे ग्रासान्तरे भुक्तान्ते चेति स चानुमानतो बोद्धव्यः । चतुर्थकालस्तु वारंवारं कथितः, स द्विविधः, तत्र द्रव्यं साम्नं निरन्नं चेति । पञ्चमः कालस्तु निशि रात्रौ बोद्धव्यः॥२॥

**गू०**—तमाह—नृणां भैषज्यग्रहणे भक्षणार्थे पञ्चविधः कालो ज्ञेयः—किञ्चित्सूर्योदये जाते प्रथमकालो ज्ञेयः । तथा तेन प्रकारेण दिवसभोजनेन मध्याह्ने द्वितीयः कालो ज्ञेयः । च पुनः सायन्तने भोजने तृतीयप्रहरे तृतीयः कालो ज्ञेयः । मुहुः कोऽर्थः—चतुर्थप्रहरे चतुर्थः कालो ज्ञेयः । अत्र मुहुरव्ययम् । चतुर्थप्रहरार्धे दर्शितः । निशि सन्ध्यायां पञ्चमः कालो ज्ञेयः । इति पञ्चकालानामनुक्रमणिका ॥ २ ॥

**दी०**—अथ तेषां प्रत्येकं विशेषविवरणमाह—

**प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः ॥ ३ ॥**
**लेखनार्थं च भैषज्यं प्रभाते तत्समाहरेत् ।**
**एवं स्यात्प्रथमः कालो भैषज्यग्रहणे नृणाम् ॥ ४ ॥**

**दी०**—प्राय इति । पित्तकफोद्रेके सति विरेकवमनार्थयोः द्रव्यं प्रभाते भक्षयेदित्यभिप्रायः । यथा पित्तोद्रेके विरेकः कफोद्रेके वमनम् इति । उद्रेको दोषोत्कटः । अन्यथा अस्मिन् कालेऽपि वमनविरेकयोर्न निषेधः । तथाहि 'सद्योभुक्तस्य वा जाते ज्वरे सामे विशेषतः । वमनं वमनार्हस्य शस्तमित्याह वाग्भटः' इत्यादिवचनात् । वमनातियोगेन विरेकं मृदु कारयेत् इत्यपि न केवलं वमनविरेकनिमित्तम् । लेखनार्थं च प्रातरेव लेखनं पत्तलीकरणं पुरुषाणां दोषाणां च । पुरुषाणां यथास्थूलस्य मध्वम्बुना, दोषाणां यथा—वायोस्तैलं, पित्तस्य घृतं, कफस्य मधु इति । एवमिति परिसमाप्तः प्रथमः कालः ॥ ३–४ ॥

**गू०**—अथ प्रथमकालः । प्रायः अतिशयेन कफोद्रेके पित्तकफाधिक्ये विरेकवमनार्थयोः, च पुनः लेखनार्थे कृशीकरणार्थे मेदोरोगादौ दन्तधावनार्थे च । तत्र भैषज्यं प्रभाते समाहरेत् भक्षयेदित्यर्थः । एवं, अमुना प्रकारेण भैषज्यग्रहणे प्रथमः कालः स्यात् इति प्रथमः ॥ ३ ॥ ४ ॥

**दी०**—अथ द्वितीयकालमाह—

**भैषज्यं विगुणेऽपाने भोजनाग्रे प्रशस्यते ।**
**अरुचौ चित्रभोज्यैश्च मिश्रं रुचिरमाहरेत् ॥ ५ ॥**
**समानवाते विगुणे मन्देऽग्नावग्निदीपनम् ।**
**दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक् ॥ ६ ॥**
**व्यानकोपे च भैषज्यं भोजनान्ते समाहरेत् ।**
**हिक्काक्षेपककम्पेषु पूर्वमन्ते च भोजनात् ॥ ७ ॥**
**एवं द्वितीयकालश्च प्रोक्तो भैषज्यकर्मणि ।**

**दी०**—भैषज्यमिति । अपाने गुदस्थिते वाते विगुणे क्रुद्धे भोजनाग्रे भुक्तादौ भक्षयेद्भैषज्यमिति शेषः । अरुचौ सत्यां चित्रभोज्यैर्मनोज्ञव्यञ्जनादिकैः सह मिश्रं मिलितं रुचिरं रुचिकरं यथा स्यात्तथा भक्षयेद्भैषज्यमिति पूर्ववन्मन्तव्यम् । समानवाते नाभिस्थिते वायौ विगुणे प्रकुपिते सत्यग्निमान्द्येऽपि च अग्निदीपनमग्निकरं द्रव्यं भोजनमध्ये दद्यादित्यर्थः । तथा हिक्काक्षेपककम्पेषु सत्सु भोजनस्य पूर्वमन्ते च दद्यात् । आक्षेपको वातरोगे पठितः, कम्पोऽपि वातरोगे ॥ ५–७ ॥

**गू०**—अपाने गुदस्थे वायौ विगुणे सति भैषज्यं मध्याह्ने भोजनाग्रे भोजनादौ प्रशस्यते युज्यते । द्वितीये काले मध्याह्ने इति सर्वत्रैव योज्यम् । अरुचौ सत्यां चित्रभोज्यैः सह रुचिरं औषधं मिश्रं अन्नयुक्तं यथा स्यात्तथा आहरेत् प्रयोजयेत् । चित्रभोज्यैः नानाव्यञ्जनैः, समानवाते नाभिस्थे वायौ, मन्देऽग्नौ च सति अग्निदीपनभैषज्यं कुशलो भिषक् भोजनमध्ये दद्यात् । कुशलो भिषक् वैद्यकशास्त्रे निपुणः । व्यानकोपे सर्वशरीरस्थे वायौ कुपिते सति भैषज्यमौषधं भोजनान्ते भोजनमध्ये समाहरेद्योजयेत् । हिक्काक्षेपककम्पेष्वधिकेषु सत्सु भोजनात्पूर्वं अन्ते च भैषज्यं योजयेदिति शेषः । आक्षेपकः वायुः । एवममुना प्रकारेण द्वितीयः कालः भैषज्यकर्मणि प्रोक्तः ॥ ५–७ ॥

**दी०**—अथ तृतीयकालमाह—

**उदाने कुपिते वाते स्वरभङ्गादिकारिणि ॥ ८ ॥**
**ग्रासे ग्रासान्तरे देयं भैषज्यं सान्ध्यभोजने ।**
**प्राणे प्रदुष्टे सान्ध्यस्य भुक्तस्यान्ते च दीयते ॥ ९ ॥**
**औषधं प्रायशो धीरैः कालोऽयं स्यात्तृतीयकः ।**

**दी०**—उदाने इति । उदाने कण्ठस्थिते वाते कुपिते, कथंभूते स्वरभङ्गादिकारिणि, स्वरभङ्गो विकृतस्वरत्वं मूकत्वं वा, आदिग्रहणात् कण्ठगतरोगाणां ग्रहणम् । सान्ध्यभोजने सन्ध्यासमयभोजनेऽग्रे ग्रासे कवले ग्रासान्तरे कवलयोर्मध्ये भैषज्यं देयमित्यभिप्रायः । तथा

१—'भक्तादौ, भक्तमध्ये, भक्तान्ते' पा० ।

प्राणे हृदयस्थिते प्राणवाते प्रदुष्टे सति सान्ध्यस्य भुक्तस्याहारस्य अन्ते प्रान्ते औषधं देयमित्यर्थः । धीरैरिति गम्भीरबुद्धिभिः पुरुषैः । अयं तृतीयः कालः स्याज्जानीयात् । ननु कथं वायोः प्राणादयः पञ्चभेदा दर्शिताः पित्तकफयोस्तु नोदाहृताः ? उच्यते—अनिलस्तु दोषधातुमलादीनां प्रधानतमः प्रकोपकारणहेतुश्च अत एवास्य प्रकोपेण पित्तकफयोः प्रकोप एव 'एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेत्' इति वचनात् । अन्यदपि 'स्वयम्भूरेष भगवान् वायुरित्यभिशब्दितः । अचिन्त्यवीर्यो दोषाणां नेता रोगसमूहराट्' ॥ ८–९ ॥

**गू०**—उदाने कण्ठस्थे वायौ कुपिते सान्ध्यभोजने तृतीयप्रहरे भैषज्यं ग्रासग्रासान्तरे देयम् । भूते उदाने स्वरभङ्गादिकारणं शीलं यस्य तस्मिन् हृदिस्थे प्राणवाते प्रदुष्टे सति सान्ध्यस्य भुक्तस्यान्ते तृतीयप्रहरमध्ये धीरैः प्रायशो बाहुल्येन औषधं दीयते । इत्ययं तृतीयः कालः स्यात् । इति तृतीयकालः ॥ ८ ॥ ९ ॥

**दी०**—अथ चतुर्थकालमाह—

**मुहुर्मुहुश्च तृट्छर्दिहिक्काश्वासगरेषु च ॥ १० ॥**
**सान्नं च भेषजं दद्यादिति कालश्चतुर्थकः ।**

**दी०**—मुहुर्मुहुरित्यादि । तृडादिषु सत्सु मुहुर्मुहुर्वारंवारं सान्नमिति भक्तमिश्रितं द्रव्यं दद्यात् । चकारात् क्वचिन्निरन्नव्यवहारान्न दोषः । तृट् तृष्णा, गरमत्र विषम् । इति चतुर्थः कालः ॥ १० ॥

**गू०**—मुहुस्तुर्ये प्रहरे कोऽर्थः । पुनः तृट्छर्दिहिक्काश्वासगरेषु सान्नं भेषजम् । तृट् तृष्णा, गरं विषम् । इति चतुर्थः ॥ १० ॥

**दी०**—अथ पञ्चमकालमाह—

**ऊर्ध्वजत्रुविकारेषु लेखने बृंहणे तथा ॥ ११ ॥**
**पाचनं शमनं देयमनन्नं भेषजं निशि ।**
**इति पञ्चमकालः स्यात् प्रोक्तो भैषज्यकर्मणि॥१२॥**

**दी०**—ऊर्ध्वेति । रात्रौ पाचनशमनरूपमौषधं चान्नरहितं देयमिति भावः । कुत्र ? ऊर्ध्वजत्रुविकारेषु तथा लेखने बृंहणे च जत्रु ग्रीवामूलं, तदूर्ध्वविकाराः शिरोरोगादयः । तथाच—'ऊर्ध्वजत्रुजरोगे तु सायं स्यादवलेहिका' इत्यादिवचनात् लेखनं प्रवृद्धरोगाणां ह्रस्वानां बृंहणमिति क्षीणदोषवर्धनमिति भावः । निशीति सामान्येन सकलरात्राविलेके भाषन्ते, संप्रदाने तु प्रथमं यामं वरमित्यर्थः । 'इति पञ्चमकालः स्यात्' इत्यस्य स्थाने 'इत्येवं पञ्चमः कालः' पाठः साधुः । भैषज्यहेतवे द्रव्यभक्षणनिमित्ते इत्येवं पञ्चमः कालः कथितः ॥ ११ ॥ १२ ॥

**गू०**—ऊर्ध्वजत्रुविकारेषु सत्सु तथा करणीये लेखने बृंहणेऽर्थे पाचनं द्रव्यं स्थानान्मलसञ्चयमूर्ध्वमधो वा यच्च्यावयेत्तच्छमनं इत्ययं भैषज्यहेतवे पञ्चमकालः प्रोक्तः । इति पञ्चमकालः ॥ ११ ॥ १२ ॥

**दी०**—इदानीं द्रव्ये रसादीनां विशेषावस्थामाह—

**द्रव्ये रसो गुणो वीर्यं विपाकः शक्तिरेव च ।**
**संबन्धेन[१] क्रमादेताः पञ्चावस्थाः प्रकीर्तिताः ॥१३॥**
रसः—**मधुरोऽम्लः पटुश्चैव कटुतिक्तकषायकाः ।**
**इत्येते षड्रसाः ख्याता नानाद्रव्यसमाश्रिताः॥१४॥**
**धराम्बुक्ष्मानलजलज्वलनाकाशमारुतैः ।**
**वाय्वग्निक्ष्मानिलैर्भूतद्वयै रसभवः क्रमात् ॥ १५ ॥**
गुणाः—**गुरुः स्निग्धश्च तीक्ष्णश्च रूक्षो लघुरिति क्रमात् ।**
**धराम्बुवह्निपवनव्योम्नां प्रायो गुणाः स्मृताः ॥१६॥**
**एष्वेवान्तर्भवन्त्यन्ये गुणेषु गुणसञ्चयाः ।**
वीर्यम्—**वीर्यमुष्णं तथा शीतं प्रायशो द्रव्यसंश्रयम्१७**
**तत्सर्वमग्नीषोमीयं दृश्यते भुवनत्रये ।**
**अत्रैवान्तर्भविष्यन्ति वीर्याण्यन्यानि यान्यपि॥१८॥**
विपाकः—**त्रिधा विपाको द्रव्यस्य स्वाद्वम्लकटुकात्मकः ।**
**मिष्टः पटुश्च मधुरमम्लोऽम्लं पच्यते रसः ॥ १९ ॥**
**कषायकटुतिक्तानां पाकः स्यात्प्रायशः कटुः ।**
**मधुराज्जायते श्लेष्मा पित्तमम्लाच्च जायते ॥ २० ॥**
**कटुकाज्जायते वायुः कर्माणीति विपाकतः ।**
प्रभावः—**प्रभावस्तु यथा धात्री लकुचस्य रसादिभिः २१**
**समापि कुरुते दोषं नियतस्य विनाशनम् ।**
**क्वचित्तु केवलं द्रव्यं कर्म कुर्यात्प्रभावतः ॥ २२ ॥**
**ज्वरं हन्ति शिरोबद्धा सहदेवीजटा यथा ।**
**क्वचिद्रसो गुणो वीर्यं विपाकः शक्तिरेव च ॥२३॥**
**कर्म स्वं स्वं प्रकुर्वन्ति द्रव्यमाश्रित्य ये स्थिताः ।**

**दी०**—द्रव्य इति । द्रव्ये प्रधानभूते रसादयः पञ्चाऽवस्थाः कथिताः, संबन्धेन क्रमादिति ज्ञानक्रमात्, ताश्च रसगुणवीर्यविपाकप्रभावादयो रसाः षट् मधुरादयस्ते तु मधुराम्ललवणतिक्तोषणकषायाः । गुणा विंशतिः—ते यथा—गुरु-मन्द-हिम-स्निग्ध-श्लक्ष्ण-सान्द्र-मृदु-स्थिर-सूक्ष्म-विशदा इति दश; विपर्ययास्तु—लघु-तीक्ष्णोष्णरूक्षखरद्रवकठिनसरस्थूलपिच्छिलाः; एवं विंशति-

१—'संवेदन' पा० ।

गुणाः कथिताः । वीर्यमिति द्विविधं शीतमुष्णं चेति । केचिदष्टविधमाहुः—शीतोष्णस्निग्धरूक्षविशदपिच्छिलमृदु तीक्ष्णं चेति, यतः—'वीर्यसंज्ञा गुणा ह्येते तेऽपि द्रव्याश्रया मताः' इति वचनात् । विपाकस्तु त्रिविधः स्वाद्वम्लकटुकात्मक इति । केचिद्गुरुलघुद्वारेण द्विविधमाहुः । तत्र मधुरः कटुकात्मकः यतो मधुराख्यो गुरुः कटुकाख्यो लघुरिति । शक्तिश्चाचिन्त्यप्रभावो द्रव्याणां यथा मणिमन्त्रौषधीनां विधिः । एतेऽपि रसादयो द्रव्याश्रिता भवन्ति तस्माद्द्रव्यं प्रधानमित्याहुः । यदुक्तं 'पाको नास्ति विना वीर्याद्वीर्यं नास्ति विना रसात् । रसो नास्ति विना द्रव्याद्द्रव्यं श्रेष्ठतमं स्मृतम्' इति । द्रव्यमिति सामान्यग्रहणेन मूलत्वक्सारनिर्यासादीन्यभिधीयन्ते । तद्यथा—'मूलत्वक्सारनिर्यासनालस्वरसपल्लवाः । क्षीरं क्षारं फलं पुष्पं भस्म तैलानि कण्टकम् ॥ पत्राणि शुङ्गकन्दानि प्ररोहास्तूद्भिदादयः । द्रव्यशब्देन गृह्यन्ते जङ्गमाः पार्थिवास्तथा ॥' इति । जङ्गमा अपि यथा—'मधूनि गोरसाः पित्तं वसा मज्जाऽसृगामिषम् । विण्मूत्रचर्मरेतोऽस्थि स्नायुशृङ्गनखं खुराः ॥ जङ्गमेभ्यः प्रयुज्यन्ते केशा लोमानि रोचनाः' इति । पार्थिवाश्च यथा—'सुवर्णं समलाः पञ्च लोहाश्चेति कलासु च । मनःशिलाले मणयो लवणं गैरिकाञ्जनम्' इत्यादि ॥

अथ तेषां रसादीनां स्वरूपमाह—मधुर इति । मधुरादयः षड्रसा द्रव्याश्रिताः सन्तोऽपि व्याख्याता एव । तत्र मधुरो घृतगुडादिः, अम्लो अम्लीकामातुलुङ्गादिः, पटुर्लवणपर्यायः स च सैन्धवादिः, कटुको मरीचादिः, तिक्तो निम्बादिः, कषायो हरीतक्यादिः ॥ एतेषां मूर्तानामुत्पत्तिमाह—धरेत्यादि । उत्पत्तिस्तु भूतद्वयेन भवति । भूतं पृथिव्यादि । क्रमादिति युक्तक्रमेण तद्यथा—धराम्बुभ्यां मधुरो रसः, तेन पृथिव्यम्बुबाहुल्येन मधुररस उत्पद्यते, एवं क्ष्माऽनलाभ्यामम्लः, जलज्वलनाभ्यां लवणः, आकाशमरुद्भ्यां कटुकः, वाय्वग्निभ्यां तिक्तः, क्ष्माऽनिलाभ्यां कषाय इति रसः ॥

अथ गुणाः—गुरुरिति । गुरुस्निग्धादयो गुणाः क्रमात् धरादीनां कथिताः । क्रमो यथा—धराया गुरुः, अम्बुनः स्निग्धः, वह्नेस्तीक्ष्णः, पवनस्य रूक्षः, व्योम्नो लघुरिति । प्राय इति प्रायेण एतेऽत्र मुख्या गुणा गुणानां मध्ये कथिताः । पञ्चगुणग्रहणं भूतक्रमेण कृतम् । एष्वेव पञ्चगुणेषु अन्योऽपि श्लक्ष्णसान्द्रमृदुप्रभृतिगुणसंचयो बोद्धव्यः । स चाप्यनुमानतो निरूपणीयः । गुणा इति बहुवचनत्वेन व्यवायी विकासी चाकरौ द्वौ द्वाविंशत्यर्थमिति केचित्, सत्त्वं रजस्तमश्चेति त्रयो महागुणाः कथिता इति केचित् ॥

अथ वीर्यम्—वीर्यमिति शक्तिः । तद्द्विविधमपि प्रायशो बाहुल्येन द्रव्याश्रयं द्रव्याधीनं भवति । द्विविधं शीतोष्णभेदेन । यस्माद्भुवनत्रयमग्न्यात्मकं सोमात्मकं च दृश्यते । अत्रैव शीतोष्णवीर्ये अन्यानि यानि वीर्याणि तान्यन्तर्भविष्यन्तीति केचित् वदन्ति न स्वमतम्, यतः प्रायश इति ग्रहणेन शीतोष्णं विशिष्टवीर्यम् । अन्यानीति स्निग्धरूक्षविशदपिच्छिलमृदुतीक्ष्णादीनि महाभूतानि तु क्ष्माम्बुज्वलनाकाशमरुतः ॥

अथ विपाकमाह—मिष्ट इति । प्रायशो बाहुल्येनात्र त्रिविध एव विपाकः मधुरोऽम्लः कटुक इति । विशिष्टो पाको विपाकस्तत्र मिष्टो मधुरः पटुर्लवण एतयोर्मधुर इति मधुरविपाक इत्यभिप्रायः । अम्लोऽम्लमिति । अम्लो रसः अम्लमेव पच्यते । कटुतिक्तकषायाणां रसानां कटुरिति कटुकविपाकः स्यात् । एतदभिप्रायेण तन्त्रान्तरे चोक्तम् 'त्रिधा विपाको द्रव्यस्य स्वाद्वम्लकटुकात्मकः' इति । अत एव विपाकानां त्रिविधं कर्म भवति । तदाह—मधुरादित्यादि । मधुरान्मधुरविपाकात् श्लेष्मा प्रजायते प्रकोपमापद्यते इत्यर्थः । अम्लाच्चेत्यम्लविपाकात् पित्तमिति । कटुकादिति कटुकविपाकाद्वायुरिति । एतानि कर्माणि यत् कुर्वन्ति तत् कर्म, कर्मशब्देनात्र दोषप्रकोपव्यापारलक्षणं धर्म इति ॥

इदानीं प्रभावमाह—प्रभाव इति । विशिष्टो भाव उत्कृष्टा शक्तिरित्यर्थः । यथा धात्री आमलकीफलं रसादिभिरिति रसगुणवीर्यविपाकादिभिः समा समानगुणा लघुरप्यस्ति तथापि तदेवामलकीफलं प्रभावाद्दोषत्रयनाशनं नियतमेव । इति रसादिप्रभावः ॥

केवलं द्रव्यप्रभावमाह—क्वचिदित्यादि । कुत्रापि केवलमेकद्रव्यमेव प्रभावतः कर्म कुर्यात् । यथा सहदेवीजटा शिरोबद्धा सती ज्वरं हन्तीति । अतएवाचिन्त्यो मणिमन्त्रौषधीनां प्रभाव इति विश्रुतिः । एके 'प्रभावस्तु यथा धात्रीलकुचस्य रसादिभिरि'ति पठन्ति । तत्र लकुचफलस्य रसादिभिः सह धात्री समानधर्मा, तत्रापि धात्री प्रभावादेव दोषत्रयनाशिनी भवति । लकुचफलम्—लकुचः क्षुद्रपनसः, नारङ्गफलमित्येके ॥ १३-२३ ॥

अथ द्रव्याश्रितानां रसादीनां निजोत्कृष्टतामाह—क्वचिदिति । द्रव्यमाश्रित्य स्थिता ये रसादयस्ते

स्वं स्वं कर्म कुर्वन्ति । क्वचिद्रस इति यथा—तिक्ता गुडूची उष्णवीर्यापि पित्तं शमयति । क्वचिद्गुणो यथा—कटुकं मूलकं श्लेष्माणं च वर्धयति स्निग्धगुणत्वात् । क्वचिद्वीर्यमिति यथा—महत्पञ्चमूलं कषायं तिक्तानुरसं वातं शमयति उष्णवीर्यत्वात् । ननु गुणवीर्ययोः को भेदः ? उच्यते, य एव गुणा धात्रीफले त एव हरीतक्यां सन्ति । वीर्ये विशेषोऽस्ति यतः उष्णवीर्या हरीतकी शीतवीर्यं धात्रीफलमिति, तस्माद्भिन्नत्वं प्रतिपादितमिति न दोषः । क्वचिद्विपाक इति यद्द्रव्यं परिणामकाले स्वाभाविकं रसं परित्यज्य रसान्तरं भजते तत्र विपाकेति संज्ञा, यथा शुण्ठी कटुकापि वातं शमयति मधुरपाकत्वात् । क्वचित् शक्तिरिति । यथा शक्तितः प्रभावतः यतो रसगुणवीर्यविपाकैर्यत् कर्म कर्तुं न शक्यते तत्कर्म कुर्वन् प्रभाव इति संज्ञा, यथा खदिरः कुष्ठं हन्ति । अत एवाह सुश्रुतः—'अमीमांस्यान्यचिन्त्यानि प्रसिद्धानि स्वभावतः । आगमेनोपयोज्यानि भेषजानि विचक्षणैः' ॥ इति द्रव्यादिकथनम् ॥ १३–२३ ॥

गू०—नता रसादयः पञ्चावस्थाः सम्बन्धेन द्रव्ये प्रकीर्तिताः । सम्बन्धेन तत्कार्यानुसन्धानेन द्रव्ये रसः द्रव्ये गुणः द्रव्ये वीर्यं शीतोष्णादिके द्रव्येऽपि पाकः विगतः विकारं प्राप्तः रसादिपाकः विपाकद्रव्ये शक्तिः शक्तिः प्रभावः सर्वं रसादिकं द्रव्ये तिष्ठतीति । तस्माद्द्रव्यं प्रधानम् । ननु रसादिकं विहाय द्रव्यमिति प्रधानं क्रियते । केचिदाचार्या ब्रुवते—द्रव्यं प्रधानमेव कस्माद्व्यवस्थितत्वात् । इह खलु द्रव्यं व्यवस्थितं न रसादयः । यथा आमे फले रसादयस्ते पक्वे न सन्ति नित्यत्वाच्च । नित्यं हि द्रव्यमनित्या गुणाः, यथा पार्थिवं द्रव्यं न रसादय आश्रयत्वाच्च । द्रव्यमाश्रिता रसादयो भवन्ति आरम्भसामर्थ्याच्च द्रव्याश्रित आरम्भः यथा विदार्यश्वगन्धादीनां द्रव्याणां क्राथनार्थं कुट्टनपाचनादिकरसारम्भः क्रियते न तथा रसादिष्वारम्भः । शास्त्रे हि द्रव्यं प्रधानमुद्देशे हि योगानां यथा मातुलुङ्गाग्निमन्थौ चेति न रसादय उपदिश्यन्ते । क्रमापेक्षित्वाच्च रसादीनाम् । रसादयो हि द्रव्यादयः साध्यन्ते यथा महावृक्षः क्षीणोपि यस्माद्द्रव्यं तस्माद्द्रव्यं प्रधानम् । द्रव्यलक्षणं तु क्रियावद्गुणवत्समवायिकारणमिति नेत्याहुः—अन्ये रसान्प्रधानान् ब्रुवते । कस्मात् । आगमात् । आगमो हि शास्त्रमुच्यते । शास्त्रे रसाधिकता यथा रसायत्त आहार इति । तस्मिंश्च प्राक् उपदेशात् ते रसा यथा मधुराम्ललवणा वातं शमयन्ति । अनुमानाच्च । रसतो ह्यनुमीयते द्रव्यम् । यथा मधुरमिति ऋषिवचनाच्च । ऋषिवचनं वेदो यथा किंचित्क्रियार्थं रसमाहरेदिति । तस्माद्रसाः प्रधानम् । रसेषु गुणसंज्ञा रसलक्षणमन्यत्रापि लक्षयामः । नेत्याहुः । अन्ये वीर्यं प्रधानमिति । कस्माद्वंशेनौषधं निष्पद्यते । इहौषधकर्माण्यूर्ध्वाधोभागोभयभागसंशोधनसंशमनसंग्राहिकाग्निदीपनपीडनलेखनबृंहणरसायनवाजीकरणश्वयथुहरकारणविलयनदहनदारणमन्थनप्राणघ्नविषप्रशमनानि वीर्यप्रधानानि भवन्ति । तद्वीर्यं द्विविधम् । उष्णं शीतं च अग्नीषोमीयत्वाज्जगतः । केचिदष्टविधमाहुः—उष्णं शीतं स्निग्धं रूक्षं विशदं पिच्छिलं मृदु तीक्ष्णं चेति । एतानि वीर्याणि स्वगुणोत्कर्षात् सप्तभिः भूयात्मकं कर्म कुर्वन्ति । यथा तावदनन्तमूलं तिक्तानुरसं वातं शमयत्युष्णवीर्यत्वात् । मधुरं क्षौद्रं वा तदेतन्निदर्शनमात्रमुक्तम् । भवन्ति चात्र नचैते कर्मकारिणः तस्माद्वीर्यं प्रधानमिति नेत्याहुः । अन्ये पाकप्रधानमिति । कस्मात् सम्यग्मिथ्याविपक्वत्वात् इह सर्वद्रव्याण्याभ्यवहृतानि सम्यग्मिथ्याविपक्वानि गुणं दोषं वा जनयन्ति । तत्राहुः—अन्ये प्रतिसंपाक इति केचित्त्रिविधमिच्छन्ति । यथा क्षीरमुखागतमभिपच्यमानं मधुरमेव स्यात् तथा शालियवमुद्गादयः प्रकीर्णस्वभावमुत्तरकायेऽपि न परित्यजन्ति तद्वदिति केचिद्वदन्ति । अवलबलो(?)पल्लवतां वशमायान्तीत्येवमनवस्थितिः । तस्मादसिद्धो न रसः । आगमो हि द्विविध एव पाको मधुरः कटुश्च तयोर्मधुराख्यो गुरुः कटुकाख्यो लघुरिति । तत्र पृथिव्यप्तेजोवाय्वाकाशानां द्वैविध्यं भवति । गुणसाधर्म्याद्गुरुता लघुता च । पृथिव्यापश्चागुर्व्यः शेषाणि तु लघूनि । तस्माद्द्विविध एव पाकः । भवति चात्र द्रव्येषु पच्यमानेष्वम्बुपृथिवीगुणा निवर्तन्तेऽधिकस्तत्र पाको मधुर उच्यते । तेजोनिलाकाशगुणो द्रव्यमानेषु न निवर्ततेऽधिकस्तत्र पाकः कटुरुच्यते । पृथक्त्ववदर्शिनामेष वादिनां वादसंग्रहः । चतुर्णामपि सामर्थ्यमित्थम् । तत्र विपश्चितः तत् द्रव्यमात्मना किंचिद्वीर्येण सहितं किञ्चिद्रसविपाकाभ्यां दोषं हन्ति करोति वा । केचन शक्तिं प्रधानमाहुः । नेत्याहुरन्ये । द्रव्यमेव प्रधानम् । कुतः 'पाको नास्ति विना वीर्यं नास्ति वीर्यं विना रसात् ।

रसो नास्ति विना द्रव्यात् द्रव्यं श्रेष्ठतमं स्मृतम्॥वीर्यं संज्ञा मतायेष्टौ तेपि द्रव्याश्रयाः स्मृताः । रसेषु न भवन्त्येते निर्गुणास्तु गुणाः स्मृताः ॥ द्रव्ये द्रव्याणि यस्माच्च विपच्यन्ते न षड्रसाः ॥ श्रेष्ठं द्रव्यमतो ज्ञेयं शेषा भावास्तदाश्रयाः ॥' यतो द्रव्यं प्रधानं तस्माद्रसादयो द्रव्येषु प्रतिष्ठितास्तान्यस्मिन् नानाद्रव्यसमाश्रिता इत्येते षड्रसाः ख्याताः । अत ऊर्ध्वमुत्पत्तिं वक्ष्यामः द्वाभ्यां भूताभ्यां क्रमात् रसभवः रसोत्पत्तिर्धराम्बुभ्यां मधुररसोत्पत्तिः, क्ष्मानलाभ्यां अम्लरसोत्पत्तिः, जलज्वलनाभ्यां कटुरसोत्पत्तिः, आकाशमारुताभ्यां कटुरसोत्पत्तिः, वाय्वग्निभ्यां तिक्तरसोत्पत्तिः, अम्ब्वनिलाभ्यां कषायरसोत्पत्तिरिति रसोत्पत्तिः । रसलक्षणमत ऊर्ध्वं वक्ष्यामः । तत्र यः पुरीषमुत्पादयति, प्रह्लादयति, तर्पयति, जीवयति, मुखमुपलेपयति, श्लेष्माणं चाभिवर्धयति, स मधुरोपि दन्तहर्षमुत्पादयति, मुखस्रावं जनयति । स लवणः यो जिह्वाग्रं बाधते, उद्वेगं जनयति, शिरो गृह्णीते, नासिकां च स्रावयति स कटुकः यो गललक्षणदोषमुत्पादयति, मुखवैरस्यं जनयति । स तिक्तः यो वक्त्रं परिशोषयति जिह्वां स्तम्भयति कण्ठं बध्नाति हृदयं कर्षयति पीडयति रसः कषाय इति । अतः सर्वाणि द्रव्याण्युपदेक्ष्यामः । तद्यथा काकोल्यादिक्षीरघृतवसामज्जाशालिषष्टिकगोधूममाषशृङ्गाटककसेरुकत्रपुसैर्वारुककर्कारुकालाबुकलिङ्गलैघप्रियङ्गुपुष्करबीजकाश्मर्यमधूकद्राक्षाखर्जूरराजादनतालिनालिकेरेक्षुविकारबलातिबलात्मगुप्ताविदारीवयस्यागोक्षुरकजीरमोचरसमधूलिकाकूष्माण्डप्रभृतीनि समासेन मधुरो वर्गः । दाडिमामलकमातुलुङ्गाम्रातककपित्थकरमर्दकबदरकोलशचीनामलकतिंतिडीकाकोशाम्रभव्यपरेवतनेत्रफललकुचाम्लवेतसउदश्वितसुराशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेन लवणो वर्गः । पिप्पल्यादिशिग्रुमधुशिग्रुमूलकलशुनसुसुखशीतशिवकुष्ठदेवदारुहरेणुकावल्गुफलचण्डागुरुगुल्मस्तुलाङ्गलीशुकनासापीलुप्रभृतीनि शालसारादिश्च प्रायशः कटुको वर्गः । आरग्वधादिगुडूच्यादिमण्डूकपर्णीवेत्रकरीरहरिद्राद्वयेन्द्रवारुणस्वादुकण्टकसप्तपर्णबृहतीद्वयं शङ्खिनी द्रवन्तीत्रिवृच्छतवेधनकर्कोटककारवेल्लकवर्ताककरवीरसुमनशङ्खपुष्पाभार्ङ्गीत्रायमाणकरोहिणीवैजयन्तीसुवर्चलापुनर्नवावृश्चिकालीज्योतिष्मतीप्रभृतीनि समासेन तिक्तो वर्गः । न्यग्रोधादि राजादि प्रियंग्वादि रोध्रादि त्रिफला शल्लकीबीजं वाम्रबकुलतिन्दुकफलानि करकशाकफलपाषाणभेदकवनस्पतिशालसारादिश्च प्रायशः कुरबकादि दारकजीवन्तिका चिल्ली पालङ्क्या सुनिषण्णकप्रभृतीनि लीवरकादयो मुद्गादयश्च समासेन कषायो वर्गः । तत्रैषां रसानां संयोगास्त्रिषष्टिः । भवति चात्र 'भूतेजोवारिजैर्द्रव्यैः समं याति समीरणः । पित्तं क्षयमवाप्नोति खभूमिजलवायुजैः॥ खतेजोऽनिलजैः श्लेष्मा सममेति शरीरिणाम् । वियत्पवनजाताभ्यां वृद्धिमभ्येति मारुतः ॥ आग्नेयमेव यद्द्रव्यं तेनेयमुदीर्यते(?) । वसुधा जलजाताभ्यां बलासः परिवर्धते । एवमेतद्गुणाधिक्यं द्रव्ये द्रव्यं विनिश्चितम् ॥' इति । रसा धराधराम्बुवह्निपवनव्योम्नां प्राय अतिशयेन क्रमाद्गुणाः स्मृताः । धरायां गुणा अम्बुनि स्निग्धगुणं, वह्नौ तीक्ष्णगुणं, पवने रूक्षगुणं, एषु गुणेषु अन्तरन्ये गुणसञ्चया भवन्ति सन्तीत्यर्थः । पञ्चभूतानां गुणाः कथिताः । इति गुणाः । ऋषयः शीतं चोष्णं द्विविधं वीर्यमाहुः, एवं शीतं एकमुष्णं । किंविशिष्टं वीर्यं प्रायशः द्रव्यसंश्रयं प्रायशः अतिशयेन द्रव्ये संश्रयं स्थानं यस्य तत् । कुतः यद्यस्मात्कारणाद्भुवनत्रयमग्नीषोमीयं दृश्यते सोमात्मकमग्न्यात्मकं चेत्यर्थः । सोमात्मकं वीर्यमग्न्यात्मकं रजः, तयोर्जङ्गमानामुत्पत्तिः स्थावराणामुत्पत्तौ भानो रश्मिभिरुष्णत्वाद्रजोगुणयुक्तायां भुवि सत्यां सोमात्मकात् शीतवीर्यात् मेघानां प्रायशः भुवि स्थावराणामुत्पत्तिः । अतः जगन्नितयं सोमात्मकं अन्यानि वीर्याणि सर्वमग्निषोमीयं दृश्यन्ते वीर्याणि तान्यत्रैव अग्निषोमीये वीर्यमन्तर्मध्ये भविष्यन्तीत्यभिप्रायः। इति वीर्यं । मिष्टकटुतिक्तानां रसानां पाकः प्रायशः कटुः स्यात् भवेदित्यर्थः । यदुक्तं–'त्रिधा विपाको द्रव्यस्य स्वाद्वम्लकटुकात्मकः ।' तदाह 'मधुराच्छ्लेष्मा जायते, अम्लात् पित्तं जायते, कटुकात् वायुः जायते एतानि कर्माणि पाकतः जायन्ते इति पाकः । प्रभावं वदति । यथा अपि नि इति निश्चयेन लकुचस्य रसादिभिः समाहिता धात्रीदोषत्रयस्य विनाशं कुरुते । अन्यत्प्रभावमाह—क्वचित्केवलं द्रव्यं प्रभावतः कर्म कुर्यात्, यथा–सहदेवीजटा शिरसि बद्धा सती ज्वरं हन्तीति सुगममन्यत् । इति प्रभावः । क्वचित्कस्मिन्स्थले द्रव्यं आश्रित्य रसादयः स्थिताः ते स्वं स्वं कर्म कुर्वन्ति, क्वचिद्रसः स्वं कर्म करोति, क्वचिद्गुणः स्वं कर्म करोति, क्वचिद्वीर्यं स्वं कर्म करोति, क्वचिद्विपाकः स्वं कर्म करोति, क्वचिच्छक्तिः प्रभावः स्वं कर्म करोति स्पष्टमन्यत् । इति द्रव्यगुणवीर्यविपाकप्रभावाः ॥ १३–२३ ॥

१ रसस्य षण्णामपि रसभेदानां चरकसुश्रुतादौ त्रिषष्टिरसभेदाः परिगणितास्ते सोदाहरणाः प्रदर्श्यन्ते—

# त्रिषष्टिरसभेदाः ॥

| सं. | सं. | रूपाणि | उदाहरणानि |
|---|---|---|---|
| १ | १ | मधुरम् | सन्तानिकागोदुग्धादि |
| २ | २ | अम्लम् | आम्रकरमर्दादि |
| ३ | ३ | लवणम् | रोमकादिकम् |
| ४ | ४ | तिक्तम् | निम्बपर्पटादि |
| ५ | ५ | कटुकम् | चव्यादि |
| ६ | ६ | कषायम् | पद्मकन्दन्यग्रोधादि |
| ७ | १ | मधुराम्लम् | कपित्थफलादि |
| ८ | २ | मधुरलवणम् | उष्ट्रीक्षीरादि |
| ९ | ३ | मधुरतिक्तम् | श्रीवाससर्जरसादि |
| १० | ४ | मधुरकटुकम् | कुकुरशृगालमांसादि |
| ११ | ५ | मधुरकषायम् | तैलधन्वनफलादि |
| १२ | ६ | अम्ललवणम् | एडकादिकम्, ऊषादिकम् |
| १३ | ७ | अम्लतिक्तम् | सुरादिकम् |
| १४ | ८ | अम्लकटुकम् | चुक्रादिकम् |
| १५ | ९ | अम्लकषायम् | हस्तिनीदध्यादि |
| १६ | १० | लवणतिक्तम् | त्रपुसीसादि |
| १७ | ११ | लवणकटुकम् | गोमूत्रस्वर्जिकादि |
| १८ | १२ | लवणकषायम् | समुद्रफेनादि |
| १९ | १३ | तिक्तकटुकम् | कर्पूरजातीफलादि |
| २० | १४ | तिक्तकषायम् | लवलीफलहस्तिनीघृतादि |
| २१ | १५ | कटुकषायम् | भल्लातकमज्जाहरितालादि |
| २२ | १ | म. अ. ल. | हस्तिनीमांसादि |
| २३ | २ | म. अ. ति. | गोधूमोत्थसुरादि |
| २४ | ३ | म. अ. कटु | शल्यमांसादि |
| २५ | ४ | म. अ. कषा. | मस्तुतक्रादि |
| २६ | ५ | म. ल. ति. | शम्बूकादिमांसम् |
| २७ | ६ | म. ल. कटु | अपूपादीनि |
| २८ | ७ | म. ल. कषा. | ताप्यकासीसादि |
| २९ | ८ | म. ति. कटु | कटुकाम्लभक्तादि |
| ३० | ९ | म. ति. कषा. | गुडूच्यादि |
| ३१ | १० | म. क. कषा. | ऐरण्डतैलादिकम् |
| ३२ | ११ | अ. ल. ति. | हस्तिमृगमूत्रादि |

| सं. | सं. | रूपाणि | उदाहरणानि |
|---|---|---|---|
| ३३ | १२ | अ. ल. कटु | रौप्यशिलाजत्वादि |
| ३४ | १३ | अ. ल. कषा. | हस्तिनीदधि |
| ३५ | १४ | अ. ति. कटु | मरिचसंस्कृतसुरादि |
| ३६ | १५ | अ. ति. कषा. | करिमांसयुतसुरादि |
| ३७ | १६ | अ. कटु कषा. | अम्लवेतसादि |
| ३८ | १७ | ल. ति. कटु | अविमूत्रम् |
| ३९ | १८ | ल. ति. कषा. | समुद्रफेनम् समुद्रस्थितम् |
| ४० | १९ | ल. कटु कषा. | अरुष्कासवरोमकम् |
| ४१ | २० | ति. कटु कषा. | कृष्णागुरुसुरदारुलेहादि |
| ४२ | १ | म. अ. ल. ति. | गोमूत्रैकशफक्षीरादि |
| ४३ | २ | म. अ. ल. कटु | गोमूत्रान्वितशिलाजत्वादि |
| ४४ | ३ | म. अ. ल. कषा. | सैन्धवान्विततक्रादि |
| ४५ | ४ | म. अ. ति. कटु | लशुनान्वितसुरादि |
| ४६ | ५ | म. अ. ति. कषा. | कम्ब्वादिकम् |
| ४७ | ६ | म. अ. कटु कषा. | काञ्जिकान्वितैरण्डतैलादि |
| ४८ | ७ | म. ल. ति. कटु | उदुम्बरान्वितं यवादि |
| ४९ | ८ | म. ल. ति. कषा. | समुद्रफेनशर्करायुक्तचन्दनम् |
| ५० | ९ | म. ल. कटु कषा. | गोमूत्रान्विततैलादि |
| ५१ | १० | म. ति. कटु कषा. | तिलगुग्गुल्वादि |
| ५२ | ११ | अ. ल. ति. कटु | सैन्धवसौवर्चलान्वितं शुकमांसादि सुरादिकम् |
| ५३ | १२ | अ. ल. ति. कषा. | उद्भिदलवणान्वितं शुकमांसादि |
| ५४ | १३ | अ. ल. कटु कषा. | सौवर्चलान्वितं हस्तिनीदध्यादि |
| ५५ | १४ | अ. ति. कटु कषा. | बालमूलकाक्तहस्तिनीदध्यादिकम् |
| ५६ | १५ | ल. ति. कटु कषा. | रोमकबालबिल्वादिकम् |
| ५७ | १ | म. अ. ल. ति. कटु | आम्रकरमर्दान्वितभ्रष्टवृन्ताकफलादि |
| ५८ | २ | म. अ. ल. ति. कषा | उद्भिदान्विततक्रादिकम् |
| ५९ | ३ | म. अ. ल कटु कषा. | त्रिकटुयवान्विततक्रादिकम् |
| ६० | ४ | म. अ. ति. कटु कषा. | हरीतकीफलादिकम् |
| ६१ | ५ | म. ल. ति. कटु कषा. | रसोनादिकम् |
| ६२ | ६ | अ. ल. ति. कटु कषा. | भल्लातकरूप्यशिलाजतुमिश्रनिम्बादि |
| ६३ | ७ | अ. ल. ति. कटु कषा. | पारदः ॥ |

दी०-अथ दोषोपचयप्रकोपोपशमान् दर्शयन्नाह—

**चयकोपशमा यस्मिन्दोषाणां संभवन्ति हि॥ २४॥**
**ऋतुषट्कं तदाख्यातं रवे राशिषु संक्रमात्।**

दी०—चयकोपशमा इति। दोषाणां वातादीनां चयकोपशमा इति चयः सञ्चयः, स च संहतिरूपा वृद्धिः, स्वस्थानवृद्धिरित्यन्ये। कोपः प्रकोपः स च प्रविलयरूपा वृद्धिः प्रकोपः। शम इत्युपरमः। यथा-वातपित्तकफानां शरद्धेमन्तग्रीष्मेषु यथासंख्यमुपशमः स्वभावत एव। तदृतुषट्कं ग्रीष्मप्रावृड्वर्षाशरद्धेमन्तवसन्ताख्यमित्यर्थः। कुत इत्याह—रवे राशिषु संक्रमादिति रवेः सूर्यस्य राशिषु मेषादिषु संक्रमात् प्रवेशादित्यर्थः॥ २४॥

गू०—अथ षट्कं यस्मिन् ऋतुषट्के दोषाणां वातपित्तकफानां चयकोपशमाः संभवन्ति तदेव ऋतुषट्कं रवे राशिषु संक्रमात् आख्यातं-तदेवाह-जीवितमरणे च मनुष्याणामापन्नेत्यसूक्ष्मां कलामपि न लीयते इति कालः, कलयति उत्पादयति मरणं नयति वा भूतानीति कालः। तस्य संवत्सरात्मनो भगवानादित्यो गतिविशेषेणाक्षिनिमेषिका काष्ठाकलामुहूर्ताहोरात्रपक्षमासर्त्वयनसंवत्सरयुगप्रविभागं करोति। तत्र लघ्वक्षरोच्चारमात्रोऽक्षिनिमेषः, पञ्चादशाक्षिनिमेषाः काष्ठा, त्रिंशत्काष्ठाः कला-विंशतिकलो मुहूर्तः, त्रिंशन्मुहूर्तमहोरात्रं, पञ्चदशाहोरात्राणि पक्षः, स च द्विविधः, शुक्लः कृष्णश्च, तौ मासः, तत्र मार्गशीर्षादयो द्वादश मासाः, द्विमासकमृतुं कृत्वा षड् ऋतवो भवन्ति तदेवर्तुषट्कम्। एते चयकोपशमा एके केवलप्रकोपाः॥ २४॥

दी०—इदानीमृतुषट्कं राशिद्वयेन दर्शयन्नाह—

**ग्रीष्मो मेषवृषौ प्रोक्तौ प्रावृड्मिथुनकर्कयोः॥ २५॥**
**सिंहकन्ये स्मृता वर्षास्तुलावृश्चिकयोः शरत्।**
**धनुर्ग्राहौ च हेमन्तो वसन्तः कुम्भमीनयोः॥ २६॥**

दी०—ग्रीष्म इति। मेषसंक्रान्तिप्रभृति वृषसंक्रान्त्यवसानं ग्रीष्मऋतुः प्रोक्तः कथित इत्यर्थः। एवं मिथुनादिकर्कान्तं प्रावृट्, सिंहादिकन्यान्तं वर्षाऋतुः, तुलादिवृश्चिकान्तं शरत्, धनुरादिग्राहान्तं हेमन्तः, ग्राहो मकरः, कुम्भादिमीनान्तं वसन्त इति। एतेन राशिद्वयेन द्विमासिकमपि ऋतुषट्कं भवति। तद्दोषचयादिनिमित्तमभिहितं तत्त्वज्ञानार्थम्। यदुक्तं सुश्रुतेन-दोषोपचयप्रकोपोपशमनिमित्तं 'ते तु भाद्रपदाद्येन द्विमासिकेन वर्षादयो व्याख्याताः' यथायथं संख्याताः। ये तु तन्त्रान्तरे-'मासैर्द्विसंख्यैर्माघाद्यै'रित्यादिना शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ता भवन्ति ते तु शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वाचायननिमित्ताः। यतः 'मासराशिस्वरूपाख्यमृतौ यल्लक्षणत्रयमि'ति वचनात्। ननु प्रावृड्वर्षयोः को भेदः? उच्यते, प्रथमः प्रवृत्तः कालः प्रावृट् तस्यानुबन्धो वर्षा इत्यत्र भेदः। एवं 'शिशिरे शीतमधिकं रौक्ष्यं चादानकालजम्' इत्यनेन शिशिरहेमन्तयोरपि भेदोऽस्ति। पूर्वमुक्तं चयकोपसमा ऋतवो भवन्तीति॥

तयोर्मध्यमध्ये आदौ सुश्रुतादिष्वप्युक्तत्वात् केवलप्रकोपे ऋतुमाह-ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ताः तेषां माघफाल्गुनौ शिशिरः, चैत्रवैशाखौ वसन्तः, ज्येष्ठाषाढौ ग्रीष्मः, श्रावणभाद्रपदौ वर्षा, आश्विनकार्तिकौ शरत्, मार्गपौषौ हेमन्त इति। एते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वात्। अयने द्वे भवतो दक्षिणमुत्तरं च। तयोर्दक्षिणं वर्षाशरद्धेमन्तास्तेषु भगवान्सोम आप्यायते साम्ललवणमधुराश्च बलवन्तो भवन्ति उत्तरोत्तरं च सर्वप्राणिनां बलमभिवर्धते। उत्तरं च शिशिरवसन्तग्रीष्मास्तेषु भगवानर्क आप्यायते तिक्तकटुकषाया रसा बलवन्तो भवन्ति उत्तरोत्तरं च सर्वप्राणिनां बलमपहीयते। भवति चात्र 'शीतांशुः क्लेदयेत्पूर्वां विवस्वान् शोषयत्यपि। तावुभावपि संसृज्य वायुः पालयति प्रजाः॥' इति।

मेषवृषौ एतौ द्वौ राशी ग्रीष्मः प्रोक्तः, मिथुनकर्कयोरेतयोर्द्वयोराश्योः प्रावृट्, सिंहकन्ये एते द्वे वर्षाः स्मृता, तुलावृश्चिकयोः शरत् भवति, धनुर्ग्राहौ द्वौ हेमन्तः प्रोक्तः, कुम्भमीनयोर्मध्ये वसन्तः प्रोक्तः। ननु शिशिरं विहाय प्रावृड्ग्रहणं किमिति क्रियते नहि अत्र शिशिरस्तु हेमन्ते प्रविष्टः श्लेष्मणश्चयहेतुत्वात्। यदि शिशिरः हेमन्ते न प्रविशति तदा श्लेष्मणश्चयात् वसन्तं विहाय कफस्य कोपः शिशिरे स्यात्। नन्वन्येऽपि चरकादयो ग्रन्थाः सन्ति शिशिरं हेमन्ते एकीकर्तुं केनापि न शक्यते भवद्भिः कथं क्रियते तदत्रास्मिन्नायुर्वेदे यत्र द्वौ समवेतौ भवतः तत्र शिशिरस्तु हेमन्ते प्रयोक्तव्यः, वर्षाप्रावृषोर्भेदः कर्तव्यः प्रथमो वर्षाकालः प्रावृट् तदनुकरणं, तस्य प्रावृषोऽङ्गम्। यदाह सुश्रुतः 'इह तु वर्षाशरद्धेमन्तवसन्तग्रीष्मप्रावृषः षड् ऋतवो भवन्ति दोषोपचयप्रकोपोपशमनिमित्तं ते

तु भाद्रपदाद्येन द्विमासिकेन समाख्याताः । यत्र चयसमावेतौ न स्तः कोप एवास्ति तत्र प्रावृट् विहाय शिशिरसहिताः षट् ऋतवः सन्ति । तदाह ग्रन्थान्तरे 'हेमन्तवर्षाशिशिरेषु वायोः पित्तस्य वर्षासु निदाघयोश्च । कफस्य कोपं कुसुमागमे च कुर्वीत यद्यस्य हितं तदेषाम् ॥' अत्र कथितायाः प्रावृषः हेमन्ते प्रविष्टस्य शिशिरस्य सन्देहो न कार्यः ॥ २५ ॥ २६ ॥

**दी०**—एतच्चयसाम्ये कृतचयकोपसमानाह—

**ग्रीष्मे संचीयते वायुः प्रावृट्काले प्रकुप्यति ।**
**वर्षासु चीयते पित्तं शरत्काले प्रकुप्यति ॥ २७ ॥**
**हेमन्ते चीयते श्लेष्मा वसन्ते च प्रकुप्यति ।**
**प्रायेण प्रशमं याति स्वयमेव समीरणः ॥ २८ ॥**
**शरत्काले वसन्ते च पित्तं प्रावृडृतौ कफः ।**

**दी०**—ग्रीष्मे इति । वायुर्ग्रीष्मे सञ्चीयते सञ्चयमापद्यत इत्यर्थः । एवं पित्तश्लेष्माणावपि स्वस्वऋतुषु चयकोपावापद्येते । सम्यग्ग्रहणं स्वसञ्चयकारणार्थं बोद्धव्यम्, तत् सञ्चयकारणं तन्त्रान्तरादवगन्तव्यम् । तद्यथा 'ता एवौषधयो निदाघे निःसारा रूक्षा अतिमात्रं लघ्व्यो भवन्त्यापश्च, ता उपयुज्यमानाः सूर्यप्रतापोपशोषितदेहानां देहिनां रौक्ष्याल्लघुत्वाद्वैशद्याच्च वायोः सञ्चयमापादयन्ति' इति । ननु शीतस्य वायोरुष्णे ग्रीष्मे सञ्चयः कथं संभवति ? उच्यते—सर्वेषु वातगुणेषु रौक्ष्यं प्रधानं तेनौषधीनामत्यर्थरौक्ष्येण रूक्षस्य वायोर्ग्रीष्मे सञ्चयः स्यादित्यदोषः । यदैवं चययुक्तो भवति । प्रावृट्काले प्रकुप्यतीति प्रावृट्काले प्रावृषि, प्रकुप्यतीति प्रशब्दोऽत्र प्रकर्षकारणं सूचयति; तद्यथा—'स सञ्चयः प्रावृषि चात्यर्थं जलोपक्लिन्नायां भूमौ क्लिन्नदेहानां देहिनां शीतवातवर्षेरितो वातिकान् व्याधीन् जनयति' । वायुः प्रकोपमापद्यत इति तात्पर्यार्थः । एवं पित्तमपि वर्षायां सञ्चितं शरत्काले प्रकुप्यति । कफोऽपि हेमन्ते सञ्चयमापद्य वसन्ते प्रकोपं करोतीत्यर्थः । अनयोः कारणं तन्त्रान्तरादवगन्तव्यम् । केषाञ्चित् ज्ञापनार्थं लिख्यते, यथा—'तत्र वर्षास्वौषधयस्तरुण्योऽल्पवीर्या आपश्चाप्रसन्नाः क्षितिमलप्रायास्ता उपयुज्यमाना भवन्ति । मेघा वसन्ते जलप्रक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातविष्टम्भिताग्नीनां विदह्यन्ते, विदाहात् पित्तसञ्चयमापादयन्ति । स सञ्चयः शरदि प्रविरलमेघे वियत्युपशुष्यति । पङ्के अर्ककिरणप्रविलापितः पैत्तिकान् व्याधीन् जनयति । ता एवौषधयः कालपरिणामात् परिणतवीर्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रसन्नाः । स्निग्धा अत्यर्थं गुर्व्यस्ता अत्यर्थं उपयुज्यमाना मन्दकिरणत्वाद्भानोः सतुषारपवनोपस्तम्भितदेहानां देहिनामविदग्धाः स्नेहात् शैत्यात् गौरवादुपलेपाच्च श्लेष्मणः सञ्चयमापादयन्ति । स सञ्चयो वसन्तेऽर्करश्मिप्रविलापितः ईषत् स्तब्धदेहानां देहिनां श्लैष्मिकान् व्याधीन् जनयति' इत्येवं दोषाणां सञ्चयप्रकोपौ दर्शितौ । ननु दोषाणां सञ्चितेषु ऋतुषु कथं न प्रकोपः ? इति । उच्यते, शीतस्य वायोर्ग्रीष्मस्यात्युष्णत्वात्तस्मिन्नेव काले न प्रकुप्यन्ति । (सञ्चीयमानमपि पित्तं ऋतुशैत्यात् तस्मिन् काले न प्रकुप्यति) ऋत्वादिस्वभावात् कफस्य सञ्चीयमानस्य हिमानीवशात् तदानीं स्त्यानतैव भवति न प्रकोपः । वसन्ते च प्रकुप्यति इति चकारग्रहणेनात्र सञ्चयादिकमहोरात्रयोरपि जानीयात् । तद्यथा—'तत्र पूर्वाह्णे वसन्तस्य लिङ्गं मध्याह्ने ग्रीष्मस्यापराह्णे प्रावृषः प्रदोषे वार्षिकं शारदमर्धरात्रे प्रत्युषसि हैमन्तमुपलक्षयेत्' ॥ अथ दोषाणामुपशममाह—प्रायेणेत्यादि । समीरणो वायुः शरत्काले स्वयमेव कारणं विना प्रशमं याति प्राप्नोति । स्वयमेवेति स्वभावतः स्वलक्षणत इत्यर्थः । स्वलक्षणं पुनरेषां शीतोष्णवर्षादि । एवं वसन्तेऽपि पित्तं, प्रावृट्काले कफ इति । अत्र यत् शरद्वसन्तप्रावृट्चयोपशमार्थमुक्तं तद्राशिपरिवर्तनात् अन्यथा तन्त्रान्तरविरोधः । प्रायेणेतिग्रहणात् दोषजा अपि व्याधयः प्रशमं यान्ति स्वयमेवेति सुश्रुतः । तथाहि—'तत्र पैत्तिकानां व्याधीनामुपशमो हेमन्ते, श्लैष्मिकाणां निदाघे, वातिकानां घनात्यये स्वभावत एव' । अत्र शीतोष्णवर्षालक्षणकालप्रभावादुपशमः । तस्मात् पूर्वेभ्यो न विरोधः ॥ २७ ॥ २८ ॥

**गू०**—वायुः ग्रीष्मे चीयते प्रावृट्काले प्रकुप्यति पित्तं वर्षासु चीयते शरदि प्रकुप्यति प्रकोपं करोतीत्यर्थः । श्लेष्मा हेमन्ते चीयते वसन्ते प्रकुप्यति । शममाह समीरणोऽतिशयेन शरत्काले स्वयमेव शमं याति, पित्तं च वसन्ते, हेमन्ते शमं याति । कफः प्रावृट्ऋतौ शमं याति । उष्णऋतौ वेति पाठे ग्रीष्मे शमं याति । सुश्रुतादिभ्योऽप्युक्तत्वात् । यदाह सुश्रुतः—'तत्र वातिकव्याधीनामुपशमो घनात्यये, पैत्तिकानां व्याधीनामुपशमो हेमन्ते, श्लैष्मिकाणां निदाघे

स्वभावात् । एते सञ्चयप्रकोपोपशमा व्याख्याताः । एवमहोरात्रमपि वर्षमिव शीतोष्णवर्षलक्षणं दोषोपचयप्रकोपोपशमैर्जानीयात् । तत्र पूर्वाह्णे वसन्तस्य लिङ्गं मध्याह्ने ग्रीष्मस्यापराह्णे प्रावृषः प्रदोषे वार्षिकं शारदमर्धरात्रे प्रत्युषसि हैमन्तिकमुपलक्षयेत् ॥ २७ ॥ २८ ॥

**कार्तिकस्य दिनान्यष्टावष्टावाग्रयणस्य च ॥ २९ ॥**
**यमदंष्ट्रा समाख्याता स्वल्पभुक्तो हि जीवति ।**[1]

**टी०**—इदानीं दोषाणामकालेऽपि चयादिनिमित्तं हेतुमाह—

**चयकोपशमा दोषा विहाराहारसेवनैः ॥ ३० ॥**
**समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्ययम् ।**
**लघुरूक्षमिताहारादतिशीताच्छ्रमात्तथा ॥ ३१ ॥**
**प्रदोषे कामशोकाभ्यां भीचिन्तारात्रिजागरैः ।**
**अभिघातादपां गाहाज्जीर्णेऽन्ने धातुसंक्षयात् ॥३२॥**
**वायुः प्रकोपं यात्येभिः प्रयत्नीकैश्च शाम्यति ।**
**विदाहिकटुकाम्लोष्णभोज्यैरत्युष्णसेवनात् ॥ ३३ ॥**
**मध्याह्ने क्षुत्तृषो रोधाज्जीर्यत्यन्नेऽर्धरात्रके ।**
**पित्तं प्रकोपं यात्येभिः प्रत्यनीकैश्च शाम्यति ॥ ३४ ॥**
**मधुरस्निग्धशीतादिभोज्यैर्दिवसनिद्रया ।**
**मन्देऽग्नौ च प्रभाते च भुक्तमात्रे तथाऽश्रमात् ॥३५॥**
**श्लेष्मा प्रकोपं यात्येभिः प्रत्यनीकैश्च शाम्यति ॥**

इति दामोदरसूनुना शार्ङ्गधरेण विरचितायां श्रीशार्ङ्गधरसंहितायां पूर्वखण्डे भैषज्याख्यानकं नाम द्वितीयोऽध्यायः ॥

**टी०**—चयेत्यादि । दोषा वातादयः समानैर्विहाराहारसेवनैः कृत्वा चयादीन् यान्ति प्राप्नुवन्तीत्यर्थः । विपरीतैरसमानैः कृत्वा अकाले अप्रशमऋतावपि विपर्ययं नाशं प्राप्नुवन्तीत्यर्थः । समानैरिति दोषानुरूपकारणैः । तद्यथा—लघुरूक्षशीतादयो वातगुणसमानाः विदाहिकटुकाम्लोष्णादयः पित्तगुणसमानाः, मधुरस्निग्धशीतादयोऽपि श्लेष्मगुणसमाना इति । एषां विपरीतैर्विपर्ययैर्यथा—गुरुस्निग्धोष्णादयो वातगुणविपर्ययाः, अविदाहिमधुरशीतादयः 'पित्तगुणविपरीताः, तिक्तोष्णरूक्षादयः श्लेष्मगुणविपरीता' इति ॥

अथ दोषाणां प्रत्येकं प्रकोपशमकारणान्याह—लघ्वित्यादि । लघ्वादिधातुसंक्षयान्तैः कारणैर्वायुः

[1] प्रक्षिप्तमिदम् ।

## १ दोषाणां सञ्चयप्रकोपशमनमित्थम्—

| नाम | वातः | पित्तम् | कफः |
|---|---|---|---|
| सञ्चयः | ग्रीष्मे<br>वैशाखे, ज्येष्ठे च<br>मेषवृषयोः | वर्षासु<br>भाद्रपदे आश्विने च<br>सिंहे कन्यायां च | हेमन्ते<br>पौषे माघे च<br>धनुर्मकरयोः |
| प्रकोपः | प्रावृड्ऋतौ<br>आषाढे श्रावणे च<br>मिथुनकर्कयोः | शरदृतौ<br>कार्तिके मार्गशिरसि च<br>तुलावृश्चिकयोः | वसन्तऋतौ<br>फाल्गुनचैत्रयोः<br>कुम्भमीनयोः |
| शमनम् | शरदृतौ<br>कार्तिके मार्गशिरसि च<br>तुलावृश्चिकयोः | वसन्तऋतौ<br>फाल्गुनचैत्रयोः<br>कुम्भे मीने च | प्रावृड्ऋतौ<br>आषाढे श्रावणे च<br>मिथुनकर्कयोः |

प्रकोपं याति प्राप्नोतीत्यर्थः । एतेषां प्रत्यनीकैर्विपरीतैश्च शाम्यतीत्यर्थः । आहारशब्दो लघ्वादिभिः प्रत्येकं संबध्यते तेन लघ्वाहारात् रूक्षाहारात् मिताहारादित्यर्थः । लघ्विति पाकतः, रूक्षं-अस्निग्धं, मितं स्वल्पं, अतिशीतादित्यतिशीतसेवनात्, अतिश्रमादिति अतिशरीरायासात्, अतिशब्दोऽत्रापि बोद्धव्यः, प्रदोषे रजनीमुखे, कामशोकाभ्यामिति कामोऽभिलाषः स च स्त्रीसङ्कल्परूपः अभिमतकामिन्याद्यप्राप्तिरिति भावः । शोको धनबन्धुनाशादिना, भीतिर्भयं, कामशोकभयाद्वायुरिति । अभिघातः शस्त्रलगुडादीनाम्, अपां गाहादतिजलावगाहात्, अतिशब्दोऽत्र पूर्वादनुवर्तते, जीर्णेऽन्ने आहारे परिपाकं गते सति, धातुसङ्क्षयादिति रसादिधातूनां क्षीणत्वात्, यदुक्तं 'धातुक्षयात्स्रुते रक्ते मन्दः सञ्जायतेऽबलः । पवनश्च परं कोपं याति तस्मात्प्रयत्नतः' इत्यादि । प्रत्यनीकैरिति लघ्वादीनां विपर्ययैस्तेऽप्यनुमानतोऽवगन्तव्याः ॥

अथ पित्तम् । विदाहीति । विदाहिभोज्यादिभिः कारणैः पित्तं प्रकोपं याति । एषां प्रत्यनीकैर्विपरीतैः कृत्वा शाम्यतीति । भोज्यशब्दो विदाहादिभिः प्रत्येकमभिसंबध्यते तेन विदाहिभोज्यैः कटुकभोज्यैरम्लभोज्यैरुष्णभोज्यैरिति । यद्वा विदाहीति भिन्नार्थसूचकं ज्ञेयम् । तेन विदाही वंशकरीरादि पित्तकरत्वात् । उष्णभोजनं च वीर्यात् स्पर्शाद्वा । अत्युष्णसेवनादित्यातपाग्नीनाम् । क्षुत्तृषो रोधादिति क्षुत् क्षुधा तस्या अवरोधात् तृट् तृषा तस्या अवरोधात्, अवरोधो वेगधारणम् । एके क्षुत्तृषो रोषादिति पठन्ति । तत्र क्षुत्तृषोरतिवेगात्, रोषात् क्रोधात्, तथा च 'क्रोधात् पित्तं प्रकुप्यति' इति । प्रत्यनीकैरिति विदाहिभोज्यादीनां विपरीतैरिति सुगमम् ॥

अथ कफः । मधुरेति । मधुरभोज्यादिभिः श्लेष्मा प्रकोपं याति । एषां प्रत्यनीकैर्नाशकैः शाम्यति शान्तिं प्राप्नोतीत्यर्थः । भोज्यशब्दोऽत्रापि मधुरादिभिः प्रत्येकमभिसम्बध्यते तेन मधुरभोज्यैः स्निग्धभोज्यैः शीतादिभोज्यैश्च । आदिशब्दात् गुरुश्लक्ष्णादीनां ग्रहणम् । दिवसनिद्रया कफवृद्धिः स्यात् यतः 'रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा' इति वचनात् । अश्रमादिति अव्यायामात् 'व्यायामः कफनाशनं' इत्युक्तेः ॥

इति श्रीवात्स्यव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां प्रथमखण्डे भैषज्याख्यानकं नाम द्वितीयोऽध्यायः ॥

---

**गू०**—दोषा वातपित्तकफाश्चयप्रकोपशमा येषु तान् चयकोपशमान् स्वस्वऋतून् परित्यज्य समानैर्निरन्तरैर्विहाराहारसेवनैः अकालेऽपि विपर्ययं यान्ति । विहारो वाग्देहमनोनिवर्तितत्वे विशेषो व्यायामजागरणाध्ययनादिरूपः । आहारो मिथ्याहारः । यदुक्तं चरके 'अकाले अन्यदोषऋतौ विपर्ययं कोपं यान्तीत्यर्थः । विपरीतैस्तद्धेतुनाशकर्तृभिरुपायैः साम्यं यान्ति । तदाह—'लघुरूक्षमिताहाराघातशीतात् श्रमात्तथा ।' प्रदोषे लघुरूक्षमिताहारायाति विपरीतैः तद्धेतुनाशकर्तृभिः साम्यं याति । सुगममन्यत् । ग्रन्थान्तरात् साम्यकर्तृत्वमाह—'स्निग्धोष्णस्थिरवृष्यवल्लवणवत् स्वाद्वम्लतैलातपस्नानाभ्यञ्जनबस्तिमांसमदिरासंवाहनोन्मर्दनम् । स्नेहस्वेदनिरूहणं च शयनस्नानोपनाहादिकं पानाहारविहारभेषजमिदं वायुं प्रशान्तिं नयेत्' एभिः प्रयोगैर्वायुः साम्यं याति । एभिर्हेतुभिः पित्तं प्रकोपं याति प्रत्यनीकैः शान्तिकर्तृभिरुपायैः शाम्यति। शान्तिं कर्तुमुपायानाह—'तिक्तस्वादुकषायशीतपवनच्छायानिशावीजनं ज्योत्स्नाभूतगृहप्रवासजलजस्त्रीगात्रसंस्पर्शनम् । सर्पिःक्षीरविरेचकैश्च रुधिरस्रावप्रदेहादिकं पानाहारविहारभेषजमिदं पित्तं प्रशान्तिं नयेत्॥' एभिः प्रयोगैः पित्तं साम्यं याति । एभिर्हेतुभिः श्लेष्मा कोपं याति अश्रमात् श्रमरहितात् । सुगममन्यत् । शीतकर्तृभिरुपायैः शमं याति । श्लेष्मणः शान्तिकर्तृनुपायानाह ग्रन्थान्तरात् 'रूक्षाहारकषायतिक्तकटुकव्यायामनिष्ठीवनं स्त्रीसेवाध्वनियुद्धजागरजलक्रीडापघातास्तथा । धूमो नस्यशिरोविरेकवमनस्वेदोपवासादिकं पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं जयेत्' एभिरुपायैरकालेऽपि कुपिता दोषाः शाम्यं यान्तीत्यभिप्रायः ॥ ३०–३५ ॥

इति श्रीकाशीरामवैद्यविरचितायां गूढार्थदीपिकायां द्रव्यरसगुणविपाकप्रभाव ऋतुषङ्काख्यानाध्यायो द्वितीयः ॥

---

## तृतीयोऽध्यायः ।

**दी०**—पूर्वमुक्तं नाडीपरीक्षादिविधिरिति अनन्तरं नाडीपरीक्षामाह ।

## अथ नाडीपरीक्षादिविधिरध्यायः।

**दी०**—अथेति ॥

**करस्याङ्गुष्ठमूले या धमनी जीवसाक्षिणी।**
**तच्चेष्टया सुखं दुःखं ज्ञेयं कायस्य पण्डितैः॥ १॥**

**दी०**—करस्येति। जीवसाक्षिणी या धमनी सा करस्याङ्गुष्ठमूलेऽस्तीति क्रियापदं योज्यं, तच्चेष्टया कृत्वा कायस्य शरीरस्य सुखं दुःखं च ज्ञेयं पण्डितैरिति शेषः। धमनीति। शब्दवाहिनी नाडी धमनी जीवनं तनौ इत्यतो धमनी जीवसाक्षिणीति प्राणवायोः साक्षिभूता अत एव कुत्रचिज्जीवनाडीति कथिता। तथाहि—'प्रदर्शयेद्दोषनिजस्वरूपं व्यस्तं समस्तं युगलीकृतश्च। मूकस्य मुग्धस्य विमोहितस्य दीपः पदार्थानिव जीवनाडी' इति ॥ लक्षणमपि च—'अस्यः प्रकोष्ठबाह्यस्य मध्यमानामिकाश्रिता। जीवनाडीति सा प्रोक्ता नन्दिनी तत्त्ववेदना' इति। तच्चेष्टया दुःखमिति दोषादिवैषम्यधर्मः। यतः 'रोगस्तु दोषवैषम्यम्' इत्यादिवचनात्। पण्डितैरिति प्रवीणैः नाडीग्रहणस्य समयविशेषज्ञैरित्यर्थः। यतः—'सद्यःस्नातस्य भुक्तस्य क्षुत्तृष्णाऽऽतपशीलिनः। व्यायामश्रान्तदेहस्य सम्यङ् नाडी न बुध्यते' इति ॥ १॥

**गू०**—करस्याङ्गुष्ठमूले या धमनी सा जीवसाक्षिणी जीवोऽस्ति नो वेति बोधनी ज्ञेया। बुधैः तच्चेष्टया मन्दस्थिरचलगामिन्या कायस्य देहस्य सुखं दुःखं च ज्ञेयम् ॥ १॥

**दी०**-इदानीं दोषाणां निजस्वरूपचेष्टामाह—

**नाडी धत्ते मरुत्कोपे जलौकासर्पयोर्गतिम्।**
**कुलिङ्गकाकमण्डूकगतिं पित्तस्य कोपतः॥ २॥**
**हंसपारावतगतिं धत्ते श्लेष्मप्रकोपतः।**

**दी०**—नाडीति। मरुत्कोपे वातप्रकोपे जलौकासर्पयोर्गतिं गमनं धत्ते नाडीति शेषः। जलौकासर्पयोस्तैर्यग्गतिरित्यभिप्रायः तद्वदत्राऽपि। पित्तप्रकोपतस्तु कुलिङ्गादीनां गतिं धत्ते, कुलिङ्गो गृहचटकः। काकमण्डूकौ प्रसिद्धौ एतेषामुत्प्लवनगतिरित्यर्थः। एके कुलिङ्ग-स्थाने कलापीति पठन्ति व्याख्यानयन्ति च। कलापी मयूरः। श्लेष्मप्रकोपात् हंसपारावतगतिं धत्ते। अत्रापि नाडीति संबध्यते। एतेन मन्दगतिवाहिनी भवतीत्यभिप्रायः। यतो हंसपारावतयोरपि मन्दगतिः स्यात् ॥ २॥

**गू०**—मरुत्कोपे सति नाडी जलौकासर्पयोर्गतिं गमनं धत्ते। नाडी पित्तस्य कोपतः कुलिङ्गकाकमण्डूकगतिं धत्ते। कुलिङ्गो गृहचटकः हंसपारावतगतिं श्लेष्मप्रकोपतः धत्ते ॥

**दी०**—अथ सन्निपातसंसर्गयोर्नाडीचेष्टामाह—

**लावतित्तिरवर्तीनां गमनं संनिपाततः॥ ३॥**

**दी०**—लावेति। सन्निपातत्त्रिदोषकोपात् लावादीनां गमनं नाडी धत्ते इति पूर्वादनुवर्तते। लावतित्तिरौ प्रसिद्धौ, वर्तीति वर्तिका (धरंधर) शब्दवाच्या। गङ्गुरुकाभिधानेत्यन्ये। एतेषां सोत्ताल गतिः सूच्यते ॥

**गू०**—नाडी सन्निपाततः त्रिदोषप्रकोपतः लावतित्तिरवर्तिकानां गमनं धत्ते। नत्वेकस्य जन्तोर्गत्या नाम्नां प्रकुपितस्य दोषस्य बोधो भवेदतो द्वित्रिजन्तूनां गतिः दर्शिता यथा विकृतिमापन्नो वायुः सर्पगतिं धत्ते। साम्यं गतो वायुः जलौकागतिं धत्ते एवमन्येऽपि ज्ञेयाः ॥३॥

**कदाचिन्मन्दगमना कदाचिद्वेगवाहिनी।**
**द्विदोषकोपतो ज्ञेया—**

**दी०**—द्विदोषकोपादपि नाडी कदाचिन्मन्दगामिनी कदाचिद्वेगवाहिनीति ॥

**गू०**—द्विदोषकोपतः कदाचिन्मन्दगमना कदाचिद्वेगवाहिनी ज्ञेया ॥

**दी०**—इदानीमसाध्याया लक्षणमाह—

**हन्ति च स्थानविच्युता॥ ४॥**
**स्थित्वा स्थित्वा चलति या सा स्मृता प्राणनाशिनी।**
**अतिक्षीणा च शीता च जीवितं हन्त्यसंशयम्॥ ५॥**

**दी०**—हन्तीति। स्थानविच्युता स्वस्थानाच्चलिता नाडीति शेषः। हन्तीति आतुरमिति शेषः। या स्थित्वा स्थित्वा चलति गच्छति सापि प्राणनाशिनी ज्ञेया। एतेन कदाचिद्वहति कदाचिन्न वहतीत्यभिप्रायः। अतिक्षीणा चेति विसतन्तुवत्, अतिशीता चेति हिमस्पर्शवत्। असंशयं निश्चयेन जीवितं प्राणान् हन्ति नाडीति शेषः। चकारात् कुटिला चोर्ध्वाधोगमनशीलापि प्राणनाशिनी बोद्धव्या। तथा चोक्तं—'नाडी मध्यवहाङ्गुष्ठमूले यात्यर्थमुच्छलेत्। शनैरूर्ध्वाधगमना कुटिला हन्ति मानवम् ॥' इति ॥ ४॥ ५॥

---

१—'धमन्ति पवनं तनावित्यतो धमन्यः' पा०।
२—'मध्ये कापि समाश्रिता' 'मध्यकामसमाश्रिता' पा०।
३—'सोत्तालगति' पा०। ४—'प्यर्धं' पा०।

१—'वरर्धर' पा०।

गू०—स्थानविच्युता सती हन्ति । या धमनी स्थित्वा स्थित्वा चलति सा प्राणनाशिनी स्मृता कथिता । अतिक्षीणा शीता गच्छती सती प्राणिनो जीवितं जीवनाशं असंशयं निःसंदेहेन हन्ति दूरीकरोतीत्यर्थः ॥ ४ ॥ ५ ॥

दी०—अथ ज्वरादीनां धमनीलक्षणमाह—

**ज्वरकोपेण धमनी सोष्णा वेगवती भवेत् ।**
**कामक्रोधाद्वेगवहा क्षीणा चिन्ताभयप्लुता ॥ ६ ॥**
**मन्दाग्नेः क्षीणधातोश्च नाडी मन्दतरा भवेत् ।**
**असृक्पूर्णा भवेत्कोष्णा गुर्वी सामा गरीयसी ॥ ७ ॥**
**लघ्वी वहति दीप्ताग्नेस्तथा वेगवती मता ।**
**सुखितस्य स्थिरा ज्ञेया तथा बलवती स्मृता ॥ ८ ॥**
**चपला क्षुधितस्यापि तृप्तस्य वहति स्थिरा ।**

दी०—ज्वरकोपेणेति । ज्वरकोपेण सामान्यज्वरस्य प्रकोपेण कृत्वा धमनी नाडी सोष्णा उष्णयुक्ता भवेत् । ज्वरस्योष्णात्मकत्वान्न केवलं सोष्णा वेगवती भवेत् । ज्वरस्य देहेन्द्रियमनःसन्तापित्वात् । कामक्रोधादपि वेगवहा वेगयुक्ता अनौष्ण्येन ज्वरवद्भिन्ना । कामोऽभिमतकामिन्याद्यप्राप्तिः, क्रोधो हिंसात्मकादिरूपः, चिन्ताभयप्लुतेति चिन्ताभययुक्ता नाडी क्षीणा सुसूक्ष्मा ज्ञेया । चिन्ता चित्तोद्वेगरूपा, भयं शत्रुप्रभृतीनाम् । एके चिन्ताभयश्रमादिति पठन्ति । चिन्ताभयश्रमान्नाडी क्षीणा सुसूक्ष्मा ज्ञेया । चिन्ता मानसोद्वेगरूपा ज्ञेया । तत्र श्रमाद् ग्लानेः मन्दाग्नेः क्षीणधातोश्च पुरुषस्य नाडी मन्दतरा भवेत्, अत्यर्थं मन्दगतिरित्यर्थः । असृक्पूर्णा रुधिरप्रकोपात् पूरिता नाडी कोष्णा गुर्वी च भवेत् । कोष्णा ईषदुष्णा गुर्वी गुरुतरा पाषाणवदित्यर्थः । एके सोष्णेति पठन्ति । सामा आमयुक्ता नाडी गरीयसी स्यात् अत्यर्थं गुर्वी भवतीति भावः । आमेन सह वर्तत इति सामा, आमोऽपरिपक्वरसः । तद्यथा—'जठरानलदौर्बल्यादविपक्वस्तु यो रसः । स आमसंज्ञको देहे सर्वदोषप्रकोपकः' इति । अथवा आमग्रहणेन आमादित्रयमत्रजमजीर्णं गृह्यते तेन तैर्युक्तेत्यर्थः । तत्र आमं विदग्धं विष्टब्धं चेति । एके सामा गरीयसीति पठन्ति । आमेन सह वर्तत इति सामा । ते च दोषदूष्यतादयः । यतः 'आमेन तेन संपृक्ता दोषा दूष्याश्च दूषिताः । सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः' इति । एतेन किमुक्तं भवति सामदोषात् सामदूष्यात् सामदूषितात् सामरोगाच्चेति । दूष्या रसादयो धातवः । दूषितानि मलमूत्रप्रभृतीनि । दीप्ताग्नेः प्रबलाग्नेः पुरुषस्य लघ्वी वेगवती च वहति । लघ्वी तूलवत् सैव वेगयुक्ता ज्ञेया नतु पूर्वोक्ता । सुखितस्य स्वस्थस्य स्थिरा प्रकृतिस्था भवतीत्यर्थः । न केवलं स्वस्था तथा बलवती बलयुक्ता न क्षीणेत्यभिप्रायः । क्षुधितस्य बुभुक्षितस्यापि चपला चञ्चला न मन्देत्यर्थः । एतेन प्रकृतिस्थिताग्निरिति भावः । तृप्तस्य भोजनादिना सन्तुष्टस्य पुरुषस्य स्थिरा निश्चलैव ॥ ६–८ ॥

इति नाडीपरीक्षा ॥

गू०—सा धमनी नाडी ज्वरकोपेण ज्वराधिक्येन सोष्णा अत्युष्णा सती वेगवती भवेत् कामात् क्रोधाच्च वेगवहा स्यात् चिन्ताभयाप्लुता सती क्षीणा भवेदित्यर्थः । अतिशयेन मन्दा मन्दतरा असृक्पूर्णा नाडी कोष्णा ईषदुष्णा सती गुर्वी चलेत् । कोष्णा ईषदुष्णा गुर्वी अल्पगरिष्ठा सामा आमयुक्ता नाडी गरीयसी भवेत् । अतिशयेन गरिष्ठा गरीयसी । दीप्ताग्नेः पुरुषस्य नाडी लघ्वी वहति । तथा दीप्ताग्नेः पुंसः लघ्वी मता स्मृता । सुखिनो रोगरहितस्य पुंसः स्थिरा ज्ञेया तथा बलवती स्मृता । क्षुधितस्य पुंसः नाडी चपला स्यात् । तृप्तस्य कृतभोजनस्य पुंसः नाडी स्थिरा वहति । अन्यान्यपि नाडीपरीक्षास्थानान्याह ग्रन्थान्तरात्—'पादयोर्नाडिकास्थानं गुल्फस्याधोऽङ्गुलत्रयम् । कण्ठमूलेऽङ्गुलिद्वन्द्वे नासामूलेऽङ्गुलाधिकम् । नरस्याङ्गुष्ठमूले च नाडी चतुर्थिका मता । स्थानान्येतानि नाडीनां तासु प्राणो व्यवस्थितः' । करस्य नाडी सदैवावलोकनीया अन्या यास्तिस्रो नाड्यः मरणसमयेऽवलोकनीया नान्यत्र । अन्यत्र करस्यावलोकनीयेति । सद्यःस्नातस्य भुक्तस्य क्षुत्तृषातपशीलिनः व्यायामश्रान्तदेहस्य सम्यङ्नाडी न बुध्यते । भारप्रहारमूर्च्छाभयशोकप्रमुखकारणान्नाडी संमूर्च्छितापि बाढं पुनरपि जीवनं लभते ॥ ६–८ ॥

इति नाडीपरीक्षा ॥

दी०—पूर्वमुक्तमादिग्रहणात् दूतस्वप्नादीनां लक्षणकथनम् । अथ दूतलक्षणान्याह—

**दूताः स्वजातयोऽव्यङ्गाः पटवो निर्मलाम्बराः ।**
**सुखिनोऽश्ववृषारूढाः शुभ्रपुष्पफलैर्युताः ॥ ९ ॥**
**सुजातयः सुचेष्टाश्च सजीवदिशि संस्थिताः ।**
**भिषजं समये प्राप्ता रोगिणः सुखहेतवे ॥ १० ॥**

दी०—दूता इति । एवंविधा दूता यदा भिषजं

वैद्यं प्राप्तास्तदा रोगिण आतुरस्य सुखहेतवे भवन्तीत्यध्याहार्यम् । वैद्याह्वानाय प्रश्नाय आगताः पुरुषा दूताः कीदृशास्तानाह—स्वजातय इति । स्वस्यां जातौ स्वगोत्रे वा जाताः स्वजातयः । एके 'सजातय' इति पठन्ति तत्र सपक्षा इत्यर्थः । यदुक्तं 'पाषण्डाश्रमवर्णानां सपक्षाः कर्मसिद्धये । त एव विपरीताः स्युर्दूताः कर्मविपत्तये' इति । अव्यङ्गा इति । व्यङ्गा ह्रस्वावयवहीनाः न व्यङ्गा अव्यङ्गाः । पटव इति प्रवीणाः । एतेन विचित्रकालज्ञाः कथिताः । निर्मलाम्बरा इति शुभ्रवस्त्रधारिणः, तेन रक्तकृष्णवस्त्रादिरहिता इत्यर्थः । सुखिन इति अदीनाः । अश्ववृषारूढा इति अश्वारूढा वृषारूढाश्च । आसमन्तात् कारेण रूढाः इति यद्ग्रहणं तन्महिषोष्ट्रखरादियाननिषेधार्थम् । शुभ्रपुष्पफलैर्युता इति श्वेतपुष्पैरेभिः सारफलैश्च संयुक्ता इत्यभिप्रायः । एतेन रक्तपीतकृष्णादिभिः सारफलरहिता इत्यर्थः । यत एवंविधानि पुष्पफलान्यमङ्गलानि भवन्ति । तथा चोक्तम् 'तैलकर्दमदिग्धाङ्गा रक्तस्रगनुलेपनाः । फलं पक्कमसारं वा गृहीत्वाऽन्यच्च तद्विधम् । वैद्यं य उपसर्पन्ति दूतास्ते चापि गर्हिताः' इति । सुजातय इति शोभना जातिर्येषां ते तथाविधाः । एतेनान्यजातिजनिता निषिद्धाः । पापकृद्गर्भोत्पत्तिरहिता इत्यर्थः । यद्वा विज्ञातजातय इति पिण्डार्थः । सुचेष्टाश्चेति चेष्टात्र कायकृतो व्यापारः शोभनव्यापार इत्यभिप्रायः । शोभनग्रहणं दुश्चेष्टितव्यवच्छेदार्थम् । तथाह्युक्तं 'छिन्दन्तस्तृणकाष्ठानि स्पृशन्तो नासिकां स्तनम् । वस्त्रान्तानामिकाकेशनखरोमदशस्पृशः । स्रोतोऽवरोधहृद्गण्डमूर्धोरःकुक्षिपाणयः । कपालोपलभस्मास्थितुषाङ्गारकराश्च ये । विलिखन्तो महीं किंचिन्मुञ्चन्तो लोष्टभेदिनः ।' इत्यादि दुश्चेष्टिता दर्शिताः । सुचेष्टाश्चेति चकारग्रहणात् सुदर्शनाः सुवेषा अपि गृह्यन्ते अन्यथा गर्हिताः स्युः । तथाहि—'नपुंसकः स्त्रीबहवो नैककार्या असूयकाः । पाशदण्डायुधधराः प्राप्ता वा स्युः परंपरा(?)। आर्द्रजीर्णापसव्यैकमलिनोद्धतवाससः । न्यूनाधिकाङ्गा उद्विग्ना विकृता रौद्ररूपिणः । वैद्यं य उपसर्पन्ति दूतास्ते चापि गर्हिताः' । सजीवदिशि सङ्गता इति जीवनेन प्राणानिलेन सह या दिक् नाडी तस्यां सङ्गताः प्राप्ता इत्यर्थः । तथा च—'यस्यां प्राणमरुद्वाति सा नाडी जीवसंयुता' इति । नाडी चात्र नासासंबन्धिनी ज्ञेया । यद्वा—जीवेन सह वर्तते इति या दिक् दिशा तस्यामित्यर्थः । तेन याम्यदिग्रहितदिशायाः प्राप्ता इति तात्पर्यार्थः । यतो याम्यदिक् निषिद्धा । तथाहि—'याम्यां दिशं प्राञ्जलयो विषमैकपदस्थिताः । वैद्यं य उपसर्पन्ति दूतास्ते चापि गर्हिताः' इति । समये प्राप्ता इति समये शुभवेलातिथिनक्षत्रादियुक्ते काले अन्यथा अशुभकरा इति भावः । तदुक्तम्—'वैद्यस्य पैत्र्ये दैवे वा कार्ये चोत्पातदर्शने । मध्याह्ने चार्धरात्रे वा सन्ध्ययोः कृत्तिकासु च ॥ आर्द्राश्लेषामघामूलपूर्वासु भरणीषु च । चतुर्थ्यां वा नवम्यां वा षष्ठ्यां संधिदिनेषु च ॥ दक्षिणाभिमुखं देशे त्वशुचौ वा हुताशनम् । ज्वलयन्तं पचन्तं वा क्रूरकर्मणि चोद्यतम् ॥ नग्नं भूमौ शयानं वा वेगोत्सर्गेषु वाऽशुचिम् । प्रकीर्णकेशमभ्यक्तं स्विन्नं विक्लवमेव च । वैद्यं य उपसर्पन्ति दूतास्ते चापि गर्हिताः' इति ॥९॥१०॥

गू०—कर्मणः समये स्नानाभ्यङ्गादिरहितकाले यस्यां प्राणमरुद्वाति सा नाडी जीवसंयुता चन्द्रसूर्यस्थाने ययोर्द्वयोर्नाड्योर्मध्ये यस्यां नाड्यां प्राणमरुद्वाति गन्धग्रहणाधिकारी भूत्वा संचारी सा नाडी जीवसंयुता वाच्या तस्याङ्गस्थः पृच्छको यदा पृच्छति तदा स रोगी जीवति अन्यथा म्रियते ॥ अन्यत्राप्युक्तं—'चन्द्रस्थाने यदा वायुः सूर्यस्थाने च पृच्छकः । तदा न जीवति रोगी यदि वैद्यशतैर्वृतः' । एतत्पूर्वोक्तस्य स जीवस्याङ्गस्य व्याख्यातम् । इति दूतलक्षणानि ॥ ९ ॥ १० ॥

दी०—इदानीं गच्छतो दूतस्य शकुनान्याह—

**वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते ॥ ११ ॥**
**न शुभं सौम्यशकुनं प्रदीप्तं च सुखावहम् ।**
**चिकित्सां रोगिणः कर्तुं गच्छतो भिषजः शुभम् १२**
**यात्रेयं सौम्यशकुनं प्रोक्तं दीप्तं न शोभनम् ।**

दी०—वैद्याह्वानायेति । रोगिण आतुरस्य कृते निमित्ते वैद्याह्वानाय गच्छतो दूतस्य सौम्यशकुनं भेरीमृदङ्गादि न शोभनमित्यर्थः । प्रदीप्तमसौम्यं सुखावहं भवति । गच्छत इति मार्गे चलितस्य । एतेन विपरीतशकुनान्यत्र शुभकाराणि बोद्धव्यानि । उक्तंच ज्योतिःशास्त्रे—'सद्यो रणे कर्मणि च प्रवेशे शुक्रे गृहे नष्टविलोकने च । व्याधौ च नद्युत्तरणे भयार्ते शस्तः प्रयाणाद्विपरीतभावः ॥' इति दूतशकुनलक्षणानि संपूर्णानि ॥

इदानीं गच्छतो वैद्यस्यापि शकुनानि दर्शयन्नाह—चिकित्सामिति । रोगिण आतुरस्य चिकित्सां

रोगापनयनं कर्म कर्तुं गच्छतो मार्गे चालितस्य भिषजो वैद्यस्य यात्रेयं सौम्यशकुनं प्रोक्तमिदं शुभं कथितं दीप्तमशुभमशकुनं न शोभनमित्यर्थः । यात्रेयं यात्रायोग्यं यथा—'भेरीमृदङ्गमृदुमर्दलशङ्खवेणुवेदध्वनिर्मधुरमङ्गलगीतघोषाः । पुत्रान्विता च युवतिः सुरभिः सवत्सा धौताम्बरश्च रजकोऽभिमुखः प्रशस्तः' । अन्यच्च—'भृङ्गाराञ्जनवर्धमानमकुलबद्धैकपश्वामिषशङ्खक्षीरनृपाश्वपूर्णकलशच्छत्राणि सिद्धार्थकाः । वीणाकेतनमीनपङ्कजदधिक्षौद्राज्यगोरोचनाः, कन्याशङ्खसितेक्षुवस्त्रसुमनोविप्राश्च रत्नानि च' इति । दीप्तमित्यत्रात्रेयं तद्यथा 'गमनं दक्षिणे वामाङ्ग शस्तं श्वसृगालयोः । वामं नकुलचाषाणां नोभयं शशसर्पयोः ॥ भासकौशिकयोश्चैव न प्रशस्तं किलोभयम् । दर्शनं च रुतं चापि न गोधाकृकलासयोः ॥ कुलत्थतिलकार्पासतुषपाषाणभस्मनाम् । पात्रं नेष्टं तथाऽङ्गारतैलकर्दमपूरितम् ॥ प्रसन्नेतरमद्यानां पूर्णं वा रक्तसर्षपैः । शवकाष्ठपलाशानां शुष्काणां पथि सङ्गमाः । नेष्यन्ति पतितान्तस्थदीनान्धरिपवस्तथा' इति ॥ ११ ॥ १२ ॥

**गू०**—आतुरमुपक्रममाणेन भिषजा आयुरेवादौ परीक्षणीयम् । सत्यायुषि भृत्यभिवयोदेहबलसत्वसात्म्यप्रकृतिभेषजदेशान् परीक्षयेत् । तत्र पाणिपादपार्श्वपृष्ठस्तनाग्रदर्शनवदनस्कन्धललाटदीर्घांगुलिपूर्वोच्छ्वासप्रेक्षणबाहुविस्तीर्णभ्रूस्तनान्तरोरःस्कन्धहृज्जङ्घामेढ्रग्रीवागम्भीरसत्वस्वरनाभिस्तनसुपचितमहारोमशकर्णपश्चान्मणिकतानुलिप्तमूर्धानुपूर्व्याविशुष्यमाणशरीरं पश्चाच्छुष्यमाणहृदयं पुरुषं जानीयात् दीर्घायुः खल्वियति तमेकान्तेनोपक्रमेत् । एभिर्लक्षणैर्विपरीतैरल्पमिश्रितैर्मध्यमायुरिति । व्याधयस्तु त्रिविधाः साध्याः, याप्याः, प्रत्याख्येयाश्च,तद्दृष्ट्वा कर्म कारयेत्। प्रागभिहिता ऋतवः 'शीते शीतप्रतीकारमुष्णे चोष्णनिवारणम् । कुर्यात्क्रियां प्राप्तकालां(?) न हापयेत्'। प्रागभिहितोऽग्निश्चतुर्विधः विषमो वातेन, तीक्ष्णः पित्तेन, मन्दः श्लेष्मणा, समः सर्वसामान्यादिति । यः कदाचित् सम्यक् पचति कदाचित् शूलाध्मानादीन्करोति स विषमः । यः गुर्वादिकमाशु पचति स तीक्ष्णः । यः लघुरपि न पचति स मन्दः । यः कालमन्नमुपयुक्तं पचति स समः । वयस्तु त्रिविधं बालं मध्यं वृद्धमिति । तत्रोनषोडशवर्षा बालाः; ते त्रिधा क्षीरपाः, क्षीरान्नादा, अन्नादा, इति । तेषु संवत्सरपराः क्षीरादा द्विवत्सरपराः क्षीरान्नादाः परतोऽन्नादा इति षोडशसप्तत्योरन्तरं मध्यं वयः; तस्य विकल्पो वृद्धिर्यौवनं सम्पूर्णता हानिरिति तत्राविंशतेः वृद्धिरात्रिंशतो यौवनमाचत्वारिंशतः सर्वधात्विन्द्रियबलवीर्यसंपूर्णता अत ऊर्ध्वमशीतेः परं हानिर्यावत्सप्ततिरिति सप्ततेस्तूर्ध्वं क्षीयमाणधात्विन्द्रियजीर्णागारमिवाभिवृष्टशीतं वृषमाचक्षते 'बाल्ये विवर्धते श्लेष्मा मध्यमे पित्तमेव तु । भूयिष्ठं वर्द्धते वायुर्वृद्धस्तद्वीक्ष्य वर्जयेत् । अग्निक्षारविरेकैस्तु बालवृद्धौ विवर्जयेत्। तत्साध्येषु विकारेषु शुद्धिं कुर्यात्क्रियां भिषक् । देहः स्थूलः कृशो मध्य इति प्रागुपदेशितः । कर्षयेद्बृंहयेच्चापि महास्थूलकृशौ नरौ । रक्षणं चैव मध्यस्य कुर्वीत सततं भिषक् ॥' बलमेव प्रधानं केचित्कृशा एव बलवन्तः स्थूला अबलवन्तः तस्माद्बलं परीक्षयेत् । सत्वमाह—'सत्ववान् सहते सर्वं संस्तभ्यात्मानमात्मना । राजसस्ताप्यमानान्यैः सहते नाम तामसः' । प्रकृतिमग्रे वक्ष्यामः । पूर्वोक्तं भेषजमाह—'बालस्य प्रथमे मासि देया भेषजरक्तिका' इत्यादि पूर्वोक्तम् । शममाह यथावहृदकनगोरूपः (?) कफमारुतरोगवान् एवमन्येपि ज्ञेयाः । एवं सर्वं ज्ञात्वा पश्चान्मार्गे शकुनानि परीक्ष्य तदा चिकित्सां कुर्वन्ति । रोगिणः चिकित्सां कर्तुं गच्छतः भिषजः यात्रेयं सौम्यशकुनं शोभनं प्रोक्तं दीप्तं न । रोगिणः कृते वैद्याह्वानाय गच्छतो दूतस्य सौम्यशकुनं शुभं न प्रदीप्तं सुखावहमित्यर्थः । इति शकुनः ॥ ११ ॥ १२ ॥

**दी०**—अथ कीदृशो रोगी चिकित्स्यस्तद्दर्शयन्नाह—

**निजप्रकृतिवर्णाभ्यां युक्तः सत्वेन संयुतः ॥ १३ ॥**
**चिकित्स्यो भिषजा रोगी वैद्यभक्तो जितेन्द्रियः ।**

दी०—निजप्रकृतीति । भिषजा वैद्येन ईदृशो रोगी चिकित्स्यः, चिकित्सा रोगापनयनं कर्म तद्योग्यो भवतीत्यभिप्रायः । कीदृशः ? तमाह—निजप्रकृतिवर्णाभ्यां युक्त इति यादृशौ यस्य प्रकृतिवर्णौ स्तः तादृग्भ्यामेव संयुक्त इत्यर्थः । ननु केयं प्रकृतिः ? कतिभेदा ? किंकारणं वा अस्या इति ? तदुच्यते—केयं प्रकृतिः स्वभाव इत्यर्थः । स चाबालप्रवृत्ता निषेकाद्वा वातारब्धाद्या आप्रयाणादनुवर्तते । कति भेदा इति । सप्त प्रकृतयो भवन्ति पृथग्दोषैर्द्वन्द्वैः समस्तैश्च । किंकारणमिति तदाह सुश्रुतः 'शुक्रशोणितसंयोगे यो भवेद्दोष उत्कटः । प्रकृतिर्जायते तेन तस्या मे लक्षणं शृणु' इति । सा हि प्रकृतिर्जात्यादीन् षडुपाधीनपेक्षते । तदुक्तं चरके 'तत्र प्रकृतिर्हि जातिप्रसक्ता कुलप्रसक्ता च देशानुपातिनीति च

कालानुपातिनी च वयोऽनुपातिनी च प्रत्यात्मनियता चेति'। तत्र जातिप्रसक्ता नाम तासु तासु मनुष्यादिजातिषु ते ते करचरणादयः स्वभावविशेषाः, वचनेषु च नानाविधा एव व्यत्ययादयो धर्मविशेषाः, मनसि च धर्माधर्ममैथुनाहारप्रभृतयोऽपि भावाः। कुलप्रसक्ता नाम द्विजकुले तपःप्रियतादयः, क्षत्रियकुले समरप्रियतादयो धर्मविशेषा भवन्ति। देशानुपातिनी नाम लाटकर्णाटायवनादीनां काये वाचि मनसि च ते ते स्वभावविशेषा भवन्ति। कालानुपातिनी नाम देहादिषु दौर्बल्यादिदैन्यरलान्याद्यपेक्षा। गदेषु च दोषाद्यपेक्षणीयम्। वयोनुपातिनी नाम बाल्याद्यवस्थासु कालादौ मर्यादादयो धर्माः। प्रत्यात्मनियता चेति आत्मनि नियता प्रतिपुरुषनियतेत्यर्थः। ते पुनः काये वाचि मनसि च स्वभावविशेषाः प्रकृतिपुरुषभेदभिन्ना दृश्यन्त इति। केचित्तु पाञ्चभौतिकीं प्रकृतिमाहुः। अन्ये तु प्रकृतिं सत्त्वरजस्तमोमयीमाहुः। पूर्वमुक्तः प्रकृतिवर्णाभ्यां युक्तः। अतस्तावत् प्रकृतिस्तु संक्षेपेणोक्ता। इदानीं वर्णमाह—वर्णशब्देन प्रभा कथ्यते। सैव च्छायाप्यभिमता। एतेषां भेदोऽप्यस्तीत्येके भाषन्ते। सा यथा—'वर्णप्रभामिश्रिता या छाया सा परिकीर्तिता। वर्णमाक्रामति च्छाया प्रभा वर्णप्रकाशिनी॥ आसन्ना लक्ष्यते छाया प्रभा दूरात्तु लक्ष्यते' इति। न केवलं वर्णप्रभाच्छायानां लक्षणभेदः, संख्याभेदोऽप्यस्ति। स यथा चतुर्धा वर्णाः—गौरः, कृष्णः, श्यामः, गौरश्याम इति। प्रभा सप्तविधा—रक्ता, पीता, सिता, श्यावा, हरित्, पाण्डुरा, असितेति॥ छायापि पञ्चविधा—स्निग्धा विमला, रूक्षा, मलिना, संक्षिप्तेति। पुनः कीदृशो रोगी चिकित्स्यः? सत्त्वेन संयुत इति। सत्त्वं तु व्यसनाभ्युदयक्रियादिस्थानेष्वपि कर्मकरम्। यतः—'सत्त्ववान् सहते सर्वं संस्तभ्यात्मानमात्मना। राजसस्तभ्यमानोऽन्यैः सहते नैव तामसः।' इति सुश्रुतः। चक्षुषोपपन्नार्थे प्रवरावरमध्यमबलं सत्त्वं त्रिविधम्। एतेषां लक्षणं न लिखितमत्र ग्रन्थबाहुल्यात्। पुनः कीदृशः? वैद्यभक्त इति वैद्याह्लादकरः तद्वाक्यपालनेऽनुरक्त इत्यर्थः। यतः 'आढ्यो रोगी भिषग्वश्यो ज्ञापकः सत्त्ववानपि' इति वचनात्। पुनः कथम्भूतः? जितेन्द्रियो जितेन्द्रियविषयः, विषयास्तु स्रक्चन्दनवनितादयः। आतुरलक्षणम्॥ १३॥

१—नास्ति 'क' पुस्तके।

गू०—भिषजा ईदृशो रोगी चिकित्स्यः। किंविशिष्टः? निजप्रकृतिवर्णाभ्यां युक्तः। (नमु यद्वा किं करोति ननु दहनं स्थाली तन्दुलानोदनं कर्तुं क्षमः। तथा च शतपुष्पा लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुरित्यादिवचनं वह्निमकुर्वाणमपि आमं पचति यथा स्थालीस्थबहुदुग्धमुक्तिकाचूर्णप्रथमजलयोगात्तन्दुलादिकं पचति नत्वग्निं प्रज्वालयति 'नाम पुष्पं कषायोक्तं रूक्षं लघ्वामपाचन'मिति। तथा च 'चित्रकः कटुकः पाके दीपनः पाचनो लघु'रिति। किंविशिष्टः? सत्त्वेन सत्त्वगुणेन संयुतः। पुनः किंविशिष्टः? वैद्यभक्तो जितेन्द्रियः। इति रोगिलक्षणम्॥ १३॥

टी०—अथानन्तरं स्वप्नान्याह—

**स्वप्नेषु नग्नान्मुण्डांश्च रक्तकृष्णाम्बरावृतान्॥ १४॥**
**व्यङ्गांश्च विकृतान्कृष्णान्सपाशान्सायुधानपि।**
**बध्नतो निघ्नतश्चापि दक्षिणां दिशमाश्रितान्॥१५॥**
**महिषोष्ट्रखरारूढांस्त्रीपुंसो यस्तु पश्यति।**
**स स्वस्थो लभते व्याधिं रोगी यात्येव पञ्चताम्॥१६॥**
**अधो यो निपतत्युच्चाज्जलेऽग्नौ वा विलीयते।**
**श्वापदैर्हन्यते योऽपि मत्स्याद्यैर्गिलितो भवेत्॥१७॥**
**यस्य नेत्रे विलीयेते दीपो निर्वाणतां व्रजेत्।**
**तैलं सुरां पिबेद्वापि लोहं वा लभते तिलान्॥१८॥**
**पक्वान्नं लभतेऽश्नाति विशेत्कूपं रसातलम्।**
**स स्वस्थो लभते रोगं रोगी यात्येव पञ्चताम्॥१९॥**
**दुःस्वप्नानेवमादींश्च दृष्ट्वा ब्रूयान्न कस्यचित्।**
**स्नानं कुर्यादुषस्येव दद्याद्धेमतिलानयः॥ २०॥**
**पठेत्स्तोत्राणि देवानां रात्रौ देवालये वसेत्।**
**कृत्वैवं त्रिदिनं मर्त्यो दुःस्वप्नात्परिमुच्यते॥ २१॥**

टी०—स्वप्नेष्विति। एवंविधान् स्वप्नान् स्त्रीपुरुषयोर्मध्ये यश्चैकः पश्यति स एव यदि स्वस्थोऽनातुरस्तर्हि व्याधिं लभते। यदा रोगी पश्यति तदा पञ्चत्वं मरणं याति प्राप्नोतीत्यर्थः। कीदृशान् स्वप्नान्? तानाह—नग्नान् वस्त्रादिरहितान्, मुण्डानिति मुण्डितान्, रक्तकृष्णाम्बरावृतानिति रक्तकृष्णवस्त्रवेष्टितानित्यर्थः। व्यङ्गानिति अवयवादिरहितान् नासाकर्तनादिभिरपि व्यङ्गानित्यभिप्रायः। विकृतानिति पङ्गुकुब्जप्रभृतीन्, कृष्णानिति चित्रकल्पितवत् कार्ष्ण्याभासः, सपाशानिति पाशयुतान्, पाशो दीर्घः पशूनां बन्धनरज्जुः, बध्नतो निघ्नत इति निष्ठुरप्रहननकर्मकारिणः दक्षिणां दिशमाश्रितानिति। एते तु यदा दक्षिणां दिश-

माश्रिता भवन्ति तदा प्रचुरमनिष्टं स्यादित्यभिप्रायः। तत्र नैर्ऋतं भागधेयमिति वदन्ति। महिषोष्ट्रखरारूढानिति महिषादिवाहनेषु आरोहिता इत्यर्थः। ते तु यमसंबन्धिनश्चाशुभकरा इति भावः॥

अथापराणि दुःस्वप्नान्याह—अध इति। स्वप्नेषु योऽपि एवंविधो भवति सोऽप्यनिष्टः कीदृशस्तमाह—अधो यो निपतत्युच्चादित्यादि। पुरुष उच्चादत्युच्चस्थानादधो निम्नस्थाने निपतति स्खलतीत्यर्थः। अत्युच्चं पर्वतादिकम्। यो जलेऽग्नौ वा विलीयते लीनो भवति। एतेन जले ब्रुडति अग्नौ पतङ्गवत् पततीत्यभिप्रायः। योऽपि श्वापदैर्हन्यते शुनश्चरणैराकृष्यत इति। एके स्वापदैरिति पठन्ति, तत्र स्वापदैर्निजबन्धुनाशादिभिरुपहन्यते पीड्यत इत्यर्थः। मत्स्याद्यैरिति गिलितो भक्षितो यो भवेत्। आदिग्रहणान्मकरनक्रशिशुमारप्रभृतीनां ग्रहणम्। यस्य पुरुषस्य च नेत्रे विलीयेते विलीनतां प्राप्नुत इति। स्वप्नेष्विति शेषः। एतेन स्वचक्षुषी विगलिते पश्यतीत्यर्थः। दीपो निर्वाणतां व्रजेदिति। एतेन किमुक्तम्। यः स्वप्नेऽप्यकस्माद्दीपं विनष्टं पश्यतीत्यभिप्रायः। यश्च तैलं सुरां वा पिबेत् यश्च लोहं लभते तिलान् वा लभते यश्च पक्वान्नं सिद्धमन्नं लभते यश्च तदश्नाति भक्षयति च यो मातरं कुक्ष्यं विशेत् मातुर्गृहं प्रविशतीत्यर्थः। एतेषां स्वप्नेष्विति संबन्धः। सुरात्र पिष्टमयी न तु मद्यविशेषः। स्वप्ने विशिष्टमद्यपानं प्रशस्तम्। तदुक्तं 'रुधिरं पिबति स्वप्ने मद्यं वापि कथंचन। ब्राह्मणो लभते विद्यामितरस्तु धनं लभेत्' इति। लोहमित्यस्य स्थाने लौहमिति पाठान्तरं तत्र लौहं लोहमयं यष्ट्यादि। वाग्रहणात् कार्पासपिण्याकलवणादीनां ग्रहणम्। एतेषां लाभेऽप्यनिष्टं भवति। एके विशेत् कुक्ष्यं च मातरमित्यत्र कुक्ष्यमुत्सङ्गं व्याख्यानयन्ति। जननीं प्रविशेन्नर इति पठन्ति केचित् तत्र मातुरुदरे प्रविशतीत्यर्थः। तत्र मात्रा सह शयनं करोतीत्यन्ये॥

इदानीं दुःस्वप्नदर्शनोत्पन्नारिष्टनिवृत्त्यर्थं किञ्चित् प्रतीकारमाह—दुःस्वप्नानीति। एवमादीनि पूर्वोक्तनग्नमुण्डादीनि दुःस्वप्नानि दुःखोत्पादकानि दृष्ट्वा स्वप्नावस्थायामालोक्य कस्यचित् पुरतो न ब्रूयात् न प्रकाशयेदित्यर्थः। परमुखेनानिष्टश्रवणभयात्। तदनु किं कुर्यात्? तदाह—स्नानमिति। उषसि प्रातरेव स्नानं कुर्यात् हेम तिलानयश्च दद्यात्। हेम सुवर्णम्, तिलान् कृष्णान्, अयो लोहः। पुनः किं कुर्यादित्याह—पठेदिति। देवानां स्तोत्राणि देवानां विष्णुप्रभृतीनां स्तोत्राणि अग्नित्रयादीनि। यथा—'अग्नित्रयं त्रीणि च पुष्कराणि नामत्रयं त्रीणि पदानि विष्णोः। रुद्रस्त्रिनेत्रस्त्रिपथा च गङ्गा एतानि दुःस्वप्नविनाशनानि।' इति। इति दिनकृत्यं। रात्रावपि देवालये देवमण्डपं वसेत्। तत्र जागरणं कुर्यादिति केषाञ्चिन्मतम्। अथ दुःस्वप्नमुपसंहरन् फलमाह—कृत्वैवमिति। एवमुक्तप्रकारेण स्नानदानादिकं कर्म कृत्वा संपाद्य त्रिदिनं दिनत्रयं यथा स्यात् मर्त्यः पुरुषः दुःस्वप्नात् दुःखजनकनिमित्तात् परिमुच्यते सुखी भवतीत्यर्थः॥ १४–२१॥

गू०—स्वप्नेषु नग्नतो भ्रन्तः स्त्री वा पुमान्यः पश्यति दक्षिणां दिशं आश्रितान् पश्यति। यदा स्वस्थः पश्यति तदा स स्वस्थः व्याधिं लभते, नरो यः स्त्रियः पुंसः स्वप्नेषु नग्नतो भ्रन्तः दक्षिणां दिशं आश्रितान् नग्नान् पश्यति, मुण्डान् पश्यति, रक्तकृष्णाम्बरावृतान् पश्यति, व्यङ्गान् पश्यति, विकृतान् पश्यति, कृष्णान् सपाशान् पश्यति, सायुधान् पश्यति, महिषोष्ट्रखरारूढान् एतान् यः स्वस्थः पश्यति चेत्तदा व्याधिं लभते। रोगी पश्यति चेत्तदा पञ्चतां मरणावस्थां यातीत्यर्थः। स्त्रीपुंस इत्यत्राकारान्तः शब्दः, कुतः 'अचतुरविचतुरसुचतुरस्त्रीपुंस–' इत्याद्याः शब्दा निपात्यन्ते तस्मादकारान्तो भवत्येव। व्यङ्गान् पादखञ्जान् विकृतान् कुत्सितरूपान् कृष्णान् श्यामान् सपाशान् बन्धरज्जुसहितान्। सुगममन्यत्। पुनर्बहिर्नायाति स स्वस्थः दृष्ट्वा व्याधिं लभते। रोगी पञ्चतां यातीति सर्वत्रानुषङ्गः। यस्य पुंसः स्वप्नेषु नेत्रे विलीयेते भग्नायेते, दीपः निर्वाणतां नेत्रादर्शनावस्थां व्रजेत् प्राप्नुयात् सः स्वस्थश्चेत् एवं पश्यति रोगी भवेत्, रोगी पञ्चतां यातीत्यर्थः। पुमान् स्वप्नेषु तैलं पिबेत् वा सुरां पिबेत् वा लोहं लभते वा कुत्रापि पक्वान्नं लभते वा तिलान् लभते स्नाति वा मानवः वा कूपान् विशेत् पुनर्बहिर्न याति स स्वस्थः एवं दृष्ट्वा व्याधिं लभते, रोगी पञ्चतां यातीत्यर्थः। आदीनि प्रथमानि दुःस्वप्नानि दृष्ट्वा मानवः कस्यचिन्न कथयेत्। तर्हि किं कुर्यात्, उषसि स्नानं कृत्वा अयो लोहं दद्यात् हेम तिलान् दद्यात् पश्चाद्देवानां स्तोत्राणि देवालये पठेत् पुना रात्रौ तत्रैव वसेत् मर्त्यः त्रिदिनं एवं कृत्वा दुःस्वप्नात्परिमुच्यते मुक्तो भवति॥१४–२१॥

गू०—अथ सुखप्राप्त्याह—

**स्वप्नेषु यः सुरान्भूपाञ्जीवतः सुहृदो द्विजान् ।**
**गोसमिद्धाग्नितीर्थानि पश्येत्सुखमवाप्नुयात् ॥ २२ ॥**
**तीर्त्वा कलुषनीराणि जित्वा शत्रुगणानपि ।**
**आरुह्य सौधगोशैलकरिवाहान्सुखी भवेत् ॥ २३ ॥**
**शुभ्रपुष्पाणि वासांसि मांसमत्स्यफलानि च ।**
**प्राप्यातुरः सुखी भूयात्स्वस्थो धनमवाप्नुयात् ॥२४॥**
**अगम्यागमनं लेपो विष्टया रुदितं मृतिः ।**
**आममांसाशनं स्वप्ने धनारोग्याप्तये विदुः ॥ २५ ॥**
**जलौका भ्रमरी सर्पो मक्षिका वापि यं दशेत् ।**
**रोगी स भूयादुल्लाघः स्वस्थो धनमवाप्नुयात् ॥२६॥**

इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायां नाडीपरीक्षादिविधिरध्यायः ॥

---

दी०—अथ दुःस्वप्नानि प्रतिपाद्य संप्रति प्रशस्तस्वप्नानि दर्शयन्नाह—स्वप्नेष्विति । यः पुरुषः स्वप्नेषु सुरादीन् पश्येत् स सुखमाप्नुयादित्यर्थः । सुरानितीन्द्रप्रभृतिदेवान्, भूपानिति राज्ञः, सुहृदो मित्राणि, द्विजान् ब्राह्मणान्, एते तु जीवन्त इति प्रकृतिप्राणयुतानित्यर्थः । तथान्यानपि । गौः । समिद्धाग्निः प्रज्वलितवह्निः । तीर्थानि प्रयागादीनि ॥ अपराण्याह—तीर्त्वेति । यः पुरुषः स्वप्नेषु एवंविधो भवति स सुखी भवेदित्यर्थः । कीदृशस्तमाह—कलुषनीराणि सकर्दमपानीयानि तीर्त्वा उत्तीर्य स्थितमिति भावः । शत्रुगणान् रिपुसमूहान् जित्वा आगत इति तात्पर्यार्थः । सौधगोशैलादीनारुह्य प्राप्त इति भावः । सौधो धवलगृहः, गौर्वृषभः, शैलः पर्वतः, करी हस्ती, वाहानश्वादीन्, कलुषनीराणीति बहुवचनेन नदीनदसमुद्रादीनां ग्रहणम् । तदुक्तम् 'नदीनदसमुद्रांश्च क्षुभितान् कलुषोदकान् । तरेत् कल्याणलाभाय व्याधेरपगमाय च' इति ॥ अन्यान्प्याह—शुभ्रेति । आतुरो रोगी शुभ्रपुष्पादीनि प्राप्य सुखी भूयादनातुरः स्यादित्यर्थः । यदा स्वस्थोऽपीदृशः स्यात् तदा धनमाप्नुयादिति भावः । शुभ्रपुष्पाणीति शुभ्रपुष्पप्रभृतीनि, वासांसि चात्र शुभ्राणि ज्ञातव्यानि, मांसमत्र आमं नतु परिपक्वं वक्ष्यमाणत्वात् । फलानीति आम्रप्रभृतीनि ॥ अथेतराण्याह—अगम्येति । अगम्यागमनं अनुचितस्थानगमनं, विष्ठायाः पुरीषस्य लेपः करचरणादिषु, रुदितमिति रोदनम् । आत्मनः परस्य वा । मृतिर्मरणं आममांसमित्यत्र परे पक्वमांसाशनमिति पठन्ति । एतच्च स्वप्ने धनारोग्याप्तये धनप्राप्तये आरोग्यप्राप्तये च ॥ जलौकेति । जलौकादयो यं पुरुषं दशन्ति भक्षयन्ति स्वप्नेष्विति शेषः । स यदा रोगी भवति तदा रोगः स्यात् । स्वस्थोपि घनं प्राप्नोतीत्यभिप्रायः । जलौका प्रसिद्धा, भ्रमरीति कृष्णवर्णमधुमक्षिकाभेदः, मक्षिकाश्च स्वल्पाः, सर्पोऽजगरप्रभृतिकः । वाग्रहणात् वरटा—मधुमक्षिका—मशकादीनां ग्रहणम् ॥ इति स्वप्नलक्षणम् ॥ २२–२६ ॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां प्रथमखण्डे नाडीपरीक्षादिविधिरध्यायस्तृतीयः ॥

---

गू०—स्वप्नेषु यः सुरान्देवान्परिपश्यति, भूपान् राज्ञः पश्यति, जीवतः सुहृदः मित्रान् पश्यति, स सुखं आप्नुयादिति ॥ २२–२६ ॥

इति श्रीकाशीरामवैद्यविरचितायां गूढार्थदीपिन्यां तृतीयोऽध्यायः ॥

---

# चतुर्थोऽध्यायः ।

## अथ दीपनपाचनाध्यायः ।

दी०—पूर्वमुक्तं ततो दीपनपाचनं, अतो दीपनपाचनादीनां लक्षणान्याह—

**पचेन्नामं वह्निकृच्च दीपनं तद्यथा मिशिः ।**

दी०—पचेदिति । यद्द्रव्यमामं न पचेद्वह्निकृच्च भवति तद्दीपनं जानीयात् । यथा मिशिः शतपुष्पा । तथाचोक्तं द्रव्यगुणावल्याम्—'शतपुष्पा लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुः' इति । दीपनं जठराग्नेः । अग्निगुणभूयिष्ठत्वात् । ननु कथमेतद्गुणयुक्तमिशिर्नामपाची भवति तदविनाशकत्वेन कथमग्नेः प्रबोधः स्यात् ? उच्यते—द्रव्याणां प्रभावो विचारणीय इति सुश्रुतः न हेतुभिर्विचार्यते । तदुक्तम्—'नौषधैर्हेतुभिर्विद्वान् परीक्षेत कथंचन । सहस्रेणापि हेतूनां नाम्बष्ठादिविरेचयेत् ॥' इति ॥ आम इत्यपरिपक्वरसः । तद्यथा—'जठरानलदौर्बल्यादविपक्वस्तु यो रसः । स आमसंज्ञको ज्ञेयो देहदोषप्रकोपनः ॥' इति ॥

गू०—यद्द्रव्यं आमं न पचेत्, वह्निकृदस्ति तत् दीपनं । यथा मिशिः शतपुष्पा ।

दी०–अथ पाचनमाह–

**पचत्यामं न वह्निं च कुर्याद्यत्तद्धि पाचनम् ॥ १ ॥**
**नागकेशरवद्विद्याच्चित्रो दीपनपाचनः ।**

दी०—पचत्यामित्यादि । यद्द्रव्यमामं पचति वह्निं न कुर्यात् तत् पाचनं ज्ञेयम् । अत्रापि द्रव्यप्रभावो बोद्धव्यः । तच्च नागकेशरवद्विद्याज्जानीयात् । यतः 'नागकेशरकं रूक्षमुष्णं लघ्वामपाचनम्' इति । आमपाचनमिति विरूक्षणम् । सामानां दोषधातुमलानामित्येके । उभयात्मकमाह—चित्रो दीपनपाचन इति । चित्रक उभयकार्यकरो भवति । दीपनः पाचनश्च । तदुक्तम्—'चित्रकः कटुकः पाके वह्निकृत्पाचनो लघुः ।' इति ॥ १ ॥

गू०—यत् (द्रव्यं) आमं पचति वह्निं न कुर्यात् तत्पाचनं । तदाह चित्रः चित्रकः, नागकेशरवद्दीपनपाचनं विद्यात् जानीयात् ग्रन्थान्तरात् माधुर्याच्छीतभावाच्च न पुनर्दीपनो मतः । यत्कामं पाचनं कुर्यात् तत्तु दीपनमुच्यते ॥ १ ॥

दी०—अथ संशमनमाह—

**न शोधयति न द्वेष्टि समान् दोषांस्तथोद्धतान् ॥२॥**
**समीकरोति विषमाञ्छमनं तद्यथाऽमृता ।**

दी०—न शोधयतीति । यत् किञ्चित् पीतलीढाशितमनिर्हृत्य दोषं संशमयति तत् संशमनम् । एतेन किमुक्तं यद्द्रव्यं न वामयति न विरेचयति इति व्याधिना सह एकीभूय तत्स्थमेव व्याधिमुपशमयति तत् संशमनमिति भावः । दोषशब्दोऽत्र दोषेषु कार्यव्याधिष्वपि वर्तते । कार्ये कारणोपचारात् । असमं समं करोति समीकरोति । यथा—अमृता गुडूची संशमनी प्रसिद्धा । तदुक्तं—'रसायनी संशमनी दोषाणां ज्वरनाशिनी । गुडूची कटुका लघ्वी तिक्ताऽग्निदीपनी मता' इति । केचित्तु—'न शोधयति यद्दोषान् समान् नोदीरयत्यपि । समीकरोति च क्रुद्धान् तत् संशमनमुच्यते' इति पठन्ति । अत्रापि स एवाऽभिप्रायः । सम्यक् शमयतीति संशमनं, सम्यग् दुष्टदोषस्यानिर्हरणपूर्वकं शमनं अदुष्टस्यानुदीरणं च, व्याधिशमने तु प्रस्तुतव्याधिशमनं, अप्रस्तुतव्याधेरनुदीरणमिति स्पष्टार्थज्ञापनाय न दोषः ॥ पुनर्भावकथनात् ॥ २ ॥

गू०—यद्द्रव्यं उद्धतान् वर्द्धितान् दोषान्न शोधयति उपशमं नो नयति समान्सप्रकृतिस्थांश्च द्वेष्टि न वर्धयति किंतु समीकरोति तत् शमनं ज्ञेयं । यथा अमृता गुडूची तद्वदित्यर्थः ॥ २ ॥

दी०—अथानुलोमनमाह—

**कृत्वा पाकं मलानां यद्भित्त्वा बन्धमधो नयेत् ॥३॥**
**तच्चानुलोमनं ज्ञेयं यथा प्रोक्ता हरीतकी ।**

दी०—कृत्वेति । यद्द्रव्यं मलानां दोषाणां पाकं कोपशान्तिं कृत्वा बन्धं निबन्धं च भित्त्वा भिन्नतां नीत्वा अधो नयेत् अधः करोति वातादिकमिति शेषः, तेन प्रतिलोमादनुलोमं करोतीत्यर्थः । तच्चानुलोमनं ज्ञेयं, अनुलोमनं वातादीनामधःप्रवर्तनं स्वगुणत्वात् । यथा हरीतकी । सैवाऽनुलोमिनी प्रसिद्धैव । बन्धमिति दोषाणां परस्परग्रथितत्वं । एके वातमूत्रपुरीषादीनामप्रवृत्तिरूपं विबन्धमाहुः ॥ ३ ॥

गू०—यद्द्रव्यं अपरिपच्यमानानां मलानां पाकं कृत्वा बन्धं च भित्त्वा अधः नयेत् कोष्ठादधः पातयेत् ततः अनुलोमनं ज्ञेयं । यथा हरीतकी ॥ ३ ॥

दी०—अथ स्रंसनमाह—

**पक्तव्यं यदपक्त्वैव श्लिष्टं कोष्ठे मलादिकम् ॥ ४ ॥**
**नयत्यधः [1]स्रंसनं तद्यथा स्यात्कृतमालकः ।**

दी०—पक्तव्यमिति । यद्द्रव्यं मलादिकं अपक्त्वैव तेषां पाकमकृत्वा अधो नयति अधः पतनं करोति तत् स्रंसनं स्यात् । यथा कृतमालकः । कीदृशं मलादिकम् ? इत्याह—पक्तव्यमिति । पच्यमानं अत एव कोष्ठे आश्लिष्टं, कोष्ठ इति पाचकस्थाने, आश्लिष्टमित्याश्रितम् । केचित् कोष्ठशब्देन हृदयादीन्यपि गृह्यन्ते । तथाहि—'स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च । हृदुण्डुकः फुफ्फुसश्च कोष्ठ इत्यभिधीयते' इति । एतदभिप्रायेणाऽपि शोधनमप्याहुः ॥ ४ ॥

गू०—यद्द्रव्यं कोष्ठे श्लिष्टं पक्तव्यं मलादिकं अपक्त्वैवापाचयित्वा अधः नयति तत्स्रंसनं स्यात् । यथा कृतमालकः आरग्वधः ॥ ४ ॥

दी०—अथ भेदनमाह—

**मलादिकमबद्धं च बद्धं वा पिण्डितं मलैः ॥ ५ ॥**
**भित्त्वाधः पातयति तद्भेदनं कटुकी यथा ।**

दी०—मलेति । यन्मलादिकमबद्धं मलबद्धं वा अत एव मलैर्दोषैश्च कृत्वा पिण्डितपरिपाकात् पिण्डीभूतम् । ईदृशं मलादिकं भित्त्वा स्थानात् स्वस्थानादधः पातयति तद्भेदनं ज्ञातव्यमिति शेषः । यथा कटुकी ।

---

१—'श्र' क.

बद्धं, विबद्धं, शुष्कं, ग्रथितं च। तत्र शुष्कं पुरीषविषयं। ग्रथितं दोषादीनाम्। तथा अबद्धमपि द्विविधं। एकं द्रवरूपं पुरीषविषयं स्वतन्त्रमेकं मलादिकमिति, मलोऽत्र दोषः। आदिग्रहणात् रूक्षदूषितादीनामपि ग्रहणम्। भित्त्वेति तत्पुरीषं भित्त्वा विदार्याधः पातयति द्रव्यमिति शेषः ॥ ५ ॥

गू०–यद्द्रव्यं अबद्धं मलादिकं पिण्डितैः पिण्डीभूतैर्मलैर्बद्धं वा भित्त्वाधः पातयति उद्भेदनं। यथा कटुकी ॥५॥

दी०—अथ रेचनमाह—

**विपक्वं यदपक्वं वा मलादि द्रवतां नयेत् ॥ ६ ॥**
**रेचयत्यपि तज्ज्ञेयं रेचनं त्रिवृता यथा।**

दी०—विपक्वमिति। यद्द्रव्यं विपक्वमपक्वं वा मलादि दोषादिकं द्रवतां नयेत् द्रवभावं करोतीत्यर्थः। न केवलं द्रवतां नयेत्, रेचयत्यपि च तद्रेचनं ज्ञेयं, यथा तृवृता 'निसोतः'। यतो विरेचनद्रव्याणि गुर्वम्बुगुणभूयिष्ठानि तानि गुरुत्वादधो गच्छन्ति। गुरुत्वादिति गुरुत्वं चेह प्रभावविशेषाधिष्ठितं। त्रिवृतादिकं समवेतं ग्राह्यं न तु गुरुत्वमात्रं। अन्यथा मत्स्यपिष्टान्नमसूरादीनां विरेचकत्वं स्यात्। अम्बुगुणभूयिष्ठमित्यर्थः, प्रभावात्। मलादिकमिति आदिग्रहणात् दूष्यदूषितादीनामत्र संग्रहः ॥ ६ ॥

गू०—यद्द्रव्यं विपक्वं मलादि अपक्वं वा द्रवतां नयेत् प्रापयेत् पुनर्बहिरेव याति तत् रेचनं ज्ञेयं। यथा तृवृता ॥

दी०—अथ वमनमाह—

**अपक्वपित्तश्लेष्माणौ बलादूर्ध्वं नयेत्तु यत् ॥ ७ ॥**
**वमनं तद्धि विज्ञेयं मदनस्य फलं यथा।**

दी०—अपक्वमिति। यद्द्रव्यमपक्वं पाकमगच्छन्तं पित्तश्लेष्माणं व्यस्तं मिश्रितं वा बलात् हठात्कारेण ऊर्ध्वं नयेत् मुखे कृत्वा वामयेदित्यभिप्रायः। तद्वमनं विज्ञेयं यथा मदनस्य फलम्। बलादिति प्रभावसूचकशब्दः, यतो वमनद्रव्याणि वाय्वग्निगुणभूयिष्ठानि, वाय्वग्नी हि लघुत्वाच्च तान्यूर्ध्वमुत्तिष्ठन्ति। लघुत्वं चेह प्रभावविशेषाधिष्ठितं मदनफलादिद्रव्यसमवेतं ग्राह्यं न तु लघुत्वमात्रं, अन्यथा कपिञ्जललाजादीनां च वामनीयत्वं स्यात्। ननु कफस्य वमनं पित्तस्य विरेचनं प्रशस्तमिति प्रसिद्धिः, तत् कथं पित्तस्य वमनमिति? उच्यते—अपक्वपित्तस्य वमनादेव निबर्हणं बोद्धव्यम्। तच्च दृश्यते हि कटुतिक्तहरित्पीताम्लवमनत्वेन यतः पित्तद्रवमम्लतामुपैतीति। अत एवाऽम्लपित्तचिकित्सायामादौ वमनमित्यदोषः ॥ ७ ॥

गू०–यद्द्रव्यं अपक्वं पित्तश्लेष्मान्नचयं ऊर्ध्वं नयेत् हि निश्चयेन तत् वमनं विज्ञेयं। यथा मदनस्य फलं, अपक्वं पित्तं च अपक्वः श्लेष्मा च अपक्वमन्नं च अपक्वपित्तश्लेष्मान्नानां चयं अपक्वपित्तश्लेष्मान्नचयं अत्र श्लेष्मन् शब्दस्य नकारस्य लोपे याते सति लोपशि पुनर्न संधिरित्युक्तत्वात्। स 'सवर्णे दीर्घःसह' इत्यनेन सूत्रेण पूर्वापरवर्णयोर्मिथो घटनरूपसन्धिर्न अत्र पुनर्ग्रहादेव सन्धिः, अन्यथा दामोदडिण्डिमित्यादौ सन्धिर्न स्यात्। अतोऽत्र सन्धिर्युक्त एव ॥ ७ ॥

दी०—अथ शोधनमाह—

**स्थानाद्बहिर्नयेदूर्ध्वमधो वा मलसंचयम् ॥ ८ ॥**
**देहसंशोधनं तत्स्याद्देवदालीफलं यथा।**

दी०—स्थानादिति। यद्द्रव्यं स्थानात् प्रकुपितस्थानात् मलसञ्चयं दोषादीनां स्वस्थानादूर्ध्वमधो वा बहिर्नयेत् बहिः करोति तद्देहे शरीरे शोधनं कथितम्। यथा देवदालीफलम्। देवदालीवल्लीसंज्ञा। ऊर्ध्वं मुखनासिकाभ्यां, अधः पायुमेढ्रमार्गेण। देहग्रहणेन शोणितावसेचनमपि गृह्यते शोधनत्वात्। यतः शोधनं द्विविधमाचक्षते बहिराश्रयमभ्यन्तराश्रयं च। तत्र बहिराश्रयं शस्त्रक्षाराग्निप्रलेपादयः। अभ्यन्तराश्रयं तु चतुःप्रकारं वमनरेचनास्थापनशोणितमोक्षणं च। एके शिरोविरेचनं मन्यन्ते। तच्चात्र वमनान्तर्भूतं बोद्धव्यम्, ऊर्ध्वशोधनत्वात् ॥ ८ ॥

गू०—यद्द्रव्यं स्थानाद्बहिः स्थानान्निरस्य ऊर्ध्वं वा अधः मलसञ्चयं नयेत् तद्देहे संशोधनं स्यात्। यथा देवदालीफलम् ॥ ८ ॥

दी०—अथ छेदनमाह—

**श्लिष्टान्कफादिकान्दोषानुन्मूलयति यद्बलात् ॥९॥**
**छेदनं तद्यथा क्षारा मरिचानि शिलाजतु ॥**

दी०—श्लिष्टानिति। यद्द्रव्यं श्लिष्टान् सञ्चितान्, परस्परग्रथितानित्येके, अत्यर्थं कुपितानित्यपरे, कफादिकान् दोषान्, आदिग्रहणेन वातपित्तशोणितकृमिग्रहणं न तु दूष्यदूष्यतादिकं, यतः दोषानिति पुनर्ग्रहणं कृमिशोणितयोरपि दोषसंज्ञा। तदुक्तं सुश्रुते 'नर्ते देहः कफादस्ति न पित्ताच्च च मारुतात्। शोणितादपि वा नित्यं देह एतैस्तु धार्यते' इत्यादिप्रतिपादितत्वात्। कृमिस्तु गुग्गुलुकल्पे यथा पञ्चादि-

दोषान् शमयेदित्यादिप्रश्ने कृमिदोषनिबर्हणादित्यादिना, तन्मते कृमेस्तु दोषसंज्ञा। बलादिति स्वशक्तितः, उन्मूलयति उच्छेदयति, तच्छेदनं ज्ञेयं। यथा क्षारा यवक्षारादयः, मरिचानीति बहुवचनत्वेन श्वेतमरिचमपि ग्राह्यम्। ननु वातादिक्रमं परित्यज्य कफादिक्रमेण श्लोकः कस्मादिह कृतः? तदुच्यते, देहस्य ऊर्ध्वमूलत्वमधःशाखत्वं प्रतिपादितं पूर्वाचार्यैः, ऊर्ध्वभागे च कफाधिष्ठानत्वात्ततोऽनेन कफ एव प्रथमं दर्शितः। तदुक्तम्—'ऊर्ध्वमूलमधःशाखं त्रिस्थूणं पञ्चदैवतम्। क्षेत्रज्ञाधिष्ठितं विद्वान् यो वै वेद स वेदवित्' ॥ ९ ॥

**गू०**—यद्द्रव्यं श्लिष्टान् लग्नान् मलादिकान्दोषान् बलादुन्मूलयति स्वभावान्नाशयति तच्छेदनं ज्ञेयं। यथा क्षारा मरिचानि शिलाजतु ॥ ९ ॥

**दी०**—अथ लेखनमाह—

**धातून्मलान्वा देहस्य विशोष्योल्लेखयेच्च यत् ॥ १० ॥**
**लेखनं तद्यथा क्षौद्रं नीरमुष्णं वचा यवाः ।**

**दी०**—धातूनिति । यद्द्रव्यं धातून् रसादीन् मलान् वा। अत्र मलान्वेति यद्ग्रहणं कृतं तन्मनोदोषव्यवच्छेदार्थम्। यतो मनोदोषप्रतीकारकमन्यदप्यस्तीति। तथाहि 'धीर्धृतिर्ज्ञानविज्ञानं मनोदोषौषधं परम्' इति। के ते मनोदोषाः? इत्युत्तरमाह 'रजस्तमश्च मनसो द्वौ च दोषावुदाहृतौ' इत्यादि। एके—'लेखनं तद्यथा क्षौद्रनीरकोष्णं वचा यवाः' इति पठन्ति। तत्र क्षौद्रनीरे मध्वम्बुनी मिलिते इति योगो लेखनसंज्ञः, कोष्णमित्युष्णपानीयं 'कं शिरो जलमाख्यातं' इति वचनात्। उष्णं च तत्कं चेति कोष्णं अल्पस्वरत्वात् पूर्वनिपातः। अयं पाठः स्वकपोलकल्पनया केनाऽपि लिखितः यतो बहुपुस्तकेषु न दृश्यते। यवा इति बहुवचनग्रहणेन एवंगुणविशिष्टा अन्येऽपि बोद्धव्याः ॥ १० ॥

**गू०**—यद्द्रव्यं देहस्थान् धातून्मलान्विशोष्य शुष्कं कृत्वा लेखयेत् स्थूलस्य कृशादि कारयेत् तल्लेखनं। यथा क्षौद्रं उष्णं नीरं वचा यवाः ॥ १० ॥

**दी०**—अथ ग्राहिलक्षणमाह—

**दीपनं पाचनं यस्स्यादुष्णत्वाद्द्रवशोषकम् ॥ ११ ॥**
**ग्राहि तच्च यथा शुण्ठी जीरकं गजपिप्पली ।**

**दी०**—दीपनमिति । यद्द्रव्यं दीपनमग्निकरं—पाचनमामादीनां, द्रवशोषकमिति द्रवस्वरूपाणां दोषधातुमलादीनां शोषकमित्यर्थः, उष्णत्वात् उष्णवीर्यत्वात्। द्रवशोषकमिति योज्यं, दीपनादिकार्यकरत्वेन उपलक्षितमिति भावः। तद्ग्राहि विज्ञेयम्। यथा शुण्ठी जीरकं, गजपिप्पली, गजपिप्पली चव्यफलम्। ननु संग्राहकमनिलगुणभूयिष्ठं यतोऽनिलस्य शोषणात्मकत्वात्। तत्कथमुक्तमुष्णत्वादिति। उच्यते—पक्वामग्राहकत्वेन द्विविधं हि संग्राहकत्वं तत्र यद् ग्रहण्यामामं सम्पाच्य वह्निं कृत्वा तत्रस्थं द्रवं च शोषयित्वा स्तम्भनं करोति तदुष्णग्राहकं ज्ञेयम्। यद्द्रव्यमतीसारादौ पक्वमलादिकं संस्तभ्य संग्रहं करोति तच्छीतग्राहकं ज्ञेयमेतदनिलगुणभूयिष्ठमित्यदोषः ॥ ११ ॥

**गू०**—यद्द्रव्यं उष्णत्वाद् द्रवशोषकं दीपनं पाचनं स्यात् तद्ग्राहि यथा शुण्ठी जीरकं गजपिप्पली ॥ ११ ॥

**दी०**—अथ च तदेव स्तम्भनमाह—

**रौक्ष्याच्छैत्यात्कषायत्वाल्लघुपाकाच्च यद्भवेत् ॥ १२ ॥**
**वातकृत्स्तम्भनं तत्स्याद्यथा वत्सकटुण्टुकौ ।**

**दी०**—रौक्ष्यादिति । यद्द्रव्यं रौक्ष्यात्। रूक्षगुणत्वात्, शैत्यादिति शीतवीर्यत्वात्, कषायादिति कषायरसत्वात्, लघुपाकाच्च लघुपरिपाकाद्वातकृद्भवति तत् स्तम्भनं स्यात्। वातगुणसाधर्म्यं हेतुचतुष्टयम्। अनिलस्य शोषणात्मकत्वेनानिलगुणभूयिष्ठं द्रव्यं स्तम्भनं भवतीत्यभिप्रायः। यथा वत्सकटुण्टुकौ, यथेति दृष्टान्तत्वेनोपदर्शितम्। वत्सकः कुटजः, टुण्टुकः स्योनाकः। वातकृदित्यनेन कोष्ठवायोर्विष्टम्भकः। तस्मात् तद्द्रव्यं स्तम्भनं भवतीत्यर्थः ॥ १२ ॥

**गू०**—यद्द्रव्यं रौक्ष्याच्छैत्यात्कषायत्वात् लघुपाकाद्वातकृत् तत्स्तम्भनं स्यात्। यथा वत्सकटुण्टुकौ। वत्सकः कुटजः, टुण्टुकः स्योनाकः ॥ १२ ॥

**दी०**—अथ रसायनमाह—

**रसायनं च तज्ज्ञेयं यज्जराव्याधिनाशनम् ॥ १३ ॥**
**यथाऽमृता रुदन्ती च गुग्गुलुश्च हरीतकी ।**

**दी०**—रसायनं चेति । यद्द्रव्यं जराव्याधिनाशनं भवति तद्रसायनं ज्ञेयम्। रसादीनां धातूनामयनमाप्यायनरूपं रसायनम्। यथा अमृता गुडूची, रुदन्ती शाकभेदः पश्चिमे अतीव विख्यातः। गुग्गुलुः शालनिर्यासः प्रसिद्धः। हरीतकी प्रसिद्धा। जरा वार्धक्यं, व्याधयो ज्वरादयो रोगा ग्राह्याः। ननु व्याधिग्रहणेन जराग्रहणं तत् कथमत्र जरा पृथगभिहिता? उच्यते—जरा स्वाभाविकी ज्ञेया स्वभावकथनत्वेन पृथगभिधानमित्यदोषः। यतः सप्ततेरूर्ध्वं स्वभावतज्जवतीति ॥ १३ ॥

**गू०**—यद्द्रव्यं जराव्याधिनाशनं तत् रसायनं स्यात् । यथाऽमृता, रुदन्ती च, गुग्गुलुश्च, हरीतकी ( च ) ॥ १३ ॥

**दी०**—अथ वाजीकरणमाह—

**यस्माद्द्रव्याद्भवेत्स्त्रीषु हर्षो वाजीकरं च तत् ॥ १४ ॥**
**यथा नागबलाद्याः स्युर्बीजं च कपिकच्छुजम् ।**

**दी०**—यस्मादिति । यस्माद्द्रव्यात् स्त्रीषु स्त्रीपुरुषयोः हर्षः कामशक्तिसुरतसुखं भवेत् तद्वाजीकरं ज्ञातव्यम् । यथा नागबलाद्याः स्युरिति नागबला गाङ्गेरुकी आदिशब्दात् जातिफलाहिफेनभङ्गाप्रभृतीनां ग्रहणं । कपिकच्छुबीजमपि वाजीकरणं कपिकच्छुर्वानरी । द्विविधदृष्टान्तेनात्र द्विविधं वाजीकरणं सूचितम् । एकं वीर्यस्तम्भनरूपं अपरं वीर्यवर्धनमित्यनेन पौनरुक्त्याप्यदोषः ॥ १४ ॥

**गू०**—यस्माद्द्रव्यात् स्त्रीषु हर्षो भवेत् तत् वाजीकरं, यथा नागबलाद्याः स्युः, कपिकच्छुजं बीजं च ॥ १४ ॥

**दी०**—अथात्र तदेव वीर्यकरद्रव्यं प्रकटयन्नाह—

**यस्माच्छुक्रस्य वृद्धिः स्याच्छुक्रलं च तदुच्यते ॥१५॥**
**यथाऽश्वगन्धा मुसली शर्करा च शतावरी ।**

**दी०**—यस्मादिति । शुक्रलमिति शुक्रवृद्धिकरम् । शेषं सुबोधम् ॥ १५ ॥

**गू०**—यस्माद्द्रव्यात् शुक्रस्य वृद्धिः स्यात् तत् शुक्रलं स्यात् । यथा अश्वगन्धाद्या ज्ञेयाः ॥ १५ ॥

**दी०**—अथ शुक्रस्य जनकानि प्रवर्तकानि च द्रव्याण्याह—

**दुग्धं माषाश्च भल्लातफलमज्जामलानि च ॥ १६ ॥**
**प्रवर्तकानि कथ्यन्ते जनकानि च रेतसः ।**

**दी०**—दुग्धमिति । रेतसः शुक्रस्य दुग्धादीनि द्रव्याणि प्रवर्तकानि कथ्यन्ते । न केवलं प्रवर्तकानि उत्पादकराणि च कथ्यन्ते प्रभावात् । माषोऽन्नविशेषः, आमलानीति आमलकफलानि । शेषं प्रसिद्धम् ॥ १६ ॥

**दी०**—वाजीकरणानामौषधानां विशेषानाह—

**प्रवर्तनी स्त्री शुक्रस्य रेचनं बृहतीफलम् ॥ १७ ॥**
**जातीफलं स्तम्भकं च शोषणी च हरीतकी ।**

**दी०**—प्रवर्तनीति । शुक्रस्य वीर्यस्य प्रवर्तनी प्रकटकारिणी स्त्री कथितेत्यर्थः । रेचनं बृहतीफलमिति शुक्रस्येत्यत्रापि सम्बन्धः । बृहती बृहत्कण्टकारिका तस्याः फलम् । स्तम्भकमवरोधकरं जातीफलं भवति । अत्रापि वीर्यस्येति सम्बन्धः । शोषणी हीनकारिणी हरीतकी कथिता । चकारादत्रापि शुक्रस्येत्यर्थः । एके शोषणी च हरीतकीत्यस्य स्थाने कालिङ्गं क्षयकारि चेति पठन्ति व्याख्यानयन्ति च कालिङ्गं फलवर्तुलमिति ॥ १७ ॥

**गू०**—स्त्री शुक्रस्य प्रवर्तनी, यद्द्रव्यं तद्रेचनं यथा बृहतीफलं पुंसो नार्याः शुक्रस्य स्तंभनं जातीफलं स्यात्, कलिङ्गं ब्रह्मशीर्षं क्षयकारि स्यात् ॥ १७ ॥

**दी०**—अथ सूक्ष्मद्रव्यमाह—

**देहस्य सूक्ष्मछिद्रेषु विशेद्यत्सूक्ष्ममुच्यते ॥ १८ ॥**
**तद्यथा सैन्धवं क्षौद्रं निम्बतैलं रुबूद्भवम् ।**

**दी०**—देहस्येति । यद्द्रव्यं देहस्य शरीरस्य सूक्ष्मछिद्रेषु रोमकूपप्रभृतिषु विशेत् प्रवेशं करोति तत्सूक्ष्ममुच्यते । यथा सैन्धवादिकम् । सूक्ष्मो गुणविशेषः, स्रोतोनुसरणशीलत्वात् । सैन्धवं प्रसिद्धं क्षौद्रं मधु निम्बतैलं निम्बं च तैलं च, यद्वा निम्बस्य तैलं रुबूद्भवं तैलं च, रुबूद्भवमेरण्डसंभवम् ॥ १८ ॥

**गू०**—यद्द्रव्यं देहस्य सूक्ष्मच्छिद्रेषु विशेत् प्रविशेत् तत्सूक्ष्ममुच्यते । यथा सैन्धवं क्षौद्रं निम्बतैलं एरण्डतैलं ( च ) ॥ १८ ॥

**दी०**—अथ व्यवायिद्रव्यमाह—

**पूर्वं व्याप्याखिलं कायं ततः पाकं च गच्छति ॥१९॥**
**व्यवायि तद्यथा भङ्गा फेनं चाहिसमुद्भवम् ।**

**दी०**—व्यवायीति । व्यवायीति गुणविशेषः । अपक्कमेवाखिलं देहं व्याप्नोति पश्चान्मद्यविषयवत् पाकं याति । एवं भङ्गा, अहिफेनं च, अहिफेनं "अफू" शब्दवाच्यम् । अन्ये तु 'तदभावाय कल्पते' इति पठन्ति । तत्राऽपि स्थित्यै कल्पते नोर्ध्वमधो वा प्रवर्तेत इति स एवार्थः । अन्ये पुनर्भावशब्दमभिप्रायार्थमिच्छन्ति । तत्र नियतद्रव्यप्रभावेणात्मशक्त्यनुरूपं तद्द्रव्यं मद्यविषयवत् विशेषाभिप्राय कल्पते इत्यर्थः ॥ १९ ॥

**गू०**—यद्द्रव्यं पूर्वं अखिलं संपूर्णं कायं व्याप्य

१—'क्षीणत्व' पा० ।

पश्चात्पाकं गच्छति तद्व्यवायि । यथा भङ्गा अहिसमुद्भवं फेनम् ॥ १९ ॥

**दी०**—अथ विकाशिद्रव्यस्यापि किञ्चिद्भेदं दर्शयन्नाह—

**सन्धिबन्धांस्तु शिथिलान्यत्करोति विकाशि तत् ॥२०**
**विश्लेष्यौजश्च धातुभ्यो यथा क्रमुककोद्रवाः ।**

**दी०**—सन्धिबन्धानिति । यद्द्रव्यं सन्धिबन्धान् शिथिलीभूतान् करोति तद्विकाशि बोद्धव्यं, विकाशि इत्यपि गुणविशेषः, न केवलं सन्धिबन्धान् शिथिलान् करोति किन्तु धातुभ्य ओजो बलं विश्लेष्य विभज्य पाकं गच्छति इत्यध्याहारः । धातुशैथिल्यमपि करोति इत्यभिप्रायः । चकारादपक्वमेवेत्यत्रापि संबन्धः । क्रमुककोद्रवा इति । क्रमुकं पूगफलम्, कोद्रवं कुधान्यविशेषः । अतः क्रमुककोद्रवा मदकरा ज्ञेयाः । धातुशैथिल्यात् ओजो बलमिति । सुश्रुतेन तदुक्तम्—'रसादीनां शुक्रान्तानां धातूनां यत्परं तेजस्तत् खल्वोजस्तदेव बलमित्युच्यते' यतः—'देहः सावयवस्तेन व्याप्तो भवति देहिनाम्' इति । सन्धिप्रभृतीनां शिथिलत्वेन श्रमाणां चोत्पद्यते तेन ओजःक्षयो भवतीत्यभिप्रायः । अत एवाह कश्चित्—'अभिघातात्क्षयात्कोपाद्ध्यानाच्छोकाच्छ्रमात् क्षुधः । ओजः संक्षीयते ह्येभ्यो धातुग्रहणनिःसृतम्' इति । अन्ये तु सविशेषो व्यवायी तीक्ष्णविशेषो विकाशीति ब्रुवते, तन्न सर्वमतम् ॥ २० ॥

**गू०**—यद्द्रव्यं धातुभ्यः ओजः वीर्यं विश्लेष्य सन्धिबन्धान् शिथिलान् करोति तद्विकाशि यथा क्रमुकः, पूगीफलं, कोद्रवाश्च ॥ २० ॥

**दी०**—अथ मदकारिद्रव्यस्य लक्षणानि दर्शयन्नाह—

**बुद्धिं लुम्पति यद्द्रव्यं मदकारि तदुच्यते ॥ २१ ॥**
**तमोगुणप्रधानं च यथा मद्यं सुरादिकम् ।**

**दी०**—बुद्धिमिति । यद्द्रव्यं बुद्धिं ज्ञानविषयं लुम्पति आच्छादयति तन्मदकारि कथ्यते, अत एव तमोगुणप्रधानं तमोगुणबहुलमित्यर्थः । यथा सुरादिकं मद्यादिकम् । बुद्धिस्तु मेधाधृतिस्मृतिमतिप्रतिपत्तिषु वर्तते । एतेषां लक्षणं प्रसङ्गादुच्यते । तद्यथा मेधा ग्रन्थाकर्षणसामर्थ्यं, धृतिः सन्तुष्टिः,अन्ये नियमात्मिकां बुद्धिमाहुः । स्मृतिः पूर्वानुभूतस्य स्मरणम् । अर्थधारणाशक्तिरित्यन्ये । मतिरनागतविषयोपदेशः, त्रिकालविषया बुद्धिरित्यन्ये; प्रतिपत्तिरर्थावबोधप्रागल्भ्यमिति । सुरादिकमित्यादिग्रहणात् सर्वे मद्यविकारा गृह्यन्ते । ननु-मद्यं तु बुद्धिस्मृतिवाग्विचेष्टादिकरमुक्तम् । तदुक्तं—'बुद्धिस्मृतिप्रीतिकरः सुखं च पानान्ननिद्रारतिवर्धनं च । सम्पाठगीतस्वरवर्धनं च प्रोक्तोऽतिरम्यः प्रथमो मदो हि' तत् कथं बुद्धिलोपकमभिहितम् ?, उच्यते—मदस्य चत्वारः पानावस्थाः कथिताः तत्र प्रथमं मद्यपानं बुद्ध्यादिकं करोति, शेषास्तु बुद्ध्यादिकं लुम्पन्तीत्यदोषः । तदुक्तं माधवेन—'अव्यक्तबुद्धिस्मृतिवाग्विचेष्टः सोन्मत्तलीलाकृतिरप्रशान्तः । आलस्यनिद्राभिहितो मुहुश्च मध्येन मत्तः पुरुषो मदेन' इत्यादि ॥ २१ ॥

**गू०**—यद्द्रव्यं बुद्धिं लुम्पति तन्मदकारि उच्यते । यथा तमोगुणप्रधानं मद्यं सुरा ॥ २१ ॥

**दी०**—अथ प्राणहरद्रव्यमाह—

**व्यवायि च विकाशि स्यात्सूक्ष्मं छेदि मदावहम्॥२२॥**
**आग्नेयं जीवितहरं योगवाहि स्मृतं विषम् ।**

**दी०**—व्यवायि चेति । यद्द्रव्यं व्यवायादिगुणयुक्तं भवति तज्जीवितहरं प्राणहरं स्मृतं कथितम् । यथा विषम् । तदेव योगवाहि स्मृतमित्यर्थः । व्यवायीति समस्तदेहं व्याप्य पश्चात् पाकं गच्छतीति व्यवायी गुणः, विकाशी गुणश्च सकलदेहं व्याप्य धातुशैथिल्यं करोति । सूक्ष्मो गुणस्तु सूक्ष्मात् सूक्ष्मेषु स्रोतस्स्वनुसरः स्मृतः । छेदनं मनोदोषधातुमलादीन् बलादुन्मूलयति तच्छेदि कथितम् । मदावहमिति मदकारकम् । आग्नेयमित्याग्नेयगुणभूयिष्ठम् । योगवाहीति रसादिषु द्रष्टव्यम् ॥ २२ ॥

**गू०**—जीवितहरं जीवनाशकं यद्द्रव्यं तदखिलकायव्यापकत्वात् व्यवायि सन्धिबन्धशिथिलकारित्वात् । विकाशि स्यात्, सूक्ष्मं मदावहं स्यात्, छेदि[1] स्यात्, आग्नेयं च स्यात्, यथा योगवाहि स्मृतं विषम् ॥२२॥

**दी०**—अथ प्रमाथिद्रव्यमाह—

**निजवीर्येण यद्द्रव्यं स्रोतोभ्यो दोषसंचयम् ॥ २३ ॥**
**निरस्यति प्रमाथि स्यात्तद्यथा मरिचं वचा ।**

**दी०**—निजवीर्येणेति । यद्द्रव्यं निजवीर्येण स्वप्र-

१—छेदनम् पा.

भावेण कृत्वा स्रोतोभ्यः कर्णमुखनासादीनां अन्यविवरेभ्यश्च वा दोषबाहुल्यं निरस्यति तत् प्रमाथिसंज्ञं कथितम्। यथा मरिचं वचा। दोषशब्दोऽत्र व्याधिष्वपि वर्तते कारणे कार्योपचारात्, तेन व्याधिसञ्चयमपीत्यर्थः॥ २३॥

**गू०**—यद्द्रव्यं निजवीर्येण स्वप्रभावेण स्रोतोभ्यः रसवाहिशिरामार्गेभ्यः दोषसंचयं निरस्य दूरीकरोति तत्प्रमाथि स्यात्। यथा मरिचं वचा॥ २३॥

**दी०**—अथाभिष्यन्दिलक्षणमाह—

**पैच्छिल्याद्गौरवाद्द्रव्यं रुद्ध्वा रसवहाः शिराः॥ २४॥**
**धत्ते यद्गौरवं तत्स्यादभिष्यन्दि यथा दधि॥**

इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायां सूत्रस्थाने दीपनपाचनाऽध्यायश्चतुर्थः।

---

**दी०**—पैच्छिल्यादिति। यद्द्रव्यं पैच्छिल्यात् पिच्छिलगुणयोगात्, गौरवात् गुरुगुणयोगात्, गुरुपाकस्वभावाद्वा रसवहाश्चतुर्विंशतिसंख्याकाः शिराः रुध्वा संरुध्य गौरवं गुरुतां धत्ते तदभिष्यन्दि कथितम्। यथा दधि अभिष्यन्दीति। श्लेष्मप्रकोपीति रूढिः गुणसाधर्म्यात् श्लेष्माऽपि पिच्छिलगौरवादिगुणयुक्तः॥ २४॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां प्रथमखण्डे दीपनपाचनादिविधिरध्यायश्चतुर्थः॥

## इति सूत्रस्थानम्॥

---

**गू०**—यद्द्रव्यं पैच्छल्याच्चैकण्यात् गौरवात् रसवहाः शिरा रुध्वा गौरवं धत्ते तदभिष्यन्दि स्यात्। यथा दधि॥ २४॥

इति श्रीकाशीरामवैद्यविरचितायां गूढार्थप्रदीपिकायां सूत्रस्थाने दीपनपाचनादिगुणोक्तिविधिर्नामाध्यायश्चतुर्थः।

---

## ( शारीरम् )

## अथ कलादिकाख्यानाध्यायः॥

**दी०**—पूर्वमुक्तं कलादिकाख्यान इति। अतस्तद्दर्शयन्नाह—

**(धात्वाशयान्तरस्थस्तु यः क्लेदस्त्वधितिष्ठति।**
**देहोष्मणा विपक्वो यः सा कलेत्यभिधीयते॥१॥)**
**कलाः सप्ताशयाः सप्त धातवः सप्त तन्मलाः।**
**सप्तोपधातवः सप्त त्वचः सप्त प्रकीर्तिताः॥ १॥**
**त्रयो दोषा नवशतं स्नायूनां संधयस्तथा।**
**दशाऽधिकं च द्विशतमस्थ्नां च त्रिशतं तथा॥२॥**
**सप्तोत्तरं मर्मशतं शिराः सप्तशतं तथा।**
**चतुर्विंशतिराख्याता धमन्यो रसवाहिकाः॥ ३॥**
**मांसपेश्यः समाख्याता नृणां पञ्चशतं बुधैः।**
**स्त्रीणां च विंशत्यधिकाः कण्डराश्चैव षोडश॥४॥**
**नृदेहे दश रन्ध्राणि नारीदेहे त्रयोदश।**
**एतत्समासतः प्रोक्तं विस्तरेणाधुनोच्यते॥ ५॥**

**दी०**—कला इति। कलादि—प्रतीनानामेतन्नामसंख्याकथनम्। समासतः संक्षेपात्। प्रोक्तं कथितमित्यर्थः। तद्यथा—कलाः सप्तसंख्याकाः ताश्च धात्वाशयान्तरमर्यादाः। तथाहि—'धात्वाशयान्तरैस्तस्य यत्क्लेदस्त्वधितिष्ठति। देहोष्मणा विपक्वो यः सा कलेत्यभिधीयते॥' इति। आशयाः सप्त, आशयाः स्थानानि तानि कोष्ठशब्देनोपलक्षितानि; तथाहि—'स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च। हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते॥' इति। धातवः सप्त कथिताः, धातवो रसादयः, ते—'रसाऽसृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः' इति। सप्त तन्मला धातुमलाः, तेषां धातूनां प्रतिपाकतः कफादिसंज्ञा इत्यर्थः। सप्तोपधातव इति। धातुसमीपे भवा उपधातवः, यथा गोमयादिभ्यो वृश्चिकादिसंभवः, ते स्तन्यरजःप्रभृतयः। त्वचः सप्त प्रकीर्तिताः इति शुक्रशोणितस्याभिपच्यमानक्षीरस्येव सन्तानिकाः सप्त त्वचो भवन्ति। त्रयो दोषाः वातपित्तकफसंज्ञाः, धात्वादीन् दूषयन्तीति। सन्धिरवयवादीनां सन्धानं। ग्रन्थिरिति लोके। अत्र चकारग्रहणात् दशोत्तरशतद्वयादपि अधिका बोद्धव्याः। तदुक्तम्—'ज्ञेयं चिकित्सकैर्नूनं सन्धीनां च शतद्वयम्। दशोत्तरं सहस्रे द्वे निजगादाऽत्रिनन्दनः' इति। अस्थ्नां च त्रिशतं मत-

---

१—प्रक्षिप्तमिदम्। २—'रन्ध्राणां' पा.। ३—चरके पुरीषान्त्रशब्दोपलक्षित उण्डुकः प्रतिपादितः। ४—दधिमिश्रितगोमयेनेति तात्पर्यम्।

मिति । अस्थि सारभूतं शरीरस्याधाररूपं च कथितम् । सप्तोत्तरं मर्मशतमिति । मर्माणि जीवस्याधाररूपाणि तानि सप्ताऽधिकशतसंख्यानि । तथा शिराः सप्तशतानि चेति । दोषधातुजलवाहिन्यः शिराः कथिताः, चकारादत्र न च सप्तशतं नियतम् अन्याश्च सन्तीत्येके भाषन्ते; तदुक्तं—"द्विसप्ततिसहस्राणि नाडीनां तद्विनिर्गताः । ताभ्यो विनिर्गता नाड्यस्ताभ्योऽथान्याः पुनः पुनः ॥ तावत्यो नाड्यो देहे यावत्यो रोमकूपकाः । स्थूलमूलाः सुसूक्ष्माग्राः पत्ररेखाप्रतानवत्" इति । धमन्यो नाडीविशेषाश्चतुर्विंशतिसंख्यकाः कथितास्ताश्च रसवहा ज्ञेयाः, शिरा धमन्यो नाड्यश्च परस्परपर्यायवाचका ज्ञेयाः, भिन्नत्वमासां कार्यत्वात् । मांसपेश्य इति—नृणां पुरुषाणां मांसपेश्यः पञ्चशतसंख्यकाः समाख्याताः । बुधैरितिशेषः । पेशी दीर्घाकृतिमांसखण्डः, अपरैश्चतुरस्रा पेशीत्युच्यते । तथाचोक्तम् 'चतुरस्रा भवेत् पेशी वृत्तः पिण्डो[1] घनः स्मृतः । शाल्मलीमुकुलाकारामर्बुदं परिचक्षते' इति । स्त्रीणां विंशत्यधिका इत्यनेन मांसपेश्यः कथिताः, अधिकाश्च पञ्चशतात्, तेन विंशत्यधिकपञ्चशतमांसपेश्यः स्त्रीणां भवन्तीत्यभिप्रायः । विंशतेर्विवरणमाह—स्तनयोः पञ्च पञ्च, चतस्रश्च योनौ, गर्भमार्गे तिस्रः, गर्भाशये च तिस्र इति । कण्डराश्चैव षोडशेति—कण्डरा महास्नायुः । षोडशेति षोडशसंख्यकाः । तद्यथा—चतस्रः पादयोः, हस्तयोश्चतस्रः, ग्रीवायां चतस्रः, पृष्ठे चतस्रः । नृदेहे दश रन्ध्राणि । नारीदेहे त्रयोदशेति । नृदेहे पुरुषशरीरे दशसंख्यकानि रन्ध्राणि छिद्राणि सन्तीत्यध्याहार्यम् । नारीदेहे स्त्रीशरीरे त्रयोदश रन्ध्राणीति भावः । तान्यग्रे वक्ष्यमाणानि ज्ञातव्यानि । एतत् सर्वं कलादिकं समासतः संक्षेपात् प्रोक्तं कथितमित्यर्थः ॥ १–५ ॥

**गू०**—अधुना सर्वलक्षणसम्पन्नं कलाद्यं शारीरं व्याख्यास्यामः । नृदेहे सप्त कलाः सन्ति, सप्त आशयाः सन्ति, सप्त धातवः सन्ति, तन्मलाः तेषां धातूनां सप्तोपधातवः सन्ति, सप्त त्वचः प्रकीर्तिताः । देहे त्रयः दोषाः सन्ति, नवशतं स्नायूनां सन्धयः सन्ति । तथेत्युक्तत्वात् दशाधिकं स्नायवः सन्ति, तास्तु स्नायूनां सन्धय उक्ताः, देहे अस्थिसंग्रहं त्रिशतं, देहे सप्तोत्तरं शतं मर्मस्थलमस्ति, तथा शिरा सूक्ष्मा नाडी सप्तसप्तशतमस्ति, नृदेहे रसवाहिका धमन्यः चतुर्विंशतिः आख्याताः कथिताः । अत्र शिरास्नायुधमनीनां भेदोस्ति स्वकर्मकर्तृत्वात् । नृणां देहे मांसपेश्यः मांसग्रन्थयः बुधैः पञ्चशतं समाख्याताः । स्त्रीणां देहे मांसपेश्यः विंशत्यधिका आख्याताः । देहिनां देहे कण्डरा महानाड्यः षोडश समाख्याताः । नृदेहे दश रन्ध्राणि सन्ति नारीदेहे त्रयोदश रन्ध्राणि छिद्राणि सन्तीत्यर्थः । एतत्कलादिकं समासतः प्रोक्तं विस्तरेण अधुना उच्यते ॥ १–५ ॥

नरकङ्कालः ( अग्रतो दृष्टः ) ।



१ 'पिण्डौघ' पा०

मस्तिष्कः ।



मेरुदण्डः ।



४-वृक्कौ ।

अस्थिप्रदर्शनम् ।



## अथ सप्त कलाः ।

**दी०**—अथ 'विस्तरेणाऽधुनोच्यत' इत्युक्तम् प्राक् इदानीं विस्तरमेतेषां दर्शयन्नाह—

---

१—कलास्वरूपं—'स्नायुभिश्च प्रतिच्छन्नान्सन्ततांश्च जरायुणा । श्लेष्मणा वेष्टितांश्चापि कलाभागांस्तु तान् विदुः ॥ धात्वाशयान्तरे धातुर्यः क्लेदस्त्वधितिष्ठति । देहोष्मणाभिपक्वश्च सा कलेत्यभिधीयते ॥' इति ।

**मांसासृङ्मेदसां तिस्रो यकृत्प्लीह्नोश्चतुर्थिका ।**
**पञ्चमी च तथाऽन्त्राणां षष्ठी चाग्निधरा मता ॥ ६ ॥**
**रेतोधरा सप्तमी स्यादिति सप्त कलाः स्मृताः ।**

मांसेति । मांसासृङ्मेदसां तिस्रः कलाः, तासां संज्ञा यथा—मांसधरा, रक्तधरा, मेदोधरा इति चतुर्थिका यकृत्प्लीह्नोः सा श्लेष्मधरा यकृत्प्लीह्नोर्मध्ये इत्यभिप्रायः । पञ्चमी कला चान्त्राणां सा पुरीषधरा । षष्ठी चाग्नेः सा पित्तधरा । सप्तमी कला रेतोधरा इति सप्त कलाः स्मृताः कथिताः । तदुक्तं सुश्रुते—"तासां प्रथमा मांसधरा नाम यस्यां मांसे शिरास्नायुधमनीस्रोतसां प्रताना भवन्ति । यथा विसमृणालानि विवर्धन्ते समन्ततः । भूमौ पङ्कोदकस्थानि तथा मांसे शिरादयः ॥" इति । ननु रसाद्रक्तं ततो मांसमित्यादिक्रमः तत्कथं प्रागेव मांसधरा कथिता ? उच्यते—शरीरपोषणार्थं रसादिक्रमोऽयं ननु धारणे । अतएव मांसधरत्वेन पूर्वं प्रतिपाद्य कला निर्दिष्टाः परस्परानुग्रहात् । द्वितीया रक्तधरा (नाम)मांसस्याभ्यन्तरतस्तस्यां शोणितं विशेषतश्च शिरास्नायुयकृत्प्लीह्नोश्च भवति । "वृक्षाद्यथाभिप्रहतात् क्षीरिणः क्षीरमावहेत् । मांसादेवं क्षतात् क्षिप्रं शोणितं संप्रसिच्यते" इति । तृतीया मेदोधरा (नाम,) मेदो हि सर्वभूतानामुदरस्थमण्वस्थिषु च महत्सु च मज्जा भवति । "स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तराश्रितः । अथेतरेषु सर्वेषु सरक्तं मेद उच्यते' इति ॥ चतुर्थी श्लेष्मधरा नाम सर्वसन्धिषु प्राणभृतां भवति । स्नेहाभ्यक्ते यथा ह्यक्षे चक्रं साधु प्रवर्तते । सन्धयः साधु वर्तन्ते संश्लिष्टाः श्लेष्मणा तथा ॥' इति । पञ्चमी पुरीषधरा (नाम) याऽन्तःकोष्ठे मलमभिविभजते पक्वाशयस्था । "यकृत् समन्तात् कोष्ठं च तथाऽन्त्राणि समाश्रिता उण्डुकस्थं विभजते मलं मलधरा कला ॥" इति । षष्ठी पित्तधरा नाम या चतुर्विधमन्नपानमुपयुक्तमामाशयात् प्रच्युतं पक्वाशयोपस्थितं धारयति । "अशितं खादितं पीतं लीढं कोष्ठगतं नृणाम् । तज्जीर्यति यथाकालं शोषितं पित्ततेजसा ॥" इति । सप्तमी शुक्रधरा (नाम) या सर्वप्राणिनां सर्वशरीरव्यापिनी । "यथा पयसि सर्पिस्तु गूढश्चेक्षौ रसो यथा । शरीरेषु तथा शुक्रं नृणां विद्याद्भिषग्वरः । द्व्यङ्गुले दक्षिणे पार्श्वे बस्तिद्वारस्य चाप्यधः । मूत्रस्रोतःपथाच्छुक्रं पुरुषस्य प्रवर्तते । कृत्स्नदेहाश्रितं शुक्रं प्रसन्नमनसस्तथा । स्त्रीषु व्यायच्छतश्चापि हर्षात् तत्सम्प्रवर्तते ॥" ॥ ६ ॥

गू०—मांसासृङ्मेदसां तिस्रः कलाः, यकृत्प्लीह्नोरेतयोर्द्वयोश्चतुर्थीकला, आन्त्राणां पञ्चमी कला, षष्ठी कला अग्निधरा मता स्मृता, रेतोधरा सप्तमी कला स्यात् इत्यनेन क्रमेण सप्त कलाः स्मृताः कथिताः । तर्हि कला का ? मांसासृङ्मेदसां सीमा कलाः, रञ्जकपित्तस्य स्थानं यकृत्, रक्तवाहिनी या शिरा तस्याः मूलं प्लीहा ॥ ६ ॥

पक्वाशयः ।



पक्वाशयः, यकृत्, पित्ताशयान्त्राणि ॥



अन्नस्य पक्वाशये संचारक्रमः ।




गर्भाशयः

( इह बाह्यतो दृष्टः ) ।




गर्भाशयः (आभ्यन्तरादृष्टः) ।




टी०—इदानीं सप्ताऽशयानाह—

श्लेष्माशयः स्यादुरसि तस्मादामाशयस्त्वधः ॥ ७ ॥
ऊर्ध्वमग्न्याशयो नाभेर्वामभागे व्यवस्थितः ।
तस्योपरि तिलं ज्ञेयं तदधः पवनाशयः ॥ ८ ॥
मलाशयस्त्वधस्तस्माद्बस्तिर्मूत्राशयस्त्वधः ।
जीवरक्ताशयमुरो ज्ञेयाः सप्ताशयास्त्वमी ॥ ९ ॥
पुरुषेभ्योऽधिकाश्चान्ये नारीणामाशयास्त्रयः ।
धरा गर्भाशयः प्रोक्तः स्तनौ स्तन्याशयौ मतौ ॥ १० ॥

टी०—श्लेष्माशय इति । उरसि वक्षस्थले श्लेष्माशयः, आशयोऽधिष्ठानं तद्विशिष्टस्थानं कफस्येत्यर्थः । तस्मात् श्लेष्माशयादधः आमाशयः, आमोपरि पक्वाहारः तस्याऽशयः स्थानमित्यर्थः । स एव स्तनान्तरात् किञ्चिदधो ज्ञातव्यः; तथाचोक्तम्—"नाभिस्तनान्तरं जन्तोरामाशय उदाहृतः ।" नाभेरूर्ध्वमग्न्याशयः स एव ग्रहणीस्थानं कथितम् । "अग्न्यधिष्ठानमन्नस्य ग्रहणाद् ग्रहणी मता । नाभेरुपरि स ह्यग्निबलोपस्तम्भवाहि च" इति वचनात् । वामभागे व्यवस्थित इति सोऽप्यग्न्याशयस्तु नाभेर्वामभागे आश्रित इत्यर्थः । वामभागे पुरुषस्य इति व्याख्यानं वा ।

तस्योपरि तिलं ज्ञेयम् । तिलमित्यनेन क्लोम कथितम् तत्पिपासास्थानमित्यभिप्रायः । अत एव जलवाहि-शिरामूलं तिलमित्युक्तमाचार्येण । एके तस्योपरि जलं ज्ञेयमित्येवं पठन्ति व्याख्यानयन्ति च । तथाह्युक्तम् —"अग्नेरूर्ध्वं जलं स्थाप्यं तदन्नं च जलोपरि । अग्नेरधः स्वयं वायुः स्थितोऽग्निं धमते शनैः ॥ वायुना-धममानोऽग्निरत्युष्णं कुरुते जलम् । तदन्नमुष्णतोयेन समन्तात् पच्यते शनैः" इति । तदधः पवनाशय इति । तत् तस्याग्न्याशयस्याधः पवनाशयो वायोः स्थानमित्यर्थः । तस्य वायोः समान इति संज्ञा । मलाशयस्त्वधस्तस्येति । तस्य पवनाशयस्याधो मला-शयः स च पक्वाशयः कथितः । तस्यैकदेशे वा विभक्तमलधारक उण्डुको विद्यते अतएवोण्डुकात् पक्वाशयो भिन्नः इति डुं (तु) डुक, पोह (ट) लकः इति लोके । चरके तु पुरीषाधारशब्देनोण्डुकः प्रति-पादितः इति । बस्तिर्मूत्राशयः स्मृत इति अत्रापि पवनाशयस्याधः इति संबन्धः । बस्तिस्तु चर्मखल्लाट-काकारो मूत्राधारः स च पक्वाशयसमीपे स्थितः । जीवरक्ताशय इति—'जीवतुल्यं रक्तं, तस्याशयस्थानं तच्च 'प्लीहा' इति प्रसिद्धं हृदयस्य वामभागाश्रितं भवति । अतएव जीवरक्ताशयमुर इति प्रतिपादितं ज्ञेयं सप्ताशयास्त्वमी इति अमी पूर्वोक्ताः सप्ताशया बोद्धव्याः। तदुक्तं वाग्भटेन—"ताः सप्त सप्त चाधारा रक्तस्याद्याः क्रमात् परे । कफामपित्तपक्वानां वायोर्मूत्रस्य च स्मृताः" इति । नारीणामाशयास्त्रय इति पुरुषाशयेभ्योऽधिकाः स्त्रीणां त्रय एवाशया विज्ञेया एको गर्भाशयः, द्वौ स्तन्याशयौ च । गर्भाशयश्च पक्वाशयान्तरे वर्तते, स्तन्याशयौ क्षीराशयौ ॥ ७-१० ॥

**गू०**—आशयानाह—श्लेष्माशय उरसि स्यात्, तस्मादुरसः आमाशयः अधः स्यात्, पुंसः वामभागे नाभेरूर्ध्वं अग्न्याशयः स्थितः अस्ति, तस्याग्न्याशयोपरि तिलं पाचकपित्तं ज्ञेयं, तस्य तिलस्याधः पवनाशयो ज्ञेयः, तस्य वायोः अधः मलाशयो ज्ञेयः, मूत्राशयः मूत्र-स्थलं बस्तिर्ज्ञेयः जीवरक्ताशयः उरो ज्ञेयः जीवरक्तस्य य आशयः जीवरक्ताशयः जीवरक्तस्थानमित्यर्थः । अमी श्लेष्माद्याः सप्ताशया ज्ञेयाः, पुरुषेभ्यः नारीणां त्रय आशया अधिकाः सन्ति तानाह—एकस्तु धरा गर्भाशयः, द्वावाशयौ स्तनौ मतौ किंविशिष्टौ स्तन्याशयौ दुग्धस्या-

१—नास्ति 'क' पुस्तके.

धारौ आवर्तौ योनिस्तस्या यः तृतीय आवर्तः चक्राकारः स एव गर्भाशयः । सुश्रुतेऽप्युक्तम् "शङ्ख-नाभ्याकृतिर्योनिस्त्र्यावर्तः सा प्रकीर्तिता । तस्यास्तृतीये त्वावर्ते गर्भशय्या प्रकीर्तिता ॥ ७-१०" ॥

**दी०**—अथ धातूनां सप्तसंख्याविवरणं दर्शय-न्नाह—

**रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः ।**
**जायन्तेऽन्योन्यतः सर्वे पाचिताः पित्ततेजसा ॥११॥**
**(रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते ।**
**मेदसोऽस्थि ततो मज्जा मज्जायाः शुक्रसंभवः ॥१२॥**

**दी०**—रसेति । रसादयः सर्वे धातवः पित्ततेजसा प्रतिधात्वाग्निना पाचिताः परिपाच्यमाना अन्योन्यतः परस्परानुग्रहाज्जायन्ते उत्पद्यन्त इति भावः । तदु-क्तम्—'रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते । मेदसोऽस्थि ततो मज्जा मज्जायाः शुक्रसंभवः' इति । परिणामस्त्रिविध एव धातूनां मलस्थूलाणुभागविशे-षेण भवति । तद्यथा—अन्नात् पच्यमानाद्विण्मूत्रं मलः सारो रसः । रसादग्निपक्वात् मलं कफः स्थूलो भागो रसः, सूक्ष्मभागो रक्तम् । रक्तादग्निपक्वात् मलं पित्तं, स्थूलभागः शोणितम्, अणुभागो मांसमिति । मांसादग्निपच्यमानात् मलः श्रोत्रनासाप्रजननादि स्रोतो-मलं, स्थूलो भागो मांसं, सूक्ष्मभागो मेदः, ततोऽ निजवह्निपच्यमानान्मलः स्वेदः, स्थूलोंऽशो मे सूक्ष्मभागोऽस्थि । ततोऽपि पच्यमानात् मलः केश मश्मश्रूणि, स्थूलोऽस्थि, सूक्ष्मस्तु मज्जा । ततो मज्ज पावकपच्यमानादपि मलो नयनपुरीषत्वचां स्नेहः, स्थूलो भागो मज्जा, सूक्ष्मभागः शुक्रः । ततः पुनः पच्यमा-नादपि मलो नोत्पद्यते । स हि सहस्रधाध्मातः सुवर्ण-वत् स्थूलो भागः । शुक्रमेव स्नेहभागसूक्ष्मस्तेजोभूतं ओज इति ॥ ११-१२ ॥

**गू०**—अथ धातवः । रसादयः सप्तैते धातवः पित्त-तेजसा पाचिताः सन्तः सर्वेऽन्योन्यतः जायन्ते उत्प-द्यन्ते । तानाह—भक्षितस्तु नोपद्रवत्वं प्राप्तं तं रसवा-हिन्यो नाड्यः हृत्स्थानीयवायुना प्रधमन्ति तत्र हृदय यपित्तं तद्रसं परिपाच्य रक्तत्वं नयन्ति रक्ततो म भवति (मांसान्मेदो भवति) मेदतोऽस्थि भवति, अ

१—प्रक्षिप्तमिदम् । २—'मज्ज्ञः शुक्रं तु जायते' पाठान्तरम् ।

मज्जा भवति मज्जायाः शुक्रं भवति एवं सप्त धातवः जायन्त इत्यर्थः ॥ ११-१२ ॥

दी०—इदानीं मलानाह—

**जिह्वानेत्रकपोलानां जलं पित्तं च रञ्जकम्।**
**कर्णविड्रसनादन्तकक्षामेढ्रादिजं मलम् ॥ १३ ॥**
**नखनेत्रमलं वक्त्रे स्निग्धत्वं पिडिकास्तथा।**
**जायन्ते सप्तधातूनां मलान्येतान्यनुक्रमात् ॥ १४ ॥**
**कफः पित्तं मलं खेषु प्रस्वेदो नखरोम च।**
**नेत्रविट् त्वक्षु च स्नेहो धातूनां क्रमशो मलाः॥१५॥**

दी०—जिह्वेति। सप्तधातूनां रसादीनां एतानि मलान्यनुक्रमाज्जायन्ते। जिह्वानेत्रकपोलानां जलमिति। तेन जिह्वाजलं नेत्रजलं। जलमत्र कफद्रवमेतद्रसस्य मलमिति भावः। रञ्जकं पित्तं रक्तस्य मलं रञ्जकं रसस्य रागकरमित्युक्तत्वात्। कर्णविट् मांसस्य मलं नासामलं चेत्यन्ये। रसनादन्तकक्षामेढ्रादिजं मलं मेदसः। आदिग्रहणात् स्वेदमपि केचित्, न स्वमतं, यतः स्वेदस्तु उपधातुषु पतित एव नखा इति अस्थ्नां मलं नखा इति बहुवचनत्वेन केशलोमादीनां ग्रहणम्। (नेत्रमलं वक्त्रस्निग्धता च मज्ज्ञो मलं) नेत्रमलं नयनपुरीषम्। पिण्डिका इति शुक्रस्य। पिण्डिकात्र यौवनोद्भवा। तथेति ग्रहणात् श्मश्रूण्यपि गृह्यन्ते यतः आकुष्माण्डाकोषस्य पुंसः श्मश्रुपातात् श्मश्रु शुक्रमलमित्येके। अपरे षडेव मलान् यथाक्रमं कथयन्ति। ते तु नेत्रमलं वक्त्रस्निग्धत्वं पिण्डिकादिकं च मज्ज्ञो मलमिति व्याख्यानयन्ति। तदुक्तं 'किट्टमन्नस्य विण्मूत्रं रसस्य तु कफोऽसृजः। पित्तं मांसस्य तु मलं खेषु स्वेदस्तु मेदसः ॥ नखरोमस्थ्नस्तु लोमाद्या मज्ज्ञः स्नेहोऽक्षिविट्त्वचः। प्रसादः किट्टधातूनां पाकादेव विवर्धते ॥ शुक्रस्यातिप्रसन्नत्वान्मलाभाव इति स्मृतिः।" इति ॥ १३-१५ ॥

गू०—अथ सप्तधातूनां मलाः। जिह्वानेत्रकपोलानां यद्रञ्जकं कान्तिकरं पित्तं तदेव रसमलं, किंविशिष्टं पित्तं जलं द्रवरूपं, अथवा जिह्वानेत्रकपोलयोर्यद्रञ्जकं कांतिदं, पुनः किंविशिष्टं पित्तं द्रवत्वात्पित्तरूपं कर्णविट् कर्णमलं रक्तमलं, रसनादन्तमलं मांसमलं, कक्षामेढ्रादिजं मलं मेदोमलं, नखमस्थिमलं, नेत्रमलं मज्जामलं, वक्त्रस्निग्धत्वं पिडिकाश्च शुक्रमलं, वक्त्रपिडिका यौवनपिडिकाः नवमनुक्रमात् सप्तधातूनां मलानि जायन्ते यथा रसासृङ्मांसादीनि तद्वदिदमपि ॥ १३-१५ ॥

मू०—अथ सप्तोपधातवः—

**स्तन्यं रजश्च नारीणां काले भवति गच्छति।**
**शुद्धमांसभवः स्नेहः सा वसा परिकीर्तिता ॥ १६ ॥**
**स्वेदो दन्तास्तथा केशास्तथैवौजश्च सप्तमम्।**
**इति धातुभवा ज्ञेया एते सप्तोपधातवः ॥ १७ ॥**
**ओजः सर्वशरीरस्थं शीतं स्निग्धं स्थितं मतम्।**
**सोमात्मकं शरीरस्य बलपुष्टिकरं मतम् ॥ १८ ॥**

दी०—इदानीमुपधातूनामपि विवरणं दर्शयन्नाह—स्तन्यमिति। स्तन्यादयः सप्तोपधातवो धातुभवा बोद्धव्याः। स्तन्यं क्षीरं रसस्योपधातुः, रजश्चार्तवो धातुः एतद्द्वयंच स्त्रीणां काले समये भवति गच्छति च। तथा च रोमराज्यादयश्चाविशेषा नारीणां कालान्तरेणाभिव्यक्तिं गच्छन्ति इति संबन्धः। अत्रादिशब्दात् स्तन्यार्तवादयो गृह्यन्ते। आर्तवमपि तन्त्रान्तरे यथा—'रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्तते। तद्वर्षाद्द्वादशादूर्ध्वं याति पञ्चाशतः क्षयम् ॥' इति। शुद्धमांसभवः स्नेहो मांसस्योपधातु एषः एव वसा कथिता शुद्धमांसस्थूलभावप्राप्तमांसमिति भावः। तत्रस्थो यः स्नेहः स एव च वसाशब्दवाच्यः। 'मांसस्नेहो वसा मता' इति वचनात्। स्वेदो मेदस उपधातुः, स्वेदः प्रस्वेदः। दन्ता अस्थ्नामुपधातुः, केशा मज्जोपधातुः, ओजः शुक्रस्योपधातुः। ओजसो लक्षणमेतस्याग्रे पठन्ति केचित् तद्यथा—ओज इत्यादि। धातूद्भवा इति धातूत्पन्ना तेषां परिपाकविषयत्वात् कुत्रचिदेते तु मलान्तर्भूतत्वेन तत्रैव गणिताः। एताः सप्तोपधातवः इत्यनेन सप्तोपधातवः नियता ज्ञेयाः। अन्यत्राऽप्युक्तं 'रसात् स्तन्यं ततो रक्तमसृजः स्नायुकण्डराः। मांसाद्वसा त्वचः स्वेदो मेदसः स्नायुसन्धयः। अस्थ्नो दन्तास्तथा मज्ज्ञः केशा ओजश्च सप्तमात्। धातुभ्यश्चोपजायन्ते तस्मात्ते उपधातवः' इति ॥ १६-१८ ॥

गू०—नारीणां स्तन्यं दुग्धं रजश्च काले स्वसमये भवति गच्छति च रसोपधातुः स्तन्यं रक्तोपधातू रजः। ननु नारीणां कथितावेतौ द्वावुपधातू काले भवतां

१—अस्य टिप्पणी ४७ शपृष्ठे दृष्टव्या। २—वन्धनीभूत पाठो नास्ति 'क' 'ख' पुस्तकयोः।

१—'स्निग्धं सान्द्रं स्थिरं' इति 'क' 'स्निग्धं श्वेतं स्थिरं गुरुः' इति 'ख' पुस्तके।

२—सप्तधातूनां मधुरादि षड्रसप्रकारेण षडपि संख्याद्याः प्रत्यया ज्ञेयाः, तथाकृते अष्टविंशत्यधिकशतसंख्यका धातुभेदा भवन्ति ।—

## सप्तधातुभेदाः ।

| | | | | | |
|---|---|---|---|---|---|
| १ | १ | १ | ३५ | ७ | १-३-५ |
| २ | २ | २ | ३६ | ८ | १-३-६ |
| ३ | ३ | ३ | ३७ | ९ | १-३-७ |
| ४ | ४ | ४ | ३८ | १० | १-४-५ |
| ५ | ५ | ५ | ३९ | ११ | १-४-६ |
| ६ | ६ | ६ | ४० | १२ | १-४-७ |
| ७ | ७ | ७ | ४१ | १३ | १-५-६ |
| ८ | १ | १-२ | ४२ | १४ | १-५-७ |
| ९ | २ | १-३ | ४३ | १५ | १-६-७ |
| १० | ३ | १-४ | ४४ | १६ | २-३-४ |
| ११ | ४ | १-५ | ४५ | १७ | २-३-५ |
| १२ | ५ | १-६ | ४६ | १८ | २-३-६ |
| १३ | ६ | १-७ | ४७ | १९ | २-३-७ |
| १४ | ७ | २-३ | ४८ | २० | २-४-५ |
| १५ | ८ | २-४ | ४९ | २१ | २-४-६ |
| १६ | ९ | २-५ | ५० | २२ | २-४-७ |
| १७ | १० | २-६ | ५१ | २३ | २-५-६ |
| १८ | ११ | २-७ | ५२ | २४ | २-५-७ |
| १९ | १२ | ३-४ | ५३ | २५ | २-६-७ |
| २० | १३ | ३-५ | ५४ | २६ | ३-४-५ |
| २१ | १४ | ३-६ | ५५ | २७ | ३-४-६ |
| २२ | १५ | ३-७ | ५६ | २८ | ३-४-७ |
| २३ | १६ | ४-५ | ५७ | २९ | ३-५-६ |
| २४ | १७ | ४-६ | ५८ | ३० | ३-५-७ |
| २५ | १८ | ४-७ | ५९ | ३१ | ३-६-७ |
| २६ | १९ | ५-६ | ६० | ३२ | ४-५-६ |
| २७ | २० | ५-७ | ६१ | ३३ | ४-५-७ |
| २८ | २१ | ६-७ | ६२ | ३४ | ४-६-७ |
| २९ | १ | १-२-३ | ६३ | ३५ | ५-६-७ |
| ३० | २ | १-२-४ | ६४ | १ | १-२-३-४ |
| ३१ | ३ | १-२-५ | ६५ | २ | १-२-३-५ |
| ३२ | ४ | १-२-६ | ६६ | ३ | १-२-३-६ |
| ३३ | ५ | १-२-७ | ६७ | ४ | १-२-३-७ |
| ३४ | ६ | १-३-४ | ६८ | ५ | १-२-४-५ |
| ६९ | ६ | १-२-४-६ | ९९ | १ | १-२-३-४-५ |
| ७० | ७ | १-२-४-७ | १०० | २ | १-२-३-४-६ |
| ७१ | ८ | १-२-५-६ | १०१ | ३ | १-२-३-४-७ |

| | | | | | |
|---|---|---|---|---|---|
| ७२ | ९ | १-२-५-७ | १०२ | ४ | १-२-३-५-६ |
| ७३ | १० | १-२-६-७ | १०३ | ५ | १-२-३-५-७ |
| ७४ | ११ | १-३-४-५ | १०४ | ६ | १-२-३-६-७ |
| ७५ | १२ | १-३-४-६ | १०५ | ७ | १-२-४-५-६ |
| ७६ | १३ | १-३-४-७ | १०६ | ८ | १-२-४-५-७ |
| ७७ | १४ | १-३-५-६ | १०७ | ९ | १-२-४-६-७ |
| ७८ | १५ | १-३-५-७ | १०८ | १० | १-२-५-६-७ |
| ७९ | १६ | १-४-५-७ | १०९ | ११ | १-३-४-५-६ |
| ८० | १७ | १-४-५-६ | ११० | १२ | १-३-४-५-७ |
| ८१ | १८ | १-४-५-७ | १११ | १३ | १-३-४-६-७ |
| ८२ | १९ | १-४-६-७ | ११२ | १४ | १-३-५-६-७ |
| ८३ | २० | १-५-६-७ | ११३ | १५ | १-४-५-६-७ |
| ८४ | २१ | २-३-४-५ | ११४ | १६ | २-३-४-५-६ |
| ८५ | २२ | २-३-४-६ | ११५ | १७ | २-३-४-५-७ |
| ८६ | २३ | २-३-४-७ | ११६ | १८ | २-३-४-६-७ |
| ८७ | २४ | २-३-५-६ | ११७ | १९ | २-३-५-६-७ |
| ८८ | २५ | २-३-५-७ | ११८ | २० | २-४-५-६-७ |
| ८९ | २६ | २-३-६-७ | ११९ | २१ | ३-४-५-६-७ |
| ९० | २७ | २-४-५-६ | १२० | १ | १-२-३-४-५-६ |
| ९१ | २८ | २-४-५-७ | १२१ | २ | १-२-३-४-५-७ |
| ९२ | २९ | २-४-६-७ | १२२ | ३ | १-२-३-४-६-७ |
| ९३ | ३० | २-५-६-७ | १२३ | ४ | १-२-३-५-६-७ |
| ९४ | ३१ | ३-४-५-६ | १२४ | ५ | १-२-४-५-६-७ |
| ९५ | ३२ | ३-४-५-७ | १२५ | ६ | २-३-४-५-६-७ |
| ९६ | ३३ | ३-४-६-७ | १२६ | ७ | १-२-३-४-५-६-७ |
| ९७ | ३४ | ३-५-६-७ | १२७ | १ | |
| ९८ | ३५ | ४-५-६-७ | १२८ | ० | ००००००० |

## सप्तधातुवेधगणितयन्त्रम् ।

| धा. | १ | २ | ३ | ४ | ५ | ६ | ७ |
|---|---|---|---|---|---|---|---|
| दो. | ६२ | ६२ | ६२ | ६२ | ६२ | ६२ | ६२ |
| आ. | १ | ६२ | ३८४४ | २३८३२८ | १४७७६३३६ | ९१६१३२८३२ | ५६८००२३५५८५ |
| सं. | ६२ | ३८४४ | २३८३२८ | १४७७६३३६ | ९१६१३२८३२ | ५६८००२३५५८४ | ३५२१६१४६०६२०८ |
| १ | १ | १ | १ | १ | १ | १ | १ |
| २ | २ | १ | १ | १ | १ | १ | १ |
| ३ | ३ | १ | १ | १ | १ | १ | १ |
| ४ | १२ | १ | १ | १ | १ | १ | १ |

वा गच्छतां वा, अत्र पुंसां रसरक्तयोरुपधातुः कः, यद्येवं वाच्यं रसरक्तयोरुपधातुः स्त्रीणामेव भवति न नृणां तर्हि, नृषु रसरक्तान्यपि नो स्यातां, नहि, तौ तु भवतः तर्हि यत्र रसरक्तौ तत्र तयोरुपधातुः सम्भवत्ये-वेत्याशङ्क्य रसोपधातुमाह—अपक्वो विकृतिमापन्नो रसो यदा निर्गच्छति स एव पुंसां रसोपधातुः विकृतिमापन्नो रक्तः यदा पित्तप्रकोपत ऊर्ध्वं गच्छति स एव रक्तोपधातुर्नान्यः । उपधातोरर्थं विवृणोति । उपगतः वैकृत्यं प्राप्तो धातुः उपधातुः, शुद्धमांसभव उत्पन्नो यः स्नेहः सा वसा संकीर्त्यते इति तृतीयः, सोपधातुः मेदोपधातुः स्वेदः, अस्थ्युपधातुर्दन्ताः मज्जोपधातुः केशाः, शुक्रोपधातुः सप्तमं नाम ओजः किंविशिष्टं तत्सर्वशरीरस्थ पुनः किंविशिष्टं स्निग्धं, सचिक्कणं, पुनः कीदृशं शीतं उष्णं न, पुनः कीदृशं सितं शुभ्रं, पुनः कीदृशं सोमात्मकं सृष्ट्युत्पादकत्वात्, पुनः कीदृशं शरीरस्य बलपुष्टिकरं मलं ख्यातं । इति कोर्थः, धातुभवाः सप्तोपधातवो ज्ञेयाः ॥ १७ ॥ १८ ॥

इदानीं सप्तत्वचो निदर्शयन्नाह—

**ज्ञेयावभासिनी पूर्वं सिध्मस्थानं च सा मता ।**
**द्वितीया लोहिता ज्ञेया तिलकालकजन्मभूः ॥१९॥**
**श्वेता तृतीया संख्याता स्थानं चर्मदलस्य च ।**
**ताम्रा चतुर्थी विज्ञेया किलासश्वित्रभूमिका ॥ २० ॥**
**पञ्चमी वेदनी ख्याता सर्वकुष्ठोद्भवस्ततः ।**
**विख्याता रोहिणी षष्ठी ग्रन्थिगण्डापचीस्थितिः॥२१**
**स्थूला त्वक्सप्तमी ख्याता विद्रध्यादेः स्थितिश्च सा ।**
**इति सप्त त्वचः प्रोक्ताः स्थूला व्रीहिद्विमात्रया॥२२**

**दी०**—ज्ञेयाऽवभासिनीति । इति वक्ष्यमाणप्रकारेण । व्रीहिद्वयमात्रया यवद्वयपरिमाणेन स्थूला सोत्सेधाः सप्त-त्वचो ज्ञेयाः । कथं यथा? तत् प्रकारमाह—तत्र पूर्वं अवभासिनी नाम अवभासयति पराजयतीति भ्राज-काग्निना सवर्णां पञ्चविधां छायां प्रकाशयति । सैव सिध्मस्थानं कथितम् । चकारात् पद्मकण्टकाधिष्ठानमपि ज्ञेयं सा व्रीहेरष्टादशभागप्रमाणा । द्वितीया लोहिता ज्ञेया इत्यादि द्वितीया त्वक् लोहिता नाम कथिता । सा तिलकालकजन्मभूर्ज्ञेया । तिलकालकग्रहणेनैव न्यच्छ-व्यङ्गादयोऽपि गृह्यन्ते । तिलकालकप्रभृतयश्च क्षुद्ररोगे पठिताः, सैव व्रीहेः षोडशभागप्रमाणा बोद्धव्या । श्वेता तृतीया संख्यातेत्यादि । तृतीया त्वक् श्वेता नाम कथिता, सा चर्मदलस्य स्थानं । चर्मदलः कुष्ठभेदः । चकारान्मशकाजगल्लीप्रभृतीनां स्थानं सा व्रीहेर्द्वादश-भागप्रमाणा । ताम्रा चतुर्थी विज्ञेयेत्यादि । चतुर्थी त्वक् ताम्रा नाम विज्ञेया, सा किलासश्वित्रभूमिका कथिता । किलासः कुष्ठभेदः, श्वित्रं प्रसिद्धं, सैव व्रीहेरष्टभाग-प्रमाणा । पञ्चमी त्वक् वेदनी नाम ख्याता सा सर्व-कुष्ठोद्भवा ज्ञेया सर्वकुष्ठान्यष्टादशसंख्याकानि, तत इति ग्रहणेन विसर्पादीनामधिष्ठाना, सैव व्रीहेः पञ्चभागप्र-माणा विख्याता । लोहिता षष्ठीति । षष्ठी त्वक् लोहिता नाम विख्याता सा ग्रन्थिगण्डापचीस्थितिः कथिता । ग्रन्थ्यादयः कफमेदःप्रधानाः अतः साध-र्म्यात् श्लीपदार्बुदादीनामपि स्थानं सा च व्रीहिप्र-माणा । स्थूला त्वक् सप्तमी ख्याता इत्यादि सप्तमी त्वक् स्थूला नाम कथिता सा विद्रध्यादेः स्थितिर्भ-वति । आदिग्रहणात् भगन्दरार्शसो ग्रहणं । सैव व्रीहि-द्वयप्रमाणेन बोद्धव्या मांसमलेषु मानमिदं न ललाट-सूक्ष्माङ्गुल्यादिषु यतो वक्ष्यत्युदरेषु व्रीहिमुखेनाङ्गुष्ठो-दरप्रमाणमवगाढं विध्येदिति ॥ १९–२२ ॥

**गू०**—तासां मध्ये अवभासिनीनाम्नी त्वक् पूर्वं ज्ञेया, सावभासिनी सिध्मस्थानं मता सिध्मनामुत्पत्ति-स्थलं कथिता; द्वितीया त्वक् लोहिता ज्ञेया, किंविशिष्ट सा तिलकालकजन्मभूः तिलकालको लिङ्गार्शः तस्य जन्मभूः उत्पत्तिभूमिः; तृतीया त्वक् श्वेता संख्याता, सा त्वक् चर्मदलस्य कुष्ठभेदस्य स्थानं; चतुर्थी त्वक् ताम्रा विज्ञेया सा किलासश्वित्रयोः भूमिका उत्पत्तिस्थाना, किलासं सि-ध्मभेदं; पञ्चमी त्वक् वेदनी ख्याता ततः सर्वकुष्ठोद्भवः; षष्ठी त्वक् लोहिता ख्याता, सा ग्रन्थिगण्डापचीस्थितिः ग्रन्थिगण्डापचीनां स्थितिः स्थानभूता; स्थूला नाम्नी त्वक् सप्तमी ख्याता, किंविशिष्टा सा विद्रध्यादेः रोगाणां स्थि-तिः स्थानभूता । किंविशिष्टाः सप्तत्वचः व्रीहिद्विमात्रया स्थूलाः द्वियवप्रमाणस्थूला इत्यर्थ इति सप्तत्वचो व्याख्याताः । इति कोर्थः, प्रोक्ताः सप्तत्वचः समाप्ताः । इतिपदं समाप्त्यर्थं द्योतयति ॥ १९–२२ ॥

**दी०**—अथ दोषाणां विवरणमाह—

**वायुः पित्तं कफो दोषा धातवश्च मला मताः ।**
**तत्रापि पञ्चधा ख्याताः प्रत्येकं देहधारणात् ॥२३॥**

१—'क्षीरस्य पच्यमानस्य यथा सन्तानिका भवेत् । पच्यमानस्य शुक्रस्य रजसश्च तथा त्वचः' इत्युक्तलक्षणाः ॥

**(शरीरदूषणाद्दोषा धातवो देहधारणात् ।**
**वातपित्तकफा ज्ञेया मलिनीकरणान्मलाः ॥ २४ ॥)**
**पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः ।**
**वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत् ॥२५॥**
**पवनस्तेषु बलवान्विभागकरणान्मतः ।**
**रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलः ॥२६॥**
**मलाशये चरेत्कोष्ठे वह्निस्थाने तथा हृदि ।**
**कण्ठे सर्वाङ्गदेशेषु वायुः पञ्चप्रकारतः ॥ २७ ॥**
**अपानः स्यात्समानश्च प्राणोदानौ तथैव च ।**
**व्यानश्चेति समीरस्य नामान्युक्तान्यनुक्रमात् ॥२८॥**

**दी०**—वायुरिति । वायुः पित्तं कफश्च त्रयो दोषाः प्रसिद्धाः । अत एव देहधारणात् धातवः कथिताः । धातूनां मलिनीकरणात् मलाश्च मताः कथिताः । तत्रापि देहधारणत्वेन प्रत्येकं पञ्चधा पञ्च प्रकारा व्याख्याताः । तदुक्तं सुश्रुते 'तत्र प्रस्पन्दनोद्वहनपूरणविवेकधारणलक्षणो वायुः पञ्चधा प्रविभक्तः शरीरं धारयति, रागपक्त्योजस्तेजोमेधोष्मकृत् पित्तं पञ्चधा प्रविभक्तमग्निकर्मणाऽनुग्रहं करोति सन्धिसंश्लेषणस्नेहनरोपणपूरणैः पञ्चधा प्रविभक्तः श्लेष्मा उदककर्मणाऽनुग्रहं करोती'ति । इदानीं तेषु वातप्राधान्यपूर्वकं तत्स्वरूपमाह—पवन इति । तेषु वातादिदोषेषु पवनो वायुः विभागकरणात्पृथक्करणत्वे बलवान् मतः । तदुक्तम् 'पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः । वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत्' इति । तत्स्वरूपमाह—रजोगुणमय इत्यादि । अनिलो रजोगुणमयो रजोगुणभूयिष्ठ इति भावः । सूक्ष्म इति स्रोतःप्रवेशित्वात् । शीतः शीतस्वभावात् । रूक्षो रूक्षगुणयोगात्, लघुरगुरुः, चलो नैकत्रस्थितिशीलः । स एवोक्तस्थानेषु चानुगच्छन् वायुः पञ्चप्रकारो ज्ञेयः । केचित्त्वाह—मलाशय इत्यादि । मलाशये पक्काशये, कोष्ठवह्निस्थान इति कोष्ठाग्निस्थाने कोष्ठग्रहणं धात्वग्निनिरासार्थम् । हृदि उरःस्थाने, कण्ठे कण्ठदेशे, सर्वाङ्गदेहेष्विति सर्वाङ्गयुक्तो देहः । तान्यङ्गानि षद् प्रसिद्धानि । ननु—देहग्रहणेनैवाङ्गान्येव प्राप्यन्ते तत् कथं पृथग् ग्रहणं ? उच्यते—अङ्गग्रहणमत्र प्रत्यङ्गादीनां निरासार्थं । तेषु प्रत्यङ्गेषु वातस्य विशेषस्थानं न प्रतिपादितम् । तस्माद्विशेषस्थानत्वेन सर्वाङ्गदेहग्रहणं कृतमित्यदोषः । तथैवास्यानुक्तनामानि यथा अपान इत्यादि । अपानो वातविशेषः । समानो नाभिदेशे स्यात् । समानो वह्निस्थाने प्राणो हृदि उदानः कण्ठदेशे व्यानः सर्वशरीरेष्विति । तदुक्तम्—'हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः । उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः' इति । केचिदनिलनामान्यन्यान्यपि पठन्ति तद्यथा—'नागः कूर्मोऽथ कृकलो देवदत्तो धनञ्जयः' इति । एते त्वन्यत्र प्रधाननाडीषु ज्ञातव्याः ॥

**गू०**—वायुः पित्तं कफ एते त्रयो दोषाः पर्यायशब्देन धातवः आख्याताः, मलाश्चाख्याताः, तत्रापि धातुमलसंज्ञाकथनानन्तरं पञ्च देहधारणात्प्रत्येकं स्थानं स्थानंप्रति एकं प्रत्येकं, स्थानाधिकं कृत्वा पञ्चधा ख्याताः कथिताः । अन्यत्राप्युक्तं 'शरीरदूषणाद्दोषा धातवो देहधारणात् । वातपित्तकफा ज्ञेया मलिनीकरणात् मलाः' । दोषाणां पर्यायशब्दास्तद्रूपाः तेषु दोषेषु विभागकरणात् दोषकोपप्रचये साहाय्यकरणात् अनेन पवनेन विना तेषां न कापि शक्तिरित्यर्थः । तदाह ग्रन्थान्तरे 'पित्तं पङ्गु, कफः पङ्गुः, पङ्गवो मलधातवः । वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत्' । कीदृशः गुणमयः, पुनः कीदृशः सूक्ष्मः सर्वव्यापी, पुनः शीतः, पुनः रूक्षः लघुः, पुनश्चलः स्थिरो न । अधुना वायूनां पूर्वोक्तपञ्चस्थलान्याह—पञ्चप्रकारतः वायूनां मध्ये अपानवायुः मलाशये चरेत् व्यानवायुः सर्वाङ्गदेशेषु चरेत् सर्वाङ्गगामी भूत्वा विचरेत् इत्यर्थः । अधुना पञ्चवायूनां नामान्याह—पञ्चानां मध्ये एक अपानः अपानवायुः स्यात्, द्वितीयः समानः स्यात्, तृतीयः प्राणः स्यात्, चतुर्थः उदानः स्यात्, पञ्चमो व्यानः स्यात् । इति कोऽर्थः अनुक्रमादुक्तानि समीरस्य पञ्च नामानि ॥ २३–२८ ॥

**दी०**—इदानीं पित्तविवरणमाह—

**पित्तमुष्णं द्रवं पीतं नीलं सत्त्वगुणोत्तरम् ।**
**कटुतिक्तरसं ज्ञेयं विदग्धं चाम्लतां व्रजेत् ॥ २९ ॥**

१ मक्षिप्तम् ।

१—इदं च योगसूत्रासरणमूलकमेव—भौतिकवायोः पर्यायनामान्येतानि न सन्ति, अपितु दशप्राणनामानि; तेष्वेव सन्ति नागादीन्यपि तद्यथा 'अष्टाविंशानि शग्मानि सह योगं भजन्तु मे' इति श्रुतिः । अष्टाविंशानि तानि दश प्राणानि दशेन्द्रियाणि, मनोबुद्ध्यहंकारचित्तविद्याशरीरस्वभावबलानि इति ।

**अग्न्याशये भवेत्पित्तमग्निरूपं तिलोन्मितम् ।**
**त्वचि कान्तिकरं ज्ञेयं लेपाभ्यङ्गादिपाचकम् ॥ ३० ॥**
**दृश्यं यकृति यत्पित्तं तद्रसं शोणितं नयेत् ।**
**यत्पित्तं नेत्रयुगले रूपदर्शनकारि तत् ॥ ३१ ॥**
**यत्पित्तं हृदये तिष्ठेन्मेधाप्रज्ञाकरं च तत् ।**
**पाचकं भ्राजकं चैव रञ्जकालोचके तथा ॥ ३२ ॥**
**साधकं चेति पञ्चैव पित्तनामान्यनुक्रमात् ।**

दी०—पित्तमिति । पित्तमुष्णमित्युष्णयोगात्, द्रवमकठिनं, पीतं वर्णतः, नीलं च तच्चीलवर्णं सामाऽवस्थायां भवति पीतं निरामाऽवस्थायां च । सत्त्वगुणोत्तरं सत्त्वगुणबहुलं, कटुतिक्तरसं प्रकृतिस्थं प्रसिद्धम् । यदा विदग्धं तदाम्लतां व्रजेदिति वह्निगुणत्वात्, तदुक्तं 'पित्तं विदग्धतामम्लतामुपैति आग्नेयत्वात्' इति । अत एवाह कश्चित्—'विदग्धाजीर्णसंसृष्टं पुनरम्लरसं भवेत्' इति । विदग्धं पित्तं पुनरम्लपित्तमिति रोगविशेषमपरे प्रतिपादयन्ति इति । तत्स्थानानि यथा—अग्न्याशये पित्तमग्निरूपं तिलोन्मितं च ज्ञेयं, पक्वामाशयमध्ये अग्न्याशयमिति वाच्यम् । तत्रस्थं चतुर्विधमन्नपानं पचति न केवलं तिलोन्मितमन्यरूपं च वदन्त्येके । तद्यथा—'स्थूलकायेषु सत्त्वेषु यवमात्रं प्रमाणतः । ह्रस्वमात्रेषु सत्त्वेषु तिलमात्रं प्रमाणतः ॥ कृमिकीटपतङ्गेषु वालमात्रं हि तिष्ठति ॥' इति ॥ यत् पित्तं त्वच्यस्ति तत् कान्तिकरं ज्ञेयं लेपाभ्यङ्गादिपाचकं च भवति तदुष्णगुणयोगात् । ऊष्मा शरीरस्योष्णत्वं । लेपाभ्यङ्गादीत्यादिग्रहणात् स्नानावगाहनादीनां ग्रहणं । त्वगत्र अवभासिनी नाम ज्ञेया बाह्यत्वगित्यभिप्रायः । यत् पित्तं यकृति कालखण्डे दृश्यं दृष्टिगोचरं तद्रसं शोणतां नयेत् करोतीत्यर्थः । तादृशमिति यादृक् प्लीहास्थानेऽस्ति तादृक् भवतीति भावः । यत् पित्तं नेत्रयुगलेऽस्ति तद्रूपदर्शनकारि भवति रूपं पीतशुक्लादिकम् । यत् पित्तं हृदये चेतनास्थानेऽस्ति तन्मेधाप्रज्ञाकरं बोद्धव्यम् । कस्मात् हृदयस्थकफतमोपनोदनविस्पष्टीकृतत्वात् । मेधा धीर्धारणा बुद्धिः, प्रज्ञा अनागतोपदेशरूपा मतिः । चकारादभिप्रार्थितमनोरथसाधनकृदित्युक्तम् । पित्तनामान्याह–पाचकमित्यादि । पित्तनामानि क्रमात् पञ्चैव ज्ञातव्यानि क्रमो यथा—पाचकमग्निस्थाने, भ्राजकं त्वचि, रञ्जकं यकृति, आलोचकं नेत्रयोः, साधकं हृदीति ॥ २९-३२ ॥

गू०—अधुना पञ्च पित्तस्य गुणानाह—ननु 'मिष्टः पटुश्च मधुरमलोम्लं पच्यते रसः । कटुतिक्तकषायाणां पाकः स्यात् प्रायशः कटुः' इति रसविशेषाणां विपाकविशेषा उक्ताः कथिताः । षड्रसानप्याह–आहारो माधुर्यं लभते पाचकपित्तेन विदग्धोम्लतां व्रजेत् ग्रहण्यां पाचितः कटुर्भवतीति कथं संगच्छते ? उच्यते मिष्टरसः पटुरसश्चाहार आमाशये पूर्वं मधुररसो भवति ततःपाचकपित्तेन विदग्धोऽम्लतां व्रजेत् ग्रहण्यां पाचितः कटुरसो भवति कटुतिक्तकषाया मधुरा अम्लाः कटवश्च भूत्वा कटव एव भवन्ति । अत्र केचिदाचार्याः प्राहुः षण्णामपि रसानां विपाकात् त एवापि रसा अतिशयेन भवन्ति यथा आमं दुग्धमधुरं तत्पक्वं सत् विशेषतो मधुरं भवति एवं पित्तमुष्णं द्रवं पीतम् । अस्यार्थः पित्तं उष्णं उष्णगुणं, द्रवं द्रवरूपं, पीतं पीतवर्णं, नीलं नीलवर्णं, सत्त्वं सत्वगुणोत्तरं अधिकं यस्मिन् तत् कटु कटुरसं तिक्तं तिक्तरसं विदग्धं अतिपक्वं अम्लतां व्रजेत् । तस्य पञ्चस्थानान्याह—अग्न्याशयेत्यादि । अग्न्याशये यत्पित्तं भवेत् तत्पाचकं ज्ञेयम् । किंभूतं अग्निरूपम्, पुनः किंभूतं तिलोन्मितं तिलप्रमाणं त्वचि भ्राजकं ज्ञेयम् । किंभूतं, कान्तिकरम् । पुनः किंभूतं लेपाभ्यङ्गादिपाचकं पाककारि । यत्तु त्वचि पित्तं तस्य भ्राजकोऽग्निरिति संज्ञा सोऽप्यभ्यङ्गपरिषेकावगाहलेपादीनां क्रियाद्रव्याणां पक्ता इति सुश्रुतः, अयमर्थः प्रकृतिर्यत्पित्तं दर्शनीयं रञ्जकाख्यं तद्रसं शोणतां नयेत् । दर्शनीयं दृश्यात्मकम् । भ्राजकमित्यादिना यद्यस्य दर्शनयोग्यं कान्तिकरत्वात् पूर्वभ्राजकेन सम्बध्यते चेत्तदा अयमर्थः । तत्र सम्यक् कान्तिकरमित्यनेन दर्शनीयार्थता प्राप्ता तस्मादय एवार्थः, प्रकृतिदृश्यं दर्शनयोग्यं यत्पित्तं तद्रञ्जकं रञ्जकाख्यं ज्ञेयम् । किंभूतं तद्रसं शोणिततां रक्ततां नयेत् यत्पित्तं नेत्रयुगले तदालोचकं आलोचकाख्यं चतुर्थम् । किंभूतं रूपदर्शनकारि यत्पित्तं हृदये तिष्ठेत् तत्साधकं पञ्चमम् । किंभूतं, मेधाप्रज्ञाकरं मेधाप्रज्ञे बुद्धिविशेषौ । एवं क्रमात्पञ्च पित्तनामानि ज्ञेयानि । इति पित्तविभागः ॥ २९ ॥ ३२ ॥

दी०—इदानीं कफस्य विवरणं दर्शयितुमाह—

**कफः स्निग्धो गुरुः श्वेतः पिच्छिलः शीतलस्तथा ॥ ३३ ॥**
**तमोगुणाधिकः स्वादुर्विदग्धो लवणो भवेत् ।**
**कफश्चामाशये मूर्ध्नि कण्ठे हृदि च संधिषु ॥ ३४ ॥**

**तिष्ठन्करोति देहेषु स्थैर्यं सर्वाङ्गपाटवम् ।**
**क्लेदनः स्नेहनश्चैव रसनश्चावलम्बनः ॥ ३५ ॥**
**श्लेष्मकश्चेति नामानि कफस्योक्तान्यनुक्रमात् ।**

**दी०**—कफ इति । कफस्योक्तान्यनुक्रमादिति कफोऽपि ईदृशः । कीदृशः तमाह—स्निग्ध इति स्नेहगुणयोगात् । गुरुरलघुः श्वेतो वर्णतः, पिच्छिल इति मृद्यमानः सवङ्गुलग्राही शीतलोऽनुष्णः सौम्यत्वात् । तमोगुणप्रधानस्तमोगुणबहुलः, स्वादुर्मधुरः मधुरत्वमत्राविदग्धत्वात्, विदग्धस्तु लवणो भवेदिति तदुक्तम्—'प्रकृतिस्थोऽविदग्धश्चाप्रदुष्टो मधुरः कफः । विदग्धो विकृतस्य स्यात् प्रदुष्टो लवणस्तथा' इति । यद्वा विदग्धाम्लपाकाल्लवणः । स्थानानि यथा कफ इत्यादि । कफोऽप्येतेषु स्थानेषु तिष्ठन् देहेषु स्थैर्यं करोति सर्वाङ्गपाटवं करोति । कथमित्याह—आमाशये चतुर्विधस्याहारस्याधारो माधुर्यात् पिच्छिलत्वात् । प्रक्लेदित्वान्मधुरशीतलोऽपि स्वशक्त्या श्लेष्मस्थानानां शरीरस्य उदककर्मणा कृत्वोपकारं करोति । मूर्ध्नि शिरसि स्थितः स्नेहेन तर्पणाधिकृतत्वादिन्द्रियाणां स्वकार्यसामर्थ्यं जनयति । कण्ठे जिह्वामूले स्थितः सौम्यत्वाज्जिह्वेन्द्रियस्य रसज्ञानाज्ञानयोर्वर्तते । हृदि उरसि स्थितः शिरो बाहुद्वयसन्धानस्थानस्य सन्धारणं प्राकृतगुणेन सहितेन हृदये स्वकार्यसामर्थ्यं करोति । सन्धिषुसंस्थितः सर्वसन्धिसंश्लेषादनुग्रहं करोति । अथ नामान्यनुक्रमादुक्तानि—तानि कानीत्याह । क्लेदन आमाशये तदत्र सोदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसंघातः सुखकरो भवतीति क्लेदनस्याभिप्रायः । स्नेहनो मूर्ध्नि भवति तत्र स्थितस्य स्नेहविषयस्य सन्तर्पणं करोतीति तात्पर्यार्थः । स्नेहगुणसाधर्म्यात् । रसनः कफपर्यायः, कण्ठेऽस्ति स च रसज्ञाने वर्तते । अवलम्बनो हृदि वर्तते । स च हृदयावलम्बनं करोतीत्यर्थः । श्लेष्मकः सन्धिष्विति स च सन्धिसंश्लेषणकृद्भवति सन्धिसन्धानं करोतीत्यभिप्रायः ॥ ३३-३५ ॥

**गू०**—अथ कफस्य गुणस्थाननामान्याह—कफ इत्यादि । कफः स्निग्धः सचिक्कणः, गुरुः मात्रागुरुः, श्वेतः शुक्लवर्णः, पिच्छिलः आमसदृशः, शीतलः शीतगुणः, तमोगुणाधिकः तमोगुणप्रधानः, स्वादुर्मधुरसः, विदग्ध ईषत्त्यक्तः, यद्वा विशेषेण दग्धकर्ता प्राप्तः लवणो लवणरसो भवति । इदानीं कफस्य स्थाननामान्याह—आमाशये क्लेदनः कफः, मूर्ध्नि स्नेहनः, कण्ठे रसनः, हृदि आलम्बनः, सन्धिषु श्लेष्मकः । एषु स्थानेषु तिष्ठन् देहस्य स्थैर्यं सर्वाङ्गपाटवं च क्रमात्करोतीति योजना इति श्लेष्मविभागः, दोषनिरूपणम् ॥ ३३-३५ ॥

**दी०**—इदानीं स्नायूनां विवरणं दर्शयन्नाह—

**स्नायवो बन्धनं प्रोक्ता देहे मांसास्थिमेदसाम्॥३६॥**
**सन्धयश्चाङ्गसन्धानाद्देहे प्रोक्ताः कफान्विताः ।**
**आधारश्च तथासारः कायेऽस्थीनि बुधा विदुः॥३७॥**
**मर्माणि जीवाधाराणि प्रायेण मुनयो जगुः ।**

**दी०**—स्नायव इति । स्नायवो नवशतसंख्याकास्ते तु प्रतानवन्तो वृत्ताः पृथवः, शुषिराश्च देहे मांसास्थिमेदसां बन्धनं प्रोक्ताः कथिता इत्यर्थः । तद्यथा शाखासु षट्शतानि ताः प्रतानवत्यो वृत्ताश्च विसमृणालसदृशाः प्रतानवत्यः वृत्ताः वर्तुला महास्नायव इत्यर्थः । द्वे शते त्रिंशच्च कोष्ठे ताः शुषिराः पृथुलाश्च, ग्रीवां प्रत्यूर्ध्वसप्ततिः ता अपि पृथुलाः, शुषिराश्च एवं नवशतसंख्याः स्नायवो व्याख्याताः । बन्धनमिति सर्वशरीरावयवनिबन्धनं तदुक्तं—'नौर्यथा फलकास्तीर्णा बन्धनैर्बहुभिर्युता । भारक्षमा भवेदप्सु नृयुक्ता सुसमाहिता ॥ एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः । स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः' इति । सन्धिलक्षणमाह—सन्धयै इति । अङ्गग्रहणेन प्रत्यङ्गान्यपि गृह्यन्ते । सन्धयो द्विविधाश्चला अचलाश्च । यदुक्तं—'हन्वोः कट्यां च शाखासु सन्धयस्तु चलाः स्मृताः । शेषास्तु सन्धयः सर्वे विज्ञेया अचला बुधैः' कट्यां चेति चकाराद्ग्रीवायामपि चला ज्ञेयाः । केचिदत्र सन्धिलक्षणपदे द्वयं पठन्ति । तान् सन्धीनस्थ्या-

---

१—मेदसः सारमादाय शिरा स्नायुत्वमाप्नुयात् ॥ २ कोष्ठे २३०, ग्रीवोर्ध्वदेशे ७०, पादाङ्गुलिषु ३०, तल-कूर्च-गुल्फेषु १०, जंघायां ३०, जानुनि १०, ऊरौ ४०, वङ्क्षणे १०, सक्थिद्वये १५०, कट्यां ६०, पृष्ठे ८०, पार्श्वयोः ६०, उरसि ३०, ग्रीवायां ३६, मूर्ध्नि ३४ ॥ ३—ते च २१० सन्धयः सन्ति । शाखासु ६८, कोष्ठे ५९, ग्रीवोर्ध्वदेशे च ८३ ( ग्रीवायां ८, कण्ठे ३ हृत्फुफ्फुसक्लोमनिबद्धनाडीषु १८, दन्तमलेषु ३२ कण्ठमणौ १ नासिकायां २, चक्षुषि २, गण्डस्थले २, शङ्खे १, कर्णयोः १ (प्रत्येकं); हनुसन्ध्योः २, भ्रुवोः २, शङ्खोपरि २, मस्तके १, शिरःकपालेषु ५ ॥

श्रिता नव मन्यन्ते । अथास्थिलक्षणमाह—आधारश्चेति । अस्थीनि पञ्चविधानि भवन्ति कपालरुचकवलयतरुणनलकसंज्ञानि । काये आधारः शरीरधारणविषयः तदुक्तम्—'मांसान्यत्र निबद्धानि शिराभिः स्नायुभिस्तथा । अस्थीन्यालम्बनं कृत्वा न शीर्यन्ते पतन्ति च' इति । तथा सार इति । अस्थीनि शरीरे सारभूतः कथितः यथा 'आभ्यन्तरगतैः सारैर्नूनं तिष्ठन्ति भूरुहाः । अस्थिसारैस्तथा देहा ध्रियन्ते देहिनां ध्रुवम् । तस्माच्चिरविनष्टेषु त्वङ्मांसेषु शरीरिणाम् । अस्थीनि न विनश्यन्ति साराण्येतानि देहिनाम्' इति । इदानीं मर्माणि निदर्शयन्नाह—मर्माणीति । मर्माणि सप्तोत्तरशतसंख्यानि प्रायेण बाहुल्येन जीवाधाराणि प्राणाधाराणि जगुः, मुनय इति शेषः । तानि मर्माणि पञ्चप्रकाराणि भवन्ति । तद्यथा—मांसमर्माणि तान्येकादश संख्यानि, शिरामर्माणि एकचत्वारिंशत्, स्नायुमर्माणि सप्तविंशतिः । अस्थिमर्माणि अष्टौ । सन्धिमर्माणि विंशतिश्चेति । एतान्यपि सद्यःप्राणहराणि कालान्तरप्राणहराणि विशल्यघ्नानि वैकल्यकराणि रुजाकराणीति कथितानि, एतेषां स्वरूपं न लिखितमत्र विस्तरभयात् । जीवाधाराणीति जीव आत्मा तस्याधाराणीत्यर्थः । तदुक्तम्—'सोममारुततेजांसि रजःसत्त्वतमांसि च । मर्मसु प्रायशः पुंसां भूतात्मा चावतिष्ठते ॥ मर्मस्वभिहितास्तस्मान्न जीवन्ति शरीरिणः' इति ॥ ३६ ॥ ३७ ॥

**गू०**—अथ स्नायवः । नवशतं स्नायूनामिति पूर्वोक्तत्वात् । संख्या तु एतेनैवोक्ता । इदानीं स्नायूनां कर्माण्याह—देहे मांसास्थिमेदसां बन्धनं स्नायव एव प्रोक्ताः इदमेवैतासां प्रयोजनम् । ननु शार्ङ्गधरेण स्नायूनां स्वरूपं अङ्गविभागश्च नोक्तस्तत्कथं ज्ञायते तद्बोधार्थं ग्रन्थान्तराल्लिख्यते । अथ स्नायोः स्वरूपमाह—'मेदसः सारमादाय शिरा स्नायुत्वमाप्नुयात् । शिराणां हि मृदुः पाकः स्नायूनां तु ततः खरः ॥' तासां संख्यामाह—'शतानि नव जायन्ते शरीरे स्नायवो नृणाम् । तासां विवरणं ब्रूमः शिष्याः शृणुत यत्नतः । शाखासु च शतानि स्युः, कोष्ठे त्रिंशच्छतद्वयम् ॥ ग्रीवाया ऊर्ध्वदेशे तु स्नायूनां सप्ततिः स्मृता । एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः । स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः' इति स्नायुनिरूपणम् । अस्थीनि अस्थ्नां च त्रिशतं मतमिति संख्या पूर्वोक्तैव तेषां प्रयोजनमाह—तान्येव शतत्रयसंख्याकान्यस्थीनि काये आधारस्तथा सारश्च बुधाः पण्डिताः जगुः ऊचुः । शार्ङ्गधरानुक्तत्वात् अस्थ्नां स्थानादिनिरूपणमुच्यते तद्यथा 'शल्यतन्त्रेऽस्थिखण्डान्तं शतत्रयमुदाहृतम् । तान्येवात्र निगद्यन्ते तेषां स्थानानि यानि तु । सविंशतिशतं त्वस्थ्नां शाखासु कथितं बुधैः । पार्श्वयोः श्रोणिफलके वक्षःपृष्ठोदरेषु च । जानीयात्सुभिषक् तेषु शतं सप्तदशोत्तरम् । ग्रीवाया ऊर्ध्वगं विद्यादस्थ्नां त्रिषष्टिसंयुतम् ॥' अस्थीनि नवधा भवन्ति तदप्याह—'तरुणानि कपालानि रुचकानि भवन्ति च । वलयान्यपि तानि स्युर्नलकाश्चैव पञ्चधा ॥' तेषामपि पञ्चानां स्थानान्याह—'अक्षकः सश्रुतिघ्राणग्रीवासु तरुणानि हि । शिरःशङ्खकपालेषु ताल्वंशप्रोथजानुषु । कपालानि विजानीयात् रुचकानि रदा मताः । पाण्योः पार्श्वयुगे पृष्ठे वक्षोजठरपायुषु । पादयोर्वलयानि स्युर्नलकानि ब्रुवेऽधुना ॥ हस्तपादाङ्गुलितले कूर्चे च मणिबन्धयोः । बाहुजङ्घाद्वये चापि जानीयान्नलकानि तु ॥' अस्थ्नां प्रयोजनमाह—'मांसान्यपबद्धानि शिराभिः स्नायुभिस्तथा । अस्थीन्यालम्बनं कृत्वा न शीर्यन्ते पतन्ति न ॥' इत्यस्थिविवरणम् ॥

अथ मर्मविभागः । सप्तोत्तरं मर्मशतमित्युक्तत्वात् मर्मणां संख्या प्रोक्ता तेषां प्रयोजनमाह—मर्माणीत्यादि । यावन्ति मर्माणि तावन्ति जीवाधाराणीति मुनयो जगुः प्रायेण अतिशयेनेत्यर्थः । शार्ङ्गधरेण मर्मविभागस्तु विशेषेण नोक्तः अतो ग्रन्थान्तरात् किंचित्स्थानादिकं प्रोच्यते—'सन्निपातशिरास्नायुपक्षमांसास्थिसंभवः । मर्माणि तत्र तिष्ठन्ति प्राणास्तेषु विशेषतः ।' तेषां संख्यामाह—'सप्तोत्तरशतं सन्ति देहे मर्माणि देहिनाम् ।' तेषां स्थानान्याह—'तान्येकादश मांसे स्युरष्टावस्थिषु सन्ति हि । संधीनां विंशतिस्तानि स्नायूनां सप्तविंशतिः । चत्वारिंशत्तथैकं च शिरामर्माणि तत्र तु । द्वाविंशतिश्त्रियुगे तावन्त्येव भुजद्वयोः । द्वादशोरसि कुक्षौ च पृष्ठदेशे चतुर्दश । ग्रीवाया ऊर्ध्व-

१—एकैकस्यां पादाङ्गुल्यां ३ एवं १५, तलकूर्चे गुल्फसंश्रितानि १०, पार्ष्ण्यां १, जंघायां २, जानुनि १, ऊरौ १; एकस्मिन्सक्थिनि ३०, श्रोण्यां ५ ( गुदभगनितम्बेषु ४; त्रिके १ ), पार्श्वयोः ७२, पृष्ठे ३० उरसि ८, चक्षुषि २, ग्रीवायां ९, कण्ठनाड्यां ४, हन्वोः २, दन्ताः ३२, नासायां ३, तालुनि १, गण्डकर्णशङ्खेषु ३, शिरसि ६ इति शेषः ।

भागे तु सप्तत्रिंशन्मतानि तु।' सद्यःप्राणहरत्वादिभेदेन मर्माणि पञ्चधा भवन्तीति। भेदमप्याह 'सद्यःप्राणहराणि स्युर्मर्माण्येकोनविंशतिः। मर्मदेशास्त्रयस्त्रिंशत्स्युः कालान्तरमारकाः। चत्वारिंशच्च चत्वारि वैकल्यं जनयन्ति च। मर्माष्टकं रुजाकारि विषघ्नं च त्रिकं मतम्।' इति मर्मविभागः॥ ३६॥ ३७॥

**गू०**—अथ शिराविभागः

**संधिबन्धनकारिण्यो दोषधातुवहाः शिराः॥ ३७॥**
**धमन्यो रसवाहिन्यो धमन्ति पवनं तनौ।**

धमन्यः ( तडिदिव संज्ञावहाः )



**टी०**—इदानीं शिरालक्षणं प्रकटयन्नाह—सन्धीति। शिराश्च स्थूलसूक्ष्मभेदेन द्विविधाः तासां नाभिर्मूलं ततः प्रसरन्त्यूर्ध्वमधस्तिर्यक् वा। तथाह्युक्तम्—'यावत्यस्तु शिराः काये संभवन्ति शरीरिणाम्। नाभ्यां सर्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः॥' इति। तासां विभागमप्युक्तं यथा—तासां मूलशिराश्चत्वारिंशत्, तत्र दश वातवाहिन्यः, दश पित्तवाहिन्यः, दश श्लेष्मवाहिन्यः, दशरक्तवाहिन्यः इति। तासां वातवाहिनीनां वातस्थानगतानां पञ्चसप्तत्यधिकशतं भवन्ति। तावन्त्य एव पित्तवाहिन्यः पित्तस्थाने, कफवाहिन्यः कफस्थाने, रक्तवाहिन्यश्च यकृत्प्लीह्नोः। सन्धिबन्धनकारिण्य इति। आकुञ्चनप्रसरणादिभिर्विशेषैरित्यर्थः। इदानीं धमनीलक्षणमाह—धमन्य इति। धमनादनिलपूरणात् धमन्यः रसवाहिन्य इति चतुर्विंशतिसंख्याकाः। तासां च नाभिप्रभवाणामूर्ध्वगा[1] दश, दश[2] चाधोगामिन्यश्चतस्रस्तिर्यग्गामिन्यो[3] भवन्ति। तास्तु वातमूत्रपुरीष-

---

१—ऊर्ध्वगा रूपरसगन्धस्पर्शशब्दप्रश्वासोच्छ्वासस्तम्भक्षुद्धास्यभाषणरोदनगानादिकर्म सम्पादयन्ति देहं धारयन्ति ताश्च हृदयं गत्वा शाखात्रयं विस्तारयन्त्यः ३० शत्संख्याकाः संभवन्ति। तासु प्रत्येकं द्वे द्वे कृत्वा दश धमन्यो वातपित्तकफशोणितरसान् वहन्ति अष्टौ च रूपादीनि गृह्णन्ति, शिष्टासु द्वादशसु द्वाभ्यां वाङ्निष्पत्तिः, द्वाभ्यां घोषणं, द्वाभ्यां निद्रा, द्वाभ्यां जागरणं, द्वाभ्यां च रक्तवहनं भवति शिष्टेन स्तनसंस्थितेन द्वयेन च स्त्रियाः स्तन्यवहनं पुंसश्च शुक्रवहनं स्तनाभ्यां भवति॥ २—अधोगास्तु दश पित्ताशयमधिगम्य ३० शत्सम्पन्नाः। तासु द्वे द्वे वातपित्तकफरक्तरसान् वहतः। शिष्टाभ्याञ्च द्वे अन्नमाश्रित्यान्नं वहतः। द्वे जलं वहतः। द्वे बस्तिमाश्रित्य मूत्रं वहतः, द्वाभ्यां पुरुषस्य शुक्रं स्त्रिय आर्तवं च प्रादुर्भवति, द्वे च तद्द्वयं निःसारयतः, द्वे स्थूलान्त्रनिबद्धे भूत्वा पुरीषं निःसारयतः। अवशिष्टाश्चाष्टौ तिर्यग्यामिन्यः स्वेदं निःसारयन्ति। एताश्चाधोगा धमन्यः पक्वाशयकटिमूत्रपुरीषगुह्यबस्तिमेढ्रपादप्रभृतीन्याश्रित्य तेषां पोषणं सम्पादयन्ति। ३—तिर्यग्यं च धमनीचतुष्टयं प्रत्येकमसंख्यशाखाविभक्तं देहं रन्ध्रभूयिष्ठं करोति। एतासां च मुखानि प्रतिलोमकूप-

शुक्रार्तवान्यधो वहन्ति । अन्नपानरसवाहिन्यो दशोर्ध्वगाः । तिर्यग्गानां तु चतसृणां धमनीनामेकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यन्ते । तास्त्वसंख्येयास्ताभिरिदं शरीरं जालकैरिव व्याप्तं तासां तु मुखानि रोमकूपप्रतिबद्धानि यैः स्वेदमभिवहन्ति, रसं चापि सन्तर्पयन्त्यन्तर्बहिश्च, तैरेव चाभ्यङ्गपरिषेकावगाहालेपनवीर्याण्यन्तःशरीरमभिप्रतिपद्यन्ते ॥ ३८ ॥

**गू०**—शिराणां शतसप्तकेत्युक्तत्वाच्छिराणां शतसप्तकं भवति । तासां प्रयोजनमाह—शिराः सन्धिबन्धनकारिण्यः । अथ च दोषधातुवहा इदमेव प्रयोजनमेतासाम् । अथ ग्रन्थान्तरात् शिराणां विशेषनिरूपणमाह—'सन्धिबन्धनकारिण्यो दोषधातुवहाः शिराः । नाभ्यां सर्वाणि बद्धास्ताः प्रतन्वन्ति समंततः । शरीरं सकलं चैतत् शिराभिः पोष्यते सदा । प्रणालिभिरिवारामकुल्याभिः क्षेत्रधान्यवत् ॥ प्रसारणाकुञ्चनाभिः क्रियाभिः सततं तनौ । शिराण्येवोपकुर्वन्ति ताः स्युः सप्तशतानि तु । यथा द्रुमदले शाखा दृश्यन्ते प्रतताः शिराः । तथैव देहिनां देहे वर्तन्ते सकले शिराः ।' इदानीं शिराणां प्राणानां चाधाराधेयत्वं दर्शयन्नाह—'नाभिस्थाः प्राणिनां प्राणाः प्राणा नाभिं व्यवस्थिताः । शिराभिरेव ताभिश्च चक्रनाभिरिवारकैः ॥' सुश्रुतात्प्राणिनां प्राणा नाभिस्थाः इत्यनेन नाभ्यां चक्रस्य अरा इव स्थिताः । प्राणवायुं प्रकर्षेण आनन्ति गच्छन्तीति प्राणाः प्राणवायवः । ते प्राणभेदेन नागादिभेदेन च दशधा । कुतः ? नाभिस्थानतः प्राणाः प्राणवायुवहाः शिरा नाभिं व्यपाश्रिताः । नाभिं व्युपाश्रिताः कुतः ? यतः नाभिशब्दवाच्यः आदिकैः परिवध्यते तद्वन्नाभिः शरीरमध्यभागः शिराभिः । वाग्भटे तु एवं लिखितं 'धमन्यो नाभिसंबद्धास्त्रिंशतिश्च तनूतराः । नाभिः परिततस्ताभिश्चक्रनाभिरिवारकैः ।' अतः शार्ङ्गधरेण द्वयोर्ग्रहणं कृतम् । शिराधमन्यो नाभिस्थाः सर्वां व्याप्य स्थितास्तनुम् । पुष्णन्ति चानिशं वायोः संयोगात्सर्वधातुभिः । अतो धमन्यः शिराभेदभिन्नाः । यतः सुश्रुते लिखितम् शिराधमनीस्रोतसामविभागः, अविभागः अपृथक्त्वं 'शिराविकार एव धमन्यः शरणात् शिरा धमनात् धमन्यः इति निरुक्तेः ॥' अथ शिराणां संख्यामाह—सुश्रुतात् 'तासां खलु मूलशिराश्चत्वारिंशत् तासां दश वातवहा दश पित्तवहा दश श्लेष्मवहा दश रक्तवहाः तासां खलु वातवहानां वातस्थानगतानां सपञ्चसप्तशतं भवति तत्र वातवहा एकस्मिन्सक्थनि पञ्चविंशतिः, द्वितीये पञ्चविंशतिः, हस्ते पञ्चविंशतिः, द्वितीये पञ्चविंशतिः, एवं शतं शाखासु कोष्ठे चतुस्त्रिंशत्तस्य विवरणं तासु श्रोण्यां गुदमेढ्राश्रिता अष्टौ, द्वे द्वे पार्श्वे, षट् पृष्ठे, षट् उदरे, दश वक्षसि, एवं चतुस्त्रिंशत् । एकचत्वारिंशज्जत्रुण ऊर्ध्वं तासां चतुर्दश ग्रीवायां, चतस्रः कर्णयोः, नव जिह्वायां, षट् नासिकायां, अष्टौ नेत्रयोः । एवं वातवहानां सपञ्चसप्ततिशतं भवति एष विभागः पित्तश्लेष्मरक्तवहानां ज्ञेयः । एवं शिराणां सप्तशतानि संख्यातानि । तत्रारुणा वातवहाः पूर्यन्ते वायुना शिराः । पित्तादुष्णाश्चानिलाश्चासिता गौराः शिराः कफात् । असृग्वहास्तु रक्ताः स्युस्तथा नात्युष्णशीतलाः ॥' इति शिराविवरणम् ॥ अथ धमन्य आह—चतुर्विंशति धमन्य इति पूर्वोक्तं तासां प्रयोजनमाह—'धमन्यो रसवाहिन्यो धमन्ति पवनं तनौ ।' रसवाहिन्यः धमन्यः तनौ देहे पवनं धमन्तीति प्रयोजनम् । अथ शार्ङ्गधरानुक्तं धमनी ज्ञानार्थं विवरणं ग्रन्थान्तरादाह—'धमन्यो नाभितो याताश्चतुर्विंशतिसंख्यया । दशोर्ध्वगा दशाधोगाः शेषास्तिर्यग्चराः स्मृताः । यथा स्वभावतः खानि मृणालेषु भवन्ति हि । धमनीनां तथा खानि रसो यैरन्ततश्चरेत् । पञ्चाभिभूतस्त्वथ पञ्चकृत्वः पञ्चेन्द्रियं पञ्चसु वर्तमाना । पञ्चेन्द्रियं पञ्चसु भावयित्वा पञ्चत्वमायान्ति विनाशकाले ॥' अस्यायमर्थः पञ्चाभिभूताः पञ्चव्याप्ता धमन्यः पञ्च कृत्वः पञ्चवारान् पञ्चेन्द्रियं कर्मपुरुषं भावयन्ति योजयन्ति केषु ? पञ्चसु श्रोत्रादिष्विन्द्रियाधिष्ठानेषु भावयित्वा संयोज्य विनाशकाले धमन्यो विनाशमायान्तीति योजना । किंभूताः ? धमन्यः पञ्चसु वर्तमानाः पञ्चसु आकाशादिभूतेषु वर्तमानाः स्थिताः पञ्चाभिभूता इति पञ्चभ्यो भूतेभ्योभि समन्ततो भूताः शब्दस्पर्शरसरूपगन्धास्तैः, यद्वा आकाशपवनदहनतोयभूमिभिर्वा अभिभूताः व्याप्ता धमन्यः पञ्चकृत्वः पञ्चवारान् आयान्ति आगच्छन्ति काः धमन्यः ? किं तत्पञ्चेन्द्रियं इन्द्रियपञ्चकं सूक्ष्मरूपम् । इति धमनीविभागः ॥३८॥

---

संख्यानि । तेभ्यश्च मुखेभ्यः स्वेदा निर्गच्छन्ति, देहरसो बहिरन्तश्च सन्तर्पयति, अभ्यङ्गादिना च तैलादिवीर्यमन्तः शरीरं प्रविश्य त्वक्पाकादिकं करोति तेनैव च शुभाशुभस्पर्शज्ञानं भवति ॥

मांसपेश्यः ।



दी०—अथ पेशीवर्णनमाह—

**मांसपेश्यो बलाय स्युरवष्टम्भाय देहिनाम् ॥३९॥**
**प्रसारणाकुञ्चनयोरङ्गानां कण्डरा मताः ।**

दी०—मांसपेश्य इति । मांसावयवसङ्घाताः परस्परं विभक्ताः पेश्य इत्युच्यन्ते । तास्तु बलाय ओजसे स्युः कथिताः । अतएवाह कश्चित्—'शिरास्नाय्वस्थिपर्वाणि सन्धयः स्युः शरीरिणाम् । पेशीभिः संवृतान्यत्र बलवन्ति भवन्त्यतः' इति । तासां तु स्थानविशेषान्नानास्वरूपत्वं दर्शितम् । तद्यथा—बहलः पेलवः स्थूलाणुपृथुवृत्तह्रस्वदीर्घस्थिरमृदुश्लक्ष्णकर्कशभावः । प्रत्येकलक्षणमेतेषां च न लिखितमत्र ग्रन्थगौरवभयात् । अथ कण्डराः—कण्डरा महास्नायवः । अङ्गानां हस्तपादशिरःपृष्ठप्रभृतीनां प्रसारणाकुञ्चने कर्मविशेषौ तयोर्व्यापारो येषां ते । मूलकण्डराः षोडश,एतेषां प्ररोहा यथा हस्तपादगतानां कण्डराणां नखा अग्रप्ररोहाः, ग्रीवा हृदयनिबन्धिनीनां, अधोभागगतानां मेढ्रम्, श्रोणिपृष्ठनिबन्धिनीनामधोभागगतानां नितम्बमण्डलम् मूर्धोरुवक्षोऽक्षिपिण्डादीनां च । षोडशग्रहणमत्र शस्त्रव्यापारनिषेधार्थम्, तथाहि—'जालानि कण्डराश्चाङ्गे पृथक् षोडश निर्दिशेत् । षट् कूर्चाः सप्त सीवन्यो मेढ्रजिह्वाशिरोगताः । शस्त्रेण ताः परिहरेच्चतस्रो मांसरज्जवः' इति ॥ ३९ ॥

गू०—अथ मांसपेश्यः । पञ्चशतानि भवन्तीत्युक्तं तेषां प्रयोजनमाह—मांसपेश्यः बलाय भवन्ति तथा देहिनां अवष्टम्भाय अवस्थित्यर्थं । इदमासां प्रयोजनं शार्ङ्गधरात्तुक्तं 'मांसपेश्यः समाख्याता नृणां पञ्चशतानि तु । तासां शतानि चत्वारि शाखासु कथिता यथा ॥–कोष्ठे षड्गणना षष्टिः कथिता मुनिपुङ्गवैः । ग्रीवाया ऊर्ध्वतस्तासु चतुस्त्रिंशत्प्रकीर्तिताः । पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता मेहनमुष्कजाः। स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः । पुंसां मेहनमुष्कयोः त्रियास्तिस्रो मांसपेश्यः पूर्वमुक्तास्ताः स्त्रीणां मेहनमुष्काभावात् फलं गर्भाशयं आवृत्य तिष्ठन्ति । गयदासस्त्वाह—स्त्रीणां मांसपेश्यस्तिसृभिर्हीनानि पञ्चशतानि । तथा भोजः—'पञ्चपेशीशतान्येव स्त्रीवर्जं विद्धि भूमिप । अतश्चतस्रो हीयन्ते

१—'बुद्बुदः सप्तरात्रेण मांसपेशी भवेत्ततः । द्विसप्ताहाद्भवेत्पेशी रक्तमांसचिता दृढा । बीजस्येवाङ्कुराः पेश्यः पञ्चविंशतिरात्रतः' ॥ इति लक्षणम् ।

स्त्रीणां मेहनमुष्कयोः ॥' मांसपेशीनां कर्माण्याह— 'शिश्नदेशेऽस्थिपर्वाणि संधयश्च शरीरिणाम् । पेशीभिः संवृतान्येव बलवन्तं भवन्ति हि ॥' इति मांसपेशीविवरणम् ॥

अथ कण्डराः । तत्र कण्डराश्चैव षोडशेत्युक्तत्वात् षोडशकण्डरा भवन्ति तासां प्रयोजनमाह—प्रसारणाकुञ्चनयोरङ्गानां कण्डरा मता । अङ्गानां प्रसारणाकुञ्चने तासां प्रयोजनं । तासां विवरणं शार्ङ्गधरानुक्तमपि ग्रन्थान्तरादाह—'महत्यः स्नायवः प्रोक्ताः कण्डराश्चैव षोडश । प्रसारणाकुञ्चनयोर्दृष्टं तासां प्रयोजनम् । चतस्रो हस्तयोस्तासां तावन्त्यः पादयोः स्मृताः । ग्रीवायामपि तावन्त्यस्तावत्यः पृष्ठवंशगाः' इति कण्डराविवरणम् ॥ ३९ ॥

**दी०**—अथ रन्ध्राण्याह—

**नासानयनकर्णानां द्वे द्वे रन्ध्रे प्रकीर्तिते ॥ ४० ॥**
**मेहनापानवक्त्राणामेकैकं रन्ध्रमुच्यते ।**
**दशमं मस्तके प्रोक्तं रन्ध्राणीति नृणां विदुः ॥४१॥**
**स्त्रीणां त्रीण्यधिकानि स्युः स्तनयोर्गर्भवर्त्मनः ।**
**सूक्ष्मच्छिद्राणि चान्यानि मतानि त्वचि जन्मिनाम्४२**

**दी०**—नासेत्यादि । नासादीनां त्रयाणां द्वे द्वे रन्ध्रे प्रकीर्तिते । तेन द्वे नासायां, द्वे नयनयोः, द्वे कर्णयोरिति । मेहनापानवक्त्राणामेकैकं । मेहनं मेढ्रम्, अपानं गुदसंज्ञम्, वक्त्रं मुखकुहरं, दशमं रन्ध्रं मस्तके चोक्तम् । तद्ब्रह्मरन्ध्रमित्याहुरेके, एतानि नवस्रोतांसि नराणां बहिर्मुखानि भवन्ति दशमं मस्तके प्रच्छन्नमिति । स्त्रीणामपराणि च त्रीणि तानि कानि ? इत्याह—स्त्रीणामिति । द्वे स्तनयोः क्षीरवहे, एकं गर्भवर्त्मनः अधस्तात्तद्रक्तवहमित्यर्थः । अन्यान्यपि स्रोतांसि सन्तीत्याह—सूक्ष्मच्छिद्राणीति । जन्मिनां पुरुषाणां त्वचि विषये अन्यानि सूक्ष्मच्छिद्राणि मतानि कथितानीत्यर्थः । तान्यसंख्येयानि यस्मात् सूक्ष्मत्वाच्च दृश्यन्ते अतोऽन्तर्मुखानि वदन्त्यन्ये । चकारादन्यान्यपि स्रोतांसि मन्यन्ते केचित् । तानि तु प्राणोदकरसरक्तमांसमेदोमूत्रपुरीषशुक्रार्तववहानि । एतेषां स्वरूपमत्र बाहुल्यान्न लिखितम् ॥ ४०–४२ ॥

**गू०**—नासानयनकर्णानां द्वे द्वे रन्ध्रे छिद्रे प्रकीर्तिते कथिते । मेहनं इन्द्रियं, अपानं गुदम्, वक्त्रं मुखम् एषु एकैकं रन्ध्रं, एवं नव रन्ध्राणि, दशमं मस्तके प्रोक्तं कथितं, एवं दश रन्ध्राणि नृणां पुरुषाणां विदुः । अन्यानि सूक्ष्मच्छिद्राणि जन्मिनां मनुष्याणां त्वचि मतानि कथितानि । 'स्रोतांसि स्युर्मनःप्राणा दोषधातूपधातवः । धातूनां च मला मूत्रं मलमित्यादयस्तनौ । सञ्चरन्ति हि यैर्मार्गैस्तानि स्रोतांसि संजगुः' ॥ संजगुः वदन्ति तानि संख्ययापि न शक्यन्ते भाषितुं, वाग्भटे त्रयोदश, सुश्रुते द्वाविंशतिः, केचिदगणितान्याहुः । इति स्रोतोविवरणम् ॥ ४०–४२ ॥

**दी०**—फुप्फुसादीन्याह—

**तद्वामे फुप्फुसप्लीहौ दक्षिणाङ्गे यकृन्मतम् ।**
**उदानवायोराधारः फुप्फुसः प्रोच्यते बुधैः ॥ ४३ ॥**
**रक्तवाहिशिरामूलं प्लीहा ख्याता महर्षिभिः ।**
**यकृद्रञ्जकपित्तस्य स्थानं रक्तस्य संश्रयः ॥ ४४ ॥**
**जलवाहिशिरामूलं तृष्णाच्छादनकं तिलम् ।**

**दी०**—इदानीं शारीरकथनप्रसङ्गेनान्येषामपि फुप्फुसादीनां स्वरूपं निदर्शयन्नाह—तद्वाम इति । तद्वामे हृदयस्य वामभागे फुप्फुसप्लीहानौ च भवतः । फुप्फुसः स्वनामख्यातः शोणितफेनप्रभवो हृदयनाडिकालग्नः प्लीहा शोणितजः स्वनाम्ना प्रसिद्धः । एतद्द्वयं च वामपार्श्वे स्थितमिति भावः । दक्षिणाङ्गे दक्षिणपार्श्वे यकृत् कालखण्डं मतं एतदपि शोणितजम् ।

---

१–शाखासु तत्संख्या–पादाङ्गुलीषु १५, पादाग्रे १०, पादोपरि कूर्चसन्निविष्टाः १०, गुल्फतलयोः १०, गुल्फजानुनोरन्तरे २०, जानुनि ५, ऊरौ २०, वंक्षणे १०, एवमेकत्र सक्थिनि १००, अन्यबाहुसक्थिन्यपि १००; कोष्ठेषु यथा—गुदे ३, शेफसि १, सेवन्यां १, वृषणयोः २, स्फिचोः १०, बस्तिमूर्धनि २, उदरे ५, नाभौ १, पृष्ठार्ध्वोभयतः १०, पार्श्वयोः ६, वक्षसि १०, अक्षकांसौ प्रति समन्तात् ७, हृदि २, यकृति २, प्लीहि २, उण्डुके २, ग्रीवार्धे ३४ यथा—ग्रीवायां ४, हन्वोः ८, कण्ठमणौ १, गले १, तालुनि २, जिह्वायां १, ओष्ठयोः २, नासायां २, नेत्रयोः २, गण्डयोः ४, कर्णयोः २, ललाटे ४, शिरसि १ । स्त्रीणामधिकाविंशतिः—गर्भाशये ३, शुक्रार्तवप्रवेशिन्यां ३, योन्यभ्यन्तरे मुखाश्रिते प्रसृते २ योनिकर्णिके २ स्तनयोः १० इत्यपि ज्ञेयम् ।

फुप्फुसौ ( आभ्यन्तरस्वरूपेण दृष्टौ )




फुप्फुसौ ( बाह्यस्वरूपतो दृष्टौ )




अथ तेषां शरीरे व्यापारमाह—उदानवायोरित्यादि। फुप्फुसः उदानवायोः कण्ठस्थितवायोराधारः आश्रयः प्रोच्यते बुधैरिति शेषः। प्लीहा रक्तवाहिशिरामूलमाख्यातम्। प्लीहेति 'बुनरूवा' शब्दवाच्यः। यकृत् रञ्जकस्य पित्तस्य स्थानं रक्तस्य च स्थानमिति। तिलं तु शोणितकिट्टप्रभवं दक्षिणाश्रितं यकृत्समीपे क्लोमसंज्ञकं भवति। तच्च जलवाहिशिरामूलं कथितम्, अतएव तृष्णाच्छादनकं प्रतिपादितम्। तृष्णा पिपासा तस्याश्छादनं करोतीत्यर्थः ॥ ४३ ॥ ४४ ॥

यकृत् ( इह परावृत्य दृष्टम् )




१-यकृत्। २-पक्वाशयः। ३-पित्ताशयः।

**गू०**—तद्वामे हृदयादयो वामभागे फुप्फुसं प्लीहा च दक्षिणे यकृत्तिलं च। तदुक्तं सुश्रुते—'कफशोणितयोश्चापि प्रसादो हृदयं स्मृतम्। तस्याधो वामतः प्लीहा दक्षिणे क्लोम उच्यते ॥' तत्रैव यकृतो विधानात् हृदयं चेतनं स्मृतमिति स्पष्टम् ॥

प्लीहामाह—रक्तवाहिशिरामूलं ( इति )। रक्तस्य संश्रयः आश्रयः। स्पष्टमन्यत्। तिलवृक्कौ आहारजलवाहिशिरामूलौ, तिलं किंभूतं तृष्णाच्छादनकम् ॥ ४३ ॥ ४४ ॥

दी०—वृषणलिङ्गयोः स्वरूपमाह—

**वृक्कौ पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः ॥ ४५ ॥**
**वीर्यवाहिशिराधारौ वृषणौ पौरुषावहौ ।**
**गर्भाधानकरं लिङ्गमयनं वीर्यमूत्रयोः ॥ ४६ ॥**
**हृदयं चेतनास्थानमोजसश्चाश्रयो मतम् ।**

मूत्राशयः ।



१-वस्तिः ५ अण्डकोषौ १० पुंश्चिह्नः

दी०—वृक्कौ कुक्षिगोलकौ तौ तु रक्तमेदःप्रसादसंभवौ, प्रसादः सारः; अत एव जठरस्थस्य मेदसः पुष्टिकरौ कथितौ तत्संभवत्वात् । जठरग्रहणमन्यस्थानाश्रितमेदोनिषेधार्थम् । तथाहि—'स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तराश्रिता । अथेतरेषु सर्वेषु सरक्तं मेद उच्यते' इति । वृषणौ अण्डौ तौ च मांसाऽसृक्कफमेदःप्रसादसंभवौ वीर्यवाहिनां शिराणामाधारावयवाश्रिताविस्यर्थः । अत एव पौरुषावहौ पुरुषस्य धर्मः पौरुषं पुरुषार्थकारिणावित्यर्थः । यतः 'आकृष्टाण्डस्य पुंसश्च स्त्रीप्रहर्षो न जायते' इति ॥

गर्भाधानकरमिति । लिङ्गं मेहनं तच्च ग्रीवया सह हृदयनिबन्धनीनां चतसृणां कण्डराणां प्ररोहमिति गर्भाधानकरं गर्भोत्पादकमित्यर्थः । अत एव शुक्रमूत्रयोरयनं मार्गमिति । तदुक्तं—'द्व्यङ्गुले दक्षिणे पार्श्वे बस्तिद्वारस्य चाप्यधः । मूत्रस्रोतःपथः शुक्रं पुरुषस्य प्रवर्तते' इति । हृदयं कमलमुकुलाकारमधोमुखं तच्च शोणितकफप्रसादजं चेतनास्थानमिति । तद्विशेषेण चैतन्यपदं कथितं । सामान्येन तु सकलशरीरमेव चेतनास्थानं । तदुक्तं चरके—'चेतनानामधिष्ठानं मनो देहश्च सेन्द्रियः । केशलोमनखाग्रान्तमलद्रवगुणैर्विना' इति । ओजसश्चाश्रयं मतमिति । ओजोऽपि कृत्स्नधातुस्नेहः । यथा कृत्स्नशरीरोद्भूतं घृतं धातूनां तेजःशब्देनामनन्ति । यदुक्तं 'रसादीनां शुक्रान्तानां धातूनां स्नेहः । यथा कृत्स्नं यत् परं तेजः तत् खल्वोजस्तदेव बलमित्युच्यते'। तन्त्रान्तरे तु ओजःशब्देन रसोऽप्युच्यते । जीवशोणितमपि ओजःशब्देन कथयन्ति केचित् । श्लेष्माणमविकृतमोजःशब्देनापरे वदन्तीति ॥ ४५॥४६॥

गू०—जठरस्थस्य मेदसः वृक्कौ पुष्टिकरौ ज्ञेयौ, वुक्काग्रमांसं वृक्कमिति वैद्याः ।

वृषणौ अण्डौ बीजवाहिशिराधारौ प्रोक्तौ, बीजं वीर्यं तद्वाहिनी या शिरा तस्या आधारौ किंभूतौ पौरुषावहौ । लिङ्गं गर्भाधानकरं, तद्बीजमूत्रयोः अयनं स्थानं, बीजं शुक्रं । हृदयप्रयोजनमाह चेतनास्थानं ज्ञानस्थानं तथा ओजसः आश्रयं स्थानं ओजः सर्वधातूनां सारः । तथाच वाग्भटे ओजस्तेजो हि धातूनां शुक्रान्तम् ॥ ४५ ॥ ४६ ॥

दी०—इदानीं शरीरपोषणव्यापारमाह—

**शिरा धमन्यो नाभिस्थाः सर्वा व्याप्य स्थितास्तनुम् ।**
**पुष्णन्ति चानिशं वायोः संयोगात्सर्वधातुभिः ॥४७॥**

दी०—शिरेति । नाभिस्थाः नाभिस्थितमूलाः सर्वं सकलशरीरं व्याप्य स्थिताश्च मताः । शिरा धमन्यः सरणात् सिराः, धमनाद्धमन्यः, अनिशमित्यहर्निशम् । तनुं शरीरं पुष्यन्ति पोषयन्ति तत्र तरुणानां शरीरं पुष्णन्ति । वृद्धानां च पालयन्तीत्यभिप्रायः । चकारादनुगृह्णन्ति अर्थात् परिपालयन्तीत्यर्थः । तदुक्तं—'स एवान्नरसो वृद्धानां परिपक्वशरीरत्वादप्रीणनो भवति' इति । कुतः पोषयन्तीत्यत आह—वायोः संयोगादित्यादि । वायोरनिलस्य संयोगात् प्राकृतसहायात् । तथाह्युक्तं 'क्रियाणामप्रतिघातममोहो बुद्धिकर्मणाम् । करोत्यन्यान् गुणांश्चापि स्वाः सिराः पवनश्चरन्' इति । कैः कृत्वा इत्याह—सर्वधातुभिरिति । सर्वे धातवो रसाद्याः । एतेन सर्वासां सामान्यं कर्म निर्दिष्टम्, तथाच—'याभिरिदं शरीरमाराम इव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यते अनुगृह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैरिति' । ननु—नाभिस्थाः कथं सकलशरीरं पुष्णन्तीत्याशङ्क्य तत्रा-

न्तरात् समाधानमाह । तद्यथा—'व्याप्नुवन्त्यभितो देहं नाभितः प्रसृताः शिराः । प्रतानं पद्मिनीकन्दाद्बिसादीनां यथा जलम्' इति ॥ ४७ ॥

**दी०**—अथ प्राणानिलस्य शरीरव्यापारमाह—

**नाभिस्थः प्राणपवनः स्पृष्ट्वा हृत्कमलान्तरम् ॥ ४८ ॥**
**कण्ठाद्बहिर्विनिर्याति पातुं विष्णुपदामृतम् ।**
**पीत्वा चाम्बरपीयूषं पुनरायाति वेगतः ॥ ४९ ॥**
**प्रीणयन्देहमखिलं जीवयञ्जठरानलम् ।**

**दी०**—नाभिस्थ इति । प्राणपवनः प्राणानिलः प्राणाश्रितो वायुरिति तात्पर्यार्थः । प्राणा अग्निसोमाद्यः, नाभिस्थ इति कारणात् नाभौ स्थितः सकलशरीरव्यापकत्वात्, एतेन नाभ्यावृतशिरास्वपि स्थित इति भावः । तदुक्तं—'नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिर्व्युपाश्रिता । शिराभिरावृता नाभिश्चक्रनाभिरिवारकैः' इति । यथा—'ब्रह्मरन्ध्रान्नाभिचक्रं द्वादशारमवस्थितम् । लूतेव तन्तुजालस्था तत्र जीवो भ्रमत्ययम् ॥ सुषुम्नया ब्रह्मरन्ध्रमारोहत्यवरोहति । जीवः प्राणसमारूढो रञ्जकः स्फटिको यथा' इति । तस्य कारणत्वं च तन्त्रान्तरेऽपि कथितम् । यथा—'तेषामुष्णतमः प्राणो नाभिकन्दादधःस्थितः । चरत्यास्ये नासिकायां नाभौ हृदयपङ्कजे ॥ शब्दोच्चारणनिश्वासोच्छ्वासकासादिकारणम् ।' इति । एवंविधः प्राणानिलः हृत्कमलान्तरं हृदयकमलस्याभ्यन्तरं स्पृष्ट्वा प्रबोध्य कण्ठाद्बहिर्विनिर्याति । अर्थात् कण्ठमुल्लङ्घ्य शिरसि प्राप्त इति तात्पर्यार्थः । कुत इत्याह—विष्णुपदामृतं पातुं विष्णुपदं ब्रह्मरन्ध्राश्रितं तत्राश्रितममृतं पीयूषं । अतएवाहुराचार्याः—'चक्रं सहस्रपत्रं तु ब्रह्मरन्ध्रे सुधाधरम् । तत्सुधासारधाराभिरभिवर्धयते तनुम्' इति । मूलभारतेऽपि—'ब्रह्मरन्ध्रे स्थितो जीवः सुधया संप्लुतो यदा । तुष्टिगीतादिकार्याणि सप्रकर्षाणि साधयेत्' इति । पीत्वेत्यादि । स एवानिलः अम्बरपीयूषं ब्रह्मरन्ध्राश्रितममृतं पीत्वा अर्थात् समादाय पुनरिति तेनैव पथा वेगतस्तत्क्षणादेव आयाति स्वस्थान इति शेषः । तादृशस्य तस्य कार्यमाह—प्रीणयन्नित्यादि । अखिलं देहं प्रीणयन् सन्नास्ते इति भावः । अखिलमिति । शिखादिचरणपर्यन्तं न केवलं देहं पुष्णाति अपि तु जीवं जठरानलं च । जीवः पूर्वं व्याख्यातः । स च ब्रह्मरन्ध्रे स्थितः जठरानलः पाचकाग्निः तस्य पाचकादिशक्तिं करोतीत्यभिप्रायः । ननु देहग्रहणेन जीवानलादीनां ग्रहणमेव तत्कथं पृथगुक्तः ? उच्यते—देहग्रहणसामान्येनाङ्गप्रत्यङ्गविभागोऽभिहितः । जीवानिलौ तु विशेषेण तन्मूलौ । अतएव 'शरीराद्भिन्नो जीव' इति श्रुतिः । तस्मात् पृथगुक्तौ न दोषः । यतः—'आयुर्वर्णो बलं स्वास्थ्यमुत्साहोऽपचयप्रभाः । ओजस्तेजोऽग्नयः प्राणाश्चोक्ता देहेऽग्निहेतुकाः ॥ शान्तेऽग्नौ म्रियते युक्ते चिरंजीवत्यनामयः । रोगी स्याद्विकृते मूलमग्निस्तस्मान्निरुच्यते' इति ॥ ४८ ॥ ॥ ४९ ॥

**गू०**—अन्यदपि वायोः कार्यमाह—प्राणपवनं हृदयस्थो वायुः विष्णुपदामृतं पातुं कण्ठाद्बहिः विनिर्याति अम्बरपीयूषं पीत्वा पुनः वेगतः आयाति । किं कृत्वा हृत्कमलान्तरं स्पृष्ट्वा नाभिस्थः सन् जठरानलं जीवयन् अखिलं देहं प्रीणयन् पुनर्यातीति योजना । यद्वा नाभिस्थः प्राणपवन इति पाठस्तत्र एवमन्वयः । प्राणिनां यः पवनो नाभिस्थः सन् हृत्कमलान्तरं स्पृष्ट्वेति ज्ञेयं; शेषं तथैव ॥ ननु—'हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः' इत्युक्तत्वात् कथं नाभिस्थः प्राणपवनो भवतीति दूषणं ? उच्यते नाभिस्थो योऽधः । अस्य व्याख्या च प्राणिनां प्राणा नाभिस्थाः यतः प्राणशिरा नाभिं व्यपाश्रिताः, तत्कुतः; यतः नाभिः शिराभिरावृता केवलं आराश्चक्रनाभिरिवेति योजना । प्रकर्षेण अनन्तीति प्राणाः प्राणवायवस्तेनाङ्गादिभेदेन दशधा 'एवं दशविधो वायुः प्राणरूपेण संचरे'दित्युक्तेः । यद्यपि प्राणशब्देन इन्द्रियारोही जीवात्मादिवायवो गृह्यन्ते तथाप्यत्र शिरासु गतिमत्त्वाद्वायोरेव

१—अयमेव पाश्चात्यैः Oxygen. 'ऑक्सिजन' नाम्ना व्यवह्रियमाणः प्राणप्रदवायुविशेष इहावगन्तव्यः । इदं च तत्वं वायौ २१ तिभागात्मकत्वेन जले च १६ शभागात्मकत्वेन व्यवस्थितम् । तथाच श्रुतिः—'अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा । अग्निञ्च विश्वशम्भुवमापश्च विश्वभेषजीः' ( ऋ. सं. १,२३,२० ) इति, 'अप्सु ज्योतिः प्रतिष्ठितम्' (तै. आ. ९,८) इति च । वायौ चापि 'उदुत्ये अरुणप्सवश्चित्रायामेभिरीरते । वाश्रा अधिष्णुना दिवः ।' ( ऋ. सं. ७,७ ) इति वायूनामरुणत्वं, चित्रदर्शत्वं, विद्युद्गुणयुक्तत्वं प्राणदवायुनैवेति । २—उपलक्षणमिदम् । तेन श्रुतिविज्ञाता भौतिकच्छायावप्स्वपि विष्णुपदामृतस्य सत्ता अस्त्येव ।

ग्रहणं दशविधाः प्राणाद्या वायवः पञ्च तत्र प्राणो हृन्नाभिपादाङ्गुष्ठप्रवृत्तिः अपानस्त्रिककटिपृष्ठपार्श्वपादपायूपस्थवृत्तिः, समानो हृन्नाभिसर्वसन्धिप्रवृत्तिः, उदानो हृत्कण्ठतालुभ्रूमध्यवृत्तिः, व्यानस्त्वग्वृत्तिरिति पञ्चवायवः सांख्येनोक्ता इति भावः। वृत्तिर्गमनं क्रियाक्तिन्। वृत्यते इति वृत्तिः वायुस्तस्यैव प्राणसंज्ञेति सुश्रुताभिप्रायः। तथैव शिरावर्णने शारीरे धन्वन्तरिवचनम् 'नाभिस्थाः प्राणिनां प्राणाः प्राणनाभिं व्यपाश्रिताः। शिराभिरावृता नाभिश्चक्रनाभिरिवारकैः' ॥ प्राणाः पञ्च प्राणाः, यद्वा दश प्राणाः दशधा प्राणवायुरित्युक्तत्वात् 'एवं दशविधो वायुः प्राणरूपेण सञ्चरे'दिति वासुदेवानुभवः। तथाच रावणवचनं 'नियमितप्राणैर्मुहुर्मृग्यते' नियमिताः प्राणा दशधा प्राणवायवो यैस्ते नियमितप्राणाः योगिनः तैः परमेश्वरो हृदि मुहुः मृग्यते विचार्यते इत्येतस्यार्थः, तस्मान्न दोषः ॥ ४८ ॥ ४९ ॥

**दी०**—इदानीं आयुषः स्वरूपमाह—

**शरीरप्राणयोरेव संयोगादायुरुच्यते ॥ ५० ॥**
**कालेन तद्वियोगाच्च पञ्चत्वं कथ्यते बुधैः।**
**न जन्तुः कश्चिदमरः पृथिव्यां जायते क्वचित्।**
**अतो मृत्युरवार्यः स्यात् किंतु रोगान्निवारयेत् ॥५१॥**

**दी०**—अथायुर्लक्षणं तद्विपरीतलक्षणं चाह—शरीरेति। एवं पूर्वोक्ताभिप्रायात् शरीरप्राणयोः संयोगादायुरुच्यते कथ्यते, आयुरिति भूतात्मनः शरीरनिधनपर्यन्तं धर्माधर्मनिमित्तकसांसारिकसुखदुःखोपभोगसाधनम्। तद्विपरीतमाह—कालेनेत्यादि। कालोऽपि स्वयम्भूरेव कथितः। तथाच—'कालो हि नाम स्वयम्भूरनादिमध्यनिधनः' इत्यादि। भूतानि सङ्कलयति संहरणादिति कालः, सुखदुःखाभ्यां भूतानि योजयतीति वा कालः। अथवा कलयति मृत्युसमीपं नयति इति कालः, ईदृग्विधेनेत्यर्थः। तद्वियोगादिति तयोः प्राणशरीरयोर्वियोगात् विश्लेषात् पञ्चत्वं मरणं कथ्यते बुधैरिति शेषः। अतएवाह आचार्यः—न जन्तुरित्यादि। रोगान् निवारयेत्। वैद्य इति शेषः। तदुक्तं वैद्यलक्षणे—'व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः। एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः' इति। शेषं सुबोधम् ॥ ५० ॥ ५१ ॥

**गू०**—बुधैः शरीरप्राणयोगादायुः उच्यते, काले आयुषो निःशेषेण तद्वियोगात् प्राणवियोगात्पञ्चत्वं कथ्यते, पञ्चत्वं मरणम्, यतः मृत्योः प्रतीकारो नास्ति रोगाणां प्रतीकारोस्ति अतो रुग्भ्यस्तनुं रक्षेदित्याह न जन्तुरिति। अवार्यो दूरीकर्तुमशक्यः ॥ ५० ॥ ५१ ॥

**दी०**—इदानीं साध्यस्य व्याधेरप्रतिक्रियमाणत्वादवस्थान्तरप्राप्तिमाह—

**याप्यत्वं याति साध्यस्तु याप्यो गच्छत्यसाध्यताम्।**
**जीवितं हन्त्यसाध्यस्तु नरस्याऽप्रतिकारिणः ॥ ५२ ॥**

**दी०**—याप्यत्वमिति। अप्रतिकारिणो नरस्यातुरस्य सुसाध्यो व्याधिर्याप्यत्वं याति, किन्तु उक्तव्याधिः साध्यतां प्राप्य पश्चाद्याप्यत्वं प्राप्नोतीति भावः। याप्योऽप्यसाध्यतां गच्छति असाध्योऽपि जीवितं हन्तीति। अप्रतिकारिण इति रोगापनयनादिकक्रियारहितस्य, अत एवोत्पन्नमात्र एव व्याधिः प्रतिकार्यः। तदुक्तं—'जातमात्रे चिकित्स्यस्तु नोपेक्ष्योऽल्पतया गदः। वह्निशत्रुविषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ' इति। याप्य इत्यसाध्यभेदः। तथाच—'असाध्यो द्विविधो ज्ञेयो याप्यो यश्चाप्रतिक्रियः' इति। तत्र तु 'यापनीयं तु जानीयात् क्रियां धारयते तु यः। क्रियायां तु विनिवृत्तायां सद्य एव विनश्यति ॥' इति। अप्रतिक्रियश्चिकित्सावर्जितः, नियतप्राणहर इत्यर्थः। साध्योऽपि द्विविधः सुसाध्यः कृच्छ्रसाध्यश्च। तत्रैकदोषोत्पन्नो निरुपद्रवोऽचिरोत्पन्न इत्यादिलक्षणः सुखसाध्यः शस्त्रादिसाधनः कृच्छ्र इति ॥ ५२ ॥

**गू०**—रोगनिवारणे साध्यादिभेदमाह। अप्रतिकारिणः चिकित्सामकुर्वतः पुरुषस्य साध्यो रोगः याप्यतां याति। याप्यः असाध्यतां याति गच्छति। असाध्यो जीवितं हन्तीति योजना ॥ ५२ ॥

**दी०**—इदानीं धर्मादिसाधनशरीरस्य रक्षां निर्दिशन्नाह—

**धर्मार्थकाममोक्षाणां शरीरं साधनं यतः।**
**अतो रुग्भ्यस्तनुं रक्षेन्नरः कर्मविपाकवित् ॥ ५३ ॥**

**दी०**—इदानीं देहस्य चतुःपदार्थसाधनभूतस्य रक्षां निर्दिशन्नाह—धर्मेति। यतो हेतोः शरीरं धर्मादीनां साधनमस्ति अतः कारणात् रुग्भ्यो व्याधिभ्यस्तनुं शरीरं रक्षेत्। को रक्षेत्? इत्याह—नरः कर्मविपाकविदिति कर्म शुभाशुभं तस्य विपाकः फलं तं जानातीति कर्मविपाकवित्, एतेनादृष्टजन्यफलं सञ्चिन्त्य तत्परो भूत्वा कृतदानपूर्वकं कर्म कुर्यादित्यभिप्रायः। यतः—'पूर्वजन्मकृतं पापं व्याधिरूपेण तिष्ठति। अतो

दानादिकं कुर्यात् प्रसमीक्ष्य विचक्षणः ॥' इति ॥५३॥

**गू०**—यतः धर्मार्थकाममोक्षाणां शरीरं साधनं अतः रुग्भ्यो रक्षेदिति पूर्वेणैव संबन्धः । अतः कर्मविपाकवित् नरस्तनुं रक्षेत् कर्मविपाकवित्तद्विदानज्ञः ॥ ५३ ॥

**दी०**—अथ दोषादीनां वैषम्येनावस्थामाह—

**धातवस्तन्मला दोषा नाशयन्त्यसमास्तनुम् ।**
**समाः सुखाय विज्ञेया बलायोपचयाय च ॥ ५४ ॥**

**दी०**—धातव इति । सुखं स्वस्थता, बलमाङ्गिकमोजःसंज्ञकं उपचयं शरीरस्य वृद्धिरूपा सन्ततिः । तन्मला इति धातुमलाः । समा इति स्वपरिमाणस्थिताः इति यद्विवरणं कृतं तत्तेषां स्वभावपरिमाणंच तन्त्रान्तरीयवाक्येन दर्शयन्नाह । तद्यथा—'यः प्रसादपरोऽन्नस्य परं जीर्णस्य सर्वशः । स रसोऽञ्जलयस्तस्य नव देहेषु देहिनः । रक्तस्याञ्जलयस्त्वष्टौ शकृतः सप्त सर्वशः । पित्तस्याञ्जलयः पञ्च षट् कफस्य प्रचक्षते ॥ मूत्रस्य विद्याच्चत्वारो वसायाश्चाञ्जलित्रयम् । द्वावञ्जली मेदसस्तु मज्ज्ञ एकाञ्जलिर्मतः ॥ शुक्रस्यार्धाञ्जलिर्ज्ञेयो मस्तिष्कस्योजसस्तथा । चत्वारोऽञ्जलयः स्त्रीणां रजसः प्रकृतिस्थितिः ॥ द्वावञ्जली प्रसूतायाः स्तन्यस्यापि हि योषितः । प्रमाणमेतद्धातूनामदुष्टानामुदाहृतम् ॥ हीनाः स्युस्तत्प्रमाणात्तु प्रवृद्धाश्चापि धातवः । योजयन्ति विकारेषु दोषा वृद्धिक्षयप्रदाः' इति । अतएवाह वाग्भटः —'रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता' इति । अन्यच्च—'विकृताः प्रकृता देहं घ्नन्ति ते वर्धयन्ति च' इति । तथाच चरकेऽपि—'विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते । सुखसंज्ञकमारोग्यं विकारः स्वयमेव च' इति ॥ ५४ ॥

**गू०**—धात्वादीनामसमत्वसमत्वाभ्यां शरीरस्य दुःखसुखे आह—धातवः रसाद्याः सप्त तन्मलाः धातुमलाः, दोषा वातादय असमाः हीनाधिकाः तनुं नाशयन्ति समाः स्वप्रमाणस्थाः सुखा ज्ञेयाः तथा बलाय धातुवृद्धौ उपचयाय स्थौल्याय ॥ ५४ ॥

इति कालादिविवरणं समाप्तम् ॥

---

## अथ सृष्टिक्रमः ।

**दी०**—पूर्वमुक्तमादिशब्दात् सृष्टिक्रमशारीरग्रहणं अतस्तं दर्शयन्नाह—

**जगद्योनेरनिच्छस्य चिदानन्दैकरूपिणः ।**
**पुंसोऽस्ति प्रकृतिर्नित्या प्रतिच्छायेव भास्वतः ॥५५॥**

**दी०**—जगद्योनेरिति । जगद्योनेरित्यादिषु सा नित्या प्रकृतिरस्ति इति विषयः । यथा भास्वतो मार्तण्डस्य प्रतिच्छायेव प्रतिबिम्बमिव सा नित्या अस्तीति श्रुतिः । प्रकृतेः पर्यायमव्यक्तं नाम कथितम् । कीदृशस्य ? तमाह—जगद्योनेरिति । अखिलस्य जगतो योनिः संभवहेतुस्तस्येति । यद्वा जगच्छब्देन पृथिव्यादयोऽभिधीयन्ते कार्ये कारणोपचारात् । तेषां योनिरुत्पत्तिस्तस्येत्यर्थः । एतेनाभिव्यक्तिहेतुत्वमुक्तम् । पुनः कीदृशस्य ? अनिच्छस्येति । इच्छा अहंकारस्योत्पादिनी प्रतिपादिता तया रहितस्येत्यर्थः । एतेन निर्विकारत्वमुक्तम् । पुनः किंभूतस्य ? चिदानन्दैकरूपिण इति । चित् ज्ञानं आनन्दं परब्रह्मावबोधलक्षणं धर्मः, तद्द्वयमेवैकं रूपं यस्य । यद्वा—चित् स्वरूपानन्दमेवैकं रूपं यस्य ज्ञानानन्दस्येत्यभिप्रायः । तथाह्युक्तम्—'अस्ति ब्रह्म चिदानन्दं स्वयं ज्योतिर्निरञ्जनम् । ईश्वरो लिङ्गमित्युक्तमद्वितीयमयं विभुः ॥ निर्विकारं निराकारं सर्वेश्वरमनीश्वरम् । सर्वशक्ति च सर्वज्ञं तदंशा जीवसंज्ञकाः ॥ अनाद्यविद्योपहिता यथाग्नेर्विस्फुलिङ्गकाः' इति ॥ ५५ ॥

**गू०**—अथ सृष्टिक्रमः । आयुर्वेदस्य फलं चिकित्सा पुरुषस्य, पुरुषस्तु चतुर्विंशतितत्त्वजीवात्मनश्च स्वरूपनिरूपणाय सृष्टिक्रममाह । पुंसः चिदानन्दनिरूपितस्य प्रकृतिः नित्या अस्ति । केव भास्वतः सूर्यस्य प्रतिच्छाया इव । कथंभूतस्य पुंसः । जगद्योनेः जगदुत्पादकस्य । जगच्छब्देन पृथिव्यादयः । ननु गच्छतीति जगत् तेषामुत्पत्तौ समवायिकारणं । पुनः कथंभूतस्य । अनिच्छस्य इच्छारहितस्य । पुनः कथंभूतस्य । चिदानन्दैकरूपिणः चिदानन्दमेव एकं रूपं यस्य । अनेन ईश्वरस्य नित्यत्वात् तैरपि नित्यत्वं प्रतिपादितम् ॥ ५५ ॥

**दी०**—इदानीं अचेतसो नार्याः प्रकृतेः पुरुषस्य चैतन्ययोगेन सृष्ट्युत्पत्तिमाह—

**अचेतनादि चैतन्ययोगेन परमात्मनः ।**
**अकरोद्विश्वमखिलमनित्यं नाटकाकृति ॥ ५६ ॥**

**दी०**—अथ कर्तृत्वनिमित्ततया पूर्वश्लोकेन संबन्धः । तेन सा मूलप्रकृतिः परमात्मनो योगेन कृत्वा अखिलं विश्वमकरोदिति तात्पर्यार्थः । योगश्चित्तवृत्तिनिरोधलक्षणः । अखिलं चराचरात्मकं, कीदृशं ? तदाह—अचेतनादीति । अचेतनमव्यक्तमादिर्यस्य तदचेतनादि, चैतन्य-

मिति चेतनान्वितम् । ननु कथमचेतनस्य कारणत्वं प्रवर्तते ? तदसङ्गतमिति, सत्यं-यथा वत्सविवृद्ध्यर्थं क्षीरसंज्ञं कारणत्वेन प्रवर्तते तद्वदिति । अन्यत् सविस्तरं विस्तरभयान्न लिखितम् । पुनः कीदृशं ? अनित्यमिति विनाशिघटपटादिवत् । पुनः कथंभूतं ? नाटकाकृति नाटकस्वरूपं ऐन्द्रजालिकवस्तुवदिति भावः ॥ ५६ ॥

**गू०**—अचेतनेत्यादि । अचेतना जडा अपि प्रकृतिः परमात्मनः चैतन्ययोगेन अखिलं विश्वं अकरोत्, किंभूतं विश्वम् । अनित्यं नश्वरम्, पुनः किंभूतं । नाटकाकृति इन्द्रजालवत् अखिलं स्थावरजंगमादिलक्षणं विश्वशब्दस्य सर्वादित्वात् त्रिषु चरितत्वादत्र नपुंसके ॥ ५६ ॥

**दी०**—इदानीं सृष्ट्युत्पत्त्युपक्रमे प्रकृते बुद्ध्यादीनाह—

**प्रकृतिर्विश्वजननी पूर्वं बुद्धिमजीजनत् ॥ ५७ ॥**
**इच्छामयीं महद्रूपामहङ्कारस्ततोऽभवत् ।**
**त्रिविधः सोऽपि संजातो रजःसत्त्वतमोगुणैः ॥५८॥**

**दी०**—इदानीमेकेन कारणेन सर्वेषां कार्याणामुत्पत्तिक्रममाह—प्रकृतिरिति । प्रकृतिरित्यव्यक्तापरपर्याया पूर्वमादौ बुद्धिं महानिति विकारसंज्ञं अजीजनदुत्पादयामास । कीदृशीं ? इच्छामयीं, सत्त्वरजस्तमोगुणस्वभावैर्नानात्मिकामित्यर्थः । पुनः कीदृशीं ? महद्रूपां इति महानिति रूपं पर्यायनाम यस्याः सा तथा तां । यद्वा निर्मलस्फटिकोपलप्रख्यां सत्त्वसमुद्रेकत्वात् । तत इति बुद्धितत्त्वात् अहङ्कारोऽभिमानव्यापारलक्षणोऽभवत् । स एव सत्त्वादिगुणैः कृत्वा त्रिविधः सञ्जातः, त्रिविध इति वैकारिकस्तैजसो भूतादिरित्यर्थः । तत्र वैकारिकः सात्त्विकः, तैजसो राजसः, भूतादिस्तामस इति ॥ ५७ ॥ ५८ ॥

**गू०**—प्रकृतीत्यादि । किंभूतां बुद्धिं इच्छामयीं । पुनः महद्रूपां, ततः बुद्धेः सकाशादभवदिति योजना । प्रकृतीति प्रकर्षेण क्रियते अनया इति प्रकृतिः गुणानां साम्यं प्रकृतिः सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरिति सांख्ये सा प्रकृतिरष्टधा भेदभिन्ना । तथाचोक्तं सुश्रुते-'अव्यक्तं महानहंकारः पञ्चतन्मात्राणीत्यष्टौ प्रकृतयः' । गीतायां चोक्तम्-'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहंकार' इति पञ्चभेदभिन्ना प्रकृतिरष्टधा अतो बुद्ध्यादयो वक्ष्यमाणाः प्रकृतेर्भेदा बुद्धिज्ञानस्वरूपा इच्छामयीं इच्छास्वरूपां महद्रूपां बहुरूपाम् । यतः गीतायामुक्तम्—'बहुशाखा ह्यनन्ताश्च बुद्धयो व्यवसायिना'मिति । स अहंकारस्त्रिविधो भवतीत्याह—सोऽप्यहंकारः रजःसत्त्वतमोगुणैस्त्रिविधः संजातः अभवत् ॥ ५७ ॥ ५८ ॥

**दी०**—तस्मादिन्द्रियाणि भवन्तीत्याह—

**तस्मात्सत्त्वरजोयुक्तादिन्द्रियाणि दशाभवन् ।**
**मनश्च जातं तान्याहुः श्रोत्रत्वङ्नयनं तथा ॥ ५९ ॥**
**जिह्वाघ्राणवचोहस्तपादोपस्थगुदानि च ।**
**पञ्च बुद्धीन्द्रियाण्याहुः प्राक्तनानीतराणि च ॥६०॥**
**कर्मेन्द्रियाणि पञ्चैव कथ्यन्ते सूक्ष्मबुद्धिभिः ।**

**दी०**—अथ त्रिविधस्यापि तस्य कार्यमाह—तस्मादिति । तस्मादित्यहङ्कारात् दशेन्द्रियाण्यभवन् न केवलं दशसंख्याकानि-मनोऽपि इन्द्रियसंज्ञमुत्पन्नम् । कीदृशादहङ्कारादित्याह—सत्त्वरजोयुक्तादिति । सत्त्वरजोग्रहणात् तमोऽपि प्राप्तमेव यतः सात्त्विकादहङ्कारात् राजससहायात् तमोमात्रयानुविद्धादेकादशेन्द्रियाण्युत्पद्यन्त इति भावः । एके तस्मादित्यस्य स्थानेऽत्र सत्त्वरजोयुक्तादिति पठन्ति व्याख्यानयन्ति च तानीन्द्रियाणि च । सांख्ये तु अहंकाराणि कथितानि वैद्यके भौतिकानीत्यभिप्रायः । तत्र पञ्च प्राक्तनानि श्रोत्रादीनि बुद्धीन्द्रियाण्याहुः । बुद्धेराश्रयत्वात् । प्राक्तनानि पूर्वपठितानि इतराण्यवशिष्टानि पञ्च कर्मेन्द्रियाणि कथ्यन्ते तेषु कर्मणामाश्रयत्वात् । पूर्वाणि पञ्च श्रोत्रत्वङ्नयनजिह्वाघ्राणानि इतराणि च पञ्च वचोहस्तपादोपस्थगुदादीनि । सूक्ष्मबुद्धिभिरिति ग्रहणेन मनोऽप्युभयात्मकं सूच्यते । बुद्ध्यात्मककर्मात्मकमित्यर्थः । बुद्धीन्द्रियाणां कर्मेन्द्रियाणां च मनोधिष्ठानानामेव प्रवृत्तेः ॥ ५९ ॥ ६० ॥

**गू०**—तस्मात्सत्त्वरजोयुक्तादहंकारात् दश इन्द्रियाणि अभवन्, एकादशं मनः । तेषां नामान्याह मन एकादशं तानि दश श्रोत्रं कर्णद्वयं त्वक् त्वचा, नयनं नेत्रयुग्मं जिह्वा प्रसिद्धा, घ्राणं नासारन्ध्रे वचो वदनं हस्तौ द्वौ, पादं द्वे उपस्थं मेढ्रं योनिश्च गुदं प्रसिद्धम् । दशेन्द्रियाणां मध्ये पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि भवन्ति तयोर्भेदमाह-पञ्च बुद्धीन्द्रियाण्याहुः प्रोक्तानि, तानीतराणि चेति प्राक्तनानि श्रोत्रादीनि पञ्च बुद्धीन्द्रियाणि बुद्धेराश्रयत्वात्; इतराणि वाचःप्रभृतीनि पञ्च कर्मेन्द्रियाणि कर्माश्रयत्वात् सूक्ष्मबुद्धिभिरेतानि कथ्यन्ते इति योजना ॥५९॥६०॥

दी०—त्रिविधाहंकारात्तन्मात्रापञ्चकं भवति अतस्तदाह—

**रजःसत्त्वगुणोत्कृष्टादहङ्कारादथाभवत् ॥ ६१ ॥**
**तन्मात्रपञ्चकं तस्य नामान्युक्तानि सूरिभिः ।**
**शब्दतन्मात्रकं स्पर्शतन्मात्रं रूपमात्रकम् ॥ ६२ ॥**
**रसतन्मात्रकं गन्धतन्मात्रं चेति तद्विदुः ।**
**तन्मात्रपञ्चकात्तस्मात्संजातं भूतपञ्चकम् ॥ ६३ ॥**
**व्योमानिलानलजलक्षोणीरूपं च तन्मतम् ।**

दी०—रज इत्यादि । अथानन्तरम्, अहंकारादिति अहंकारो भूतादिसंज्ञा तस्मादिति तामसरूपादित्यभिप्रायः । कीदृशादित्याह—रजःसत्त्वगुणोत्कृष्टादिति राजससहायात् सत्त्वमात्रयाऽनुविद्धात् तामसादहङ्कारादित्यर्थः । ईदृशात्तन्मात्रपञ्चकं भवतीति तात्पर्यार्थः । सा सा मात्रा यस्मिन् तत्तन्मात्रं तच्चानुद्भूतस्वभावं वाह्येन्द्रियाग्राह्यं वक्ष्यमाणशब्दादीन्येव पञ्चतन्मात्राणीति । तच्च योगिभिरेव ग्राह्यम् । तन्मात्रपञ्चकादिति । तस्मात्पूर्वोक्तात्तन्मात्रपञ्चकात्, शब्दादेर्भूतपञ्चकं व्योमादिकं सञ्जातं सम्यक् प्रकारेणोत्पद्यत इति । सम्यक् प्रकारग्रहणेनैकोत्तरपरिवृद्धिः सूच्यते । तद्यथा शब्दतन्मात्राच्छब्दतद्गुणं व्योम, शब्दतन्मात्रसहितात् स्पर्शतन्मात्रात् शब्दस्पर्शगुणो वायुः, शब्दस्पर्शतन्मात्रसहितात् रूपतन्मात्राच्छब्दस्पर्शगुणं तेजः, शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रात् शब्दस्पर्शरूपरसगुणा आपः, शब्दस्पर्शरूपरसतन्मात्रसहितात् गन्धतन्मात्रात् शब्दस्पर्शरूपरसगन्धगुणा पृथिवी । पतञ्जलिमतानुसारिणश्च शब्दादिभ्यो व्योमादीनामुत्पत्तिमिच्छन्ति ॥ ६१–६३ ॥

गू०—तमःसत्त्वगुणोत्कृष्टादहंकारात्तन्मात्रपञ्चकमभवत्, तस्य नामानि सूरिभिः उक्तानि तानि नामान्याह–शब्दतन्मात्रकं श्रोत्रस्वरूपम्, स्पर्शतन्मात्रकं त्वग्मात्रकं त्वक्स्वरूपम्; रूपतन्मात्रकं नयनमात्रकं नयनस्वरूपम्; रसतन्मात्रकं जिह्वामात्रकं जिह्वास्वरूपम्, गन्धतन्मात्रं घ्राणमात्रं घ्राणस्वरूपम्, तन्मात्रपञ्चकात् भूतपञ्चकं जायत इत्याह—तस्मात् श्रोत्रादिपञ्चतन्मात्रात् भूतपञ्चकं संजातं भवतीत्यध्याहारः । तद्भूतपञ्चकं व्योमानिलानलजलक्षोणीरूपं मतं कथितं, व्योम आकाशं, अनिलो वायुः, अनलोऽग्निः, जलं प्रसिद्धं, क्षोणी पृथिवी, तद्रूपं तेषां स्वरूपम् ॥ ६१–६३ ॥

दी०—इदानीं तन्मात्राणां विशेषानाह—

**शब्दः स्पर्शश्च रूपं च रसगन्धावनुक्रमात् ॥६४॥**
**तन्मात्राणां विशेषाः स्युः स्थूलभावमुपागताः ।**

दी०—इदानीं पञ्चकानां तन्मात्रकाणां विशेषा उच्यन्ते—शब्द इति । अनुभवयोग्यैः सुखदुःखमोहरूपधर्मैर्विशेष्यन्त इति विशेषाः, ते शब्दस्पर्शरूपरसगन्धाः । तन्मात्राणि त्वविशेषाणि यतस्तानि अनुभवयोग्यैः सुखादिभिर्विशेषं कर्तुं न शक्यन्ते सूक्ष्मत्वात् । अतएव स्थूलभागमुपागता अमी विशेषा इत्यर्थः । केचिदमुं श्लोकं तन्मात्रपञ्चकादनन्तरं पठन्ति सङ्गतत्वात् ॥ ६४ ॥

गू०—शब्दः श्रोत्रविशेषभावः, रूपं नेत्रविशेषभावः, रसो जिह्वाविशेषभावः, गन्धः घ्राणविशेषभावः एते तन्मात्राणां विशेषाः स्युः । किंभूताः स्थूलभावत्वं प्राप्ताः । एते शब्दादयः ॥ ६४ ॥

दी०—अथेन्द्रियाणां विशेषाणां विषयान् दर्शयन्नाह—

**बुद्धीन्द्रियाणां पञ्चैव शब्दाद्या विषया मताः॥६५॥**
**कर्मेन्द्रियाणां विषया भाषादानविहारिताः ।**
**आनन्दोत्सर्गकौ चैव कथितास्तत्त्वदर्शिभिः ॥६६॥**

दी०—बुद्धीन्द्रियाणामिति । श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानां शब्दाद्या इति शब्दस्पर्शरूपरसगन्धाः एते तु तेषामनुक्रमेण बोद्धव्याः । कर्मेन्द्रियाणामिति वचोहस्तपादोपस्थगुदानां यथाक्रमं भाषादानविहारानन्दोत्सर्गा विषयाः कथिताः, भाषा वचनं, आदानं ग्रहणम्, विहारोऽत्र चलनादिकं, आनन्दो हर्षः, उत्सर्गो मलपरित्यागः, इति तत्त्वदर्शिभिः पुरुषैश्चतुर्विंशतितत्त्वरहस्यज्ञापकैरित्यर्थः ॥ ६५ ॥ ६६ ॥

गू०—पञ्चज्ञानेन्द्रियाणां विषयाः कथिताः, तत्र शब्दः श्रोत्रविषयः, स्पर्शः त्वग्विषयः, रूपं नेत्रविषयः; रसः जिह्वाविषयः, गन्धः घ्राणविषयः; कर्मेन्द्रियाणां भाषादयो विषयाः कथिताः । विशेषा अनुभवाः; पक्षे सुखदुःखमोहरूपैर्धर्मैर्विशेष्यन्त इति विशेषाः अत्र कर्मणि घञ् प्रत्ययः । तन्मात्राणि त्वविशेषाणि यतस्तान्यनुभवयोग्यैः सुखादिभिर्विशेषेषु

१—'तम' इति गूढार्थदीपिकासम्मतः पाठः ।

न शक्यन्ते सूक्ष्मत्वात् । ततः वचसः भाषा भाषणं, जिह्वया अदनं भक्षणं, पादस्य विहारता गमनागमनं, उपस्थस्य योनिलिङ्गयोः आनन्दः स्त्रीपुरुषसौख्यविशेषः, गुदस्य विसर्गः पुरीषत्यागः ॥ ६५–६६ ॥

**गू०**—अथ प्रकृतिविवरणम् ( तत्र ) प्रकृतेर्नामान्याह—

**प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा ।**
**एतानि तस्या नामानि शिवमाश्रित्य या स्थिता ६७**

**दी०**—इदानीं मूलप्रकृतेः पर्यायनामान्याह—प्रधानमिति । प्रधानं प्रकृतिरिति मूलप्रकृतिः शक्तिरिति कारणरूपा, नित्या अविनाशिनी, अविकृतिर्विकाररहिता, तस्याः प्रकृतेः, शिवमिति परब्रह्मलक्षणं आश्रित्य या स्थिता सूर्यस्य प्रतिबिम्बवत् सा च सत्त्वरजस्तमःस्वरूपा भवति । तदुक्तं—'सर्वभूतानि कारणमकारणं सत्त्वरजस्तमोलक्षणमष्टरूपमखिलस्य जगतः संभवे हेतुरव्यक्तं नाम' इति ॥ ६७ ॥

**गू०**—या प्रकृतिः शक्तिः शिवं परमेश्वरं आश्रित्य स्थिता तस्या एतानि नामानि भवन्तीति योजना । एवं प्रकृतेः प्रधानं नाम एकं प्रकृतिः एका शक्तिः एका नित्या एका अविकृतिः । सुश्रुतमते अव्यक्तं च प्रकृतेर्नाम । न व्यज्यते स इत्यव्यक्तं मूलप्रकृतिपर्याया इति डल्हणः ॥ ६७ ॥

**गू०**—इदानीं चतुर्विंशतितत्त्वानां समासिकमः कथ्यते—

**महानहङ्कृतिः पञ्चतन्मात्राणि पृथक्पृथक् ।**
**प्रकृतिर्विकृतिश्चैव सप्तैतानि बुधा जगुः ॥ ६८ ॥**
**दशेन्द्रियाणि चित्तं च महाभूतानि पञ्च च ।**
**विकाराः षोडश ज्ञेयाः सर्वं व्याप्य जगत्स्थिताः ६९**
**एवं चतुर्विंशतिभिस्तत्त्वैः सिद्धे वपुर्गृहे ।**
**जीवात्मा नियतो नित्यो वसति स्वान्तदूतवान् ७०**
**स देही कथ्यते पापपुण्यदुःखसुखादिभिः ।**
**व्याप्तो बद्धश्च मनसा कृत्रिमैः कर्मबन्धनैः ॥ ७१ ॥**

इदानीं चतुर्विंशतिके तत्त्वराशौ प्रकृतित्वं निरस्यन् कथितमुपसंहरन्नाह—महानिति । एतानि सप्त महदादीन्येव प्रकृतिर्विकृतिश्च भवन्तीति पिण्डार्थः । प्रकृतिरित्यपरेषां कारणभूता, विकृतिरिति मूलप्रकृतेः कार्यरूपा, अत्र यदव्यक्तग्रहणं न कृतं तद्विकृतिपदग्रहणात्, अव्यक्तं तु केवलं हेतुभावेन प्रकृतिरेव । महदादयः सप्त कार्यत्वेन विकृतयोऽपि ज्ञेयाः । पञ्चतन्मात्राणीति शब्दादीनि । इत्येवं बुधाः पण्डिता जगुः कथितवन्तः । इदानीं षोडशविकारान् दर्शयन्नाह—दशेन्द्रियाणीति । षोडश विकाराः कार्याणि ते विकाराः दशेन्द्रियाणीति श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाग्हस्तोपस्थपायुपादानि, चित्तं चेति मनोऽपीन्द्रियभूतमिति भावः । महाभूतानि आकाशपवनदहनतोयभूमय इति । एवं षोडश विकाराः, एते तु सर्वं चराचरात्मकं जगत् संसारं व्याप्य स्थिता इत्यर्थः । एवमिति पूर्वोक्तप्रकारेण । चतुर्विंशतिभिस्तत्त्वैरिति अव्यक्तं महानहङ्कारः, शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, गन्धतन्मात्रं, श्रोत्रं, त्वक्, चक्षुः, घ्राणं, रसना, त्वक्, हस्तपादं, उपस्थं, पायुः, मनः, पृथिवी, आपः, तेजः, वायुः, आकाशं, चतुर्विंशतिकतत्त्वानि पृथग्दर्शितानि, एभिः सह जीवात्मा लिङ्गशरीरं नित्यमविनाशि नियतः सर्वकालं वपुर्गृहे स्थूलशरीरे वसति तिष्ठतीत्यर्थः । कीदृशस्तमाह—स्वान्तदूतवानिति । स्वान्तं मनस्तदेव दूतो यस्य स तथा मनोदूत इत्यर्थः । 'स्वान्तं हृन्मानसं मनः' इत्यभिधानात् । स देही कथ्यते इति । स जीवात्मा देही पुरुषव्यक्तिः । देहं महदादिकृतसूक्ष्मलिङ्गशरीरमुच्यते तदस्यास्तीति देही कथ्यते । सोऽपि कर्मपुरुषो वाच्यः पञ्चविंशतितमः कथितः । अतएव पापपुण्यसुखदुःखादिभिर्व्याप्तः । मनसा कृत्रिमैः कर्मबन्धनैश्च बद्धः, एतेन कर्मपुरुषस्य शरीरात्मनोः संयोगकारकेण मनसा संयोगे पापपुण्यं सुखदुःखादयो गुणा उत्पद्यन्त इति भावः । आदिशब्दात् इच्छाद्वेषप्रयत्नप्राणापानोन्मेषबुद्धिमनःसङ्कल्पविचारणास्मृतिविज्ञानाध्यवसायविषयोपलब्धिगुणा ज्ञातव्याः । नन्वविकृतो जीवात्मा कथं विकारिवस्त्वभिव्याप्तः ? सत्यं, निर्विकारस्यापि विकारवस्तुसंयोगेन विकारित्वं स्यात् यथा सन्ध्याराशिगिरिविकारिनिकरसंयोगादरुणं गगनतलं तदोपमं भवति तद्वदित्यभिप्रायः । तत्र लिङ्गशरीरे विकाराः प्रतिबिम्बिता इव तिष्ठन्तीत्येके भाषन्ते । यथा तडागोदके प्रतिबिम्बितो द्रुमस्तडागोदकप्रकम्पेण प्रकम्पात्मकः कथ्यते इति ॥ ६८–७१ ॥

**गू०**—महानित्यादि । महान्बुद्धिः अहंकृतिरहंकारः, पञ्चतन्मात्राणि शब्दादीनि एतानि सप्त बुधाः प्रकृतिं

विकृतिं च जगुः । प्रकृतिः कारणं ननु कस्यचित्कार्यमित्यर्थः । महत्तत्त्वादयः सप्त महानहंकारः पञ्चतन्मात्राणीति शक्तिप्रकृतेर्विकृतेर्विकलापकार्याणीति सुश्रुतः । तथाच ग्रन्थान्तरे 'इन्द्रियाणां संभूतीनां कारणत्वान्महर्षिभिः । महत्तत्त्वादयः सप्त प्रोक्ता विकृतयोऽपि च ।' अथ षोडश विकारानाह—दशेन्द्रियाणि श्रोत्रादीनि, चित्तं मनः महद्भूतानि पञ्च पृथिव्यादीनि एते षोडश विकाराः जगद्व्याप्य स्थिताः । विकाराः कार्याणि । एवंभूते गृहे जीवात्मा वसतीत्याह—एवममुना प्रकारेण चतुर्विंशतिभिस्तत्त्वैः सिद्धे वपुर्गृहे जीवात्मा वसति । किंभूतः ? नियतेः शुभाशुभकर्मणः, निघ्नः आपन्नः । पुनः किंभूतः ? स्वान्तदूतवान् स्वान्तं मन एव दूतो यस्य सः मनोदूतयुक्त इत्यर्थः । स जीवात्मा देही कथ्यते इत्याह—स जीवात्मा पापादिभिः मनसा कृत्रिमैः कर्मबन्धनैर्व्याप्तो बद्धश्च देही कथ्यते । देहोऽस्यास्तीति देही जीवात्मा ॥६८–७१॥

**गू०**—तस्य देहिनो यानि बन्धाय भवन्ति तान्याह—

**कमाक्रोधौ लोभमोहावहङ्कारश्च पञ्चमः ।**
**दशेन्द्रियाणि बुद्धिश्च तस्य बन्धाय देहिनः ॥७२॥**

**दी०**—कर्मबन्धनैर्बद्धश्चेति यदुक्तं तदिदानीं तस्य बन्धनान्याह—कामक्रोधाविति । तस्य देहिन इति पूर्वोक्तस्य पुरुषस्य कामादयो बन्धनाय भवन्तीत्यर्थः । कामो मनसः संकल्पविशेषः, तदुक्तं—'स्त्रीषु जातो मनुष्याणां स्त्रीणां च पुरुषेषु वा । परस्परकृतः स्नेहः काम इत्यभिधीयते' इति । क्रोधस्तु मनसो व्याधिरूपो हिंसात्मकः । तथाहि 'यदुष्मा हृदयाज्जन्तोः समुत्तिष्ठति वै सकृत् । परहिंसात्मकः क्लेशः क्रोध इत्यभिधीयते' इति । लोभो गर्धः तृष्णा । तथा चोक्तं—'परार्थं परभोगांश्च परसामर्थ्यमेव च । दृष्ट्वा श्रुत्वा च या तृष्णा जायते लोभ एव सः' इति । मोहस्तु मिथ्यावबोधः सर्वपापमूलं यथा—'अश्रेयःश्रेयसोर्मध्ये भ्रमणं संशयो भवेत् । मिथ्याज्ञानं तु तं प्राहुरहिते हितदर्शनम्' इति । अहङ्कारोऽभिमानव्यापारलक्षणः । यथा—'अहमित्यभिमानेन यः क्रियासु प्रवर्तते । कार्यकारणयुक्तस्तु तदहङ्कारलक्षणम्' इति । दशेन्द्रियाणि प्रसिद्धानि बुद्धिश्चेति मनोव्यापारः ॥ ७२ ॥

**गू०**—तस्य देहिनो जीवस्य कामादयो बन्धाय भवन्तीति योजना ॥ ७२ ॥

**दी०**—येन बद्धो मुक्तश्च भवति सुखदुःखे च भवतस्तत्प्रकारमाह—

**आप्नोति बन्धमज्ञानादात्मज्ञानाच्च मुच्यते ।**
**तद्दुःखयोगकृद्व्याधिरारोग्यं तत्सुखावहम् ॥ ७३ ॥**

इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायां कलादिकाख्यानाध्यायः ॥ ५ ॥

---

इदानीं बन्धनमाह—प्राप्नोतीति । अज्ञानादिति मोहाद्बन्धनं क्लेशमाप्नोतीति पुरुष इति शेषः, स एव पुरुष आत्मज्ञानाद्धर्माधर्मविचारणान्मुच्यते बन्धनादेव, कैवल्यं प्राप्नोतीति भावः । अतएव व्याधिस्तु दुःखयोगकृद्भवति तत् सुखावरोहमारोग्यमिति तद्दुःखयोगकृदिति तत् तयोः शरीरशरीरिणोः शरीरमनसोरिति केचित्, दुःखसंयोगकृदिति दुःखं तु स्वभावतः प्रतिकूलवेदनीयम् । सुखं तु स्वभावतोऽनुकूलवेदनीयम् । आरोग्यं स्वास्थ्यव्यापारलक्षणम् । इति सृष्टिक्रमशारीरम् ॥ ७३ ॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेन आढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां प्रथमखण्डे कलादिकाख्यानं नाम पञ्चमोऽध्यायः ॥ ५ ॥

---

**गू०**—अज्ञानात्कर्मादिभिर्व्याप्तः बन्धं प्राप्नोति । आत्मज्ञानात् तत्त्वज्ञानात् मुच्यते जन्मादिभिरिति शेषः । व्याधिस्तु तद्दुःखयोगकृत् तस्य देहिनः दुःखयोगं करोतीत्यर्थः । तद्दुःखसंयोगाद्व्याधय इति सुश्रुतोक्तव्याधिलक्षणत्वात् आरोग्यं तु तत्सुखावहं भवतीति सम्बन्धः । इति सृष्टिक्रमकथनम् ॥ ७३ ॥

इति श्रीशार्ङ्गधरगूढार्थदीपिकायां शारीरकलादिकथनसृष्टिक्रमकथनाध्यायः ॥ ५ ॥

---

## षष्ठोऽध्यायः ।

### अथाहारादिगतिरध्यायः ।

**दी०**—इदानीमाहारादिगतिरध्यायः पूर्वं दर्शितस्तमाह—

**यात्यामाशयमाहारः पूर्वं प्राणानिलेरितः ।**
**माधुर्यं फेनभावं च षड्रसोऽपि लभेत सः ॥ १ ॥**

**दी०**—अथेति । यातीत्यादि । आहारः पाञ्चभौतिकस्वरूपोऽशनमित्यर्थः । तदुक्तं सुश्रुते—'पञ्चभूतात्मके देहे आहारः पाञ्चभौतिकः' इति । एवंविधः स आहारः पूर्वमादौ आमाशयं याति प्राप्नोतीत्यर्थः । आमाशयं च नाभिस्तनान्तरे कोष्ठविशेषमाहुः, यथा—'नाभिस्तनान्तरे जन्तोराहुरामाशयं बुधाः' इति । कीदृशस्तमाह—प्राणानिलेरित इति । प्राणवायुना प्रेरित इति भावः । 'हृदि प्राणानिलो मतः' इति वचनात् । तत्र षड्रसयुक्तोऽपि स आहारो माधुर्यं मधुररसबाहुल्यं फेनभावं च लभते प्राप्नोति कफस्थानगतत्वात्, कफोऽपि मधुर इति प्रसिद्धः; अतएवाह तन्त्रान्तरे—भुक्त्वादौ कफस्य वृद्धिरिति रससाधर्म्यात् अस्यैवामाजीर्णसंज्ञा, यतः 'माधुर्यमन्नं स्मृतमामसंज्ञम्' इति ॥ १ ॥

**गू०**—यदा शरीरी जातस्तदा आहारापेक्षा जाता, अत आहारपाकक्रममाह—यातीत्यादि । पूर्वं प्रथमतः प्राणानिलेरितः प्राणवायुप्रेरितः आहारः चोष्मादिपञ्चविधलक्षणः आमाशयं याति नाभिस्तनान्तरमामाशयः तत्र गत्वा माधुर्यं मधुरभावं फेनभावं च लभते । किंभूतः आहारः षड्रसः । वाग्भटे चैवं 'आदौ षड्रसमप्यन्नं मधुरीभूतमीरयेत् । फेनभावं रसं जातं विदाहि ह्यम्लतां गतम्' इति ॥ १ ॥

**गू०**—अम्लत्वं च प्राप्नोतीत्याह—

**अथ पाचकपित्तेन विदग्धश्चाम्लतां व्रजेत् ।**
**ततः समानमरुता ग्रहणीमभिनीयते ॥ २ ॥**

**दी०**—अथ स्थानान्तरप्राप्तिमाह—अथ पाचकेति । अथानन्तरम् स एवामाशयस्थिताहारः पाचकपित्तेन पाचकाग्नितेजसा विदग्धः सन् पच्यमानाऽभिमुखः सन्नम्लतां व्रजेत्, यतोऽम्लात्पित्तं जायते तत्रावस्थायां विदग्धाजीर्णसंज्ञं गतमम्लभावमिति । आमाशयाच्चलितोऽप्राप्तग्रहणीपदो यदा भवति तत्र स्थानान्तरं वदन्त्येके, नैवं सर्वमतं, किन्तु पाचकाग्निस्थानसमीपवर्ती यदा भवति तदा विदग्धो भवतीत्येके भाषन्ते । स्वमते तु आमाशयावस्थायामेव पित्तवैदग्ध्यादम्ल एव स्यात् यतः पित्तविदग्धमम्लतामुपैति । इदानीं तृतीयावस्थागतस्य कार्यमाह—तत इत्यादि । ततस्तस्मात्स्थानात् समानमरुता नाभिगतवायुना कृत्वा ग्रहणीं वह्निस्थानमभिनीयते प्राप्यते आहार इति शेषः । एतत् स्थानं कलाशब्देन वाच्यं यतः 'षष्ठी पित्तधरा नाम या कला परिकीर्तिता । पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्तिता ।' इति । ग्रहण्यामपि कोष्ठवह्निना कृत्वा पाच्यते, कोष्ठग्रहणं धात्वग्निनिरासार्थं । तस्मात्कटुको जायते इति तात्पर्यार्थः । यत्कटुकाज्जायते वायुरिति तद्विष्टब्धाजीर्णमाहुरित्येके । यदुक्तं 'किञ्चिद्विपक्वं भृशतोदशूलं विष्टब्धमानद्धविरुद्धवातम्' इति ॥ २ ॥

**गू०**—अथेत्यनन्तरं पाचकपित्तेन विदग्धः अम्लतां व्रजेत् ततः समानमरुता ग्रहणीं अभिनीयते प्राप्यते । ग्रहणी कला । ग्रहण्यां किं भवतीत्याह—कोष्ठवह्निना यदा ग्रहण्यां पच्यते तदा कटुर्जायते तद्विधो भवति संपक्वात्सम्यक् पक्वात् रसः भवति अपक्वादामसंभवो भवतीति योजना ॥ २ ॥

**गू०**—पुनः वह्निना पक्वः किं भवतीत्याह—

**(षष्ठी पित्तधरा नाम या कला परिकीर्तिता ।**
**पक्वामाशयमध्यस्था ग्रहणीत्यभिधीयते ॥ ३ ॥**[1]
**ग्रहण्यां पच्यते कोष्ठवह्निना जायते कटुः ।**
**रसो भवति संपक्वादपक्वादामसंभवः ॥ ४ ॥**
**वह्नेर्बलेन माधुर्यं स्निग्धतां याति तद्रसः ।**
**पुष्णाति धातूनखिलान्सम्यक्पक्वोऽमृतोपमः ॥५॥**
**मन्दवह्निविदग्धश्च कटुश्चाम्लो भवेद्रसः ।**
**विषभावं व्रजेद्वापि कुर्याद्वा रोगसंकरम् ॥ ६ ॥**

**दी०**—अथ तादृश्याहारस्य द्विविधामवस्थां वक्तुमाह—रस इति । वह्निस्थाने स्थितस्याहारस्य सम्यक् पाकाद्रसो भवति । असम्यक् पाकादामः सम्भवति इति । रस इति समाग्निपरिपाचितत्वात् सारभूतो यो द्रवांशः स रस इत्युच्यते, आमश्च अपरिपाकाद्भवति । तदुक्तं 'जठरानलदौर्बल्यादविपक्वस्तु यो रसः । स आमसंज्ञको देहे सर्वदोषप्रकोपकः' इति । इदानीं तयो रसामयोर्व्यापारं दर्शयन्नाह—वह्नेरिति । तद्रस इति पूर्वोक्तः, वह्नेर्बलेनेति रसगताऽग्निप्राबल्यात् मधुरतां स्निग्धतां च याति प्राप्नोति सन् वाखिलान् रक्तादीन् धातून् पुष्णाति तस्मात् सम्यक् पक्वो रसः अमृतोपमः स्यात् । यथा 'अमृतो जीवनो मधुरादिगुणयुक्तः' इति

१—'चतुर्धा षड्रसोपेतोऽनेकविध्युपयुक्तकः । द्विविधोऽष्टविधो वीजैराहारः पाञ्चभौतिकः' इति 'क' पा० ।

[1] प्रक्षिप्तमिदम् ।

श्रुतिः । तथायमपि जीवनधारणतर्पणादिगुणयुक्त इत्यभिप्रायः सौम्यत्वात् । तदुक्तं सुश्रुते—'स खलु द्रवोनुसारी स्नेहनजीवनतर्पणधारणादिविशेषैः सौम्य इत्यवगम्यते' इति । अस्यैव स्वरूपान्तरमाह—मन्दवह्निविदग्ध इत्यादि । स एव रसो यदा मन्दवह्निविदग्धो भवति अग्नेर्मान्द्येनासम्यक् पक्व इति भावः, तदा कटुरम्लो वा भूत्वा विषभावं मारणं मारणात्मकरूपतां व्रजेत् प्राप्नोति । वा यदि मारणात्मको न भवति अल्पत्वात्तदा रोगसङ्करं रोगसमूहं कुर्यात् दोषदूषितत्वात् नतु स्वयमेव, यतः स्नेहदग्धव्यपदेशवत्, तदुक्तं 'रसादिस्थेषु दोषेषु व्याधयः संभवन्ति ये । ते ज्ञायन्त इत्युपचारेण (?) तानाहुर्घृतदग्धवत्' इति ॥३–६॥

**गू०**—पुनः वह्नेर्बलेन पक्वः माधुर्यं स्निग्धतां च याति, चेत् सम्यक् पक्वः तदा अखिलान् धातून् पुष्णाति । मन्दवह्निपक्वे दोषमाह—विषभावं विषस्वरूपं व्रजेत् विषूच्यादिभिर्मारणात्मकत्वात् । रोगसंकरं बहुरोगसमूहं वा कुर्यात् ॥ ३–६ ॥

**गू०**—आहारस्य कः सारः किंच मलमित्याह—

**आहारस्य रसः सारः सारहीनो मलद्रवः ।**
**शिराभिस्तज्जलं नीतं बस्तौ मूत्रत्वमाप्नुयात् ॥ ७ ॥**
**तत्किट्टं च मलं ज्ञेयं तिष्ठेत्पक्वाशये च तत् ।**
**वलित्रितयमार्गेण यात्यपानेन नोदितम् ॥ ८ ॥**
**प्रवाहिणी सर्जनी च ग्राहिकेति वलित्रयम् ।**

**दी०**—अथाहारस्य रससारत्वं निरूप्य निरसस्य निःसारत्वं दर्शयन्नाह—आहारस्येति । आहारस्य पूर्वप्रतिपादितस्य यो रसो विदितस्वरूपः स सार इत्यभिहितः, सारो मुख्यत्वेन तर्पणादिकृत्त्वात् सारहीन इति रसरहित आहारस्यांशो वर्तते स मलद्रवसंज्ञः । मलं पुरीषं द्रवं मूत्रं । तयोर्भिन्नगमनस्थानविशेषमाह—शिराभिरित्यादि । तज्जलमिति पुरीषनिःसृतं द्रवविशेषं शिराभिर्मूत्रवाहिनीभिः कृत्वा बस्तौ मूत्राधारे नीतं तदेव मूत्रत्वमाप्नुयादिति भावः । तत् किट्टं मलमिति मूत्रावशिष्टं मलं किट्टसंज्ञकं ज्ञेयं निर्द्रवत्वात् तच्च पक्वाशये तिष्ठेदिति तात्पर्यार्थः ॥

अथ पक्वाशयस्य स्थितस्य तादृशस्य तस्याधोगमनशीलत्वं दर्शयन्नाह—वलीति । अपानेन गुदस्थितवायुना नोदितं प्रेरितं मलमिति शेषः, तच्च वलित्रितयमार्गेण कृत्वा याति बहिर्निःसरतीत्यर्थः । वलित्रितयनामान्याह—प्रवाहिणीत्यादि । प्रवाहिणी सर्जनीग्राहिकेति तासां नामभिरेवाकृतयो बोद्धव्याः । वलयस्तु गुदस्यावयवभूतास्तास्तिस्रो वलय उपर्युपरिव्यवस्थिताः शङ्खावर्तनिभा इति ॥ ७ ॥ ८ ॥

**गू०**—आहारस्य सारभूतो रसः सारहीनो यः स मलद्रवो भवति तज्जलं शिराभिः बस्तौ नीतं मूत्रत्वं आप्नुयात् तत्किट्टं मलं भवति । तस्य व्यवस्थामाह—तत्किट्टं तस्याहारपक्वं यत्किट्टं तन्मलं ज्ञेयं ? तत्पक्वाशये तिष्ठेत् । तत् अपानेन नोदितं वलित्रयमार्गेण याति । तस्य वलित्रितयस्य नामान्याह—अत्र प्रमाणं नोक्तं तद्ग्रन्थान्तराद्विशेषतो लिख्यते । तद्यथा 'गुदस्य मानं सर्वस्य सार्धं स्याच्चतुरङ्गुलम् । तत्र स्युर्वलयस्तिस्रः शङ्खावर्तनिभास्तु ताः ॥ प्रवाहणी भवेत् पूर्वा सा सार्धाङ्गुलसंमता । उत्सर्जनी तु तदधः सासार्धाङ्गुलसंमिता ॥ तस्या अधः संवरणी स्यादेकाङ्गुलसंमिता । अर्धाङ्गुलप्रमाणं तु बुधैर्गुदमुखं मतं । मलोत्सर्गस्य मार्गोऽयं पायुर्देहविनिर्मितः ॥ ७ ॥ ८ ॥

**गू०**—इति पक्वो रसः कुत्र स्थित्वा रक्तादीन् करोतीत्याह—

**रसस्तु हृदयं याति समानमरुतेरितः ॥ ९ ॥**
**रञ्जितः पाचितस्तत्र पित्तेनायाति रक्तताम् ।**
**रक्तं सर्वशरीरस्थं जीवस्याधारमुत्तमम् ॥ १० ॥**
**स्निग्धं गुरु चलं स्वादु विदग्धं पित्तवद्भवेत् ।**

रक्तस्वरूपं दूरवीक्षणयन्त्रेण दृष्टम् ।



**दी०**—इदानीं मलद्रवं निरूप्य सारभूतस्य रसस्यापि कार्यत्वेन स्थानान्तरप्राप्तिमाह—रसस्त्विति । स रसः समानमरुता नाभिगतवायुना कृत्वा ईरितः ऊर्ध्वं प्रेरितो हृदयं याति आप्नोति, एतेन किमुक्तं ?

हृत्पिण्डतो रुधिरस्य सर्वशरीरे सञ्चारक्रमः ।



हृत्पिण्डतो रक्तवाहिन्यां रक्तस्य सञ्चारः–




रक्तवाहिन्यां शुद्धाशुद्धरक्तस्य सञ्चारक्रमः ।




सारभूतो रसो ग्रहणीस्थानात् हृदयमागच्छतीति भावः । सकलशरीरगमनशीलत्वात् । तदुक्तं सुश्रुते— 'सर्वदेहानुसारित्वेऽपि तस्य हृदयं स्थानं स हृदयाच्चतुर्विंशतिधमनीरनुप्रविश्योर्ध्वगा दश दश चाधोगामिन्यश्चतस्रस्तिर्यग्गास्ताः कृत्स्नं शरीरमहरहस्तर्पयन्ति, वर्धयन्ति, धारयन्ति, यापयन्ति, जीवयन्ति चादृष्टहेतुकेन कर्मणा तस्य शरीरमनुधावतोऽनुमानाद्गतिरुपलक्षयितव्या' इति । हृदयशब्दोपलक्षितमोजःस्थानमुच्यते । तत्र सोऽपि रसः पित्तेन रञ्जकपित्तेन कृत्वा पाचितः अतएव रञ्जितः रागं प्राप्तः सन् रक्ततां याति प्राप्नोति । यतो रसाद्रक्तं भवतीति वचनात् । रक्तस्य भावो रक्तता । तेन आदावीषद्रक्तभावं प्राप्य पश्चात्क-

मेण आरक्तः स्यात् । तदुक्तं—'रसः सप्ताहादर्वाक् परिवर्तमानः श्वेतकपोतहरितहारिद्रपद्मकिंशुकालक्तकरसप्रख्यश्चायं यथाक्रमं दिवसपरिवर्ताद्वर्णपरिवर्तमापद्यमानः पित्तोष्मोपरागात् शोणितत्वमापद्यते' इति ॥

अथ रक्तप्राधान्यं दर्शयन्नाह—रक्तमिति । तद्रक्तं सर्वशरीरस्थितं भवति पाञ्चभौतिकत्वात्, यतः 'विस्रता द्रवता रागः स्पन्दनं लघुता तथा । भूम्यादीनां गुणा ह्येते दृश्यन्ते चात्र शोणिते' इति । जीवस्योत्तममाधारश्चेति देहमूलत्वात् । तदुक्तं—'देहस्य रुधिरं मूलं रुधिरेणैव धार्यते । तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः' इति । पुनः कीदृशं तदाह—स्निग्धमित्यादि । स्निग्धमरुक्षं, गुरु अलघु, चलं नैकत्रस्थितिशीलं द्रवत्वात् । स्वादु मधुरं स्वभावात् यदा विदग्धं तदा पित्तवद्भवेत् इति । यदा विदग्धं पित्तमप्यम्लतां व्रजेत् कटुकं च भवेत् तथेदमपीति भावः । उक्तमन्यत्राऽपि 'अनुष्णशीतं मधुरं स्निग्धं रक्तं च वर्णतः । शोणितं गुरु विस्रं स्याद्विदाहश्चास्य पित्तवत्' इति । कार्यत्वेनाऽपि तस्य लघुता च दर्शिता इति न दोषः ॥ ९ ॥ १० ॥

गू०—समानमरुतेरितरसः आदौ हृदयं याति तत्र पित्तेन रञ्जितः पाचितश्च रक्ततां याति तत्रोभयोः स्थाने रक्तस्य हृदयपाके दूषणप्रसङ्गात् । तथाचोक्तं सुश्रुते—'स खल्वाप्यो रसो यकृत्प्लीहानौ प्राप्य रागमुपैती'त्युक्तत्वात् ॥ ९ ॥ १० ॥

गू०—रक्तप्रसङ्गेन अन्येषां धातूनां पक्वक्रममाह—

**पाचिताः पित्ततापेन रसाद्या धातवः क्रमात्॥११॥**
**शुक्रत्वं यान्ति मासेन तथा स्त्रीणां रजो भवेत् ।**

दी०—इदानीं धातूनामुत्पत्तिपरम्परापूर्वकं शुक्रस्यापि विषयं दर्शयन्नाह—पाचिता इति । पित्ततापेन पित्ततेजसा पाचिताः परिपाचिता रसाद्या धातवः क्रमेण शुक्रत्वं मासेन यान्ति आप्नुवन्ति । रसाद्या इत्यत्र रसग्रहणात् रस एव शुक्रत्वं प्राप्नोति । अत एव यातीत्येकवचनं कृतम् । आदिग्रहणात् रक्तमांसमेदोमज्जास्थीनीति । एके रसाद्या धातवो मासेन शुक्रत्वं यान्तीति पठन्ति व्याख्यानयन्ति च, तेषां मते तु कार्यकारणयोरभेदोपचारात् न केवलं शुक्रत्वं स्त्रीणामपि रजो भवेत् । तदुक्तं 'रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्तते । तद्वर्षाद्द्वादशादूर्ध्वं याति पञ्चाशतः क्षयम्' इति । तथेति ग्रहणात् शुक्रत्वमपि स्त्रीणामेव भवति । यतो दृश्यते हि तत्स्रावणादिभिः प्रयोगैः, अन्यथा तासां संहर्षः कथं स्यादिति । तदुक्तं—सौम्यं त्वगाश्रयं स्वच्छं स्निग्धं योनिमुखोद्गमम् । स्त्रीणां शुक्रं न गर्भाय भवेद्गर्भाय चार्तवम्' इति । मासेनेति । त्रिंशद्दिनैरिति भावः । त्रिंशद्दिनविवरणं सुश्रुताचार्येणोक्तं तद्यथा—'स खलु त्रीणि त्रीणि कलासहस्राणि पञ्च दश च कला एकैकस्मिन् धातवस्तिष्ठन्ते, एवं मासेन रसः शुक्रीभवति स्त्रीणां चार्तवम्' इति । उक्तमपि समुच्चयेन दर्शयति—'अष्टादश सहस्राणि संख्या यस्मिन् समुच्चये । कलैका नवतिश्चोक्ता स्वतन्त्रपरतन्त्रयोः ॥' इति विंशतिकलो मुहूर्तः कला दशभागश्चेत्यादिना माससंख्या ज्ञातव्या । एतेन किमुक्तं रसः किलैकाहेनैव सम्पद्यते अन्ये ये धातवस्ते पञ्चभिः पञ्चभिरहोभिः सम्पद्यन्त इति भावः ॥ ११ ॥

गू०—पित्ततापेन पाचिता रसाद्या धातवः मासेन शुक्रत्वं यान्तीति योज्यम् । तथा रेतःप्रकारेण स्त्रीणां रजश्च मासेन भवेत् । विशेषपाकक्रमस्तु धातुविचारणे प्रोक्तः ॥ ११ ॥

गू०—शुद्धशोणितशुक्राद्गर्भो भवतीत्यपि संक्षेपेणाह—

**कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः ॥ १२ ॥**
**गर्भः संजायते नार्याः स जातो बाल उच्यते ।**
**आधिक्ये रजसः कन्या पुत्रः शुक्राधिके भवेत्॥१३॥**
**नपुंसकं समत्वेन यथेच्छा पारमेश्वरी ।**

दी०—गर्भोत्पत्तिमाह—कामादिति । शुद्धशोणितशुक्रजो गर्भो नार्याः स्त्रियाः संजायत इति, कुतः? कामात्, कामोऽभिलाषः, क? मिथुनसंयोगे, मिथुनं द्वन्द्वं स्त्रीपुरुषविषयं तस्य संयोगो मेलनं तस्मिन् सति । शुद्धशोणितशुक्रयोर्लक्षणं च तन्त्रान्तरे यथा—'शशासृक्प्रतिमं यच्च यद्वा लाक्षारसोपमम् । तदार्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत् ॥ दिनत्रयं प्रवृत्तिश्च

१—'रसः किलैकाहेनैव सम्पद्यते द्वितीये वर्णाभः पित्तस्थानेषु तिष्ठति दिवसे तृतीये चतुर्थे वा यः प्रवर्णो भवेत् पञ्चमेऽहनि षष्ठे वा किंशुकाभः सप्तमेऽहनि संप्राप्ते शक्रगोपकाभः एवं सप्ताहाद्रसाद्रक्तं भवति' पा० ।
२—'तस्माद्रक्षेद्धि रुधिरं रुधिरं जीवमुच्यते' इति पाठान्तरम् ।

कुरुते शोणितं स्त्रियाः । व्यवायसुतशुक्रेण गर्भस्तस्यास्ततो भवेत् ॥ तदेवाऽतिप्रसङ्गेन प्रवृत्तमनृतावपि । असृग्दरं विजानीयादतोऽन्यदुक्तलक्षणात्' इति ॥ शुद्धं शुक्रं यथा—'स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च । शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभं तथा' इति । 'वातादिदूषितं पूति कुणपं ग्रन्थिरूपि च । क्षीणं मूत्रपुरीषाभ्यां गन्धिशुक्रं तु निष्फलम्' इति । गर्भ इति । शुक्रशोणितं गर्भाशयस्थमात्मप्रतिविकारसंमूर्च्छितं गर्भ इत्युच्यते । स जातो बाल उच्यते इति । स गर्भो यदा जातो बहिर्निःसरति तदा बाल इत्युच्यते । बालशब्दः कन्यापुरुषनपुंसकेष्वपि वर्तते । अतएवाहाचार्यः—आधिक्य इति । तत्र च गर्भाशये यदा रजस आर्तवस्य आधिक्यं भवति तदा कन्या जायते उत्पद्यते आर्तवाधिकशुक्रादित्यभिप्रायः । यदि शुक्राधिकस्तर्हि पुत्रः शुक्राधिकार्तवादित्यर्थः । समत्वेनेति शुक्रशोणितयोः साम्येन समभागेन कृत्वा नपुंसकं स्यात् । यथा पारमेश्वरीच्छास्ति तथैव भवति नात्र विचारः कर्तव्य इति भावः । इच्छेत्यनेनैव यमलजातमपि सूचितम् । तद्यथा—'बीजेऽन्तर्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ । यमावित्यभिधीयेते धर्मेतरपुरःसरौ' इति ॥ १२ ॥ १३ ॥

**गू०**—यतः अशुद्धशुक्रशोणितयोरपि गर्भो भवति अत आह—कामादिति । शुद्धशोणितशुक्रजः शुद्धगर्भः यतो वातादिदुष्टरेतसः प्रजोत्पादने न सामर्थ्यं इति सुश्रुतः । अत्र शुद्धप्रजोत्पादने न सामर्थ्यं इति बोद्धव्यम् रोगादिना अशुद्धास्तु प्रजा वातादिदुष्टशुक्रेऽपि जनयन्ति जन्मान्धबधिरपंग्वादिसंभवात् । इदानीं रजःशुक्राधिक्येन किं भवतीत्याह—रजसः कन्या भवति अधिके शुक्रे वीर्ये पुरुषः भवेत् द्वयोः साम्येन नपुंसकं भवेत् अतः परं पारमेश्वरी इच्छा अदृष्टस्य बलवत्त्वात् ॥१२-१३॥

**गू०**—बालस्य भेषजप्रमाणाद्युत्तरां क्रियामाह—

**बालस्य प्रथमे मासि देया भेषजरक्तिका ॥ १४ ॥**
**अवलेहीकृतैकैव क्षीरक्षौद्रसिताघृतैः ।**
**वर्धयेत्तावदेकैकां यावद्भवति वत्सरः ॥ १५ ॥**
**माषैर्वृद्धिस्तदूर्ध्वं स्याद्यावत्षोडशवत्सरः ।**
**ततः स्थिरा भवेत्तावद्यावद्वर्षाणि सप्ततिः ॥ १६ ॥**
**ततो बालकवन्मात्रा ह्रासनीया शनैः शनैः ।**
**मात्रेयं कल्कचूर्णानां कषायाणां चतुर्गुणा ॥ १७ ॥**

**दी०**—इदानीं बालस्य प्रथममासादारभ्य भेषजक्रियां दर्शयन्नाह—बालस्येति । बालस्य प्रथमे मासि भेषजरक्तिका देया । बालोऽत्र क्षीरादः यतस्त्रिविधो बाल आषोडशवर्षाद्भवति । तत्र क्षीरादः । क्षीरान्नादः अन्नाद इति । अत एव क्षीरक्षौद्रसिताघृतैरिति बह्वोऽनुपानादयो दर्शिताः यथासम्भवोपयोगित्वेन । भेषजमत्र सुवर्णरजतशिलाजत्वादिकं, रक्तिका गुञ्जा तत्परिमाणमित्यर्थः । प्रथमे मासीति प्रथमग्रहणं जातदिनमारभ्य भेषजं दद्यादित्यभिप्रायः । तथाच सुश्रुते—'अथ कुमारं शीताभिरद्भिराश्वास्य जातकर्मणि कृते मधुसर्पिरनन्तचूर्णमिश्रमङ्गुल्यनामिकया लेहयेत्' इति । अनन्तचूर्णं सुवर्णचूर्णं, 'भेषजरक्तिकेति सामान्यभेषजग्रहणेन ग्रन्थान्तरोक्तमपि योगचतुष्टयमत्र बोद्धव्यम् । तद्यथा—'सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतं वचा । मत्स्याख्यकः शङ्खपुष्पी मधु सर्पिः सकाञ्चनम् ॥ अर्कपुष्पी घृतं क्षौद्रं चूर्णितं कनकं वचा । हेमचूर्णानि वैदूर्यैः श्वेतदूर्वा घृतं मधु ॥ चत्वारोऽभिहिताः प्राशाः श्लोकार्धेषु चतुर्ष्वपि । कुमाराणां वपुर्मेधाबलबुद्धिविवर्धनाः' इति । एके प्राक्तनां मात्रामनिच्छतामामनन्ति तन्मते तु विश्वामित्रोक्ता मात्रा प्रचरति । तद्यथा—'विडङ्गफलमात्रं तु जातमात्रस्य भेषजम् । एतेनैव प्रमाणेन मासि मासि प्रवर्धितम् ॥ कोलाऽस्थिमात्रं क्षीरादे दद्याद्भैषज्यकोविदः । क्षीरान्नादे कोलमात्रमन्नादे (उ)दुम्बरोपमम्' इति । अवलेहीकृतैकैवेत्यादि । एकैव रक्तिका अवलेहीकृता, कैः कृत्वेत्याह—क्षीरक्षौद्रसिताघृतैरिति । एतेन क्षीरादिभिर्व्यस्तैर्यथायोग्यं सम्भाव्यावचारयेदित्यभिप्रायः । क्षीरं स्त्रीसम्भवम्, आजं वा । घृतमत्र गव्यम् ॥

अथ भेषजस्यास्य वृद्धिह्रासत्वमप्याह—वर्धयेत्तावदेकैकामित्यादि । सा भेषजरक्तिका तावदेकैकां वर्धयेयावत् वत्सरो भवति । एतेन प्रतिमासवृद्धाः द्वादशमासेषु द्वादशैव रक्तिका भवन्तीत्यर्थः । अन्यदप्याह—तदूर्ध्वमिति । वत्सरादुपरि तावन्माषकैर्वृद्धिर्यावत् षोडशवत्सरो भवति; एतेन प्रतिवर्षवृद्ध्या

षोडशमाषका भवन्तीत्यर्थः । माषोऽत्र मागधपरिभाषोक्तः षड्गुञ्जापरिमितः । तत इति षोडशवर्षादुपरि तावत् स्थिरा स्याद्यावत् सप्ततिवर्षाणि भवन्ति । स्थिरेति षोडशमाषका न तु वृद्धिः । तत इति सप्ततेरूर्ध्वं सैव मात्रा बालवच्छनैः शनैर्ह्रासनीया तेन सा मात्रा यथैव पूर्वं वर्धिता तथैवापकर्षणीया इत्यभिप्रायः । अतएव बालवृद्धयोः साम्यक्रिया कार्येति नतु सर्वेषाम् । कल्कचूर्णादीनामियमेव मात्रा सम्मता किमुतान्या वा तदाह—मात्रेयमित्यादि । इयं पूर्वोक्ता मात्रा कल्कचूर्णानां तद्योगानां च, कषायाणां चतुर्गुणा विज्ञेया । एतेन किमुक्तं रक्तिपरिमाणे चत्वारि रक्तिकाः कार्याः, माषकपरिमाणे चतुर्माषक इति ॥ १४-१७ ॥

गू०—बालस्य प्रथमे मासि एकैव भेषजरक्तिका देया । किंभूता भेषजमात्रा क्षीरक्षौद्रसिताघृतैः अवलेहीकृता । यावद्वत्सरो भवेत्तावदेकामेकां रक्तिकां मासि मासि वर्धयेत् । वत्सरादूर्ध्वं भेषजप्रमाणमाह—तदूर्ध्वं वत्सरादूर्ध्वं माषैर्वृद्धिः स्यात् यावत्षोडश वत्सरो भवति तावत्, षोडशानन्तरं स्थिरा मात्रा भवेत् यावत्सप्तति न वर्धनमित्यर्थः । वर्धनक्रममभिधाय ह्रासक्रममाह—ततो बालकवत् एका रक्तिकादिमात्रावत् मात्रा ह्रासनीया ऊना कर्तव्या । इयं मात्रा कल्कचूर्णानां, कषायाणां एतन्मात्रातश्चतुर्गुणा ॥ १४-१७ ॥

गू०—अञ्जनादीनामपि कर्तव्यतायां विधानमाह—

**अञ्जनं च तथा लेपः स्नानमभ्यङ्गकर्म च ।**
**वमनं प्रतिमर्शश्च जन्मप्रभृति शस्यते ॥ १८ ॥**
**कवलः पञ्चमाद्वर्षादष्टमान्नस्यकर्म च ।**
**विरेकः षोडशाद्वर्षाद्विंशतेश्चैव मैथुनम् ॥ १९ ॥**

दी०—इदानीं तस्य बालकस्याञ्जनादिकं कर्म निर्दर्शयन्नाह—अञ्जनमिति । बालकस्याञ्जनादि प्रतिमर्शपर्यन्तं जन्मप्रभृतिरेव प्रशस्यते, जन्मदिनादारभ्य यद्यत्र विहितं तत् तत्र कुर्यादिति भावः । अञ्जनं सौवीराञ्जनादिकं, लेपमुद्वर्तनप्रभृतिकं, स्नानं परिषेकः, अभ्यङ्गं अभ्यञ्जनम्, वमनं वान्तिः, प्रतिमर्शेन बृंहणमिति । अपराण्याह—कवल इत्यादि । कवलो गण्डूषभेदः, स तु पञ्चमाद्वर्षादुपरि कार्यो नतु तदर्वाक् । नस्यकर्मेति । नासायां यद्दीयते तन्नस्यमिति, तस्य कर्म क्रिया चतुर्थे, तच्चाष्टमाद्वर्षादुपरि कार्यं, षोडशवर्षादुपरि विरेको देयः, विशेषेण रेको विरेक इत्यनेन अपूर्णवीर्यस्य कोष्ठस्य रेचनस्य निषेधः षोडशवर्षाभ्यन्तरे भवति । नतु मृदुरेचनस्य निषेधः । तदुक्तं 'अग्निक्षारविरेकैस्तु बालवृद्धौ विवर्जयेत् ।' तत् साध्येषु विकारेषु 'मृद्वीं कुर्याल्लघुक्रियाम्' इति । विंशतेश्चैव मैथुनमिति । मैथुनं स्त्रीपुरुषसंयोगलक्षणं तच्च विंशतिवर्षादुपरि समानवीर्यत्वं स्यादित्याह । तथाच—'पञ्चविंशतितमे वर्षे पुमान् नारी तु षोडशे । समत्वागतवीर्यौ तु जानीयात् कुशलो भिषक्' इति ॥ १८ ॥ १९ ॥

गू०—एतदञ्जनाद्यं बालानां जन्मप्रभृति शस्यते प्रतिमर्शो नस्यभेदः मृदु नतु तीक्ष्णं तीक्ष्णस्य अष्टमाब्दादभिधानात् । इदानीं कवलादीनां विधानमाह—कवलः गण्डूषः, पञ्चमाद्वर्षात्कर्तव्यः तस्य कर्म अष्टमात्कर्तव्यं विरेकः षोडशाद्वर्षात्कर्तव्यः, मैथुनं स्त्रीप्रसङ्गः विंशतेः कर्तव्यः ॥ १८ ॥ १९ ॥

गू०—बाल्यावस्थादीनि कियत्पर्यन्तं भवन्ति तदप्याह—

**बाल्यं वृद्धिश्छविर्मेधा त्वग्दृष्टिः शुक्रविक्रमौ ।**
**बुद्धिः कर्मेन्द्रियं चेतो जीवितं दशतो ह्रसेत् ॥ २० ॥**

दी०—अथ बाल्यप्रभृतिजीवितावसानं वर्षसंख्यया ह्रासत्वमाह—बाल्यमिति । तद्बाल्यप्रभृतिकं दशत इति दशवर्षादुपरि ह्रसेत् हानिं प्राप्नोतीत्यर्थः । एतेन किमुक्तं बाल्यावस्था दशवर्षादुपरि, वृद्धिर्वर्धनं त्रिंशद्वर्षादुपरि, शरीरं चत्वारिंशद्वर्षादुपरि, मेधा तु ग्रन्थाकर्षणसामर्थ्यरूपा पञ्चाशद्वर्षादुपरि, त्वक् सा शैथिल्यरूपा भवतीति भावः । षष्टिवर्षादुपरि दृष्टिः, सप्ततिवर्षादुपरि विक्रमं तच्च साहसादिरूपं पराक्रमसंज्ञम् । नवतिवर्षादुपरि बुद्धिः, शतवर्षादुपरि कर्मेन्द्रियम्, दशाधिकशतवर्षादुपरि चेतश्चेतनस्थानं, विंशत्यधिकशतवर्षादुपरि जीवितं प्राणमिति । तेन विंशत्यधिकशतं परमायुर्मनुजानां भवतीति तात्पर्यार्थः । तदुक्तं—'समाः षष्टिर्द्विघ्ना मनुजकरिणां पञ्च च निशा, हयानां द्वात्रिंशत्खरकरभयोः पञ्चककृतिः । विरूपा सत्यायुर्वृषमहिषयोर्द्वादश शुनः स्मृतं छागादीनां दशकसहितः षट् च परमम् ॥ २० ॥

दी०—बाल्यादिकं जीवितान्तं दशतः ह्रसेत् हीनो भवेत्; बाल्यं दशवर्षपर्यन्तं; वृद्धिः विंशतिपर्यन्तं, छविः त्रिंशत्पर्यन्तं, मेधा चत्वारिंशत्पर्यन्तं, त्वक्दार्ढ्य

(दार्ढ्य)पञ्चाशत्पर्यन्तं,दृष्टिः षष्टिपर्यन्तं हीना भवति,शुक्रं सप्ततिपर्यन्तं, विक्रमः अशीतिपर्यन्तं, शुद्धिः नवतिपर्यन्तं, कर्मेन्द्रियं शतपर्यन्तं, चेतो मनः, स्मृतिर्दशोत्तरपर्यन्तं, जीवितं जीवितप्रमाणं विंशोत्तरशतपर्यन्तम् । [ ननु शार्ङ्गधरेण 'बाल्यस्य प्रथमे मासि देया भेषजरक्षिके'ति जन्मोत्तरकाले विधानं लिखितं, तत्किं अस्वस्थविषयं वा स्वस्थविषयं वा ? अस्वस्थविषयं चेत्तदा बालचिकित्सायामेष प्रसङ्गः स्यात्, स्वस्थविषयं चेत्तदा स्वस्थे रोगं विना औषधदानासंभवाद्यर्थमेतद्विधानम् ? उच्यते, स्तन्यावतरणे दोषकोपो भवति तन्निवारणार्थं, यद्वा प्रकृत्यारम्भकदोषदुष्टनिवारणार्थं वा एतद्विधानं दोषकोपात् । तथाच—सद्यःप्रसूतानां क्षीरगुणे 'क्षीरं सद्यःप्रसूतानां विरसं दोषकारकम् । तस्मात्सद्यःप्रसूतानां जायते श्लैष्मिकं पयः' इति । अतो यदुक्तं विधानं तदवश्यमत्रैवोचितम् । तथाच सुश्रुते लिखितं 'तस्मात्प्रथमेऽहनि मधुसर्पिरनन्तमिश्रं मन्त्रपूतस्त्रिकालं पाययेत्, द्वितीये लक्ष्मणासिद्धं सर्पिः, तृतीये च ततः प्राग्निवारितस्तन्यं मधुसर्पिः स्वपाणितलसम्मितं द्विकालं पाययेत् । अनन्तः केशरज(कं) सुवर्णं वा । वृद्धवाग्भटे तु 'अनन्तामिश्रे मधुसर्पिषी' इति पाठः । तत्र चानन्ता दूर्वा व्याख्याता, तत्र रक्तिकामात्रं देयं । अन्ये च प्रयोगाः—'सौवर्णं सुकृतं चूर्णं कुष्ठं मधुघृते वचा । मत्स्याक्षकः शङ्खपुष्पी मधु सर्पिः सकाञ्चनम् ॥ अर्कपुष्पी घृतं क्षौद्रं चूर्णितं कनकं वचा । हेमचूर्णानि वैदुर्यः श्वेता दूर्वा घृतं मधु । चत्वारोऽभिहिताः प्राशाः श्लोकार्धेषु चतुर्ष्वपि । कुमाराणां वपुर्मेधाबलपुष्टिविवर्धनाः ॥' संवत्सरं यावदेते योगाः सेव्याः, अन्ये द्वादशवर्षाण्याहुः । सुश्रुतादेतत् । उक्तान्यौषधानि व्याख्यायन्ते । सौवर्णचूर्णं नागकेशरचूर्णं यद्वा कुंकुमचूर्णं, मत्स्याक्षकः मछेछी, ब्राह्मी च, अर्कपुष्पी पयस्या यद्वा अर्कपुष्पी ईशलता, श्वेता दूर्वा, श्वेतेतिविशेषणम्, यद्वा केचिद्वचामाहुः, वैदुर्यः निम्बः, कनकवाचकं सर्वत्र केशरमेव । मात्रापि लिख्यते 'विडङ्गफलमात्रं तु जातमात्रस्य भेषजम् । एतेनैव प्रमाणेन मासिमासि विवर्धनम् ॥ कोलमात्रं च क्षीरादेर्दद्याद्भैषज्यकोविदः । क्षीरान्नादेः कोलमात्रमन्ने चोदुम्बरोपमम् ।' इति कुमारपोषणविधानम् ] ॥ २० ॥

गू०—अथ प्रकृतेरपि शरीराङ्गत्वात् शारीरे प्रकृतिविवरणमाह—

**अल्पकेशः कृशो रूक्षो वाचालश्चलमानसः ।**
**आकाशचारी स्वप्नेषु वातप्रकृतिको नरः ॥ २१ ॥**

दी०—इदानीं प्रकृतिलक्षणमाह—अल्पेत्यादि । वातप्रकृतिको नर ईदृशो भवति कीदृशस्तमाह—अल्पकेश इति । तुच्छकेशः अदीर्घकेश इत्यन्ये, यतो वातस्यातिरौक्ष्यत्वेन त्वक्पारुष्यादल्पकेशत्वम् । पुनः कीदृशः ? कृशो दुर्बलः, वातस्य शोषकत्वात् रूक्षगुणत्वादस्निग्धः, वाचाल इति प्रवचनशीलः, चलमानस इति चञ्चलचित्तः, वातस्य चलगुणत्वात् स्वप्नेष्वपि आकाशचारी भवतीति यथा वायुराकाशे चरतीति स्वभावात् । प्रकृतिस्तु स्वभाव एवेत्याहुराचार्याः, यतः—'शुक्रशोणितसंयोगे यो भवेद्दोष उत्कटः । प्रकृतिर्जायते तेन तस्या मे लक्षणं शृणु' इति ॥ २१ ॥

गू०—ननु प्रकृतिस्तु पूर्वोक्ता जगत्कर्त्री, इत्याशंक्य कथमत्र न पुनरुक्तिदोषः,उच्यते, इयं तु शरीरस्वभावलक्षणा प्रकृतिः शुक्रार्तवसंयोगे दोषोत्कृष्टजन्या सप्तविधा । तथाच सुश्रुते लिखितं—'शुक्रशोणितसंयोगे यो भवेद्दोष उत्कटः । प्रकृतिर्जायते तेन तस्या मे लक्षणं शृणु ॥' वाग्भटे च 'शुक्रासृक्गर्भिणीभोज्यचेष्टागर्भाशयार्तिषु । यः स्याद्दोषोऽधिकस्तेन प्रकृतिः सप्तधोदिता ।' सप्तधा प्रकृतिरित्युक्त्वा वातप्रकृतिमाह—अल्पकेश इति । एवंभूतो नरः वातप्रकृतिको भवतीति योजना । रूक्षः रूक्षाङ्गः, वाचालः बहुजल्पकः, चलमानसः चलचित्तः, स्वप्नेषु आकाशचारी आकाशभ्रमणशीलः, नरशब्दोऽत्र सामान्यमनुष्यवाचकः स्त्रीपुंविषयः । यतः स्त्रीणां भिन्ना प्रकृतिर्नोक्ता ॥ २१ ॥

गू०—अथ पित्तप्रकृतिमाह—

**अकालपलितैर्व्याप्तो धीमान्स्वेदी च रोषणः ।**
**स्वप्नेषु ज्योतिषां द्रष्टा पित्तप्रकृतिको नरः ॥ २२ ॥**

दी०—अथ पित्तप्रकृतिमाह—अकालपलितैरिति । पित्तप्रकृतिको नर ईदृशो भवति । कीदृशस्तमाह—अकालपलितैर्व्याप्त इति । अकाले असमये पलितैर्वार्धक्यैर्व्याप्तः पित्तस्योष्मगुणत्वात् । तदुक्तं—'क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः । पित्तं च केशान् पचति पलितं तेन जायते' इति । पुनः कीदृशः ? धीमान् बुद्धिमान् सत्त्वगुणबाहुल्यात्, स्वेदीति । प्रस्वेदयुक्तः, पित्तस्योष्ममयत्वात् द्रवगुणत्वाच्च । रोषण इति । रोषयुक्तः पित्तस्य तीक्ष्णत्वात् स्वप्नेष्वपि ज्योतिषाम-

१—यद्यपि कोष्टकान्तर्गतः पाठः १४ श्लोकस्य टीकारूपः अतस्तत्रैव मुद्रयितुमुपयुक्तस्तथापि मदृष्टमातृकास्वत्रैव लिखितत्वात्तथैवेहापि मुद्रितः ।

स्यादीनां तारकादीनां च द्रष्टा अवलोककः यत्तत्पित्तमुष्णमुक्तं तत्तद्गुणत्वात् ॥ २२ ॥

**गू०**—अकालेति। एवंभूतो नरः पित्तप्रकृतिको भवतीति योज्यम्। अकाले तरुणावस्थायां पलितैः श्वेतैः, (व्याप्तः) धीर्धारणावती बुद्धिस्तद्युक्तः, स्वेदी प्रस्वेदबहुलः, रोषणः क्रोधालुः, स्वप्नेषु ज्योतिषां ज्योतीरूपाणाम् (द्रष्टा) ॥ २२ ॥

**गू०**—अथ श्लेष्मप्रकृतिमाह—

**गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः।**
**स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः॥ २३॥**
**ज्ञातव्या मिश्रचिह्नैश्च द्वित्रिदोषोल्बणा नराः।**

**दी०**—अथ कफप्रकृतिको नर ईदृशो भवति, कीदृशस्तमाह—गम्भीरबुद्धिरिति। गम्भीरबुद्धिः गम्भीरा अतलस्पर्शा सर्वकार्यक्षमा बुद्धिर्यस्य स तथा। कफस्य तमोगुणाधिकत्वात् स्थूलाङ्गः स्थूलशरीरः, मेदोऽधिकत्वात्, यतः कफस्तु मेदोवृद्धेर्मूलमेव। स्निग्धकेश इति। तस्य स्नेहगुणत्वात्, महाबल इति ओजसा शरीरे कर्मसामर्थ्यम्, यतः धातूनां यत्परं तेजस्तत्त्वोजस्तदेव बलमित्युच्यते, अतएव कफबाहुल्याच्छुक्रं शुक्रायत्तं बलमिति वचनम्। स्वप्ने जलाशयालोकीति। जलाशयं नदीनदतडागादिकं कफस्य सौम्यगुणत्वात्॥

इदानीं द्विदोषजत्रिदोषजप्रकृतेर्लक्षणानि दर्शयन्नाह—ज्ञातव्या इति। मिश्रचिह्नैर्मिलितलक्षणैः कृत्वा द्वित्रिदोषोल्बणा नरा बोद्धव्याः, तेन पूर्वोक्तयोर्दोषयोर्मिलितलक्षणैर्द्विदोषजा प्रकृतिर्ज्ञेया इत्यभिप्रायः, त्रयाणां दोषाणां मिलितलक्षणैस्त्रिदोषजा प्रकृतिरवगन्तव्येति भावः॥ २३॥

**गू०**—गम्भीरबुद्धिरिति। एवंभूतो नरः श्लेष्मप्रकृतिको भवतीत्यत्रापि योजना। किंभूतः? गम्भीरबुद्धिः गम्भीरा अचञ्चला बुद्धिर्यस्य, जलाशयाऽलोकी जलस्थाने आलोकयतीति सः। अथ द्विदोषत्रिदोषप्रकृतिमाह—मिश्रदोषैर्द्विदोषचिह्नैः द्वन्द्वजास्त्रयः त्रिदोषज एकः, एवं सप्तप्रकृतयः। इति प्रकृतिभागः। वातादिप्रकृतिवत्सत्वादयोऽपि सप्त प्रकृतय इत्येके। तथाच वाग्भटे—'शौचास्तिक्यादिभिश्चैव गुणैर्गुणमयीं वदेत्।' तथाच सुश्रुते—'महत्प्रकृतयस्त्वन्यास्तमःसत्वरजःकृताः। प्रोक्ता लक्षणतः सम्यक् भिषक् ताश्च विभावयेत्॥ ता आह—'सात्विकाः सप्त विख्याता राजसाः षट् प्रकीर्तिताः। तिस्रस्तु तामसाः प्रोक्तास्तासां लक्षणमुच्यते॥ वाग्भटेन पुनर्हीनमध्योत्तमश्रेष्ठनिन्द्य' इत्येवं भेदभूता अपि उक्ताः। तद्यथा—'शुक्रार्तवस्थ जन्मादौ विशेषेण (च) विक्रमः। ताश्च प्रकृतयस्तिस्रो हीनमध्योत्तमाः पृथक्॥' समधातुः समस्तास्तु समधातुः समदोषः श्रेष्ठः, द्विदोषजा निन्द्याः। ननु प्रकृतिस्तु रजःशुक्रसंयोगे दोषाधिक्येन भवतीति। अथ च एका सन्निपातजा भवति तेभ्यो मरणं कथं न स्यादित्यत आह—'विषजातो यथा कीटो न विषेण विपद्यते। तद्वत्प्रकृतयो मर्त्यं शक्नुवन्ति न बाधितुम्' ॥ इदं तु वाग्भटे लिखितं, सुश्रुते तु—'प्रकोपो वाऽन्यभावो वा क्षयो वा नोपजायते। प्रकृतीनां स्वभावोऽयं जायते गुरुतायुषः॥' इति प्रकृतिविवरणं समाप्तम्॥ २३॥

**दी०**—अधुना शरीरविचारप्रसङ्गेन निद्रादीनामपि विशेषोत्पत्तिमाह—

**तमःकफाभ्यां निद्रा स्यान्मूर्च्छा पित्ततमोभवा॥२४॥**
**रजःपित्तानिलैर्भ्रान्तिस्तन्द्रा श्लेष्मतमोनिलैः।**

**दी०**—तम इति। निद्रा स्वप्नः सा तमःकफाभ्यां स्यात् तमोगुणकफसंसर्गेण भवतीत्यर्थः। पित्ततमोभवा मूर्च्छा, मूर्च्छा च रूपाद्यविज्ञानं मोहसंज्ञकं अचेतनरूपेत्यर्थः। यद्यपि वातादिभिस्त्रिभिर्दोषैः शोणितेन, मद्येन, विषेण च मूर्च्छाभिमता, तथापि तस्याः पित्तप्रधानत्वेन दर्शितत्वात्। तदुक्तम्—'वातादिभिः शोणितेन मद्येन च विषेण च। षट्स्वप्येतासु पित्तं तु प्रभुत्वेनावतिष्ठते' इति। रजःपित्तानिलैः कृत्वा भ्रान्तिः भ्रमणं, तदुक्तम्—'योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्जितः। भ्रमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः' इति। श्लेष्मतमोनिलैः कृत्वा तन्द्रा स्यात्। तन्द्रा निद्राभ्रमः, तदुक्तम्,—'इन्द्रियार्थेष्वसम्प्राप्तिर्गौरवं जृम्भणं क्लमः। निद्रार्तस्येव यस्येहा तस्य निद्रां विनिर्दिशेत्' इति॥२४॥

**गू०**—निद्रादयोऽपि शरीरसम्भवा अतः शारीरप्रकरणे तमःकफाभ्यां निद्रा स्याद्भवेत्। पित्ततमोभवा मूर्च्छा स्यात्। रजःपित्तानिलैः भ्रान्तिः स्यात्। भ्रान्तिर्भ्रमः श्लेष्मतमोनिलैस्तन्द्रा स्यादिति योजना। अत्रानुक्रमेणापि निद्रालक्षणमाह—'इन्द्रियाणां च मनसो मोहो निद्राभिधीयते'। चरके च 'यदा तु मनसि क्लान्ते सर्वात्मानः क्लमान्विताः। विषयेभ्यो

निवर्तन्ते तदा स्वपिति मानवः ॥' सुश्रुते च 'हृदयं चेतनास्थानमुक्तं सुश्रुत! देहिनाम् । तमोऽभिभूते तस्मिंस्तु निद्रा विशति देहिनम् ॥ निद्राहेतुस्तमः सत्त्वं बोधने हेतुरुच्यते ।' इति निद्रा । मूर्च्छा रूपाद्यविज्ञानं । तथाच तन्त्रान्तरे—'संज्ञोपधातुर्मूर्च्छा स्यान्मूर्च्छितं...तथा । कश्मलं प्रलयो मोहः, संन्यासस्तु मृतोपमः' इति मूर्च्छा । भ्रान्तिर्भ्रमः । तल्लक्षणम् भ्रमश्चक्रारूढस्येव विपरीतपदार्थज्ञानं च भ्रमः ॥ अथ तन्द्रालक्षणं ग्रन्थान्तरात्—'इन्द्रियाणां च मनसो मोहस्तन्द्रेति कथ्यते' । सुश्रुते वाग्भटे च तन्द्रालक्षणं—'कफोल्वणो वायुनोद्धूतो धमनी संनिरुध्य च । कुर्यात्संज्ञापहा तन्द्रा दारुणा मोहकारिणी । उन्मीलितविनिर्भुग्ने परिवर्तिततारके । भवतस्तत्र नयने छुलिते चलपक्ष्मणी । अर्वाक् त्रिरात्रात्साध्या सा न साध्या तु ततः परम् ।' इति तन्द्रालक्षणम् ॥ २४ ॥

**गू०**—अथ ग्लानिलक्षणमाह—

**ग्लानिरोजःक्षयाद्दुःखादजीर्णाच्च श्रमाद्भवेत् ॥ २५ ॥**
**यः सामर्थ्येऽप्यनुत्साहस्तदालस्यमुदीर्यते ।**

**दी०**—अथ ग्लानिमाह—ग्लानिरिति । ग्लानिस्तु क्लमापरपर्यायवाचको हर्षक्षय इत्यर्थः । स च कारणचतुष्टयाद्भवति, किं तत् कारणचतुष्टयं ? ओजःक्षयादित्यादि । ओजः शुक्रं अशेषधातुधामाभिशब्दितमोज इत्येके, तस्य क्षयाद्बलक्षयादिति स्पष्टार्थः । दुःखादिति । मानसोद्वेगादिकर्मणः । तच्च दुःखं त्रिविधमिति सुश्रुतः, आध्यात्मिकमाधिदैविकमाधिभौतिकमिति, एषां विवरणं न लिखितमत्र विस्तरभयात् । अजीर्णादित्यपरिपक्वान्नस्वरूपात् । एतदपि त्रिविधं चतुर्विधं वा । त्रिविधमन्नजं विष्टब्धादिसंज्ञं चतुर्थं रसशेषमिति । श्रमादिति । शरीरायासजननकर्मणः । स च व्यायामापरपर्यायवाचकशब्देन कथितः, 'शरीरायासजननं कर्म व्यायाम उच्यते'

१—आध्यात्मिकं द्विविधं शारीरं मानसं च । शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तं, मानसं—कामक्रोधलोभमोहभयेर्ष्याविषादविषयाविशेषादर्शननिबन्धनम् । अन्तरोपायसाध्यमिदम् । बाह्योपायसाध्यं च दुःखं द्वेधा आधिभौतिकमाधिदैविकं च । आधिभौतिकं—मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम् । आधिदैविकं च यक्षराक्षसविनायकग्रहावेशनिबन्धनम् । तदेतत्प्रत्यात्मवेदनीयं दुःखं रजःपरिणामभेदो न शक्यते प्रत्याख्यातुम् ॥

इति । ग्लानिलक्षणं तु प्रसङ्गात्तन्त्रान्तरीयोक्तम्—'यश्चे मधुरता तन्द्रा हृदयोद्वेष्टनं क्लमः । न चान्नमभिकाङ्क्षेत ग्लानिं तस्य विनिर्दिशेत्' इति । ( प्रसङ्गात् तन्त्रान्तरीयोक्तं क्लमलक्षणं यथा—'योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्जितः । क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः' इति । ) अथाऽऽलस्यमाह—य इति । सामर्थ्ये कर्मणि सामर्थ्ये सति योऽनुत्साहोऽप्रहर्षः स आलस्यशब्देन वाच्यः । लक्षणमस्योक्तं यथा—'सुखस्पर्शप्रसङ्गित्वं दुःखद्वेषणलोलता । शक्तस्य चाप्यनुत्साहः कर्मण्यालस्यमुच्यते' इति ॥ २५ ॥

**गू०**—ओजःक्षयाद्यैर्ग्लानिर्भवेदिति योजना । ग्लानिशब्दस्तु क्लमवाचकः, 'क्लमु ग्लानौ' इति धातोरर्थत्वात् । तल्लक्षणं यथा—'यो जायते श्रमो देहे प्रवृद्धः श्वासवर्जितः । क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः' इति क्लमः । अथालस्यलक्षणमाह—सामर्थ्येऽपि यः अनुत्साहः तदालस्यं उदीर्यते इति योज्यम् । इत्यालस्यलक्षणम् ॥ २५ ॥

**गू०**—अथ जृम्भालक्षणम्—

**चैतन्यशिथिलत्वाद्यः पीत्वैकं श्वासमुद्वमेत् ॥ २६ ॥**
**विदीर्णवदनः श्वासं जृम्भा सा कथ्यते बुधैः ।**
**उदानप्राणयोरूर्ध्वयोगान्मौलिकफस्रवात् ॥ २७ ॥**
**शब्दः संजायते नस्तः क्षुतं तत्कथ्यते बुधैः ।**

**दी०**—इदानीं जृम्भालक्षणमप्याह—चैतन्येति । पुरुषश्चैतन्यशिथिलत्वात् चैतन्यशिथिलीभावात् चैतन्यस्य ज्ञानलक्षणस्य शिथिलीभावं किञ्चिन्न्यूनतामनुभूय इव स्थितः सन् विदीर्णवदनो व्यात्तमुखो भूत्वा एकं श्वासमूर्ध्वगतं पीत्वा अपरं श्वासमधोगतं यदुद्धरेत् त्यजेत् सा बुधैः पण्डितैः सुश्रुतादिभिर्जृम्भा इति कथ्यते । जृम्भाकाले उद्वेष्टनं नेत्राश्रुस्रवणं च बोद्धव्यम्, यदुक्तं सुश्रुतेन—'पीत्वैकमनिलं श्वासमुद्वेष्टन् विवृताननः । यन्मुञ्चति सनेत्राम्भः स जृम्भ इति कीर्तितः' ॥ चित्तस्य विषयान्तरव्यासक्तिविनिवृत्तये जृम्भाकाले छोटिकादानं लौकिकं सिद्धम्, वचनं हि—'क्षुदुत्पतनजृम्भासु जीवतिष्ठाङ्गुलिध्वनिः' इति ॥ अथ छिक्कालक्षणं दर्शयन्नाह—उदानेति । य उदानप्राणयोरूर्ध्वयोगात् मूर्ध्नि स्रोतःपथस्थितात् कफस्रवाच्च यः शब्दः

१—बन्धनीधृतः पाठो नास्ति 'क' पुस्तके ।
२—'तेन' क ।

संजायते उत्पद्यते तेन शब्देन क्षुतं छिक्का कथ्यते बुधैरिति शेषः। तेनेति स्थाने नस्त इति पठन्त्येके, तत्र नस्तो नासिकातः। अन्यत्राप्युक्तं 'प्राणोदानौ च तौ स्यातां मूर्ध्नि स्रोतःपथस्थितौ। नस्तः प्रवर्तते शब्दः क्षुतं तदभिनिर्दिशेत्' इति ॥ २६ ॥ २७ ॥

गू०—यः विदीर्णवदनः चैतन्यशिथिलत्वात् चेतनाभूता वा देहचेष्टा तस्याः शिथिलभावात्। इति जृम्भालक्षणम्। अथ क्षुतलक्षणम्—मौलिकफस्रवात् उदानप्राणयोरूर्ध्वयोगाद्यः नस्तः नासिकातः शब्दः संजायते तत्क्षुतं बुधैः कथ्यते इति योजना। मौलिकफस्रवात् मस्तककफस्रवात्, उदानकण्ठस्थो वायुः तयोरूर्ध्वगमनात्, क्षुतमिति छिक्कासंज्ञितं। इति क्षुतलक्षणम् ॥ २६ ॥ २७ ॥

गू०—अथोद्गारलक्षणम्—

**उदानकोपादाहारस्वस्थितत्वाच्च यद्भवेत् ॥ २८ ॥**
**पवनस्योर्ध्वगमनं तमुद्गारं प्रचक्षते ।**

इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायां शारीरे आहारादिगतिरध्यायः ॥ ६ ॥

दी०—अथोद्गारमाह—उदानकोपादिति। आहारस्वस्थितत्वाच्चेति आहारोऽशनं तस्य स्वस्थाने यदा स्थितिर्भवति तस्मादित्यर्थः। पवनस्य वायोर्यदूर्ध्वगमनं भवेत् तमुद्गारं प्रचक्षत इति भावः। उदानवायोरेव प्रकोपः। प्रकोपादेव तस्यैवोर्ध्वगमनमित्याचक्षते। समानवायोरूर्ध्वगमनमित्येके ॥ २८ ॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां प्रथमखण्डे आहारादिगतिर्नाम षष्ठोऽध्यायः ॥ ६ ॥

---

गू०—उदानकोपात् पवनस्य यदूर्ध्वगमनं भवेत् तमुद्गारं (प्र)चक्षते इति योजना। कस्मादाहारस्य सुस्थितत्वात् ॥ २८ ॥

इति श्रीकाशीरामवैद्यविरचितायां शार्ङ्गधरगूढार्थदीपिकायामाहारादिगतिरध्यायः ॥ ६ ॥

---

## अथ रोगगणनाध्यायः।

दी०—पूर्वमुक्तं रोगाणां गणना चेति, अतस्तामपि दर्शयन्नाह—

**रोगाणां गणना पूर्वं मुनिभिर्या प्रकीर्तिता ।**
**मयात्र प्रोच्यते सैव तद्भेदा बहवो मताः ॥ १ ॥**

दी०—रोगाणामिति। रोगाणां ज्वरादीनां गणना संख्याकरणं पूर्वमादौ (या) प्रकीर्तिता कथिता मुनिभिस्त्रैकालिकज्ञानदर्शिभिः सैव गणना मया अत्रास्मिन् ग्रन्थे प्रोच्यते कथ्यते आचार्येणेति शेषः। तद्भेदा रोगभेदा बहवो मताः कथिताः, अत्रापि मुनिभिरिति शेषः। रोगज्ञेन रोगाणां संख्यामात्रमत्र ग्राह्यं नान्यदित्यभिप्रायः। संख्यामात्रमपि प्रयोजनार्थं निदानादिपञ्चकं रोगज्ञापकं दर्शितं तत्र सम्प्राप्तिस्तु कथिता तस्याः संख्यापर्यायं नामेति। तदुक्तं 'संख्याविकल्पप्राधान्यबलकालविशेषतः। सा भिद्यते यथाऽत्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति' इति न्यायात् संख्यामात्रमपि नात्र निरर्थकम् ॥ १ ॥

गू—अथ रोगगणनाऽध्यायो व्याख्यायते। पूर्वं रोगाणां ज्वरादीनां गणना या मुनिभिः प्रकीर्तिता कथिता सैव गणना मया शार्ङ्गधरेण प्रोच्यते। यतस्तद्भेदास्तस्या गणनाया बहवः भेदा मताः बहुमुनिप्रणीतत्वात् ॥ १ ॥

गू०—तत्रादौ सर्वरोगेषु ज्वरस्यैव प्राधान्याज्ज्वराणां नामान्याह—

**पञ्चविंशतिरुद्दिष्टा ज्वरास्तद्भेद उच्यते ।**
**पृथग्दोषैस्तथा द्वन्द्वभेदेन त्रिविधः स्मृतः ॥ २ ॥**
**एकश्च सन्निपातेन तद्भेदा बहवो मताः ।**
**प्रायशः सन्निपातेन पञ्च स्युर्विषमज्वराः ॥ ३ ॥**
**सन्ततः सततश्चैव अन्येद्युष्कस्तृतीयकः ।**
**चातुर्थकश्च पञ्चैते कीर्तिता विषमज्वराः ॥ ४ ॥**
**तथागन्तुज्वरोऽप्येकस्त्रयोदशविधो मतः ।**
**अभिचारग्रहावेशशापैरागन्तुकस्त्रिधा ॥ ५ ॥**
**श्रमाच्छेदात्क्षताद्दाहाच्चतुर्धा घातजो ज्वरः ।**
**कामाद्भीतेः शुचो रोषाद्विषादौषधगन्धतः ॥ ६ ॥**
**अभिषङ्गज्वराः षट् स्युरेवं ज्वरविनिश्चयः ।**

दी०—इदानीं संख्यामात्रं प्रकटयन्नाह—पञ्चविंशतीति। ज्वराः पञ्चविंशतिरुद्दिष्टाः कथिताः। पञ्चविंशतिरेवात्र हेतुज्वरैणैव दर्शिताः। सन्तापलक्षणो ज्वर इति। तदुक्तं—'क्रोधात्पित्तमेवाग्निस्तदूष्मा ज्वरः'

---

१—'क' पुस्तके नास्ति। २—'सन्ततं सततोऽन्येद्युस्तृतीयकचतुर्थकौ' इति 'क' पा०। ३—नास्ति 'क' पुस्तके। ४ 'न्तव' 'क०' पा०। ५—'द्भेदा' 'क' पा०।

इति। अत एवाह केश्चित् 'दक्षापमानसंक्रुद्धो रुद्रनिश्वाससम्भवः। ज्वरोऽष्टधा पृथग्द्वन्द्वसंघाताऽऽगन्तुजः स्मृतः' इति। अष्टप्रकारस्यैव पञ्चविंशतिभेदा दर्शिताः। अथ पञ्चविंशतिविवरणमाह—पृथग्दोषैरित्यादि। पृथग्दोषैः कृत्वा त्रयो भेदास्तेन वातेन पित्तेन कफेनेत्यर्थः। द्वन्द्वभेदेनापि त्रिविधः, द्वन्द्वभेदेन द्विदोषमिलितेन, तेन वातपित्ताभ्यां, वातश्लेष्मभ्यां, श्लेष्मपित्ताभ्यामिति। एको भेदस्तु सन्निपातेन मिलितदोषत्रयेण भवति। तद्भेदा बहवः स्मृता इति।

१–माधव इत्यर्थः।

२–वातज्वरलक्षणं यथा—

'वेपथुर्विषमो वेगः कण्ठौष्ठपरिशोषणम्।
निद्रानाशः क्षवस्तम्भो गात्राणां रौक्ष्यमेव च ॥ ८ ॥
शिरोहृद्गात्ररुग्वक्त्रवैरस्यं गाढविट्कता।
शूलाऽऽध्माने जृम्भणं च भवन्त्यनिलजे ज्वरे ॥ ९ ॥

इति (मा.नि.)

३–पित्तज्वरलक्षणं यथा—

वेगस्तीक्ष्णोऽतिसारश्च निद्राऽल्पत्वं तथा वमिः।
कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते ॥ १० ॥
प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥ ११ ॥ इति ॥

४–कफज्वरलक्षणं यथा—

स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता।
शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च ॥ १२ ॥
नात्युष्णगात्रता छर्दिरङ्गसादोऽविपाकिता।
गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता।
प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता॥ १३ ॥

इति।

५–वातपित्तज्वरलक्षणं यथा—

तृष्णा मूर्च्छा भ्रमो दाहः स्वप्ननाशः शिरोरुजा।
कण्ठास्यशोषो वमथू रोमहर्षोऽरुचिस्तमः ॥ १४ ॥
पर्वभेदश्च जृम्भा च वातपित्तज्वराकृतिः।

६–वातश्लेष्मज्वरलक्षणं यथा—

स्तैमित्यं पर्वणां भेदो निद्रागौरवमेव च ॥ १५ ॥
शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्तनम्।
सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः ॥ १६ ॥

तस्य सन्निपातस्य ज्वरस्य बहवो भेदास्त्रयोदशविधाः स्मृताः कथिताः। ते तु नात्र गणिताः। यतो सन्निपातज्वर एक एव निदानद्वारेण पूर्वाचार्यैर्दर्शितः। भेदास्तु दोषाणां हीनमध्याधिकभावेन कथिताः। तथाहि 'श्रुल्बणैकोल्बणैः षट् च हीनमध्याधिकाश्च षट्। समैरेको विकाराणां सन्निपातास्त्रयोदश' इति। पञ्च विषमज्वरास्तु सन्निपातेनैव स्युः। (ते च)— 'सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ' इति यदुक्तं— 'ज्वराश्च विषमाः सर्वे सन्निपातसमुद्भवाः' इति वचनात्। एके 'चत्वारः सन्ततं हित्वा ज्ञेयास्ते विषमज्वराः' इति वदन्ति तन्मते तु विवादे सविस्तरं तन्नात्र लिखितं विस्तरभयात् यतस्तज्ज्ञैस्तज्ज्ञातव्यमेव। आगन्तुकोऽप्येकः स च त्रयोदशविधो भिन्नहेतुत्वात्। तद्यथा त्रयोऽभिचारादिजनिताः, चत्वार आघातजाः, षडभिषङ्गजाश्चेति। अभिचारादीनामपि व्याख्या लिख्यते यथा—अभिचारो मन्त्रादिभिर्मारणप्रयोगः। ग्रहावेशो दुष्टग्रहावेशः, भूतादीनां च सम्बन्धेनावेशो वा, शापो ब्राह्मणगुरुवृद्धसिद्धानामनिष्टाभिशपनम्। श्रम इति। शरीरायासजननव्यापारलक्षणं कर्म तद्व्यायाम-

७–पित्तश्लेष्मज्वरलक्षणं यथा—

लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा।
मुहुर्दाहो मुहुः शीतं पित्तश्लेष्मज्वराकृतिः ॥ १७ ॥

८–सन्निपातज्वरलक्षणं यथा—

क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजा।
सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने ॥ १८ ॥
सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः।
तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः ॥ १९ ॥
परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परम्।
ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च ॥ २० ॥
शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा।
स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः ॥ २१ ॥
कृशत्वं नातिगात्राणां प्रततं कण्ठकूजनम्।
*कोठानां श्यावरक्तानां मण्डलानां च दर्शनम् ॥ २२ ॥
मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च।
चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः ॥ २३ ॥

इति ॥

*कोठानां लक्षणं तु—'वरटीदंष्ट्रसंकाशं कोठमित्यभिधीयते' इति ॥

शब्देन वाच्यं, दाहोऽग्न्यादिसम्भवः। क्षतः प्रहारः स च लोष्टशस्त्रलगुडादिजनितः, छेदोऽस्त्रप्रभृतिभिः, कामोऽभिलाषः स चाभिमतकामिन्याद्यप्राप्तिनिमित्तः, भीतिर्भयम्, सा च प्रभुनिमित्तादिका, शुक् शोकः सच धनबन्धुनाशादिनिमित्तः, रोषः क्रोधः स तु पराभिद्रोहादिलक्षणः, विषः स्थावरजङ्गमादिरूपस्तज्जनित इत्यर्थः। औषधगन्धत इति। तीव्रौषधिगन्धाघ्राणजत्वादिति भावः। एवमित्यनेन प्रकारेण ज्वरविनिश्चयः कथितः,ज्वराणां विनिश्चयो ज्ञानं ज्वरसंख्यायामेव ज्ञानमित्यर्थः। यतः संख्याविकल्पेत्यादिना। ननु कथमादौ ज्वर एव प्रोक्तो नान्ये रोगाः? सत्यं—ज्वरस्तु सर्वेषां प्रधानतमः। तदुक्तम्—'देहेन्द्रियमनस्तापी सर्वरोगाग्रजो बली। ज्वरः प्रधानं रोगाणामुक्तो भगवता पुरा' इति॥ २—६॥

**गू०**—उक्ताः पञ्चविंशतिर्ज्वरास्तेषां संख्या क्रियते। पृथग्दोषैर्वातपित्तकफैस्त्रयः, द्वन्द्वभेदेन द्विद्विदोषेण त्रयः, सन्निपातेन एकः, तद्भेदाः सन्निपातेन बहवः, सन्धिकादयः एकोनपञ्चाशत् वृद्धसुश्रुतोक्तबाहुल्यात्; यद्वा एकस्मिन्नेव सन्निपाते सर्वलक्षणान्तर्भूतत्वान्नोक्ताः; माधवेनापि एक एव सन्निपातज्वरो लिखितः। सन्ततादयः पञ्च विषमज्वरा एक एवागन्तुकज्वरस्त्रयोदशविधः। एवं पञ्चविंशतिः। एषां लक्षणानि निदाने विज्ञेयानि विचारस्तु मधुकोशे। ननु सुश्रुतादिनिदानेऽष्टविधो ज्वरः कथितः तथोक्तं—'दक्षापमानसंक्रुद्धो रुद्रनिःश्वाससंभवः। ज्वरोऽष्टधा पृथक् द्वन्द्वसंघातागन्तुकः स्मृत' इति, कथमत्र पञ्चविंशतिः? उच्यते, अष्टविधज्वरस्यैव पञ्चविंशतिविधो विस्तारः, पञ्चविधविषमज्वरस्य सन्निपातेऽन्तर्भूतत्वात्। एकविधस्यागन्तोरपि त्रयोदशधा भिन्नत्वात्॥ २–६॥

**गू०**—अथातिसारसंख्यामाह—

**पृथक्त्रिदोषैः सर्वैश्च शोकादामाद्भयादपि॥ ७॥**
**अतीसारः सप्तधा स्याद्ग्रहणी पञ्चधा मता।**
**पृथग्दोषैः सन्निपातात्तथा चामेन पञ्चमी॥ ८॥**
**प्रवाहिका चतुर्धा स्यात्पृथग्दोषैस्तथास्रतः।**

**दी०**—इदानीमतीसारादीनां रोगाणां भेदान् दर्शयन्नाह—पृथगिति। अतीव सरतीत्यतीसारो गुदेन। स च सप्त प्रकारो भवति। तद्यथा पृथग्दोषैरित्यादि। पृथग्दोषैरित्यनेन वातेन पित्तेन कफेन त्रयः, सर्वैरिति मिलितदोषत्रयेणैकः, शोकादिति इष्टादिवियोगनिमित्तात्, आमादपरिपक्वरसात्, आमाजीर्णाद्वा, अजीर्णमपक्वं च वर्षादिना, भयाद्भीतेः। ननु माधवेन षड्विधोतीसारो निगदितो यथा—'एकैकशः सर्वशश्चापि दोषैः शोकेनान्यः षष्ठ आमेन चोक्तः' इति तत् कथमत्र सप्तविध इति?, उच्यते, निदानं तु नियतानियतभेदेन द्विविधं शोकाजीर्णादिभ्योऽपि कदाचिदतीसार उत्पद्यते। भयनिदानेनाप्यावश्यकमतीसारो भवतीत्यदोषः। यतो दृश्यते हि सभयपुरुषस्य तत्क्षणमेव द्रवसरणं गुदेनेति। तस्मादत्र नियतहेतुको नाम सप्तमो भयात् प्रतिपादित इत्यर्थः। इति सप्तधा प्रतिपादितः। ग्रहणी पञ्चधा मतेत्यादि। ग्रहणी वह्निस्थानं तदाश्रितो दोष एव संग्रहणीशब्दवाच्यः। क्वचिद्ग्रहणीदोष इत्युपदर्शनात्, तदुक्तं—'षष्ठी पित्तधरा नाम या कला परिकीर्तिता। पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्तिता' इति। ग्रहणाद्ग्रहणी मतेत्यपि। यतः—'अग्न्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता' इति। पञ्चधा पञ्चप्रकारा। तथा चामेन पञ्चमीति। आमेन आमवातेनेत्यर्थः। प्रवाहिका चतुर्धा स्यादित्यादि। सशब्दं कण्ठबलेन वायोरपानमार्गेण बहिर्निःसरणं प्रवाहिका। अस्याः पर्यायनामानि तन्त्रान्तरप्रतिपादितानि। यथा केचन विस्रंसीति[1] नाम्ना कथयन्ति, एके चान्तर्ग्रन्थिरिति, केऽपि निश्चारं, निवाहिकामित्यपरे। चतुर्धेति। वातपित्तकफै रक्तजश्च। अस्रं रुधिरम्। ननु प्रवाहिकाऽतीसारयोः को भेदः यस्माद्द्रवसरणत्वेनापक्वलक्षणयोगात्साधर्म्यं तत् कथं भेदः? उच्यते—नानाद्रवधातुसरणमतीसारः। प्रवाहिकायां तु केवलं कफसरणमयमत्र भेदः॥ ७॥ ८॥

**गू०**—पृथक् त्रिदोषैः वातपित्तकफैः त्रयः, सर्वैः त्रिभिर्मिलित्वा एकः, एकः शोकात्, एकः आमात्, एवं सप्तधासारः। ननु सुश्रुतादौ षड्विधोऽतीसारः पठितः तत्कथं न विरोधः तथाचोक्तं 'सरत्यतीवातिसारं तमाहुर्व्याधिं घोरं षड्विधं तं वदन्ति'। भयजस्य सुश्रुते वातिकातीसारावरुद्धत्वात् षड्विधः चरकमते भयजस्य लिखितत्वात्, अत्र सप्तविधः कृतः अतो न दोषः। अतीव सरतीत्यतीसार इति निरुक्तिश्च॥

ग्रहणीसंख्यामाह—पृथग्दोषैर्वातपित्तकफैस्त्रिधः, स

१—'विवशी' इति 'क' पुस्तके

न्निपातादेका, आमेन पञ्चमी, एवं पञ्चधा निदाने ग्रहणी चतुर्धा लिखिता आमजाया अभावात् । प्रवाहिकामाह—पृथग्दोषैः वातपित्तकफैस्त्रिस्ततः सन्निपाताच्चतुर्थी, एवं चतुर्धा प्रवाहणात्प्रवाहिकातिसारभेदः ॥ ७ ॥ ८ ॥

**गू०**—अजीर्णमाह—

**अजीर्णं त्रिविधं प्रोक्तं विष्टब्धं वायुना मतम् ॥९॥**
**पित्ताद्विदग्धं विज्ञेयं कफेनामं तदुच्यते ।**
**विषाजीर्णं रसादेकं दोषैः स्यादलसस्त्रिधा ॥ १० ॥**
**विसूची त्रिविधा प्रोक्ता दोषैः सा स्यात्पृथक्पृथक् ।**
**दण्डकालसकश्चैक एकैव स्याद्विलम्बिका ॥ ११ ॥**

**दी०**—अथाजीर्णान्याह—अजीर्णमिति । अजीर्णं त्रिविधं प्रोक्तमिति अजीर्णमित्यपरिपक्वान्नजनितं त्रिविधमिति वातादिभेदेन एके अजीर्णं विविधं प्रोक्तमित्यपि पठन्ति । तन्मतं तु माधवेनोक्तं यथा—'आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः । अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥ अजीर्णं पञ्चमं केचिन्निर्दोषं दिनपाकि च । वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरम्' इति । यद्रसादेकमजीर्णं तद्विषाजीर्णमत्र प्रतिपादितं विषवन्मारणात्मकत्वात्, रोगसङ्करकरमित्यन्ये । ननु आमाजीर्णादिभ्यो रसशेषस्य को भेदः ? उच्यते—आमादित्रयमन्नजं रसशेषस्तु आहाररसजः । 'दोषैः स्यादलसस्त्रिधा' इति । दोषैर्वातादिभिरलसक इति विष्टब्धाजीर्णाद्भवति तस्य दोषस्थिरत्वनिमित्तादलसकसंज्ञा । यदुक्तं—'प्रयाति नोर्ध्वं नाधस्तादाहारो न विपच्यते । कोष्ठे स्थितोऽलसीभूतस्तेन चालसकः स्मृतः' इति । ननु विष्टब्धाजीर्णादलसकोत्पत्तिः विष्टब्धस्तु वातेनैव संभवति । यदुक्तं—'अजीर्णमामं विष्टब्धं विदग्धं च यदीरितम् । विसूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका' इति । कथमलसको वातादिभिस्त्रिभिर्दोषैः स्यात् ? नैष दोषः—दोषकार्ये दोषान्तरप्रकोप एव यथा सामान्यज्वरप्रकोपात् श्वासाद्युपद्रवाः, अथवा—'एकः प्रकुपितो दोषः सर्वाण्येव प्रकोपयेत्' इत्यादिवचनात् । विसूची त्रिविधा प्रोक्तेति । दोषैर्वातपित्तकफैः पृथक्पृथगिति व्यस्तानां दोषाणां त्रयो भेदा इत्यभिप्रायः । सा विसूची तु आमाजीर्णाद्भवति । विशेषेण सूचीभिरिव मर्माणि पीडयतीति विसूची, तदुक्तम्—'सूचीभिरिव गात्राणि तुदन् सन्तिष्ठतेऽनिलः । यस्याजीर्णेन सा वैद्यैर्विसूचीति निगद्यते' इति । एवं दण्डकालसकमिति । तच्चालसकभेदभिन्नलक्षणत्वेन पृथग्दर्शितम् । तद्यथा—'तिर्यग्गतास्तु दोषा दण्डवत् स्तम्भयन्ति ये । स दण्डालसकस्त्याज्यः शीघ्रं देहविनाशकृत्' इति । विलम्बिकाप्येका साविदग्धाजीर्णप्रभवा कथिता इयमपि त्रिदोषजनितेत्युक्तत्वात् । यथा 'दुष्टं तु भुक्तं कफमारुताभ्यां प्रवर्तते नोर्ध्वमधश्च यस्याम् । विलम्बिकां तां भृशदुश्चिकित्स्यामाचक्षते शास्त्रविदः पुराणाः' इति । ननु विलम्बिकालसकयोरपि वातकफप्रबलयोरूर्ध्वाधोप्रवर्तनशीलयोस्तुल्यत्वात् को भेदः ? उच्यते, अलसके तीव्राः शूलादयो भवन्ति, विलम्बिकायां न भवन्तीति भेदः ॥ ९–११ ॥

**गू०**—विष्टब्धं वायुना पित्तेन विदग्धं कफेनामं एवं त्रिविधमजीर्णं प्रोक्तं । निदानमते तु षड्विधमजीर्णं रसशेषदिनपाकादिना । अथालसकविसूचीदण्डकविलम्बिकानां संख्यामाह—अलसो रोगः सर्वाजीर्णभेदः अलसाख्यः, विषाजीर्णरसात् त्रिधा स्यात् । कैर्दोषैर्वातपित्तकफैर्विषरूपं यदजीर्णं तस्माद्विषभावं व्रजेद्वापीति रसपाके उक्तत्वात् । एवं विसूची त्रिधा प्रोक्ता दण्डकालसकं एकैकप्रकारं तथा एकप्रकारा विलम्बिका त्रिदोषजन्यत्वात् ॥ ९–११ ॥

**गू०**—अथार्शोरोगगणना—

**अर्शांसि षड्विधान्याहुर्वातपित्तकफास्त्रतः ।**
**सन्निपाताच्च संसर्गात्तेषां भेदो द्विधा मतः ॥१२॥**
**सहजोत्तरजन्मभ्यां तथा शुष्कार्द्रभेदतः ।**
**त्रिधैव चर्मकीलानि वातात्पित्तात्कफादपि ॥१३॥**

**दी०**—अर्शांसीति । अरिवत् प्राणान् शृणन्ति हिंसन्ति इत्यर्शांसि अपाने मांसाङ्कुररूपाणीत्यर्थः । षड्विधानीति । दोषभेदेन, तत्रास्रतो रुधिरात्, यद्यपि तन्त्रान्तरे द्वन्द्वजानि प्रकृतिसमसमवायारब्धत्वात् पृथक् न गणितानि तथापि दोषद्वयस्य निदानमेलके लक्षणमेलके च द्वन्द्वोल्बणानि द्वन्द्वजानि प्रतिपादितानि । तदुक्तं—'हेतुलक्षणसंसर्गाद्विद्याद्द्वन्द्वोल्बणानि च । सर्वो हेतुस्त्रिदोषाणां सहजैर्लक्षणैः समम्' इति । द्वन्द्वोल्बणमित्यनेन सर्वेषामर्शसां त्रिदोषजत्वादधिकेन तु व्यपदेश इति दर्शितम् । यदाह चरकः—'अर्शांसि खलु जायन्ते न सन्निपतितैस्त्रिभिः । दोषैर्दोषविशेषस्तु

विशेषः कथ्यतेऽर्शसां' इति । द्वन्द्वजानामत्रैकभेदो जात्यैकवचनत्वात् । तेषां भेदो द्विधा मत इति । तेषां षड्विधानां द्विधेति सहजोत्तरजन्मभ्यां सूचितः, सह शरीरेण जातानि गुदवल्यारम्भकवीर्यभागस्य दोषदूषितत्वात् कुलजानामित्यर्थः । उत्तरजन्मेति जन्मोत्तरसंबन्धीन्यर्शांसि मिथ्याऽऽहारविहाराभ्यामुद्धतैर्दोषैर्भवन्तीत्युत्तरजन्मानीत्यर्थः । माधवेन तु सहजार्शःषड्विधसंख्यायां पठितमेव, तदाह—'पृथग्दोषैः समस्तैस्तु शोणितात् सहजानि च । अर्शांसि षट्प्रकाराणि विद्याद्गुदवलित्रये' इति । सहजार्शतो भिन्नलक्षणोक्तत्वात् प्रसङ्गतोऽपि सहजार्शसां लक्षणान्याह सुश्रुतः—'दुर्दर्शनानि परुषाणि पाण्डूनि दारुणान्यन्तर्मुखानि च तैरुपद्रुतः कृशोऽल्पभुक् शिरासन्ततगात्रोऽल्पप्रजः क्षीणरेताः क्षामस्वरः क्रोधनोऽल्पाग्निर्घ्राणशिरोऽक्षिश्रवणरोगी सततमन्त्रकूजाटोपहृदयोपलेपासेकप्रभृतिभिः पीड्यते' इति सहजानां लक्षणम् । शेषाणि तूत्तरजन्मशब्दवाच्यानि न केवलं सहजोत्तरजन्मभ्यां द्विधा, किन्तु शुष्कार्द्रभेदतो द्विधा भवन्ति तेन तु गुदाङ्कुरा एके शुष्काः स्रावरहिता भवन्ति अत्यनिलत्वात्, एके आर्द्राः स्रावयुक्ताः पित्तरक्तातिप्रकोपत्वात् । त्रिधैव चर्मकीलानीति । गुदौष्ठं परित्यज्य कीलसदृशमर्शः कुर्यात्, तत्कीलकमिति तत्राऽर्शसामेवासंभवत्वादसौ भेदः । तदुक्तं—'व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः । कीलोपमं स्थिरखरं चर्मकीलं तु तद्विदुः' इत्यत्राऽपि त्वचो बहिरित्यनेन गुदौष्ठं व्यज्यत इति व्याख्यानयन्ति । तद्गुदौष्ठं कियत्परिमाणमिति विवक्षायां सुश्रुतः—अर्धपञ्चाङ्गुलपरिमाणं गुदमिति तस्यावयवभूतास्तिस्रो वलय उपर्युपरि व्यवस्थिताः शङ्खावर्तनिभाः प्रवाहणी विसर्जनी संवरणी चेति । तत्र गुदौष्ठं अर्धाङ्गुलं सार्धयवम्, सार्धैकाङ्गुलीप्रमाणा प्रथमावली । द्वितीया सार्धैकाङ्गुली तृतीयाऽपि सार्धैकाङ्गुली एवमर्धपञ्चाङ्गुलमिति । भोजेऽप्युक्तम्—'रोमान्तेभ्यो यवादर्धं गुदौष्ठं परिचक्षते । गुदौष्ठादङ्गुलं चैव प्रथमां तां वलिं विदुः ॥ सार्धैकाङ्गुलमानेन अन्ये च परिकीर्तिते ॥' इति ॥ १२-१३ ॥

गू०—वातादेः षड्विधान्यर्शांस्याहुः । मुनय इति शेषः । वातात्पित्तात्कफादसं रक्तं तस्मात्सन्निपातात् संसर्गाद्विदोषसंबन्धः तस्मात् एवं षट् । ननु सुश्रुते तु षट् संसर्गजानि प्रोक्तानि भिन्नान्येव प्रकृतिसमवेतत्वात् पृथग् नोक्तानि । तथाचोक्तं सुश्रुते—'अर्शःसु दृश्यते रूपं यदा वै दोषयोर्द्वयोः । संसर्गजं विजानीयात्संसर्गः षड्विधश्च स' इति । उच्यते—अत्र संसर्गजानि मध्ये गणितानि सरुजानि जन्मोत्तराणि शुष्कार्द्राणि च चर्मकीलं च एतान्यर्शोभेदानि भिन्नानि भवन्ति । तान्याह—सहजोत्तरं जन्मानन्तरं तथा शुष्कार्द्रभेदतः तेषां भेदस्तु द्विधा स्मृतः कथितः । देहेन सहजातं सहजमुच्यते । उत्तरजन्म उत्तरं पश्चाजन्म यस्य तदुत्तरजन्म जन्मानन्तरं जातमित्यर्थः । चर्मकीलान्यपि तद्भेदजातिभिन्नानि भवन्ति तानि वातात् पित्तात् कफादेवंविधानि भवन्ति । नन्वर्शः किमात्मकं किंस्वरूपं भवतीत्याह—अरिवत् शृणोति हिनस्तीत्यर्थः । पृषोदरादित्वान्निरुक्तिः । तदुक्तं वाग्भटे—'अरिवत्प्राणिनो मांसकीलने निविशन्ति यत् । अर्शांसि तस्मादुच्यन्ते गुदमार्गनिरोधतः ।' माधवनिदाने च—'दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन् । मांसाङ्कुरा अपानादौ कुर्वन्त्यर्शांसि ताञ्जगुः' इत्यर्शोगणना ॥ १२-१३ ॥

गू०—अथ कृमिगणनामाह—

**एवं विंशतिभेदेन कृमयः स्युर्द्विधा च ते ।**
**बाह्यास्तथाभ्यन्तराः स्युस्तेषु यूका बहिश्चराः ॥१४॥**
**लिक्षाश्चान्येऽन्तरचराः कफात्ते हृदयोदकाः ।**
**अन्नादा उदरावेष्टाश्चुरवश्च महागुहाः ॥ १५ ॥**
**सुगन्धा दर्भकुसुमास्तथा रक्ताश्च मातरः ।**
**सौरसा लोमविध्वंसा रोमद्वीपा उदुम्बराः ॥१६॥**
**केशादाश्च तथैवान्ये शकुजाता मकेरुकाः ।**
**लेलिहाश्च सलूनाश्च सौसुरादाः ककेरुकाः ॥ १७॥**
**तथान्यः कफरक्ताभ्यां संजातः स्नायुकः स्मृतः ।**
**व्रणस्य कृमयश्चान्ये विषमा बाह्ययोनयः ॥ १८ ॥**

दी०—एकविंशतिभेदेनेति । कृमयस्तु एकविंशतिभेदेन विख्याताः, ते तु बाह्याभ्यान्तरभेदेन द्विधा भवन्ति । तेषु यूका बहिश्चरा इति । तेषु कृमिसमूहेषु यूका लिक्षाश्च बहिश्चरा बाह्या बहिःशरीरे जाताः । अन्ये अवशिष्टास्तु अन्तरचरा ज्ञातव्या इति शेषः । अन्तरं कोष्ठेषु चरन्तीति । ते चाष्टादशप्रकारा भवन्ति । तद्यथा—हृदयोदकादिदर्भकुसुमान्ताः । सप्तकफादिति । कफप्रायदोषजाः, एतेषां स्वरूपमपि तन्त्रान्तरे

चोक्तं—'पृथुब्रध्ननिभाः केचित्केचिद्गण्डूपदोपमाः । रूढधान्याङ्कुराकारास्तनुदीर्घास्तथाऽणवः ॥ श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते' इति । तथा रक्ताचेति षट्क्रमयो भवन्ति, तेच मातरप्रभृतिकेशादपर्यन्ताः, आकारादप्येते यथा—'रक्तवाहिशिरास्थानरक्तजा जन्तवोऽणवः । अपादा वृत्तताम्राश्च सौक्ष्म्यात् केचिददर्शनाः' इत्येते षड्भेदाः कुष्ठैककारका विज्ञेयाः । तथाऽन्ये पञ्च क्रमयः शकृज्जाता भवन्ति, शकृत् पुरीषं, तदुक्तम्—'पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः' इति । तेतु मकेरुकादिककेरुकान्ताः पञ्च स्वरूपतो यथा—'पृथुवृत्ततनुस्थूलाः श्यामपीतसिताऽसिताः' इति । इत्येवमेकविंशतिक्रमयो व्याख्याताः । ननु माधवेन विंशतिक्रमिभेदा दर्शिताः, 'नामतो विंशतिविधा' इत्यादिवचनात्, तत्कथमत्रैकविंशतिर्निगद्यते? उच्यते, माधवेन तु बाह्यगताः क्रमयो द्विभेदाः कथिताः, तद्यथा—'तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः । बहुपादाश्च सूक्ष्माश्च यूका लिख्याश्च नामतः । द्विधा ते कोठपिडकाकण्डूगण्डान् प्रकुर्वते' इति, अत्र तु विंशतिरिति संज्ञावर्णभेदात् स्थानभेदाच्च पृथङ् न गणिता इति न दोषः । अन्यः स्नायुकसंज्ञः क्रमिरेव स तु कफरक्ताभ्यां संजातः । ननु यद्येवं तर्हि द्वाविंशतिक्रमयः कथं न गणिताः? सत्यम्—अयमपि कफजेषु सप्तसु क्रमिषु ये दीर्घास्तेषां भेद एव । अतएव कफरक्ताभ्यां संजायत इत्युक्तम् । यतः, 'कफादामाशये जाता वृद्धाः सर्पन्ति सर्वतः' इत्यादिवचनात् स्नायुकरूढित्वेनाऽत्र भिन्नचिकित्सार्थदर्शनाच्च पृथक् गणित इति न दोषः ॥ १४–१८ ॥

**गू०**—बाह्याभ्यन्तरभेदतः द्वाविंशतिप्रकारेण उक्ताः क्रमयः द्विधा भवन्ति । ते बाह्या द्वौ, आभ्यन्तराः पञ्च । तथान्यः कफरक्ताभ्यां संजातः स्नायुकः अन्ये व्रणक्रमयः, एतौ द्वौ भेदौ एवं द्वाविंशतिः । ननु सुश्रुते तु क्रमयो विंशतिविधा उक्ताः । तथा च सुश्रुते–'क्रमयस्तु द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः । बहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्विधाः । नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः' इति कथं अत्र द्वाविंशतिः? उच्यते, क्रमयस्तु विंशतिविधा एव । अथ च स्नायुकैः व्रणक्रमिभिर्मिलित्वा द्वाविंशतिः, ते सुश्रुतादौ भिन्ना उक्ताः अतो न दोषः । क्रमिजनितो रोगः क्रमिरोग इति निरुक्तिः तथा च क्रमिजातलक्षणम् ॥ १४–१८ ॥



**गू०**—अथ पाण्डुकामलाहलीमकसंख्यामाह—

**पाण्डुरोगाश्च पञ्च स्युर्वातपित्तकफैस्त्रिधा ।**
**त्रिदोषैर्मृत्तिकाभिश्च तथैका कामला स्मृता ॥१९॥**
**स्यात्कुम्भकामला चैका तथैकं च हलीमकम् ।**

**दी०**—पाण्डुरोगाश्चेति । पाण्डुवर्णत्वेनोपलक्षितो रोगः पाण्डुरोग इति रूढिः । पञ्च स्युरिति पञ्चप्रकारा भवन्तीत्यर्थः । ते के वातपित्तकफैः कृत्वा व्यस्तास्त्रयो भेदाः, त्रिदोषैरिति मिलितदोषत्रयेणैको भेदः । मृत्तिकाभिरिति मृद्भक्षणादेकः, एवं पञ्च प्रकाराः पाण्डुरोगभेदा बोद्धव्याः । मृत्तिकाभिरिति बहुवचनत्वेन बहवो मृत्तिकादोषप्रकोपविशेषण दर्शिताः, तथाहि—'मृत्तिकादनशीलस्य कुप्यत्यन्यतमो मलः । कषाया मारुतं पित्तमूषरा मधुरा कफम् । कोपयेन्मृद्रसादींश्च रौक्ष्याद्भुक्तं च रौक्षयेत्' इति । प्रसङ्गतोऽपि तत्स्वरूपं सुश्रुतोक्तमाह—'या पीतवर्णा मधुरा कषाया कृष्णा मधुक्षारगुणोपपन्ना । रक्ता च तिक्ता कटुका च नीला सिता च माधुर्यगुणा सदा स्यात्' इत्युक्तत्वात् । तथैका कामला मतेत्युपेक्षितात्पाण्डुरोगत एव कामला भवति । तदुक्तम्—'पाण्डुरोगी च योऽत्यर्थं पित्तलानि निषेवते । तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते' इति । रोगाय कामलास्वरूपायेत्यभिप्रायः । तस्मात् कुम्भकामला चैकेति कुम्भकामलाऽप्येका भवति । कामलाया अवस्थान्तरं कुम्भकामलेत्युच्यते, यतः—'कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला' इत्यादिवचनात् । एकं हलीमकमिति तदपि पाण्डुरोगावस्थायामेव भवति । तदुक्तम्—'यदा तु पाण्डोर्वर्णः स्याद्धरितः श्यावपीतकः । हलीमकं तदा तस्य विद्यादनिलपित्ततः' इति ॥ १९ ॥

**गू०**—वातपित्तकफैस्त्रिदोषैर्मृत्तिकाभिश्च एवं पाण्डुरोगाः पञ्च स्युः भवेयुः । पाण्डुत्वचोपलक्षिता रोगाः पाण्डुरोगा इति निरुक्तिः । कामला एका एकप्रकारा सा पित्तजन्या, कुम्भकामला च एकप्रकारा पित्तजन्या । हलीमकं च एकं एकप्रकारं तत् अनिलपित्ततः, एते रोगाः पाण्डुभेदाः ॥ १९ ॥

**गू०**—अथ रक्तपित्तसंख्या—

**रक्तपित्तं त्रिधा प्रोक्तमूर्ध्वगं कफसंभवम् ॥ २० ॥**
**अधोगं मारुतं ज्ञेयं तद्द्वयेन द्विमार्गगम् ।**

**दी०**—रक्तपित्तमिति । रक्तं च पित्तं चेति सुश्रुतः । चरके तु रागप्राप्तं पित्तं रक्तपित्तमित्युच्यते । यदुक्तं

'रक्तस्य पित्तमाख्यातं रक्तपित्तं मनीषिभिः' इति। उभयत्रापि न कश्चिद्दोषः। ऊर्ध्वगमिति नासास्य-कर्णाक्षिरन्ध्रेषु। अधोगमिति मेढ्रयोनिगुदमार्गेषु। तद्द्वयेन द्विमार्गगमिति। तद्द्वयेन कफवाताभ्यां, द्विमार्गगमित्यूर्ध्वाधःप्रवर्तनात्। एके तद्द्वयेन त्रिमार्गगमिति पठन्ति तत्र रोमकूपेष्वपि तत् प्रवर्तेत इति व्याख्यानयन्ति। तदुक्तम्—'कुपितं रोमकूपेषु समस्तैस्तत्प्रवर्तते' इति॥ २०॥

**गू०**—ऊर्ध्वाधः मुखनासागुदद्वावि प्रवृत्तं रक्तं रक्तपित्तमुच्यते। तत्त्रिविधं, ऊर्ध्वगं कफजं, अधोगं मारुतानुगं, वातेन जनितं द्विमार्गगं, द्वयेन कफवातेनेत्यर्थः॥ २०॥

**गू०**—अथ काससंख्या—

**कासाः पञ्च समुद्दिष्टास्ते त्रयस्तु त्रिभिर्मलैः॥२१॥**
**उरःक्षताच्चतुर्थः स्यात्क्षयाद्धातोश्च पञ्चमः।**

**दी०**—कासा इति। कसनं कासः। 'भिन्नस्वरः कासति शुष्कमेव' इति सुश्रुतवचनात्। तथाहि—'प्राणो ह्युदानानुगतः प्रदुष्टः संभिन्नकांस्यस्वनतुल्यघोषः। निरेति वक्त्रात् सहसा स दोषो मनीषिभिः कास इति प्रदिष्टः' इति। पञ्चेति पञ्च प्रकाराः ते के प्रकारा इत्यत आह—ते त्रयस्तु त्रिभिर्मलैरिति। ते कासाः त्रिभिर्मलैस्त्रिभिर्दोषैस्त्रय एव कथिताः। उरःक्षताच्चतुर्थः स्यादिति उरसि प्रहारमिव वेदनाविशेषादुरःक्षतकाससंज्ञाः, तथाह्युक्तम्—'अतिव्यवायमह्याध्वयुद्धाश्वगजनिग्रहैः। रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत्। स पूर्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम्। कण्ठेन रुजताऽत्यर्थं विभिन्नेनेव चोरसा' इति। क्षयाद्धातोश्च पञ्चम इति। धातवो रसाद्याः, तेषां क्षयान्नाशात्। एके धातोरित्येकवचनत्वेन शुक्रक्षयादिति व्याख्यानयन्ति, तत्र प्रतिलोमानुलोमेन धातुक्षय उक्त इति न दोषः। तदुक्तम्—'अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तराः। क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः' इत्यादिदर्शनात्॥ २१॥

**गू०**—समुद्दिष्टाः कासाः पञ्चविंशतिस्तानाह—कासा इति। त्रिभिर्मलैर्दोषैस्त्रयः, उरःक्षताच्चतुर्थः, धातो रसादिधातोः क्षयात्पञ्चमः एवं पञ्च कासाः। कसनं कासः इति निरुक्तिः। कस गतिशासनयोरिति धात्वर्थात् अथवा भग्नकांस्यपात्रस्वनः कास इति॥ २१॥

**गू०**—अथ क्षयसंख्यामाह—

**क्षयाः पञ्चैव विज्ञेयास्त्रिभिर्दोषैस्त्रयश्च ते॥ २२॥**
**चतुर्थः सन्निपातेन पञ्चमः स्यादुरःक्षतात्।**
**शोषाः स्युः षट्प्रकारेण स्त्रीप्रसङ्गाच्छुचो व्रणात् २३**
**अध्वश्रमाच्च व्यायामाद्वार्धक्यादपि जायते।**

**दी०**—क्षया इति। उपेक्षितकासात् क्षयो भवतीति। एके 'कासात् संजायते क्षयः' इत्युक्तत्वात् कदाचित् क्षयत्वेन तु नियतमेव। क्षयोऽपि राजयक्ष्मसंज्ञः कथ्यते। तदुक्तं—'राज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः। तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः' इति। पञ्चमः स्यादुरःक्षतादिति। उरःक्षतो रोगविशेषः सर्वत्र प्रतिपादितत्वात्। शोषाः स्युः षट्प्रकारेणेति 'शोषोऽपि क्षयभेदः स्या'दिति वचनात्। यतः 'शोषणाच्च रसादीनां शोष इत्युच्यते बुधैः। क्रियाक्षयकरत्वाच्च क्षय इत्यभिधीयते' इति। षट्प्रकारा यथा—स्त्रीप्रसङ्गादिति। स्त्रीनिषेवणात्। अयं व्यवायशोषी कथितः। शुचः शोकात्, अयं शोकशोषी। व्रणादिति शरीराऽगन्तुव्रणविशेषात्। यतः 'रक्तक्षयाद्वेदनाभिस्तथैवाहारयन्त्रणात्। व्रणिनश्च भवेच्छोषः स चासाध्यतमो मतः'। अध्वश्रमादिति। अतिमार्गगमनजनितश्रमाच्च अयमध्वशोषी। व्यायामादिति शरीरायासजननकर्मस्वरूपात्। ननु व्यायामाध्वश्रमयोरायासजननसाधर्म्यात् को भेदः? उच्यते, व्यायामो यदाकस्मादेवाऽतिक्रियते तदैव भवति। मार्गगमनशीलत्वादेवाध्वशोषः स्यात्। तदुक्तम् 'अध्वशोषी च स्रस्ताङ्गः संभृष्टपरुषच्छविः' इत्यदोषः। वार्धक्यादिति जराभिव्याप्तशरीरत्वात्, अयं जराशोषी कथितः। तदुक्तम्—'जराशोषी कृशो मन्दवीर्यबुद्धिबलेन्द्रियः' इत्यादि॥ २२॥ २३॥

**गू०**—ननु सुश्रुते त्रिदोषेण एक एव क्षयः प्रोक्तः तत्कथं? तथाचोक्तं 'त्रिदोषो जायते यक्ष्मगदे एव चतुष्टयात्'। उच्यते उद्रेकात्पञ्चविधत्वं। तथाचोक्तं सुश्रुते 'एक एव मतः शोषः सन्निपातात्मको गदः। उद्रेकात्तस्य लिङ्गानि दोषाणां निपतन्ति हि' इति, अतो न दोषः। क्षीयते अनेनेति क्षय इति तस्य निरुक्तिः, तथाचोक्तं संशोषणादिति शोष इत्यभिधीयते क्रियाक्षयकारित्वात् क्षय इत्युच्यते बुधैः। राजयक्ष्मा शोषश्च तद्भेदौ। यक्ष्मणां राजा राजयक्ष्मा यद्वा चन्द्रमसो जात-

त्वात् राजयक्ष्मेति निरुक्तिः । शोषमाह—शोषाः षट् प्रकाराः स्युः स्त्रीप्रसंगादेकः, व्रणादेकः, अध्वा मार्गस्तच्छ्रमस्तस्मादेकः, व्यायामो मल्लादियुद्धं तस्मादेकः, शुद्धभावादेकः, एवं षट् शोषाः । रसादिशोषणात् शोषाः पञ्च क्षयाः षट् शोषाः एवं कोविदा एकादश आहुः ॥ २२ ॥ २३ ॥

**गू०**—श्वाससंख्यामाह—

**श्वासाश्च पञ्च विज्ञेयाः क्षुद्रः स्यात्तमकस्तथा ॥२४॥**
**ऊर्ध्वश्वासो महाश्वासश्छिन्नश्वासश्च पञ्चमः ।**

**दी०**—श्वासाश्चेति । श्वास इति वेगवदूर्ध्ववातत्वं । यतः 'श्वासश्च वस्तिकाध्मानं समवातोर्ध्वगामिता' इति । पञ्चेति पञ्चप्रकाराः, ते के प्रकारा इत्याह—क्षुद्र इत्यादि । दुःखेनाङ्गप्रबाधकोऽल्पवातजनितः क्षुद्रश्वाससंज्ञः । प्रतिलोमेन वायुना ग्रीवां शिरश्च संगृह्य तीव्रवेगं करोति स च तमसि निमग्न इव तिष्ठति तेन तमकश्वास इति संज्ञः । यो दीर्घं श्वसिति ऊर्ध्वदृष्टिं च करोति इतस्ततो विभ्रान्तनेत्रः स ऊर्ध्वश्वासार्दितः कथितः । यः शब्दवान् दुःखितः उच्चैः श्वसिति प्रनष्टज्ञानविज्ञानो विशीर्णवाक् स महाश्वासपीडितोऽभिहितः । यो विच्छिन्नं श्वसिति सर्वप्राणेन पीडित आनाहस्वेदमूर्च्छार्तः स छिन्नश्वासार्दित इति ॥ २४ ॥

हिक्कामाह—

**कथिताः पञ्च हिक्कास्तु तास्तु क्षुद्राऽन्नजा तथा ॥२५॥**
**गम्भीरा यमला चैव महती पञ्चमी स्मृता ।**

**दी०**—कथिता इति । त्वरितं प्राणहरत्वेन हिक्काः कथिताः । तदुक्तम्—'कामं प्राणहरा रोगा बहवो नतु ते तथा । यथा श्वासश्च हिक्का च हरतः प्राणमाशु च' इति । हिक्कास्वरूपं तु घोषवत्त्वेन प्रतिपादितं । यतः—'मुहुर्मुहुर्वायुरुदेति सस्वनो यकृत्प्लीहान्त्राणि मुखादिवाक्षिपन् । स घोषवानाशु हिनस्ति यस्मात् ततस्तु हिक्केत्यभिधीयते बुधैः' इति । पञ्चेति पञ्चप्रकाराः, तान् प्रकारान् आह—क्षुद्रेति । या मन्दवेगैः कृत्वा जत्रुमूलादेव प्रधावति सा क्षुद्रा नाम हिक्का कथिता । यामतिप्रयुक्तपानाद्यैः पीडितो वायुरूर्ध्वमागत्य हिक्कयति तामन्नजां विद्यात् । या घोरा गम्भीरनादिनी नाभिप्रभवा सा गम्भीरा ज्ञेया । या चिरेण यमलैर्वेगैः कृत्वा प्रवर्तते शिरोग्रीवां च कम्पयति सा यमला नाम कथिता । या सततं प्रवर्तते मर्माण्युत्पीडयन्तीव सर्वगात्रप्रकम्पिणीव सा महती नाम हिक्का कथिता ॥ २५ ॥

**गू०**—अथ हिक्कासंख्या कथितेति सुगमं । हिनस्ति प्राणानिति हिक्का ॥ २५ ॥

**गू०**—अथाग्निविकारसंख्या—

**चत्वारोऽग्नेर्विकाराः स्युर्विषमो वातसंभवः ॥ २६ ॥**
**तीक्ष्णः पित्तात्कफान्मन्दो भस्मको वातपित्तयोः ।**

**दी०**—चत्वार इति । अग्निश्चात्र जठराग्निः, तज्जनितो विकारश्चात्र कुपितदोषवाच्यः । अतएव समाग्निग्रहणं नात्र कृतं दोषसाम्यत्वात्, यतः 'समाग्निः श्रेष्ठ उच्यते' इति वचनात् । के ते चत्वार इत्याह—विषम इत्यादि । यो भुक्तमन्नं कदाचिन्न पचति कदाचिदाश्वेव पचति स विषमः, यो मात्राऽतिमात्रमप्यन्नं सुखं पचति स तीक्ष्णः, यः स्वल्पमप्यन्नं न पचति स मन्द इति । भस्मकस्तु तीव्राग्निसंज्ञः स च वातपित्तजनितः । तदुक्तम्—'अतिप्रवृद्धः पवनान्वितोऽग्निः क्षणादन्नं शोषयति प्रसह्य । भुक्तं क्षणाद्भस्म करोति यस्मात्तस्मादयं भस्मकसंज्ञकस्तु' । इति ॥ २६ ॥

**गू०**—विषमाद्यश्चत्वारोऽग्नेर्विकाराः स्युः । ननु निदाने समेन सह चत्वारोऽग्नेर्विकाराः भस्मको भिन्न उक्तः तदत्र न दोषः समस्य विकाराभावात् ॥ २६ ॥

**गू०**—अथारोचकसंख्या—

**पञ्चैवारोचका ज्ञेया वातपित्तकफैस्त्रिधा ॥ २७ ॥**
**सन्निपातान्मनस्तापात्—**

**दी०**—पञ्चैवेति । अरोचकास्तु पर्यायनामभिरेव त्रिधा कथिताः, तद्यथा सत्यामपि बुभुक्षायामभ्यवहारासामर्थ्यमस्वरुचिः, अभिलषितमप्यन्नं दीयमानं नाभ्यवहरतीत्यनन्नाभिनन्दनम्; अन्नस्य श्रवणस्मरणदर्शनस्पर्शनैर्यन्नोद्विजते स भक्तद्वेषः; एवं त्रिविधोऽपि रोगश्चरकसुश्रुताभ्यामरोचकशब्देन संगृहीतः । वृद्धभोजेन संज्ञान्तराण्यपि दर्शितानि । कानि तान्याह—'प्रक्षिप्तं च मुखे चान्नं जन्तुर्न स्वदते मुहुः । अरोचकः स विज्ञेयो भक्तद्वेषमथो शृणु । चिन्तयित्वा तु मनसा दृष्ट्वा श्रुत्वा च भोजनम् । द्वेषमायाति यो जन्तुर्भक्तद्वेषः स उच्यते ॥ यस्य नान्ने भवेत् श्रद्धा सोऽभक्तच्छन्द उच्यते । कुपितस्य भयार्तस्य यस्य भक्तनिरोधजः' इति ॥ २७ ॥

गू०—मनस्तापात् शोकादेर्मनोविकारात् अरोचको जिह्वानयनसंश्रितैर्दोषैर्जन्यते बीभत्सादिभिः ॥ २७ ॥

दी०—छर्दिमाह—

**छर्दयः सप्तधा मताः ।**

**त्रिभिर्दोषैः पृथक्त्रिस्रः कृमिभिः सन्निपाततः ॥ २८॥**
**घृणया च तथा स्त्रीणां गर्भाधानाच्च जायते ।**

दी०—छर्दय इति । छर्दिर्वमनविशेषः । वेगैः कृत्वा आननं छादयतीति छर्दिः । तदुक्तम्—'छादयन्नाननं वेगैरर्दयन्नङ्गभञ्जनैः । निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावितः' इति । कृमिभिरिति कृमिरोगजनिता, तथाचोक्तम्—'शूलहृल्लासबहुला कृमिजा च विशेषतः । कृमिहृद्रोगतुल्येन लक्षणेन च लक्षिता' इति । सन्निपातत इति मिलितदोषत्रयात् । घृणया चेति घृणया कृत्वा छर्दिर्भवतीत्यभिप्रायः; घृणा च पूत्यमेध्यादिगन्धास्वादनैरुत्पद्यते । घृणया चेति चकाराद्बीभत्साद्यवलोकनाच्च भवतीति केचित् । तदुक्तं—'बीभत्सैर्हेतुभिश्चाद्यैर्द्रुतमुत्क्लेशितो बलात्' इति । तथा स्त्रीणां गर्भाधानाच्च जायते इति गृहीतगर्भायाः स्त्रियश्छर्दिर्भवतीति । यतः—'नार्याश्चापन्नसत्त्वायास्तथाऽतिद्रुतमश्नतः' इत्यादिवचनात् ॥ २८ ॥

गू०—अथ छर्दिसंख्या ताः सप्त भवन्तीत्याह—पृथग्दोषैरिति सुगमम् ॥ २८ ॥

गू०—अथ स्वरभेदानाह—

**स्वरभेदाः षडेव स्युर्वातपित्तकफैस्त्रयः ॥ २९ ॥**
**मेदसा सन्निपातेन क्षयात्षष्ठः प्रकीर्तितः ।**

दी०—स्वरभेदा इति । प्रकृतिरूपस्य स्वरस्यान्यथाभावः स्वरभेदः; स च षड्विधो भवति, वातादीनां व्यस्तास्त्रयो भेदाः, सन्निपातेन मिलितदोषत्रयेण चैकः, मेदसा मेदोवृद्धेश्चैको भेदः, क्षयात् क्षयरोगादेकः, धातुक्षयाद्वेति केचित् ॥ २९ ॥

गू०—तृष्णामाह—

**तृष्णा च षड्विधा प्रोक्ता वातात्पित्तात्कफादपि ३०**
**त्रिदोषैरुपसर्गेण क्षयाद्धातोश्च षष्ठिका ।**

दी०—तृष्णेति । तृष्णा पानीयस्याभिलाषः । तदुक्तम्—'सततं यः पिबेद्वारि न तृप्तिमधिगच्छति । पुनः काङ्क्षति यस्तोयं तं तृष्णार्दितमादिशेत्' इति । त्रिदोषैरिति मिलितदोषत्रयेण । उपसर्गश्चागन्तुकः, स च क्षतादिशब्दवाच्यः । तेन जनिता उपसर्गिका । क्षयाद्धातोरिति रसादिधातुक्षयात् । चकारात् सप्तमी तु भुक्तोद्भवा इति मन्यन्ते केचित् । यदुक्तं—'स्निग्धं तथोष्णं लवणं च भुक्तं गुर्वन्नमेवाशु तृषां करोति' । अपरे त्वामसंभवां वदन्ति । सा दोषजान्तर्गतेति मन्यमानेन **शार्ङ्गधरेण** नात्र स्वीकृता इति ॥ ३० ॥

गू०—ननु निदानेन सप्त तृष्णाः प्रोक्ताः अत्र षट्, तत्कथं तदुक्तं 'दोषैश्च तिस्रः क्षतजा चतुर्थी क्षयात्तथान्यामसमुद्भवा च । भुक्तोद्भवा सप्तमिकेति तासां निबोध लिङ्गान्यनुपूर्वशस्तु । स्रोतःस्वपांवाहिषु दूषितेषु दोषैश्च तृट् संभवतीह जन्तोः,' इति ? । उच्यते आमजानिदाने अत्र त्रिदोषजा लिङ्गसमुद्भवा च इत्युक्तत्वात्संसर्गजा-क्षतजा चैवं षट् । भुक्तोद्भवा न विकारजा अतो नोक्ता ॥ ३० ॥

गू०—अथ मूर्च्छासंख्या—

**मूर्च्छा चतुर्विधा ज्ञेया वातपित्तकफैः पृथक् ॥३१॥**

**चतुर्थी सन्निपातेन तथैकश्च भ्रमः स्मृतः ।**

**निद्रा तन्द्रा च संन्यासो ग्लानिश्चैकैकशः स्मृताः॥३२**

दी०—मूर्च्छेति । मूर्च्छा मोहसंज्ञा विख्याता, यतः 'मोहो मूर्च्छेति तामाहुः' इत्यादि वचनात् । सा चतुर्विधा चतुःप्रकारा दोषभेदेन भवति । एको भ्रमः स्मृत इति । भ्रमस्तु रजःपित्तानिलाद्भवति स तु चक्रारूढस्येवार्थसंवित्तिः । निद्रादयश्चत्वार एकैकशः गणिताः । निद्रेति स्वपनम्, तथाहि—'यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः । विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः' इति । तन्द्राऽपि निद्राभेदः, कथं भिन्नत्वेन पठ्यते ? उच्यते—निद्रायामिन्द्रियमनोमोहः, तन्द्रायामिन्द्रियमोह इत्यत्र भेदः । तदुक्तम्—'इन्द्रियार्थेष्वसंप्राप्तिर्गौरवं जृम्भणं क्लमः । निद्रार्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत्' इति । संन्यास इति । स मूर्च्छादिभ्यो भिन्न एव, यतः 'वाग्देहमनसां चेष्टामाक्षिपन्ति बलान्मलाः । संन्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः ॥ स ना संन्याससंन्यस्तः काष्ठीभूतो मृतोपमः । प्राणैर्विमुच्यते शीघ्रं त्यक्त्वा सद्यःफलां क्रियाम् ॥' इति । ग्लानिरिति क्लमापरपर्यायसंज्ञा । यदुक्तं—'योऽनायासश्रमो देहे हृदयोद्वेष्टनं क्लमः । न चान्नमभिकाङ्क्षेत ग्लानिं तस्य विनिर्दिशेत्' इति । स च हेतुचतुष्टयाद्भवति । 'ग्लानिरोजःक्षयाद्दुःखाद-

जीर्णाच्च श्रमाद्भवेत्' इत्यादिवचनात् । ननु माधवेन मूर्च्छा षड्विधा स्वीकृता यथा—'वातादिभिः शोणितेन मद्येन च विषेण च । षट्स्वप्येतासु पित्तं तु प्रभुत्वेनावतिष्ठते' इति । तत्कथमत्र चतुर्विधा ? सत्यम्, पित्तप्रभुत्वेन शोणितस्य पित्तकार्यत्वात् मद्यविषयोश्च पित्तकोपत्वाच्च पित्तसम्भवायामत्र शोणितादीनां मूर्च्छा ज्ञातव्येति न दोषः । यतः—'मूर्च्छा पित्ततमःप्राया' इत्यादिवचनात् ॥ ३१ ॥ ३२ ॥

**गू०**—निदाने षड्विधा मूर्च्छा वातपित्तकफैस्त्रिस्रः, शोणितेन मद्येन विषेण चेति। कथं सन्निपातजा नोक्ता? उच्यते, सुश्रुतादौ त्रिदोषजा दोषजान्तर्भावात्संख्यायां नोक्ता । अग्रे लिखिता तद्यथा—'सर्वाकृतिः सन्निपातादपस्मार इवागता । सा जन्तुं पातयत्याशु विना बीभत्सचेष्टितैः' इति । शोणितमद्यविषजा यो दोषजेष्वेवान्तर्भावात्संख्यातिरेकः चिकित्साभेदार्थभिन्न उक्तः भ्रमः एकप्रकारः रक्तपित्तानिलाद्भ्रम इति भ्रमलक्षणैरपि त्रिभिरेभिः एक एव च भ्रमश्चक्रारूढस्येव विपरीतपदार्थज्ञानं वा भ्रम इति भ्रमलक्षणम् । निद्रातन्द्राग्लानिसंन्याससंख्यामाह—एते एकैकप्रकाराः । येषां निरुक्तिस्तु शारीरे उक्ता ॥ ३१ ॥ ३२ ॥

**गू०**—अथ मदसंख्या—

**मदाः सप्त समाख्याता वातपित्तकफैस्त्रयः ।**
**त्रिदोषैरसृजा मद्याद्विषादपि च सप्तमः ॥ ३३ ॥**
**मदात्ययश्चतुर्धा स्याद्वातात्पित्तात्कफादपि ।**
**त्रिदोषैरपि विज्ञेय एकः परमदस्तथा ॥ ३४ ॥**
**पानाजीर्णं तथा चैकं तथैकः पानविभ्रमः ।**
**पानात्ययस्तथा चैको—**

**दी०**—मदा इति । चित्तविस्मृतिलक्षणो मदः यथा पूगदुष्टकोद्रवभक्षणादौ चित्तेऽनवस्थितिस्तद्वद्विद्यादिति । त्रिदोषैर्मिलितदोषत्रयैः, असृजोऽतिरुधिरकोपात् । कोपोऽस्य पित्तवत् । एके असृजोऽसृग्दरादिति व्याख्यानयन्ति । यतः—'असृग्दरो भवेत् सर्वः साङ्गमर्दः सवेदनः । तस्यातिवृत्तौ दौर्बल्यं भ्रमो मूर्च्छा मदस्तृषा' इति । मद्यादिति मद्यपानात्, आसवारिष्टादीनां पानेन मद्याभिसंज्ञो मद इत्यभिप्रायः। विषादिति विषभक्षणात् सर्पादिविषाक्रान्तादित्यपि । मदात्यय इत्यादि । यथोक्तविधिविपर्ययेण सेव्यमानं मद्यं विकाराय भवति स विकारो मदात्ययशब्देन वाच्यः । यतः—'ये विषस्य गुणाः प्रोक्तास्ते मद्येऽपि प्रतिष्ठिताः । तेन मिथ्योपयुक्तेन भवत्युग्रो मदात्ययः' इति । त्रिदोषैरिति मिलितदोषत्रयेण । एकः परमदस्तथेति । परमदादयश्चत्वारो मदात्ययभेदा उक्ताभिन्नलक्षणान्तरत्वात् । तथैवेति ग्रहणेन दोषत्रयभेदभिन्ना एतेऽपि बोद्धव्याः । लक्षणान्यपि यथा 'श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च विण्मूत्रशक्तिरथ तन्द्रिररोचकश्च । लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञास्तृष्णा रुजा शिरसि सन्धिषु चापि भेदः ॥ आध्मानमुग्रमथ चोद्गिरणं विदाहः पाने त्वजीर्णमुपगच्छति लक्षणानि । हृद्गात्रतोदकफसंश्रवकण्ठधूमा मूर्च्छावमिज्वरशिरोरुजनप्रदाहाः । द्वेषः सुरान्नविकृतेषु च तेषु तेषु तं पानविभ्रममुशन्त्यखिलेन धीराः । हीनोत्तरौष्ठमतिशीतममन्ददाहं तैलप्रभास्यमतिपानहतं त्यजेत्तु' इति ॥ ३३ ॥ ३४ ॥

**गू०**—सुगमम् । मदपूगकोद्रव इव धत्तूरभक्षणेन रोगविशेषः पानात्ययः एकः एकप्रकारः मदात्ययः परमदपानात् जीर्णपानविभ्रमसंख्यामाह । स्पष्टमेतत् ॥ ३३ ॥ ३४ ॥

**गू०**—दाहसंख्यामाह—

**दाहाः सप्त मतास्तथा ॥ ३५ ॥**
**रक्तपित्तात्तथा रक्तात्तृष्णायाः पित्ततस्तथा ।**
**धातुक्षयान्मर्मघाताद्रक्तपूर्णोदरादपि ॥ ३६ ॥**

**दी०**—दाहा इति । दह्यते इति दाहः, यतः 'त्वचं प्राप्तः सपानोष्मा पित्तरक्ताभिमूर्च्छितः । दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजम्' इति । तथा रक्तादित्युद्रिक्तशोणितात् । तृष्णाया इति तृष्णानिरोधादब्धातौ क्षीणे सति तेजः समुद्धतं भवतीत्यर्थः । पित्तत इति विकृतपित्तात् पित्तज्वरसमो दाहो भवतीति । धातुक्षयादिति रसादिधातूनां क्षीणत्वादतीव दाहो भवति । मर्मघातादिति मर्माभिघाताज्जनितोऽपि दाहो भवति । रक्तपूर्णोदरादिति । रक्तेन उदरपूर्णत्वाद्दाहो भवति । दाहेन पीडितजिह्वा निकृष्टं वेपते इति लक्षणोक्तत्वात् ॥ ३५ ॥ ३६ ॥

**गू०**—अथोन्मादसंख्या—

**उन्मादाः षट् समाख्यातास्त्रिभिर्दोषैस्त्रयश्च ते ।**
**सन्निपाताद्विषाज्ज्ञेयः षष्ठो दुःखेन चेतसः ॥ ३७ ॥**
**भूतोन्मादा विंशतिः स्युस्ते देवाद्दानवादपि ।**
**गन्धर्वात्किंनराद्यक्षात्पितृभ्यो गुरुशापतः ॥ ३८ ॥**

**प्रेताच्च गुह्यकाद्वृद्धात्सिद्धाद्भूतात्पिशाचतः ।**
**जलाधिदेवतायाश्च नागाद्वै ब्रह्मराक्षसात् ॥ ३९ ॥**
**राक्षसादपि कूष्माण्डात्कृत्यावेतालयोरपि ।**

**दी०**—उन्मादा इति । धीविभ्रमसंज्ञो वातादिना जनितः उन्माद इति प्रसिद्धः; तदुक्तं–'मदयन्त्युद्गता दोषा यस्मादुन्मार्गमाश्रिताः । मानसोऽयमतो व्याधिरुन्माद इति कीर्तितः' इति । विषादिति विषभक्षणाद्यभिव्याप्तशरीरत्वात् । षष्ठो दुःखेन चेतस इति । दुःखं तु त्रिविधं आध्यात्मिकं, आधिभौतिकं, आधिदैविकमिति । ननु तद्दुःखसंयोगाद्व्याधय इत्युच्यन्ते तत्कथं भूतोन्मादाः कथिताः ? दुःखेनैवेति प्राप्तार्थत्वात्, सत्यम्, दुःखजनका अन्येऽपि भावाः सन्ति यथा धनबन्धुनाशादयः, यदुक्तं—'चौरैर्नरेन्द्रपुरुषैररिभिस्तथान्यैर्वित्रासितस्य धनबान्धवसंक्षयाद्वा । गाढं क्षते मनसि च प्रियया रिरंसोर्जायेत चोत्कटतरो मनसो विकारः' इति । एतदभिप्रायेण स्याददोषः । भूतोन्मादा विंशतिरिति । तद्विंशतेर्विवरणमाह—ते दानाद्दानवादपीत्यादि । दानो देवग्रहस्तेन गणमातृकादयोऽपि ग्राह्याः, दानवा असुराः पापबुद्धयो देवशत्रव इत्यर्थः, गन्धर्वो देवगायकः, किन्नरस्तद्भेदा विख्याताः यक्षधनदादयः, पितरोऽग्निष्वात्तादयः, गुरवो ब्राह्मणा वृद्धादयः, प्रेताः प्रसिद्धाः, गुह्यका देवयोनयः, सिद्धाः सनकादयः, भूता विख्याताः, पिशाचाः पिशिताशनाः, जलादिदेवताः प्रतीताः, नागाः शेषनामप्रभृतयः, ब्रह्मराक्षसाः राक्षसभेदाः, राक्षसा रावणादयः, कूष्माण्डोऽपि राक्षसभेदः, कृत्या प्रसिद्धा, सा च मन्त्रादिमारणात्मकरूपा, वेतालाश्च देवयोनयः इति । एते ग्रहास्तु यदा शरीरं प्रविशन्ति तदा भूतोन्मादा इति संज्ञयाऽभिहिताः भूतचेष्टाकरत्वेनादृष्टत्वात् । तदुक्तं—'दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा । स्वमणिं भास्करांशुश्च यथा देहं च देहधृक् । विशन्ति ये न दृश्यन्ते ग्रहास्तद्वच्छरीरिणाम्' इति ॥ ३७–३९ ॥

**गू०**—चेतसः मनसः दुःखेन कोपादिना स्पष्टमन्यत् ॥ अथ भूतोन्मादसंख्या—देवादिविंशतिर्भूतोन्मादाः द्वे स्युः वाग्भटे अष्टादशभूतोन्मादा लिखिताः । अत्र अन्यमतत्वादधिके । मदयति मनो विभ्रमं करोतीत्युन्मादः स च दोषजः । यस्तु भूतादिसम्बन्धाद्भवति स भूतोन्मादः । इदं लक्षणम् ॥ ३७–३९ ॥

**गू०**—अथापस्मारसंख्या—

**अपस्मारश्चतुर्धा स्यात्समीरात्पित्ततस्तथा ॥ ४० ॥**
**श्लेष्मणोऽपि तृतीयः स्याच्चतुर्थः सन्निपाततः ।**

**दी०**—अपस्मार इति । हतस्मृतेः पुरुषस्य तमःप्रवेश इव यः संरम्भः स चापस्मार इत्यभिहितः, तथाचोक्तम्—'तमःप्रवेशः संरम्भो दोषोद्रेकहतस्मृतेः । अपस्मार इति ज्ञेयो गदो घोरश्चतुर्विधः' इति । चतुर्धा स्यादिति । अत्र समीरादिति अनिलकोपात्, सन्निपातत इति मिलितदोषत्रयात् ॥ ४० ॥

**गू०**—समीरादितश्चतुर्धाऽपस्मारः स्यात् । समीरो वायुः । अपगतं स्मरणं यस्मात् स अपस्मारः फेनवांश्छ्वासवांश्चेति तल्लक्षणम् ॥ ४० ॥

**गू०**—अथामवातसंख्या—

**चत्वारश्चामवाताः स्युर्वातपित्तकफैस्त्रिधा ॥ ४१ ॥**
**चतुर्थः सन्निपातेन**

**दी**—चत्वारश्चामवाता इति । आमेन दुष्टो वात आमवातः, यद्वा आमसंपृक्तो दुष्टो वात आमवातः इति तद्द्वयमसङ्गतं कारणत्वात् किन्तु दुष्टामवातयोः संयोगश्चामवात इति कथितः । यदुक्तं 'युगपत् कुपितावेतौ त्रिकसन्धिप्रवेशकौ । स्तब्धं वा कुरुते गात्रमामवातः स उच्यते' इति । एके द्वन्द्वजभेदान् कथयन्ति । यतः 'एकदोषानुगः साध्यो द्विदोषो याप्य उच्यते । सर्वदेहचरः शोथः स कृच्छ्रः सान्निपातिकः' इत्यादिवचनात् ॥ ४१ ॥

**गू०**—वातादिभिश्चत्वार आमवाताः स्युः । स्पष्टमन्यत् । आमेन युक्तो वात आमवातः स तु शोथादियुक्तस्त्रिकसन्धिवेदनावान् ॥ ४१ ॥

**गू०**—अथ शूलसंख्या—

**शूलान्यष्टौ बुधा जगुः ।**
**पृथग्दोषैस्त्रिधा द्वन्द्वभेदेन त्रिविधान्यपि ॥ ४२ ॥**
**आमेन सप्तमं प्रोक्तं सन्निपातेन चाष्टमम् ।**

**दी०**—शूलानीति । शूलनिर्घातवेदनाजनकत्वाच्छूलसंज्ञा; यतः 'शंकुस्फोटनवत् तस्य यस्मात् तीव्रा च वेदना । शूलासक्तस्य भवति तस्माच्छूलमिहोच्यते' इति । द्वन्द्वभेदेन द्विदोषजनितेनात्र त्रयो भेदाः, आमेनापरिपक्वरसेन वातकारणत्वात्; यतः 'सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः' इति ॥ ४२ ॥

**परिणामभवं शूलमष्टधा परिकीर्तितम् ॥ ४३ ॥**
**मलैर्यैः शूलसंख्या स्यात्तैरेव परिणामजम् ।**
**अन्नद्रवभवं शूलं जरत्पित्तभवं तथा ॥ ४४ ॥**
**एकैकं गणितं सुधैः**

**दी०**—परिणामभवं शूलमिति । परिणामकालसम्बन्धि परिणामशूलं तच्चोक्तशूलसंख्ययैकैरेव बोद्धव्यं । संज्ञान्तरैरप्येतदेव दर्शितम् । तद्यथा—'भुक्ते जीर्यति यच्छूलं तदेव परिणामजम् । केचिदन्नद्रवं प्राहुरन्ये तत् पक्तिदोषजम् ॥ पक्तिशूलं वदन्त्येके केचिदन्नविदाहजम्' इति । एवं चान्नद्रवभवं शूलमत्र पृथग् गणितं लक्षणान्तरबलात् । तदुक्तं—'जीर्णे जीर्यत्यजीर्णे वा यच्छूलमुपजायते । पथ्यापथ्यप्रयोगेण भोजनाभोजनेन वा ॥ न शमं याति नियमात् सोऽन्नद्रव उदाहृतः ॥' इति । पिष्टाकृतिर्द्रवरूपो यो मूत्रमार्गेण स्रवेत् सोऽन्नद्रवसंज्ञ इति केचित् । तन्न सर्वमतम् । जरत्पित्तभवं शूलमिति जरत्पित्तमम्लपित्तं । अम्लशूलमित्यन्ये ॥ ४३ ॥ ४४ ॥

**गू०**—पृथग्दोषैरित्यादिभिः शूलमष्टधा मतं एवमेवाष्टधा परिणामभवं अत्र उपद्रवं ज्वरपित्तं (शूलं) एकधा एकमेकप्रकारं मतम् । एते सर्वेशूलभेदाः । शूलनिपातवद्वेदनाविशेषात् शूलमुच्यते ॥ ४३ ॥ ४४ ॥

**उदावर्तास्त्रयोदश ।**

**एकः क्षुन्निग्रहात्प्रोक्तस्तृष्णारोधाद्द्वितीयकः ॥ ४५ ॥**
**निद्राघातात्तृतीयः स्याच्चतुर्थः श्वासनिग्रहात् ।**
**छर्दिरोधात्पञ्चमः स्यात्षष्ठः क्षवथुनिग्रहात् ॥ ४६ ॥**
**जृम्भारोधात्सप्तमः स्यादुद्गारग्रहतोऽष्टमः ।**
**नवमः स्यादश्रुरोधाद्दशमः शुक्रधारणात् ॥ ४७ ॥**
**मूत्ररोधान्मलस्यापि रोधाद्वातविनिग्रहात् ।**
**उदावर्तास्त्रयश्चैते घोरोपद्रवकारकाः ॥ ४८ ॥**

उदावर्ता इति । उद्धूतेन वेगविधारणेनावृतस्य वायोर्वर्तनमित्युदावर्तः । अथवा वायोरूर्ध्वमावर्तो गमनमित्युदावर्तः । यतः सर्वेषु वायुरेव कारणम् । तदुक्तम्—'सर्वेष्वेतेषु विधिवदुदावर्तेषु कृत्स्नशः । वायोः क्रिया विधातव्या स्वमार्गप्रतिपत्तये' इति । त्रयोदशविधानां विवरणमाह—एकः क्षुन्निग्रहादित्यादि । क्षुद् भोजनेच्छा तस्या निग्रहो धारणमिति भावः । एवं तृष्णा पानीयस्याभिलाषः, निद्रा स्वप्नेच्छा, श्वासः उच्छ्वासः, छर्दिर्वमनं, क्षवथुश्छिक्का, जृम्भा जृम्भणं प्रसिद्धम्, उद्गारो वातोद्गिरणं, अश्रु नेत्राम्बुसंज्ञं, शुक्रं रेतः, मूत्रं प्रसिद्धम्, मलं पुरीषं, वातविनिग्रहादिति अधोवातरोधात् । एवं त्रयोदश व्याख्याताः । एतेषां मध्ये ये मूत्रविनिग्रहादयस्ते घोरोपद्रवकारका ज्ञातव्याः । घोरोपद्रवकारका इत्यनेन मारणात्मकरूपा इत्यभिप्रायः । ननु चतुर्दशविधा उदावर्ता अन्यत्र प्रतिपादिताः । तथाहि—'वेगान्न धारयेद्वातविण्मूत्रक्षवतृट्क्षुधाम् । निद्राकासश्रमश्वासजृम्भाश्रुच्छर्दिरेतसाम्' इत्यादिना तत्कथमत्र त्रयोदश भेदाः ? उच्यते श्रमेण श्वास उत्पद्यते तस्य धारणमिति व्याख्यायाः श्वासान्तर्गत एव श्रमभेदोऽत्र दर्शितः । उद्गारस्थाने कास इति केचित् वातकारणत्वादिति ॥ ४५–४८ ॥

उदावर्तसंख्यामाह—उदावर्तास्त्रयोदश इति पूर्वेणान्वयः । ते क्षुन्निग्रहादयः, स्पष्टमन्यत् । उत् ऊर्ध्वं आवर्तयतीत्युदावर्त इति निरुक्तिः ॥ ४५-४८ ॥

**गू०**—अथानाहसंख्या—

**आनाहो द्विविधो ज्ञेय एकः पक्वाशयोद्भवः ।**
**आमाशयोद्भवश्चान्यः प्रत्यानाहः स कथ्यते ॥ ४९ ॥**

**दी०**—आनाह इति । आनाह उदरपूरणलक्षणः स च वातोरकटदोषैर्जनितः आमाशयोद्भवत्वात् न स्वतन्त्रेण वायुना, अन्यथा प्रत्यानाहे तृष्णाप्रतिश्यायशिरोविदाहादयः कथं संभवन्ति । तथाचोक्तं 'तस्मिन् भवन्त्यामसमुद्भवे तु तृष्णाप्रतिश्यायशिरोविदाहाः । आमाशये शूलमथोगुरुत्वं हृत्स्तम्भ उद्गारविघातनं च' इति वदन्ति । 'एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेत्' इत्यभिप्रायेण वातकोपेन पित्तकफावपि प्रकुपितौ भवत इति ॥ ४९ ॥

**गू०**—आनाहाध्मानभेदः स द्विविधः विकारः॥४९

**उरोग्रहस्तथा चैको—**

**दी०**—उरोग्रह इति । उरोगृहीतमिव मन्यते, तत् कफमारुताद्भवति, तथाहि—'सास्रं मांसं यकृत्प्लीहोः सद्यो वृद्धं यदा गतौ । उरोग्रहं तदा कुक्षौ कुरुतः कफमारुतौ' इति ॥ ४९ ॥

**गू०**—उरोग्रहः हृद्रोगसंख्यात उरोग्रहः भिन्नो रोगः स एकः एकप्रकारः वातकफजन्यः वाग्भटोक्तत्वात् तद्यथा—'सास्रमांसं यकृत्प्लीहौ सद्यो विद्धि यदागतौ । उरोग्रहं तदा कुक्षौ कुरुतः कफमारुता'विति ॥ ४९ ॥

अथ हृद्रोगसंख्या—

**हृद्रोगाः पञ्च कीर्तिताः ।**
**वातादिभिस्त्रयः प्रोक्ताश्चतुर्थः सन्निपाततः ॥ ५० ॥**

पञ्चमः क्रिमिसंजातः—

दी०—हृद्रोगाः पञ्च कीर्तिता इति । हृदि रोगो हृद्रोगः, हृदि बाधेत्यन्ये; यदुक्तं 'दूषयित्वा रसं दोषा विगुणा हृदयं गताः । हृदि बाधां प्रकुर्वन्ति हृद्रोगं तं प्रचक्षते' इति । पञ्चमः कृमिसंजात इति क्रिमिरोगात् पञ्चमो हृद्रोगो भवतीत्यर्थः । तत्रोक्तत्वात् । तद्यथा—'ज्वरो विवर्णता शूलं हृद्रोगं सदनं भ्रमः । भक्तद्वेषोऽतिसारश्च संजातक्रिमिलक्षणम्' इति ॥ ५० ॥

गू०—हृद्रोगाः पञ्च, ते वातादिभिः ॥ ५० ॥

गू०—अथोदरनामानि

**तथाष्टावुदराणि च ।**
**वातपित्तात्कफात्त्रीणि त्रिदोषेभ्यो जलादपि ॥ ५१ ॥**
**प्लीह्नः क्षताद्बद्धगुदादष्टमं परिकीर्तितम् ।**

दी०—तथाष्टावुदराणि चेति । अत्रोदरस्थो रोगोऽप्युदरशब्देन वाच्यस्तद्गतत्वात्, यतः—'तात्स्थ्यात्तद्धर्मताभ्यां च तत्समीपतयाऽपि च । तत्साहचर्याच्छब्दानां वृत्तिरेषा चतुर्विधा' इति । तत्र वातादीनां पृथक् त्रयो भेदास्तेन वातोदरं पित्तोदरं श्लेष्मोदरं च । त्रिदोषेभ्य इति मिलितदोषत्रयाच्चतुर्थः । अस्य सन्निपातोदरस्य दूष्योदरं नामान्तरं वदन्त्येके । तदुक्तं—'स्त्रियोऽन्नपानं नखरोममूत्रविडार्तवैर्युक्तमसाधुवृत्ताः । यस्मै प्रयच्छन्त्यरयो गरांश्च दुष्टाम्बुदूषीविषसेवनाद्वा ॥ तेनाशु रक्तं कुपिताश्च दोषाः कुर्युः सुघोरं जठरं त्रिलिङ्गम् । स चातुरो मुह्यति हि प्रसक्तं दूष्योदरं कीर्तितमेतदेव' इति । जलादपि जलपानात् अप्रशस्तजलपानादित्यभिप्रायः । अस्यापि दकोदरसंज्ञां प्रवदन्ति; यदुक्तम्—'यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथवा निरूढः । पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि ॥ स्नेहोपलिप्तेष्वथवापि तेषु दकोदरं पूर्ववदभ्युपैति' इति । प्लीह इति प्लीहवृद्धेः प्लीहोदरसंज्ञा, प्लीहा 'सनहवा' शब्दवाच्यः अस्य भेदो यकृद्दाल्युदरं तथैवेति । क्षतादिति । प्रहाररूपादन्त्रादिषु ततः परिस्राव्युदरमिति संज्ञा । यदुक्तं—'शल्यं तथाऽन्नोपहितं यदन्नं भुक्तं भिनत्त्यागतमन्यथा वा । तस्मात् स्रुतोऽन्त्रात् सलिलप्रकाशः स्रावः स्रवेद्वै गुदतस्तु भूयः । नाभेरधश्चोदरवृद्धिमेति निस्तुद्यते दाल्यति चातिमात्रम् । एतत् परिस्राव्युदरं प्रदिष्टं दकोदरं कीर्तयतो निबोध' इति । बद्धगुदादिति । अष्टममुदरं च बद्धोदरसंज्ञमिति बद्धगुदोदरमित्यन्ये, यतः—'यस्यान्त्रमन्नैरुपलेपिभिर्वा बालाश्मभिर्वा पिहितं यथावत् । संचीयते यस्य मलः सदोषः शनैः शनैः सङ्करवच्च नाड्याम् । निरुध्यते तस्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पम् ॥ हृन्नाभिमध्ये परिवृद्धिमेति तस्योदरं बद्धगुदं वदन्ति' इति 'तद्वामपार्श्वे परिवृद्धिमेति प्लीहामयं तं जठरं वदन्ति । सव्यान्यपार्श्वे यकृति प्रदुष्टे ज्ञेयं यकृद्दाल्युदरं तदेव' ॥ इति ॥ ५१ ॥

गू०—गुल्मसंख्यामाह—

**गुल्मास्त्वष्टौ समाख्याता वातपित्तकफैस्त्रयः ॥ ५२ ॥**
**द्वन्द्वभेदास्त्रयः प्रोक्ताः सप्तमः सन्निपाततः ।**
**रक्तादष्टमकः ख्यातो**

दी—गुल्मास्त्वित्वति । कोष्ठान्तर्ग्रन्थिरूपिणं गुल्मिकाकारं गोलमिति प्रसिद्धम् । यदुक्तम्—'हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदि वाऽचलः । वृत्तश्चयोपचयवान् स गुल्म इति कीर्तितः' इति । ते तु वातादिभेदेन पृथक् त्रयो गणिताः । द्वन्द्वभेदादिद्विदोषजभितास्त्रयः । सप्तमः सन्निपातत इति सप्तमो गुल्मो मिलितदोषत्रयाद्भवति । रक्तादष्टमक इति । दुष्टरुधिरादष्टमो गुल्मो भवतीत्यर्थः । स च प्रायशः स्त्रीणां प्रसूत्यनन्तरं भवति । तदुक्तं—'नवप्रसूताऽहितभोजना या या चामगर्भं विसृजेदृतौ वा । वायुर्हि तस्याः परिगृह्य रक्तं करोति गुल्मं सरुजं सदाहम्' इति । ननु माधवेन पञ्चधा गुल्मं लिखितं, तत्कथमत्राष्टविधं ? सत्यम्, माधवेन तु पञ्चस्थानविशेषेण पञ्चधा कथितम् । तथाहि—'दुष्टा वातादयोऽत्यर्थं मिथ्याऽऽहारविहारतः । कुर्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणम् ॥ तस्य पञ्चविधं स्थानं पार्श्वहृन्नाभिबस्तयः' इति । अत्र तु चिकित्सार्थं द्वन्द्वभेदास्त्रयो गणिता इत्यदोषः । यतः—'निमित्तलिङ्गानुपलभ्य गुल्मो द्विदोषजो दोषबलाबलं च । व्यामिश्रलिङ्गानपरांश्च गुल्मांस्त्रीनादिशेदौषधकल्पनार्थम्' इति ॥ ५२ ॥

गू०—वातादिभिः अष्टौ गुल्माः समाख्याताः कथिताः । ननु निदाने पञ्च गुल्मा उक्ताः तत्कथमष्टौ तद्यथा—'तस्य पञ्चविधं स्थानं पार्श्वहृन्नाभिबस्तयः । वृत्तश्चयोपचयवान्स गुल्म इति कीर्तितः' उच्यते, त्रिभिः द्वंद्वजैः सह अष्टौ सुश्रुतादौ चोक्तत्वात् 'त्रीनादिशेदौषधकल्पनार्थमि'त्युक्तेः ॥ ५२ ॥

**गू०**—मूत्राघातसंख्यामाह—

**मूत्राघातास्त्रयोदश ॥ ५३ ॥**

**वातकुण्डलिका पूर्वं वाताष्ठीला ततः परम्।**
**वातबस्तिस्तृतीयः स्यान्मूत्रातीतश्चतुर्थकः ॥ ५४ ॥**
**पञ्चमं मूत्रजठरं षष्ठो मूत्रक्षयः स्मृतः।**
**मूत्रोत्सर्गः सप्तमः स्यान्मूत्रग्रन्थिस्तथाष्टमः ॥ ५५ ॥**
**मूत्रशुक्रं तु नवमं विड्घातो दशमः स्मृतः।**
**मूत्रासादश्चोष्णवातो बस्तिकुण्डलिका तथा ॥ ५६ ॥**
**त्रयोऽप्येते मूत्रघाताः पृथग्घोराः प्रकीर्तिताः।**

**दी०**—मूत्राघाता इति। मूत्रस्याभिघातो मूत्राघातः। आघातो वेदनाविशेषवान् मूत्रनिरोध इत्यपरे, स च वातादिदोषजनितः। त्रयोदश इत्यस्य विवरणमाह—वातकुण्डलिका पूर्वमित्यादि। पूर्वं प्रथमं वातकुण्डलिका कथिता। तद्यथा—यत्र सवेदनो वायुर्बस्तौ मूत्रमाविश्य कुण्डलवद्विगुणो भूत्वा संचरति सा वातकुण्डलिका ज्ञेया। वाताष्ठीला ततः परमिति। ततः परं द्वितीयः शकृन्मार्गे पाषाणग्रन्थिवद्बस्तौ कुत्तमुन्नतं मूत्रविण्मार्गरोधिनं व्याधिं कुर्यात् सोऽष्ठीलाशब्दवाच्यः। अयं तु वातरोगे पठिताष्ठीलायास्तु बस्तिगतत्वाद्भिन्नः। बस्तिकुक्षिनिपीडितो यत्र मूत्रसङ्गो भवेत् स वातबस्तिः। यत्र मूत्रं चिरं तिष्ठति शीघ्रं न प्रवर्तते मन्दं वा प्रवर्तते स मूत्रातीतः, यत्र नाभेरधस्तात् तीव्रवेदनमाध्मानं भवति तन्मूत्रजठरं ज्ञेयम्। यत्र बस्तिस्थौ पित्तमारुतौ सरुग्दाहं मूत्रक्षयं कुरुतः स मूत्रक्षयो ज्ञेयः। यत्र शनैरल्पमल्पं सरुजं नीरुजं वा मूत्रं स्रवेत् स मूत्रोत्सर्गः। यत्रान्तर्बस्तिमुखे तु स्थिरोऽल्पवृत्तो ग्रन्थिः, अत्र तु अश्मरीतुल्यरुग्भवति स मूत्रग्रन्थिः। अश्मरी तु भिन्नदोषदूषितत्वात्। यत्र भस्मोदकप्रतीकाशं स्थानाच्युतं शुक्रं मूत्रयेत्प्राक् पश्चाद्वा प्रवर्तते तन्मूत्रशुक्रमित्युच्यते। यत्र तु विट्संसृष्टं विड्गन्धं कृच्छ्रान्मूत्रयेत् स विड्घात इति। यत्र सदाहं रोचनाशङ्खचूर्णवर्णं समस्तवर्णं वा मूत्रयेत् स मूत्रासादः। यत्र कृच्छ्रात् पुनःपुनश्च हारिद्रमथवा रक्तं मूत्रं मूत्रयेत् स चोष्णवातः। यः शूलस्पन्दनदाहार्तो बिन्दुं बिन्दुं मूत्रयेत् पीडितस्तु धारा स्रवेत्तस्य बस्तिकुण्डलिका कथिता। त्रयोऽप्येते मूत्राघाता इति। प्रायस्तु मूत्रासादादयः प्रत्याख्येयाः ते तु घोरा बहुदुःखकरा इत्यर्थः ॥ ५३–५६ ॥

**गू०**—मूत्राघातास्त्रयोदशेति पूर्वेणान्वयः। ततो वातकुण्डलिकादयः। मूत्रस्य आघातः मूत्राघातः। घातशब्दोऽत्र विबन्धपरोऽल्पकृच्छ्र इदं लक्षणं मूत्रकृच्छ्रे बहुकृच्छ्रता विबन्धाल्पतेति भेदाः ॥ ५३–५६ ॥

**गू०**—मूत्रकृच्छ्रसंख्यामाह—

**मूत्रकृच्छ्राणि चाष्टौ स्युर्वातपित्तकफैस्त्रिधा ॥ ५७ ॥**
**सन्निपाताच्चतुर्थं स्याच्छुक्रकृच्छ्रं च पञ्चमम्।**
**विट्कृच्छ्रं षष्ठमाख्यातं घातकृच्छ्रं च सप्तमम् ॥ ५८ ॥**
**अष्टमं चाश्मरीकृच्छ्रं—**

**दी०**—मूत्रकृच्छ्राणीति। मूत्रस्य कृच्छ्रेण महता दुःखेन प्रवृत्तिर्मूत्रकृच्छ्रम्। तच्चाष्टविधं भवति वातादिभिः पृथक् त्रयो भेदाः, सन्निपाताच्चतुर्थः। यत्र तु बस्तिमेहनशूलं भवति स शुक्रं मूत्रयेत् तत्तु शुक्रकृच्छ्रम्। यत्र पुरीषाघाताद्विगुणतां गतो वायुराध्मानशूलौ करोति तद्विट्कृच्छ्रम्। यत्र शल्येन मूत्रवाहिस्रोतःस्वभिहतेषु सत्सु भृशं दारुणं मूत्रकृच्छ्रं भवति तद्घातकृच्छ्रं ज्ञेयम्। अश्मरीवदश्मरीकृच्छ्रे तद्बस्तिमेहनशूलान्वितं भवति। अश्मरीभेदोऽपि शर्करेति केचित्, यतः—'अश्मरी शर्करा चैव तुल्यलक्षणसम्भवे। विशेषं शर्करायाश्च शृणु कीर्तयतो मम॥ पच्यमानाऽश्मरी पित्तात् शोष्यमाणा च वायुना। विमुक्तकफसन्धाना क्षरन्ती शर्करा मता' इति। ननु मूत्रकृच्छ्रमूत्राघातयोर्बस्तिगतदोषराधर्म्यात् को भेदः? उच्यते—मूत्रकृच्छ्रे कृच्छ्रत्वमधिकं विबन्धश्चाल्पः, मूत्राघाते तु विबन्धो बलवान् कृच्छ्रत्वमल्पश्चेति भेदः ॥ ५७ ॥ ५८ ॥

**गू०**—वातादष्टौ मूत्रकृच्छ्राणि स्युः। स्पष्टमन्यत् ॥ ५७ ॥ ५८ ॥

**गू०**—अश्मरीसंख्यामाह—

**चतुर्धा चाश्मरी मता।**
**वातपित्तकफाच्छुक्रात्—**

**दी०**—चतुर्धा अश्मरी मतेति। या बस्तिगता पाषाणगुटिकावद्भवति सा अश्मरीशब्दवाच्या। तदुक्तं—'विशोषयेद्बस्तिगतं सशुक्रं मूत्रं सपित्तं पवनः कफं वा। यदा तदाऽश्मर्युपजायते तु क्रमेण पित्तेष्विव रोचना गोः' इति। क्रमेणेति क्रममात्रं प्रसङ्गतोऽपि लिख्यते। यथा 'अम्बु स्वच्छास्वपि यथा निषिक्तासु नवे घटे। कालान्तरेण पङ्कः स्यादश्मरी संभवेत्तथे'ति। सा अश्मरी चतुःप्रकारा

भवति । वातपित्तकफात् । शुक्रादिति वातादीनां पृथक् त्रयो भेदाः । वातपित्तकफादित्यनेन त्रिदोषसंभवे-त्यपरे । यतः 'नैकदोषाश्रयाः सर्वाः' इत्यादिवच-नात् । शुक्रादिति शुक्रधारणात्, शुक्राश्मरी भवतीत्यु-च्यते 'शुक्राश्मरी तु महतां जायते शुक्रधारणात् । स्थानाच्च्युतममुक्तं हि मुष्कयोरन्तरेऽनिलः ॥ शोषय-त्युपसंगृह्य शुक्रं तत् शुक्रमश्मरी' इति ॥

**गू०**—वातादेश्चतुर्धा अश्मरी स्मृतेति पूर्वेणा-न्वयः । अश्मवद्वायुर्बस्तिमुखं रुद्ध्वा मूत्रकृच्छ्ररोधादिकं करोतीति अश्मरी ॥

**गू०**—अथ प्रमेहसंख्या—

**तथा मेहाश्च विंशतिः ॥ ५९ ॥**

**इक्षुमेहः सुरामेहः पिष्टमेहश्च सान्द्रकः ।**
**शुक्रमेहोदकाख्यौ च लालामेहश्च शीतकः ॥६०॥**
**सिकताख्यः शनैर्मेहो दशैते कफसंभवाः ।**
**मञ्जिष्ठाख्यो हरिद्राख्यो नीलमेहश्च रक्तकः ॥६१॥**
**कृष्णमेहः क्षारमेहः षडेते पित्तसंभवाः ।**
**हस्तिमेहो वसामेहो मज्जामेहो मधुप्रभः ॥ ६२ ॥**
**चत्वारो वातजा मेहा इति मेहाश्च विंशतिः ।**

**दी०**—तथा मेहाश्च विंशतिरित्यादि । तथेति बस्तिगतदोषत्वाद्ग्रहणम् । मेहः प्रमेहः; प्रकर्षेण मेदो-मांसक्लेदादिमेहतीति प्रमेहः । तदुक्तम्—'मेदश्च मांसं च शरीरजं च क्लेदं कफो बस्तिगतं प्रदूष्य । करोति मेहान् समुदीर्णमुष्णैस्तानेव पित्तं परिदूष्य चापि ॥ क्षीणेषु दोषेष्ववकृष्य धातून् सन्दूष्य मेहान् कुरुते-ऽनिलश्च' इति । विंशतिरिति विंशतिभेदाः । तद्यथा— इक्षुरसतुल्य इक्षुमेहः, तुल्यता मूत्रस्येत्यभिप्रायः । सुरा मदिराविशेषः, तत्तुल्यं सुरामेहः । पिष्टं तण्डुल-कल्कं तद्रसतुल्यं पिष्टमेहः । सान्द्रं घनं आविलं च सान्द्रमेहः । शुक्रतुल्यं शुक्रमेहः । श्वेतवर्णसदृशमुदक-मेहः । लालातन्तुयुतं पिच्छिलं लालामेहः, बहुवारान्मधु-रमतिशीतलं शीतमेहः, सान्द्रं सिकतारूपं सिकतामेहः शनैः शनैः सकफकृच्छ्रं शनैर्मेहः, एते दशभेदाः कफजा ज्ञेयाः । अथ पित्तजानाह—मञ्जिष्ठासलिलो-पमं विस्रं च मञ्जिष्ठामेहः । सदाहं हरिद्रासन्निभं च हरिद्रामेहः । सफेनमच्छं नीलवर्णं च नीलमेहः । विस्रमुष्णं च शोणितप्रकाशं रक्तमेहः । मषीनिभं कृष्ण-मेहः । स्रुतक्षारप्रतिमं क्षारमेहः । क्षारतोयसदृशमि-त्यर्थः । तदुक्तं—'गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोय-वत्' इति षट् पित्तजाः । इदानीं वातजानाह— हस्तिमेह इत्यादि । मत्तमातङ्गवदजस्रं प्रवृद्धं हस्तिमेहः । वसाप्रकाशं वसामिश्रं वा वसामेहः । मज्जाभं मज्जा-मिश्रं वा मज्जामेहः । मधु क्षौद्रं तस्य तुल्यं तद्वर्णं वा मधुमेहः । इति चत्वारो वातजा ज्ञेयाः । इति मेहाश्च विंशतिरिति । इति पूर्वोक्तप्रकारेण विंशतिर्मेहाः साध्या याप्या असाध्याश्चानेन प्रतिपादिताः । यदुक्तं— 'साध्याः कफोत्था दश पित्तजाः षट् याप्याश्चतुष्काः पवनादसाध्याः । समक्रियत्वाद्विषमक्रियत्वान्महात्यय-त्वाच्च यथाक्रमं ते ॥' ननु मधुमेहोऽन्यत्र पृथक् एक-विंशतिको गणितः तत्कथमत्र वातजेषु पठितः ? सत्यं, चिकित्सार्थं तु पृथगन्यत्रास्य ग्रहणं कृतम्, अत्रासाध्य-त्वेन वातजेषु प्रमेहेष्वेवान्तर्भूतो दर्शितः दोषदूष्यरस-वर्णसाधर्म्यात् । यतः—'नूनं सर्वे प्रमेहास्तु कालेना-प्रतिकारिणः । मधुमेहत्वमायान्ति तदा साध्या भवन्ति हि' इति ॥ ५९-६२ ॥

**गू०**—तथा मेहाश्च विंशतिरिति पूर्वेणान्वयः । ते इक्षुमेहादयः, तेषु दश कफजाः षट् पित्तजाश्चत्वारो वातजा इति ॥ ५९-६२ ॥

**गू०**—सोमरोगसंख्यामाह—

**सोमरोगस्तथा चैकः—**

**दी०**—सोमरोग इति । एकः सोमरोगः च स मूत्रमार्गेण स्रवति । तथाहि—'आपः सर्वशरीरेषु क्षुभ्यन्ति प्रस्रवन्ति च । मूत्रमार्गेण विमलाः सोम-रोग इति स्मृतः ।' अस्य चिह्नमप्यतीव बलहानित्वे-नोपलक्षितम् । तदुक्तम् 'शरीरधारणाच्चापि सोम इत्य-भिशब्दितः । तस्मात् सोमक्षयाद्देहो निश्चेष्टश्च भवेत् सदा' इति । मूत्रातीसारोऽस्य भेद इति मन्यन्ते केचित् द्रवदोषसाधर्म्यात् । यतः—'मूत्रातीसारम-तिमैथुनतः प्रसूतं रुक्तोदतापपरिवर्जितमल्पमल्पम् । शङ्काविहीनमपि सोमगदस्य तस्य भेदं वदन्ति भिषजः सकलामयज्ञाः' इति ॥

**गू०**—सोमरोग एकप्रकारः । स तु स्त्रीणामेव जलस्रावादिलक्षणो भवति ॥

प्रमेहपिडकाभेदानाह—

**प्रमेहपिडका दश ॥ ६३ ॥**

**शरराविका कच्छपिका पुत्रिणी विनताऽलजी ।**

**मसूरिका सर्षपिका जालिनी च विदारिका ॥६४॥**
**विद्रधिश्च दशैताः स्युः पिडका मेहसंभवाः ।**

दी०—प्रमेहपिडका दशेति । अप्रतिक्रियमाणात् प्रमेहात् पिडकाश्चोत्पद्यन्ते पिडका नानाकारा व्रणसंज्ञा एव । तथाह्युक्तम् 'सन्धिमर्मसु जायन्ते मांसलेषु च धामसु । तावच्चैता न लक्ष्यन्ते यावद्वास्तुपरिग्रहाः' इति । वास्तु व्रणाधिष्ठानं कदाचिदन्यैर्वा, यतः 'विना प्रमेहमप्येता जायन्ते दुष्टमेदसः' इत्यपि । तासां स्वरूपं केषांचिज्ज्ञापनार्थं लिख्यते । तत्र शराविका यथा—'अन्तोन्नता तु तद्रूपा निम्नमध्या शराविका' इति । सर्षपिकामाह—'गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी' इति । कच्छपिकामाह—'सदाहा कूर्मसंस्थाना ज्ञेया कच्छपिका बुधैः' इति । जालिनीमाह—'जालिनी तीव्रदाहा तु मांसजालसमावृता' इति । तन्त्रान्तरेऽपि 'परस्पराभिसम्बद्धा पिडका चैकदेशजा । पित्तोत्कटा दाहवती भृशरुक् जालिनी मता' इति । विनतालक्षणमाह—'अवगाढरुजा क्लेदा पृष्ठे वाप्युदरेऽपि वा । महती पिडका नीला विनता नाम सा स्मृता' इति । पुत्रिणीमाह—'महत्यल्पचिता ज्ञेया पिडका सापि पुत्रिणी' इति । मसूरिकामाह—'मसूराकृतिसंस्थाना विज्ञेया तु मसूरिका' इति । अलजीमाह—'रक्ता सिता स्फोटचिता विज्ञेया त्वलजी भवेत्' इति । विदारीमाह—'विदारी कन्दवद्वृत्ता कठिना च विदारिका' इति । विद्रधिकामाह—'विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा' । विद्रधिलक्षणयुक्तेत्यनेन अस्या अभेदो बोद्धव्यः । पिडकानामारम्भकानप्याह कश्चित् 'ये यन्मयाः स्मृता मेहास्तेषामेतास्तु तन्मयाः' इत्यादि । पिडकाः प्रायेणाधःकाये भवन्ति दोषदूष्याणामधःप्रक्रमात् रसायतनानां दौर्बल्याच्च ॥६३॥६४॥

गू०—शराविकाद्याः प्रमेहापेक्षया भवन्ति । शराकृतिवत्संभवन्तीत्यतस्तल्लक्षणनिरुक्तिः ॥ ६३ ॥ ६४ ॥

गू०—मेदोरोगसंख्यामाह—

**मेदोदोषस्तथा चैकः—**

दी०—मेदोदोष इति । मेदोवृद्धिजनितो दोषो मेदोदोषः, यद्वा मेद एव दोषः कारणे कार्योपचारात्, वृद्धिर्यथा—'अव्यायामदिवास्वप्नश्लेष्मलाहारसेविनः । मधुरोऽन्नरसः प्रायः स्नेहान्मेदोविवर्धनः' इति । तत् प्रायेण उदरस्थितं भवति । यदुक्तं—'मेदस्तु सर्वभूतानामुदरेष्वस्थिषु स्थितम् । अतएवोदरो वृद्धः प्रायो मेदस्विनो भवेत्' इति । ननु मेद एव दोषः कथं? तदुच्यते—'मेदसाऽऽवृतमार्गत्वात् पुष्यन्त्यन्ये न धातवः । मेदस्तु चीयते तस्मादसक्तः सर्वकर्मसु ॥ क्षुद्रश्वासतृषामोहस्वप्नक्रथनसादनैः । युक्तः क्षुत्स्वेददौर्गन्ध्यैरल्पप्राणोऽल्पमैथुनः' इति ॥

गू०—मेदोदोष एकः एकप्रकारः वातप्रधानः । देहमांसातिवृद्धिः मेद उच्यते ॥

गू०—शोथरोगसंख्यामाह—

**शोथरोगा नव स्मृताः ॥ ६५ ॥**

**दोषैः पृथग्द्वयैः सर्वैरभिघाताद्विषादपि ।**

दी—शोथरोगा नव स्मृता इति । दोषभेदेन शोथ एव रोगः शोथरोगः । अयमपि व्रणशोथाद्भिन्न एव केवलत्वङ्मांससंश्रयत्वात् । यतः 'रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् बहिः शिराः । नीत्वा रुद्धगतिस्तैर्हि कुर्यात्त्वङ्मांससंश्रयम् । उत्सेधं संहतं शोथं तमाहुर्निचयादतः' इति । अत एव शोथस्य त्वङ्मांसमेव संश्रयः । व्रणस्य त्वष्टौ वस्तूनि, यदुक्तम्—त्वङ्मांसशिरास्नाय्वस्थिसन्धिकोष्ठमर्माणीत्यष्टौ व्रणवस्तूनि, अष्टसु व्रणवस्तुषु व्रणशोथस्य सम्भवत्वात् । नव स्मृता इति । शोथरोगस्य नव भेदाः । दोषैः पृथगिति । दोषैर्वातादिभिर्व्यस्तैस्त्रयो भेदाः, द्वयैरिति मिलितदोषद्वयेनाऽपि त्रयो भेदाः । सर्वैरिति । मिलितदोषत्रयाणामप्यत्र एको भेदः सन्निपातेनेत्यर्थः । अभिघातादिति । अभिघातः शस्त्रादिना छेदभेदक्षतप्रभृतिकत्वेन प्रसरणशीलोऽपि सन् प्रकृतशोथो भवति । यदुक्तं—'अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः । हिमानिलोदध्यनिलैर्भल्लातककपिकच्छुजैः । रसैः शूकैश्च संस्पर्शाच्छ्वयथुः स्याद्विसर्पवान् । भृशोष्मा लोहिताभासः प्रायशः पित्तलक्षणः' इति । विषादिति । स्थावरजङ्गमात्मकविषप्रभावात् । यदुक्तं—'विषजः सविषप्राणिपरिसर्पणमूत्रणात् । दंष्ट्रादन्तनखाघातादविषप्राणिनामपि । विण्मूत्रशुक्रोपहतमलवद्वस्त्रसंकरात् । विषवृक्षानिलस्पर्शाद्गरयोगावचूर्णनात् । मृदुश्चलोऽवलम्बी च शीघ्रो दाहरुजाकरः' इति ॥ ६५ ॥

गू०—द्वयैर्द्विदोषैस्तु यः त्रिभिर्दोषैरेकः, सप्तमः अभिघातात्प्रहारादेः विषादेकः एवं नव शोथाः ॥६५॥

**गू०**—अथ वृद्धिसंख्या—

**वृद्धयः सप्त गदिता वातात्पित्तात्कफेन च ॥ ६६ ॥**

**रक्तेन मेदसा मूत्रादन्त्रवृद्धिश्च सप्तमी।**

**दी०**—वृद्धय इति। वृद्धिस्तु शोथोपलक्षितत्वात् शोथभेद एव। तथाहि 'क्रुद्धोऽनूर्ध्वगतिर्वायुः शोथशूलकरश्चरन्। मुष्कौ वंक्षणतः प्राप्य फलकोशाभिवाहिनीः। प्रपीड्य धमनीर्वृद्धिं करोति फलकोशयोः॥ दोषास्रमेदोमूत्रान्त्रैः सा वृद्धिः सप्तधा मता' इति। सप्तधा सप्तप्रकारा भवति। तद्यथा वातपूर्णदृतिस्पर्शो वातवृद्धिः, पक्वोदुम्बरसंकाशः पित्तवृद्धिः, कण्डूमान् कठिनोऽल्परुक् इत्यादिना श्लेष्मवृद्धिः। रक्तेनेत्यादि। दुष्टरक्तेन रक्तकृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च। मेदसेति। कफवृद्धिवत्तालफलोपमश्च। मूत्रादिति। मूत्रधारणशीलस्य पानीयपूर्णदृतिवत्क्षुवति सव्यथो मृदुश्च मूत्रजवृद्धिः। अन्त्रवृद्धिस्तु क्षुद्रान्त्रावयवं यदा अधोवङ्क्षणसन्धौ ग्रन्थ्याभः श्वयथुरिति। अतएवासौ चापरो भेदो ब्रध्न इति कथितः। यदुक्तं—'अन्त्रं विगुणमादाय जन्तोर्नयति वङ्क्षणम्। वङ्क्षणात् तद्बुजायुक्तं फलकोशं प्रपद्यते' इति ॥ ६६ ॥

**गू०**—वातादेः सप्त वृद्धयो गदिता उक्ताः। स्पष्टमन्यत् ॥ ६६ ॥

अण्डवृद्धिसंख्यामाह—

**अण्डवृद्धिस्तथा चैका—**

**दी०**—अण्डवृद्धिस्तथा चैका इति। एकोऽण्डवृद्धिस्त्वस्यैव भेदः, यत उक्तम् 'उपेक्षमाणस्य च मुष्कवृद्धिमाध्मानरुक् स्तम्भवतीं स वायुः' इत्यादिना कुरण्डकशब्दवाच्यत्वेन चिकित्सार्थं तु पृथगभिधानमात्रमस्य न दोषः॥

**गू०**—सुगमम्। अण्डवृद्धिर्वृद्धाण्डता एका एकप्रकारा॥

**गू०**—गण्डमालामाह—

**तथैका गण्डमालिका ॥ ६७ ॥**

**दी०**—तथैका गण्डमालिका इति। गण्डमाला जातिश्चैका स्यात्। गले गण्डकरूपा व्रणा एवं गण्डमालादयो ज्ञेयाः। मालातुल्यं गण्डयोगात् गण्डमाला। गलगण्डाद्भिन्ना। यदुक्तं—'कर्कन्धुकोलामलकप्रमाणैः कक्षांसमन्यागलवंक्षणेषु। मेदःकफाभ्यां चिरमन्दपाकैः स्याद्गण्डमाला बहुभिश्च गण्डैः' इति। अस्या एव मेदोऽपचीति वदन्ति केचित्। तुल्यग्रन्थिसाधर्म्यात्। यतः—'ते ग्रन्थयः केचिदवाप्तपाकाः स्रवन्ति नश्यन्ति भवन्ति चान्ये। कालानुबन्धं चिरमादधाति सैवाऽपचीति प्रवदन्ति केचित्' इति। ननु कथं कण्ठस्थानप्रसिद्धत्वाद्गण्डमालाऽपची च वङ्क्षणे प्रतीता? सत्यं—दोषगतिविशेषात् वङ्क्षणसन्धावपि गण्डमाला भवतीति न दोषः। यदाह भोजः—'वातपित्तकफा वृद्धा मेदश्चापि समाचितम्। जङ्घयोः कण्डरां प्राप्य मत्स्याण्डसदृशान् बहून्। कुर्वन्ति ग्रथितांस्तेभ्यः पुनः प्रकुपितोऽनिलः। तान् दोषानूर्ध्वगो वक्षःकक्षमन्यागलाश्रितः। नानाप्रकारान् कुरुते ग्रन्थीन् सा त्वपची मता। अपची कण्ठमन्यासु कक्षावंक्षणसन्धिषु। गण्डमालां विजानीयादपचीतुल्यलक्षणां' इति ॥ ६७ ॥

**गू०**—गण्डमालिका कण्ठदेशे मालाकारा ग्रन्थिरूपा साप्येकप्रकारा अपचीभेदः ॥ ६७ ॥

**गण्डालजी तु चैका स्यात्**

**दी०**—गण्डालजी तु चैका स्यादिति। गण्डालजी चात्र गलगण्डस्यैव नामान्तरं यतो गण्डमालया भिन्नो गलगण्ड एव नान्यत्। अत एवाह माधवः—'वातः कफश्चापि गले प्रदुष्टौ मन्ये तु संश्रित्य तथैव मेदः। कुर्वन्ति गण्डं क्रमशः स्वलिङ्गैः समन्वितं तं गलगण्डमाहुः' इति। भोजेनाप्युक्तं—'महान्तं शोथमल्पं वा हनुमन्यागलाश्रयम्। लम्बन्तं मुष्कवद्दुष्टं गलगण्डं विनिर्दिशेत्' इति। यद्वा गण्डालजीत्यत्रालजी क्षुद्ररोगपठिता बोद्धव्या। एके गण्डालजीस्थाने गण्डापचीति पठन्ति तन्मते तु एको गण्डः एकाऽपची चेति। अयमपि पाठो मनोहरो न दोषः॥

**गू०**—अथ ग्रन्थिसंख्या—

**ग्रन्थयो नवधा मताः।**

**त्रिभिर्दोषैस्त्रयो रक्ताच्छिराभिर्मेदसो व्रणात् ॥६८॥**

**अस्था मांसेन नवमः**

**दी०**—ग्रन्थयो नवधा मता इति। ग्रन्थिस्तु शोफसमुत्थानो व्रणभेदः लोके वतीगुरीति शब्दवाच्यत्वेन प्रतीतः। तद्यथा—'वातादयो मांसमसृक्प्रदुष्टाः संदूष्य मेदश्च तथा शिराश्च। वृत्तोन्नतं विग्रथितं तु

शोथं कुर्वन्त्यतो ग्रन्थिरिति प्रदिष्टः' इति। नवप्रकारमाह—त्रिभिर्दोषैरिति। त्रयो भेदाः, तेन व्यस्तेन वातेन, पित्तेन, कफेनेत्यर्थः। रक्ताद्रुधिराच्चतुर्थः। शिराभिरिति ग्रन्थिः पञ्चमः। मेदसा इति दुष्टमेदसा जनितः षष्ठः। व्रणादिति व्रणजनितः सप्तमः। अस्थ्नेति दोषदूषितास्थिजनितोऽष्टमः। मांसेनेति मांसजनितो नवम इति। ननु माधवेन पञ्चभेदा ग्रन्थयोऽभिहिताः वातादिदोषेण त्रयः मेदःशिराभ्यां च द्वाविति, तत्कथमत्र नवभेदा दर्शिताः? उच्यते, यदि मांसासृजावत्र दूष्यभेदेनोदाहृतौ तथापि ग्रन्थ्याश्रयत्वेन स्थानविशेषान्मेदःशिरावत्तत्सम्भवस्थान एवोक्तौ। यदुक्तं भोजे—'मेदो वायुर्यदा मांसे निक्षिपेदथवा त्वचि। तत्र मेदोभवग्रन्थिः श्यावो भवति पाण्डुरः' इत्यादिना। चिकित्सार्थं तु पृथगभिधानमन्यत्रापि दृश्यते। तदुक्तं—'ग्रन्थौ मांसोद्भवे योज्यो ह्ययमेव क्रियापथः। शिराग्रन्थिं परित्यज्य शेषं यत्नेन साधयेत्' इत्यादिभिरदोषः॥ ६८॥

**गू०**—ग्रन्थयो वातादिभिर्नवप्रकाराः॥ ६८॥

**षड्विधं स्यात्तथार्बुदम्।**

**वातात्पित्तात्कफाद्रक्तान्मांसादपि च मेदसः॥६९॥**

**दी०**—अर्बुदमपि व्रणभेदो व्रणाकारत्वात्। यतः—'गात्रप्रदेशे क्वचिदेव दोषाः समुत्थिता मांसमसृक् प्रदूष्य। वृत्तं मृदुं मन्दरुजं महान्तमनल्पमूलं चिरवृद्ध्यपाकम्। कुर्वन्ति मांसोच्छ्रयमत्यगाधं तदर्बुदं शास्त्रविदो वदन्ति' इति। षड्विधत्वाच्च सुगमम्। मांसादपि चेति। चकारग्रहणादत्र द्विरर्बुदमपि ग्राह्यं, अध्यर्बुदमपि केचित्। तथाहि—'यज्जायतेऽन्यत् खलु पूर्वजाते ज्ञेयं तदध्यर्बुदमर्बुदज्ञैः। यद्द्वन्द्वजातं युगपत् क्रमाद्वा द्विरर्बुदं तच्च भवेदसाध्यम्' इति॥६९॥

**गू०**—अर्बुदोऽपि तद्भेदः वातादिना षड्विधः॥६९॥

**श्लीपदं च त्रिधा प्रोक्तं वातात्पित्तात्कफादपि।**

**दी०**—श्लीपदं चेति। चरणयोः शिलावदुच्छ्रयः श्लीपदशब्दवाच्यः। तथेति ग्रहणात् करकर्णादिषु च भवतीति केचिदाहुः। यदुक्तं—'यः संज्वरो वंक्षणजो भृशार्तिः शोथो नृणां पादगतः क्रमेण। तत् श्लीपदं स्यात् करकर्णनेत्रशिश्नौष्ठनासास्वपि केचिदाहुः' इति। वातपित्तकफादित्यनेन व्यस्तसमस्तेन कृत्वा चत्वारो भेदाः तेन वातेन, पित्तेन, श्लेष्मणा चेत्यभिप्रायः। एके तु त्रय एव भेदाः श्लीपदस्येति वदन्ति। यतः तत्र कफस्याव्यभिचारेण प्राधान्यम्। तदुक्तम्—'त्रीण्येतानि विजानीयात् श्लीपदानि कफोच्छ्रयात्। गुरुत्वं च महत्त्वं च यस्मान्नास्ति विना कफात्' इति॥

**गू०**—श्लीपदं पादशोथः स्थूलताविशेषः स त्रिविधः॥

**गू०**—विद्रधिसंख्यामाह—

**विद्रधिः षड्विधः ख्यातो वातपित्तकफैस्त्रयः॥७०॥**

**रक्तात्क्षतात्त्रिदोषैश्च—**

**दी०**—विद्रधिरपि व्रणभेद एव। यदुक्तम्—'त्वग्रक्तमांसमेदांसि प्रदूष्यास्थिसमाश्रिताः। दोषाः शोथं शनैर्घोरं जनयन्त्युच्छ्रिता भृशम्। महामूलं रुजावन्तं वृत्तं वाप्यथवायतम्। स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः' इति। चरके तु विदाहप्रकर्षाद्विद्रधिसंज्ञा। यदुक्तम्—'स वै शीघ्रविदाहित्वाद् विद्रधिस्तु निरूप्यते' इति। सच बाह्याभ्यन्तरे भवति। अन्तरे तु गुल्मसादृश्यं। यतः—'तुल्यदोषसमुत्थानो विद्रधेर्गुल्मकस्य च' इति। ननु तुल्यत्वात् कथं विद्रधेः पाकः कथं वा गुल्मस्य न पाकः? उच्यते—'न निबन्धोऽस्ति गुल्मानां विद्रधिः सनिबन्धनः। गुल्माकारं स्वयं दोषो विद्रधिर्मांसशोणिते। विवरानुचरो ग्रन्थिरप्सु बुद्बुदको यथा। एवंप्रकारो गुल्मस्तु तस्मात् पाकं न गच्छति' इति। तथाऽन्यत्रापि—'मांसशोणितबाहुल्यात् पाकं गच्छति विद्रधिः। मांसशोणितहीनत्वात् गुल्मः पाकं न गच्छति' इति। षड्विधप्रकारोऽत्र सुगमः। क्षतादित्यत्र तु काष्ठलगुडपाषाणादिप्रहारात्। त्रिदोषैरिति। मिलितदोषत्रयेण सन्निपातेनेत्यर्थः॥ ७०॥

**गू०**—विद्रधिः वंक्षणदेशे व्रणविशेषः सोऽपि षड्विधः॥ ७०॥

**गू०**—व्रणाः पञ्चदशेति तेषां संख्यामाह—

**व्रणाः पञ्चदशोदिताः।**

**तेषां चतुर्धा भेदाः स्युरागन्तुर्देहजस्तथा॥ ७१॥**
**शुद्धो दुष्टश्च विज्ञेयस्तत्संख्या कथ्यते पृथक्।**
**वातव्रणः पित्तजश्च कफजो रक्तजो व्रणः॥ ७२॥**
**वातपित्तभवश्चान्यो वातश्लेष्मभवस्तथा।**
**तथा पित्तकफाभ्यां च सन्निपातेन चाष्टमः॥ ७३॥**

**नवमो वातरक्तेन दशमो रक्तपित्ततः ।**

**श्लेष्मरक्तभवश्चान्यो वातपित्तासृगुद्भवः ॥ ७४ ॥**

**वातश्लेष्मासृगुत्पन्नः पित्तश्लेष्मास्रसंभवः ।**

**सन्निपातासृगुद्भूत इति पञ्चदश व्रणाः ॥ ७५ ॥**

**दी०**—व्रणं तु शोथसमुत्थानं कथितं शोथोपलक्षितमित्यर्थः । अतएवाह कश्चित् पूर्वरूपत्वेन यथा—'एकदेशस्थितः शोथो व्रणानां पूर्वलक्षणम्' इत्यादि सच शोफो विलक्षणः उन्नतः पृथुः ग्रथितः समो विषमो वा त्वङ्मांसस्थायी दोषसङ्घातः शरीरैकदेशोत्थित इत्युच्यते । तेषां चतुर्धा भेदः स्यादिति । तेषां व्रणानां चतुर्धा भेद इत्यत्र चतुःप्रकारभेदत्वेन संज्ञाभेदः सामान्यो दर्शितः । आगन्तुर्देहजः—शुद्धो दुष्टश्चेति । आगन्तुरिति संघातबलप्रवृत्तः; शस्त्रव्यापदिकृत इत्यर्थः, देहजः इति दोषबलप्रवृत्तशरीरसंज्ञः । यदुक्तम्—'द्विधा व्रणः स विज्ञेयः शारीरागन्तुभेदतः । दोषैरायस्तयोरन्यः शस्त्रादिक्षतसम्भवः' इति । शुद्ध इति । शुद्धव्रणः, यदुक्तं—'जिह्वातलाभोऽतिमृदुः श्लक्ष्णः स्निग्धोऽल्पवेदनः । सुव्यवस्थो निरास्रावः शुद्धो व्रण इति स्मृतः' इति । दुष्ट इति दुष्टो व्रणः । यदुक्तम्—'पूतिः पूयातिदुष्टासृक्स्राव्युत्सङ्गी चिरस्थितिः । दुष्टव्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्ययः' इति । केचित्तु शुद्धदुष्टशब्दौ साध्यासाध्यत्वेन व्याख्यानयन्ति तन्न सर्वमतम् । तत्संख्या कथ्यते पृथगिति । तद्व्रणस्य संख्या गणनानियमः पृथगभिन्नत्वेनात्र कथ्यते, सा तु पञ्चदशप्रकारा वक्ष्यमाणा बोद्धव्या । यद्यपि षड्विधोऽन्यत्र व्रणः प्रतिपादितस्तथाप्यत्र दोषाणां प्रसरत्वेन पञ्चदशप्रकारो दर्शितः । तदुक्तं सुश्रुते—'कदाचिदेकशो द्विशो बहुशः शोणितसहिता वा अनेकधा प्रसरन्ति ।' इति । तेन पञ्चदशप्रकारा भवन्ति, यतः 'त्रिभिरेव वातादिकैः शोणितचतुर्थैः शरीरमिदं धार्यते' इति द्वितीयदर्शनात् । यदुक्तम्—'कालान्तरेणाभ्युदितं तु पित्तं कृत्वा वशे वातकफौ प्रसह्य । पचत्यतः शोणितमेष पाको मतोऽपरेषां विदुषां द्वितीयः' इति । पञ्चदशसंख्या सुबोधा इति ॥ ७१–७५ ॥

**गू०**—ते भेदतश्चतुर्धा । तद्भेदानाह—पञ्चदशव्रणा उदिताः कथिता इति पूर्वेण सम्बन्धः । तेषां पञ्चदशव्रणानां चतुर्धा भेदः तत्र एकः आगन्तुशस्त्रादिक्षतजः, द्वितीयो देहजः शारीरः सतु दोषैर्जन्यते एकः शुद्धः द्वितीयो दुष्टः एवं चतुर्धा भेदः । ननु निदाने द्विविधो भेदः प्रोक्तः तदुक्तं 'द्विधा व्रणः परिज्ञेयः शारीरागन्तुभेदतः । दोषैरायस्ततस्त्वन्यः शस्त्रादिक्षतसंभवः' इति, तत्कथं? उच्यते, निदाने शुद्धाशुद्धलक्षणं भिन्नमुक्तं अतस्तयोर्मिलित्वा चतुर्धेति न दोषः तत्संख्या पञ्चदशप्रकाराभिधा वातादिभेदतः पञ्चदशव्रणा भवन्तीति योज्यम् ॥ ७१–७५ ॥

**गू०**—सद्योव्रणसंख्यामाह—

**सद्योव्रणस्त्वष्टधा स्यादवक्रुप्तविलम्बिनौ ।**

**छिन्नभिन्नप्रचलिता घृष्टविद्धनिपातिताः ॥ ७६ ॥**

**दी०**—सद्योव्रण इति । शस्त्रादिप्रहारजनित आगन्तुकसंज्ञः । सचानेकाकृतिरिलेके भाषन्ते । यदुक्तम्—'नानाधारमुखैः शस्त्रैर्नानास्थाननिपातितैः । भवन्ति नानाकृतयो व्रणास्तांस्तान् निबोध मे' इति । तेषां भेदमाह—अवक्रुप्तमित्यपकर्तनं, विलम्बिनो लम्बनशीलः, मांसावलम्बनेनेत्यभिप्रायः । छिन्नमिति । तिर्यग् ऋजुर्वा छेदनमवयवादिषु गात्रस्य पातनमिति भावः । भिन्नमिति । कोष्ठे बहुधा शक्तिकुन्तखड्गाग्रविदारणादिभिर्भेदरूपम् । यदुक्तम्—'शक्तिकुन्तेषु खड्गाग्रविषाणैराशयो हतः । यत् किंचित् स्रवते तद्धि भिन्नलक्षणमुच्यते' इति । आशयोऽत्र स्थानं तत् कोष्ठशब्देनोपदर्शितम् । तद्यथा—'स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च । हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते' इति । अत एवाशयरहितेऽन्यदेशे व्यध एव वचनात् । प्रचलिता इति । प्रकर्षेण चलिता मांसादिकमिति भावः । तन्त्रान्तरे पिच्छितमिति नामान्तरं-यतः 'प्रहारपीडनाभ्यां तु यदङ्गं पृथुतां गतम् । सास्थि तत् पिच्छितं विद्यान्मज्जारक्तपरिप्लुतं' इति । अथवा प्रचलितमित्यनेन यद्व्रणं यद्भग्नस्य तथा सद्योव्रणस्य च चिकित्साविषयं तेन भग्नाधिकारे प्रतिपादितोऽपि तस्यैवात्रावसरो न दोषः मज्जारक्तपरिप्लुतत्वेन व्रणभावत्वात् । घृष्टमिव घर्षितं, तद्यथा—'घर्षणादभिघाताद्वा यदङ्गं विगतत्वचम् । उषास्रवान्वितं तत्तु घृष्टमित्यभिधीयते' इति । विद्धमिव विद्धम् । यथा—सूक्ष्मास्यशल्याभिहतं यदङ्गं त्वाशयाद्विना । उत्तुण्डितं निर्गतं वा तद्विद्धमिति निर्दिशेत्' इति । निपातित इति । विशेषेण पातितोऽवयवाद्यो यत्र स तथा, एके अवलिप्तविलम्बिनां विवक्षितमिति नाम्ना एक-

मेव भेदं प्रतिपादयन्ति तद्यथा 'नातिच्छिन्नं नातिभिन्नमुभयोर्लक्षणान्वितम् । विषमं व्रणमङ्गेषु तत् क्षतं त्वभिनिर्दिशेत्' इति । अत्राकृतिविषयत्वादष्टविधो लिखितो न दोषः ॥ ७६ ॥

**गू०**—सद्योव्रणः शस्त्रादिसंभूतः अष्टधा स्यादुच्चेत् । स तु अवकृत्तादिलक्षणः ॥ ७६ ॥

**गू०**—कोष्ठभेदसंख्यामाह—

**कोष्ठभेदो द्विधा प्रोक्तश्छिन्नान्त्रो निःसृतान्त्रकः ।**

**दी०**—कोष्ठभेदो द्विधा प्रोक्त इति । एकः छिन्नान्त्रः अपरो निःसृतान्त्रक इति । अत्र कोष्ठशब्देनोदरमात्रमेव गृह्यते न तु पक्वामाशयादिसंज्ञः ॥

**गू०**—एवं द्विधा । सुगमम् ॥

अस्थिभङ्गसंख्यामाह—

**अस्थिभङ्गोऽष्टधा प्रोक्तो भग्नपृष्ठविदारितौ ॥ ७७ ॥**

**विवर्तितश्च विश्लिष्टस्तिर्यक्क्षिप्तस्त्वधोगतः ।**

**ऊर्ध्वगः सन्धिभग्नश्च वह्निदग्धश्चतुर्विधः ॥ ७८ ॥**

**प्लुष्टोऽतिदग्धो दुर्दग्धः सम्यग्दग्धः प्रकीर्तितः ।**

**दी०**—अस्थिभङ्ग इति । अस्थिभङ्गपर्यायवाचको भग्न इत्यत्र कथितः, नतु भग्नशब्दोऽष्टसंख्यायामिह गणितः, ते तु पिष्टविदारितादयोऽष्टौ गणिताः । अग्निवेशे तु भग्नं द्विविधं काण्डसन्धिभेदात् । यदुक्तं—'भग्नं समासाद्द्विविधं हुताशकाण्डे च सन्धावपि तत्र सन्धौ । उत्पिष्टविश्लिष्टविवर्तितं च तिर्यग्गतं क्षिप्तमधश्च षट् च ॥१॥' अत्र तु यद्विदारितोर्ध्वगौ द्वौ भेदावधिकौ लिखितौ तद्ग्रन्थान्तरसंवादान्न दोषः । यतः—अधःक्षिप्तवदूर्ध्वक्षिप्तस्याप्यभिधाने प्राप्तेऽनुक्तमप्यूर्ध्वक्षिप्ताभिधानं तेनात्रोर्ध्वगः पृथग्दर्शितः । यदुक्तं—'अधःक्षिप्तोर्ध्वगावेतौ तुल्यलक्षणसंज्ञकौ' इत्यादि । विदारितोनाम भग्नश्चास्थिभङ्गेनान्यत्र प्रतिपादितत्वादत्रापि लिखितः, सुश्रुतेऽप्ययमेव संज्ञान्तरेण कथितः । यदुक्तं—'तरुणास्थीनि नाम्यन्ते भिद्यन्ते नलिकानि च । कपालास्थीनि भज्यन्ते स्फुटन्ति रुचकानि च ॥' इत्यत्र चकारग्रहणाद्वलयान्यपि स्फुटन्ति इत्यभिप्रायः । यतोऽस्थीनि पञ्चविधानि भवन्ति तरुणनलकवलयकपालरुचकभेदात् । अतएव स्फुटितमिति भग्नं सुश्रुतेनोक्तम् । अथोक्तपिष्टविदारितादीनामपि विवरणमाह—सन्धावुभयतः शोथो वेदनादिकश्च पिष्टसंज्ञः । विदारित इति द्वयोः सन्ध्ययोरतिक्रान्तता वेदना च निवर्तेत इत्येकसन्धिपार्श्वगमनं विषमाङ्गता वेदना च विश्लिष्ट इति मनाक् सन्धिविश्लेषः शिथिलतामात्रं रात्रिरुजाशोथौ च । तिर्यक्क्षिप्त इत्येकं सन्ध्यस्थिस्थानं त्यक्त्वा तिर्यग् याति तदा तीव्रपीडाः स्युः । अधोगत इति । वक्ष्यमाणोर्ध्वगलक्षणः किंचिदधोगमनमिति शेषः । ऊर्ध्वग इति । विषमा रुगप्यस्थ्नोरतिक्षिप्तत्वात् तेन द्वयोरप्यस्थ्नोः परस्परातिक्रमणं दूरागमनमित्यर्थः । सन्धिभग्न इति । द्वयोः सन्धानं सन्धिः, सन्धेस्तु विश्लेषः सन्धिभग्नः कथितः । ननु कथं सन्धिमुक्तत्वेन भग्नमुच्यते ? अस्थिविश्लेषोऽत्र भङ्गेऽभिप्रेतः, यतः अस्थिसन्ध्योः पृथग्भावत्वात्तेन काण्डभग्नं सन्धिभग्नं **चाग्निवेशे** पूर्वं द्विधा प्रतिपादितम् । यदुक्तं—'षड्उत्पिष्टादिभेदेन सन्धिविश्लेष उच्यते । काण्डभग्नो द्वादशभिर्भेदैः कर्कटकादिभिः' इत्यादि । अत्र काण्डभग्नोऽस्थिभग्नस्तस्य द्वादशभेदाः सन्धिभग्नान्तर्भूता बोद्धव्या इति न दोषः । वह्निदग्ध इति । अग्निदग्धश्चतुर्विधश्चतुःप्रकारः, ते के प्रकारा इत्याह—प्लुष्ट इत्यादि । यो विवर्णमतिमात्रं प्लुष्यते स प्लुष्टः, यत्र त्वङ्मांसावलम्बनं गात्रविश्लेषः शिरास्नायुसन्ध्यस्थिव्यापादनं ज्वरदाहपिपासामूर्च्छाश्चोपद्रवा भवन्ति सोऽदग्धः । यत्रोत्तिष्ठन्ति स्फोटास्तीव्रदाहवेदनाश्चिराच्चोपशाम्यन्ति स दुर्दग्धः । सम्यग् दग्ध इत्यनवगाढः, तालवर्णः सुसंस्थित इति ॥७७॥७८॥

**गू०**—भग्नादिभेदेन अस्थिभङ्गः अष्टधा प्रोक्तः कथितः । अग्निदग्धभेदमाह—( ऊर्ध्वग इति )—प्लुष्टादिभेदेनाग्निदग्धश्चतुर्विधः कीर्तितः कथितः ॥ ॥ ७७ ॥ ७८ ॥

**गू०**—नाडीव्रणसंख्यामाह—

**नाड्यः पञ्च समाख्याता वातपित्तकफैस्त्रिधा ॥ ७९ ॥**

**त्रिदोषैरपि शल्येन—**

**दी०**—अथ नाडीसंख्या—नाड्य इति । नाडीति गम्भीरगतिः पूयस्यातिदूरप्रवेशनाद्गतिरिष्यते । 'नाडीव यद्वहति सा नाडी' इत्युच्यते । अन्तःशुषिरनाला नाडी तेन लोके सरहाशब्दवाच्यो व्रणविशेषः । तथाहि—'शोफं न पक्वमिति पक्वमुपेक्षते यो यो वा व्रणं प्रचुरपूयमसाधुवृत्तः । अभ्यन्तरं प्रविशति प्रविदार्य तस्य स्थानानि पूर्वविहितानि ततः सपूयः । तस्यातिमात्रग-

मनाङ्गरिष्यते तु नाडीव यद्वहति तेन मता तु नाडी' इति । पञ्च समाख्यातेति पञ्चप्रकारा वातेन पित्तेन कफैस्त्रिधा त्रिदोषैरपि शल्येनेति । वातेन पित्तेन कफेन त्रयो भेदाः, त्रिदोषैरिति मिलितदोषत्रयेण चतुर्थः । शल्येनेत्यागन्तुनिमित्तः पञ्चमो भेद इति । शल्यनिमित्तलक्षणं च यथा—'नष्टं कथंचिदनुमार्गमुदीरितेषु स्थानेषु शल्यमचिरेण गतिं करोति । यत्फेनिलं मथितमुष्णमसृग् विमिश्रं स्रावं करोति सहसा सरुजा च नित्यम्' इति ॥ ७९ ॥

गू०—वातादिभिः पञ्चनाड्यः समाख्याताः कथिताः ॥ ७९ ॥

गू०—अथ भगन्दरसंख्या—

**तथाष्टौ स्युर्भगन्दराः ।**

**शतपोनस्तु पवनादुष्ट्रग्रीवश्च पित्ततः ॥ ८० ॥**

**परिस्रावी कफाज्ज्ञेय ऋजुर्वातकफोद्भवः ।**

**परिक्षेपी मरुत्पित्तादर्शोजः कफपित्ततः ॥ ८१ ॥**

**आगन्तुजातश्चोन्मार्गी शङ्खावर्तस्त्रिदोषजः ।**

दी०—तथाष्टाविति । गुदवस्तिभगदेशदारणाद्भगन्दरः, भगशब्दो गुदाद्युपलक्षणः । भोजेऽप्युक्तम्—'भगं परिसमन्ताच्च गुदं बस्तिं तथैव च । भगवद्दारयेद्यस्मात्तस्माज्ज्ञेयो भगन्दरः' इति । अष्टाविलत्राष्टसंख्याः स्युस्तास्तु शतपोनकप्रभृतयः । शतपोनकतुल्यत्वात् शतपोनकः, स तु वातप्रायः, शतपोनश्चालनिका इति लोके । सहस्रधारमन्ये । उष्ट्रग्रीव इति । पिडकावस्थागतवक्रत्वेनोष्ट्रग्रीवाकारस्तेनोष्ट्रग्रीवसंज्ञः । अयं तु पित्तबहुलः । परिस्रावयोगात् । परिस्रावी कण्डूमान् भवति स च कफप्रायः । ऋजुर्वातकफोद्भव इति वातकफलक्षणाभ्यां युक्त ऋजुः । परिक्षेपी मरुत्पित्तादिति । वातपित्तलक्षणाभ्यां युक्तः परिक्षेपी । गुदोपरि समन्तात् प्रसरणशील इति भावः । प्रायेणार्शोजमाह—अर्शोजः कफपित्ततः इति कफपित्तचिह्नाभ्यां मिलितोऽर्शोज इत्यर्शोभगन्दरः इति । तद्यथा—'कफपित्ते सपूर्वोत्थो दुर्नामासृजकोपतः । अर्शोमूले ततः शोथं कण्डूदाहादिमान् भवेत् ॥ स शीघ्रपक्वभिन्नास्यः क्लेदयन् मूलमर्शसः । स्रवत्यजस्रं च पूतिरयमर्शोभगन्दरः' इति । आगन्तुजातश्चोन्मार्गीति आगन्तुजः प्रहारादिजनितो भगन्दर उन्मार्गिसंज्ञो भवति । उन्मार्गेण क्रमिकृतमार्गेण पुरीषादिगमनात् । शङ्खावर्त इति शङ्खावर्तो नाम भगन्दरस्त्रिदोषजनितो ज्ञेयः । शम्बूकावर्तवद्व्रणविशेषपूर्णनन्द्याऽऽवर्तवद्वा शम्बूकावर्त आवर्तो दोषगतिविशेषाद्भवति । तथा च भोजः—'नदीनां परिपूर्णानां शम्बूकावर्तका यथा । समुत्तिष्ठन्ति वेगेन तोयवेगसमीरिताः' इति । ननु माधवेन भगन्दरः पञ्चविध उक्तः । तथाहि—'गुदस्य द्व्यङ्गुले क्षेत्रे पार्श्वतः पिडकार्तिकृत् । भिन्नो भगन्दरो ज्ञेयः स च पञ्चविधो मतः' इति । तत्कथमत्राष्टविधः ? उच्यते—माधवनिदाने तु त्रयः संसर्गभेदाः शतपोनकादीनां दोषलक्षणदर्शनात्तेष्वेवान्तर्भाव्याः, अन्यत्र प्रतिपादितभिन्नलक्षणत्वाच्चिकित्सार्थं पृथग्दर्शितो न दोषः । अर्शोभगन्दरे प्रतिपादितत्वात् ॥ ८० ॥ ८१ ॥

गू०—तथाष्टौ तु भगन्दरा इति पूर्वेण सम्बन्धः । ते शतपोनादयः निदाने पञ्चभगन्दरा उक्ताः, अत्र भेदभिन्ना अष्टौ, अतो न दोषः ॥ ८० ॥ ८१ ॥

गू०—उपदंशसंख्यामाह—

**मेढ्रे पञ्चोपदंशाः स्युर्वातपित्तकफैस्त्रिधा ॥ ८२ ॥**

**सन्निपातेन रक्ताच्च—**

दी०—मेढ्रे पञ्चोपदंशाः स्युरिति । उपदंशसंज्ञा रूढा बोद्धव्या, व्रणविशेषत्वेन मेढ्रे लिङ्गे पञ्चप्रकारो भवति । यदुक्तमन्यत्रापि—'हस्ताभिघातान्नखदन्तघातादधावनादत्युपसेवनाद्वा । योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधोपचारैः' इति । पञ्चप्रकारा अत्र सुगमाः । चकाराल्लिङ्गे लिङ्गवर्तिरिति भेदोऽत्र ज्ञातव्यः । यदुक्तम्—'अङ्कुरैरिव संघातैरुपर्युपरिसंस्थितैः । क्रमेण जायते वर्तिस्ताम्रचूडशिखोपमा । कोशस्याभ्यन्तरे सन्धौ पर्वसन्धिगतापि वा । लिङ्गवर्तिरिति ख्याता लिङ्गार्श इति चापरे' । अत्राचार्येणायमपि वक्ष्यमाणशूकदोषेषु पठितो न दोषः एकस्थानगतसाधर्म्यात् । यद्यप्यभिघातक्षते मेहने उपदंशे आगन्तुः षष्ठः सम्भवी तथापि तस्य दोषलिङ्गव्युत्क्रान्ततया दोषजेष्वेवान्तर्भावः । अतएवाह कश्चित्—'वेगनिग्रहदीर्घातिखरशय्यादिसेवनैः । दोषा दुष्टा गता गुह्यं त्रयोविंशतिरामयान्' इत्यादि । त्रयोविंशतिरित्यनेन पञ्चोपदंशा दश चाष्टौ च शूकजा इत्यर्थः । गुह्यशब्दत्वेनापि स्त्रीणामेषां सम्भवः क्वचिदिति भावः । यतः—'रुजादाहार्तिबहुलास्तृ-

ष्णातोदसमन्विताः । स्त्रीणां पुंसां च जायन्ते उपदंशाः सुदारुणाः' इति पाठः प्रायेणार्ष इत्याहुः ॥ ८२ ॥

गू०—मेढ्रे मेहने पञ्चोपदंशाः स्युः । ते वातादिभिरुक्ताः ॥ ८२ ॥

गू०—अथ शूकदोषसंख्यामाह—

**मेढ्रे शूकामयास्तथा ।**
**चतुर्विंशतिराख्याता लिङ्गार्शो ग्रथितं तथा ॥ ८३ ॥**
**निवृत्तमवमन्थश्च मृदितं शतपोनकः ।**
**अष्ठीलिका सर्षपिका त्वक्पाकश्चावपाटिका ॥ ८४ ॥**
**मांसपाकः स्पर्शहानिर्निरुद्धमणिरुत्तमा ।**
**मांसार्बुदं पुष्करिका संमूढपिडकालजी ॥ ८५ ॥**
**रक्तार्बुदं विद्रधिश्च कुम्भिका तिलकालकः ।**
**निरुद्धप्रकाशः प्रोक्तस्तथैव परिवर्तिका ॥ ८६ ॥**

दी०—मेढ्रे शूकामयास्तथेति । तथेति लिङ्गसामान्ये स्थानत्वात् शूकामयाः शूकजाः व्याधयः कथिताः । शूको जलशूकः । स तु विषजन्तुः जलमलोद्भूतो जीवविशेष इत्यर्थः । तत् प्रधानो रोग इति । यद्वा लिङ्गवृद्धौ वात्स्यायनादिशास्त्रोक्तो योगः शूक उच्यते तन्मुख्यत्वात् लिङ्गवृद्धौ अन्येऽपि योगाः शूकाः कथ्यन्ते, तेषां यो विकारस्तस्य शूककारणत्वात् शूकदोषजा व्याधय इत्यभिप्रायः । चतुर्विंशतिराख्याता इति तत्र लिङ्गार्श इत्येको भेद उपदंशेषु दर्शितः । अष्टादशभेदा माधवेन लिखिताः, तद्यथा—'अक्रमाच्छेपसो वृद्धिं योऽभिवाञ्छति मूढधीः । व्याधयस्तस्य जायन्ते दश चाष्टौ च शूकजाः' इति । अवशेषाः पञ्चान्यत्र क्षुद्ररोगेषु पठिताः । ते के ? निवृत्तावपाटिकानिरुद्धमणिनिरुद्धप्रकाशपरिवर्तिकाश्चेति; मेढ्रस्थानसंभवत्वादत्रापि लिखिता न दोषः । एवं चतुर्विंशतिः शूकदोषाः कथिताः[1] । एतेषां विवरणं केषांचिज्ज्ञापनार्थं लिख्यते—यथा अत्र लिङ्गार्शस्तो लक्षणमुपदंशेषु दर्शितमेव । ग्रथितमिति । 'शूकैर्यत् पूरितं शश्वद् ग्रथितं नाम तत् कफात्' । निवृत्तमिति । उपर्यस्त्रमुपरिवर्तनादियुक्तं निवृत्तम् । यदुक्तम्—'विमर्दनादिदुष्टेन वायुना चर्म मेढ्रजम् । निवर्तते सरुग्दाहं त्वचि पाकं च गच्छति ॥ पिण्डितं ग्रन्थितं चर्म तत्प्रलम्बमधो मणेः । निवृत्तसंज्ञः स भवेत् कण्डूकाठिन्यवर्तुलं' इति ॥ अवमन्थ इति । 'दीर्घा बह्व्यश्च पिडका दीर्यन्ते मध्यतस्तथा । सोऽवमन्थः कफासृग्भ्यां वेदनारोमहर्षकृत्' । मृदितमिति । 'मृदितं पीडितं यत्तु संरब्धं वातकोपतः' । शतपोनक इति । 'छिद्रैरणुमुखैर्लिङ्गं चितं यत्तु समन्ततः । वातशोणितजो व्याधिः स ज्ञेयः शतपोनकः' इति । अष्ठीलिकेति । 'कठिना विषमैरन्तैर्मारुतस्य प्रकोपतः । शूकैस्तु विषसंयुक्तैः पिडकाऽष्ठीलिका भवेत्' । सर्षपिकेति । 'गौरसर्षपसंस्थाना शूकदुर्गमहेतुका । पिडका श्लेष्मवाताभ्यां ज्ञेया सर्षपिका तु सा'। त्वक्पाक इति । 'वातपित्तकृतो ज्ञेयस्त्वक्पाको ज्वरदाहवान् ।' अवपाटिकेति । 'यस्यावपाट्यते चर्म तां विद्यादवपाटिकाम् । सकण्डूः कठिनात्रापि सैव श्लेष्मसमुत्थिता' । मांसपाक इति । 'शीर्यन्ते यस्य मांसानि यस्य सर्वाश्च वेदनाः । विद्यात्तं मांसपाकं तु सर्वदोषकृतं भिषक्' । स्पर्शहानिरिति । 'स्पर्शहानिं तु जनयेच्छोणितं शूकदूषितम्' । निरुद्धमणिरिति । अल्पमूत्रछिद्रत्वेन निरुद्धमणिरिति, यदुक्तम्—'वातेन दूषितं चर्म मणौ सक्तं रुणद्धि चेत् । स्रोतो मूत्रं ततो भेत्ति मन्दधारमवेदनम् ॥' मणेर्विकारात्प्ररोधश्च निरुद्धमणिगद इत्युच्यते । उत्तमेति । 'मुद्गमाषोपमा रक्ता रक्तपित्तोद्भवा च या । व्याधिरेषोत्तमा नाम शूकाजीर्णनिमित्तजः' इति । मांसार्बुदमिति । 'मांसदोषेण जानीयादर्बुदं मांससम्भवम्' । पुष्करिकेति । 'पिडका पिडकायुक्ता पित्तशोणितसम्भवा । पद्मकर्णिकसंस्थाना ज्ञेया पुष्करिकेति सा' । संमूढपिडकेति—'पाणिभ्यां भृशसंमूढे संमूढपिडका भवेत्' । अलजीति । 'तुल्यजां त्वलजीं विद्याद् यथाप्रोक्तां विचक्षणैः' । रक्तार्बुदमिति । 'कृष्णैः स्फोटैः सरक्ताभिः पिडकाभिर्निपीडितम् । यस्य बस्तिरुजश्चोग्रा ज्ञेयं तच्छोणितार्बुदम्' इति । विद्रधिरिति । 'विद्रधी रक्तपित्तोत्था जाम्बवास्थिनिभा शुभा' । तिलकालक इति । 'कृष्णानि चित्राण्यथवा शूकानि सविषाणि च । पातितानि पचन्त्याशु मेढ्रं निरवशेषतः । कालानि भूत्वा मांसानि शीर्यन्ते यस्य देहिनः । सन्निपातसमुत्थानं तं विद्यात्तिलकालकम्' । निरुद्धप्रकाश इति । 'वातोपसृष्टे मेढ्रे तु चर्म संश्रयते मणिः । (मणिश्चर्मोपनद्धस्तु मूत्रस्रोतो रुणद्धि च । निरुद्धप्रकाशे तस्मिन् मन्दधारं सवेदनम् । मूत्रं प्रवर्तते जन्तोर्मणिर्विव्रियते न च । )[1] निरुद्धप्रकाशं विद्यात् सरुजं वातसंभवम्' । परिवर्तिकेति । मणेरधस्तात् कोषस्तु ग्रन्थिरूपेण लम्बते । परिवर्तिकां तु तां विद्यात् सरुजं वातसंभवाम्' इति ॥ ८३–८६ ॥

१—'कीर्तिता' पा० ।

१ बन्धनीधृतपाठो नास्ति 'क' 'ख' पुस्तकयोः ।

गू०—मेद्रे शुक्रामयास्तथेत्यग्रे संबन्धः। लिङ्गार्शादयः शुक्रदोषाश्चतुर्विंशतिराख्याताः। निदाने अष्टादश शुक्रदोषा उक्ताः, अत्र चतुर्विंशतिस्तत्कथं? उच्यते, तिलकालकालसकादयोऽत्र क्षुद्ररोगोक्ता अधिका अतो न दोषः॥ ८३-८६॥

गू०—कुष्ठरोगगणनामाह—

**कुष्ठान्यष्टादशोक्तानि वातात्कापालिकं भवेत्।**
**पित्तेनौदुम्बरं प्रोक्तं कफान्मण्डलचर्चिके॥ ८७॥**
**मरुत्पित्ताद्दृष्यजिह्वं श्लेष्मवाताद्विपादिका।**
**तथा सिध्मैककुष्ठं च किटिभं चालसं तथा॥ ८८॥**
**कफपित्तात्पुनर्दद्रुः पामा विस्फोटकं तथा।**
**महाकुष्ठं चर्मदलं पुण्डरीकं शतारुकम्॥ ८९॥**
**त्रिदोषैः काकणं ज्ञेयं तथान्यच्छ्वित्रसंज्ञितम्।**
**त थातेन पित्तेन श्लेष्मणा च त्रिधा भवेत्॥९०॥**

टी०—कुष्ठानीत्यादि। कुष्ठमिति रूढिः महारोगविशेषत्वात्। तान्यष्टादशभेदभिन्नानि। तथाहि—'विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च। भजतामागतां छर्दिं वेगांश्चान्यान्प्रतिघ्नताम्॥ व्यायाममतिसंतापमतिभुक्त्वा निषेविणाम्। अजीर्णाध्यशिनां चैव पञ्चकर्मापचारिणाम्॥ वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांसमम्बु च। दूषयन्ति स कुष्ठानां सप्तको द्रव्यसंग्रहः। अतः कुष्ठानि जायन्ते सप्त चैकादशैव च' इत्यादि। अष्टादशसंख्या यथा—तत्र कृष्णारुणं कपालाभं कापालिकं। उदुम्बरफलसदृशमौदुम्बरम्। मण्डलमिति। सदलं श्वेतरक्तमुत्सन्नमण्डलम्। विचर्चिकेति कण्डूदाहादियुक्तं। ऋष्यो नीलमृगो गवयः रुरुरिति प्रसिद्धः तज्जिह्वाकारमृष्यजिह्वमिति। विपादिकेति। वैपादिकं तत्र पाणिपादस्फुटनं तीव्रवेदना च। सिध्ममिति। श्वेतलोहिताभमलाबुकुसुमोपमं घृष्टाद्रजो मुञ्चतीति। किटिभमिति। श्यावारुणं खरस्पर्शं कण्डूमच्चेति। अलसमिति। कण्डूमद्भिः सरागैर्गण्डैश्चितं स्फोटचितमित्यर्थः। दद्रू च शुभ्रमण्डला पिडका सकण्डूरिति। पामेति। स्रावयुक्ताः पिडकाः कण्डूमत्यः सदाहाश्चेति। पामा कथ्यन्ते। तनुत्वैचस्तीव्रदाहैरुपेताः पाणौ कक्षे स्फिक्चि च क्लेदकरा इति विस्फोटाः। महाकुष्ठमिति। शीघ्रोत्तरोत्तरधातववगाहनबहुलदोषजन्यत्वक्रियाभूयस्त्वयोगान्महाकुष्ठमित्युच्यते। चर्मदलमिति। मत्स्यशकलोपमं तलं हस्तिचर्मवदित्यर्थः। पुण्डरीकमिति। श्वेतकमलपत्रोपमं मध्यमपर्यन्तं रक्तं सोत्सेधमित्यर्थः। शतारुकमिति। 'रक्तं श्यावं सदाहार्तिः शतारुः स्याद्बहुव्रणं' इति। काकणमिति। काकणन्तिका गुञ्जा तस्याः सवर्णेन मध्ये कृष्णं अन्ते रक्तमपाकं तीव्रवेदनमिति। श्वित्रसंज्ञकमिति। श्वेतकुष्ठं अजितवर्णमिति लोके, तच्च वातादिदोषत्रयभेदेन त्रिधा भवति। यदुक्तं 'वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत्। सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु' इति। तन्त्रान्तरे श्वित्रभेदः किलास इति प्रसिद्धः। 'कुष्ठैकसंभवं श्वित्रं किलासं वारुणं भवेत्। निर्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम्' इति। अपरे तु किलासमेव धात्वन्तराश्रितं संज्ञान्तरं लभत इति वदन्ति। यतः—'अरुणं तत्तु विज्ञेयं मांसधातुसमाश्रितम्। मेदाश्रितं भवेच्छ्वित्रं दारुणं रक्तसंश्रयम्' इति। तच्छ्वित्रं द्विविधमित्याचक्षते। व्रणजं दोषजं च। यदुक्तं भोजे—'श्वित्रं तु द्विविधं विद्याद्दोषजं व्रणजं तथा। तत्र मिथ्योपचाराद्धि व्रणस्य व्रणजं स्मृतम्। दोषजं द्विविधं प्रोक्तमात्मजं परजं तथा। परसंस्कारसंस्पर्शाद्यत्तत् परजमुच्यते। तदात्मजं विजानीयाद्देहेष्वनिलात्मकम्' इति॥ ८७-९०॥

गू०—क्षुद्ररोगसंख्यामाह—

**क्षुद्ररोगाः षष्टिसंख्यास्तेष्वादौ शर्करार्बुदम्।**
**इन्द्रवृद्धा पनसिका विवृतान्धालजी तथा॥ ९१॥**
**वराहदंष्ट्रो वल्मीकं कच्छपी तिलकालकः।**
**गर्दभी रकसा चैव यवप्रख्या विदारिका॥ ९२॥**
**कदरो मषकश्चैव नीलिका जालगर्दभः।**
**इरिवेल्ली जतुमणिर्गुदभ्रंशोऽग्निरोहिणी॥ ९३॥**
**संनिरुद्धगुदः कोठः कुनखोऽनुशयी तथा।**
**पद्मिनीकण्टकश्चिप्यमलसो मुखदूषिका॥ ९४॥**
**कक्षा वृषककच्छूश्च गन्धः पाषाणगर्दभः।**
**राजिका च तथा व्यङ्गश्चतुर्धा परिकीर्तितः॥ ९५॥**
**वातात्पित्तात्कफाद्रक्तादित्युक्तं व्यङ्गलक्षणम्।**
**विस्फोटाः क्षुद्ररोगेषु तेऽष्टधा परिकिर्तिताः॥९६॥**
**पृथग्दोषैस्त्रयो द्वन्द्वैस्त्रिविधः सप्तमोऽस्रजः।**
**अष्टमः सन्निपातेन क्षुद्ररुक्षु मसूरिका॥ ९७॥**
**चतुर्दशप्रकारेण त्रिभिर्दोषैस्त्रिधा च सा।**
**द्वन्द्वजा त्रिविधा प्रोक्ता सन्निपातेन सप्तमी॥९८॥**

१—'क्षजिह्वं' पा० 'ऋक्षजिह्वं' पा०। २—'त्रिदोषं कारणं' पा०। ३—'ोझ' इति हिन्दीनाम। ४—'सर्वैः' पा०।

१—'हस्तिचर्मैकुष्ठमित्युच्यते' पा०। २ 'अन्त्रालजी'ति पा०।

**अष्टमी त्वग्गता ज्ञेया नवमी रक्तजा मता ।**
**दशमी मांसजा ख्याता चतस्रोऽन्याश्च दुस्तराः॥९९॥**
**मेदोऽस्थिमज्जाशुक्रस्थाः क्षुद्ररोगा इतीरिताः ।**

**दी०**—क्षुद्ररोगा इत्यादि । क्षुद्रहेतुलक्षणचिकित्सानां रोगाणां च पारिशेष्यात् क्षुद्ररोगाः कथिताः । ननु यदि क्षुद्रत्वमेषां हेतुलक्षणचिकित्साऽल्पत्वेन, तर्हि रोगाणामग्निरोहिणीप्रभृतीनां त्रिदोषजत्वेन हेत्वादिबाहुल्येनैव कथं क्षुद्रत्वं? नैवं, बाहुल्येन तावत् 'छत्रिणो गच्छन्तीति'वत् किंवाऽवान्तरभेदविरहत्वं क्षुद्रत्वं येनाऽत्र वक्तव्यानामजगल्लिकादीनां दोषदूष्यादिकृतभूरिसंख्याभेदेन व्रणज्वरादिवन्निर्देशः । किन्तु प्रत्येकं श्लोकसंख्ययाऽभिधानं तेषामिति । अन्यस्त्वाह—क्षुद्रशब्दोऽल्पे रौद्रे च वर्तते तेन यथायोग्यं सर्वत्र व्यवस्था दृश्यते । रौद्रे क्षुद्रशब्दो यथा—'अपि क्षुद्रमृगा यत्र शान्ताश्चेरुः समं मृगैः' इति । केचित्तु क्षुद्राणां बालानां प्रायेण रोगाः क्षुद्ररोगाः इति व्याख्यानयन्ति । षष्टिसंख्यां यथा तत्र शर्करार्बुदादयो राजिकान्ताश्चतुस्त्रिंशत् । चत्वारो व्यङ्गाः, अष्टौ विस्फोटाः, चतुर्दशभेदा मसूरिका इति षष्टिसंख्याः क्षुद्ररोगाः पूर्यन्ते । शर्करार्बुदमित्यत्र वृद्धाः—'दुर्गन्धि क्लिन्नमत्यर्थं नानावर्णं ततः सिराः । सृजन्ति सहसा रक्तं तं विद्याच्छर्करार्बुदम्' इति । अन्यत्र शर्करा भिन्नपठितत्वात् पृथग्गृहीता । यदुक्तम्—'प्राप्य मांससिरास्नायूः श्लेष्मा मेदस्तथाऽनिलः । ग्रन्थिं कुर्वन्त्यसौ भिन्नो मधुसर्पिर्वसानिभम् । स्रवति स्रावमनिलस्तत्र वृद्धिं गतः पुनः । मांसं विशोष्य ग्रथितां शर्करां जनयेत् पुनः' इति । अत्र शर्कराऽर्बुदत्वेन स्थितिरित्येके । तेन संख्यातिरेकः । भोजेऽप्युक्तम्—'तमेव भिन्नदुर्गन्धं घृतमेदोवसानिभम् । शिराः स्रवन्तीत्यनिशं तदा स्याच्छर्कराऽर्बुदम्' इति । इन्द्रवृद्धेति । मध्ये पुष्करवत् पिडकाभिः समाचितेन्द्रवृद्धा कथिता । पनसिकेति । कर्णस्याभ्यन्तरे शालूकवद्रुग्रुग्व्रणविशेषः । भोजे कर्णस्य समन्तत इति । तेन कर्णस्य बहिरपि भवतीत्याचक्षते । यदुक्तम्—'कफवातौ प्रकुपितौ मांसमाश्रित्य कर्णयोः । समन्ततः परिस्तब्धां कुरुतः पिडकां स्थिराम् । विषमां दाहसंयुक्तां विद्यात् पनसिकां तु ताम्' इति । विवृतेति । पित्तेनाऽधिकपाक्याद्विवृतमुखतया विवृतेति संज्ञा । यदुक्तं—'विवृतास्यां महादाहां पक्वोदुम्बरसन्निभाम् । सुमण्डलां पित्तकृतां विवृतानामिकां विदुः' इति । अन्धालजीति । अन्धालजी बहिर्वेध्ररहिता आन्तर्मुखी स्रावान्विता च । यदुक्तम्—'कफानिलौ श्रितौ स्नायुं पिडकां परिमण्डलाम् । दुष्टौ जनयतश्चैकामल्पपूयाऽल्पकण्डुराम् । आमोदुम्बरसंकाशां विद्यादन्धालजीं तु ताम्' इति । वराहदंष्ट्र इति । शूकरदंष्ट्राकारत्वेन वराहदंष्ट्रो व्रणविशेषः । स च विसर्पलिङ्ग इति केचित् । उक्तम्—'सदाहो रक्तपर्यन्तस्त्वक्पाको तीव्रवेदनः । कण्डूमान् ज्वरकारी च स स्यात् शूकरदंष्ट्रकः' इति । वल्मीकमिति । वल्मीको व्रणविशेषः, तेन वल्मीकवत् प्रचुरशिखरत्वमुच्छ्रितत्वं दूरावगाढमूलत्वं च प्रतिपद्यते । तथा हि—'ग्रीवांसकक्षाकरपाददेशे सन्धौ गले वा त्रिभिरेव दोषैः । ग्रन्थिः स वल्मीकवदक्रियाणां जातः क्रमेणैव गतः प्रवृद्धिम् । मुखैरनेकैः स्रुतितोदवद्भिर्विसर्पवत्सर्पति चोन्नताग्रैः । वल्मीकमाहुर्भिषजो विकारं निष्प्रत्यनीकं चिरजं विशेषात्' इति । कच्छपीति । मध्ये उन्नतत्वेन पृष्ठे निम्नतया च कच्छपिकासंज्ञा । यदुक्तम्—'ग्रन्थयः पञ्च वा षड् वा दारुणाः कच्छपोन्नताः । कफानिलाभ्यां पिडिका ज्ञेया कच्छपिका बुधैः' इति । तिलकालक इति । नीरुजानि तिलसदृशानि तानि तिलकालकशब्दवाच्यानि कफस्य शोषणत्वात् । यदुक्तम्—'नीलानि तिलमात्राणि नीरुजानि समानि च । वातपित्तकफोद्रेकात्तान् विद्यात् तिलकालकान्' इति । तत्रान्तरे रक्तोद्रेकादपि संभवति । यतः—'मारुतः पित्तमादाय कफरक्तं समाश्रितः । चिनोति तिलमात्राणि केचित्तु तिलकालकम्' इति । गर्दभीति । वर्तुलाकारत्वेनोन्नतत्वेन च पिडिकाविशेषो गर्दभीशब्दवाच्यः । तथाहि—'मण्डलं वृत्तमुत्सन्नं सरक्तं पिडकाचितम् । रुजाकरीं गर्दभिकां तां विद्याद्वातपित्तजाम्' इति । रकसा चेति । रकसा तु अन्यत्र कुष्ठभेदेषु दर्शिता क्षुद्रत्वादत्रापि लिखितेति न दोषः । तद्यथा—'कण्डून्विता या पिडका शरीरे संस्रावहीना रकसोच्यते सा ।' यवप्रख्येति । यववन्मध्ये स्थूला अन्ते निम्ना पिडका यवप्रख्येति कथिता । यदुक्तम्—'यवाकारा तु कठिना ग्रथिता मांससंश्रिता । पिडका श्लेष्मवाताभ्यां यवप्रख्येति सा मता' इति । विदारिकेति । विदारिकन्दवद्वृत्ता वर्तु-

---

१–'स्तोकं महत् व्याधकं इत्यमरः' पा० ।

लाकारा या पिडका सा विदारिकाशब्दवाच्या । यदुक्तम्—'विदारिकन्दवद्वृत्ता कक्षावङ्क्षणसन्धिषु । विदारिका भवेद्रक्ता सर्वजा सर्वलक्षणा' इति । कदर इति । कदरो बदरफलवदुन्नतः पादयोः पिडकाविशेषः । तथाहि 'शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः । ग्रन्थिः कोलवदुत्सन्नो जायते कदरं हि तत्' इति । कदरो हस्तेऽपि भवति भोजेन पठितत्वात् । यतः—'हस्तयोः पादयोश्चापि गम्भीरानुगतं खरम् । मांसकीलं जनयतः कुपितौ कफमारुतौ । सशल्यमिव तं देशं मन्यते तेन पीडितः । शर्कराकदरं केचिन्मन्यन्ते वातकण्टकम्' इति । मषक इति । माषवदुन्नतं कृष्णं यद्भवति स मषकसंज्ञ इति । माषकमिति नामान्तरमस्य । यदुक्तम्—'अवेदनं स्थिरं चैव यस्मिन् गात्रे प्रदृश्यते । माषवत् कृष्णमुत्सन्नं वातान्माषकमादिशेत्' इति । भोजे मृद्विति पाठात् कोमलं कथितं, यतः—'वातेरिते त्वचि यदा दूष्येते कफमेदसी । श्लक्ष्णं मृदु सवर्णं च कुरुतस्तं मषं वदेत्' इति । नीलिकेति । अतिनीलत्वान्नीलिका तेन कृष्णा नीला च कथिता, यदुक्तम्—'कृष्णामेव त्वचं गात्रे नीलिकां तां विनिर्दिशेत्' इति । अत एवान्यत्र पठितात् न्यच्छाद्भिन्ना, न्यच्छोऽत्र व्यङ्गभेदोऽवगन्तव्यः । तेन एतेषां स्थानवर्णाकृतिविलक्षणाद्व्यङ्ग एव भेदः । तथा—'श्यावो व्यङ्गो मुखाश्रितः' इत्यादि । 'गात्रे कृष्णा तु नीलिका' इत्यादि । 'रक्तपित्तान्वितो वायुस्त्वक्प्रदेशाश्रयो यदा । गर्भे यन्मण्डलं कृष्णं श्यावं न्यच्छं तमादिशेत्' इति भोजवचनेन च परस्परभेदो दर्शितः । जालगर्दभ इति । यः शोथो विसर्पवत् सर्पति स जालगर्दभशब्दवाच्यः । दाहज्वरकारकत्वेन ज्वालागर्दभ इति नामान्तरम् । यतः—'विसर्पवत् सर्पति यः शोथस्तनुरपाकवान् । दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्दभः' इति । भोजेऽपि विसर्प एवेति नामास्य । यदुक्तम्—'पित्तोत्कटास्त्रयो दोषा जनयन्ति त्वगाश्रयाः । श्यावं रक्तं तनुं शोथमपाकं बहुवेदनम् । विसर्पिणं सदाहं च तृष्णाज्वरसमन्वितम् । विसर्पमाहुस्तं व्याधिमपरे जालगर्दभम्' इति । इरिवेल्लीति । शिरोभागगता वर्तुलाकारा या पिडका सा इरिवेल्लीति शब्दवाच्या । यदुक्तं—'पिडकामुत्तमाङ्गस्थां वृत्तामुग्ररुजाज्वराम् । सर्वात्मिकां सर्वलिङ्गां जानीयादिरिवेल्लिकाम्' इति । जतुमणिरिति । अरुजं रक्तं लक्ष्मोदग्रमण्डलं च सहजत्वेन जतुमणिं प्राहुः । तथाहि—'सममुत्सन्नमरुजं मण्डलं कफरक्तजम् । सहजं लक्ष्म चैकेषां लक्ष्यो जतुमणिस्तु सः' इति । गुदभ्रंश इति । यत्र गुदस्य बहिर्निर्गमो भवति स गुदभ्रंशशब्दवाच्यः । यदुक्तम्—'प्रवाहणातिसाराभ्यां निर्गच्छति गुदं बहिः । रूक्षदुर्बलदेहस्य तं गुदभ्रंशमादिशेत्' इति । अभिरोहिणीति । कक्षाभागेषु प्रदीप्ताङ्गारसन्निभाः स्फोटा अभिरोहिणीशब्दवाच्याः । तथोक्तम्—'पित्तरक्तोत्कटा दोषाः प्रदीप्ताङ्गारसन्निभान् । कक्षाभागेषु कुर्वन्ति तीव्रदाहरुजाज्वरान् । मांसावदारणान् स्फोटांस्ते हन्युरनुपक्रमात् । पक्षाद्दशाहाद्वाऽब्दा सा ज्ञेया वह्निरोहिणी' इति । सन्निरुद्धगुद इति । शूकदोषोक्तमणिनिरुद्धप्रकाशवदत्रापि चर्मसंकोचात् संनिरुद्धगुदोऽभिहितः । यदुक्तम्—'वेगसंधारणाद्वायुर्विहतो गुदसंश्रितः । निरुणद्धि महत्स्रोतः सूक्ष्मद्वारं करोति च । मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पुरीषं तस्य गच्छति । संनिरुद्धगुदं व्याधिमेनं विद्यात्सुदारुणम्' इति । कोठ इति । वक्ष्यमाणोदर्दशीतपित्तयोर्भेदः कोठ इति प्रसिद्धः त्वग्दोषसामान्यात् । अत्र तु असम्यग्वमनयोगादिति निदानत्वेन क्षणिकोत्पादविनाशकत्वेनाल्पत्वाच्च लिखितः । यदुक्तम्—'वरटीदंष्ट्रसंकाशः कण्डूमान् लोहितोऽस्रकफपित्तात् । क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैः' इति । कुनख इति । कुत्सितं नखं यस्य पुरुषस्येत्यभिप्रायः । एतच्च वक्ष्यमाणचिप्परोगान्तरमिति मन्यन्ते केचित् । यतः 'तदेवाल्पतरैर्दोषैः कुनखः पुरुषो भवेत्' इति । तदेवेत्यनेन चिप्पमिति व्याख्यानयन्ति । अनुशयी तथेति । चरणस्योपरि सवर्णत्वेन पिडका भवति सोऽनुशयीशब्दवाच्यः । तथाहि—'गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थिताम् । पादस्यानुशयीं तां तु विद्यादन्तःप्रपाकिनीम्' इति । पद्मिनीकण्टकः प्रख्यो व्रणविशेषः तेन पद्मिनीकण्टकः कथितः । यदुक्तम्—'कण्टकैराचितं वृत्तं मण्डलं पाण्डुकण्डुरम् । पद्मिनीकण्टकप्रख्यं तदाख्यं कफवातजम्' इति । चिप्पमिति । नखमांसाऽधिष्ठितो दोषो दाहपाकौ करोति तच्चिप्पमिति रोगविशेषः कथितः यथा—'नखमांसमधिष्ठाय पित्तं वायुश्च देहिनाम् । कुरुते दाहपाकौ च तं व्याधिं चिप्पमादिशेत्' इति । तन्त्रान्तरे तु अङ्गुलीवेष्टमिति व्याख्यातः । अक्षतनामायं विकारः । यदुक्तं—'रोगोऽक्ष-

तथ्चर्मनखान्तरे स्यान्मांसास्रदूषी भृशदाहपाकः' इति। अलस इति । पादाङ्गुलिषु दुष्टकर्दमसंस्पर्शत्वेन यत् क्लिन्नभावं सोऽलसशब्दवाच्यः । यतः—'क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुजान्वितौ । दुष्टकर्दमसंस्पर्शादलसं तं विभावयेत्' इति । मुखदूषिकेति । यूनामेव मुखे पिडकाः सम्भवन्ति तेन मुखदूषिकेति । तेन मुखदूषिका कथिता । मुखकान्तिहरणत्वादस्य यौवनपिडकेति नामान्तरम् । यतः—'शाल्मलीकण्टकप्रख्या कफमारुतरक्तजा । युवानपिडका यूनां विज्ञेया मुखदूषिका' इति । कक्षेति नामतः प्रसिद्धा । सा तु पिडकाकारत्वेनोपलक्षिता । यतः—'बाहुपार्श्वांसकक्षेषु कृष्णान् स्फोटान् सवेदनान् । पित्तप्रकोपसंभूतां कक्षामित्यभिनिर्दिशेत्' इति । वृषणकच्छ्वेति । वृषणयोर्मलदूषितत्वात् या कण्डूर्भवति सा वृषणकच्छूः कथिता । यदुक्तम्—'स्नानोत्सादनहीनस्य मलो वृषणसंस्थितः । प्रक्लिद्यते यदा स्वेदात् कण्डूं जनयते तदा। ततः कण्डूयनात् क्षिप्रं स्फोटः स्रावश्च जायते । प्राहुर्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजाम्' इति । एषा च स्नानोत्सादनविशेषात् प्रायो वृषणभावित्वाद्विशिष्टचिकित्सायोगित्वाच्च कुष्ठोक्तकच्छूदोषाद्भिन्ना । गन्ध इति । कक्षोक्तस्फोटसदृशा एकैव पिडका भवति स गन्ध इति प्रसिद्धः । यदुक्तम्—'एकामेतादृशीं दृष्ट्वा पिडकां स्फोटसन्निभाम् । त्वग्गतां पित्तकोपेन गन्धमालां प्रचक्षते' इति । पाषाणगर्दभ इति । हनुसन्धिगतो यः कठिनशोथः स पाषाणगर्दभशब्दवाच्यः । तथाहि—'वातश्लेष्मसमुद्भूतः श्वयथुर्हनुसन्धिजः । स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्दभः' इति । राजिकेति । राजिकाकरपिडकानां सम्भवत्वेन राजिकाशब्दवाच्या । एषा मसूरिकाभेदादन्यैरन्यत्र प्रतिपादिता । तत्र कोद्रव इति नाम्ना प्रसिद्धा यथा—'कफवातादिसम्भूतः कोद्रवो नाम नामतः । लोको वदति पक्वाभः स च पाकं न गच्छति' इत्यादि । व्यङ्ग इति । मुखे श्यावं मण्डलाकारं यद्भवति तद्व्यङ्गशब्दवाच्यम्, मुखच्छाया इति लोके प्रसिद्धम् । यदुक्तम्—'क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः । मुखमागत्य सहसा मण्डलं विसृजत्यतः । नीरुजं तनुकं श्यावं मुखे व्यङ्गं तमादिशेत्' इति । अत्र सरक्तेन वातादिदोषेण चतुःप्रकारो व्यङ्गः कथितः । यद्यपि सपित्तेन वायुना व्यङ्गो निर्दिष्टस्तथाप्यत्र कफरक्तावप्यनुबन्धौ द्रष्टव्यौ; यतः—नीरुजत्वं कफेन विना न सम्भवति श्यावत्वं च शुक्लानुविद्धरक्तवर्णं तेन सरक्तदोषकारणं, तेन सर्वदोषोद्भवो व्यङ्ग इति तात्पर्यार्थः । विस्फोटाः क्षुद्ररोगेष्वित्यादि । क्षुद्ररोगगणनायां व्यङ्गविस्फोटा अपि लिखिताः पृथगन्यत्र चिकित्सार्थत्वात् तद्यथा—'अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्तजाः । क्वचित् सर्वत्र वा देहे विस्फोटा इति ते स्मृताः' इति । सकलविस्फोटेषु रक्तपित्तयोरव्यभिचारित्वं सूचितम्—यदुक्तम् भोजेन 'यदा रक्तं च पित्तं च वातेनानुगतं त्वचि । अग्निदग्धनिभान् स्फोटान् कुरुते सर्वदेहगान्' इति । अत एव माधवेनोक्तं यथा—'त्वचमाश्रित्य ते रक्तं मांसास्थीनि प्रदूष्य च । घोरान् कुर्वन्ति विस्फोटान् सर्वान् ज्वरपुरःसरान्' इति । तेनात्र विस्फोटा अष्टधा कथिताः, अष्टप्रकारं त्वचि सुबोधम् । क्षुद्ररुक्षु मसूरिकेत्यादि । क्षुद्ररोगाणां मसूराद्याकारत्वादत्रापि मसूरिका लिखिता । अन्यत्र चिकित्सानिमित्तेन प्रतिपादितेति न दोषः । मसूराकृतिः पिडका मसूरिका । लोके शीतलाशब्दवाच्या । यतः—'मसूरकुसुमानां च तुल्या तत् फलकोपमा । गात्रेषु वदने वापि पित्ताज्ज्ञेया मसूरिका' इति । पित्ताज्ज्ञेयेत्यत्र रक्तं पित्ताधिक्यं दर्शयति तेन सर्वदोषप्रकोपकत्वं ज्ञेयम् । यदुक्तम्—'कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः । दुष्टनिष्पावशाकाद्यैः प्रदुष्टैः पवनोदकैः । क्रुद्धग्रहेक्षणाच्चापि देशे दोषाः समुद्धताः । जनयन्ति शरीरेऽस्मिन्दुष्टरक्तेन सङ्गताः । मसूराकृतिसंस्थानाः पिडकाः स्युर्मसूरिकाः' इति । मसूरोपलक्षितत्वाद्दोषदूष्याणां संमूर्च्छनाविशेषेण तासां वर्णाकारान्तराणि संभवन्ति । यदुक्तं तन्त्रान्तरे—'पित्तं शोणितसंसृष्टं यदा दूषयति त्वचम् । तदा करोति पिडकाः सर्वगात्रेषु देहिनाम् । मसूरमाषमुद्गेभ्यस्तुल्याः कोलोपमाः क्वचित् । प्रवालसदृशाः काश्चित्काश्चिज्जम्बूफलोपमाः । लोहजालनिभाः काश्चिदतसीफलसन्निभाः । मसूरिकास्तु ता ज्ञेयाः पित्ताधिक्याद्बुधैरिति" । तस्याश्चतुर्दशभेदानाह—चतुर्दशप्रकारेणेत्यादि । तत्र दोषैः पृथक् त्रयो भेदाः, मिलितदोषद्वयेनापि त्रयः, संनिपातेनैकः, सप्तधातुगतत्वेन सप्तभेदाः । एवं चतुर्दश भवन्ति । अष्टमी त्वग्गतेत्यत्र त्वक्शब्देन रसोऽभिधीयते धातुगतप्रस्तावात् । अतएवाह कश्चित्—'त्वग्रक्तमांसमेदांसि' इत्यादि । शेषं सुगमम् । एवं षष्टिसंख्याः क्षुद्ररोगा ईरिताः कथिताः ॥ ९१-९९ ॥

गू०—शर्करार्बुदादयः षष्टिसंख्याः क्षुद्ररोगा भवन्तीति सम्बन्धः। ननु निदाने सुश्रुतेन चतुश्चत्वारिंशत् क्षुद्ररोगा गणिताः कथमत्र षष्टिः? उच्यते, विस्फोटकमसूरिकयोर्मिलित्वा भवन्तीति न दोषः। श्रद्धा कस्यचित्तन्त्रस्येदं मतम् ॥ ९१-९९ ॥

गू०—विसर्परोगसंख्यामाह—

**विसर्परोगो नवधा वातपित्तकफैस्त्रिधा ॥ १०० ॥**

**त्रिधा स द्वन्द्वभेदेन सन्निपातेन सप्तमः।**

**अष्टमो वह्निदाहेन नवमश्चाभिघातजः ॥ १०१ ॥**

दी०—विसर्पेति। विसर्पणाद्विसर्पः। तेन सर्वतो विविधं विसर्पणादिति भावः। यदुक्तं चरके—'विविधं सर्पति यतो विसर्पस्तेन स स्मृतः। परिसर्पोऽथवा नाम्ना सर्वतः परिसर्पणात्' इति। नवधेत्यत्र नवप्रकारः तेन वातजः, पित्तजः, कफजः, वातपित्तजः, वातश्लेष्मजः श्लेष्मपित्तजः, सन्निपातजः, अग्निदाहजः, आघातज इति। ननु माधवेन सप्तविधो विसर्प उक्तः, यथा—'लवणाम्लकटूष्णादिसेवनाद्दोषकोपतः। विसर्पः सप्तधा ज्ञेयः सर्वतः परिसर्पणात्' इत्यादिना, तत्कथमत्र नवधा प्रोक्तः? उच्यते—माधवेन तु दोषकारणत्वात् क्षतजो विसर्पः पित्तजे दर्शितः, तद्यथा—'बाह्यहेतोः क्षतात् क्रुद्धः सरक्तं पित्तमीरयन्। विसर्पं मारुतः कुर्यात् कुलत्थसदृशैश्चितम्। स्फोटैः शोफज्वररुजादाहाढ्यं श्यावशोणितम्' इति। भोजेऽप्युक्तम्—'शस्त्रप्रहारैस्तैस्तैस्तु व्यालदन्तनखैरपि। क्षते वाप्यथवा भग्ने बहुदोषस्य देहिनः। रक्तं पित्तं च कुपितं व्रणमाशु प्रकुप्यति। कुरुतस्ते समेते तु व्रणशोथं सुदारुणम्। आचितं व्रणविस्फोटैः कृष्णैः पीडकसंनिभैः। पित्तविसर्पवल्लिङ्गं तस्य शेषं विनिर्दिशेत्' इति। तथा चरके त्वस्य अन्तर्जबहिर्जभेदेन प्रतिपादितत्वाच्च। तथाहि—'मर्मोपघातात् संमोहादयनानां विघट्टनात्। तृष्णातियोगाद्वेगानां विषमं च प्रवर्तनात्। विद्यादिसर्पमन्तर्जमाशु चाग्निबलक्षयात्। अतो विसर्पं यद्बाह्यमन्यद्विद्यात् स्वलक्षणम्' इति। अग्निदाहजोऽपि दोषप्रकोपलक्षणत्वादन्तर्गत एव। यतः—'अग्निना कोपितं रक्तं भृशं जन्तोः प्रकुप्यति। ततस्तेनैव वेगेन पित्तमस्याप्युदीर्यते' इत्यादिनात्र पित्तविसर्पान्तर्गतोऽग्निदाहविसर्पो बोद्धव्यः। अत्र तु गणनासंग्रहत्वेन पृथग्दर्शिताविति न दोषः। तन्त्रान्तरे द्वन्द्वजविसर्पाणां नामान्तराणि प्रवदन्ति। तद्यथा—'वातपित्ताग्निवीसर्पः कथितो ग्रन्थिसंज्ञकः। कफवातात् पित्तकफात् कर्दमाख्यो भिषग्वरैः' इति ॥ १०० ॥ १०१ ॥

गू—वातादिभिः नवधा विसर्परोगः कथित इति योजना। ननु निदाने विसर्पः सप्तधा कथितः 'विसर्पः सप्तधा ज्ञेयः सर्वतः परिसर्पणात्' अत्र नवधा इति कथं? उच्यते, अत्र अग्निजसंघातजौ अधिकौ तन्त्रान्तरोक्तत्वात् ॥ १०० ॥ १०१ ॥

गू०—उदर्दशीतपित्ताम्लपित्तवातरक्तसंख्यामाह—

**तथैकः श्लेष्मपित्ताभ्यामुदर्दः परिकीर्तितः।**

**वातपित्तेन चैकस्तु शीतपित्तामयः स्मृतः ॥१०२॥**

**अम्लपित्तं त्रिधा प्रोक्तं वातेन श्लेष्मणा तथा।**

**तृतीयं श्लेष्मवाताभ्यां वातरक्तं तथाष्टधा ॥ १०३ ॥**

**वाताधिक्येन पित्ताच्च कफाद्दोषत्रयेण च।**

**रक्ताधिक्येन दोषाणां द्वन्द्वे न त्रिविधः स्मृतः॥१०४**

दी०—तथेति। तथेत्यनेन दोषत्रयजन्यत्वमुक्तमनयोः। यदुक्तम्—'शीतमारुतसंस्पर्शात् प्रदुष्टौ कफमारुतौ। पित्तेन सह संभूय बहिरन्तर्विसर्पतः' इत्यादिना। अत्र तु पित्तानुबन्धयोः कफवातयोराधिक्यविशेषेण दर्शित इति न दोषः। यतः—'वाताधिकं शीतपित्तमुदर्दस्तु कफाधिकः' इत्यादि। उदर्द एव शीतपित्तामयः प्रतिपादितः। अत्राचार्येण गणनामात्रेणापि पृथक् लिखितः। यदुक्तम्—'वरटीदष्टसंस्थानः शोथः संजायते बहिः। सकण्डूतोदबहुलश्छर्दितोदविदाहवान्। उदर्दमिति तं विद्याच्छीतपित्तमथापरे' इति। विदाहाद्यम्लगुणोद्रिक्तं पित्तमम्लपित्तमित्युच्यते। यतः—विदाहादम्लगुणः पित्तमम्लपित्तविदग्धमम्लतामुपैतीत्यादिना तिक्ताम्लवान्तत्वाच्च। अतएवाम्लपित्तं प्रधानं वातकफावप्यत्रानुगतौ गौरवोद्गारचर्मादिना ज्ञेयौ। तथाहि—'अविपाकक्लमोत्क्लेशतिक्ताम्लोद्गारगौरवैः। हृत्कण्ठदाहारुचिभिरम्लपित्तं वदेद्भिषक्' इति। केचिदम्लपित्ते मिलिते कफपित्ते सामान्यं कर्तृत्वं स्थितमित्याहुः। 'करचरणदाहमौष्ण्यं महतीमरुचिं ज्वरं च कफपित्तम्। जनयति कण्डूमण्डलपिडकाशतनिचितगात्ररोगचयम्' इति त्रैविध्यमस्य प्रसिद्धम्। एके 'अम्लपित्तं द्विधा प्रोक्त-

मूर्ध्वाधो भेदतस्तथा' इति पठन्ति व्याख्यानयन्ति च। तत्र प्रयात्यधो वा विविधप्रकारमित्यादिना कृतार्थत्वाद्वातहरितपीतनीलकृष्णमित्यादिवाक्येनोर्ध्वमिति । वातरक्तमिति। कुपितो वातः रक्तं च कुपितं वातरक्तमित्युच्यते। वातस्य प्राबल्यात् प्राधान्याच्च वातरक्तव्यपदेशः, नतु रक्तवातः। यतः—'एकेनैव स्वहेतुवृद्धेन वातेन विमानस्थं रक्तं दूषितं एवं रक्तं स्वहेतुवृद्धं स्वमानस्थं वातदूषितं न।' चरकेऽप्युक्तम्—'वायुः प्रवृद्धो वृद्धेन रक्तेनावारितः पथि। क्रुद्धः संदूषयेद्रक्तं तज्ज्ञेयं वातशोणितम्' इति। करपादगं रोगं तं वातरक्तमाहुरेके। यतः 'पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि। आखोर्विषमिव क्रुद्धं तद्देहमुपसर्पति' इति। तद्वातरक्तं चरकेण द्विविधमुक्तं उत्तानगम्भीरभेदात्। तदुक्तम्—'उत्तानमथ गम्भीरं द्विविधं वातशोणितम्। त्वङ्मांसाश्रयमुत्तानं गम्भीरं त्वन्तराश्रयम्' इति। अष्टधा अष्टप्रकारस्तद्यथा—वाताधिक्येनैको भेदः, आधिक्यमत्र रक्तदोषात्। पित्ताधिक्याद्द्वितीयः। कफादिति। कफाधिक्यात् तृतीयः। दोषत्रयेण चतुर्थः, संनिपातेनेत्यर्थः। रक्ताधिक्येन पञ्चमः। एतच्चारम्भकरक्तादृक्तान्तरं बोद्धव्यम्, यतो रक्तमपि रक्तान्तरदूषकम्। यदुक्तं दुष्टरक्तलक्षणे—'पित्तवद्रक्तेनातिदुष्टं चेति न्यायाच्चरितार्थः। दोषाणां द्वन्द्वेनेति। दोषाणां वातपित्तकफानां द्वन्द्वेन द्विदोषमिलितेन त्रयो भेदा इत्यष्टधा पूर्यते ॥ १०२–१०४ ॥

**गू०**—उदर्द एकप्रकारः, शीतपित्त एकः, आम्लपित्तं त्रिविधं, वातरक्तमष्टधा इत्येषां संख्या ॥ १०२–१०४ ॥

**गू०**—अथ वातव्याधिसंख्यामाह—

**अशीतिर्वातजा रोगाः कथ्यन्ते मुनिभाषिताः।**
**आक्षेपको हनुस्तम्भ ऊरुस्तम्भः शिरोग्रहः ॥१०५॥**
**बाह्यायामोऽन्तरायामः पार्श्वशूलं कटिग्रहः।**
**दण्डापतानकः खल्ली जिह्वास्तम्भस्तथार्दितम् ॥१०६॥**
**पक्षाघातः क्रोष्टुशीर्षो मन्यास्तम्भश्च पङ्गुता।**
**कलायखञ्जता तूनी प्रतितूनी च खञ्जता ॥१०७॥**
**पादहर्षो गृध्रसी च विश्वाची चापबाहुकः।**
**अपतानो व्रणायामो वातकण्टोऽपतन्त्रकः ॥१०८॥**
**अङ्गभेदोऽङ्गशोषश्च मिन्मिनत्वं च कल्लता।**
**प्रत्यष्ठीलाऽष्ठीलिका च वामनत्वं च कुब्जता ॥१०९॥**
**(अङ्गभङ्गोऽङ्गशूलं च संकोचस्तम्भरूक्षता।)**
**अङ्गपीडाङ्गविभ्रंशो विड्ग्रहो बद्धविट्कता ॥११०॥**
**मूकत्वमतिजृम्भा स्यादत्युद्गारोऽन्त्रकूजनम्।**
**वातप्रवृत्तिः स्फुरणं शिराणां पूरणं तथा ॥ १११ ॥**
**कम्पः कार्श्यं श्यावता च प्रलापः क्षिप्रमूत्रता।**
**निद्रानाशः स्वेदनाशो दुर्बलत्वं बलक्षयः ॥११२॥**
**अतिप्रवृत्तिः शुक्रस्य कार्श्यं नाशश्च रेतसः।**
**अनवस्थितचित्तत्वं काठिन्यं विरसास्यता ॥११३॥**
**(कषायवक्त्रताध्मानं प्रत्याध्मानं च शीतता।**
**रोमहर्षश्च भीरुत्वं तोदः कण्डूरसाज्ञता ॥११४॥)**
**शब्दाज्ञता प्रसुप्तिश्च गन्धाज्ञत्वं दृशः क्षयः।**

**दी०**—अशीतिर्वातजा रोगा इत्यादि। ननु वातेन जनिता वातजा रोगाः। यद्येवं तर्हि ज्वरादिषु व्यभिचारः, अन्यथा वात एव रोग इति चेत्तर्हि स्वस्थेऽपि प्रसङ्गः। तस्मात् वातरोगाः किमिति प्रतिपादिताः? उच्यते—चरके द्विविधा रोगा उक्ताः, सामान्यजा नानात्मजाश्च। तत्र सामान्यजा वातादिभिः समस्तैर्व्यस्तैर्वा जन्यन्ते यथा ज्वरादयः। नानात्मजा ये नियतैकदोषजनिता यथा आक्षेपकादयो वातेनैव जन्यन्ते न स्वतन्त्रेण पित्तकफेन वा। तथा उषचोषादयः पित्तेनैव जन्यन्ते न कफेन न वातेन वा। तथा तन्द्रातृष्णादयः कफेनैव जन्यन्ते न वातेन न पित्तेनेति। यथा वक्ष्यमाणवातविकारादीनां स्वरूपमेवोक्तं पूर्वरूपं न तु ज्वरादिविशिष्टमन्यत्। तदुक्तम्—'अव्यक्तलक्षणं तेषां पूर्वरूपमिति स्मृतम्। आत्मरूपं तु यद्व्यक्तमपायो लघुता पुनः' इत्यादिना। एवमत्रापि न दोषः। अशीतिसंख्यया विवरणमाह—आक्षेपक इत्यादि। आक्षेपणाच्चालनादाक्षेपः, गात्रचालन इत्यर्थः। स च हस्त्यारूढस्येव गात्रं चालयतीत्यभिप्रायः। यदुक्तम्—'यदा तु धमनीः सर्वाः कुपितोऽभ्येति मारुतः। तदाऽऽक्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः। मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृतः' इति। हनुस्तम्भो हनुग्रहः कथितः। स द्विविधः विवृतास्यः संवृतास्य इति। यदुक्तम्—'जिह्वानिर्लेखनाच्छुष्कभक्षणादभिघाततः। कुपितो हनुमूलस्थः स्रंसयित्वाऽनिलो हनुम्। करोति विवृतास्यत्वमथवा संवृतास्यताम्' इत्यादि। ऊरुस्तम्भ

१—'मवगाढ' पा०।

१–'गद्गदः' 'विक्लता' इति पाठभेदौ। २–प्रक्षिप्तमिदम्।

इति। कुपितो वात ऊरुस्तम्भं करोतीत्यूरुस्तम्भः कथितः। तथाहि—'तदा स्तभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ। परकीयाविव गुरू स्यातामिति भृशव्यथौ' इति सुश्रुतेन वातस्य प्राधान्यत्वान्महावातव्याधौ पठितस्तेनाऽत्रापि संग्रहः। अन्यत्र चिकित्सार्थत्वेन पृथग् लिखितः। शिरोग्रह इति। शिरः स्तब्धमिव भवतीति शिरोग्रहः। माधवेन तु रक्ताश्रितवायुना शिरोग्रहः प्रतिपादितः। यदाह—'रक्तमाश्रित्य पवनः कुर्यान्मूर्धधराः सिराः। रूक्षाः सवेदनाः कृष्णाः सोऽसाध्यः स्याच्छिरोग्रहः' इति। एके शिरोग्रहस्थाने शिरःकुण्डनमिति पठन्ति। तत्र कुण्डनमन्तःप्रवेशो वक्रत्वं वा, धातूनामनेकार्थत्वात्। तथाहि—'शिरोनासाक्षिजत्रूणां ग्रीवायाश्चापि कुण्डनम्' इति वचनात्। सिराग्रह इत्यपरे त्वाहुः स तु सिराणां पूरणमित्यग्रे वक्ष्यमाणत्वादत्रापि पुनरुक्तिभयेन नास्माभिः स्वीकृतः। बाह्यायामोऽन्तरायाम इति। आयामो धनुर्वदानमनम्। यदुक्तं—'बाह्यस्नायुप्रतानस्थो बाह्यायामं करोति च। आभ्यन्तरं धनुरिव यदा नमति मानवः। तदाऽस्याभ्यन्तरायामं कुरुते मारुतो बली' इति। बाह्यायामे पृष्ठेन नतं आभ्यन्तरायामे क्रोडेन नतमिति। पार्श्वशूलमिति। कोष्ठाश्रितवातः पार्श्वशूलं करोतीति 'हेतुस्थानविशेषाच्च भवेद्रोगविशेषकृत्' इत्यादिवचनात्। तथाहि—'तत्र कोष्ठाश्रिते दुष्टे निग्रहो मूत्रवर्चसोः। ब्रध्नहृद्रोगगुल्मार्शः पार्श्वशूलं च मारुते' इति। कटिग्रह इति। कटिस्तम्भत्वेन वेदनाविशेषः। अत्रापि 'हेतुस्थानविशेषाच्च भवेद्रोगविशेषकृत्' इत्यादिना। दण्डापतानक इति। यो दण्डवद्गात्रं स्तम्भयति स च दण्डापतानकः। यदुक्तं चरके—'पाणिपादशिरःपृष्ठश्रोणीः स्तभ्नाति मारुतः। दण्डवत् स्तब्धगात्रस्य दण्डकः सोऽनुपक्रमः' इति। स्तम्भसामान्याद्धनुस्तम्भोऽप्यस्यैव भेद इति केचित्। खल्लीति। पादजङ्घाप्रभृतिषु शूलं परिवर्तनता च भवतः सा खल्लीशब्दवाच्या। यतः—'खल्ली तु पादजङ्घोरुकरमूलावमोटनी' इत्यादि। जिह्वास्तम्भ इति। यो वाग्वाहिनीसिरासंस्थोऽन्नपानवाक्येष्वनीशतां करोति तत्र जिह्वास्तम्भ इति संज्ञा। यदुक्तम्—'वाग्वाहिनीसिरासंस्थो जिह्वां स्तम्भयतेऽनिलः। जिह्वास्तम्भः स तेनान्नपानवाक्येष्वनीशता' इति। अर्दित इति। मुखस्यार्धवक्रत्वेनोपलक्षितोऽर्दित इति प्रसिद्धः। तथाहि—'अर्दयत्यनिलो वक्त्रमर्दितं जनयत्यतः। वक्रीभवति वक्त्रार्धं ग्रीवाचाप्यपवर्तते' इत्यादि। पक्षाघात इति। पक्षाघात एकाङ्गविकारः। एकपक्षविघातमित्युक्तत्वात्। यतः—'गृहीत्वार्धं तनुर्वायुः सिरास्नायू विशोष्य च। पक्षमन्यतरं हन्ति सन्धिबन्धान् विमोक्षयन्। कृत्स्नार्धकायस्तस्य स्यादकर्मण्यो विचेतनः। एकाङ्गरोगं तं केचिदन्ये पक्षवधं विदुः' इति। क्रोष्टुशीर्षमिति। ऊरुजङ्घयोः सन्धी स्थूले कृत्वा शृगालमस्तकवत् शोथान्वितो भवति तेन क्रोष्टुशीर्षमिति संज्ञा। लोके गैरुव[1]शब्दवाच्यः। तदुक्तम्—वातशोणितजः शोथो जानुमध्ये महारुजः। ज्ञेयः क्रोष्टुकशीर्षस्तु स्थूलः क्रोष्टुकशीर्षवत्' इति। वातशोणिताभ्यां जातो वातशोणितजः। न पुनर्वातरक्तेन व्याधिना जनित इत्यभिप्रायः। मन्यास्तम्भ इति। ग्रीवामुभयतो द्वे मन्ये मर्मणी तयोः स्तम्भो निश्चलत्वम्। यतः—'दिवास्वप्नासनस्थानविकृतोर्ध्वनिरीक्षणात्। मन्यास्तम्भं प्रकुरुते स एव श्लेष्मणावृतः' इति। पङ्गुतेति। पङ्गुता खञ्जभेदत्वेन द्वयोः सक्थ्नोर्वधात्पङ्गुः, एकसक्थिवधात् खञ्ज इति। वधश्चात्र गमनादिक्रियानाशः। तद्यथा—'वायुः कट्याश्रितः सक्थ्नः कण्डरामाक्षिपेद्यदा। खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्वधात्' इति। कलायखञ्जेति। यः पादविक्षेपं कुर्वन् पुरुषः कम्पायमानः खञ्जन्निव गच्छति स कलायखञ्जेति शास्त्रे रूढिसंज्ञा। यदुक्तं—'प्रक्रामन् वेपते यस्तु खञ्जन्निव च गच्छति। कलायखञ्जं तं विद्यान्मुक्तसन्धिप्रबन्धनम्' इति। तूनी प्रतितूनी चेति। स्त्रीपुंसोर्गुह्यस्थानमधिकवेदनाविशेषत्वे भिन्दतीव तूनीशब्दवाच्या, सैव प्रतिलोमेन प्रधावनात् प्रतितूनी च कथिता। तथाहि—'अधो या वेदना याति वर्चोमूत्राशयोत्थिता। भिन्दतीव गुदोपस्थं सा तूनी नाम नामतः' इति। प्रतितूनी यथा—'गुदोपस्थोत्थिता या तु प्रतिलोमं प्रधाविता। वेगैः पक्वाशयं याति प्रतितूनीति सोच्यते' इति। खञ्जतेति। खञ्जता पङ्गुविशेषे पूर्वं दर्शिता। पादहर्ष इति। यत्र रोमाञ्चप्रायोऽतिसुप्तता मिणिमिणितिवद्वेदनाविशेषः स पादहर्ष इति। यदुक्तं—'हृष्येते चरणौ यस्य भवेतां चापि सुप्तकौ। पादहर्षः स विज्ञेयः कफवातप्रकोपतः' इति। गृध्रसी चेति। गृध्रसीति प्रसिद्धा लोके राधिनाशब्द

१—गौरुव।

वाच्या इति केचित् । तद्यथा—'स्फिक्पूर्वा कटिपृष्ठोरुजानुजङ्घापदं क्रमात् । गृध्रसी स्तम्भरुक्तोदैर्गृह्णाति स्पन्दते मुहुः' इति । गृध्रसीद्वयमाहुरेके । एका केवलवातजनिता । अपरा वातकफलक्षणयुक्तेति । अतएव 'वाताद्वातकफात् तन्द्रा गौरवारोचकान्विता' इत्यादिवचनात् । विश्वाची चापबाहुक इति विश्वाची चैव बाहुगता गृध्रसीवत् । तथाहि—'तलं प्रत्यङ्गुलीनां या कण्डरा बाहुपृष्ठतः । बाह्वोः कर्मक्षयकरी विश्वाचीति निगद्यते' इति । बाह्वोर्द्विवचनक्रमापेक्षया कदाचित् कस्मिंश्चिद्बाहौ भवतीति भुजस्यापकर्षत्वादपबाहुक इति । अंसशोषक इति वा आहुः । तदुक्तम्—'अंसदेशस्थितो वायुः शोषयित्वांसबन्धनम् । शिराश्चाकुञ्च्य तत्रस्थो जनयत्यपबाहुकम्' इति । केवलं वातजनितोंऽसशोषकः कफवातजनितोऽपबाहुक इति सुश्रुतवचनाद्भिन्नत्वमनयोः । अपतानक इति । आक्षेपस्यावस्थाविशेषोऽपतानको भवति । 'सोऽपतानकसंज्ञो यः पातयत्यन्तरान्तरा' इत्यादिवचनात् । य आक्षेपकोऽन्तरा अन्तरा पातयति सोऽपतानक इति तात्पर्यार्थः । सुश्रुते चिकित्सार्थं पृथगुपात्तत्वात् । चरके तु बहुरूपत्वाद्भिन्न एव । यतः—'दृष्टिं संस्तभ्य संज्ञाश्च हत्वा कण्ठेन कूजति । हृदि मुक्ते नरः स्वास्थ्यं याति मोहं वृते पुनः । वायुना दारुणं प्राहुरेके तदपतानकम्' इति । व्रणायामोऽपि आक्षेपकभेदः आघातजत्वात् । यतः—'कफपित्तान्वितो वायुर्वायुरेव च केवलः । कुर्यादाक्षेपकं त्वन्यं चतुर्थमभिघातजम्' इति । चरकेण आक्षेपक एव दण्डापतानकोऽभ्यन्तरायामो बहिरायाम आगन्तुक इति चतुर्विध उक्तस्तेनाभिघातेन व्रणकरत्वादत्र व्रणायामः कथितः । वातकण्टक इति । विषमपदन्यासत्वेन कुपितो वायुर्गुल्फे वेदनां जनयति तं वातकण्टकमाहुः । तदुक्तम्—'रुक् पादे विषमे न्यस्ते श्रमाद्वा जायते यदा । वातेन गुल्फमाश्रित्य तमाहुर्वातकण्टकम्' इति । अयमेवान्यत्र 'खुड्डवात' इत्युक्तः । अपतन्त्रक इति । अपतन्त्रकोऽप्याक्षेपावस्थायाम् । तथाच **दृढबलः**—'क्रुद्धः स्वैः कोपनैर्वायुः स्थानादूर्ध्वं प्रपद्यते । पीडयन् हृदयं गत्वा शिरः शङ्खौ च पीडयन् । धनुर्वन्नमयेद्गात्राण्याक्षिपेन्मोहयेत्तदा । स कृच्छ्रादुच्छ्वसेच्चापि स्तब्धाक्षोऽथ निमीलकः । कपोत इव कूजेच्च निःसंज्ञः सोऽपतन्त्रकः' इति । स्वैरित्यादिना क्रुद्धो वायुः स्थानादूर्ध्वं गत्वाऽपतन्त्रकं करोति इति संबन्धः । अङ्गभेद इति । अङ्गभेदो वेदनाविशेषत्वेन दर्शितः । यतः—'हेतुस्थानविशेषाच्च भवेद्रोगविशेषकृत्' इत्यादिवचनात् । यथा कुक्षिशूले नामानुरूपैः कीलनिघातवेदनाविशेषश्चोत्पद्यते तदा तोदभेदादिभिरपि पीडाविशेष एव गम्यते । तदुक्तम्–'स्थाननामानुरूपैश्च लिङ्गैः शेषान् विनिर्दिशेत्' इत्यादि । अङ्गशोष इति । अङ्गादीनां बाहुमुखादीनां शोषः अङ्गशोषः । मिन्मिनत्वं इति । मिन्मिनं सानुनासिकवचनम् । कल्लतेति । कल्लतात्र गद्गदवचनत्वेन प्रतिपादिता तत्र लुप्तपदव्यञ्जनाद्यभिधायिनी कल्लताशब्दवाच्या । वक्ष्यमाणं मूकत्वमतद्विद एव । तत्र यज्जिह्वागतशब्दवाहिनी नाम धमनी तस्याः कार्यं । तथाहि—'आवृत्तवायुः सकफो धमनी शब्दवाहिनी । नरान्करोत्यक्रियकान् मूकमिन्मिनगद्गदान्' इति । प्रत्यष्ठीलाष्ठीलिका चेति । नाभेरधस्तात् दीर्घवर्तुलपाषाणवत् यो रोगः सोऽष्ठीलाशब्दवाच्यः । वाताष्ठीलेत्यत्र रूढिः । तथाचोक्तम्—'नाभेरधस्तात् संजातः संचारी यदि वाऽचलः । अष्ठीलावद्घनो ग्रन्थिरूर्ध्वमायत उन्नतः । वाताष्ठीलां विजानीयाद्बहिर्मार्गावरोधिनीम् । एतामवरुजायुक्तां वातविण्मूत्ररोधिनीम् । प्रत्यष्ठीलामिति वदेज्जठरे तिर्यगुत्थिताम्' इति । वामनत्वमिति । दुष्टशुक्रारब्धत्वाद्गर्भावर्ते यथा युगलैकांगुलीबह्वंगुलादिकं भवति तथाऽयमपि वामनयोगः । कुब्जतेति । कुब्जत्वं च शिरागतवातविशिष्टत्वात्केचिदायामान्तरगरु इत्याहुः । पृष्ठादिनतत्वात् । 'कुर्यात् सिरागतः शूलं सिराकुञ्चनपूरणम् । स बाह्याभ्यन्तरायामं खल्लीं कुब्जत्वमेव च' इति । अङ्गपीडा ह्यङ्गविभ्रंशतामयः । मेदोहेतुस्थानविशेषत्वेन तदनुरूपाद्बोद्धव्या । अन्तरायामं खल्लीं कुब्जत्वमेव मन्यन्ति अङ्गपीडाद्यङ्गविभ्रंशम् । तस्य सप्तभेदाः स्थानविशेषत्वेन तदनुरूपा बोद्धव्याः । तत्राङ्गसंकोचः स्तम्भोऽङ्गस्य रूक्षता । रूक्षतापीडाशूलादीनामपि परस्परं भेदोऽस्तीत्यत्रावगन्तव्यम् । विड्ग्रहो बद्धविट्कता चेति । विड्ग्रहः पुरीषस्यानिर्गमः । बद्धविट्कता पुरीषस्य कर्कशता । पक्वाशयकुपितवातगुणत्वात् । यतः—'ग्रहो विण्मूत्रवातानां शूलाध्मानाश्मशर्करा' इत्यादि । मूकत्वमिति । मूकत्वं च मिन्मिनत्वे कथितम् । अतिजृम्भता च वातदुष्टत्वात् । 'जृम्भात्यर्थं समीरणात्' इत्यादिना । अत्युद्गारोऽपि वातविकारजनितत्वादत्र लिखितः । आमाशयः कुपितोऽत्युद्गारं करोतीत्यर्थः । 'हृत्पार्श्वोदरहृ-

चाभितृष्णोद्गारविसूचिकाः। कासः कण्ठास्यशोषश्च वातश्चामाशये स्थितः' इति। अन्त्रकूजनमिति। पक्वाशयगतवायुना भवति पक्वाशयस्थोऽन्त्रकूजनमित्यादिवचनात्। वातप्रवृत्तिरिति। गदेन वातस्यातिनिर्गमः स्फुरणमिवाङ्गस्फुरणम्, अङ्गस्पन्दनमित्यर्थः। सिराणां पूरणमिति। सिरागतो वायुः सिराणां पूरणं करोति। अतएव 'कुर्यात्सिरागतः शूलं सिराकुञ्चनपूरण'मिति वचनात्। पूरणं स्थूलत्वम्। यदुक्तं तन्त्रान्तरे—'सुप्तास्तन्व्यो बृहत्यो वा सिरा वाते शिरागते' इति। कम्प इति। सर्वाङ्गस्य शिरसश्च कम्पत्वेन वेपथुसंज्ञः। यदुक्तम्—'सर्वाङ्गकम्पः शिरसो वायुर्वेपथुसंज्ञक' इति। 'शिरसः' इत्यवयवोपलक्षणम्। तेन हस्तपादयोरपि कम्पः स्यात्। कार्श्यमिति। कृशता शरीरस्य वातप्रकृतिजत्वात्। एके कृशस्थाने कार्श्यमिति पठन्ति। तत्र सर्वसंमता श्यावता चेति शुक्लानुबद्धकृष्णवर्णत्वं श्यावताशब्दवाच्यम्। पित्तानुबद्धवातविकृतत्वात्। प्रलाप इत्यसंबन्धभाषणं यथोन्मादे प्रबलवातकार्यत्वात्। क्षिप्रमूत्रेति। क्षिप्रमूत्रता शीघ्रमूत्रता। यदुक्तम्—'मारुते विगुणे बस्तौ मूत्रं सम्यक् प्रवर्तते। विकारा विविधाश्चात्र प्रतिलोमे भवन्ति हि' इति। विविधग्रहणं क्षिप्रमूत्रतायां ग्रहणाय। निद्रानाश इति। निद्रानाशोऽप्यनिद्रता। तेनाल्पनिद्रा बोद्धव्या। स्वेदनाश इति। स्वेदस्याप्यनिर्गमः वायोः शोषकत्वात्, दुर्बलत्वं बलक्षयश्चेति। रसादीनां शुक्रान्तानां यत् परं तेजस्तत् खल्वोजस्तदेव बलमित्युच्यते। तस्य बलस्याल्पत्वं दुर्बलत्वं तस्यापि क्षयो बलक्षय इति। अत्र वातहेतुरिति प्रयोजकत्वात्। अतिप्रवृत्तिः शुक्रस्य कार्श्यं नाशश्च रेतस इति। शुक्रस्य कार्श्यं च क्षीणत्वं नाशश्चेति स्वमानादित्यर्थः। अत्रापि शुक्रगतवातविकृतत्वात्। यदुक्तम्—'क्षिप्रं मुञ्चति बध्नाति शुक्रं गर्भमथापि वा। विकृतिं जनयेच्चापि शुक्रस्थः कुपितोऽनिलः' इति। अनवस्थितचित्तत्वमित्यत्रापि वातकारणत्वं सिद्धम्। काठिन्यमिति। काठिनत्वमङ्गादीनामिति भावः। विरसास्यता मुखवैरस्यम्। [शब्]दाज्ञता बधिरत्वम्। प्रसुप्तिश्च त्वग्विषये स्पर्शा[ज्ञ]ता। गन्धाज्ञत्वमिति। नासाविषयाज्ञता। दृशः क्षय[इ]ति दृष्टेर्नाशः। अत्रापि श्रोत्रादिगतवातकारणं बोद्धव्यम्। यदुक्तम्—'श्रोत्रादिष्विन्द्रियवधं कुर्यात्क्रुद्धः समीरणः' इति। श्रोत्रत्वक्चक्षुर्घ्राणरसनेन्द्रियाणां वधो विनाशः तेन स्वविषयेष्वग्रहणशक्तिरित्यर्थः। एवमशीतिर्वातरोगाः प्रतिपादिताः॥ १०५–११४॥

गू०—मुनिभाषिता अशीतिर्वातजा रोगा मया शार्ङ्गधरेण प्रोच्यन्ते ते त्वाक्षेपकादयः। तेषां लक्षणं तु निदानाज्ज्ञेयम्। इति वातरोगाः॥ १०५–११४॥

गू०—अथ पित्तरोगसंख्यामाह—

**अथ पित्तभवा रोगाश्चत्वारिंशदिहोदिताः॥११५॥**
**धूमोद्गारो विदाहः स्यादुष्णाङ्गत्वं मतिभ्रमः।**
**कान्तिहानिः कण्ठशोषो मुखशोषोऽल्पशुक्रता ११६**
**तिक्तास्यताम्लवक्त्रत्वं स्वेदस्रावोऽङ्गपाकता।**
**क्लमो हरितवर्णत्वमतृप्तिः पीतगात्रता॥ ११७॥**
**रक्तस्रावोऽङ्गदरणं लोहगन्धास्यता तथा।**
**दौर्गन्ध्यं पीतमूत्रत्वमरतिः पीतविट्कता॥११८॥**
**पीतावलोकनं पीतनेत्रता पीतदन्तता।**
**शीतेच्छा पीतनखता तेजोद्वेषोऽल्पनिद्रता॥११९॥**
**कोपश्च गात्रसादश्च भिन्नविट्कत्वमन्धता।**
**उष्णोच्छ्वासत्वमुष्णत्वं मूत्रस्य च मलस्य च॥१२०॥**
**तमसो दर्शनं पीतमण्डलानां च दर्शनम्।**
**निःसहत्वं च पित्तस्य चत्वारिंशद्रुजः स्मृताः॥१२१॥**

दी०—पित्तभवा रोगा इति। स्वहेतुदुष्टेन स्वतन्त्रेण पित्तेन जनिता इत्यर्थः। यथा उषचोषादयः। चत्वारिंशदित्यस्य विवरणमाह। तत्र धूमोद्गारो धूमायनं ध्माइधीति शब्दवाच्यः, मुखाद्धूमोद्गिरणमिव भवति। शिरोग्रीवामुखताल्वभ्यः धूमस्य उद्गिरणं निःसरणम्। विदाहो विशेषादुषो दाहः। अत्र विदाहशब्देन उषादिदाहः। तेषां षण्णां ग्रहणं कार्यं पित्तजन्यत्वात्। उषादिदाहलक्षणं च—'दाहः सर्वाङ्गसन्ताप उषः सस्वेदताऽरतिः। यः क्वापि देहावयवे चोषः स्यादग्निनेव सः॥ पाणिपादांसमूलेषु विदाहो विविधो मतः। दाहस्तु मुखताल्वोष्ठे दवथुश्चक्षुरादिषु। कोष्ठदाहोऽन्त्रदाहः स्याद्देहदाह उषो मतः' इति। सर्वेऽपि पित्तोष्मजाः। उक्तं च—'ऊष्मा पित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना। तस्मात् पित्तविरुद्धानि त्यजेत् पित्ताधिकेऽधिकम्' इति। अत एव उष्णाङ्गत्वं पित्तजमेव। अतः संग्रहे पित्तविकारेषु पित्तविकाराः पुनः ओषचोषदाहदवथुविदाहसदाहाः त्वग्दाहोन्तर्दाह इत्युक्तम्। तथाच मतिभ्रमोऽत्र पित्तभव एव न तु वातमद्यादिजो बुद्धिनाशः। ननु पित्तस्य पक्त्युष्मदर्शनैः क्षुत्तृड्रुचिप्रभामेधाधीशौर्यतनुमार्दवैरित्यादिना शरीरोपाकरणादाधिक्यादाधिक्यं स्यादिति चेत्र—'ऊष्मणो जन्मनो यस्य तत एव स सीदति'।

उपघातस्तु तेनैव तथा नेत्रस्य तेजसः' इति न्यायात् पित्ताधिक्याद्बुद्धिनाश इति स्थितम् । कान्तिहानिः पित्तदग्धशरीरत्वात् ननु वातादिवत् कार्श्यादि । कण्ठशोषे मुखशोषश्च तयोः शुष्कत्वं तदुष्मणः शुष्कद्रवत्वम् । अल्पशुक्रता पित्तादेव । तिक्तास्यता अम्लवक्त्रत्वमिति, तिक्तो निम्बादिस्तद्वदास्यं । तथा अम्लास्यता अम्लमुखता । ननु वाग्भटे—'कटुकाम्लौ रसौ वर्णः पाण्डुरारुणवर्जितः' इत्युक्तम्, इह तु तिक्त इति विरोधः । मैवम्—वाग्भटोक्तस्य 'कटुः स्यात् कटुतिक्तयोः' इति वचनात् तिक्त एवार्थः । 'कषायतिक्तमधुरं वातादिषु मुखं क्रमात्' इति । स्वेदो घर्मस्तस्य स्रावः स्रुतिः । अङ्गपाकताङ्गपाकत्वम् । क्लम इति । 'योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्जितः । विज्ञेयः स क्लम इति इन्द्रियार्थप्रबाधकः' इति । हरितवर्णत्वं हरितवर्णता 'देहो हरितहारिद्र' इति वचनात् । अतृप्तिः तृप्तिर्न भवति । पीतगात्रता पीतशरीरत्वम् । रक्तस्रावः रक्तस्य स्रवणम् । अङ्गस्य दरणं विदरणम् । लोहगन्धास्यता लोहं कालायसं तद्वन्मुखगन्धो भवति । दौर्गन्ध्यं अङ्गानाम् । पीतमूत्रत्वं हरिद्राभमूत्रत्वम् । अरतिः सर्वत्राप्रीतिः । पीतविट्कता पीतपुरीषता । पीतावलोकनं वस्तुषु पीततादर्शनं नेत्रादिषु च पीतता । पीतदन्तता दन्तेषु पीतत्वम् । शीतेच्छा शीतवस्तुनोऽभिलाषः । पीतनखता पीतनखत्वम् । तेजोद्वेषः तैजसवस्तुद्वेषः । अल्पनिद्रता अल्पनिद्रत्वम् । कोपश्च पित्तस्यैव रक्तकोपता रक्तजेपूक्तत्वात् । गात्रसादो गात्रसादनम् । भिन्नविट्कत्वं भिन्नपुरीषता । अन्धता नेत्रस्यैव । उष्णोच्छ्वासत्वमिति तथोष्णश्वासश्च । उष्णत्वं मूत्रस्य च मलस्य चेति द्वयोरपि औष्ण्यं पित्तभवत्वात् । तथा तमसो दर्शनं अन्धकारदर्शनम् । तथा पीतमण्डलानां च दर्शनम् । पीतानि यानि मण्डलानि तेषां दृष्टिः । निःसहत्वं च पित्तस्येति, निःसहत्वं निःसहता । इति चत्वारिंशत् पित्तरुजः पित्तजनिता रोगा इत्यर्थः ॥ ११५–१२१ ॥

**गू०**—अथानन्तरं इहास्मिन्ग्रन्थे पित्तभवा रोगाश्चत्वारिंशत् उदिताः कथिताः । ते तु धूमोद्गारादयः । एषां लक्षणं निदानाज्ज्ञेयम् । यद्वा व्यत्ययाज्ज्ञेयं यथा धूमस्य उद्गारः धूमोद्गारः; एवमपरेऽपि ज्ञेयाः । सत्वमुष्णत्वं देहोष्णत्वं मूत्रस्य मलस्य च उष्णत्वम् । स्पष्टमन्यत् ॥ ११५–१२१ ॥

**दी०**—अथ कफरोगसंख्या—

**कफस्य विंशतिः प्रोक्ता रोगास्तन्द्रातिनिद्रता ।**
**गौरवं मुखमाधुर्यं मुखलेपः प्रसेकता ॥ १२२ ॥**
**श्वेतावलोकनं श्वेतविट्कत्वं श्वेतमूत्रता ।**
**श्वेताङ्गवर्णता शैत्यमुष्णेच्छा तिक्तकामिता ॥१२३॥**
**मलाधिक्यं च शुक्रस्य बाहुल्यं बहुमूत्रता ।**
**आलस्यं मन्दबुद्धित्वं तृप्तिर्घर्घरवाक्यता ॥ १२४ ॥**
**अचैतन्यं च गदिता विंशतिः श्लेष्मजा गदाः ।**

**दी०**—पित्तजानुक्त्वा कफजानाह—कफस्येति । कफस्य श्लेष्मणः सहेतुदुष्टस्य जनिता रोगा विंशतिः, तज्जा इत्यर्थः । तेषां विवरणमाह—अतिनिद्रतेति । निद्रालक्षणं तु—'यदा तु मनसि क्लान्तिः कर्मात्मा च क्लमान्वितः । आलस्यं मन्दबुद्धित्वं तृप्तिर्घर्घरवाक्यता । विषयेभ्यो निवर्तेत तस्य निद्रां विनिर्दिशेत्' । अति अत्यन्तं निद्रा अतिनिद्रता । गौरवमिति तल्लक्षणं तु—'आर्द्रचर्मावनद्धं च यो गात्रं मन्यते नरः । तथा गुरुशिरोऽत्यर्थं गौरवं तद्विनिर्दिशेत्' । मुखमाधुर्यं मधुरास्यता । मुखलेपः कफेन लिप्तता । प्रसेकता लालास्रावता । श्वेतावलोकनं श्वेतस्य वस्तुनो दर्शनम् । तथा श्वेतविट्कत्वं शुभ्रपुरीषता । श्वेतमूत्रता शुभ्रमूत्रता । श्वेताङ्गवर्णता श्वेतत्वमङ्गस्य । शैत्यं अङ्गशीतला । उष्णेच्छा उष्णवस्तुनोऽभिलाषः । तिक्तकामिता तिक्तस्य कटुवस्तुनः काङ्क्षा । अन्नानभिलाषः । मलाधिक्यं मलस्याधिक्यता अतिशुक्रता शुक्रस्य बाहुल्यम् । बहुमूत्रता मूत्रस्य बहुप्रवृत्तिः । आलस्यमिति । तल्लक्षणं तु–'समर्थस्याप्यनुत्साहः कर्मण्यालस्यमुच्यते' इति । मन्दबुद्धित्वं बुद्धेर्मन्दता । तृप्तिर्भोजनानभिलाषः । घर्घरवाक्यता घर्घरशब्दत्वम् । अचैतन्यं चैतन्यं ज्ञानं तद्रहितत्वं जडता कफरुद्धस्रोतसां रोधात् । इति श्लेष्मरोगा विंशतिर्व्याख्याताः ॥ १२२–१२४ ॥

**गू०**—कफस्य विंशतिरोगाः प्रोक्ताः ते अतिनिद्रतादयः, गौरवं देहस्य प्रसेकता मुखस्रावः । स्पष्टमन्यत् ॥ १२२–१२४ ॥

**गू०**—अथ रक्तरोगसंख्या—

**रक्तस्य च दश प्रोक्ता व्याधयस्तेषु गौरवम् ॥१२५॥**
**रक्तमण्डलता रक्तनेत्रत्वं रक्तमूत्रता ।**
**रक्तनिष्ठीवनं रक्तपिडकानां च दर्शनम् ॥ १२६ ॥**
**औष्ण्यं च पूतिगन्धत्वं पीडा पाकश्च जायते ।**

**दी०**—अथ रक्तजानां रोगाणां विवरणमाह—रक्तस्येति। रक्तस्य रुधिरस्य व्याधयः मुनिभिर्दश प्रोक्ताः। तेषु व्याधिषु गौरवं कफजमिव रक्तस्यानुरूपतया भवति। तथा रक्तमण्डलता आरक्तमण्डलोत्पत्तिः। तथा रक्तनेत्रत्वं आरक्तलोचनता। तथा रक्तमूत्रता रक्तमूत्रत्वं तस्य रक्तजन्यत्वात्। रक्तनिष्ठीवनं रक्तमिश्रितनिष्ठीवनं रक्तस्यैव वा निष्ठीवनम्। तथा रक्तपिडकानां च दर्शनम्। रक्तजा आरक्ता वा पिडकाः क्षुद्रस्फोटाः तेषां दर्शनम्। औष्ण्यं उष्णत्वं रक्तस्यापि तैजसत्वात्। पूतिगन्धत्वं दुर्गन्धता सा तु रक्तजैवात्र ग्राह्या नत्वन्यजा। तद्वत् पीडापि। तथा पाकश्च मांसादीनां रक्तस्य वा। इति दश रक्तजा रोगा व्याख्याताः॥ १२५॥ १२६॥

**गू०**—अथ रक्तस्य रुधिरस्य व्याधयः प्रोक्ताः कथिताः ते गौरवादयः गौरवं देहस्य रक्तपिडकानां रक्तपिडकाकाराणां दर्शनं, स्पष्टमन्यत्॥१२५॥१२६॥

**गू०**—अथ मुखरोगसंख्या—

**चतुःसप्ततिसंख्याका मुखरोगास्तथोदिताः॥ १२७॥**

**दी०**—उपदेशक्रमेणैव मुखरोगाणां विवरणमाह—चतुःसप्ततिसंख्याका इति। मुखे भवा रोगा मुखरोगाः। आयतनसमुदायस्य तदधिष्ठितत्वान्मुखस्यात्र ग्रहणम्। यतः—'मुखरोगाः समाख्याताः सप्तस्वायतनेषु च' इति। आयतनानि स्थानानि यथा दन्तौष्ठदन्तमूलजिह्वाकण्ठतालुसर्वगतानीति॥ १२७॥

**गू०**—उदिता मुखरोगाश्चतुःसप्ततिसंख्याताः। तेषां विवरणं क्रियते तत्रादौ तेषु॥ १२७॥

**गू०**—ओष्ठरोगा एकादश तानाह—

**तेष्वोष्ठरोगा गणिता एकादशमिता बुधैः।**
**वातपित्तकफैस्त्रेधा त्रिदोषैरसृजा तथा॥ १२८॥**
**क्षतं मांसार्बुदं चैव खण्डोष्ठं च जलार्बुदम्।**
**मेदोऽर्बुदं चार्बुदं च रोगा एकादश स्मृताः॥१२९॥**

**दी०**—सर्वरोगेषु प्रथमत ओष्ठरोगानाह-तेष्विति। एकादशेत्यादि। वातपित्तकफैः कृत्वा त्रयो भेदाः। तद्यथा—'कर्कशौ परुषौ स्तब्धौ कृष्णौ तीव्ररुगन्वितौ। दाल्येते परिपाट्येते ओष्ठौ मारुतकोपतः॥ आचितौ पिडकाभिश्च सरुजाभिः समन्ततः। सदाहपाकपिडकौ पीताभासौ च पित्ततः॥ सवर्णाभिस्तु चीयेते पिडकाभिरवेदनौ। भवतस्तु कफादोष्ठौ पिच्छिलौ शीतलौ गुरू'॥ इति। त्रिदोषैरिति मिलितदोषत्रयेण चतुर्थो भेदः। यदुक्तम्—'सकृत् कृष्णौ सकृत् पीतौ सकृत् श्वेतौ तथैव च। सन्निपातेन विज्ञेयावनेकपिडकान्वितौ' इति। असृजा रक्तेन पञ्चमो भेदः रक्तोपसृष्टत्वात्। यतः—खर्जूरफलवर्णाभिः पिडकाभिर्निपीडितौ। रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ' इति। क्षतमित्यभिघातजम्, तेन कथंभूतौ? यथा—'क्षतजाभौ विदीर्येते पाट्येते चाभिघाततः' इति। ननु क्षतादेव दोषप्रकोपः स्यात् तेन दोषान्तर्गत एव क्षतजो भेदः किमिति न पठितः? यतो भोजेनोक्तत्वात् 'क्षतावभिहितौ वापि रक्तावोष्ठौ सवेदनौ। भवतः सपरिस्राविकफरक्तप्रदूषितौ' इति। उच्यते वातादिकः केवलः स्वकरणकुपितः, अत्र तु अभिघातात् क्षुभ्यते तेनाभिघातनिदानत्वात् द्वयोरभेद इत्यदोषः। मांसार्बुदमित्यर्बुदाकारत्वान्मांसपिण्डवदुद्गतावोष्ठौ भवतः इति। यदुक्तम्—'गुरू स्थूलौ मांसदुष्टौ मांसपिण्डवदुद्गतौ। जन्तवश्चात्र मूर्च्छन्ति नरस्योभयतो मुखात्' इति। खण्डौष्ठ इति। खण्डौष्ठः क्षतभेदः स्यादित्यादिना। अत्र खण्डितौष्ठैकदेशत्वाद्भिन्नः कदाचिद्दोषजव्रणविकृतिभावाद्वा भिन्नस्तत्र खण्डौष्ठ इत्युक्तो वातेनोष्ठो द्विधा कृतः। जलार्बुदमिति। जलबुद्बुदाकारं जलार्बुदम्। यदुक्तम्—'जलबुद्बुदवद्वातः कफादोष्ठे जलार्बुदम्' इति। यदुक्तम्—अत्रार्बुदत्रयमर्बुदवत् ज्ञातव्यम्। तत्र मेदोर्बुदो यथा—'सर्पिर्मण्डप्रतीकाशो मेदसा कण्डुरौ गुरू। स्वस्थः स्फटिकसंकाशमास्रावं स्रवतो भृशम्। तयोर्व्रणं न संरोहेन्मृदुत्वं च न गच्छति' इति॥ १२८॥ १२९॥

**गू०**—इत्येकादश ओष्ठजाः॥ १२८॥ १२९॥

**गू०**—अथ दन्तरोगाः—

**दन्तरोगा दशाख्याता दालनः कृमिदन्तकः।**
**दन्तहर्षः करालश्च दन्तचालश्च शर्करा॥ १३०॥**
**अधिदन्तः श्यावदन्तो दन्तभेदः कपालिका।**
**तथा त्रयोदशमिता दन्तमूलामयाः स्मृताः॥१३१॥**
**शीतादोपकुशौ द्वौ तु दन्तविद्रधिपुप्पुटौ।**
**अधिमांसो विदर्भश्च महासौषिरसौषिरौ॥ १३२॥**
**तेष्वेव गतयः पञ्च वातात्पित्तात्कफादपि।**
**सन्निपातादृतिश्चान्या रक्तनाडी च पञ्चमी॥१३३॥**

**दी०**—अथ दन्तरोगानाह-दन्तरोगा दशेत्यादि । तत्र—दालन इति । दाल्यमानेष्विव रुजा भवति इति दालनः । यदुक्तं—'दीर्यमाणेष्विव रुजा यस्य दन्तेषु जायते । दालनो नाम स व्याधिः सदागतिनिमित्तजः' इति । कृमिदन्तक इति । कृमिकृतछिद्रत्वेन वेदनाविशेषो यत्र भवति स कृमिदन्तकः । यदुक्तम्—'कृष्णाच्छिद्रश्चलः स्रावी ससंरम्भो महारुजः । अनिमित्तरुजो वातात् स ज्ञेयः कृमिदन्तकः' इति । दन्तहर्ष इति । दन्तहर्षः स्वनामतः प्रसिद्धः । तथाहि—'शीतरुक्षप्रवाताम्लस्पर्शानामसहा द्विजाः । पित्तमारुतकोपेन दन्तहर्षः स नामतः' इति । कराल इति । करालो विषमदन्तकः । विसदृशदन्त इत्यर्थः । यदुक्तम्—'शनैः शनैः प्रकुरुते वायुर्दन्तसमाश्रितः । करालान् विकटान् दन्तान् करालो न स सिध्यति' इति । दन्तचाल इति । दन्तानां चालनः । माधवेन तु 'हनुमोक्ष' इति पठितः । तद्यथा—'वातेन तैस्तैर्भावैस्तु हनुसन्धिविसंहतः । हनुमोक्ष इति ज्ञेयो व्याधिरर्दितलक्षणः' इति । विसंहत इति । हनुसन्धिभ्यः किञ्चिच्चलितः । अतएव सुश्रुते दन्तदेशसामीप्याद्दन्तपीडनाच्चायं पठितः । शर्करेति । शर्करा वालुका तद्वद्दन्तरोगो भवति । यतः—'मलो दन्तगतो यस्तु कफमारुतशोषितः । शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा' इति । एके दन्तानां गुणहारी चेति पठन्ति । अधिदन्त इति । अधिदन्तो अधिकदन्तः 'खलीवर्धन' इति संज्ञान्तरे । यदुक्तम्—'मारुतेनाधिको दन्तो जायते तीव्रवेदनः । खलीवर्धनसंज्ञोऽसौ जाते रुक् च प्रशाम्यति' इति । श्यावदन्त इति नीलदन्त इति वा । यथोक्तम्—'असृङ्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः । श्यावतां नीलतां वापि गतः स श्यावदन्तकः' इति । दन्तभेद इति । दन्तभेदो भञ्जनकसंज्ञान्तरे तीव्ररुजाकरत्वात् । यतः—'वक्त्रं वक्रं भवेद्यस्मिन् दन्तभङ्गश्च तीव्ररुक् । कफवातकृतो व्याधिः स भञ्जनकसंज्ञकः' इति । कपालिकेति । मलसंहितदन्तावयवेषु काठिन्यात् कपालतुल्येषु शीर्यत्सु दन्तमूलेष्वेव शर्करैव कपालिका कथिता । तथा हि—'कपालेष्विव दीर्यत्सु दन्तानां सैव शर्करा । कपालिकेति पठिता सदा दन्तविनाशिनी' इति ॥

तथेति । मुखरोगाधिक्षिप्तत्वात् दन्तमूलगतरोगास्त्रयोदशसंख्याः प्रोक्ताः । तत्र—शीतादोपकुशाविति । शीताद इत्यभिघातादिनिमित्तं विना दन्तमांसशीर्यादिभावेनोपलक्षितः । तथाहि—'शोणितं दन्तवेष्टेभ्यो यस्याकस्मात् प्रवर्तते । दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च ॥ दन्तमांसानि शीर्यन्ते पचन्ति च परस्परम् । शीतादो नाम स व्याधिः कफशोणितसम्भवः' इति । उपकुश इति । उपकुशो दाहपाकवेष्टः । यथा—'वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति च । यस्मिन्नुपकुशो नाम पित्तरक्तकृतो गदः' इति । दन्तविद्रधिरिति । 'दन्तमांसैर्मलस्रावैर्बाह्यतः श्वयथुर्गुरुः । सदाहरुक् स्रवेद्भिन्नं पूयास्रं दन्तविद्रधिः' इति । पुप्पुट इति । दन्तपुप्पुटसंज्ञः । यतः—'दन्तयोस्त्रिषु वा यस्य श्वयथुर्जायते महान् । दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः' इति । अधिमांस इति । 'हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः । लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः' इति । विदर्भ इति । विदर्भोऽभिघातज इत्युक्तत्वात् 'घृष्टेषु दन्तमांसेषु संरम्भो जायते महान् । भवन्ति चञ्चला दन्ताः स वैदर्भोऽभिघातजः' इति । महासुषिर इति संज्ञान्तरं यथा 'दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्यते । यस्मिन् स सर्वजो व्याधिर्महासौषिरसंज्ञकः' इति । सौषिर इति त्रिदोषत्वेन मारणात्मको ज्ञेयः । यदुक्तं भोजे—'सदाहो दन्तमूलेऽपि शोथः पित्तकफानिलात् । जातः कफं क्षपयति क्षीणे तस्मिंस्तु शोषितम् ॥ प्रवृद्धमनिशं दन्तांस्ताल्वोष्ठमपि दारयेत् । महासौषिर इत्येष सप्तरात्रान्निहन्त्यसून्' इति । सौषिर इति प्रसिद्धः । यथा 'श्वयथुर्दन्तमूलेषु प्रजावान् कफरक्ततः । लालास्रावी स विज्ञेयः सौषिरो नाम नामतः' इति । तेषु त्रयोदशविधेषु दन्तमूलगते पञ्चगतयः पञ्चनाड्यो दोषादिभेदेन ज्ञातव्याः । यदुक्तम्—'दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः' इति । नाडीव्रणनिदानोक्ता दन्तगतत्वात्तल्लक्षणैर्ज्ञेया नाड्यः । अत्र वातपित्तकफसन्निपातानां तु निमित्ततः । आगन्तुरभिघातस्तेनाऽपि रक्तस्य प्रादुर्भावत्वादत्र रक्तं नाडीगत इत्यादि । रक्तस्य प्रादुर्भावादत्र रक्तनाडी गणिता इति न दोषः ॥ १२०-१२३ ॥

**गू०**—अथ त्रयोदशदन्तमूलजाः । तेषु दन्तमूलेषु पञ्च गतयः पञ्चगतिसंज्ञाः १२०-१२३ ॥

गू०—अथ षट् जिह्वारोगाः—

**तथा जिह्वामयाः षट् स्युर्वातपित्तकफैस्त्रिधा ।**
**अलासश्च चतुर्थः स्यादधिजिह्वा च पञ्चमी ॥१३४॥**
**षष्ठी चैवोपजिह्वा स्यात्**

दी०—तथा जिह्वामयाः षट् स्युरित्यादि । तत्र वातात् शाकच्छदनप्रकाशा भवति, पित्तात् पीता च भवति, कफात् गुर्वी भवतीति । तथाहि—'जिह्वाऽनिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा । पित्तेन पीता परिदह्यते च चिता सरक्तैरपि कण्टकैश्च ॥ कफेन गुर्वी बहुला चिता च मांसोच्छ्रयैः शाल्मलिकण्टकाभैः' इति । अलासो जिह्वागतशोथेनोपलक्षित इति । यदुक्तम्—'जिह्वागतो यः श्वयथुः प्रगाढः सोऽलाससंज्ञः कफरक्तमूर्तिः । जिह्वां स तु स्तम्भयति प्रवृद्धो मूले च जिह्वा भृशमेति पाकम्' इति । अधिजिह्वेति । जिह्वोपरि जातो यः श्वयथुस्तेनाधिजिह्वा कथिता । यतः—'जिह्वाग्ररूपः श्वयथुः कफात्तु जिह्वोपरिष्टादपि रक्तमिश्रात् । ज्ञेयोऽधिजिह्वः खलु रोग एष विवर्जयेदागतपाकमेनम्' इति । उपजिह्वा चेति । जिह्वाया अग्रसदृशो जिह्वातलजातो यः शोथस्तेनोपलक्षितोपजिह्वा चेति । यदुक्तम्—'जिह्वाग्ररूपः श्वयथुर्हि जिह्वामुन्नम्य जातः कफरक्तमूलः । लालाकरः कण्डुयुतः स चोषः सा तूपजिह्वा पठिता भिषग्भिः' इति ॥ १३४ ॥

गू०—अथाष्टौ तालुरोगाः—

**तथाष्टौ तालुजा गदाः ।**
**अर्बुदं तालुपिडका कच्छपी तालुसंहतिः ॥ १३५ ॥**
**गलशुण्डी तालुशोथस्तालुपाकश्च पुप्पुटः ।**

दी०—तथेति । मुखरोगसंख्याकरणत्वात् अष्टौ भेदा यथार्बुदमित्यादि । अर्बुदमिति ताल्वर्बुदसंज्ञा । तथाच—'पद्माकारं तालुमध्ये तु शोथं विद्याद्रक्तादर्बुदं प्रोक्तलिङ्गम्' इति । प्रोक्तलिङ्गमित्यत्र पूर्वोक्ताद्रक्तार्बुदादल्पलक्षणमित्यर्थः । भोजे तत् श्लेष्मरक्तोद्भवमिति । तथाहि—'उपर्येव भवेद्व्याधिर्यथा पद्मस्य कर्णिका । पार्श्वतश्चाङ्कुरैर्दीर्घैर्नासा चाप्यवसीदति । श्लेष्मरक्तसमुत्थानं तत्ताल्वर्बुदसंज्ञितम्' इति । तालुपिडकेति । तालुदेशे शोथकरत्वेन पिडका भवन्ति । तन्त्रान्तरे अध्रुष इति नामान्तरम् । तदथा 'शोथः स्तब्धो लोहितस्तालुदेशे रक्ताज्ज्ञेयः सोऽध्रुषो रुग् ज्वरश्च' इति । कच्छपीति । कच्छपोन्नतपिडका तालुनि भवति सा कच्छपीशब्दवाच्या । तदुक्तम्—'कूर्मोत्सन्नावेदनाऽशीघ्रजन्मा रोगो ज्ञेयः कच्छपः श्लेष्मणा च' इति । तालुसंहतिरिति । तालुसंहतमांससंघातेन कथितः । तथाहि 'दुष्टं मांसं नीरुजं तालुमध्ये कफात् स्थूलं मांससंघातमाहुः' इति । गलशुण्डीति वातपूरितचर्मपुटकतुल्यशोथा गलशुण्डीशब्दवाच्या । गलशब्दत्वेन कण्ठशुण्डीति केचित् । यदुक्तम्—'श्लेष्मासृग्भ्यां तालुमूले प्रवृद्धो दीर्घः शोथो ध्मातबस्तिप्रकाशः । तृष्णाकासश्वासभूतं वदन्ति व्याधिं वैद्याः कण्ठशुण्डीति नाम्ना' इति । तालुशोथ इति । तालुशोथनामा व्याधिः । तद्यथा—'शोथोऽत्यर्थं दीर्यते वापि तालु श्वासश्चोग्रस्तालुशोथोऽनिलाच्च' इति । तालुशोथस्तु पित्तादिति केचित् पठन्ति । पित्तस्यापि शोथकरत्वात् । भोजेऽपि वातादेव पठितः । यथा—'तालुशोथो भवेद्वाताद्व्याधिर्यः क्ष्वेडसंज्ञितः' इति । तालुपाक इति । तालुनि पित्तमेवात्यर्थं पाकं करोति । यदुक्तम्—'पित्तं कुर्यात् पाकमत्यर्थघोरं तालुन्येनं तालुपाकं वदन्ति' इति । पुप्पुट इति । तालुपुप्पुटः कथितः । तालुशब्दोऽत्र लुप्तनिर्दिष्टो द्रष्टव्यः । यदुक्तम्—'नीरुक् स्थायी कोलमात्रः कफात् स्यान्मेदोयुक्तात् पुप्पुटस्तालुदेशे' इति ॥ १३५ ॥

गू०—अथाष्टादश गलरोगाः—

**गलरोगास्तथाख्याता अष्टादशमिता बुधैः ॥ १३६॥**
**वातरोहिणिका पूर्वं द्वितीया पित्तरोहिणी ।**
**कफरोहिणिका प्रोक्ता त्रिदोषैरपि रोहिणी ॥१३७॥**
**मेदोरोहिणिका वृन्दो गलौघो गलविद्रधिः ।**
**स्वरहा तुण्डिकेरी च शतघ्नी शालुकोऽर्बुदम् ॥१३८॥**
**गिलायुर्वलयश्चापि वाताद्गण्डः कफात्तथा ।**
**मेदोगण्डस्तथैव स्यादित्यष्टादश कण्ठजाः ॥ १३९॥**

दी०—गलरोगा इत्यादि । गलोपलक्षितत्वेन कण्ठरोगत्वप्रतीतिः । तत्र पञ्चानां रोहिणीनां सामान्यलक्षणं कण्ठाधः पलाङ्कुराः सम्भवतीत्यादिना दर्शितम् । यथा—'गलेऽनिलः पित्तकफौ च मूर्च्छितौ पृथक् समस्ताश्च तथैव शोणितम् । प्रदूष्य मांसं गलरोधिनोऽङ्कुरान् सृजन्ति या सासुहरा हि रोहिणी' इति । यद्यपि सर्वा रोहिणी सन्निपातजा तथाप्युत्कर्षादिभेदेन वातजादिव्यपदेशः, व्यस्तलक्षणत्वाच्च । तद्यथा—'जिह्वा समन्ताद्भृशवेदना ये मांसाङ्कुराः कण्ठनिरोधनाः

स्युः । तां रोहिणीं वातकृतां वदन्ति वातात्मकोपद्रवगाढयुक्ताम्' इति । पित्तरोहिणीति । पित्तजाता रोहिणी शीघ्रोत्थानत्वेन दर्शिता । यतः—'क्षिप्रोद्गमा क्षिप्रविदाहपाका तीव्रज्वरा पित्तनिमित्तजा तु' इति । कफरोहिणिकेति । कण्ठादिरोधत्वाच्चिरपाका कफरोहिणीति । यदुक्तम्—'स्रोतोनिरोधिन्यपि मेदपाका गुर्वी स्थिरा सा कफसम्भवा च' इति । त्रिदोषैरपि रोहिणीति । मिलितदोषत्रयेण भवति सन्निपातजेत्यर्थः । उक्तं हि—'गम्भीरपाकिन्यनिवार्यवीर्या त्रिदोषलिङ्गा त्रितयोत्थिता च' इति । मेदोरोहिणिकेति । 'दुष्टमेदोजनितरोहिणीति । एके मेदःस्थाने रक्ता रोहिणिकेति पठन्ति सर्वत्र प्रतिपादितत्वात् । तथाहि—'स्फोटैश्चिता पित्तसमानलिङ्गा साध्या प्रदिष्टा रुधिरात्मिका तु' इति । इतररोहिण्यपेक्षयाऽत्र सुसाध्यत्वमुक्तम् । वृन्द इति । वृत्तं समुन्नतं शोथकरं यः कण्ठे वृन्दरोगः कथितः । तथाहि—'समुन्नतं वृत्तममन्ददाहं तीव्रज्वरं वृन्दमुदाहरन्ति । तं चापि पित्तक्षतजप्रकोपाज्ज्ञेयं सतोदं पवनात्मकं च' इति । गलौघ इति । कण्ठावरोधाद्गलौघसंज्ञः स च शोथोऽत्र गलावरोधी कथितः । तथाहि—'शोथो महानन्नजलावरोधी तीव्रज्वरो वायुगतेर्निहन्ता । कफेन जातो रुधिरान्वितेन गले गलौघः परिकीर्तितोऽसौ' इति । अतिमहत्त्वादुदानवायोर्गतिनिरोधक इत्यर्थः । गलविद्रधिरिति । विद्रधिवद्गले शोथो गलविद्रधिशब्दवाच्यः । यतः—'सर्वं गलं व्याप्य समुत्थितो यः शोथो रुजो यत्र च सन्ति सर्वाः । स सर्वदोषो गलविद्रधिस्तु तस्यैव तुल्यः खलु सर्वजश्च' इति । यद्यप्ययं स्थानादिप्रभावेण सन्निपातज एव, तथापि चिकित्साभेदार्थं नामान्तरेण पुनरत्र ग्रहणे न दोषः । स्वरहेति । स्वरनाशकत्वेन स्वरहा नाम गलरोगः कथितः । यदुक्तम्—'यस्ताम्यमानः श्वसिति प्रसक्तं भिन्नस्वरः शुष्कविमुक्तकण्ठः । कफोपदिग्धेष्वनिलायनेषु ज्ञेयः स रोगः श्वसनात् स्वरघ्नः' इति । श्वसनादिति वातात् । तुण्डिकेरीति । तुण्डिकेरीति वनकार्पासीफलं तत्तुल्यशोथतया तुण्डिकेरी कथिता । तन्त्रान्तरे कण्ठशालूकेति नाम्ना सा प्रतिपादिता । यतः—'कोलास्थिमात्रः कफसंभवो यो ग्रन्थिर्गले कण्टकशूकभूतः । खरः स्थिरः शस्त्रनिपातसाध्यस्तं कण्ठशालूकमिति ब्रुवन्ति ॥' इति । शतघ्नी चेति । शतघ्नी पाषाणशिला, तत्तुल्यो रोगः शतघ्नीशब्दवाच्यः । 'अयःकण्टकसंछन्ना शतघ्नी महती शिला' इत्यादिवचनात् । तदाकारत्वात् अत्रापि मांसप्ररोहोपलक्षिता शतघ्नीति । यदुक्तम्—'वर्तिर्घना कण्ठनिरोधिनी या चितातिमात्रं पिशितप्ररोहैः । नानारुजोच्छ्रायकरी त्रिदोषाज्ज्ञेया शतघ्नीव शतघ्न्यसाध्या' इति । शालूक इति । शालूकोऽत्र गलरोगे विदारिकेति नाम्ना पठितः । वदनसम्बन्धत्वादत्र शालूकव्यपदेशः । तथथा—'सदाहतोदं श्वयथुं सरक्तमन्तर्गले पूतिविशीर्णमांसम् । पित्तेन विद्याद्वदने विदारीं पार्श्वे विशेषात् स तु येन शेते' इति । अर्बुदमिति । अर्बुदाकारा पिडका गले भवति इत्यर्बुदरोगः । अयमेव मांसतान इत्यन्यत्र प्रतिपादितः । यतः—'प्रतानवान् यः श्वयथुः सुकष्टो गलोपरोधं कुरुते क्रमेण । स मांसतानः कथितोऽवलम्बी प्राणप्रणुत् सर्वकृतो विकारः' इति । एकेऽर्बुदमेवैकवृन्देति नाम्ना प्रतिपादयन्ति । अपाको मृदुशोथत्वात् । यतः—'वृत्तोन्नतोऽन्तःश्वयथुः सदाहः सकण्डुरोऽपाकमृदुर्गुरुश्च । नाम्नैकवृन्दः परिकीर्तितोऽसौ व्याधिर्बलासक्षतजप्रसूतः' इति । गिलायुरिति । आमलकास्थिमात्रा या गले ग्रन्थिः स गिलायुशब्दवाच्यो रोगः । तथाहि—'ग्रन्थिर्गले त्वामलकास्थिमात्रः स्थिरोऽल्परुक् स्यात्कफरक्तमूर्तिः । संलक्ष्यते सक्तमिवाशनं च स शस्त्रसाध्यस्तु गिलायुसंज्ञः' इति । वलय इति । वलयो गलरोगविशेषः । यथा—'बलास एवायतमुन्नतं च शोथं करोत्यन्नगतिं निवार्य । तं सर्वथैवाप्रतिवार्यवीर्यं विवर्जनीयं वलयं वदन्ति' इति । अथ गलरोगेषु त्रिधा गण्डानाह—एको वातगण्डः कफात् तथेति कफगण्डः, तथैव मेदोगण्ड इति । गलस्थानत्वादत्र गलगण्डत्रयमुक्तम् । अन्यत्र गण्डमालायां गलगण्डः पठितः तत्र भिन्नचिकित्साविषयत्वात् । शार्ङ्गधराचार्येण नामसंग्रहादत्रैव गृहीतः न तु गण्डमालागणनायां इत्यदोषः । एतेषां रूपं तु तन्त्रान्तराद्बोद्धव्यमिति ॥ १३६–१३९ ॥

गू०—अथ मुखान्तःसंभवा अष्टौ रोगाः—

**मुखान्तःसंभवा रोगा अष्टौ ख्याता महर्षिभिः ।**
**मुखपाको भवेद्वातात्पित्ताच्चद्वत्कफादपि ॥ १४० ॥**
**रक्ताच्च सन्निपाताच्च पूत्यास्योर्ध्वगदादपि ।**
**अर्बुदं चेति मुखजाश्चतुःसप्ततिरामयाः ॥ १४१ ॥**

१—'नत्र गला' पा० ।

**टी०**—मुखान्तःसंभवा रोगा इति । यद्यपि मुखान्तर्भवरोगा दन्तजिह्वादिगताः कथिताः, तथापि मुखदन्तौष्ठादिसप्तस्थानानां युगपद्व्यापकतया मुखपाकसंज्ञो रोगः प्रतीतः । अत एव तन्त्रान्तरे सर्वसर इतिसंज्ञयाऽभिहितः । सर्वमुखेस्मिन् सरतीति सर्वसरः । यदुक्तम्—'स्फोटैः सतोदैर्वदनं समन्ताद्यस्याचितं सर्वसरः स वातात् । रक्तैः सदाहैः पिडकैः सपीतैर्यस्याचितं चापि स पित्तकोपात् ॥ अवेदनैः कण्डुयुतैः सवर्णैर्यस्याचितं चापि स वै कफेन' इति । केचिद्विदेहोक्तं रक्तजसर्वसरलक्षणं पठन्ति । यथा—'रक्तेन पित्तोदित एक एव कैश्चित् प्रदिष्टो मुखपाकसंज्ञः' इति । सन्निपाताच्चेति । मिलितदोषत्रयेण पञ्चमो मुखपाकभेदः । पाकत्वे विकृति( विषम )समवायारब्धलिङ्गत्वात् स सन्निपातजो व्यपदेशः । यतः 'वातादृते नास्ति रुजा न पाकः पित्तादृते नास्ति कफाच्च पूयः । तस्माद्धि सर्वे परिपाककाले पचन्ति शोफास्त्रिभिरेव दोषैः' इति । पूत्यास्य इति दुर्गन्धास्यः प्रसिद्धः । ऊर्ध्वगुद इति मुखरोगविशेषः । सर्वत्राशीर्णमांसत्वेनाभ्यन्तरगुदाकारवत् । तेनोर्ध्वगुदाकारत्वेन सप्तमो भेदोऽत्र दर्शित इति न दोषः । अन्यत्र पित्तजान्तर्गत एव । अर्बुदमिति । अर्बुदवत् मुखरोगः । अर्बुदश्च सर्वगतत्वादत्रैवान्तर्भवतीति न दोषः । तदाकारपिडकात्वेनाष्टमः प्रतिपादितः । तन्त्रान्तरे कफजेऽन्तर्गतं दर्शितम् । इति कथितप्रकारेण मुखजा आमयाः रोगाश्चतुःसप्ततिः कथिता इत्यर्थः । सप्तसु स्थानेष्विति शेषः ॥ १४० ॥ ॥ १४१ ॥

**गू०**—एते स्रावोऽङ्गपाकता क्लमो हरितवर्णत्वमतृप्तिः पीतकायता रक्तद्रावोऽङ्गदरणं लोहगन्धास्यता तथा चतुःसप्ततिमुखजा अप्यामया रोगाः कथिताः । ननु निदानेषु मुखजा रोगाः पञ्चषष्टिरुक्ताः, अत्र चतुःसप्ततिस्तत्कथं? उच्यते—अत्र तन्त्रान्तरोक्तत्वान्नव अधिका जाता अतो न दोषः ॥ १४० ॥ १४१ ॥

**गू०**—अथ कर्णरोगसंख्या—

**कर्णरोगाः समाख्याता अष्टादशमिता बुधैः ।**
**वातात्पित्तात्कफाद्रक्तात्सन्निपाताच्च विद्रधिः ॥ १४२ ॥**
**शोथोऽर्बुदं पूतिकर्णः कर्णार्शः कर्णहल्लिका ।**
**बाधिर्यं तन्त्रिका कण्डूः शष्कुली कृमिकर्णकः ॥ १४३ ॥**
**कर्णनादः प्रतीनाह इत्यष्टादश कर्णजाः ।**

**टी०**—कर्णरोगा इति । कर्णान्तमधिकृत्योत्पन्नाः तेन शष्कुल्यवच्छिन्नमदृष्टोपगृहीतं श्रोत्रमुच्यते । तत्र यद्यप्येकदेशगतो रोगस्तथाप्यवयवत्वेऽपि समुदायोपचारात् कर्णव्यपदेशः । अष्टादशमिता बुधैरिति । बुधैरतिप्रवीणैः । येन सर्वतन्त्रेभ्यः संविचार्य संग्रहः कृतः । अतएवात्र चरकोक्तकर्णरोगचतुष्टयं दोषभेदेन तेष्वादौ कथितम् । तद्यथा—'नादोऽतिरुक् कर्णमलस्य शोषः स्रावस्तनुश्चास्रवणं च वातात् । शोथः सरागो दरणं विदाहः सपीतपूतिस्रवणं च पित्तात् । वैश्रुत्यकण्डूस्थिरशोथशुक्लस्निग्धस्रुतिः श्लेष्मभवोऽतिरुक् च । सर्वाणि रूपाणि च सन्निपातात् स्रावश्च तत्राऽधिकदोषवर्णः' इति । रक्तजस्य पित्तजेऽन्तर्भावः इति तन्त्रान्तरे । अत्र तु गणनाकृतत्वात् पृथक् पठितः । विद्रधिरिति कर्णविद्रधिः । स द्विविधः । एकोऽभिघातजः अपरो दोषजश्च । यदुक्तम्—'क्षताभिघातप्रभवस्तु विद्रधिर्भवेत् तथा दोषकृतोऽपरः पुनः । सरक्तपीतारुणमस्रमास्रवेत् प्रतोदधूमायनदाहचोषवान्' इति । अत्र तु आगन्तुकेन दोषप्रकोपत्वादेक एव व्यपदेशः । शोथ इति कर्णशोथः । कर्णशोथप्रभृतीनामर्बुदार्शसां पूर्वोक्तलक्षणैर्जानीयात् । यदुक्तम्—'कर्णशोथार्बुदार्शांसि जानीयादुक्तलक्षणैः' इति । तत्र कर्णशोथाश्चत्वारः, वातपित्तकफजरक्तत्वेन । एवं कर्णार्शश्चतुर्विधं वातपित्तकफसंनिपातभेदेन । कर्णार्बुदाः सप्तधा वातपित्तकफमांसमेदोरक्तसंनिपातभेदात् । शल्यसिद्धान्तेन संनिपातजमधिकं एवं सप्तार्बुदम् । यतः सुश्रुतोक्ता अष्टाविंशतिकर्णगतरोगास्तेनात्र लिखिता इति न दोषः । पूतिकर्ण इति । पूयं स्रवतीति पूतिकर्णकः । यदुक्तम्—'पूयं स्रवति वा पूति स ज्ञेयः पूतिकर्णकः' इति । कर्णहल्लिकेति कर्णप्रविष्टपतङ्गादिकीटत्वात् कथितः । तद्यथा—'पतङ्गाः शतपद्यश्च कर्णस्रोतः प्रविश्य हि । अरतिं व्याकुलत्वं च भृशं कुर्वन्ति वेदनाम् । कर्णो निस्तुद्यते तस्य तथा फरफरायते । कीटे चरति रुक् तीव्रा निष्पन्दे मन्दवेदना' इति । बाधिर्यमिति । बधिरता प्रसिद्धा । तद्यथा—'यदा शब्दवहं स्रोतो वायुरावृत्य तिष्ठति । शुद्धः श्लेष्मान्वितो वापि बाधिर्यं तेन जायते' इति । तन्त्रिकेति । तन्त्रिकाजन्यशब्दवद्रोगस्तन्त्रिकारोगः । अन्यत्र कर्णक्ष्वेड इति संज्ञयाऽभिहितः । यदुक्तम्—'वायुः पित्तादिभिर्युक्तो वेणुघोषोपमं स्वनम् । करोति कर्णयोः क्ष्वेडं कर्णक्ष्वेडः स उच्यते' इति । कण्डूरिति । कण्डूरप्यन्यत्र कर्णग्रन्थिशब्दवाच्यः ।

यतः—'मारुतः कफसंयुक्तः कर्णकण्डूं करोति च । पित्तोष्मशोषितः श्लेष्मा जायते कर्णगूथकः' इति । यद्यपि कण्डूः कर्णगूथश्च पृथङ्निर्दिष्टस्तथाप्यत्र श्लेष्मशोषकत्वादपि कण्ड्वादीनां सम्भव इत्यदोषः । शष्कुलीति । शष्कुली चात्रोपलक्षणं,तेन तद्गतविकृतदोषत्वात् कर्णस्रावत्वेन सर्वत्र कर्णस्राव इति संज्ञयाभिहिता । तद्यथा-'शिरोऽभिघातादथवा निमज्जतो जले प्रपाकादथवापि विद्रधेः । स्रवेद्धि पूयं श्रवणोऽनिलार्दितः स कर्णसंस्राव इति प्रकीर्तितः' इति । एके शष्कुलीत्यनेन कर्णगूथमेव मन्यन्ते। परं पूर्वाचार्यैरपठितत्वादस्माभिरपि न पठितः। क्रमिकर्णक इति । कर्णक्रमिकृद्रोगः क्रमिकर्णशब्दवाच्यः । यदुक्तम्—'यदा तु मूर्च्छन्त्यथवाऽपि जन्तवः सृजन्त्यपत्यान्यथवापि मक्षिकाः । तद्व्यञ्जनत्वाच्छ्रवणो निरुध्यते भिषग्भिरुक्तः क्रमिकर्णको गदः' इति । क्रमिलक्षणत्वादयं विकारस्त्रिदोषजो ज्ञेयः । तथाच—'क्रमिः पित्तजलोन्मिश्रे कोथे शोणितमांसजे । जायन्ते जन्तवस्तत्र कृष्णास्ताम्राः सितारुणाः । भक्षयन्तीव ते कर्णं कुर्वन्ति विविधा रुजः । क्रमिकर्णं विजानीयात् सन्निपातप्रकोपजम्' इति । कर्णनाद इति । यत्र विविधस्वनान् शृणोति स कर्णनाद इति गदविशेषः कथितः । यथा—'कर्णस्रोतःस्थिते वाते शृणोति विविधान् स्वनान् । भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते' इति। न केवलं भेर्यादिस्वनम् । अन्येषामप्यत्र प्रतिपादितत्वात् । यदुक्तं विदेहे—'शिरोगतो यदा वायुः श्रोत्रयोः प्रतिपद्यते । तदा तु विविधान् शब्दान् समीरयति कर्णयोः । भृङ्गस्य कौञ्चनादं वा काकमण्डूकयोस्तथा । तन्त्रीमृदङ्गशब्दं वा सामतूर्यस्वनांस्तथा । गीताध्ययनवंशानां निर्घोषं क्ष्वेडमेव वा । अपामिव पतन्तीनां शकटस्य च गच्छतः । श्वसतामिव सर्पाणां सदृशः श्रूयते स्वनः ॥' इति । ननु कर्णनादकर्णक्ष्वेडयोर्घोषकृतरूपत्वात् को भेदः? उच्यते, कर्णनादे केवलानिलजनितान् नानाशब्दान् शृणोति । कर्णक्ष्वेडे तु वेणुशब्दमिवेति नियमात् पित्तादिसंसृष्टवातजन्यत्वाच्चेत्यदोषः । प्रतीनाह इति । यथा द्रवगूथो मुखघ्राणविवरेषु प्रतिपद्यते तेन चार्धावभेदको भवति स कर्णप्रतीनाहसंज्ञको रोगः कथितः । तथाहि—'स कर्णगूथो द्रवतां यदा गतो विलायितो घ्राणमुखं प्रपद्यते । तदा स कर्णप्रतिनाहसंज्ञको भवेद्विकारः शिरसोऽर्धभेदकृत्' इति । अयमेव विदेहे दोषोत्कर्षादिभेदेन पठितः । यदुक्तम्—'कफाद्वा मारुताद्वापि सन्निपातेन वा पुनः' इति ॥ १४२ ॥ १४३ ॥

गू०—अष्टादशविधास्तानाह—अष्टादश समाख्याताः कथितास्ते वातादिभेदतो ज्ञेयाः । ननु निदाने कर्णरोगा अष्टाविंशतिरुक्तास्तत्कथमत्राष्टादश ? उच्यते, अत्र कर्णपालीभवाः सप्त भिन्नाः पञ्चकर्णमूलजाः सर्वे त्रिंशद्गणिताः क्वचिच्चिदुक्तत्वाच्च दोषः ॥ १४२॥१४३ ॥

गू०—अथ कर्णपालीरोगसंख्या—

**कर्णपालीसमुद्भूता रोगाः सप्त इहोदिताः ॥१४४॥**
**उत्पातः पालिशोषश्च विदारी दुःखवर्धनः ।**
**परिपोटश्च लेही च पिप्पली चेति संस्कृताः ॥१४५॥**

दी०—कर्णपालीति । कर्णविषयत्वात् कर्णपाल्यस्तदधिकृतरोगाः । कर्णपालीसमुद्भूता इति । कर्णव्यधस्थानोद्भूता इत्यर्थः । ते उत्पातपालीप्रभृतयः । तद्यथा—'गुर्वाभरणसंयोगात्ताडनाद्धर्षणादपि । शोथः पाल्यां भवेच्छ्यावो दाहपाकरुजान्वितः । रक्तो वा रक्तपित्ताभ्यामुत्पातः स गदो मतः' इति । शोषश्चेति । कर्णपालीशोषणात् शोषः विकृतानिलत्वात् । विदारीति । विदारीव विदारीरोगः पाल्यां भवति स प्रसिद्ध एव । दुःखवर्धनत्वात् दुःखवर्धन इति । तथाहि—'संवर्धमानः सहसा दुःखकण्डूरुजान्वितः । शोथो भवति पाकश्च त्रिदोषो दुःखवर्धनः' । परिपोटश्चेति । परिपोटवत् परिपोटः । यदुक्तम्—'सौकुमार्याच्चिरोत्सृष्टे सहसातिप्रवर्धिते । कर्णशोथो भवेत् पाल्यां सरुजः परिपोटवान् । कृष्णारुणनिभः स्तब्धः स वातात् परिपोटकः' इति । लेहीचेति । मांसलेहनाल्लेही रोगः निर्मांसकारीत्यभिप्रायः । अतएव तन्त्रान्तरे परिलेहीशब्दवाच्यः । यदुक्तम्—'कफाऽसृक्कृमयः क्रुद्धाः सर्षपाभा विसारिणः । कुर्वन्ति पिडकां पाल्यां कण्डूदाहरुजान्विताम् । कफासृक्कृमिसंभूतः स विसर्पन्नितस्ततः । लिहेत् स शष्कुलीं पालीं परिलेहीति सा स्मृता' इति । पिप्पली चेति । पाल्यां शोथः पिप्पलीशब्दवाच्यः । तन्त्रान्तरे अयमेवोन्मन्थसंज्ञः । तद्यथा—'कर्णं बलाद्वर्धयतः पाल्यां वायुः प्रकुप्यति । कफं संगृह्य कुरुते शोथं स्तब्धमवेदनम् । उन्मन्थकः सकण्डूको विकारः कफवातजः' इति ॥ १४४ ॥ १४५ ॥

गू०—इह कर्णपालीसमुद्भूता उत्पातपाल्यादयो रोगाः सप्त उदिताः कथिताः ॥ १४४ ॥ १४५ ॥

गू०—अथ कर्णमूलरोगसंख्या—

**कर्णमूलामयाः पञ्च वातात्पित्तात्कफादपि ।**
**सन्निपाताच्च रक्ताच्च—**

**टी०**—कर्णमूलामयानाह—कर्णमूलामयाः पञ्चेत्यादि । कर्णमूलरोगः संनिपातज्वरे उपद्रवरूपत्वेन दर्शितः स च पिडकाकृतिः । तद्यथा—'संनिपातज्वरस्यान्ते कर्णमूले सुदारुणः । शोथः संजायते तेन कश्चिदेव विमुच्यते' इति । वातादीनामुत्कर्षादिभेदेन पञ्च भेदा ज्ञेयाः । कर्णमूलसम्बन्धादत्र कर्णरोगगणनायां पठितो न दोषः ॥

**गू०**—कर्णमूलामयाः पञ्च भवन्ति ते वातादिभेदतो ज्ञेयाः ॥

**गू०**—अथ नासारोगसंख्या—

तथा नासाभवा गदाः ॥ १४६ ॥
अष्टादशैव संख्याताः प्रतिश्यायास्तु तेष्वपि ।
वातात्पित्तात्कफाद्रक्तात्सन्निपातेन पञ्चमः ॥१४७॥
अपीनसः पूतिनासो नासार्शो भ्रंशथुः क्षवः ।
नासानाहः पूतिरक्तमर्बुदं दुष्टपीनसम् ॥ १४८ ॥
नासाशोषो घ्राणपाकः पूयस्रावश्च दीप्तकः ।

**टी०**—तथा नासाभवा गदा इत्यादि । तथेति इन्द्रियाधिष्ठितरोगगणनासम्बन्धात् । नासाभवा रोगा अष्टादश समाख्यातास्तेष्वादौ पञ्चधा प्रतिश्यायमाह—तदुक्तं चरके—'घ्राणमूले स्थितः श्लेष्मा रुधिरं पित्तमेव च । मारुताध्मातशिरसो मारुतं श्यायते प्रति' इति ॥ पञ्चधेति पञ्चप्रकारः, स तु वातादिदोषभेदेन भवति । तेषां केषांचित् ज्ञापनार्थं लक्षणान्याह—यदुक्तम्-'आनद्धा पिहिता नासा तनुस्रावप्रसेकिनी । गलताल्वोष्ठशोषश्च निस्तोदः शङ्खयोरपि । क्षवप्रवृत्तिरत्यर्थं वक्त्रवैरस्यमेव च । भवेत् स्वरोपघातश्च प्रतिश्यायेऽनिलात्मके' इति । पित्तजमाह—'उष्णः सपीतकः स्रावो घ्राणात् स्रवति पैत्तिके । कृशोऽतिपाण्डुः संतप्तो भवेत् तृष्णानिपीडितः । सधूममग्निं सहसा वमतीव स मानवः' इति । कफजमाह—'घ्राणात् कफकृते शीतः कफः पाण्डुर्व्रजेद्बहुः । शुक्लावभासः शूनाक्षो भवेद्गुरुशिरा नरः । कण्ठताल्वोष्ठशिरसां कण्डूभिरभिपीडितः' इति । रक्तजमाह—'रक्तजे तु प्रतिश्याये रक्तस्रावः प्रपद्यते । ताम्राक्षश्च भवेज्जन्तुरुरोघातप्रपीडितः । दुर्गन्धोच्छ्वासवदनगन्धानपि न वेत्ति सः' इति । अत्रापि पित्तप्रतिश्यायलिङ्गान्यपि बोद्धव्यानि तुल्यत्वात् पित्तरक्तयोः । यदुक्तम्—'पित्तप्रतिश्यायकृतैर्लिङ्गैश्चापि समन्वितः' इति । संनिपातजमाह—'भूत्वा भूत्वा प्रतिश्यायो यस्याऽकस्मान्निवर्तते । संपक्वो वाप्यपक्वो वा स सर्वप्रभवः स्मृतः' इति । अत्र यद्यपि दोषत्रयलिङ्गानि नोक्तानि तथापि सर्वत्रभवात् ज्ञातव्यानि । असाध्यश्चायं दुष्टतां गतः सन्निति वदन्ति । तस्मादन्यत्र दुष्टप्रतिश्यायलक्षणं (अतिदुर्गन्धरोगाणां) न पृथक् लिखितम् । तद्यथा—'प्रक्लिद्यते पुनर्नासा पुनश्च परिशुष्यति । पुनरानह्यते चापि पुनर्विव्रियते तथा । निःश्वासश्चातिदुर्गन्धं नरो गन्धं न वेत्ति च । एवं दुष्टप्रतिश्यायं जानीयात् कृच्छ्रसाधनम्' इति । अयं च पञ्चप्रतिश्यायानामेवावस्थान्तरतया न षष्ठो गणनीयः । यतः सर्वे प्रतिश्याया अप्रतिक्रियमाणाः कालान्तरेण दुष्टतां यान्तीति वचनात् । तथाहि—'सर्व एव प्रतिश्याया नरस्याप्रतिकारिणः । दुष्टतां यान्ति कालेन तदाऽसाध्या भवन्ति हि' इति । अपीनस इति । पीनसो नासारोगविशेषः प्रतिश्यायसमानलिङ्ग इति केचित् । यदुक्तम् । 'आनह्यते यस्य विशुष्यते च प्रक्लिद्यते धूप्यति चैव नासा । न वेत्ति यो गन्धरसांश्च जन्तुर्जुष्टं व्यवस्येत् तमपीनसेन । तं वानिलश्लेष्मभवं विकारं ब्रूयात् प्रतिश्यायसमानलिङ्गम्' इति । विदेहस्तु पित्तश्लेष्मजं पठति । तद्यथा—'मातुलुङ्गे चितः श्लेष्मा यदा पित्ताद्विदह्यते । तदाऽसृक् पिच्छिलं नासा बहुसिंहाणकं स्रवेत् । सकण्डूदाहपाकं च तत्तु विद्यादपीनसम्' इति । यत्र पूतिवायुर्वहति स पूतिनाससंज्ञो रोगः कथितः । तथाहि—'दोषैर्विदग्धैर्गलतालुमूले संमूर्छितो यस्य समीरणस्तु । निरेति पूतिं मुखनासिकाभ्यां तं पूतिनासं प्रवदन्ति रोगम्' इति । दोषैरत्यन्तपित्तकफरक्तैः, रक्तस्यापि दोषतुल्यरूपत्वाद्दोषत्वं बहुवचननिर्देशत्वाच्च । तथा विदेहेऽप्युक्तम्—'कफपित्तास्रसंमिश्रं संचितं मूर्ध्नि देहिनम् । विदग्धमूष्मणा गाढं रुजां कृत्वाऽक्षिशङ्खजाम् । ततः प्रस्यन्दते घ्राणात्स्रक्तं पूतिपीतकम्'। पूतिनस्यं तु तं विद्याद् घ्राणकण्डूज्वरप्रदम्' इति । नासार्श इति । नासिकादिजातानामर्शसां चाधिमांसत्वं तेन मांसाङ्कुरत्वसाधर्म्यात् शस्त्रक्षाराग्निसाध्यत्वाच्च तेष्वर्शःप्रयोगः कृतः । यदुक्तम्—'दोषस्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन् । मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसि तान् जगुः' इत्यत्रादिशब्देन नासिकाश्रवणचक्षुर्मेढ्रनाभिप्रभृतयो गृह्यन्ते । एषां लक्षणानि सुश्रुते पठितानि । अत एव

सुश्रुतेन नासारोगा एकत्रिंशत् संगृहीताः । तद्यथा—'अर्बुदं सप्तधा शोथाश्चत्वारोऽर्शश्चतुर्विधम् । चतुर्विधं रक्तपित्तमुक्तं घ्राणेऽपि तद्विदुः' इत्यादि ॥

एतेषां विवरणं तत्रैव ज्ञातव्यम् । भ्रंशथुरिति । तत्र सघनो विदग्धः कफ एव लिङ्गं स भ्रंशथुर्नाम रोगः कथितः । तथाहि—'प्रभ्रश्यते नासिकयोर्हि यस्य सान्द्रो विदग्धो लवणः कफस्तु । प्राक् संचितो मूर्धनि सूर्यतप्तस्तं भ्रंशथुं रोगमुदाहरन्ति' इति । क्षव इति । क्षवश्छिक्का, स तु दोषागन्तुजभेदेन द्विविधो भवति । तद्यथा—'घ्राणाश्रिते मर्मणि संप्रदुष्टो यस्याऽनिलो नासिकया निरेति । कफानुयातो बहुशः सशब्दं तं रोगमाहुः क्षवथुं विधिज्ञाः' इति । आगन्तुजमाह—'तीक्ष्णोपयोगादुपजिघ्रतो वा भावान् कटून-र्कनिरीक्षणाद्वा । सूत्रादिभिर्वा तरुणास्थिमर्मण्युद्घाटितेऽन्यः क्षवथुर्निरेति' इति । दोषजागन्तुज एवात्र गणनीयः । नासानाह इति । आनह्यते इत्यानाहः नासाप्रतिनाह इत्यर्थः । यदुक्तम्—'उच्छ्वासमार्गं तु कफः सवातो रुन्ध्यात् प्रतीनाहमुदाहरन्ति' इति । विदेहेऽप्युक्तम्, यथा—'कफावृतो यदा वायुर्यस्य घ्राणे च तिष्ठति । वृणोतीव तदा घ्राणं स प्रतीनाह उच्यते' इति । पूतिरक्तमिति । पूयरक्तमिति पाठान्तरम् दोषागन्तुजभेदात् प्रतिपादितम् । यदुक्तम्—'दोषैर्विदग्धैरथवापि जन्तोर्ललाटदेशेऽभिहतस्य तैस्तैः । नासा स्रवेत् पूयमसृग्विमिश्रं तं पूयरक्तं प्रवदन्ति रोगम्' इति । अर्बुदमिति । नासार्बुदं प्रसिद्धम् । सुश्रुते तु एकत्रिंशद्गणनापूर्णतायै सप्तधार्बुदस्य संग्रहः । तत्र वातपित्तकफमांसरक्तमेदोभवत्वेन षड्विधमर्बुदं शालाक्यप्रसिद्धम् । विदेहेन सन्निपातजमधिकमुक्तम् । एवं सप्तविधमर्बुदं नासारोगेषु सुश्रुतेनोक्तम् । अत्र तु नाममात्रेणैव कृतार्थत्वात् । दुष्टपीनसमिति । पीनसं नासारोगे प्रसिद्धम् । दुष्टत्वमत्र विकृतदोषारब्धत्वात् । अतएव पक्वामभेदेन द्विविधमित्याचक्षते । तद्यथा—'शिरोगुरुत्वमरुचिर्नासास्रावस्तनुः स्वरः । क्षामः ष्ठीवत्यथाभीक्ष्णमामपीनसलक्षणम्' इति । पक्वलक्षणमाह—'आमलिङ्गान्वितः श्लेष्मा घनः खेषु निमज्जति । स्वरवर्णविशुद्धिश्च परिपक्वस्य लक्षणम्' इति । नासाशोष इति । नासायां शोषोऽत्र परिशोषः । यदुक्तम्—'घ्राणाश्रिते स्रोतसि मारुतेन गाढं प्रतप्ते परिशोषिते च । कृच्छ्रोच्छ्वसेदूर्ध्वमधश्च जन्तुर्यस्मिन् स नासापरिशोष उक्तः' । अत्र प्रतप्त इत्यनेन च रक्तपित्तेऽपि गम्यते विदेहोक्तत्वात् । यतः 'वातपित्तं यदा घ्राणं कफरक्ते विशोषयेत् । तदा कृच्छ्रोच्छ्वसेज्जन्तुर्नासा शुष्का विदीर्यते । स्रवत्कीर्णेव चूर्णेन नासाशोषं तु तं विदुः' इति । घ्राणपाक इति । घ्राणपाको नासापाकः स च व्रण इत्युपलक्षित इत्यभिप्रायः । यदुक्तम्—'घ्राणाश्रितं पित्तमरूंषि कुर्याद्यस्मिन् विकारे बलवांश्च पाकः । तं नासिकापाकमिति व्यवस्येद्विक्लेदकोथावथवापि यत्र' इति । पूयस्राव इति । पूयस्रावो नासास्रावः । तद्यथा—'घ्राणाद्घनः पीतसितस्तनुर्वा दोषः स्रवेत् स्रावमुदाहरेत्तम्' (इति) विदेहेऽपि 'स्रोतः शृङ्गाटके श्लेष्मा चितः क्लेदितमूष्मणा । विशेषात् स्यन्दते रात्रौ नासास्रावं तु तं विदुः' इति । दीप्तकमिति । यत्र प्रज्वलितेव नासा भवति । तथा चोक्तम्—'घ्राणे भृशं दाहसमन्विते तु विनिःसरेद्धूम इवेह वायुः । नासा प्रतप्तेव च यस्य जन्तोर्व्याधिं तु तं दीप्तमुदाहरन्ति' इति । विदेहेऽपि यथा—'धूमायते यदा नासा बलात् कुष्यति दह्यते । निश्वरेत् तप्त उच्छ्वासो व्याधिं तं दीप्तमादिशेत्' इति ॥ १४६–१४८ ॥

**गू०**—तथा तेन प्रकारेण नासाभवा गदा अष्टादशैव संख्याताः ते प्रतिश्यायादयः । निदाने एकविंशतिनासारोगा उक्ता अत्राष्टादशेति तच्चिन्त्यम् ॥ १४६–१४८ ॥

**गू०**—अथ शिरोरोगसंख्या—

**तथा दश शिरोरोगा वातेनार्धावभेदकः ॥ १४९ ॥**
**शिरस्तापश्च वातेन पित्तपीडा तृतीयका ।**
**चतुर्थी कफजा पीडा रक्तजा सन्निपातजा ॥१५०॥**
**सूर्यावर्ताच्छिरःकम्पात्क्रिमिभिः शङ्खकेन च ।**

**दी०**—तथा दश शिरोरोगा इत्यादि । तथेत्यूर्ध्वजत्रुगतरोगप्रस्तावात् दश शिरोरोगाः कथिताः । शिरोरोगशब्देन शिरोगतशूलरूपा रुजोऽभिधीयन्ते । अतएव शिरोरोगा इत्युच्यन्ते । तेष्वर्धावभेदकमाह—अर्धावभेदकोऽर्धशिरोव्यथारूप इत्यर्थः । तद्यथा—'केवलः सकफो वाऽर्धं गृहीत्वा शिरसोऽनिलः । मन्याभ्रूशङ्खकर्णाक्षिललाटार्धेऽतिवेदनाम् । शस्त्रारणिनिभां कुर्यात् तीव्रां सोऽर्धावभेदकः । नयनं चाथवा श्रोत्रमतिवृद्धो विनाशयेत्' इति । ननु सुश्रुते स्वयं दोषजः पठितः । यथा—'यस्योत्तमाङ्गं रुजतेऽर्धमात्रं सतोद-

मेदभ्रममोहशूलैः । पक्षाद्दशाहादथवाऽप्यकस्मात्तस्यार्धभेदं त्रितयाद्व्यवस्येत्' इति । तत् कथं वातेनैव दर्शितः? उच्यते, वातप्रकोपादत्र पित्तकफौ तस्याऽनुबन्धौ बोद्धव्यौ । यतः—'एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेत्' इत्यादि । विकृतिविषयसमवायारब्धत्वान्निर्देश इत्यदोषः । तथाह्युक्तम्—'सर्व एव शिरोरोगाः सन्निपातसमुद्भवाः । ओत्कर्ष्यादैश्च बलिभिः कीर्तितास्तद्विदा दश' इति । शिरस्तापश्चेति । अयं च वातेन भवति । शिरस्तापः शिरोरुक । तन्त्रान्तरे वातजोऽयं शिरोरोग इत्यर्थः । यदुक्तम्—'यस्मानिमित्तं शिरसो रुजश्च भवन्ति तीव्रा निशि चातिमात्रम् । बन्धोपतापैः प्रशमश्च यत्र शिरोभितापः स समीरणेन' इति । पित्तात् पीडेति । शिरःपीडा पित्तप्रकोपादपि भवति । अयं तृतीयो भेदः । यद्यथा—'यस्योष्णमङ्गारचितं तथैव भवेच्छिरो धूप्यति चाक्षिनासम् । शीतेन रात्रौ च भवेच्छमश्च शिरोभितापः स च पित्तकोपात्' इति । चतुर्थी कफजा पीडेति । शिरसि कफजा पीडा भवति स चतुर्थो भेद इत्यभिप्रायः । तद्यथा—'शिरो भवेद्यस्य कफोऽवदिग्धं गुरु प्रतिष्टब्धमथो हिमं च । शूनाक्षिकूटं वदनं च यस्य शिरोभितापः स कफप्रकोपात्' इति । रक्तजेति । अत्र रक्तजा पीडा कथिता । 'रक्तात्मकः पित्तसमानलिङ्गः स्पर्शासहत्वं शिरसो भवेच्च' इति । सन्निपातजेति । त्रिदोषजनितापीत्यर्थः ,। तद्यथा—'शिरोऽभितापे त्रितयप्रवृत्ते सर्वाणि लिङ्गानि समुद्भवन्ति' इति । सूर्यावर्तादिति । सूर्यावर्तादित्यनेन पीडा कथिता । साच रुक् सूर्यप्रवृत्तौ भवति सूर्याऽपगमे विनिवर्तते स सूर्यावर्तशब्दवाच्यो रोगः । तथाहि—'सूर्योदयं या प्रतिमन्दमन्दमक्षिभ्रुवं रुक् समुपैति गाढम् । विवर्धते चांशुमता सहैव सूर्यापवृत्तौ विनिवर्तते च । सर्वात्मकं कष्टतमं विकारं सूर्यापवर्तं तमुदाहरन्ति' इति । शिरःपाकादिति । शिरःपाकादेवासृग्वसादीनां संक्षयेण शिरसि पीडा भवतीत्यभिप्रायः । अत एव सुश्रुते—क्षयजो विकार इति पठितः । यतः 'असृग्वसाश्लेष्मसमीरणानां शिरोगतानामिह संक्षयेण । क्षयप्रवृत्तः शिरसोऽभितापः कष्टो भवेदुग्ररुजातिमात्रम् ॥ संस्वेदनैश्छर्दनधूमनस्यैरसृग्विमोक्षैश्च विवृद्धिमेति' इति । अयं विदेहेऽपि पठ्यते—'शून्यं भ्रमति तुद्येत शिरो विभ्रान्तनेत्रता । मूर्च्छा गात्रावसादश्च शिरोरोगे क्षयात्मके' इति । कृमिभिरिति । शिरसि कृमिजा पीडा भवति इति । यदुक्तम्—'निस्तुद्यते यस्य शिरोऽतिमात्रं संभक्ष्यमाणं स्फुरतीव चान्तः । घ्राणाच्च गच्छेद्रुधिरं सपूयं शिरोऽभितापः कृमिभिः स घोरः' इति । तथैवाह चरकः—'कृमीणां दर्शनेन च' इति । शङ्खकेनेति । शङ्खदोषेषु दुष्टा दोषाः शोथत्वेन रुजां कुर्वन्तीत्यनेन शङ्खरोगो वाच्यः । तद्यथा—'पित्तरक्ताऽनिला दुष्टाः शङ्खदेशे विमूर्च्छिताः । तीव्ररुग्दाहरागं वा शोथं कुर्वन्ति दारुणम् । स शिरोविषवद्वेगान्निरुध्याशु गलं तथा । त्रिरात्राज्जीवितं हन्ति शङ्खको नामतः परम् । त्र्यहाज्जीवति भैषज्यं प्रत्याख्येयं समाचरेत्' इति । एवं सुश्रुतोक्ता दश शिरोरोगाः प्रतिपादिताः । माधवाचार्येण तु स्वसंग्रहेऽनन्तवातोऽधिकः पठितः । तन्त्रान्तरदर्शनात् । तद्यथा—'दोषास्तु दुष्टास्त्रय एव मन्यां संपीड्य घाटासु रुजां सुतीव्राम् । कुर्वन्ति योऽक्षिभ्रुवि शङ्खदेशे स्थितिं करोत्याशु विशेषतश्च ॥ गण्डस्य पार्श्वे तु करोति कम्पं हनुग्रहं लोचनजांश्च रोगान् । अनन्तवातं तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारम्' इति । सर्वत्र सर्वजेषु प्रतिपादितत्वात् अत्रापि न गणितः ॥ १४९ ॥ १५० ॥

**गू०**—तथा दश शिरोरोगा उक्ताः ते अर्धभेदकादयः । निदाने एकादश शिरोरोगास्तच्चिन्त्यम् ॥ १४९ ॥ १५० ॥

**गू०**—अथ कपालरोगसंख्या—

**तथा कपालरोगाः स्युर्नव तेषूपशीर्षकम् ॥ १५१ ॥**
**अरुंषिका विद्रधिश्च दारुणं पिडिकाऽर्बुदम् ।**
**इन्द्रलुप्तं च खलतिः पलितं चेति ते नव ॥ १५२ ॥**

**दी०**—तथा कपालरोगाः स्युर्नव तेषूपशीर्षकमित्यादि । शीर्षकसमीपे शीर्षकवत् यः शोथः स उपशीर्षकशब्दवाच्यः । नीरुक्शोफत्वादुपशीर्षकः । यदुक्तम्—'कपाले पवने दुष्टे गर्भस्थस्याऽपि जायते । सवर्णो नीरुजः शोफस्तं विद्यादुपशीर्षकम्' इति । अरुंषिकेति । अरुंषीति व्रणानि कथितानि । तान्यपि शिरसि भवन्ति । तद्यथा—'अरुंषि बहुवक्त्राणि बहुक्लेदीनि मूर्धनि । कफाऽसृक्कृमिकोपेण नृणां विद्यादरुंषिकाम्' इति । विद्रधिश्चेति । विद्रधिः प्रसिद्धा । सा तु मूर्धन्यपि भवति बहिर्गतमर्माश्रितत्वात्, अस्यां लक्षणं विद्रधिनिदाने ज्ञातव्यम् । दारुणमिति । दारुणं केशभूमौ भवति । लोकेऽपि फ्यांसशब्दवाच्यो रोग-

१ पार्शः पा० 'फियाश' पा० ।

विशेषः । तदुक्तम्—'दारुणा कण्डरा रूक्षा केशभूमिः प्रजायते । कफवातप्रकोपेण विद्याद्दारुणकं तु तम्' इति । यद्यपि कफवातप्रकोपादित्युक्तं तथापि अत्र पित्तरक्तानुबन्धो द्रष्टव्यः । यदुक्तं विदेहे—'यदभ्रपटलाभासं सरजस्कं शिरस्त्वचि । पारुष्यं जायते जन्तोस्तस्य रूपं विशेषतः ॥ तोदैः समन्वितं वातात् सकण्डु गौरवं कफात् । सपिपासं सदाहार्तिरोगं पित्तासजं तथा' इति । पिडकेति । शिरसि याः पिडका भवन्ति ताः पिडकाः रोगा कथिताः । अयमेव क्षुद्ररोगेषु इरिवेल्लिकाशब्दवाच्यः । तथाहि—'पिडकामुत्तमाङ्गस्थां वृत्तामुग्ररुजाज्वरां । सर्वात्मिकां सर्वलिङ्गां जानीयादिरिवेल्लिकाम्' इति । अत्र तु शिरःस्थितत्वात् लिखिता इति न दोषः । अर्बुदमिति । अर्बुदवदर्बुदं व्रणविशेषः । 'गात्रप्रदेशे क्वचिदेव' इत्यनियमाच्छिरस्यपि भवति । तल्लक्षणं तत्रैव बोद्धव्यम् । इन्द्रलुप्तमिति । इन्द्रलुप्तो 'वादिपुरा' शब्दवाच्यो रोमविशेषः । अस्यैव पर्यायकथनं खालित्यं रुझ् चेति । तथाह्युक्तम्—'रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम् । प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः ॥ रुणद्धि रोमकूपांस्तु ततोऽन्येषामसंभवः । तदिन्द्रलुप्तं खालित्यं रुझ् चेति च विभाव्यते' इति । अत्र तु इन्द्रलुप्तखालित्ययोः पृथग्ग्रहणं कार्त्तिकाचार्यवचनात् । तन्मते तु इन्द्रलुप्तं श्मश्रुषु भवति । खालित्यं शिरस्येव, अत एव विदेहवचनादिन्द्रलुप्तं स्त्रीणां न भवति । यदुक्तम्—'अत्यन्तसुकुमाराङ्ग्यो रजो दुष्टं स्रवन्ति च । अव्यायामरता यस्माचेन्द्रलुप्तं ततः स्त्रियः' इति । एवमिन्द्रलुप्तं खलतिश्च पृथगत्र निरूपितम् । पलितमिति । केशानां शुक्लभावेन पलितमित्युच्यते । तद्यथा—'क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः । पित्तं च केशान् पचति पलितं तेन जायते' इति । तत् पलितं द्विविधं भवति, अकालजनितं कालजनितं च, अत्रैवोक्तत्वात् । यतः क्रोधादिकृतेन शिरोगतेन वैकृतं, पित्तेन पुनः प्राकृतं पलितमिति । अन्यथा पित्तोष्मणोरभेदात् पुनरुक्तिदोषः स्यात् । एतेन वैकृतमकालजं, वयःकृतं तु पित्तेनेत्यर्थः । केचिदेतच्चाकालजलक्षणं मन्यन्ते । अन्यैस्त्रिभिरेव दोषैः स्यादिति कथयन्ति, तत्र शोकश्रमाभ्यां जनितवातेन शरीरोष्मणो विक्षेपाच्छिरोगतत्वं तेनाऽनिलोऽपि लभ्यते पित्तं च साक्षादुपात्तं, श्लेष्माऽपि केशशुक्लताकरणको गृह्यते । एतेन दोषत्रयसहितः शरीरोष्मा पलितहेतुरिति वाक्यार्थः । यदुक्तं चरके—'तेजोनिलाद्यैः सह केशभूमिं लब्ध्वा तु कुर्यात् पलितं नरस्य । किंचित्तु दग्ध्वा पलितानि कुर्याद्धरित्प्रभत्वं च शिरोरुहाणाम्' इति ॥ १५१ ॥ १५२ ॥

गू०—तथा नवकपालरोगाः स्युः, ते तु उपशीर्षादयः ॥ १५१ ॥ १५२ ॥

गू०—अथ नेत्ररोगसंख्या—

तथा नेत्रभवाः ख्याताश्चतुर्नवतिरामयाः ।
तेषु वर्त्मगदाः प्रोक्ताश्चतुर्विंशतिसंज्ञकाः ॥ १५३ ॥
कृच्छ्रोन्मीलः पक्ष्मपातः कफोत्क्लिष्टश्च लोहितः ।
अरुन्निमेषः कथितो रक्तोत्क्लिष्टः कुकूणकः ॥ १५४ ॥
पक्ष्मार्शः पक्ष्मरोधश्च पित्तोत्क्लिष्टश्च पोथकी ।
क्लिष्टवर्त्मा च बहलः पक्ष्मोत्संगस्तथार्बुदम् ॥१५५॥
कुम्भिका सिकतावर्त्म लगणोऽञ्जननामिका ।
कर्दमः श्याववर्त्मा च बिसवर्त्मा तथाऽलजी ॥१५६॥
उत्क्लिष्टवर्त्मेति गदाः प्रोक्ता वर्त्मसमुद्भवाः ।
नेत्रसंधिसमुद्भूता नव रोगाः प्रकीर्तिताः ॥ १५७ ॥
जलस्रावः कफस्रावो रक्तस्रावश्च पर्वणी ।
पूयस्रावः क्रिमिग्रन्थिरुपनाहस्तथाऽलजी ॥ १५८ ॥
पूयालस इति प्रोक्ता रोगा नयनसंधिजाः ।
तथा शुक्लगता रोगा बुधैः प्रोक्तास्त्रयोदश ॥१५९॥
सिरोत्पातः सिराहर्षः सिराजालश्च शुक्तिका ।
शुक्लार्म चाधिमांसार्म प्रस्तार्यर्म च पिष्टकः ॥१६०॥
शिरायाश्चिपिटं चैव कफग्रथितकोऽर्जुनः ।
स्नाय्वर्म शोणितार्म स्यादिति शुक्लगता गदाः १६१
तथा कृष्णसमुद्भूताः पञ्च रोगाः प्रकीर्तिताः ।
शुद्धशुक्रं शिराशुक्रं क्षतशुक्रं तथाऽजका ॥ १६२ ॥
शिरासंगश्च सर्वेऽपि प्रोक्ता कृष्णगता गदाः ।
काचं तु षड्विधं ज्ञेयं वातात्पित्तात्कफादपि ॥ १६३ ॥
सन्निपाताच्च रक्ताच्च षष्ठं संसर्गसंभवम् ।
तिमिराणि षडेव स्युर्वातपित्तकफैस्त्रिधा ॥ १६४ ॥
संसर्गेण च रक्तेन षष्ठं स्यात्संनिपाततः ।
लिङ्गनाशः सप्तधा स्याद्वातात्पित्तात्कफेन च ॥१६५॥
त्रिदोषैरुपसर्गेण संसर्गेणासृजा तथा ।
अष्टधा दृष्टिरोगाः स्युस्तेषु पित्तविदग्धकम् ॥१६६॥
अम्लपित्तविदग्धं च तथैवोष्णविदग्धकम् ।
नकुलान्ध्यं धूसरान्ध्यं रात्र्यान्ध्यं ह्रस्वदृष्टिकः १६७
गम्भीरदृष्टिरित्येते रोगा दृष्टिगता मताः ।

**(चत्वारश्चाधिमन्थाः स्युर्वातपित्तकफास्रतः ॥१६८)**
**अभिष्यन्दाश्च चत्वारो रक्ताद्दोषैस्त्रिभिस्त्रिधा।**
**सर्वाक्षिरोगाश्चाष्टौ स्युस्तेषु वातविपर्ययः ॥ १६९ ॥**
**अल्पशोफोऽन्यतोवातस्तथा पाकात्ययः स्मृतः।**
**शुष्काक्षिपाकश्च तथा शोफोऽध्युषित एव च ॥१७०**
**हताधिमन्थ इत्येते रोगाः सर्वाक्षिसंभवाः।**

**टी०**—तथेत्यनेनेन्द्रियसाधर्म्यान्नासाश्रवणादीनामनन्तरं नेत्ररोगगणनारम्भ इत्यभिप्रायः। सा चतुर्नवतिसंख्याकैरामयैः प्रतिपादिता। तद्यथा—'नव रोगा नेत्रसन्धौ चतुर्विंशतिवर्त्मजाः। कृष्णभागगताः पञ्च शुक्लभागे त्रयोदश। षट् काचे षट् च तिमिरे अष्टौ दृष्टिगता मताः। लिङ्गनाशास्तथा सप्त चत्वारश्चाधिमन्थजाः। अभिष्यन्दाश्च चत्वारस्तथाऽष्टौ सर्वजाः स्मृताः' इत्यत्राचार्येण संगृहीताः। सुश्रुते तु स्थानविशेषादेव षट्सप्ततिः कथिताः। यतः—'नव सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः। शुक्लभागे दशैकस्तु चत्वारः कृष्णभागजाः॥ सर्वाश्रयाः सप्तदश दृष्टिजा द्वादशैव तु। द्वौ च बाह्याश्रयावन्तौ त्वनिमित्तनिमित्तजौ॥ षट्सप्ततिर्नेत्ररोगाः संग्रहेण प्रकीर्तिताः' इति। दोषभेदेनाऽपि षट्सप्ततिरेव। यदाह सुश्रुतः—'तैस्त्रिभिस्त्रिंशदुक्तास्ते कफेनाभ्यधिकास्त्रयः। रक्तजाः षोडश ज्ञेयाः सर्वजाः पञ्चविंशतिः॥ बाह्यौ पुनर्द्वौ च तथा रोगाः षट्सप्ततिः स्मृताः' इति। अत्र **शार्ङ्गधराचार्येण** यच्चतुर्नवतिसंख्याग्रहणं कृतं तन्नेत्ररोगान्तर्नेत्ररोगनिदानतया प्रतिपादितत्वात्। यथा सर्वनेत्रामयानां हेतुभूतोऽभिष्यन्द इति। तदुक्तम्—'वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः। प्रायेण जायते घोरः सर्वनेत्रामयाकरः' इति। सुश्रुतेऽपि यथा—'प्रायेण सर्वे नयनाऽऽमयास्ते भवन्त्यभिष्यन्दनिमित्तमूलाः' इति। अधिमन्थस्याप्यभिष्यन्दजन्यत्वम्। यदुक्तम्—'वृद्धैरेतैरभिष्यन्दैर्नराणामक्रियावताम्। तावन्त्यस्त्वधिमन्थाः स्युर्नयने तीव्रवेदनाः' इति। तथैव दृष्टिगतरोगाणामपि तिमिरकाचलिङ्गनाशाश्च हेतुभूतपरम्परया व्यवस्थिताः। तद्यथा—'तिमिरं रागतां याति रागः काचत्वमेति च। काचात् संजायते नीली तदान्धो जायते नरः' इत्यादिना। तेनाऽत्र निदानभूतानां रोगाणामपि संग्रहः कृत इत्यदोषः। एतेषां लक्षणानि वक्ष्यमाणेषु नेत्रगदेषु दर्शयिष्यामः॥

अथ चतुर्नवतिनेत्ररोगाणां विवरणमाह—तेषु वर्त्मगदा इत्यादि। तेषु पूर्वोक्तचतुर्नवतिसंख्यागदेषु वर्त्मगदाः पक्ष्ममूलगतरोगाः। ते चतुर्विंशतिभेदाः कृच्छ्रोन्मीलप्रभृतयः। तद्यथा कृच्छ्रोन्मील इति। यत्र कृच्छ्रेण महता कष्टेन उन्मीलनमुद्घाटनं भवति। अतएव तन्त्रान्तरे कुञ्चनं नामेति कथयन्ति। यथा—'वाताद्या वर्त्मसंकोचं जनयन्ति मला यदा। तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः' इति। पक्ष्मणां शातनं भवति स पक्ष्मशात इति कथितः। तेनान्यत्र पक्ष्मशातः प्रसिद्धः। यदुक्तम्—'वर्त्मपक्ष्माशयगतं पित्तं रोमाणि शातयेत्। कण्डूं दाहं च कुरुते पक्ष्मशातं तमादिशेत्' इति। कफोत्क्लिष्ट इति। कफस्योत्क्लिष्टत्वेन प्रक्लिन्नवर्त्मत्वं जन्यते तेन प्रक्लिन्नवर्त्मेति नाम्ना प्रसिद्धः। तद्यथा—'अरुजं बाह्यतः शूनं वर्त्म यस्य नरस्य हि। प्रक्लिन्नवर्त्म तद्विद्यात् क्लिन्नमत्यर्थमन्तरा' इति। एतेन चक्षुष्येण पिल्लाख्यं पठितम्। यथा—'भृशं प्रक्लिद्यते वर्त्म कण्डूमन्मन्दवेदनम्। विद्यात् प्रक्लिन्नवर्त्मेति तत् पिल्लं सन्निपातजम्' इति। लोहित इति। लोहिताकाराङ्कुरत्वेन यथार्शस्तथायमपि। अतएवान्यत्र शुष्कार्शः कथितम्। तद्यथा—'दीर्घाङ्कुरः खरः स्तब्धो दारुणो ह्यन्तरोद्भवः। व्याधिरेषोऽभिविख्यातः शुष्कार्श इति संज्ञितः' इति। निमेष इति निमेषसंज्ञया प्रसिद्धः। यतः—'निमेषिणीः सिरा वायुः प्रविष्टो वर्त्मसंश्रयः। चालयत्यक्षिवर्त्मानि निमेष इति तं विदुः' इति। अयमपि विदेहे असाध्यः कथितः। यदुक्तम्—'निमेषिणीः सिरा वायुः प्रविश्य व्यवतिष्ठते। अत्यर्थं चालयेद्वर्त्मनिमेषः स न सिद्ध्यति॥' रक्तोत्क्लिष्ट इति रक्तेनोत्क्लिष्टत्वाद्रक्तार्शोऽन्यत्र प्रतिपादितम्। यथा—'यः स्थितो वर्त्ममध्ये तु लोहितो मृदुरङ्कुरः। तद्रक्तजं शोणितार्शश्छिन्नं भिन्नं प्रवर्धते' इति। एतदसाध्यत्वेन विदेहेऽपि दर्शितम्। यथा—'वायुः शोणितमादाय सिराणां प्रमुखस्थितः। जनयत्यङ्कुरं ताम्रं वर्त्मनि च्छिन्नरोहणम्। तच्छोणितार्शोऽसाध्यं स्याद्रक्तस्राव्यथ नीरुजम्' इति। कुकूणकोऽन्यत्र बालरोगे पठितः। बालानामतीव सम्भवत्वात्। अक्षिगतभागेनात्र गणितो न दोषः। तद्यथा—'कुकूणकः क्षीरदोषाच्छिशूनामक्षिवर्त्मनि। जायते तेन तन्नेत्रं कण्डूरं च स्रवेन्मुहुः। शिशुः कुर्याल्ललाटाक्षिकूटनासावघर्षणम्। शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मी-

त्वने क्षमः' इति । पक्ष्मार्श इति । यत्र कर्कटीबीजसदृशाः पिडका वर्त्मनोऽभ्यन्तर्बहिः स्रवन्ति तत् पक्ष्मार्शः कथितम् । तथाहि—'एर्वारुबीजप्रतिमाः पिडका मन्दवेदनाः । श्लक्ष्णाः खराश्च वर्त्मस्थास्तदर्शोवर्त्म कीर्त्यते' इति । सन्निपातजमिदम् । तथाच विदेहः—'नीरुजा कठिना वर्त्म पक्ष्मान्तर्बाह्यतोऽपि वा । पिडका सन्निपातेन तदर्शोवर्त्म कीर्त्यते' इति पक्ष्मरोध इति । पक्ष्मरोधो वर्त्मबन्धः कथितः । यत्र शोथयोगाच्च यथावन्नयनं पिदधाति वर्त्म एष सन्निपातजः । तथाहि—'कण्डूमतात्पतोदेन वर्त्मशोथेन यो नरः । न स सत् छादयेदक्षि भवेद्बन्धः स वर्त्मनि'इति । पित्तोत्क्लिष्ट इति । उत् क्लिष्टं पित्तं यत्र स पक्ष्मप्रकोप इति नाम्ना प्रसिद्धः । यदुक्तम्—'प्रचालितानि वातेन पक्ष्माण्यक्षि विशन्ति हि । घृष्यन्त्यक्षि मुहुस्तानि संरम्भं जनयन्ति च ॥ असिते च सिते भागे मूलकोशात् पतन्ति हि । पक्ष्मकोपः स विज्ञेयो व्याधिः परमदारुणः' इति । अयमपि सन्निपातजो याप्य एव । पोथकीति । यत्र सर्षपसदृशाः पिडका भवन्ति स पोथकीशब्दवाच्यः । यथा—'स्राविण्यः कण्डरा गुर्व्यो रक्तसर्षपसन्निभाः । पिडकाश्च रुजावन्त्यः पोथक्य इति ताः स्मृताः' इति । श्लिष्टवर्त्मेति । वर्त्मनः श्लिष्टत्वेन । अक्लिन्नवर्त्म इति नामान्तरं पक्ष्मणामसंलग्नत्वात् । तथाहि—'यस्य धौतान्यधौतानि संनह्यन्ते पुनः पुनः । वर्त्मान्यपरिक्लिन्नानि विद्यादक्लिन्नवर्त्म तत्' इति । एके श्लिष्टस्थाने क्लिष्टवर्त्मेति पठन्ति । तत्र क्लिष्टत्वं वेदनाल्पयोगादवगन्तव्यम् । यतः—'मृद्वल्पवेदनं ताम्रं यद्वर्त्म सममेव च । अकस्माच्च भवेद्रक्तं क्लिष्टवर्त्मेति तद्विदुः' इति । बहल इति । यत्र त्वग्वर्णसदृश्यः पिडका भवन्ति तद्बहलवर्त्मेति संज्ञया कथितम् । तथाहि—'वर्त्मोपचीयते यस्य पिडकाभिः समन्ततः । सवर्णाभिः स्थिराभिश्च विद्याद्बहलवर्त्म तत्' इति । पक्ष्मोत्सङ्ग इति । वर्त्मन एवाभ्यन्तरे उपरि सोत्सेधा पिडका जायते । तेनोत्सङ्गपिडकान्यत्र कथिता । यथा—'अभ्यन्तरमुखी ताम्रा बाह्यतो वर्त्मनश्च या । सोत्सङ्गोत्सङ्गपिडका रक्तजा स्थूलकण्डरा' इति । इयमपि **विदेहगदाधराभ्यां** वर्त्मनि एव जाता दर्शिता । यदाहतुः—'वर्त्मोत्सङ्गेऽधरे जन्तोः संनिपातात् प्रजायते । अभ्यन्तरमुखी स्थूला बाह्यतश्चापि दृश्यते । पिडका पिडकाभिश्च चिताऽन्याभिः समन्ततः । उत्सङ्गपिडका नाम कठिना मन्दवेदना । प्रभिन्ना संस्रवेत् स्रावं कुक्कुटाण्डरसोपमम्' इति । अर्बुदमिति । वर्त्मार्बुदं तच्च ग्रन्थिरूपेण स्थितम् । तद्यथा—'वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम् । आचक्षतेऽर्बुदमिति सरक्तमविलम्बितम्' इति । कुम्भिकेति कुम्भाण्डलता तद्बीजतुल्या कुम्भिका वाच्या । अन्ये कुम्भीका कच्छदेशोद्भवा दाडिमाकारफला । तद्बीजतुल्यपिडका भिद्यमाना सती स्वयमेव पूर्णोदरा भवति । यदुक्तम्—'वर्त्मान्ते पिडका ध्माता भिद्यन्ते च स्रवन्ति च । कुम्भीकाबीजसदृशाः कुम्भीकाः संनिपातजाः' इति । सिकतावर्त्मेति । सिकता शर्करा तत्सदृशाभिः पिडकाभिश्चितं यद्वर्त्म भवति तत् सिकतावर्त्मेति कथितम् । तद्यथा—'पिडकाभिः सुसूक्ष्माभिर्घनाभिरभिसंवृता । पिडका या खरा स्थूला सा ज्ञेया वर्त्मशर्करा' इति । अलगन इति । यत्र वर्त्ममूले कोलप्रमाणो ग्रन्थिः स अलगन इति रोगविशेषः कथितः । तथाच—'अपाकी कठिनः स्थूलो ग्रन्थिर्वर्त्मभवोऽरुजः । सकण्डूपिच्छिलः कोलप्रमाणोऽलगनोऽस्तु सः' इति । अञ्जननामिकेति । वर्त्मजा कोमला या पिडका साऽञ्जननामिकेति प्रसिद्धा । यदुक्तम्—'दाहतोदवती ताम्रा पिडका या तु वर्त्मजा । मृद्वी मन्दरुजा सूक्ष्मा ज्ञेया साऽञ्जननामिका' इति । कर्दम इति । प्रागुक्तक्लिष्टलक्षणमेव यदा पित्तं मिलितं पुनः शोणितं विक्लिन्नत्वमापन्नं भवति स वर्त्मकर्दम इति कथितः । तथाहि—'क्लिष्टं पुनः पित्तयुतं शोणितं विदहेद्यदा । ततः क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमः' इति । श्याववर्त्मेति । श्यावत्वमत्र वाताधिकत्वेन बोद्धव्यम् । अत एवं वेदनान्वितमित्युक्तम् । तथाहि—'वर्त्म तद्बाह्यतोऽन्तश्च श्यावं शूनं सवेदनम् । तदाहुः श्याववर्त्मेति नेत्ररोगविशारदाः' इति । अग्निदग्धमिव श्यावत्वमित्येके । तथाच **निमिः**—'दुष्टश्लेष्मानिलात्पित्तं वर्त्मनोश्चीयते यदा । अग्निदग्धनिभं श्यावं श्याववर्त्मेति तद्विदुः' इति । विसवर्त्मेति । बिसं मृणालं तच्छिद्राकारच्छिद्रान्वितः शोथो वर्त्ममूले भवति तद्बिसवर्त्मेति नाम कथितम् । तदुक्तम्—'त्रयो दोषा बहिः शोथं कुर्युश्छिद्राणि वर्त्मनोः । प्रस्रवन्त्यन्तरुदकं बिसवद्बिसवर्त्म तत्' इति । अलजीति । यद्यप्यलजी वक्ष्यमाणसन्धिगतरोगेषु दर्शिता तथाप्यत्र प्रसंगात् प्रसिद्धिगतत्वात् पक्ष्मसन्धावपि भवतीत्यदोषः । यदुक्तम्—

'वर्तुलाकारपिडका सूक्ष्मा ताम्रा च वर्त्मनि । सरुजा शोणितोत्क्लिष्टा दारुणा त्वलजी स्मृता' इति । उत्क्लिष्टवर्त्मेति । उत्क्लिष्टो वातस्तेन व्याप्तं यद्वर्त्म । अतएव तन्त्रान्तरे वातहतवर्त्म कथितम् । यथा—'विमुक्तसन्धि निश्चेष्टं वर्त्म यस्य निमील्यते । एतद्वातहतं वर्त्म जानीयादक्षिचिन्तकः' इति । एवं वर्त्मरोगाश्चतुर्विंशतिः प्रोक्ताः ॥

इदानीं नेत्ररोगेष्वेव सन्धिगतान् नवभेदान् आह—नेत्रेति । पूर्वोक्तेषु चतुर्नवतिनेत्ररोगेषु नव रोगा ये सन्धिगतास्तेषां विवरणं लिख्यते । यथा—जलस्राव इति । जलस्रावोऽत्र पित्ताद्बोद्धव्यः । जलाभस्रावदर्शनात् । तद्यथा—'हरिद्राभं नीलमुष्णं जलाभं पित्तस्रावः संस्रवेत् सन्धिमध्यात्' इति । यतस्तन्त्रान्तरेऽपि चत्वार एव स्रावा उक्ताः । तदुक्तं—'गत्वा सन्धीनश्रुमार्गेण दोषाः कुर्युः स्रावान् लक्षणैः स्वैरुपेतान् । तं हि स्रावं नेत्रनाडीमथैके तस्या लिङ्गं कीर्तयिष्ये चतुर्धा' इति । तेनात्र जलस्राव इति कथितः । पूयस्रावश्च संनिपातजः स्रावः कथितः । ननु वातजः स्रावः कुतो नोक्तः ? सत्यम्—केवलवातेन स्रावाभावात् । अतो विदेहेऽपि चत्वार एव प्रतिपादिताः । तद्यथा—'संनिपातात् कफात् रक्तात् पित्तात् स्रावोऽक्षिसन्धिषु' इति । कफस्राव इति । कफेन स्रावो घनो भवति नीरुजश्च । यदुक्तम्—'श्वेतं सान्द्रं पिच्छिलं यः स्रवेत्तु श्लेष्मस्रावो नीरुजः संप्रदिष्टः' इति । रक्तस्राव इति । रक्तस्रावः शोणितोत्थग्रहणात् । अत्र सरक्तपूयं स्रवति । यतः—'रक्तस्रावः शोणितोत्थो विकारः स्रवेद्दुष्टं तत्र रक्तं सपूयम्' इति । पर्वणीति । शुक्लकृष्णसन्धावेव पर्वणी भवति । यदुक्तम्—'ताम्रा तन्वी दाहशूलोपपन्ना ज्ञेया रक्तात् पर्वणी वृत्तशोफा । जाता सन्धौ कृष्णशुक्लेऽलजी स्यात् तस्मिन्नेव ख्यापिता पूर्वलिङ्गैः' इति । वक्ष्यमाणाऽलजी चापि तस्मिन्नेव कृष्णशुक्लसन्धौ पूर्वलिङ्गैस्ताम्रा तन्वीप्रभृतिभिः ख्यापिताः कथिता भेदश्चानयोः—तन्वी पर्वणीका, स्थूला अलजीति वदति । तथाच **विदेहः**—'पर्वणी पिडका तत्र जायते त्वङ्कुरोपमा । शुक्लकृष्णान्तसन्धौ तु जानीयाद्गोस्तनाकृतिम् । पिडकामलजीं तां तु विद्धि तोदाऽश्रुसंकुलाम्' इति । पूयस्राव इति । यत्र सन्निपातेन पाकवान् शोथः संस्रवेत् स पूयस्रावः कथितः । तथाहि—'पाकात् सन्धौ संस्रवेद्यस्तु पूयं पूयस्रावो नैकरूपः प्रदिष्टः' इति । कृमिग्रन्थिरिति । नानारूपाः कृमयो ग्रन्थिं च पक्ष्मसन्धावेव कुर्वन्ति, तेन कृमिग्रन्थिरिति प्रतीतः । यतः—'कृमिग्रन्थिर्वर्त्मनः पक्ष्मणश्च कण्डूं कुर्युः कृमयः सन्धिजाताः । नानारूपा वर्त्मशुक्लान्तसन्धौ चरन्त्यन्तर्लोचनं दूषयन्तः' इति । **विदेहे** तु पूयादिदर्शनात् सन्निपातजोऽयं विकारः । तदुक्तम्—'ततस्ते पूयसंसृष्टाः पतन्ति कृमयस्तथा । लक्षणैर्विविधैर्युक्ताः संनिपातसमुच्छ्रिताः । कृमिग्रन्थिं तु तं विद्याद्देहिनां नेत्रदूषणम्' इति । उपनाह इति । तथाच—ग्रन्थिर्नाल्पो दृष्टिसन्धावपाकी कण्डूप्रायो नीरुजस्तूपनाहः' इति । **विदेहे** तु वातश्लेष्मजन्यत्वे पित्तश्लेष्मोद्रेकात् श्लेष्मोपनाह इति व्यपदेशः । यदुक्तम्—'वायुः श्लेष्माणमादाय दृष्टिसन्धौ व्यवस्थितः । अरुणं कठिनं ग्रन्थिं जनयत्यल्पवेदनम् । श्लेष्मोपनाहं तं विद्यात् स्रावात् वक्ष्याम्यतः परम्' इति । अलजीति । पर्वणिकाऽधिकरणे दर्शिता, सा तत्रैव ज्ञातव्येति । पूयालस इति । 'पक्वः शोथः सन्धिजातः सतोदः स्रवेत्पूयं पूति पूयालसाख्यः' इति । सन्धिरत्र नासामनुनेत्रान्तः कनीनसन्धिरित्युच्यते । तथाच **निमिः**—'शोथक्लेदसमाविष्टं तोदभेदसमाकुलम् । पूयालसं तु तं विद्यात् सन्धौ कानीनके नृणाम्' इति । इति नयनसन्धिगतरोगा उक्ताः ॥

इदानीं शुक्लभागगतरोगान् बुधैः प्रोक्तानाह—चतुर्नवति नेत्ररोगसंख्याविवरणविषयात् शुक्लगतरोगा अत्र त्रयोदश कथिताः । सिरोत्पातसिराहर्षौ द्वावत्र रोगौ कथितौ । तावेव **माधवसंग्रहे** तु सर्वाक्षिरोगान्तर्गतौ पठितौ । तस्मात् तत्रैकादश शुक्लजा इत्यर्थः । अत्राचार्येण तु शुक्लभागे सिरागतदोषविकृतभावादुक्तावित्यदोषः । यतः सिराणामुत्पात उपद्रवः स च दोषविशेषाद् भवति इत्यभिप्रायः । सिरोत्पातः सिराहर्षोऽपि । यदुक्तम्—'अवेदना वापि सवेदना वा यस्याक्षिराज्यो हि भवन्ति ताम्राः । मुहुर्विरज्यन्ति च याः स तादृग्व्याधिः सिरोत्पात इति प्रदिष्टः' इति । सिराहर्षः प्रसिद्ध एव । यतः—'मोहात्सिरोत्पात उपेक्षितस्तु जायेत रोगः स शिराप्रहर्षः । ताम्राभमस्रं स्रवति प्रगाढं तथा न शक्नोत्यभिवीक्षितुं च' इति । सिराजाल इति । यत्रानुलोमविलोमस्थितानां शिराणां विरचितत्वेन जालस्येवाकृतिर्दृश्यते स सिराजालः कथितः । तथाहि—'जालाभः कठिनसिरो महान्

सरक्तः संतानः स्मृत इह जालसंज्ञितस्तु' इति । शुक्तिक इति । यत्र जलशुक्तिनिभा बिन्दवो भवन्ति, तेन शुक्तिक इति नेत्ररोगविशेषः । तथाहि—'श्यावाः स्युः पिशितनिभाश्च बिन्दवो ये शुक्त्याभाः सितनियताः स शुक्तिसंज्ञः' इति । शुक्लार्मेति । सम्यक् श्वेतभावत्वात् शुक्लार्मेति । तद्यथा—'सश्वेतं मृदु शुक्लार्म शुक्ले तद्वर्धते चिरात्' इति । अधिमांसार्मेति । यत्र यकृन्निभमर्म भवति । यतः—'पृथु मृद्वधिमांसार्म बहुलं वा यकृन्निभम्' इति । प्रस्तार्यर्मेति । प्रस्तारि प्रस्तरणशीलं यत्रार्म भवति । यदुक्तम्—'प्रस्तार्यर्म तनुस्तीर्णं श्यावं रक्तनिभं सिते' इति । पिष्टक इति । पिष्टवत् पिष्टकस्तेन धूल्यादिव्याप्तादर्शतुल्यमित्यर्थः । तद्यथा—'श्लेष्ममारुतकोपेन यच्छुक्ले मांसमुन्नतम् । पिष्टवत् पिष्टकं विद्यान्मलाक्तादर्शसन्निभम्' इति । शिरायाश्चिपिकमिति । शुक्लभागस्थिताः पिडका यदा शिरावृता भवन्ति तदा शिराचिप्पिटं कथितम् । एतदेवान्यत्र शिराजाः पिडका इति प्रतिपादितम् । यतः—'शुक्लस्थाः सितपिडकाः सिरावृता यास्ता विद्यादसितसमीपजाः शिराजाः' इति । एके सिरायाश्चिप्पिटं चैवेत्यस्य स्थाने शिरायाः पिडकाश्चैवमिति पठन्ति तत्राऽपि स एवार्थः । कफग्रन्थितक इति । यत्र नयनशुक्लभागे वारिबिन्दुसदृशा मनागुच्छूनता भवति । यदुक्तम्—'कांस्याभोऽमृदुरथ वारिबिन्दुकल्पो विज्ञेयो नयनसिते बलाससंज्ञः' इति । बलाससंज्ञ इत्यत्र पदैकदेशवृत्तित्वाद्बलासग्रथितमित्यभिधानम् । तथाच **विदेहः**—'मारुतोत्पीडितः श्लेष्मा शुक्लभागे व्यवस्थितः । जलबिन्दुरिवोच्छूनोऽमृदुः शोफः समुद्भवेत् । बलासग्रथितं नाम नीरुजं वृत्तमण्डलम्' इति । अर्जुन इति । यत्र शुक्लभागे रक्तबिन्दुरिवोच्छूनो मृदुर्बिन्दुरेको भवति सोऽर्जुनसंज्ञः । तद्यथा—'एको यः शशरुधिरोपमश्च बिन्दुः शुक्लस्थो भवति तमर्जुनं वदन्ति' इति । स्नाय्वर्मेति । इदं च प्रस्तार्यर्मलोद्भवं भवति । यतः—'स्थिरं प्रस्तारि मांसाढ्यं शुष्कं स्नाय्वर्म पञ्चमम्' इति । विदेहेऽप्येवमेव । यथा—'प्रस्तारिणोऽर्मणः स्रावं निरुणद्धि यदाऽनिलः । विना स्रावं विशुष्कं तत् स्नाय्वर्मेति च तद्विदुः' इति । अधिमांस इति । मांसस्योपचयादत्राधिमांससंज्ञः । तन्त्रान्तरे त्वयमेव रक्तजत्वात् रक्तार्मेति संज्ञयाऽभिहितः, एकपटलस्थानगतत्वान्मांसरक्तयोः । तथाहि—'पद्माभं मृदु रक्तार्म यन्मांसं चीयते सिते' इति । इति पूर्वोक्तप्रकारेण शुक्लगतरोगास्त्रयोदशसंख्या उक्ता इत्यर्थः ॥

तथेति । नेत्ररोगगणनाप्रस्तावे कृष्णभागगतरोगाः पञ्चसंख्यका अधुना प्रतिपाद्यन्ते । तत्रादौ शुद्धशुक्रमिति । शुक्रमत्र पुष्पशब्दवाच्यम् । फुलीति लोके । शुद्धत्वमत्र साध्यतमत्वादव्रणत्वाच्च । अतस्तन्त्रान्तरेऽव्रणशुक्रमित्युच्यते । तद्यथा—'सन्द्रात्मकं कृष्णगतं सदोषं शङ्खेन्दुकुन्दप्रतिमावभासम् । वैहायसाभ्रप्रतिमप्रकाशमथाव्रणं साध्यतमं वदन्ति' इति । एतदेव कृच्छ्रसाध्यम् असाध्यं च भवति । तद्यथा—'गम्भीरजातं बहुलं च शुक्रं चिरोत्थितं चाथ वदन्त्यसाध्यम् । विच्छिन्नमध्यं पिशितावृतं वा चलं शिरासूक्ष्ममदृष्टिकृच्च । द्वित्वग्गतं लोहितमन्ततश्च चिरोत्थितं चाऽपि विवर्जनीयम्' इति । अन्यादृशमप्यसाध्यं प्रसङ्गतो लिख्यते । यथा—'उष्णाश्रुपातः पिडका च पीता यस्मिन् भवेन्मुद्गनिभं च शुक्रम् । तदप्यसाध्यं प्रवदन्ति केचिदन्यच्च यत् तित्तिरिपक्षतुल्यम्' इति । शिराशुक्रं **तु माधवेना**साध्यशुक्रावस्थायां पठितम् । यतस्तत्र चत्वार एव कृष्णगतरोगाः संगृहीताः । अनेन चिकित्सोपयोगवशात् पृथग्गणितं न दोषः । क्षतशुक्रमिति । क्षतं प्रहारः तथैव शुक्रं यत्र दृश्यते । येन सूच्यग्रेणेव छिन्नाभं भवतीत्यभिप्रायः । तस्मात् तन्त्रान्तरे सव्रणशुक्रमिति संज्ञा । तथाहि—'निमग्नरूपं तु भवेद्धि कृष्णे सूच्येव विद्धं प्रतिभाति यद्वै । स्रावं स्रवेदुष्णमतीव यच्च तत् सव्रणं शुक्रमुदाहरन्ति' इति । विदेहेऽप्युक्तम्—'रक्तराजीनिभं कृष्णे छिन्नाभं यत्र लक्ष्यते । सूच्यग्रेणेव तच्छुक्रमुष्णाश्रुस्रावि सव्रणम्' इति । अस्यासाध्यावस्थावशेनाऽपि एतादृशलक्षणान्वितं साध्यमेव । यदुक्तम्—'दृष्टेः समीपे न भवेत्तु यच्च न चावगाढं न च संस्रवेच्च । अवेदनं वा न च युग्मशुक्रं तत् सिद्धिमायाति कदाचिदेव' इति । अजकेति । अजापुरीषसदृशं यद्भवति । तथाहि—'अजापुरीषप्रतिमो रुजावान् सलोहितो लोहितपिच्छिलाश्रुः । विगृह्य कृष्णं प्रचयोऽभ्युपैति तच्चाजकाजातमिति व्यवस्येत्' इति । अत्र तृतीयत्वग्गतत्वान्मेदसः प्रचयो बोद्धव्यः । यदुक्तं **विदेहे**—'कृष्णेऽक्ष्णोर्यद्भवेच्छुक्रं छागलीविट्समप्रभम् । सान्द्रपिच्छिलरक्ताश्रुस्तृतीयस्त्वग्गताजका' इति । सिरासङ्गश्चेति । नेत्रगतसिराणां सङ्गोऽप्रवृत्तिर्यत्र तेनाऽक्षिपाकात्ययो भवति । तस्मादन्यत्राक्षिपाकात्यय इति नाम्ना

प्रसिद्धः । तथाहि—'श्वेतः समाक्रामति सर्वतो हि दोषेण यस्यासितमण्डलं तु । तमक्षिपाकात्ययमक्षिरोगं सर्वात्मकं वर्जयितव्यमाहुः' इति । अक्षिपाकात्ययः पुरतो वक्ष्यमाणसर्वगतरोगे गणितः । तस्मात् शिरासङ्गोऽत्र असाध्यकृष्णगतरोगविषये द्रष्टव्य इति समीचीनः पक्षः । एवं पञ्च कृष्णगता रोगाः प्रोक्ताः ॥

अथ षड्विधं काचमाह—काचं त्विति । काचं तु लिङ्गनाशस्य भेद एवेत्येके । यतः—'स एव लिङ्गनाशस्तु नीलिका काचसंज्ञितः' इति । नेत्राणां पटलभेदादपि तृतीयपटलगतं काचमित्युच्यते । यतः—'तृतीये पटले काचं चतुर्थे नीलिकाह्वयम्' इत्यादि । कैश्चित्तिमिरादीनां निदानपरंपरयाऽवस्था दर्शिता । तथाहि—'तिमिरं रागतां याति रागः काचत्वमेव च । काचात् संजायते नीली तदान्धो जायते नरः' इति । अत एवाह **माधवः**—'साध्यमप्रतिरागं स्यात् तिमिरं हि क्रियावतः । याप्यं संप्राप्य रागं स्याद्धचर्य पटलतां गतम्' इति । पटलानां कथनं दृष्टिगतरोगे दर्शयिष्यामः । षड्विधत्वमस्य दोषविशेषाद्भवति । यदाह **विदेहः**—'यथास्वं रज्यते दृष्टिर्दोषैस्त्रिपटलस्थितैः । चतुर्थपटलप्राप्तैर्मण्डलं लज्यते तु तैः' इति । एकजातीयतया त्रिचतुःपटलगतानां रोगाणां तिमिरकाचनीलिकासंज्ञितानां दोषभेदाः षट्संख्या एव बोद्धव्याः । तेषां स्वरूपं वक्ष्यमाणतिमिरे दर्शयिष्यामः । रोगोऽपि तन्त्रान्तरे षड्विधः प्रतिपादितः दोषविशेषभेदात् । प्रसङ्गतोऽपि तानाह । तथाहि—'रागोऽरुणो मारुतजः प्रदिष्टो म्लायी च नीलश्च तथैव पित्तात् । कफात् सितः शोणितजः सरक्तः समस्तदोषप्रभवो विचित्रः' इति ॥ अत्रापि तिमिरसंबन्धी परिम्लायी षष्ठो ज्ञातव्यः ।

तिमिराणीति । तिमिरं तु दृष्टिनाशस्य मूलमिति प्रसिद्धम् । यदुक्तम्—'मूलं दृष्टिविनाशस्य तिमिरं समुदाहृतम् । ऋषिभिस्त्वरितं तस्मात् तस्य कुर्याच्चिकित्सितम्' इत्यादि । तस्मात्तदेव तिमिरं पटलेषु दोषवर्णभेदेन रागकाचनीलादिसंज्ञं भवति तत् पूर्वं दर्शितमेव । तदेतच्च नानारूपं भवति नानाकृतिरूपदर्शनात् । 'एकदेशे तु यो दोषो दृष्ट्यां तिष्ठति पीडितः । यत्संस्थानः स भवति तादृशं तेन पश्यति' इति । एकद्वित्रिचतुर्थपटलगतलिङ्गा माधवसंग्रहे ज्ञातव्याः । ग्रन्थगौरवभयान्नात्र लिखिताः । षड्विधस्तु रूपभेदो लिख्यते । यथा—'तत्र वातेन रूपाणि भ्रमन्तीव च पश्यति । अरुणाभानि कृष्णानि व्याविद्धानीव मानवः' इति । पित्तेन रूपमाह—'पित्तेनादित्यखद्योतशक्रचापतडिद्गुणान् । नृत्यतश्चैव शिखिनः सर्वं नीलं च पश्यति' इति । कफेन रूपमाह—'कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च । पश्येत्सूक्ष्माणि चात्यर्थं व्यभ्रमेवाभ्रसंप्लवम् । सलिलप्लावितानीव परिजाड्यानि मानवः' इति । कैश्चिदन्यथा कफलक्षणानि पठितानि । यदुक्तम्—'गौरचामरगौराणि श्वेताभ्रमिव तानपि । यत्र पश्येदसूक्ष्माणि कफाच्चैवाभ्रसंप्लवम्' इति । संसर्गरूपमाह—संसर्गोऽत्र पित्तरक्तयोः कथितः । तेन तन्त्रान्तरे परिम्लायिपित्तसंज्ञः । तिमिरं संसर्गशब्देनाह । तथाचोक्तम्—'पित्तं कुर्यात् परिम्लायि मूर्च्छितं रक्ततेजसा । पीता दिशस्तु खद्योतान् भास्करं चापि पश्यति । विकीर्यमाणान् खद्योतैर्वृक्षांस्तेजोभिरेव च' इति । परिम्लायितिमिरे लक्षणान्तरमप्याह—'अरुणं मण्डलं दृष्ट्यां स्थूलकाचारुणप्रभम् । परिम्लायिनि रोगे स्यान्म्लायि नीलं च मण्डलम्' इति । मिलितरक्तपित्ताभ्यामित्येके । यदुक्तम्—'विदधाति परिम्लायि पित्तं रक्तेन संगतम् । तेन पीता दिशः पश्येदुद्यन्तमिव भास्करम्' इत्यादि । रक्तेन रूपमाह—'पश्येद्रक्तानि रक्तेन विविधानि तमांसि च । हरितान्यथ कृष्णानि पीतान्यपि च मानवः' इति । संनिपातेन रूपमाह—'संनिपातेन चित्राणि विप्लुतानीव पश्यति । बहुधा च द्विधा वापि सर्वाण्येव समन्ततः । हीनाधिकाङ्गान्यथवा ज्योतींष्यपि च मानवः' इति ॥

लिङ्गेति । लिङ्ग्यते ज्ञायतेऽनेनेति लिङ्गशब्देन दृष्टिरुच्यते, तस्य नाशो लिङ्गनाशः । यदुक्तम्—'रूपाणां लिङ्गनाशाल्लिङ्गं तन्नाशो लिङ्गनाशकः' इत्यादि । नाशस्तु तिमिरेणैव दृष्टेः सर्वतोऽवरोधात् प्रतिपादितः । तथाहि—'तिमिराख्यः स विज्ञेयश्चतुर्थः पटलं गतः । रुणद्धि सर्वतो दृष्टिं लिङ्गनाशमतः परम् । अस्मिन्नपि तमोभूते नातिरूढे महागदे । चन्द्रादित्यौ सनक्षत्रावन्तरिक्षे च विद्युतः । निर्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति' इति ॥ वातादिदोषभेदाः षट् ये तिमिरे दर्शितास्त एवात्रैव ज्ञातव्या इत्येके, एकपटलगतदोषसाधर्म्यात् । अन्ये तु वक्ष्यमाणमण्डलगतलक्षणानि मन्यन्ते, तान्यस्यैवाग्रे लिखितानि । सप्तमो भेदस्तु संसर्गः कथ्यते । स तु बाह्यगताभ्यां निमित्तानिमित्ता-

गन्तुकभेदाभ्यां द्विधा भवति । तद्यथा—'बाह्यौ पुनर्द्वाविह संप्रदिष्टौ निमित्ततश्चाप्यनिमित्ततश्च' इत्यादि । तत्र निमित्ततो द्विधा, एकः शिरोऽभितापाद्भवति, अपरो लगुडादीनामभिघातनिमित्तः । यतः—'निमित्ततस्तत्र शिरोऽभितापाज्ज्ञेयस्त्वभिष्यन्दनिदर्शनश्च' इत्यादिवचनात् शिरोऽभि सर्वतस्तप्यते येन स शिरोऽभितापः । स तु विषकुसुमादिगन्धवाहिपवनस्पर्शनादिः, तेन मस्तकोपघातान्नेत्रगतरक्तप्रकोपः दृष्टिशक्तेरपि व्याघातः । अभिघातनिमित्तजमाह—'विदीर्यते सीदति हीयते वा नृणामभीघातहता च दृष्टिः' इति । निमित्तजो यथा—'सुरर्षिगन्धर्वमहोरगाणां संदर्शनेनाऽपि च भास्करस्य । हन्येत दृष्टिर्मनुजस्य यस्य स लिङ्गनाशस्त्वनिमित्तसंज्ञः ॥ तत्राक्षि विस्पष्टमिवावभाति वैडूर्यवर्णा विमला च दृष्टिः' इति । ननु विमलेत्यनेन दोषजनिततिमिररागकाचादिरहिता दृष्टिर्भवति, तत्कथं भौतिकेन्द्रियस्यादुष्टस्यापि शक्तिनाशः ? उच्यते—देवादयो भौतिकेन्द्रियमदूषयन्त एव शक्तिमुपघ्नन्ति । यदुक्तं चरके—'देवादयोऽष्टौ हि महानुभावा न दूषयन्तः पुरुषस्य देहम् । विशन्त्यदृश्यास्तरसा यथैव छायातपौ दर्पणसूर्यकान्तौ' इति । लिङ्गनाशेऽपि कालादिना वातादिदोषस्यैव क्षयात् कदाचिद्दर्शनं भवतीत्याहुरेके । यतः—'दोषक्षयात् कदाचित् स्यात् स्वयं तत्र प्रदर्शनम्' इति । अन्ये कर्मसंस्कारितवातादिदोषक्षयादित्याहुः । तेषामेव मण्डलगतरागः केषांचिज्ज्ञापनार्थं लिख्यते यथा—'अरुणं मण्डलं वाताच्चलं परुषं तथा । पित्ततो मण्डलं नीलं कांस्याभं पीतमेव च ॥ श्लेष्मणा बहुलं स्निग्धं शङ्खकुन्देन्दुपाण्डुरम् । चलत्पद्मपलाशस्थः शुक्लो बिन्दुरिवाम्भसः ॥ संकुचत्यातपेऽत्यर्थं छायायां विरसत्यपि । मृद्यमाने च नयने मण्डलं तद्विसर्पति' इति । रक्तजमाह—'प्रवालपद्मपत्राभं मण्डलं शोणितात्मकम् । दृष्टिरागो भवेच्चित्रो लिङ्गनाशस्त्रिदोषजे' इत्यादि । वेध्यविषयनिमित्तं कथ्यते । 'वेध्य एष कफात्मकः' इत्यादिवचनात् ॥

अष्टधेति । दृष्टिमण्डलगता रोगाः कथिताः । दृष्टिप्रमाणं तु सुश्रुतेनोक्तं तद्यथा—'मसूरदलमात्रं तु पंचभूतप्रसादजम्' इति । मसूरार्धदलमित्यभिप्रायः । **मितिरम**प्याह—'पंचभूतात्मिका दृष्टिर्मसूरार्धदलोन्मिता' इति । तस्यां चत्वारि मण्डलानि सन्ति । रसरक्ताश्रयं बाह्यं, द्वितीयं मांसरक्ताश्रयं, तृतीयं मेदःसंश्रयं, चतुर्थं कामलास्थितम् इति । एतेषामेव च पटलसंज्ञां जानीयात् । तदुक्तं सुश्रुते—'तेजोजलाश्रितं बाह्यं तेष्वन्यत् पिशिताश्रयम् । मेदस्तृतीयं पटलमाश्रितं त्वस्थि चापरम्' इत्यादि । तेष्वादौ पित्तविदग्धमाह । दुष्टेन पित्तेन विदग्धदृष्टिर्भवति । यदुक्तम्—'पित्तेन दुष्टेन सदा तु दृष्टिः पीता भवेद्यस्य नरस्य किंचित् । पीतानि रूपाणि च तेन पश्येत् स मानवः पित्तविदग्धदृष्टिः' इति । अम्लपित्तविदग्धमिति । अम्लपित्ते वमनविषयत्वात् दृष्टेरभिघातः । वमनं तु कफं विना न संभवति तस्मात् तन्त्रान्तरेऽपि—'तथा नरः श्लेष्मविदग्धदृष्टिस्तान्येव शुक्लानि च मन्यते सः' इति । अत्रापि दाहशक्तिकत्वात् श्लेष्मणि कफाम्लसंज्ञेति व्याख्यानयन्ति । उष्णविदग्धकमिति । उष्णं घर्मादिकं तेन विदग्धदृष्टिर्भवति । अतएव तन्त्रान्तरे दिवान्धः कथितः । 'प्राप्ते तृतीयं पटलं तु दोषे दिवा न पश्येन्निशि वीक्षते च । रात्रौ सशीतानुगृहीतदृष्टिः पित्ताल्पभावादपि तानि पश्येत्' इति । नकुलान्ध्यमिति । नकुलस्य दृष्टिरिव यस्य दृष्टिः प्रतिभासते वर्णेन यथा यस्येत्यर्थः । तथाहि—'विद्योतते यस्य नरस्य दृष्टिर्दोषाभिपन्ना नकुलस्य तद्वत् । चित्राणि रूपाणि दिवा स पश्येत् स वै विकारो नकुलान्ध्यसंज्ञः' इति । दिवा स पश्येदित्युक्तत्वात् रात्रौ तथा न पश्यतीत्यवगन्तव्यम् । धूसरान्ध्यो धूमदर्शी कथितः, यतो धूमाकुलान् सर्वभावान् पश्यति । यदुक्तम्—'शोकज्वरायासशिरोऽभितापैरभ्याहता यस्य नरस्य दृष्टिः । धूम्रांस्तथा पश्यति सर्वभावान् स धूमदर्शीति नरः प्रदिष्टः' इति । दिवा धूम्रान् पश्यति, नतु रात्रौ पित्तस्य क्षीणत्वात् इति व्याख्यानयन्ति । रात्र्यन्धमिति । रात्र्यन्धं प्रसिद्धम् । तद्यथा—'त्रिषु स्थितोऽल्पः पटलेषु दोषो नक्तान्ध्यमापादयति प्रसह्य । दिवा स सूर्यानुगृहीतदृष्टिः पश्येत्तु रूपाणि कफाल्पभावात्' इति । ह्रस्वदृष्टिक इति । ह्रस्वरूपदर्शनात् ह्रस्वदृष्टिकः । यतः—'यो ह्रस्वजाड्यो दिवसेषु कृच्छ्रात् ह्रस्वानि रूपाणि च तेन पश्येत्' इति । अत्र पीतो रागो दृष्टिमध्यगतः । यदुक्तम्—'दृष्टिमध्यस्थिते दोषे महद्ध्रस्वं च पश्यति । रात्रौ पित्ताल्पभावत्वात् तानि रूपाणि पश्यति' इति । गम्भीरदृष्टिरिति । यद्दृष्टिरभ्यन्तरतः संकुच्य

विरूपा भवति । तद्यथा—'दृष्टिर्विरूपा श्वसनोपसृष्टा संकुच्यतेऽभ्यन्तरतस्तु याति । रुजावगाढा च तमक्षिरोगं गम्भीरकेति प्रवदन्ति तज्ज्ञाः' इति । एते दृष्टिगता रोगा दर्शिताः ॥

सर्वनयनरोगहेतुत्वात् सर्वनयनगतोऽभिष्यन्द इति । यतः सुश्रुते—'सर्वनेत्रगताः सप्तदश गदिताः ।' तद्यथा—'चत्वारोऽभिष्यन्दाश्चत्वारोऽधिमन्थाः, नेत्रपाकादयो नव' इति । अत्र चिकित्साविशेषदोषविशेषभेदाच्च पृथक् लिखितो न दोषः । ससंरम्भपाकान्वितोऽभिष्यन्दरोगः, स चतुःप्रकारो भवति दोषभेदेन । तेषु वाताभिष्यन्दमाह—'वाताभिव्याप्ते नेत्र ईदृशानि लक्षणानि भवन्ति । तद्यथा—'निस्तोदनस्तम्भनरोमहर्षसंघर्षपारुष्यशिरोऽभितापाः । विशुष्कभावः शिशिराश्रुता च वाताभिपन्ने नयने भवन्ति' इति । पित्तजमाह । तद्यथा—'दाहप्रपाकौ शिशिराभिनन्दा धूमायनं बाष्पसमुच्छ्रयश्च । उष्णाश्रुता पीतकनेत्रता च पित्ताभिपन्ने नयने भवन्ति' इति । कफजमाह—'उष्णाभिनन्दा गुरुताक्षिशोथः कण्डूपदेहावतिशीतता च । स्रावो मुहुः पिच्छिल एव चापि कफाभिपन्ने नयने भवन्ति' इति । रक्ताभिष्यन्दमाह—'ताम्राश्रुता लोहितनेत्रता च नाड्यः समन्तादतिलोहिताश्च । पित्तस्य लिङ्गानि तु यानि तानि रक्ताऽभिपन्ने नयने भवन्ति' इति । अप्रतिक्रियमाणत्वात् द्वैरभिष्यन्दैरेव चत्वारोऽधिमन्था जायन्ते । तथाहि—'वृद्धैरेतैरभिष्यन्दैर्नराणामक्रियावताम् । तावन्तस्त्वधिमन्थाः स्युर्नयने तीव्रवेदनाः' इति । शिरसोऽर्धवेदनाजनकत्वाच्चाभिष्यन्दतो भिन्नः संगृहीतः । यदुक्तम्—'उत्पाट्यत इवात्यर्थं नेत्रं निर्मथ्यते तथा । शिरसोऽर्धं च तं विद्यादधिमन्थं स्वलक्षणैः' इति । न केवलं तीव्रवेदनादिकारित्वात् भिन्न एव, अपि तु दृष्टिनाशकत्वादिति । तथा ह्युक्तम्—'हन्याद्दृष्टिं श्लैष्मिकः सप्तरात्रादधीमन्थो रक्तजः पञ्चरात्रात् । षड्रात्राद्वा वातिको वै निहन्यान्मिथ्याचारात् पैत्तिकः सद्य एव' इति । कालावधिरत्र व्याधिस्वभावाल्लङ्घनप्रतिलेपनादिविधानार्थमञ्जनादिनिषेधार्थं च । तन्त्रान्तरेऽपि सामनिरामनेत्ररोगविषयत्वाद्धेयोपादेयत्वं प्रतिपादितम् । तद्यथा—'स्वेदप्रलेपतिक्ताश्नं धूमो दिनचतुष्टयम् । लङ्घनं चाक्षिरोगाणामामानां पाचनानि षट् । अञ्जनं सर्पिषः पानं कषायं गुरुभोजनम् । नेत्ररोगेषु सामेषु स्नानं च परिवर्जयेत्' इति । सामनिरामलक्षणं प्रसङ्गतो लिख्यते । यथा—'उदीर्णवेदनं नेत्रं रागशोथसमन्वितम् । घर्षनिस्तोदशूलाश्रुयुक्तमामान्वितं विदुः' । निरामलक्षणमाह—'मन्दवेदनता कण्डूसंरम्भाश्रुप्रशान्तता । प्रशस्तवर्णता चाक्ष्णोः संपक्वं दोषमादिशेत्' इति । वातपित्तकफरक्तलक्षणान्यत्राभिष्यन्दोक्तानि च बोद्धव्यानि ॥

सर्वाक्षिव्यापकत्वात् सर्वाक्षिग्रहणं नत्वेकदेशसंभवत्वात् । अक्षिप्रमाणं तु सुश्रुतेनोक्तम्, यथा—'द्वियाङ्गुलबाहुल्यं स्वाङ्गुष्ठोदरसंमितम् । द्व्यङ्गुलं सर्वतः सार्धं भिषङ्नयनबुद्बुदम् । वृत्तं च गोस्तनाकारं सर्वभूतगुणोद्भवम्' इत्यादि । अष्टाविति अष्टभेदाः । तेष्वादौ वातविपर्ययमाह—'पर्यायेण क्रमेण कदाचिद्भ्रुवोः कदाचिल्लोचनयोर्वायुस्तीव्ररुजं यत्र करोति स वातविपर्ययः' ॥ यदुक्तम्—'वारंवारं च पर्येति भ्रुवौ नेत्रे च मारुतः । रुजश्च विविधास्तीव्रा ज्ञेयो वातविपर्ययः' इति । अल्पशोफ इति । अल्पशोफो नेत्रपाकभेदः सच शोथरहित इत्यर्थः । यतो नेत्रपाको द्विधा भवति । एकः शोथजः अपरस्त्वशोथज इति । तथाचोक्तम्—'कण्डूपदेहाश्रुयुतः पक्वोदुम्बरसन्निभः । संरम्भी पच्यते यस्तु नेत्रपाकः स शोथजः ॥ शोथहीनानि लिङ्गानि नेत्रपाके त्वशोथजे' इति । अन्यतोवात इति । यथा—'यस्यावटुकर्णशिरोहनुस्थो मन्यागतो वाप्यनिलोऽन्यतो वा । कुर्याद्रुजं वै भ्रुवि लोचने च तमन्यतोवातमुदाहरन्ति' इति । अन्यतोवेदनेनोक्तप्रदेशादितरत्र पृष्ठेऽन्यत्र वा तस्य कारणस्यावस्थानम् । विदेहेऽप्युक्तम्—'मन्यानामन्तरे वायुरुत्थितः पृष्ठतोऽपि वा । करोति भेदं निस्तोदं शङ्खे चाक्ष्णोर्भ्रुवोस्तथा । तमाहुरन्यतोवातं रोगं दृष्टिविदो जनाः' इति । पाकात्यय इति । यद्यपि सुश्रुतेऽक्षिपाकात्ययः कृष्णभागगतरोगे पठितस्तथाप्यत्र सर्वासितमण्डलव्यापकत्वेन तीव्ररुजाकरत्वेन च **शार्ङ्गधरेण** सर्वाक्षिगतरोगे पठितो न दोषः । तद्यथा—'संच्छाद्यते श्वेतनिभेन सर्वं दोषेण यस्यासितमण्डलं तु । तमक्षिपाकात्ययमक्षिकोपं समुच्छ्रितं तीव्ररुजं वदन्ति' इति । शुष्को नासाक्षिपाकेनोपहतमक्षि यत्र भवति । तथाहि—'यत्कूणितं दारुणरूक्षवर्त्म संदह्यते चाविलदर्शनं यत् । सुदारुणं यत्प्रतिबोधने च शुष्काक्षिपाकोपहतं तदक्षि' इति । अयं रोगः सरक्तवातजन्यः । यदाह—'कूणितं खरवर्त्माक्षि कृच्छ्रोन्मीलाविलेक्षणम् । सदाहं

सास्रजो वाताच्छुष्कपाकान्वितं वदेत्' इति । शोफ इति । शोफश्चात्र पाकभेदः, सशोथजनेत्रपाक इत्यर्थः । यतः सुश्रुतेऽपि द्विविधोऽक्षिपाकस्तद्यथा—'स्यन्दास्तु चत्वार इहोपदिष्टास्तावन्त एवेह तथाऽधिमन्थाः । शोफान्वितः शोफयुतश्च पाकाविवेव नेत्रे दश संप्रदिष्टाः' इत्यादि । अस्य लक्षणं कथितात्पशोथे दर्शितम् । अध्युषित इति । अम्लभोजनोत्पत्तिकत्वादम्लाध्युषित इति प्रसिद्धः । यदुक्तम्—'श्यावं लोहितपर्यन्तं सर्वं चाक्षि प्रपच्यते । सदाहशोथं सस्रावमम्लाध्युषितमम्लतः' इति । हताधिमन्थ इति । सकलनयनशोषकत्वाद्धताधिमन्थः । यतः—'उपेक्षणादक्षि यदाधिमन्थो वातात्मकः सादयति प्रसह्य । रुजाभिरुग्राभिरसाध्य एष हताधिमन्थः खलु नाम रोगः' इति । अयं रोगो दृष्टिनिर्गतलक्षणो विहित इति केचित् । तद्यथा—'अन्तर्गतशिराणां तु यदा वहति मारुतः । स तदा नयनं प्राप्य शीघ्रं दृष्टिं निरस्यति ॥ तस्यां निरस्यमानायां निर्मन्थन्निव मारुतः । नयनं निर्धमत्याशु शूलतोदाक्षिमन्थनैः' इत्ययं दृष्टिनिर्गमलक्षणः । नैवं, सकलाक्षिशोषो मन्थ इत्युक्तत्वात् सर्वाक्षिशोषे सर्वसंमतत्वात् प्रतीतः । यदुक्तमन्यत्रापि—'अथवा शोषयेदक्षि क्षीणतेजोबलादयम् । तत् पद्ममिव संशुष्कमवसीदति लोचनम् । हताधिमन्थं तं विद्यादसाध्यं वातकोपजम्' इति । एवं चतुर्नवतिनेत्ररोगा एकादशस्थानविशेषेण व्याख्याताः ॥ १५३–१६० ॥

**गू०**—इति चतुर्विंशतिवर्त्मजाः । अथ नव नेत्रसंधिजाः नव नयनसंधिभवा रोगास्ते जलस्रावादयः । अथ त्रयोदश सितभागगताः । तथा त्रयोदश रोगा बुधैः सितभागगताः शुक्लभागगताः प्रोक्ताः । ते सिरोत्पातादयः । अथ कृष्णगता रोगाः ते पञ्च एते शुद्धशुक्रादयः पञ्च कृष्णसमुद्भूताः प्रोक्ताः । अथ षड्विधकाचमाह—एवं वातादिभिः षड्विधं काचं ज्ञेयम् । षट् तिमिराण्याह—वातादिभिः षडेव तिमिराणि रोगा अष्टाविंशतिरुक्ताः ॥

अथ सप्त (संख्यः) लिङ्गनाश आह—'लिङ्गनाशः सप्तधा स्यात्स तु वातादिभिर्ज्ञेयः । उपसर्गेण कस्यचित्सम्बन्धेन संसर्गजः द्विदोषजन्यः । अथाऽष्टधा दृष्टिरोगानाह—'अष्टधा दृष्टिरोगाः स्युर्भवेयुस्ते पित्तविदग्धादयः । अथ चत्वारोऽधिमन्थाः, एवं चत्वारः अधिमन्थाः स्युः ते वातादिभिः' अथाभिष्यन्दाः, एवं चत्वारः अभिष्यन्दाः स्युः ते रक्तादिभिर्ज्ञेयाः । अथ सर्वाऽक्षिरोगा अष्टौ स्युः ते तु वातविपर्ययादयः एवं चतुर्नवतिर्नेत्ररोगा उक्ताः । ननु निदाने षट्सप्ततिर्नेत्ररोगा उक्ता अत्र चतुर्नवतीति तत्कथं? उच्यते—कस्मिंचित्तन्त्रे अधिकाः प्राप्ता लिखिता अतो न दोषः ॥ १५३–१६० ॥

**गू०**—अथ पञ्च पुंस्त्वदोषानाह—

**पुंस्त्वदोषास्तु पञ्चैव प्रोक्तास्तत्रेर्ष्यकः स्मृतः ॥ १७१ ॥**
**आसेक्यश्चैव कुम्भीकः सुगन्धिः षण्ढसंज्ञकः ।**

**दी०**—पुंस्त्वेति । पुंस्त्वदोषो नपुंसकशब्दवाच्यः । स च पञ्चप्रकारो भवति । तत्रेर्ष्यकमाह । अन्यव्यवायं दृष्ट्वा व्यवाये प्रवर्तते यः स ईर्ष्यकः । यदुक्तम्—'दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्तते । ईर्ष्यकः स तु विज्ञेयः सदा रोगविशारदैः' इति । दृग्योनिरपीर्ष्यकापरपर्यायः । तथापि तन्त्रान्तरे पठितो हेतुर्यथा—'ईर्ष्याभिभूतावपि मन्दहर्षौ ईर्षां रतेरेव वदन्ति हेतुम्' इति । आसेक्य इति । यः स्वभार्यया योन्यादिकं स्पृष्ट्वा संकल्पपूर्वकं प्रवर्तते स आसेक्यः । सुश्रुते तु—शुक्रं प्राश्य ध्वजदार्ढ्यं लभते यः स आसेक्यः कथितः । तदुक्तम्—'पित्रोरत्यल्पवीर्यत्वादासेक्यः पुरुषो भवेत् । स शुक्रं प्राश्य लभते ध्वजोच्छ्रायमसंशयम्' इति । अत एवासेक्यनामायं षण्ढो मुखयोन्यपरपर्यायः कथितः । कुम्भीक इति । यः पुरुषः स्वकीयपायौ अन्यपुरुषपार्श्वाद्व्यवायं कारयित्वा पश्चात् स्त्रीषु विषये पुमान् प्रवर्तते स कुम्भीकः । सुश्रुते—'स्वे गुदेऽब्रह्मचर्याद्यः स्त्रीषु पुंवत् प्रवर्तते । कुम्भीकः स तु विज्ञेयो रोगो रोगविशारदैः' इति । गुदयोनिरयमपरपर्यायनाम्ना कथितः । अस्योत्पत्तिहेतुश्च तन्त्रान्तरे वर्णितः । यथा—'मातुर्व्यवायप्रतिमेन वक्री स्याद्बीजदौर्बल्यतया पितुश्च' इत्यादि । **गयदासस्तु** कुम्भीकोत्पत्तौ हेतुमाह यथा—'अरजस्कां यदा नारीं श्लेष्मलस्तु व्रजेदतौ । अन्यासक्ता भवेत् प्रीतिर्जायते कुम्भिकस्तदा' इति । सुगन्धीति । यो योन्यादिगन्धमाघ्राय ध्वजबलं लभते स सुगन्धीति नाम षण्ढः कथितः । यदुक्तम्—'यः पूतियोनौ जायेत स सौगन्धिकसंज्ञितः । स योनिशेफसोर्गन्धमाघ्राय लभते बलम्' इति । अयं सौगन्धिकोऽपि नासा-

योन्यपरपर्यायः । षण्डसंज्ञित इति । यः पुमान् रूपाकृतिः स्त्रीचेष्टितश्च स्त्रीवदधोभूतः स्वमेढ्रस्योर्ध्वप्रदेशे अपरपुरुषात् वीर्यच्युतिं कारयति स षण्ढः, उत्पत्तिविषयत्वात् । यदुक्तम्—'यो भार्यायामृतौ मोहादङ्गनेव प्रवर्तते । तत्र स्त्रीचेष्टिताकारो जायते षण्डसंज्ञितः' इति । अयं षण्ढस्तु अरेताः कथितः । ईर्ष्यकादयश्चत्वारः सरेतस इत्युक्तत्वात् । तथाहि—'आसेक्यश्च सुगन्धी च कुम्भीकश्चेर्ष्यकस्तथा । सरेतसस्त्वमी ज्ञेया अशुक्रः षण्डसंज्ञितः' ॥ १७१ ॥

गू०—पुंस्त्वदोषाः पञ्चैव स्युस्ते ईर्ष्यकादयः, एषां लक्षणानि शारीरे प्रोक्तानि ॥ १७१ ॥

गू०—अथाऽष्टौ शुक्रदोषाः—

**शुक्रदोषास्तथाष्टौ स्युर्वातात्पित्तात्कफेन च ॥१७२॥**
**कुणपं चास्रपित्ताभ्यां पूयाभं श्लेष्मपित्ततः ।**
**क्षीणं च वातपित्ताभ्यां ग्रन्थिलं श्लेष्मवाततः॥१७३॥**
**मलाभं संनिपाताच्च शुक्रदोषा इतीरिताः ।**

दी०—दोषैर्दुष्टं शुक्रं शुक्रदोष इत्युच्यते । तद्युक्ताः पुरुषा गर्भोत्पत्तौ न क्षमा इति । प्रयोजनं सुश्रुतवचनात् । यतः—'वातपित्तश्लेष्मकुणपग्रन्थिपूतिपूयक्षीणमूत्रपुरीषरेतसः प्रजोत्पादने न समर्था भवन्ति' इति । तत्र शुक्रं यदा अरुणकृष्णवर्णं भवति तोदभेदनविशेषान्वितं च भवति तद्वातदुष्टम् । पित्तदुष्टं तु पीतनीलादिवर्णान्वितं ओषचोषवेदनाविशेषयुक्तं च । कफदुष्टं च श्वेतवर्णं कण्ड्वादिवेदनान्वितं च । कुणपं चास्रपित्ताभ्यामिति । कुणपः शवः, तस्येव गन्धो यस्य शुक्रस्य भवति । सोऽपि रक्तेन पित्तेन भवति । अनल्पं च भवति । चकारात् शोणितवर्णं पित्तवेदनं च । सुश्रुते त्वयं रक्तज इत्युक्तः, यतः—'कुणपगन्ध्यनल्पं च रक्तेन' इति । अत्र रक्तेनेति व्यपदेशो घृततैलदग्धवत् । यतो रक्तस्यापि दोषा एव प्रदूषयितारः । तेनात्र अस्रपित्ताभ्यामिति ग्रहणं न दोषः । पूयाभं श्लेष्मपित्तयोरेव इति । पित्तश्लेष्मभ्यां यद्दूषितं तद्घटितं पूयसदृशं शुक्रं भवति । वर्णवेदनाश्चात्र मिलितश्लेष्मपित्तयोरेव बोद्धव्याः । क्षीणं च वातपित्ताभ्यामिति । कारणैः स्वमानादल्पीभूतम् । लक्षणं च यथा—'दौर्बल्यं मुखशोषश्च पाण्डुत्वं सदनं भ्रमः । क्लैब्यं शुक्रविसर्गश्च क्षीणशुक्रस्य लक्षणम्' इति । ग्रन्थिलं श्लेष्मवातत इति । ग्रन्थिलसदृशं ग्रन्थिलं तत् श्लेष्मवातजनितं भवति । अत्रापि द्विदोषवर्णवेदना बोद्धव्या । मलाभं सन्निपाताच्चेति । मलं मूत्रपुरीषम्, तदाभं तद्गन्धि च यत् शुक्रं भवति तत् सन्निपातदूषितम् । सुश्रुतेऽपि—'मूत्रपुरीषगन्धिसन्निपातेन' इति । इति पूर्वोक्तप्रकारेण शुक्रदोषा ईरिताः कथिताः ॥ १७२ ॥ ॥ १७३ ॥

गू०—तथा तेन प्रकारेण अष्टौ शुक्रदोषाः स्युः ते वातादेर्भेदतो ज्ञेयाः, एषां लक्षणानि शारीरे निदाने वा प्रोक्तानि ॥ १७२ ॥ १७३ ॥

गू०—अथ स्त्रीरोगसंख्या—

**अथ स्त्रीरोगनामानि प्रोच्यन्ते पूर्वशास्त्रतः ॥१७४॥**
**अष्टावार्तवदोषाः स्युर्वातपित्तकफैस्त्रिधा ।**
**पूयाभं कुणपं ग्रन्थि क्षीणं मलसमं तथा ॥ १७५ ॥**
**तथा च रक्तप्रदरं चतुर्विधमुदाहृतम् ।**
**वातपित्तकफैस्त्रेधा चतुर्थं संनिपाततः ॥ १७६ ॥**

दी०—स्त्रीरोगेत्यादि । स्त्रीषु भवा रोगाः स्त्रीरोगाः । तेषां पुरुषेषु न सम्भवत्वात् । पूर्वशास्त्रत इति मुनिवचनात् । तेष्वादौ आर्तवदोषानाह—'अष्टौ चार्तवदोषाः स्यु'रित्यादि । दोषैर्दुष्टमार्तवं च वीर्यवद्भवतीति प्रयोजनश्चकारः । यदुक्तं सुश्रुते—'आर्तवमपि त्रिभिर्दोषैः शोणितचतुर्थैः पृथग्द्वन्द्वैः समस्तैश्चोपसृष्टमबीजं भवति' इति । एतेषां दोषवर्णवेदनादिभिर्विज्ञानोपायं कथिताष्टशुक्रदोषे ज्ञातव्यम् ॥

तथा रक्तप्रदरमित्यादि । तथेत्यनेनार्तवमेव कारणमसृग्दरस्येति भावः सूचितः । यदुक्तम्—'तदेवातिप्रसङ्गेन प्रवृत्तमनृतावपि । असृग्दरं विजानीयादतोऽन्यद्रक्तलक्षणम्' इति । सामान्यलक्षणमपि यथा—'असृग्दरो भवेत् सर्वः साङ्गमर्दः सवेदनः' इति । आर्तवातिप्रवृत्तित्वेनासृग्दरः, तस्मात्तस्यातिस्रुतस्य लक्षणानि । यथा—'तस्यातिवृत्तौ दौर्बल्यं भ्रमो मूर्च्छा मदस्तृषा । दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः' इति । तस्य संख्याश्चतुःप्रकारा भवन्ति । वातपित्तकफैरित्यादि । तत्र वातिकमाह—'रूक्षारुणं फेनिलमल्पमल्पं वातात् सतोदं पिशितोदकाभम्' इति । पित्तजमाह—'सपीतनीलासितरक्तमुष्णं पित्तार्तियुक्तं भृशवेगि पित्तात्' इति । कफजमाह—'आमं सपिच्छाप्रतिमं सपाण्डु पुलाकतोयप्रतिमं कफात्तु' इति । त्रिदोषजमाह—'सक्षौद्रसर्पिर्हरितालवर्णं मज्जप्रकाशं कुणपं त्रिदोषात्' इत्यादि ॥ १७४–१७६ ॥

गू०—अथ स्त्रीरोगनामानि प्रोच्यन्ते, कुतः? पूर्वशास्त्रतः। तेषां विवरणं क्रियते, अष्टौ आर्तवदोषास्ते वातादिभिर्ज्ञेयाः, तथा रक्तप्रदरं चतुर्विधं उदाहृतं कथितं त्रिभिर्वाताद्यैः सन्निपातेनैकश्च ॥ १७४–१७६ ॥

अथ योनिरोगाः—

**विंशतिर्योनिरोगाः स्युर्वातात्पित्तात्कफादपि ।**
**संनिपाताच्च रक्ताच्च लोहितक्षयतस्तथा ॥ १७७ ॥**
**शुष्का च वामिनी चैव खण्डितान्तर्मुखी तथा ।**
**सूचीमुखी विप्लुता च पुत्रघ्नी च परिप्लुता ॥१७८॥**
**उपप्लुता प्राक्चरणा महायोनिश्च कर्णिनी ।**
**स्यादानन्दा चातिचरणा योनिरोगा इतीरिताः ॥१७९॥**

दी०—योनौ भवा रोगा योनिरोगाः कथिताः। ते दुष्टार्तववीर्यदोषादिना जनिताः। तथाहि—'विंशतिर्व्यापदो योनौ निर्दिष्टा रोगसंग्रहे। मिथ्याचारेण ताः स्त्रीणां प्रदुष्टेनार्तवेन च। जायन्ते बीजदोषाच्च दैवाद्वा शृणु ताः पृथक्' इति। तत्र विशेषलक्षणात्तास्वादौ वातलामाह—वातस्य पृथग् विधानं वातवेदनाप्रादुर्भावार्थं, यत्र तन्त्रान्तरे उदावृत्तावन्ध्याविप्लुतासु वातानुबन्धित्वम्। यदुक्तम्—'चतसृष्वपि चाद्यासु भवन्त्यनिलवेदनाः' इति। एवं पित्तानुबन्धिन्यो रक्तक्षया वामिनी प्रस्रंसिनी पुत्रघ्नी चेति चतस्रः पित्तलया सह पञ्च पैत्तल्यः। यदुक्तम्—'चतसृष्वपि चाद्यासु पित्तलिङ्गोच्छ्रयो भवेत्' इति। एवं श्लेष्मानुबन्धिन्योऽत्यानन्दा कर्णिनी अचरणाऽतिचरणाश्चतस्रः श्लेष्मलया सह पञ्च विज्ञेयाः। यतः—'चतसृष्वपि चाद्यासु श्लेष्मलिङ्गोच्छ्रयो भवेत्' इति। एवं सन्निपातजाः पञ्च विज्ञेयाः। षण्डी, अण्डली, विवृता, सूचिवक्त्रा इति। चतस्रः सन्निपातजया सह पञ्च। यतः—'पञ्चासाध्या भवन्तीह योनयः सर्वदोषजाः' इति। एवं सुश्रुतोक्तत्वाच्च दोषानुबन्धित्वं दर्शितम्। अत्र व्यस्तगणनासंग्रहत्वेन पृथक्स्वरूपमधुना विधीयते। तद्यथा—वातादिति। वातान्विता वातला योनिर्भवति। तथाहि—'वातला कर्कशा स्तब्धा शूलनिस्तोदपीडिता' इति। पित्तादिति। पित्तान्विता पित्तला योनिः। यथा—'अत्यर्थं पित्तला योनिर्दाहपाकज्वरान्विता' इत्युपलक्षणं, तेन नीलपीतसितार्तवा भवन्तीत्यवगन्तव्यम्। तथाच तन्त्रान्तरे—'व्यापल्लवणकट्वम्लक्षाराद्यैः पित्तजा भवेत्। दाहपाकज्वरोष्मार्ता नीलपीतासितान्विता' इति। कफान्विता श्लेष्मला योनिः। तदुक्तम्—'श्लेष्मला पिच्छिला योनिः कण्डूग्रस्तातिशीतला' इति। अतिशीतलेत्युपलक्षणम्, तेन सवेदनादिकत्वमपि बोद्धव्यम्। यदुक्तं तन्त्रान्तरे—'कफोऽभिष्यन्दिभिर्वृद्धो योनिं चेद्दूषयेत् स्त्रियाः। स कुर्यात् पिच्छिलां शीतां कण्डूग्रस्तां सवेदनाम्' इति। सन्निपातादिति मिलितदोषत्रयदूषिता योनिर्भवति। तथाहि—'सर्वलिङ्गसमुत्थाना यत्र सा सन्निपातजा' इति। रक्ताच्चेति रक्तदूषिता। यद्यपि रक्तपित्तानुबन्धिनी युगपत् पठिता तथाप्यत्र रक्तस्यातिस्रवणाद्रक्तजेति व्यपदेशः। तस्मादिह रक्तजा स्रंसिनी कथितेत्यभिप्रायः। तद्यथा—'प्रस्रंसिनी स्रंसते तु क्षोभिता दुष्प्रजायिनी' इति। लोहितक्षयतो लोहितक्षया कथिता। तथाहि—'सदाहं क्षीयते रक्तं यस्यां सा लोहितक्षया' इति। शुष्का चेति। शुष्का नष्टार्तवा कथिता। शुष्कं वन्ध्यमार्तवं यस्या भवति सा। अत एव तन्त्रान्तरे वन्ध्यायोनिः 'वन्ध्या नष्टार्तवा ज्ञेया' इत्यादिवचनात्। वामिनी चेति। या रजसा युतं सवातं बीजमुद्गिरेत् सा वामिनी। यथा—'सवातमुद्गिरेद्बीजं वामिनी रजसाऽन्वितम्'। खण्डितेति। अरजस्का भवति। तथाहि—'अनार्तवाऽस्तनी षण्डी खरस्पर्शा च मैथुने' इति। अन्तर्मुखीति। बृहन्मेहनपुरुषेण गृहीता या तरुणा खण्डिनी भवेत् (सा अन्तर्मुखी) (अण्डवन्निःसृता योनिरित्येके। तत्राण्डलीशब्दवाच्या। यतः—'अतिकायगृहीतायास्तरुण्यास्त्वण्डली भवेत्' इति।) सूचीमुखीति अतिशयं सूचीवत् संकीर्णमुखी—'सूचीवक्त्रातिसंवृता' इत्यादिवचनात्। विप्लुता चेति। 'विप्लुता नित्यवेदना' इत्यादिना वातजनिततोदादिवेदनायुक्तेत्यर्थः। पुत्रघ्नी चेति। तथाहि—'स्थितं स्थितं हन्ति गर्भं पुत्रघ्नी रक्तसंक्षयात्' इति। यद्यपि सर्वापत्यविनाशिनी तथाप्यत्र पुत्रस्य प्राधान्यात् पुत्रघ्नीति व्यपदेशः। परिप्लुतेति संज्ञा। यदुक्तम्—'परिप्लुतायां भवति ग्राम्यधर्मे रुजा भृशम्' इति। उपप्लुतेति। वायोरूर्ध्वमुपप्लुतत्वात्। तन्त्रान्तरे उदावर्तेति संज्ञा। यदुक्तम्—'सा फेनिलमुदावर्ता रजः कृच्छ्रेण मुञ्चति' इति। महायोनिरिति। अतिविवृतमुखत्वान्महायोनिः कथिता। यतः—'विवृतातिमहायोनिः' इत्यादि। कर्णिनीति। मांसकन्दराकारो ग्रन्थिः कर्णिनी कथिता। यतः—कर्णिन्यां कर्णिको योनौ श्लेष्माऽसृग्भ्यां प्रजायते' इति। अत्यानन्देति।

१—नास्ति 'क' पुस्तके।

'अत्यानन्दा न संतोषं ग्राम्यधर्मेण गच्छति' इति। अतिचरणेति। 'बहुशश्चरातिचरणा तयोर्बीजं न विन्दति' इति। तयोश्चरणातिचरणयोः। एवं योनिदोषा ईरिताः कथिताः॥ १७७-१७९॥

गू०—विंशति स्युस्ते वातादेर्गणिता ज्ञेयाः, एवं द्वात्रिंशत् स्त्रीरोगाः॥ १७७-१७९॥

गू०—स्त्रीरोगेष्वेव योनिकन्दसंख्यामाह—

**चतुर्विधं योनिकन्दं वातपित्तकफैस्त्रिधा।**
**चतुर्थं संनिपातेन—**

दी०—योनिसंश्रितत्वाद्विंशतितमयोनिभेदाद्योनिकन्दोऽपीत्येके: पृथक्, दोषभेदेन नामसंग्रहत्वात् पृथगत्र पठितः। योनौ लकुचाकारं कन्दमुत्पद्यते तद्योनिकन्दमिति। लकुचं चात्र नारङ्गफलम्। तद्यथा—'पूयशोणितसंकाशं लकुचाकृतिसन्निभम्। उत्पद्यते यदा योनौ नाम्ना कन्दः स योनिजः' इति। अस्य वातादिविकृतिलक्षणमाह। वातजं यथा—'रूक्षं विवर्णं स्फुटितं वातिकं तद्विनिर्दिशेत्' इति। पैत्तिकमाह—'दाहरागज्वरकरं विद्यात् पित्तात्मकं तु तत्' इति। श्लैष्मिकमाह—'नीलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम्' इति। नीलपुष्पवर्णता च कफजेऽपि रोगप्रभावात्। अन्ये चैनं पित्तलिङ्गसंबद्धमाहुरिति। सांनिपातिकं यथा—'सर्वलिङ्गसमायुक्तं सन्निपातात्मकं वदेत्' इति॥

गू०—वातादिभिश्चतुर्विधं योनिकन्दं भवतीति योजना॥

गू०—अष्टौ गर्भरोगा भवन्ति तानाह—

**तथाष्टौ गर्भजा गदाः॥ १८०॥**
**उपविष्टकगर्भः स्यात्तथा नागोदरः स्मृतः।**
**मकल्लो मूढगर्भश्च विष्कम्भो गूढगर्भकः॥ १८१॥**
**जरायुदोषो गर्भस्य पातश्चाष्टमकः स्मृतः।**

दी०—शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकारसंमूर्च्छितं गर्भ इत्युच्यते। तत्सम्भवा विकारा गर्भजा गदा वाच्याः। तेऽष्टप्रकारा भवन्ति। उपविष्टकगर्भः स्यादित्यादि। रक्तपरिस्रुतिनिमित्तोपविष्टकसंज्ञया गर्भविकृतिः कथिता। तदुक्तं चरके—'यस्याः पुनरुष्णतीक्ष्णोपयोगाद्गर्भिण्या महति जातसारे गर्भे पुष्पदर्शनं योनिस्रावात् तस्या गर्भो वृद्धिं न प्राप्नोति, कालान्तरमुपतिष्ठते, सस्पन्दनश्च भवति तमुपविष्टकमित्याचक्षते इति। नागोदर इति। नागबन्ध इव स्थितिर्यस्य गर्भस्य भवतीत्येके। सुश्रुते—तन्नागोदरलक्षणं यथा—'शुक्रशोणितं वायुनाभिपन्नमवक्रान्तजीवमाध्मापयत्युदरं तत् कदाचित् यदृच्छयोपशान्तं नैगमेषापहृतमिति भाषन्ते। तमेव कदाचित् प्रविलीयमानं नागोदरमित्याहुः'। मकल्ल इति। मकल्लो रक्तमारुतजः शूलविशेषः। स द्विविधो भवति। एको गर्भावस्थायां, अपरः सूतिकावस्थायाम् इति। तद्यथा—'मानसागन्तुभिरुग्रतापैः प्रपीडितो यो गर्भः कुक्षौ वेदनां जनयति स गर्भमकल्लः। यत्र प्रकुपितो वायुः सूतया रुधिरमत्यन्तं संरुध्य हृच्छिरोबस्तिशूलं करोति स प्रसूतिमकल्ल इति। तन्त्रान्तरे योनिसंवरणोऽयं रोगविशेषः कथितः। यदुक्तम्—'वातलान्यन्नपानानि ग्राम्यधर्मं प्रजागरम्। अत्यर्थं सेवमानायां गर्भिण्यां योनिमार्गगः॥ मातरिश्वा प्रकुपितो योनिद्वारस्य संवृतिम्। कुरुते रुद्धमार्गत्वात् पुनरन्तर्गतोऽनिलः॥ निरुणद्ध्याशयद्वारं पीडयन् गर्भ( नाभि )संस्थितिम्॥ निरुद्धवचनोच्छ्वासो गर्भश्चाशु विपद्यते॥ रुजा संरुद्धहृदयां नाशयत्याशु गर्भिणीम्। योनिसंवरणं विद्याद्व्याधिमेतं सुदारुणम्' इति। मूढगर्भश्चेति। मूढो व्यासक्तगतिः पवनो मूढगर्भं करोति। योनिजठरादिषु शूलं करोतीत्यभिप्रायः। तथाहि—'मूढः करोति पवनः खलु मूढगर्भं शूलं च योनिजठरादिषु मूत्रसङ्गम्' इत्यादि। विगुणानिलयोगाद्दृश्यासंख्येयत्वमाहुरेके, तस्मादत्र एक एव पठितः। तद्यथा—'भुग्नोऽनिलेन विगुणेन ततः स गर्भः संख्यामतीत्य बहुधा समुपैति योनिम्' इत्यादि। केषांचिन्मते तत्र व्यवहारयोग्या अष्टौ प्रकाराः कथिताः। तद्यथा—'द्वारं निरुध्य शिरसा जठरेण कश्चित् कश्चिच्छरीरपरिवर्तितकुब्जदेहः। एकेन कश्चिदपरस्तु भुजद्वयेन तिर्यग्गतो भवति कश्चिदवाङ्मुखोऽन्यः॥ पार्श्वप्रवृत्तगतिरेति तथैव कश्चिदित्यष्टधा गतिरियं ह्यपरा चतुर्धा' इति। संकीलकादिभेदेन चतुःप्रकारान् पुनराहुरेके। तद्यथा—'संकीलकः प्रतिखुरः परिघोऽथ बीजस्तेषूर्ध्वबाहुचरणैः शिरसा च योनौ। सङ्गी च यो भवति कीलकवत् स कीलो दृश्यैः खुरैः प्रतिखुरः स हि कायसङ्गी॥ गच्छेद्भुजद्वयशिराः स च बीजकाख्यो योनौ स्थितः सपरिघः परिघेण तुल्यः' इति। तन्त्रान्तरेऽपि कीलकादीनां लक्षणम्। यथा—'ऊर्ध्वबाहुशिरःपादै

रुन्ध्याद्योनिमुखं तु यः । प्रतिकीलोपमस्थित्या स कील इति संज्ञितः । अधस्तात् पार्श्वतो वापि तथैवाकुक्षितोऽपि वा । यो निःसृत्य मुखं योनेर्ह्येयः प्रतिखुरस्तु सः ॥ योनिद्वारात्त निर्गच्छेद्यश्चैकाङ्घ्रिशिरोभुजः । तमाहुर्बीजकं नाम मूढगर्भचिकित्सकाः ॥ योनिमावृत्य यस्तिष्ठेत् परिघो गोपुरं यथा । तथान्तर्गर्भमायान्तं विद्यात् परिघसंज्ञितम्' इति । विष्कम्भ इति । विष्कम्भ इव विष्कम्भः, मार्गावरोधात् तिष्ठति इत्यभिप्रायः । स तु वाताभिपन्नगर्भस्य शोषणान्मातुः कुक्षिं न पूरयति, मन्दं स्पन्दते च । अतएव **वृद्धकाश्यपेन** शुष्कलक्षणं विहितम् । यथा—'गर्भनाड्यास्तु वहनादलवत्वाद्रसस्य च । चिरेणाप्यायते गर्भस्तथैवाकालयोजनात् । अकुक्षिपूरणो गर्भो मन्दस्पन्दन एव च' इति । मूढगर्भ इति । लीनगर्भः कथितः । तथा च सुश्रुतः—'वातोपद्रवगृहीतत्वात् स्रोतसां वीयते गर्भः सोऽतिकालमवतिष्ठमानो व्यापद्यते' इति । जरायुदोष इति । विकृतजरायुणा छादनं जरायुदोषः । जरायुर्गर्भस्यावेष्टनरूपश्चर्मविशेषः । 'जरायुणा मुखे च्छन्ने' इत्यादिदर्शनात् । अर्थाद्गर्भशय्यायां स्थितो यो बालस्तस्योपरि वेष्टितोऽल्पविकारत्वाज्जरायुदोष इत्यभिप्रायः । गर्भशय्या च प्रसङ्गतो यथा—'शङ्खनाभ्याकृतियोनिस्त्र्यावर्ता सा च कीर्तिता । तस्यास्तृतीये त्वावर्ते गर्भशय्या प्रतिष्ठिता ॥ यथा रोहितमत्स्यस्य मुखं भवति रूपतः । तत्संस्थानां तथा रूपां गर्भशय्यां विदुर्बुधाः' इति । पात इति । गर्भस्य पातोऽष्टमो भेदः । स द्विविधः, एकः स्रावरूपः, अपरः पातरूपः । तथाहि—'आचतुर्थात्ततो मासात् प्रस्रवेद्गर्भविद्रवः । ततः स्थि(त)रशरीरस्य पातः पञ्चमषष्ठयोः' इति। अतिघनावयवत्वेन विशेषेण द्रवरूपतया गर्भविद्रवः कथ्यते । यदुक्तं भोजे—'आतृतीयाथतो मासात् गर्भः स्रवति शोणितम् । ऊर्ध्वं संघातभूतस्तु गर्भः पतति योषिताम्' इति । विगुणपवने तु सप्तमादिमासेष्वपि पात इति केचित् । यतः—'गर्भोऽभिघातविषमाशनपीडनाद्यैः पक्वं द्रुमादिव फलं पतति क्षणेन' इति ॥ १८० ॥ ॥ १८१ ॥

**गू०**—उपविष्टकादयोऽष्टौ गर्भरोगाः ॥ १८० ॥ ॥ १८१ ॥

**गू०**—अथ स्तनरोगाः—

**पञ्चैव स्तनरोगाः स्युर्वातात्पित्तात्कफादपि ॥ १८२॥**
**संनिपातात्क्षताच्चैव तथा स्तन्योद्भवा गदाः ।**
**बालरोगेषु कथिताः स्त्रीदोषाश्च त्रयः स्मृताः॥ १८३॥**
**अदक्षपुरुषोत्पन्नः सपत्नीविहितस्तथा ।**
**दैवाज्जातस्तृतीयस्तु तथा ये सूतिकागदाः ॥ १८४॥**
**ज्वराद्यश्चिकित्स्यास्ते यथादोषं यथाबलम् ।**

दी०—पञ्चैवेति । स्तनयोर्भवा रोगाः स्तनरोगाः, ते च शोथादिरूपा इत्यर्थः । यदुक्तम्—'सक्षीरौ वाप्यदुग्धौ वा दोषः प्राप्य स्तनौ स्त्रियाः । प्रदूष्य मांसरुधिरे स्तनरोगाय कल्पते' इति । अतएव तेषां वातपित्तकफसंनिपातागन्तुजानां लक्षणानि रक्तजन्यविद्रधिं विना बाह्यविद्रधिवज्ज्ञातव्यानि । तथाचोक्तम्—'पञ्चानामपि तेषां हि रक्तजं विद्रधिं विना । लक्षणानि समानानि बाह्यविद्रधिलक्षणैः' इति । तथा स्तन्योद्भवा गदा इति । तथेत्यनेन यथा स्तनरोगा दोषभेदेन पञ्चसंख्यका उक्तास्तथैव दोषभेदेन क्षीरभेदा इति तात्पर्यार्थः । स्तन्यं क्षीरं, तत्स्वरूपं च सुश्रुतेनोक्तम्—'रसप्रसादो मधुरः पक्वाहारनिमित्तजः । कृत्स्नदेहात् स्तनौ प्राप्तः स्तन्यमित्यभिधीयते' इति । वातादीनां भेदाः केषांचिद्बोधनार्थं लिख्यन्ते यथा—'कषायं सलिलप्लावि स्तन्यं मारुतकोपतः । कट्वम्ललवणं पीतराजीमत्पित्तसंयुतम् ॥ कफदुष्टं घनं तोये निमज्जति सुपिच्छिलम् । द्विलिङ्गं द्वन्द्वजं विद्यात् त्रिलिङ्गं सांनिपातिकम्' इति ॥ एवं दोषदूषितात् स्तन्यात् गदा रोगा उत्पद्यन्ते । यदुक्तम्—'गुरुभिर्विविधैरन्नैर्दुष्टैर्दोषैः प्रदूषितम् । क्षीरं धात्र्याः कुमारस्य नानारोगाय कल्पते' इति । अतएव तान्रोगान्क्षीरालसादीन् बालरोगेषु दर्शयिष्यामः । स्त्रीदोषाश्च त्रयः स्मृता इत्यादि । स्त्रीणां दुःखजनकाः स्त्रीदोषाः, 'तद्दुःखसंयोगा व्याधय' इत्युपदर्शनात् । ते त्रयः । अदक्षपुरुषोत्पन्न इति । निजाहाराद्यर्जनेऽप्यसमर्थः तेनोत्पन्नं दुःखमिति भावः । सपत्नीविहित इति । स्त्रीणां सपत्नीभावोऽतीव दुःखकरो विहितः विपक्षभूतत्वात् । 'पृथक्शय्या च नारीणामशस्त्रवध उच्यते' इतिवचनात् । दैवाज्जात इति । दुःखकर इति शेषः । दैवं भागधेयं तज्जातः सहगमनप्रभृतिक इत्यभिप्रायः । तथा ये सूतिकागदा इत्यादि । प्रसूतिविषये भवा ये रोगास्ते सूतिकागदाः कथिताः । तद्यथा—'ज्वराति-

सारशोथश्च शूलानाहबलक्षयाः । तन्द्रारुचिप्रसेकाद्याः कफवातामयोद्भवाः ॥ कृच्छ्रसाध्या हि ते रोगाः क्षीणमांसबलाग्नितः । ते सर्वे सूतिकानाम्ना रोगास्ते चाप्युपद्रवाः' इति । एते सूतिकारोगत्वेन लक्षणान्तरा इत्यर्थः, उपद्रवत्वात् । सूतिकायां विशेषलक्षणं च सुश्रुतेनोक्तं यथा—'अङ्गमर्दो ज्वरः कासः पिपासा गुरुगात्रता । शोथः शूलातिसारौ च सूतिकारोगलक्षणम्' इति । एवं स्त्रीरोगाः प्रदर्शिताः ॥१८२–१८४॥

**गू०**—स्तनरोगाः पञ्चधा स्युः । ते वातादेर्जायन्ते । तथा स्तन्योद्भवा दुग्धोद्भवाः, तेषु तत्रादौ स्त्रीदोषास्त्रयस्तानाह—बालरोगेषु त्रयः स्त्रीदोषाः ते । अन्ये ज्वरादयोऽपि बालरोगाः ॥ १८२–१८४ ॥

**गू०**—अथ बालरोगाः—

**द्वाविंशतिर्बालरोगास्तेषु क्षीरालसास्त्रयः ॥ १८५ ॥**
**वातात्पित्तात्कफाच्चैव दन्तोद्भेदश्चतुर्थकः ।**
**दन्तघातो दन्तशब्दोऽकालदन्तोऽहिपूतनम् १८६ ॥**
**मुखपाको मुखस्रावो गुदपाकोपशीर्षकौ ।**
**पार्श्वारुणस्तालुकण्टो विच्छिन्नं पारिगर्भिकः॥१८७॥**
**दौर्बल्यं गात्रशोषश्च शय्यामूत्रं कुकूणकः ।**
**रोदनं चाजगल्ली स्यादिति द्वाविंशतिः स्मृताः ॥**

**टी०**—अथ बालरोगानाह—द्वाविंशतिरिति । बालके भवा रोगा बालरोगाः । आषोडशाद्बालः । स त्रिविधः । क्षीरपः, क्षीरान्नादः, अन्नाद इति । एतेषु भवा रोगा बालरोगशब्दवाच्याः । यतः षोडशवर्षपर्यन्तं बालग्रहचिकित्सा दृश्यते । तेष्विति । द्वाविंशतिसंख्येषु । त्रयः क्षीरालसा इति दोषदूषितस्तन्यजनिता रोगविशेषाः । अतएव वातात् पित्तात् कफादिति ग्रहणम् । तद्यथा—'वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः । क्षामस्वरः कृशाङ्गः स्याद्बद्धविण्मूत्रमारुतः' इति । पित्तदुष्टमाह—'स्विन्नो भिन्नमलो बालः कामलापाण्डुरोगवान् । तृष्णालुरुष्णसर्वाङ्गः पित्तदुष्टं पयः पिबन्' इति । कफदुष्टलक्षणमाह—'कफदुष्टं पिबन् क्षीरं लालालुः श्लेष्मरोगवान् । निद्रान्वितो जडः शूनवक्त्राक्षश्छर्दनः शिशुः' इति । एवं त्रयः क्षीरालसाः कथिताः । दन्तानामुद्भेद उत्पत्तिः । स च सर्वेषां रोगाणां कारणम् । तद्यथा—'दन्तोद्भेदश्च रोगाणां सर्वेषामपि कारणम् । विशेषाज्ज्वरविड्भेदकासच्छर्दिशिरोरुजाम्' इति । अन्यत्राप्युक्तम्—'पृष्ठभङ्गे बिडालानां बर्हिणां च शिखोद्गमे । दन्तोद्भेदे च बालानां नहि किंचित्तु दूषणम्' इति । दन्तघात इति । दन्तघातो दन्तपातः कथितः । स द्विधा भवति । एकः समयोद्भवः अपर आघातजनितः । तावपि बालदुःखकराविति प्रयोजनम् । दन्तशब्द इति । दन्तघर्षणं विशेषेण स्वप्नावस्थायां भवति, कफजन्यदन्तहर्षनिमित्तत्वात् । बाल्येऽतीव कफामया भवन्ति । तेन बालरोगे दन्तशब्दः कथितः । अकालदन्त इति । अकालदन्तोत्थानेनानिष्टत्वाद्बालानां दुःखकर इत्यर्थः । अहिपूतनमिति । अहिपूतनमन्यत्र क्षुद्ररोगेषु पठितम् । अत्र बालसंभवत्वाद्बालरोगे लिखितः । तद्यथा—'शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत् । स्विन्ने वा स्नाप्यमाने वा कण्डू रक्तकफोद्भवा । कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते । एकीभूतं व्रणे घोरं तं विद्यादहिपूतनम्' इति । भोजे पुनरिदं दुष्टस्तन्यपानादित्यपि पठितम् । यदुक्तम्-'दुष्टस्तन्यस्य पानेन मलस्याक्षालनेन च । कण्डूदाहरुजावद्भिः पिडकाभिः समन्विता ॥ संभवेत्तु यथादोषं दारुणा ह्यहिपूतना' इति । मुखपाक इति । मुखस्य पाको मुखपाकः । स तु दोषविशेषाद्भवति बालकेऽप्यतीव प्रसिद्धत्वात् । मुखस्राव इति प्रसिद्धः, लालास्राव इत्यर्थः । गुदपाक इति । सोऽपि विकृतदोषस्वभावाद्भवतीति, बालकेऽतीव प्रतीतिः गुदपाक इति प्रसिद्धः । उपशीर्षकमाह । कपालरोगे व्रणविशेष उपशीर्षकशब्दवाच्यः । अथवा पद्मनामानं विसर्पमाहुरेके । यदुक्तम्—'विसर्पस्तु शिशोः प्राणनाशनो बस्तिशीर्षजः । पद्मवर्णो महापद्मो रोगो दोषत्रयोद्भवः' इति । पार्श्वारुणो महापद्मभेदः । तत्र लोहितपद्मवर्णः । पद्मवर्णता मुखतालुनि बहिर्देशेषु इति वदन्ति केचित् । तालुकण्ट इति । कण्टकाकारत्वेन तालुकण्टकम् । तद्यथा—'तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम् । तेन तालुप्रदेशस्य निम्नता मूर्ध्नि जायते' इति । विच्छिन्नमिति । विच्छिन्नमन्यत्र गतं तालुपातमिति नाम्ना प्रतीतम् । तथाहि—'तालुपातात् स्तनद्वेषः कृच्छ्रात्पानं शकृद्द्रवम् । तृडक्षिकण्ठास्यरुजा ग्रीवादुर्वहता वमिः' इति । पारिगर्भिक इति । तथाहि—'मातुः कुमारो गर्भिण्याः स्तन्यं प्रायः पिबन्नपि । कासाग्निसादवमथु-

१ 'कम्पः' पा.

तन्द्राकार्श्यारुचिभ्रमैः ॥ युज्यते कोष्ठवृद्ध्या च तमाहुः पारिगर्भिकम् । रोगं परिभवाख्यं च युञ्ज्यात्तत्राग्निदीपनम्' ॥ इति । दौर्बल्यमिति दुर्बलत्वम् । बालकस्य सततं बलहानिरित्यर्थः । हतौजा इत्यपरे । गात्रशोष इति । गात्रक्षमता बालस्य दोषप्रभावाद्भवति । शय्यामूत्रं प्रसिद्धम् । रात्रौ स्वप्नावस्थायां शय्यागतो बालोऽक्षीणपूर्वकं मूत्रयति दोषप्रभावात् । कुकूणक इति । बालस्य नेत्रवर्त्मगतः कुकूणकाख्यो रोगः । तद्यथा—'कुकूणकः क्षीरदोषात् शिशूनामक्षिवर्त्मनि । जायते तेन तन्नेत्रं कण्डूरं च स्रवेन्मुहुः । शिशुः कुर्याल्ललाटाक्षिकूटनासावघर्षणम् । शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः' इति । अयमेव कोथुयेति लोके । रोदनमिति । रोदनं तु सर्वेषां शिशुव्याधीनां च सूचकं भवति । यतः—'शिशोस्तीव्रामतीव्रां च रोदनाल्लक्षयेद्रुजम् । स यं स्पृशेद्भृशं देशं यत्र च स्पर्शनाक्षमः ॥ तत्र विद्याद्रुजं, मूर्ध्नि रुजं चाक्षिनिमीलनात् । कोष्ठे विबन्धवमथुस्तनदंशान्त्रकूजनैः ॥ आध्मानपृष्ठनमनजठरोन्नमनैरपि । बस्तौ गुह्ये च विण्मूत्रसंगत्रासदिगीक्षणैः । स्रोतांस्यङ्गानि संधींश्च पश्येद्यत्नान्मुहुर्मुहुः' इति । तीव्रां रुजं च बहुरोदनात्, अतीव्रामल्परोदनाल्लक्षयेद्बालानामेव दुष्टस्तन्यपानादिनेति । अजगल्लीति । प्रायेण बालानामन्येषामपि अजगल्लिका भवति । तद्यथा—'स्निग्धाः सवर्णाः ग्रथिता नीरुजा मुद्गसन्निभाः । कफवातोत्थिता ज्ञेया बालानामजगल्लिकाः' इति । इति द्वाविंशतिः स्मृता इति । इति कथितप्रकारेण बालरोगा द्वाविंशतिः प्रोक्ताः ॥ १८५–१८८ ॥

**गू०**—अथ बालग्रहसंख्यामाह—

**तथा बालग्रहाः ख्याता द्वादशैव मुनीश्वरैः ।**
**स्कन्दग्रहो विशाखः स्यात्स्वग्रहश्च पितृग्रहः ॥१८९॥**
**नैगमेयग्रहस्तद्वच्छकुनिः शीतपूतना ।**
**मुखमण्डितिका तद्वत्पूतना चान्धपूतना ॥ १९० ॥**
**रेवती चैव संख्याता तथा स्याच्छुष्करेवती ।**

**दी०**—तथेति । बालं गृह्णन्ति इति बालग्रहाः । ते तु प्रायेण शौचभ्रंशादिना स्कन्दग्रहादयो बालेष्वाविशन्ति । तत्परिज्ञानार्थं सामान्यलक्षणं विशेषलक्षणं च व्याचष्टे । तत्र सामान्यलक्षणं यथा—'क्षणादुद्विजते बालः क्षणात् त्रस्यति रोदिति । नखैर्दन्तैर्दारयति धात्रीमात्मानमेव च । ऊर्ध्वं निरीक्षते दन्तान् खादेत् कूजति जृम्भते । भ्रुवौ क्षिपति दन्तौष्ठं फेनं वमति वासकृत् । क्षामोऽतिनिशि जागर्ति शूनाङ्गो भिन्नविट्स्वरः । मांसशोणितगन्धिश्च न चाऽश्नाति यथा पुरा । सामान्यग्रहजुष्टानां लक्षणं समुदाहृतम्' इति । एते ग्रहाः पूजाहेतोर्बालान् हिंसन्ति । यदुक्तं चरके—'धात्रीमात्रोरात्मनश्चापराधाच्छौचभ्रष्टान् मङ्गलाचारहीनान् । कुत्सान् त्रस्तान् दुर्जनांस्ताडितांश्च पूजाहेतोर्हिंस्युरेते कुमारान्' इति । विशेषलक्षणं यथा प्रतिपादितमत्रैव । तद्विवरणमाह—स्कन्दग्रह इति । स्कन्दग्रहेण गृहीतो बालो यथा भवति तल्लक्षणमाह—'एकनेत्रस्य गात्रस्य स्रावः स्पन्दनकम्पनम् । ऊर्ध्वदृष्ट्या निरीक्षेत वक्रास्यो रक्तगन्धिकः । दन्तान् खादति विस्रस्तः स्तन्यं नैवाभिनन्दति । स्कन्दग्रहगृहीतानां बालानां चाल्परोदनं' इति विशाख इति । स्वग्रह इति । स्वग्रहस्तु स्कन्दापस्मार इत्येके तद्यथा—'नष्टसंज्ञो वमेत् फेनं संज्ञावाननतिरोदिति । पूयशोणितगन्धित्वं स्कन्दापस्मारलक्षणम्' इति पितृग्रहः । नैगमेयग्रह इति । तद्यथा—'छर्दिस्पन्दनकण्ठास्यशोषमूर्च्छाभिगन्धिता । ऊर्ध्वं पश्येद्दशेद्दन्तान्नैगमेयं ग्रहं वदेत्' इति । शकुनीति । शकुनी नामग्रहगृहीतो बालोपीदृशो भवति । यथा 'स्रस्ताङ्गो भयचकितो विहङ्गगन्धिः सास्रावव्रणपीडितः समन्तात् । स्फोटैश्च प्रचिततनुः सदाहपाकैर्विज्ञेयो भवति शिशुः क्षतः शकुन्या' इति । विहङ्गगन्धिरित्यत्र विस्रगन्धिरित्यपरे । हिरण्याक्षेप्युक्तं—'सस्रावदाहपाकाद्यैश्चितः स्फोटैर्भयान्वितः । स्रस्ताङ्गो विस्रगन्धः स्याच्छकुन्या पीडितः शिशुः' इति । शीतपूतनेति । वेपते कासते क्षीणो नेत्ररोगो विगन्धता । छर्द्यतीसारयुक्तश्च शीतपूतनया शिशुः' इति । मुखमण्डितिकेति । 'प्रसन्नवर्णवदनः शिराभिरभिसंवृतः । मूत्रगन्धिस्तु बह्वाशी मुखमण्डितिकाग्रही' इति । पूतनेति । 'अतीसारो ज्वरस्तृष्णा तिर्यक्प्रेक्षणरोदनम् । नष्टनिद्रस्तथोद्विग्नो ग्रस्तः पूतनया शिशुः' इति । अन्धपूतनेति । 'छर्दिः कासो ज्वरस्तृष्णा वसागन्धोऽतिरोदनम् । स्तन्यद्वेषोऽतिसारश्च अन्धपूतनया शिशोः' इति । रेवतीति । व्रणैः स्फोटैश्चित गात्रं पङ्कगन्धं सवेदसृक् । भिन्नवर्चा ज्वरी दाही रेवतीग्रहलक्षणम्' इति । शुष्करेवतीति ॥१८९॥१९० ॥

**गू०**—पादरोगानाह—

**तथा चरणभेदास्तु वातरक्तादिकाश्च ये ॥ १९१ ॥**
**द्विचत्वारिंशदुक्तास्ते रोगेष्वेव मुनीश्वरैः ।**

१ 'सेहःशब्दवाच्यः' पा.

**द्विषष्टिर्दोषभेदाः स्युः संनिपातादिकाश्च ये ॥१९२॥**
**तेऽपि रोगेषु गणिताः पृथक्प्रोक्ता न ते क्वचित् ।**

**दी०**—तथेति । चरणभेदाः पादरोगाः कथिताः । ते वातरक्तप्रमुखा रोगेष्वेव बोद्धव्याः । वातरक्तादिका इत्यत्रादिग्रहणेन पादसुप्तिपादस्तम्भपादहर्षपादस्फुटनप्रभृतयः । रोगेष्विति श्लीपदादिषु ॥ १९१ ॥

द्विषष्टिर्दोषभेदाः स्युरिति । दोषा वातादयः । तेषां भेदा उत्कर्षादिविकल्पनाद्वातेनेत्युच्यन्ते । तत्र वातादीनां दोषाणां क्षीणभेदाः पञ्चविंशतिः, तावन्त एव वृद्धानां दोषाणां भेदाः, एकैकवृद्धिसमताक्षयैः कृत्वा षड्भेदाः, एवं क्षीणवृद्धानां दर्शिताः । एकवृद्धिद्वन्द्वक्षयेण त्रयो भेदाः, द्विवृद्ध्येकक्षयेण त्रयो भेदाः, एवं द्विषष्टिर्दोषभेदाः कथिताः । केचित्तु दोषाणां साम्यं भेद इत्यनेन त्रिषष्टिर्दोषभेदा भवन्ति इति वदन्ति । तच्च सन्निपातभेदेन ज्ञातव्यम् । तदुक्तम्—'द्युल्वणैकोल्वणैः षट् च हीनमध्याधिकाश्च षट् । समश्चैको विकाराणां संनिपातात् त्रयोदश' इति । तन्त्रान्तरेऽपि यथा—'द्विषष्टिधा वदन्त्येते भूयिष्ठमिति निश्चयः । तत एव पृथग् दोषा द्विशो नव समाधिकैः ॥ त्रयोदशाधिकैकद्विसममध्योल्बणैस्त्रिशः । पञ्चाशदेवं तु सह भवन्ति क्षयमागतैः ॥ क्षीणमध्याधिकक्षीणक्षीणवृद्धैस्तथाऽपरैः । द्वादशैवं समाख्यातास्त्रयो दोषा द्विषष्टिधा' ॥ तेऽपीति । ते द्विषष्टिर्दोषभेदा रोगेषु गणिताः, अतः क्वचित् कुत्रापि ते न पृथक् प्रोक्ताः । नह्येतेषां द्विषष्टिभेदानां सर्वरोगान्तर्गतत्वात् पृथगुपादानमिति भावः ॥ १९२ ॥

**गू०**—पञ्चकर्मजरोगसंख्या आह—

**हीनमिथ्यातियोगेन भेदैः पञ्चदशोदिताः ॥ १९३ ॥**
**पञ्चकर्मभवा रोगा रोगेष्वेव प्रकीर्तिताः ।**
**स्नेहस्वेदौ तथा धूमो गण्डूषोऽञ्जनतर्पणे ॥ १९४ ॥**
**पीडा अष्टादशैतज्जास्ताश्च रोगेषु लक्षिताः ।**

**दी०**—हीनेति । पञ्चकर्मभवा रोगा इति । वमनविरेचननिरूहानुवासननस्यानीति पञ्चकर्माणि । तज्जाता रोगा रोगेष्वेव ज्ञातव्याः । रोगता च तेषां हीनमिथ्यातियोगत्वाद्भवति । एतेन किमुक्तम्—यदा वमनादिकं हीनमिथ्यातियोगेन कृतं तदा रोगत्वं स्यात् । तदुक्तम्—'हीनमिथ्यातियोगेन यदा भवति देहिनाम् । पञ्चकर्म तदा नूनं रोगोत्पत्त्यै च केवलम्' इति । अतएव प्रत्येकं त्रिभेदेन पञ्चदशभेदाः पूर्यन्ते ॥ स्नेह इति । स्नेहादीनामपि अष्टादश पीडाभेदाः कथिताः । अत्रापि हीनमिथ्यातियोगेति संबन्धः । तेनात्राष्टादश भेदाः पूर्यन्ते । पीडाऽत्र दोषरूपा । स्नेहोऽत्र स्नेहपानम् । स्वेदः प्रसिद्धः । धूमो धूमपानम् । गण्डूषः कवलपर्यायः । अञ्जनं नेत्राञ्जनम् । तर्पणं धातुतृप्तिजनकं नेत्रान्तस्तर्पणं वा । एते तु यदा हीनमिथ्यातियोगद्वारेण प्रयुक्तास्तदा रोगाय भवन्तीत्यर्थः ॥१९३॥१९४॥

**गू०**—अष्टादशविधा एतज्जाः पीडास्ता अपि रोगेषु भवन्ति । ता आह—अष्टादशविधा एतज्जाः पञ्चकर्मादिजास्ता अपि रोगेषु ज्ञेयाः । तेषां लक्षणं तु स्नेहादिव्यापत्सु ज्ञेयम् ॥ १९३ ॥ १९४ ॥

**गू०**—शीतादयश्चत्वार उपद्रवसंज्ञा रोगाः—

**शीतोपद्रव एकः स्यादेकश्चोष्णोद्भवो मतः॥१९५॥**
**शल्योपद्रव एकश्च क्षाराच्चैकः स्मृतस्तथा ।**

**दी०**—शीतोपद्रव इति । अतिशीतेन जनितः उपद्रवः । अतिशीतः कालः, अतिशीतो देशः, अतिशीता क्रिया चेति । एक उष्णोपताप इति । अत्युष्णेन जनित उपताप उपद्रव इत्यर्थः । अत्रापि उष्णकालः, उष्णो देशः, उष्णा क्रिया चेति । एकः शल्योपद्रव इति । सर्वशरीरबाधकं शल्यम् । तच्च द्विविधम्—शारीरमागन्तुकं चेति । तदुक्तम्—'शारीरागन्तुकं चैव द्विविधं शल्यमुच्यते' इति । तत्र शारीरं रोमनखादिधातवोऽन्नं मला दोषाश्च दुष्टाः । आगन्तुकमपि शारीरशल्यव्यतिरेकेण यावन्तो भावा दुःखमुत्पादयन्ति तदागन्तुकं, तच्च लोहवेणुतृणशृङ्गास्थिग्रावादिकम् । एकः क्षारोपद्रव इति । उपद्रवता तथेतिवचनात् । एतेन किमुक्तम्—स क्षारो यदा अज्ञैः प्रयुक्तस्तदा रोगाय भवतीति तात्पर्यार्थः । तदुक्तम्—'विषाग्निशस्त्राशनिमृत्युकल्पः क्षारो भवत्यल्पमतिप्रयुक्तः । स धीमता सम्यगनुप्रयुक्तो रोगान् निहन्यादचिरेण घोरान्' इति ॥ १९५ ॥

**गू०**—अथ विषरोगसंख्यामाह—

**स्थावरं जङ्गमं चैव कृत्रिमं च त्रिधा विषम् ॥१९६॥**
**तेषां च कालकूटाद्यैर्नवधा स्थावरं विषम् ।**
**जङ्गमं बहुधा प्रोक्तं तत्र लूता भुजङ्गमाः ॥ १९७ ॥**
**वृश्चिका मूषिकाः कीटाः प्रत्येकं ते चतुर्विधाः ।**

१—वाग्भटसंहितायां तु—
'संसर्गाद्रसरुधिरादिभिस्तथैषां दोषांस्तु क्षयसमताविवृद्धिभेदैः ।
आनन्त्यं तरतमयोगतश्च यातान् जानीयादवहितमानसो यथास्वम् ॥'
इत्यनन्तत्वं कथितम् । वृद्धिक्षयसमरूपा दोषाणां त्रिधा गतिः ।
तत्र वृद्धिभेदाः २५, क्षयभेदाः २५, समभेदाः १२, एवं गणनया ६२ भेदाः संपद्यन्ते—

## द्विषष्टिदोषभेदयन्त्रम् ॥ अत्रैकाद्यङ्का वातादिदोषबोधकाः ॥

| सं. | पृथक् मे० | सं. | सं. | रूपाणि. | सं. | पृ. मे. | सं. | सं. | रूपाणि. |
|---|---|---|---|---|---|---|---|---|---|
| १ | पृथक्वृद्धिभेदाः | १ | | १ | ३३ | द्वन्द्वक्षयभेदाः | ५ | पूर्वसात्परस्याधिक्यक्षयः | २–१ |
| २ | | २ | | २ | ३४ | | ६ | | २–३ |
| ३ | | ३ | | ३ | ३५ | | ७ | | ३–२ |
| ४ | | १ | समवृद्धिः | १–२ | ३६ | | ८ | | १–३ |
| ५ | | २ | | १–३ | ३७ | | ९ | | ३–१ |
| ६ | | ३ | | २–३ | ३८ | | १ | एकाधिकक्षयः | १–२–३ |
| ७ | द्वन्द्ववृद्धिभेदाः | ४ | पूर्वसात्परस्याधिक्यवृद्धिः | १–२ | ३९ | | २ | | १–३–२ |
| ८ | | ५ | | १–३ | ४० | | ३ | | २–३–१ |
| ९ | | ६ | | २–१ | ४१ | क्षयप्रयुक्ताः | ४ | द्व्यधिकक्षयभेदाः | १–२–३ |
| १० | | ७ | | २–३ | ४२ | | ५ | | २–१–३ |
| ११ | | ८ | | ३–१ | ४३ | | ६ | | ३–२–१ |
| १२ | | ९ | | ३–२ | ४४ | संनिपातक्षयभेदाः | ७ | अल्पमध्योल्बणक्षयः | १–२–३ |
| १३ | संनिपातभेदाः वृ. प्र. | १ | एकाधिकवृद्धिः | १–२–३ | ४५ | | ८ | | २–१–३ |
| १४ | | २ | | १–३–२ | ४६ | | ९ | | १–३–२ |
| १५ | | ३ | | २–३–१ | ४७ | | १० | | ३–१–२ |
| १६ | | ४ | द्व्यधिकवृद्धिः | १–२–३ | ४८ | | ११ | | २–३–१ |
| १७ | | ५ | | २–१–३ | ४९ | | १२ | | ३–२–१ |
| १८ | | ६ | | ३–१–२ | ५० | | १३ | स. क्ष. | १–२–३ |
| १९ | | ७ | अल्पमध्योल्बणवृद्धिः | १–२–३ | ५१ | मिश्रभेदाः | १ | द्विवृद्ध्येकक्षयः | १–२–३ |
| २० | | ८ | | १–२–३ | ५२ | | २ | | १–३–२ |
| २१ | | ९ | | १–३–२ | ५३ | | ३ | | २–३–१ |
| २२ | | १० | | ३–१–२ | ५४ | क्षीणवृद्धः | ४ | क्षीणमध्याधिकमिश्रभेदाः | १–२–३ |
| २३ | | ११ | | २–३–१ | ५५ | | ५ | | २–१–३ |
| २४ | | १२ | | ३–२–१ | ५६ | | ६ | | १–३–२ |
| २५ | | १३ | स. वृ. | १–२–३ | ५७ | क्षीणवृद्धमिश्रभेदाः | ७ | | ३–१–२ |
| २६ | पृथक् क्षयभेदाः | १ | | १ | ५८ | | ८ | | २–३–१ |
| २७ | | २ | | २ | ५९ | | ९ | | ३–२–१ |
| २८ | | ३ | | ३ | ६० | | १० | एकवृद्धिद्विक्षयः | १–२–३ |
| २९ | | १ | | १–२ | ६१ | | ११ | | २–१–३ |
| ३० | | २ | | १–३ | ६२ | | १२ | | १–३–२ |
| ३१ | | ३ | समक्षय. | २–३ | ६३ | ६३ | १ | स. | सर्वे समाः |
| ३२ | | ४ | | १–२ | | | | | |

दंष्ट्राविषं नखविषं बालशृङ्गास्थिभिस्तथा ॥ १९८ ॥
मूत्रात्पुरीषाच्छुक्राच्च दृष्टेर्निश्वासतस्तथा ।
लालायाः स्पर्शतस्तद्वत्तथा शङ्काविषं मतम् ॥१९९
कृत्रिमं द्विविधं प्रोक्तं गरदूषीविभेदतः ।
सप्तधातुविषं ज्ञेयं तथा सप्तोपधातुजम् ॥ २०० ॥
तथैवोपविषेभ्यश्च जातं सप्तविधं मतम् ।
दुष्टनीरविषं चैकं तथैकं दिग्धजं विषम् ॥ २०१ ॥
कपिकच्छूभवा कण्डूर्दुष्टनीरभवा तथा ।
तथा सूरणकण्डूश्च शोथो भल्लातजस्तथा ॥ २०२॥

**टी०**—विषभेदानाह—स्थावरजङ्गमकृत्रिमविषभेदेन त्रिविधोपद्रवा इति पिण्डार्थः । तत्र स्थावरविषं यन्नवधा कालकूटप्रभृतिभिः स्वीकृतं तद्विज्ञानमाह । यदुक्तम्—'कालकूटो वत्सनाभः शृङ्गिकश्च प्रदीपनः । हालाहलो ब्रह्मपुत्रो हारिद्रः शक्तुकस्तथा ॥ सौराष्ट्रिक इति प्रोक्ता विषभेदा अमी नव' इति । नवधेत्यत्रातिप्रसिद्धत्वात् संग्रहः । केषांचिन्मतेऽष्टादशभेदा भवन्ति । तेषु दश जातयस्त्याज्या अष्टौ ग्राह्या इति । तथाहि—'शक्तुकं मुस्तकं शृङ्गी वालुकं सर्षपाह्वयम् । वत्सनाभं कार्यमन्यं श्वेतशृङ्गी तथाष्टमम् । इत्यष्टौ योजयेद्योगे कालकूटादि वर्जयेत्' इति । तद्यथा—'कालकूटं मेषशृङ्गी हालाहलं च दर्दुरम् । कर्कटं गह्वरं ग्रन्थि हारिद्रं रक्तशृङ्गिकम्' । केशरं दशमं चेति वर्जनीयं भिषग्वरैः' इति । वर्जनीयत्वमेषामत्यन्तदुष्टिकरत्वात् । निषिद्धेऽपि शार्ङ्गधरेणात्र संगृहीतं प्रसिद्धत्वात् । जङ्गमं बहुधा प्रोक्तमित्यादि । जङ्गमं सर्पादिसंभवं भवेदिति सम्बन्धः । तत्र लूता 'मकडी'शब्दवाच्यः कीटविशेषो वा । भुजङ्गमाः सर्पास्ते चानेकविधाः । वृश्चिकमूषिकौ प्रसिद्धौ । कीटा अपि नानाविधा नानाकृतयश्च । तेषां स्वरूपं न लिखितमत्र विस्तरभयात् । प्रत्येकं ते चतुर्विधा इति ते लूतादयः, चतुर्विधा इति जरायुजाण्डजस्वेदजोद्भिज्जाः प्रत्येकम्, यतः चतुर्थो निपतितानाम् ऊष्माणं विना कस्यचित् सिद्धिर्नास्ति इति न्यायेन सर्वे भुवः शरीरस्य च स्वेदाज्जाताः । अन्येऽपि यथा पक्षिषु बलाकाद्यो जरायुजा अण्डजाश्च[1] सर्पजातिषु अहिपताका जरायुजाः संस्वेदजेष्वपि काश्चित् पिपीलिका अण्डजा उद्भिज्जाश्च इत्यनेन योनिसंकरोत्पत्तित्वाच्चतुर्विधत्वम् । यद्वा वातपित्तकफसन्निपातात्मानस्ते सदृशविषाश्चतुर्विधा भवन्तीत्येके । तदपि न सर्वमतं किंतु सर्वजातय एव भवन्तीत्यन्ये । तदुक्तम्—'वातपित्तकफात्मानो भोगिमण्डलराजिलाः' इत्यादि । सुश्रुते तु द्विदोषकोपमेव चतुर्थम् । तथाहि—'कोपयन्त्यनिलं सर्पाः फणिनः सर्वे एव तु । पित्तं मण्डलिनश्चापि कफं चानेकराजयः । अपत्यं समवर्णाभ्यां द्विदोषकरलक्षणम्' इति । दंष्ट्राविषमित्यादि । एतेषां मध्ये केचिद्दंष्ट्रान्तरगतविषोपद्रवाः, केचिन्नखविषाः, केचिद्वालशृङ्गास्थिविषा इत्यादयो ज्ञातव्याः । तथाहि—'भौमसर्पाणां दंष्ट्राविषम्, मार्जारमकरव्याघ्रादयो दंष्ट्रानखविषाः । विषहतास्थिमत्स्यास्थिप्रभृतयोऽस्थिविषाः । पिच्चिटकौण्डिकादन्ये मूत्रपुरीषविषाः । मूषिकादयः शुक्रविषाः । दिव्याः सर्पाः दृष्टिनिश्वासविषाः । वृश्चिकवरच्छुच्चिटादयो लालाविषाः । लूता लालास्पर्श—

१ 'वर्णजाश्च' पा.

१ यश्चायं संप्रति भारतं वर्षमखिलमप्यभिव्याप्य जनपदान् कवलयन् 'प्लेग'पिशाचहतकः समुज्जृम्भते स एव लूताविषशब्दवाच्यो महामारीरोगविशेषः । अस्य च विशेषवृत्तं पराशरसंहितायां वर्णितम् । परन्त्वसदैवदुर्विपाकाद्बह्वनुसन्धानतोऽपि नैकमपि पुस्तकं पराशरसंहितायाः समधिगतमद्याऽपि । केवलं तु माधवनिदानटीकायामातङ्कदर्पणे प्रमाणत्वेन यदुपन्यस्तं तदेव प्रियपाठकेभ्य उपहरामः—

"अन्यत्र जनपदध्वंसनीये । यदाह पराशरः—'यदा प्रबलाहंकारकामक्रोधलोभाभियुक्तैः पाखण्डगुरुसैरैर्मिथ्यादृष्टिभिः स्वकपोलकल्पितप्रपञ्चैरागमाभासैः स्वर्गापवर्गाधर्मादाकृष्य महाजनोऽधर्मेषु युज्यते, तदा त एव ग्रामनगरदेशनगरनिगमजनपदप्रधानधर्ममुत्क्रम्याधर्मेण प्रजा वर्तयन्ति; तदाश्रिताः पौरा जनपदा व्यवहारोपजीविनः स्वतश्चधर्ममभिवर्तयन्ति; ततः सुधर्मः प्रसभं ते तं धर्मेणैव वर्तयन्ति ततस्तेषामन्तर्हितधर्माणामधर्मप्रधानानामुपक्रान्तदेवतानां जनपदानां तदधर्मवशात्तत्कर्मनोदनाद्दिव्यमानाः क्रोधेनोपतप्यमानाः[2] तत्तापवशाद्विषप्रज्वलनतीव्रनिश्वासान् मुञ्चन्ति । ततस्तन्निश्वासकणिकाभ्योऽनुतापात्रानाप्रकारा लूताः सम्पद्यन्ते । तेन विश्वासेन ताभिरेव कालो भूमिरापोऽनिलश्च दूष्यते, तत्र पतन्नृणां कदाचिदुत्क्रान्तव्यथिता विविधमृगपक्षिका अदृष्टधर्मसत्यलज्जारहितजनं प्रसन्नदुर्भितोदीर्णजलाशयप्रपततोल्कापातनिर्घातभूमिकम्पं सज्वालादि सम्प्रति भयमाचक्षते । अरुक्षाः[3] सिता भूजालं संवृतार्कचन्द्रतारामलीमसं भ्रमोद्वेगमिव, संत्रस्तमिव, सतमस्क—

१ 'कथितः' पा. २ 'तप्यन्ति' पा. ३ 'अरुणासिता' पा.

विण्मूत्रशुक्रमुखसंदंशविषा इति । तथा शङ्काविषं मतमिति । तथैवोक्तप्रकारेणैव शङ्काविषमपि उपद्रवकरं भवति । कृत्रिमं द्विविधं प्रोक्तमित्यादि । कृत्रिमं विषं गरदूषिभेदात् द्विप्रकारं कथितम् । तन्त्रान्तरे यथा—गरं गरली तच्च 'दिनाइ'शब्दवाच्यम् । यतः 'सौभाग्यार्थं स्त्रियः स्वेदरजोनानाङ्गजान् मलान् । शत्रुप्रयुक्तांश्च गरान् प्रयच्छन्त्यन्नमिश्रितान्' इत्यादि । दूषीविषमपि देशकालादिदूषणात् कथितम् । तद्यथा—'दूषितं देशकालान्नदिवास्वप्नैरभीक्ष्णशः । यस्मात्संदूषयेद्धातूंस्तस्मात् दूषीविषं स्मृतम्' इति । एके द्विविधमित्यस्य स्थाने विविधमिति पठन्ति व्याख्यानयन्ति च विविधं नानाप्रकारम्, एके द्विविधं कृत्रिममन्यथा व्याख्यानयन्ति । तद्यथा—'एकं सविषाविषसंयोगकृतं कृत्रिमं विषं, अपरं निर्विषकृतं गरसंज्ञम् । यदाह **काश्यपः**—'संयोगजं च द्विविधं तृतीयं विषमुच्यते । गरः स्यादविषस्तत्र सविषं कृत्रिमं मतम्' इति । अत एव चरकः रसायने—'दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे' इति । धातवोऽत्र सुवर्णरजतादयः । ते यदा अशुद्धा भक्षितास्तदा विषतुल्या इति तात्पर्यार्थः । यथा विषादजनकत्वाद्विषं तथा सप्तोपधातुजं विषमिति शेषः । उपधातवो हरितालाद्याः । तथैवोपविषेभ्य इति सप्तविधं विषजातं उपविषमत्रार्कसेहुण्डप्रभृतिकम् । यदुक्तम्—'अर्कसेहुण्डधत्तूरलाङ्गलीकरवीरकः । गुञ्जाहिफेन इत्येताः सप्तोपविषजातयः' इति । दुष्टनीराणि व्यापन्नपानीयानि तज्जनितं विषं विषादजनकत्वात् । तत्तु बाह्याभ्यन्तरं भवति । बाह्यं स्नानादिना, आभ्यन्तरं तु पानादेव । तद्यथा—'न पिबेत् पङ्कशैवालतृणपर्णाविलावृतम् । सूर्येन्दुपवनादृष्टमभिवृष्टं घनं गुरु । फेनिलं जन्तुसंकीर्णं दन्ताग्राह्यतिशैत्यतः । अनार्तवं च यद्दिव्यमार्तवं प्रथमं च यत् । लूतादितन्तुविण्मूत्रविषमं श्लेष्मदूषितम्' इति । तथैकं दिग्धजं विष-

—मिव, गुह्यकाचरिताक्रन्दजबहुलमिव, कालं जानीयात् । अपगतशलभमशकमक्षिकामृतविकृतसरीसृपव्यालाखुगोधासेधारादिकीटबिलेशयतृणोलपेत्यादीनि बहुलां व्यपगतस्वभावकर्मां निपतितशुष्कगलितपत्रोपवनद्रुमां लोहशवपूतिमत्स्यगोमूत्रादिगन्धविकृतस्पर्शक्लेदबहुलां, ताभिर्लूताभिर्दुष्टवीतां च भूमिं विद्यात् । अत्यर्थविकृतिविवर्णगन्धरसस्पर्शमपक्रान्तजलचरविहङ्गं मृतमीनकूर्मनक्रादिकान्वितनीलिकाबहुलं ताभिर्दुष्टमुदकं च व्यवस्येत् । विषमविकृतिस्तिमितप्रबलमतिपरुषमतिशीतमत्युष्णमतिरूक्षमत्यभिष्यन्दनोदिगदं गतिभिरवारावमाचरति (१) प्रतिहतमपरस्य गतिमति कुण्डलितमसात्म्यगन्धं वाष्पशीतपांशुधूमोपहतवायुं जानीयात् । इत्थमेवं मूर्च्छाक्रोधश्वासपिपासेत्यादिरोगेभ्यश्चत्वारो भावा जनपदध्वंसनहेतवो भवन्ति । यदा ता लूता यं यं भूमिमध्यदेशमाक्रामन्ति तद्दुष्टनासाकफलोपयोगिनस्तत्प्रदेशस्था एव प्राणिनो ज्वरिताः, देवभूतग्रस्ता इवोन्मत्ता इव, म्लाना इव, चकितवच्चूर्णधूमधूसरिता इवोन्मत्ताः, स्वनालापदेवा तुल्यसात्म्यप्रकृतयोऽपि कक्षाकण्ठकर्णमूलमर्मसन्धिषु कर्कन्धुकोलामलकास्थिप्रमाणाभिज्वलत्पावकसन्निभा भवन्ति, ज्वरमोहदाहकारिणीभिः पिडिकाभिः परितो नासाक्षिमुखकर्णनाडीजीवरूपरुधिरवामिनस्त्रिरात्रात् सद्य एव विपद्यन्ते । तच्छरीरस्पर्शगन्धलोकान्तसंसर्गिणोऽपि तद्दुष्टकृतिपयकोद्रवसंस्पर्शादनेकोपद्रवा इव यद्विपद्यन्ते, कदाचिदेकैवानुरूपोग्रविषाघ्राणश्वासमार्गेण ज्वरः ग—च्छतः समाश्रयं हृदयमासाद्य, विनाप्युपद्रवेण सद्य एव मारयति । कदाचित्ताभिर्दुष्टाभिः प्राणिन एकावासस्थाः सद्यश्चारिणो वायुवेगात् शयाना एव तिष्ठन्ति । कदाचिद्धर्मवशादुपगतदुष्टैश्चतुर्भिर्भावैः ग्रामनगरपल्लीपट्टनजनपदा युगपन्महानिद्रान्विता अकस्मादेव शयानास्तिष्ठन्ति । कदाचिदल्पविषकुपितेष्वेव भावेषु युगपत् कासश्वासज्वरवमथुशिरोभितापमसूरिकाविसर्पपामादिभिर्दूष्यन्ते । जनपदाः कदाचिद्देवद्विजगुरुद्विदार्यैर्वा (?), कदाचिद्ग्रहनक्षत्रराशिव्यतिक्रमैर्वा, कदाचिद्धर्मकुपितभूतपिशाचवेतालहत्यादूपितानां शम्भोपघातिनामन्तःकरणवृत्तीनां प्रविशन्ति । ततस्तेषु युगपत् पुमांसो वा लोभाहंकारवादातिवादक्रोधादन्योन्यं तेषु विपद्यन्ते । तदा शान्तिकर्मबलिहोमदानदयासिद्धस्तोत्रमन्त्रवेदाध्ययनदेवतायतननागालयेषु महोत्सवयात्रया भवितव्यम् । स्थानपरित्यागे च विषघ्नौषधिमहागदजलैस्तत्स्थानसेको मणिरत्नधारणैर्वा एवं त्रिसन्ध्यां, अतो दिव्यनागायनं, प्रमाणमाह काश्यपेऽप्युक्तं—"वालाद्यकाद्याः समदाः कीटा लूताश्च खेचराः । तद्विषोत्सर्गसंसर्गाद् ग्राह्यं तु क्षारजंजल"मिति । वराहमिहिरेणाप्युक्तं—'सलीलमस्वैरो ज्ञेयो घ्राणपरिवेष्टितमूर्तिभुजङ्गैः फणिजनितविपाग्निसंप्रदुष्टं भवति, तदाशिवं तदगस्त्यदर्शनेनेति' । तथा च श्रुतिः—'येऽन्तरिक्षे ये दिवि तेभ्यः सर्वेभ्यो नम' इति ॥ ( लूताविषनिदाने ॥

अत्र च मूषिकोत्सर्पणम्, विषघ्नौषधजलसेकः, स्थानपरित्यागादिकं तथा सनिदानं वर्णितं दृश्यते यथा पाश्चात्यैरपि नाद्यावधि विज्ञातम् ॥

१ 'दुष्टवाष्पवती' पा० । २-'भिर्नी, अतिभिरवरवमतिगतिहत०' पा० ।

१-'तत्तदा' पा० । २-'मगनो' पा० ।

मिति । विषलिप्तं शस्त्रादिकं दिग्धं कथितं, तज्जनितं विषम् । तेन विषलिप्तशस्त्रहतो जन्तुर्दिग्धाहतः कथितः । कपिकच्छुभवा कण्डूरिति । कपिकच्छू वानरी तस्याः फलम् तज्जनिता कण्डूः खर्जूः, इयमपि कण्डूर्द्रव्यसंसर्गजात्पदोषा नतु कुष्ठोक्ता । दुष्टनीरभवा तथेति । दुष्टनीराणि पूर्वाख्यातानि तज्जनिता कण्डूरपि दुःखकरा भवतीत्यभिप्रायः । तथा सूरणकण्डूश्चेति । सूरणः कन्दविशेषः प्रसिद्ध एव तेनापि संजाता कण्डूरिति । तथा भल्लातजः शोथ इति । भल्लातो भल्लातकफलानि तत्स्पर्शात् शोथो दुःखकरो भवति । स च दोषशोथाद्भिन्न एव ॥ १९६-२०२ ॥

**गू०**—सर्वं विषं स्थावरं, जङ्गमं, कृत्रिममिति त्रिविधं भवति । तेषां त्रयाणां मध्ये नवधा स्थावरं विषं, तत्तु कालकूटादिभेदैर्ज्ञेयम् । जङ्गमं तु बहुधा भवति निदाने तु षोडशविधम् । जङ्गमं तत्तु लूताभुजङ्गमादिकं । तेऽपि चतुर्विधा भवन्ति दंष्ट्राविषादिभेदात् । कृत्रिमं तु गर-दूषीभेदतः द्विविधम् । अथ सप्तधात्वादिभेदेन विषभेदानाह—सप्तधातुविषं स्वर्णादिसप्तधातवः एवं सप्तोपधातुजं हरितालादिजातम् । तथा उपविषेभ्यः अहिफेनादिभ्यो जातं सप्तविधं भवति एकं दुष्टनीरजातं । दिग्धजं विषदिग्धकाण्डजन्यम् । अथ कपिकच्छ्वादिभेदेन विषभेदमाह—एका कपिकच्छूभवा तत्र कण्डूर्जायते, एका दुष्टनीरभवा सापि तद्विषजन्या, एका सूरणजन्या कण्डूः । तथा भल्लातजः शोथः एतेषामपि विषचिकित्सास्ति तदर्थं विषाधिकारे गणिताः ॥ १९६-२०२ ॥

**गू०**—मदश्च विषतुल्यो भवति, सोऽपि चतुर्विधस्तमप्याह—

**मदश्चतुर्विधश्चान्यः पूगभङ्गाक्षकोद्रवैः ।**
**चतुर्विधोऽन्यो द्रव्याणां फलत्वङ्मूलपत्रजः ॥२०३॥**

**दी०**—अन्यो मदश्चतुःप्रकारो ज्ञेयः । स च पूगभङ्गाक्षकोद्रवैः कृतेत्यर्थः । अयमपि आसवारिष्टाद्भिन्न एव । पूगोऽल्पमदकरः, भङ्गा प्रसिद्धा । अक्षं विभीतकफलमज्जा मदकरत्वात् । तदुक्तम्—'तन्मज्जा मदकारकः' इत्यादिवचनात् । कोद्रवाणि मदकराणि ग्राह्याणि । अन्योऽपि मदो द्रव्याणां फलत्वङ्मूलपत्रजः सामान्यो विहितः, फलं खाखसफलनिर्यासः, तत्फलं जातीफलादि मदजनकं गृह्यते । त्वङ्मद इत्यादि । आकल्लकेरिमेदादिकानाम्, इरिमेदो विट्खदिरः । स एव फलमदोऽपि गणितः । आकल्लकोऽपि वक्ष्यमाणमूलमदसंगृहीतः । मूलमद इति क्षुद्रबदर्यादीनां मूलं मदकरत्वात् । पत्रमद इति जातिपत्रिकाभङ्गाप्रभृतीनामिति ॥ २०३ ॥

**गू०**—पूगीफलं, भङ्गा प्रसिद्धा, अक्षं विभीतकं, कोद्रवः मादकः, एषां मदविषतुल्या रोगास्तु अनेकधा भवन्ति नानाविषजन्यास्तदर्थम् ॥ २०३ ॥

**इति प्रसिद्धा गणिता ये किलोपद्रवा भुवि ।**
**असंख्याश्चापरे धातुमूलजीवादिसंभवाः ॥ २०४ ॥**

इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायां निदानरोगगणनाध्यायः ॥

**दी०**—इतिशब्दः परिसमाप्तौ । किल निश्चयेन ये उपद्रवा रोगरूपा भुवि पृथिव्यां प्रसिद्धाः सन्ति तेऽत्र गणिताः शार्ङ्गधरेणेति शेषः । अपरे येऽप्रसिद्धाः असंख्याश्च सन्ति तेऽप्यनुमानतो ज्ञातव्या इत्यर्थः । ते के ? धातुमूलजीवादिसम्भवा इति । धातवः पार्थिवास्ते सुवर्णरजतमणिमुक्तामनःशिलाहरितालमृत्कपालादयः । मूलशब्देन स्थिरा गृह्यन्ते । तेऽपि चतुर्विधाः वनस्पतयो वृक्षा वीरुध ओषधय इति । ननु लोके द्वैविध्यत्वेन पार्थिवा अपि स्थावरशब्देन वाच्याः, तत्कथमत्र पृथगुपादानम् ? उच्यते—येषु व्यवहारयोगित्वं फलमूलाद्यवयवेषु रसप्रधानतया, तत्रैव चतुर्विधे वनस्पतिगणे स्थावरशब्दो वर्तते नतु पार्थिवेष्वपि, तेषामाहारेषु प्रायेणानुपयोगात् । जीवादिसंभवा इति जीवशब्देन जङ्गमा गृह्यन्ते । तेऽपि चतुर्विधा भवन्ति । ते जरायुजाण्डजस्वेदजोद्भिज्जा इत्यर्थः । आदिग्रहणात् प्रवातनिपातातपच्छायाज्योत्स्नातमःशीतोष्णवर्षाप्रभृतयः । एते त्वयथाविधिसेवनात् दुःखकरा इत्यभिप्रायः ॥२०४॥

विविधमुनिनिबन्धा ये महत्सु प्रसिद्धाः
सुमतिदुरवबोधास्ते मया नैव दृष्टाः ।
तदपि गुरुसकाशाद्यच्छ्रुतं तद्व्यलेखि
ह्यढमलभिषजाऽस्यां **भावसिंहात्म**जेन ॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेना-
**ढमल्लेन** विरचितायां शार्ङ्गधरदीपिकायां पूर्वखण्डे रोगगणनाऽध्यायः सप्तमः ॥

**गू०**—विनयश्लोकमाह—इति प्रसिद्धा इति । ये प्रसिद्धोपद्रवा भुवि सन्ति ते मया गणिताः, अपरे असंख्या धातुमूलजीवादिसम्भवास्तेऽपि ज्ञेयाः विस्तरतः विस्तरत्वान्मया नोक्ताः । उपद्रवा देहस्योपद्रवकर्तारः ॥ २०४ ॥

इति श्री**काशीराम**भारद्वाजसारस्वतवैद्यविरचितायां शार्ङ्गधरगूढार्थदीपिकायां रोगगणनं नाम सप्तमोऽध्यायः ॥

**इति शार्ङ्गधरसंहितायां पूर्वखण्डः समाप्तः ॥**

# शार्ङ्गधरसंहितायाम्—

## मध्यमखण्डः ।

### अथ स्वरसाध्यायः ।

द्वितीयखण्डे आदौ स्वरसादीनामभिधानात्स्वरसादीनाह—

**अथातः स्वरसः कल्कः क्वाथश्च हिमफाण्टकौ ।**
**ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम् ॥ १ ॥**

**दी०**—अथ मध्यमखण्डः प्रारभ्यते । तत्रादौ कषायसंज्ञकवृत्तमाह—अथात इति । अथशब्दो मङ्गलार्थः । अत इति प्रथमखण्डानन्तरम् । एते पञ्चकषाया ज्ञेयाः । ते यथोत्तरं लघवः स्युरिति । यो यस्मादुत्तरो यथोत्तरम् । ते के ? स्वरसकल्कक्वाथहिमफाण्टसंज्ञाः । स्वरस इति सद्योरसः, कल्को दृषदि पेषितः, क्वाथः क्वथितः कषायः, हिम इति शीतकषायः, फाण्ट इति जलप्लावितं चूर्णम् ॥ १ ॥

**गू०**—अथात इत्यादि । अथेति रोगगणनानन्तरं स्वरसः, कल्कः, क्वाथः, हिमः, फाण्टः, एते पञ्च कषाया ज्ञेयाः—तेच यथोत्तरं लघवः स्युरिति योजना । यथोत्तरमिति स्वरसात्कल्को लघुः एवमुत्तरं ज्ञेयं । ननु स्वरसो गुरुर्भवति तस्यापेक्षया अन्ये लघवस्तत्कथं तस्यैवादावभिधानम्, स्वरसस्य गुरुत्वे प्रथमत्वे प्रमाणमाह—'स्वरसस्य गुरुत्वाच्च पलमर्धं प्रयोजयेत्' (इति)। उच्यते, स्वरसस्य क्वथितादिगौरवक्रियाभावादादावभिधानम् । यद्वा लघ्वपेक्षया गुरुः पूज्यः अतः स्वरसस्य गुरुत्वादादावभिधानं, तथाचोक्तं वाग्भटे भेषजकल्पनास्थाने-'रसः कल्कः शृतः शीतः फाण्टश्चेति प्रकल्पना । पञ्चधैवं कषायाणां पूर्वं पूर्वं बलाधिका' । कषाया इति कषायद्रव्यसाधितत्वात्, यद्वा कषायाः कषायनामानः । संज्ञापरोऽयं कषायशब्दः ॥ १ ॥

अथ तेषु पूर्वं स्वरसकल्पनामाह—

**आहतात्तत्क्षणाकृष्टाद्द्रव्यात्क्षुण्णात्समुद्धरेत् ।**
**वस्त्रनिष्पीडितो यः स [1]रसः स्वरस उच्यते ॥ २ ॥**
**कुडवं चूर्णितं द्रव्यं क्षिप्तं च द्विगुणे जले ।**
**[2]अहोरात्रं स्थितं तस्माद्भवेद्वा रस उत्तमः ॥ ३ ॥**
**आदाय शुष्कद्रव्यं वा स्वरसानामसंभवे ।**
**जलेऽष्टगुणिते साध्यं पाद[3]शिष्टं च गृह्यते ॥ ४ ॥**
**स्वरसस्य गुरुत्वाच्च पलमर्धं प्रयोजयेत् ।**
**निशोषितं चाग्निसिद्धं पलमात्रं रसं पिबेत् ॥ ५ ॥**

**दी०**—तल्लक्षणं यथा—आहतादिति—ईदृशाद्द्रव्यात् समुद्भवो रसः स स्वरस इत्युच्यते, कीदृशात् ? तमाह—आहतात् क्षतात् शकलीकृतात् तत्क्षणाकृष्टादिति सद्य उत्पाटितात् । क्षुण्णादिति उलूखलादिषु मुसलादिभिः कुट्टितात् । वस्त्रनिष्पीडित इति पटेन परिस्रुतो रस इति शेषः । द्रव्यादिति सामान्यग्रहणेनात्र त्वङ्मूलफलादीनां ग्रहणम् ॥ लक्षणान्तरमाह—कुडवमित्यादि । चेति पक्षान्तरेणापि स्वरसः कथितः, स यथा—कुडवप्रमाणं चूर्णीभूतद्रव्यं द्विगुणजले क्षिप्तमहोरात्रं स्थितं भवति तस्माद् यो रसो जात उत्पन्नः सोपि स्वरस उत्तमो ज्ञेयः । कुडवग्रहणमत्र सकलमानद्योतनार्थम् । अहोरात्रग्रहणेनैव हिमकषायाद्भिन्नो ज्ञातव्यः ।

मतान्तरमपि यथा—आदायेत्यादि । स्वरसा-

---

१–'यः स्यात्स्वरसो रस' पा० । २–'अहोरात्रात्' पा० । ३–'शेषं' पा० ।

नामसंभवे अविद्यमाने शुष्कद्रव्यं क्षुण्णं यथापरिमाणमादाय गृहीत्वा अष्टगुणितपानीये साध्यं क्वथितमित्यर्थः । तस्मात् यत् पादावशेषं भवति तस्यापि स्वरससंज्ञा । यथा परिमाणादिना क्वाथाद्भिन्नमेतत् । इदानीमनुक्तेषु पानार्थं परिमाणपूर्वकं प्रक्षेपमाह—स्वरसस्येति । स्वरसस्य आद्ये अर्धं पलं प्रयोजयेत् । पानार्थमित्यर्थः । निःशोषितमग्निसिद्धं च स्वरसं पलमात्रं पिबेदित्यर्थः । तयोः किंचिल्लघुत्वात् ॥ २–५ ॥

**गू०**—तेषु स्वरसकल्पनामाह—एवंभूतात् क्षुण्णात्कुट्टिताद्द्रव्यात् यः वस्त्रनिष्पीडितो रसो भवेत्स स्वरस उच्यते । किंभूताद्द्रव्यात् । आहतात् शस्त्रादिना छिन्नादित्यर्थः, 'आहतः स्यात्प्रतीघाते आहतं क्षतितेऽपि चे'ति विश्वकोषः । आहतात् न हतं अहतं तस्मात् । कृम्यग्न्यादिभिरदूषितात् कृम्यादिदूषितस्य भेषजकल्पे निषेधात्, यद्वा तत्क्षणाकृष्टादिति वा पाठः । तत्क्षणाकृष्टात् तत्क्षण आनीतात् । स्वरसस्य प्रकारान्तरमाह—कुडवमिति । चतुःपलं चूर्णितद्रव्यमौषधं पुनर्द्विगुणे अष्टपलमिते जले क्षिप्तं अहोरात्रं स्थितं तस्मात् पात्राद्वस्त्रपूतं गृहीतं स वा उत्तमो रसः स्वरसो भवेत् । आर्द्रद्रव्याभावे शुष्कद्रव्यस्यापि स्वरसो भवेदित्याह—आदायेति । स रसः स्वरसानां आर्द्रद्रव्याणां वा असम्भवे शुष्कं आदाय अष्टगुणे जले साध्यं पादशिष्टश्च गृह्यते पुनर्गृहीतत्वात्स्वरसस्य गुरुत्वात् पलमर्धं प्रयुज्यते चेत् निःशोषितं रात्रिस्थापितं अग्निसिद्धं चेत् पलमात्रं पिबेदिति योजना । ननु इदं स्वरसलक्षणं रात्रिस्थितत्वाद्धिमलक्षणे अग्निपक्वात्क्वाथलक्षणे च व्यभिचरति । यतः वाग्भटे इदं स्वरसलक्षणं लिखितं 'सद्यःसमुद्धृतक्षुण्णात् यः स्रवेत्पटपीडनात् । वस्त्रनिष्पीडितो यः स स्वरसो रस उच्यते' अतो लक्षणे व्यभिचारः? उच्यते, इदं तन्त्रान्तरमतं, यद्वा षोडशगुणे नीरे सिद्धं भवति, स्वरसोऽष्टगुणे नीरे भवतीति भेदः ॥ २–५ ॥

## प्रक्षेपप्रमाणम् ।

**मधु श्वेता गुडं क्षारान् जीरकं लवणं तथा ।**
**घृतं तैलं च चूर्णादीन्कोलमात्रान्रसे क्षिपेत् ॥ ६ ॥**

**दी०**—तत्र प्रक्षेपमाह—मध्वित्यादि । मध्वादिकं कोलमात्रं यथा स्यात्तथा क्षिपेत् । कोलं पलस्य चाष्टांशं । मध्विति सामान्यग्रहणेन तज्जातयोऽष्टौ गृह्यन्ते । तद्यथा—"पौतिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव च । आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः" इति । एवमविशेषोक्तौ सर्वत्र । श्वेता सितशर्करा, गुडं प्रसिद्धं, तदुपलक्षितत्वेनान्ये इक्षुविकारा यथा दोषापेक्षया गृह्यन्ते । क्षारानिति बहुवचनत्वेन सर्वे क्षाराः, अनुक्ते यवक्षारमेव सर्वत्र । जीरकं प्रसिद्धं सामान्यग्रहणेन पीतकृष्णादिकम्, अविशेषे श्वेतजीरकमेव । लवणमिति सामान्येन पञ्चलवणानि गृह्यन्ते, तद्यथा—'सिन्धुसौवर्चलोपेतं विडं सामुद्रजोद्भिदं' इति । अनुक्ते तु सैन्धवमेव ग्राह्यं सर्वत्र । घृततैलं पक्वापक्वं नानाविधम् । तत्रानुक्ते तु गव्यं घृतं तिलतैलं च प्रधानमिति । तथा हि—'घृतेषु गोघृतं श्रेष्ठं तैलेषु तिलजं तथा' इति । चूर्णादीनिति व्योषचूर्णादीन् । आदिग्रहणेन क्षारमूत्रारिष्टशुक्तादयो रोगापेक्षया गृह्यन्ते । यद्वा गुटिकावलेहादयोऽप्यादिशब्देन ग्राह्याः ॥ ६ ॥

**गू०**—इदानीं स्वरसे प्रक्षेपप्रमाणमाह—रसे स्वरसे प्रक्षेपणार्थमुक्तान् मध्वादीन् कोलमात्रान् क्षिपेत् । कोलशब्देन टङ्कद्वयमुच्यते । अग्न्यपेक्षया वा देयं, यतः 'मात्राया न व्यवस्थास्ति व्याधिं कोष्ठं बलं वयः । आलोच्य देशकालौ च योज्या तद्वच्च कल्पना ॥' इति परिभाषायामुक्तम् ॥ ६ ॥

## अमृतास्वरसः ।

अथ व्याधिप्रशमनीकार्थं बहून् स्वरसान् दर्शयन्नाह—
**स यथा–अमृताया रसः क्षौद्रयुक्तः सर्वप्रमेहजित् ।**
**हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाक्षिकः ॥७॥**

स यथेति । स यथा इत्यादिवाक्येन प्रयोगान् प्रकटयति ग्रन्थकारः, अथवा गुणयुक्तिज्ञापनार्थं शिष्यवचनमिदं एवं सर्वत्र 'स यथे'ति ज्ञातव्यम् ।

**दी०**—स्वरसानाह—स यथेति । अमृता गुडूची तस्या रसः सद्योरसः क्षौद्रयुक्त इति मधुप्रक्षिप्तः । सर्वग्रहणेनेति विंशतिर्मेहाः । प्रयोगान्तरमाह—धात्र्या इति । धात्र्या रसः सद्यस्कः क्वथितो वा हरिद्राचूर्णयुक्तो मधुयुक्तो वा । सर्वग्रहणेनायमपि सर्वप्रमेहजिद्भवतीति तात्पर्यार्थः । वाग्रहणेन हरिद्रायाः कल्कमपि देयम् । तथाच तन्त्रान्तरे–'निशाकल्कयुतो धात्रीरसो वा माक्षिकान्वितः । मधुना त्रिफलाचूर्णं प्रमेहाणां विनाशनम्' इति ॥७॥

**गू०**—स यथेति । एतस्यायमर्थः सः स्वरसः यथा भवति तथा उच्यते, अमृता गुडूची तस्या रसः स्वरसः मधुयुक्तः सर्वप्रमेहजिद्भवति अथवा धात्र्या आमलक्या

१–'गण्डम्' पा० । २–इदं नास्ति 'ख' पुस्तके ।

रसः हरिद्राचूर्णयुक्तः समाक्षिकः सर्वप्रमेहजिद्भवतीति पूर्वेणान्वयः । कर्तव्यता तु पूर्वोक्तैव ॥ ७ ॥

## रक्तपित्तादिषु वासकादिस्वरसः ।

**वासकः स्वरसः पेयो मधुना रक्तपित्तजित् ।**
**ज्वरकासक्षयहरः कामलाश्लेष्मपित्तहा ॥ ८ ॥**
**त्रिफलाया रसः क्षौद्रयुक्तो दार्वीरसोऽथ वा ।**
**निम्बस्य वा गुडूच्या वा पीतो जयति कामलाम् ॥**

**दी०**—वासक इत्यादि । वासकः आटरूषकः, तस्य पत्राणि इति व्यवहारात् । मधुनेति प्रक्षेपः अयं चोर्ध्वगे रक्तपित्ते विशेषेण योज्यः । शेषं सुगमं ॥ त्रिफलाया इति । त्रिफलादीनां चतुर्णां स्वरसाः कामलां घ्नन्तीति । तत्र त्रिफलादार्व्योः क्वथितरसः, निम्बगुडूच्योस्तु स्वरस एव । मधुप्रक्षेप एषु चतुर्षु योगेषु ज्ञेयः । त्रिफला विख्याता सात्र हरीतक्यादिका । यद्यपि त्रिफलाशब्देन द्राक्षाकाश्मर्यपरूषकाण्युच्यन्ते । तदुक्तं—'पथ्याविभीतधात्रीभिस्त्रिफला महती स्मृता । ह्रस्वा काश्मर्यमृद्वीकापरूषकफलैर्भवेत्' इति । तथापि सर्वत्र गुणप्राधान्यादविशेषोक्तौ हरीतक्यादीन्येव त्रिफलाशब्देन गृह्यन्ते । दार्वी दारुहरिद्रा तस्यास्त्वक् ग्राह्या, त्वगभावे काष्ठमेवेति सर्वत्र ॥ ८ ॥ ९ ॥

**गू०**—अथ वासकादिस्वरसो रक्तपित्तादौ । दार्वी दारुहरिद्रा स्पष्टमन्यत् । वासकस्वरसः मधुना पेयः रक्तपित्तजिद्भवति वासकस्वरसः अर्धपलं मधु टंकद्वयं मुखाद्गतं रक्तं तथा ज्वरादिहरः त्रिफलास्वरसः मधुयुतः तथा दार्वी दारुहरिद्रास्वरसः मधुयुतः कामलादिनाशको भवति ॥ ८ ॥ ९ ॥

## विषमज्वरे तुलसीद्रोणपुष्पीस्वरसौ ।

**पीतो मरिचचूर्णेन तुलसीपत्रजो रसः ।**
**द्रोणपुष्पीरसो वापि निहन्ति विषमज्वरान् ॥१०॥**

**दी०**—पीत इति—द्रोणपुष्पी 'गुमा' इति लोके । मरिचचूर्णमप्यत्र प्रक्षिप्तं, तच्च तीक्ष्णत्वान्माषकद्वयमिति व्यवहारः । विषमज्वरानित्यैकाहिकादीन् ॥ १० ॥

**गू०**—अथ विषमज्वरे तुलसीस्वरसमाह—मरिचचूर्णेन पीतः तुलसीपत्रजः रसः स्वरसः द्रोणपुष्पीस्वरसो वा पीतः विषमज्वरान्सन्ततादीन् निहन्ति । द्रोणपुष्पी गूमाशाकः कटूष्णत्वात्कर्षः रसः मरिचं माषकमात्रं मात्रायाः स्थितिर्नास्तीत्युक्तत्वात् ॥ १० ॥

## रक्तातिसारे जम्ब्वादिस्वरसः ।

**जम्ब्वाम्रामलकीनां च पल्लवोत्थो रसो जयेत् ।**
**मध्वाज्यक्षीरसंयुक्तो रक्तातीसारमुल्बणम् ॥ ११ ॥**

**दी०**—जम्ब्वाम्रेति । जम्ब्वादीनां पल्लवोद्भवो रसो मध्वादियुक्तोऽतीसारं जयेत् । पल्लवग्रहणेन कोमलपत्राणीत्युक्तम् । आज्यं घृतं, क्षीरं दुग्धम् । एके 'मध्वाजक्षीरसंयुक्त'मिति पठन्ति व्याख्युक्तत्वात् । तथाहि—'आजं शोषज्वरश्वासरक्तपित्तातिसारजित्' इति । उल्बणमिति वृद्धं, चिरकालस्थितमित्यन्ये ॥ ११ ॥

**गू०**—अथ रक्तातीसारे जम्ब्वादिस्वरसः । जम्ब्वाम्रामलकीनां च पल्लवोत्थरसः स्वरसः मध्वाज्यक्षीरसंयुक्तः उल्बणं रक्तातीसारं जयेत् । जम्ब्वादीनां पल्लवं किसलयं, उल्बणं अधिकम् ॥ ११ ॥

## बब्बूल-स्योनाक-कुटजस्वरसाः ।

**स्थूलबब्बूलिकापत्ररसः पानाद्व्यपोहति ।**
**सर्वातिसारान्स्योनाककुटजत्वग्रसोऽथवा ॥ १२ ॥**

**दी०**—स्थूलबब्बूलिकेति । स्थूलबब्बूलिका अरण्योद्भवा । तस्यातिरूक्षत्वादेके पर्वतीयामिति वदन्ति, सा चोर्ध्वशाखाभिरुपलक्षिता प्रसिद्धैव । 'स्थलबब्बूलिकापत्ररसपाना' दिति पाठान्तरम् । स्थलवत् स्थलजवत् शूलिका आनूपजापि इति तात्पर्यार्थः । शूलिकेति शूलिका कथिता । उक्तंच नाममालायाम्—'बब्बूलः सरलः शूली सेलकण्ठोऽधिकण्टकः' इति । शूलिकाऽल्पविटपा, बब्बूरीति लोके । प्रयोगान्तरमाह—स्योनाकेत्यादि । स्योनाककुटजयोस्त्वगुद्भवो रसस्तत्कार्यकर इति । स्योनाकत्वगुद्भवः कुटजत्वगुद्भवो वेति योगद्वयमिति केचित् । अत्रापि मधुप्रक्षेपः पूर्ववदनुसर्तव्यः । सर्वातिसारानिति सप्तप्रकारानित्यर्थः ॥ १२ ॥

**गू०**—अथ सर्वातीसारे बब्बूलस्वरसः । स्थूलबब्बूलिकं निष्कंटकबब्बूलः तस्य पत्ररसः स्वरसः तत्पानात्सर्वातिसारान्षड्विधाञ्जयति । अथवा स्योनाकः अरलुः, तथा कुटजः कूडा तयोः त्वग्भवो रसो वा अतीसाराञ्जयेत् ॥ १२ ॥

### प्रतिश्याये-आर्द्रकस्वरसः।

**आर्द्रकस्वरसः क्षौद्रयुक्तो वृषणवातनुत्।**
**श्वासकासारुचीर्हन्ति प्रतिश्यायं व्यपोहति ॥ १३ ॥**

दी०—आर्द्रकेति । आर्द्रकं स्वनाम्ना प्रसिद्धम्। तद्रसः क्षौद्रयुतो मधुयुतः वृषणवातनुद्भवति । वृषणवातोऽण्डवातः, कुरण्ड इति केचित् । प्रतिश्यायं प्रतिस्रावरूपम् ॥ १३ ॥

गू०—अथार्द्रकस्वरसः । वृषणवातश्वासादौ आर्द्रकस्वरसः क्षौद्रयुक्तः वृषणवातजित् अण्डवृद्ध्यादीञ्जयति, तथा श्वासकासादीन् जयति प्रतिश्यायो नासास्रावः ॥ १३ ॥

### पार्श्वादिशूलेषु-बीजपूरस्वरसः।

**बीजपूररसः पानान्मधुक्षारयुतो जयेत्।**
**पार्श्वहृद्बस्तिशूलानि कोष्ठवायुं च दारुणम् ॥ १४ ॥**

दी०—बीजपूरेति । बीजपूररसो बीजपूरफलस्वरसः, कीदृशः? मधुक्षारयुतः । मधु क्षौद्रं, क्षारोऽत्र यवक्षारः अयं पानात् पार्श्वादिशूलान् जयेत्, नरस्येति शेषः । शूलशब्दः पार्श्वादिभिः सम्बध्यते । तेन पार्श्वशूलं हृच्छूलं बस्तिशूलं चेति । बस्तिर्मूत्राधारः, कोष्ठवायुं पक्काशयगतं, दारुणं पीडाकरम् । बीजपूर इति सामान्यग्रहणेन तन्मूलकथितरूपं स्वरसमित्याहुरेके ॥ १४ ॥

गू०—अथ बीजपूरस्वरसः पार्श्वशूलादौ मधुक्षारयुतः बीजपूररसः पानात्पार्श्वशूलहृद्बस्तिशूलानि तथा दारुणं कोष्ठवातं जयेत् । बीजपूररसः जटास्वरसः यद्वा फलरसः क्षारो यवक्षारः ॥ १४ ॥

### पित्तशूले-शतावरीस्वरसः।

**शतावर्याश्च मधुना पित्तशूलहरो रसः ।**
**निशाचूर्णयुतः कन्यारसः प्लीहापचीहरः ॥ १५ ॥**

दी०—शतावर्याश्चेति । शतावरी प्रसिद्धा, तस्याः सद्योरसः । अयं प्रातरेव योज्यः । मधुनेति—मधुमिलितः । कन्यारसः कुमारीस्वरसः, वारि इति लोके । निशाचूर्णयुत इति । हरिद्राचूर्णप्रक्षिप्तः । प्लीहोपलक्षितत्वाद्रोगविशेषः । प्लीहवृद्धिरिति लोके । अपची ग्रन्थिभेदः ॥ १५ ॥

गू०—शतावर्या इति स्पष्टम् ॥

अथ प्लीहापच्योः कन्यास्वरसः, निशेति । निशा हरिद्रा तच्चूर्णयुतः कन्यारसः कुमारीरसः प्लीहापचीहरो भवति प्लीहा पीहा । अपची कण्ठदेशे गण्डमालाभेदः ॥ १५ ॥

### अथालम्बुषास्वरस अपच्यादौ—

**अलम्बुषायाः स्वरसः पीतो द्विपलमात्रया ।**
**अपचीगण्डमालानां कामलायाश्च नाशनः ॥ १६ ॥**

दी०—अलम्बुषाया इति । अलम्बुषा मुण्डितिका तस्याः स्वरसः सद्यस्कः कथितः । द्विपलग्रहणमतिलघुत्वात्, प्रबलरोगार्थत्वाद्वा । अपचीगण्डमालादयोऽपि प्रबला एव ॥ १६ ॥

गू०—अलम्बुषा मुण्डी तस्याः स्वरसः द्विपलमात्रया पीतः अपची गण्डमाला तस्याः कामलायाश्च नाशको भवति पूर्वानुक्रममपि द्विपलं स्वरसपानं यदुक्तं तस्यायमभिप्रायः । अर्धपलं पश्चात् द्विपलं सप्तकद्वयानन्तरम् ॥ १६ ॥

### मुण्डीस्वरसः-सूर्यावर्तार्धशीर्षव्यथादौ ।

**रसो मुण्ड्याः सकोष्णो वा मरिचैरेव धूलितः ।**
**जयेत्सप्तदिनाभ्यासात्सूर्यावर्तार्धभेदकौ ॥ १७ ॥**

दी०—रसो मुण्ड्या इति । मुण्डी केदारमुण्डी । कदम्ब इति प्रसिद्धः । तस्या रसः स च कोष्णः ईषदुष्णः । अतएवात्र कथितरसो ज्ञेयः, मरिचस्य तीक्ष्णत्वात् स्वल्पं देयम् । सप्तदिनग्रहणेनास्य महिमा कथ्यते । सूर्यावर्तार्धभेदकौ रोगे पठितौ ॥ १७ ॥

गू०—अथ शशमुण्डरसः सूर्यावर्तादौ—शशमुण्डरसः मस्तकरसः उत्क्वाथ्य रसः कर्तव्यः कोष्ण ईषदुष्णः मरिचैरवधूलितश्च सप्तदिनाभ्यासात् सूर्यावर्तार्धभेदकौ अर्धशीर्षव्यथां जयेत् ॥ १७ ॥

### अथोन्मादादौ—ब्राह्म्यादिस्वरसः।

**ब्राह्मीकूष्माण्डषड्ग्रन्थाशङ्खिनीस्वरसाः पृथक् ।**
**मधुकुष्ठयुताः पीताः सर्वोन्मादापहारिणः ॥ १८ ॥**

दी०—ब्राह्मीति—ब्राह्मीत्यादियोगचतुष्टयं सर्वोन्मादहरं भवति । ब्राह्मी स्वनामख्याता । कूष्माण्डं अभावे कथितं कूष्माण्डफलम् । षड्ग्रन्था शठी ।

१-'स च मुण्ड्या रसः' पा० । 'शशमुण्ड्या रसः कोष्णो' इति पाठः । 'शङ्खपुष्पीमुण्डीरसः' इति ख-पुस्तके । २-'रकाः' पा० ।

तदभावे वचा ग्राह्या । शङ्खिनी नाकुली प्रसिद्धा । एतेषां सद्योरसः अभावे क्वथितो वा । मधुकुष्ठयुत इति प्रत्येकं रससम्बन्धः । मधु क्षौद्रं, कुष्ठं प्रसिद्धम्, तच्चूर्णमित्यर्थः । सर्वोन्मादा इति दोषोद्भवा भूतोद्भवाश्च ॥ १८ ॥

**गू०**—ब्राह्मी पश्चिमदेशे प्रसिद्धा यद्वा ब्रह्म 'लोनिया'वा, कूष्माण्डः कुम्हेडा, षड्ग्रन्था वचा, शंखिनी संखाहुली एषां स्वरसाः पृथक् भिन्नाः मधुकुष्ठयुताः पीताः सर्वोन्मादापहारिणो भवन्ति । मधु कुष्ठं कोलमात्रं यथाबलं वा ॥ १८ ॥

### कोद्रवमदे—कूष्माण्डस्वरसः ।

**कूष्माण्डकस्य स्वरसो गुडेन सह योजितः ।**
**दुष्टकोद्रवसंजातमदं पानाद्व्यपोहति ॥ १९ ॥**

**दी०**—कूष्माण्डकस्येति—दुष्टकोद्रवसंजातं दुष्टं मदकरं । कोद्रवमन्नविशेषः । गुडाभावे शर्करादयोऽपि योज्या गुडोपलक्षितत्वात् ॥ १९ ॥

**गू०**—कूष्माण्डेति स्पष्टमेतत् ॥ १९ ॥

### गाङ्गेरुकीस्वरसमाह व्रणे—

**खड्गादिच्छिन्नगात्रस्य तत्कालं पूरितो व्रणः ।**
**गाङ्गेरुकीमूलरसैर्जायते गतवेदनः ॥ २० ॥**

**दी०**—खड्गादीति—गाङ्गेरुकी नागबला तस्या मूलस्वरसेन पत्ररसेन वा पूरितः यथायोग्यपरिमाणेन पूरितः, सद्यो व्रणो गतवेदनो भवति । तत्कालमिति छिन्नमात्रे तद्दिने वा । स्वरसोऽत्र सद्योरसः नतु क्वाथादिरूपः । खड्गादिच्छिन्नगात्रस्येति—आदिग्रहणात् शक्तिकुन्तादिभिश्छिन्नगात्रस्येत्यर्थः ॥ २० ॥

**गू०**—खड्गादिच्छिन्नगात्रस्य पुरुषस्य गाङ्गेरुकीमूलरसैस्तत्कालं व्रणः पूरितो भवति गतवेदनश्च जायते इति सम्बन्धः । गाङ्गेरुकी गर्णेगेरी ॥ २० ॥

इदानीं पुटपाकस्वरूपस्य रसस्य कर्तव्यताविधिमाह—

### पुटपाकविधिः ।

**पुटपाकस्य कल्कस्य स्वरसो गृह्यते यतः ।**
**अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ॥ २१ ॥**

**पुटपाकस्य मात्रेयं लेपस्याङ्गारवर्णता ।**
**लेपं च त्र्यङ्गुलं स्थूलं कुर्याद्वाङ्गुष्ठमात्रकम् ॥ २२ ॥**
**काश्मरीवटजम्ब्वादिपत्रैर्वेष्टनमुत्तमम् ।**
**पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत् ॥ २३ ॥**
**कल्कचूर्णद्रवाद्यास्तु देयाः स्वरसवद्बुधैः ।**

**दी०**—पुटपाकस्येति—यतो हेतोः पूर्वं कल्करूपस्य पश्चात् पुटपाकस्य द्रव्यस्य रसो गृह्यते अतस्तस्य युक्तिः कर्तव्यविधिरत्रास्मिन् ग्रन्थे मयाऽऽचार्येण उच्यते, अधुनेति शेषः । तद्युक्तिर्यथा—पुटपाकस्य मात्रेयमिति । पुटपाकरूपो द्रव्यगोलकः यावदङ्गारसदृशो भवति तावत् अग्नौ स्थितः, इयं मात्रा लेपस्येत्यर्थः । लेपमपि मृदादिना त्र्यङ्गुलोन्मितं काश्मर्यादीनां पत्रैर्वेष्टनं च । लेपनं गोधूमचूर्णादिना तदङ्गुष्ठमात्रं प्रथमं कार्यम् । अग्रे वक्ष्यमाणत्वात् । पश्चात् मृदादीनां प्रलेप इत्यर्थः । उत्तममिति । सूत्रादिवेष्टनेन न्यूनाधिकरहितं वेष्टनमित्यर्थः । काश्मर्यादयः प्रसिद्धाः । आदिग्रहणात् विज्ञातवृक्षाणां पत्रैर्वा वेष्टनं न निषिद्धम् ॥ अस्यैव पानार्थं मानमाह—पलमात्र इति । रसः पुटपाकोद्भवः सः पलोन्मितः पलमात्रो ग्राह्यः । मधु कर्षप्रमाणं क्षिपेत् । अत्रैव कल्काद्याः पूर्वस्वरसवद्देयाः । अत्रैव प्रक्षेपार्थमिति भावः । द्रवोऽत्र घृतक्षीरतैलादिः । आदिशब्देन पूर्वोक्तानां यान्यवशिष्टानि तान्यत्र ज्ञातव्यानि ॥ २१–२३ ॥

**गू०**—पुटपाकः सोऽपि स्वरसभेद एव । यतः पुटपाकस्य कल्कस्य पिष्टद्रव्यस्य स्वरसः गृह्यते अतः पुटपाकानां स्वरसभेदानां युक्तिः मया उच्यते पुटपाककर्तव्यतायां विधिमाह पुटेति । सुगममन्यत् ॥ २१-२३ ॥

### कुटजपुटपाक अतीसारे—

**स यथा–तत्कालाकृष्टकुटजत्वचं तण्डुलवारिणा ॥ २४**
**पिष्टां चतुष्पलमितां जम्बूपल्लववेष्टिताम् ।**
**सूत्रेण बद्धां गोधूमपिष्टेन परिवेष्टिताम् ॥ २५ ॥**
**लिप्तां च घनपङ्केन गोमयैर्वह्निना दहेत् ।**
**अङ्गारवर्णां च मृदं दृष्ट्वा वह्नेः समुद्धरेत् ॥ २६ ॥**
**ततो रसं गृहीत्वा च शीतं क्षौद्रयुतं पिबेत् ।**
**जयेत्सर्वानतीसारान्दुस्तरान्सुचिरोत्थितान् ॥ २७ ॥**

**दी०**—स यथेति वचनात् पुटपाकस्वरसोऽयं, यथा

---

१–शङ्खपुष्पीत्यर्थः । २–'कुष्ठ' पा० । ३–भंगेरण. ।

१–'क्षौद्ररसं' पा० ।

रोगेषु विहितस्तं तथैव दर्शयन्नाह—तदिति कुटजो गिरिमल्लिका तस्य त्वक् छल्ली। तण्डुलवारिणेति तण्डुलधावनेन। गोधूमपिष्टेन लेपनं स्रुलेपनं च। स्रुलेपनं तु द्व्यङ्गुलप्रमितम्। शीतमिति मधुविरोधात्। यतः 'उष्णैर्विरुध्यते क्षौद्रम्' इति। शेषं सुगमम् ॥ २४-२७ ॥

**गू०**—स यथा तत्कालेति। तत्कालाकृष्टां तत्कालानीतां कुटजः कुडा तस्य त्वचं तण्डुलवारिणा तण्डुलजलेन पिष्टां चतुःपलमितां चतुःपलप्रमाणां जम्बूपल्लवः जम्बूकिसलयं तेन वेष्टितां पुनः घनपङ्केन गाढकर्दमेन लिप्तां गोमयैरुपलैः वह्निना दहेत्, स्पष्टमन्यत् ॥ २४-२७ ॥

अथ कर्मप्रयोगे **तण्डुलजल**माह—

**कण्डितं तण्डुलपलं जलेऽष्टगुणिते क्षिपेत्।**
**भावयित्वा जलं ग्राह्यं देयं सर्वत्र कर्मसु ॥ २८ ॥**

**दी०**—अथात्र प्रसङ्गतस्तण्डुलजलस्य विधिमाह—कण्डितं तण्डुलपलमिति। कण्डितं स्वस्थं तन्मुसलादिभिरुलूखले कुट्टितमित्यर्थः। अष्टगुणिते जले पलाष्टकपानीये भावयित्वा प्रक्षाल्य जलं ग्राह्यं तत्तण्डुलजलमिति। एतच्चानुक्तं सर्वत्र योज्यमित्यर्थः ॥ २८ ॥

**गू०**—कण्डितं निस्तुषं भावयित्वा। स्पष्टमन्यत् ॥ २८ ॥

## अतीसारे—अरलूपुटपाकः।

**अरलूत्वकृतश्चैव पुटपाकोऽग्निदीपनः।**
**मधुमोचरसाभ्यां च युक्तः सर्वातिसारजित् ॥२९॥**

**दी०**—अरलूपुटपाकमाह—अरल्विति। अरलुः वृक्षविशेषः प्रसिद्ध एव; तदभावे स्योनाकः। तस्य त्वक्कृतः पुटपाकरसः केवलः अग्निकरो भवति। चकारात् अत्रापि पूर्ववत् पुटपाकयुक्तिर्ज्ञातव्या। यदायमेव रसो मधुमोचरसाभ्यां युक्तस्तदा सर्वातीसारजिद्भवति। मोचरसः शाल्मलीनिर्यासः ॥ २९ ॥

**गू०**—अथारलूपुटपाकः अतीसारे अरलुः स्योनाकनाम। स्पष्टमन्यत् ॥ २९ ॥

## सर्वातीसारे-तित्तिरपुटपाकः।

**न्यग्रोधादेश्च कल्केन पूरयेद्गौरतित्तिरेः।**
**निरन्नमुदरं सम्यक्पुटपाकेन तत्पचेत् ॥ ३० ॥**
**तत्कल्कस्य रसः क्षौद्रयुक्तः सर्वातिसारनुत्।**

१-'तित्तिरम्' इति पा०। २-'जित्' इति पा०।

**दी०**—अथ तित्तिरपुटपाकमाह—न्यग्रोधादेरिति। अस्य विधिस्तु पूर्ववज्ज्ञातव्यः। न्यग्रोधादेरिति न्यग्रोधादिगणस्य कल्केनेत्यर्थः। तद्यथा—न्यग्रोधोदुम्बराश्वत्थप्लक्षमधूककपीतनककुम्भाम्रकोशाम्रचोरकपत्रजम्बूद्वयपियालमधुकरोहिणीवञ्जुलकदम्बबदरीतिन्दुकीशल्लकीलोध्रद्वयभल्लातकपलाशा नन्दीवृक्षश्चेति **न्यग्रोधादिगणः** सुश्रुतात्। एतेषां व्यस्तसमस्तानां यथालाभं परिभाषोक्त्या त्वगादयो ग्राह्या इति वृद्धानां व्यवहारः। एके न्यग्रोधादिग्रहणेन पञ्चवल्कलानि मन्यन्ते। तद्यथा—'न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः। पञ्चवल्कम्' इत्यादि। गौरतित्तिरेरिति यद्गौरग्रहणं तद्विशिष्टगुणज्ञापनार्थं, 'तित्तिरिः सर्वदोषघ्नो विशेषाद्गौरतित्तिरि'रिति वचनात्। निरन्नमिति—अन्नग्रहणं यकृत्प्लीहादिकमपि गृह्यते, तैरपि रहितमित्यर्थः ॥ ३० ॥

**गू०**—अथ तित्तिरपुटपाक अतीसारे। न्यग्रोधादेः कल्केन गौरतित्तिरेः निरन्नमुदरं सम्यक् पूरयेत् तत्पुटपाकेन पचेत् तत्कल्कस्वरसः क्षौद्रयुक्तः सर्वातीसारनुद्भवतीति योजना। न्यग्रोधादेरिति न्यग्रोधादिपञ्चपल्लवस्य कल्कः ते न्यग्रोधादयः पञ्च न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसाः, तत्र न्यग्रोधः वडः, उदुम्बरः गूलरः, अश्वत्थः पीपरः, प्लक्षः पिलखनि, वेतसः वेत इति प्रसिद्धः ॥ ३० ॥

## अतीसारविशेषे दाडिमीपुटपाकमाह—

**पुटपाकेन विपचेत्सुपक्कं दाडिमीफलम् ॥ ३१ ॥**
**तद्रसो मधुसंयुक्तः सर्वातीसारनाशनः।**

**दी०**—पुटपाकेनेति—सुपक्वग्रहणं अम्लव्यवच्छेदार्थम्। यतः अम्लत्वे तत्कार्यकरं न भवति। तथाहि—'दाडिमं दीपनं ग्राहि द्विधा स्वाद्वम्लभेदतः। तयोः स्वादु त्रिदोषघ्नमम्लं वातबलासकृत्' इति। तद्रसः पुटपाकरसः। मधुसंयुक्त इति मधुप्रक्षेपयुतः ॥ ३१ ॥

**गू०**—पुटपाकेनेति सुगमम् ॥ ३१ ॥

अथ **बीजपूरादिपुटपाकद्वयम्**—

**बीजपूराम्रजम्बूनां पल्लवानि जटाः पृथक् ॥ ३२ ॥**
**विपचेत्पुटपाकेन क्षौद्रयुक्तश्च तद्रसः।**
**छर्दिं निवारयेद्धोरां सर्वदोषसमुद्भवाम् ॥ ३३ ॥**

**दी०**—अथ जटापल्लवपुटपाकमाह—बीजेति। बीजपूरादीनां मिलित्वा गुणविशेषेण योगद्वयम्। एकं पल्लवकृतम्। अपरं जटाकृतं च। परस्पराभावविशेषात्।

पृथगिति ग्रहणेन योगत्रयमेतत् । एतेन किमुक्तं ? बीजपूरादीनां व्यस्तानां पल्लवपुटपाकः जटापुटपाको वा कर्तव्य इति तात्पर्यार्थः । घोरामित्यनिवार्याम् । सर्वदोषसमुद्भवामिति त्रिदोषजनिताम् ॥ ३२ ॥ ३३ ॥

**गू०**—सुगमम् ॥ ३२ ॥ ३३ ॥

**रक्तपित्तादौ—वासापुटपाकमाह—**

**पिष्टानां वृषपत्राणां पुटपाकरसो हिमः ।**
**मधुयुक्तो जयेद्रक्तपित्तकासज्वरक्षयान् ॥ ३४ ॥**

**दी०**—पिष्टानामिति । वृषः आटरूषकः, पिष्टानां कल्कीभूतानाम् । हिम इति शीतलो ननु हिमसंज्ञः कषायः, क्षतमत्रोरःक्षतम् ॥ ३४ ॥

**गू०**—वासापुटपाको रक्तपित्तादौ-वृषो वासकः, तेषां पुटपाकरसः हिमः शीतलमधुयुक्तः रक्तपित्तादीन् जयेत् ॥ ३४ ॥

अथ **कण्टकारीपुटपाकः कासश्वासादौ—**

**पचेत्क्षुद्रां सपञ्चाङ्गां पुटपाकेन तद्रसः ।**
**पिप्पलीचूर्णसंयुक्तः कासश्वासकफापहः ॥ ३५ ॥**

**दी०**—अथ कण्टकारीपुटपाकमाह—पचेदिति । क्षुद्रा लघुकण्टकारिका । कीदृशी ? तामाह—सपञ्चाङ्गामिति । मूलत्वक्पत्रपुष्पफलसहितामित्यर्थः । पिप्पली चात्र स्वल्पमाना देया तीक्ष्णत्वात् ॥ ३५ ॥

**गू०**—क्षुद्रा लघुकण्टकारी पञ्चाङ्गं पत्रपुष्पजटाफलत्वक्सहितां पिप्पलीचूर्णत्रयाणां पञ्चानां च अधिककटूष्णत्वात् ॥ ३५ ॥

अथ **बिभीतकपुटपाकः कासादौ—**

**बिभीतकफलं किंचिद्घृतेनाभ्यज्य लेपयेत् ।**
**गोधूमपिष्टेनाङ्गारैर्विपचेत्पुटपाकवत् ॥ ३६ ॥**
**ततः पक्वं समुद्धृत्य त्वचं तस्य मुखे क्षिपेत् ।**
**कासश्वासप्रतिश्यायस्वरभङ्गाञ्जयेत्ततः ॥ ३७ ॥**

**दी०**—बिभीतकपुटपाकमाह—बिभीतकेति । बिभीतको 'बहेरे' इति लोके । तानि सकलानि गृहीत्वा किञ्चिद्घृतेनाभ्यज्य पूर्ववत् पुटपाकविधानेन विपचेत् । अङ्गारग्रहणं धूमव्यवच्छेदार्थम् । अयं योगो विशेषेण सायमुपयोज्यः । प्रतिश्यायो नासास्रावः । प्रकृतिभूतस्य स्वरस्यान्यथाभावः स्वरभङ्ग इत्युच्यते ॥ ३६ ॥ ३७ ॥

**गू०**—अत्र स्वरसो न गृहीतस्त्वच एव विधानात् । यथा शुण्ठ्याः पुटपाकस्य चूर्णं गृह्यते तदाह्वाग्रे ॥ ३६ ॥ ३७ ॥

अथ **शुण्ठीपुटपाक आमातीसारादौ**

**चूर्णं किंचिद्घृताभ्यक्तं शुण्ठ्या एरण्डजैर्दलैः ।**
**वेष्टितं पुटपाकेन विपचेन्मन्दवह्निना ॥ ३८ ॥**
**तत उद्धृत्य तच्चूर्णं ग्राह्यं प्रातः सितान्वितम् ।**
**तेन यान्ति शमं पीडा आमातीसारसंभवाः ॥ ३९ ॥**

**दी०**—अधुना शुण्ठीपुटपाकमाह—चूर्णमिति । शुण्ठी प्रसिद्धा, तस्याश्चूर्णं वस्त्रगालितं तच्च घृताभ्यक्तं कृत्वा एरण्डपत्रैश्च वेष्टयित्वा पुटपाकयुक्त्या विपचेत् । सितान्वितमिति सिताऽत्र चूर्णसमतुलिता । प्रातर्ग्रहणं अधोभागगतरोगनिवृत्त्यर्थम् । मन्दवह्निग्रहणं दग्धव्यवच्छेदार्थम् । विद्रवत्वात् । भक्ष्यमानमप्यत्र चूर्णवत् ॥ ३८ ॥ ३९ ॥

**गू०**—आमातीसारपीडायां एरण्डजैर्दलैः पत्रैः । स्पष्टमन्यत् ॥ ३८ ॥ ३९ ॥

अथ **शुण्ठीपुटपाक आमवातादौ—**

**शुण्ठीकल्कं विनिक्षिप्य रसैरेरण्डमूलजैः ।**
**विपचेत्पुटपाकेन तद्रसः क्षौद्रसंयुतः ॥ ४० ॥**
**आमवातसमुद्भूतां पीडां जयति दुस्तराम् ।**

**दी०**—अपरमप्याह—शुण्ठीकल्कमिति । भाविनि भूतवदुपचारः । सा शुण्ठी एरण्डमूलरसेन सह ईषत् पेषिता सती कल्कमित्युच्यते । रसोऽत्र सद्यस्कः, क्वथितो वा । क्षौद्रसंयुतो मधुप्रक्षेपयुतः । दुस्तरामित्यनिवार्याम् ॥ ४० ॥

**गू०**—सुगमम् ॥ ४० ॥

**सुरणपुटपाक अर्शोरोगे—**

**सौरणं कन्दमादाय पुटपाकेन पाचयेत् ॥ ४१ ॥**
**सतैललवणस्तस्य रसश्चार्शोविकारनुत् ।**

**दी०**—अथ सूरणपुटपाकमाह—सौरणमिति । सूरणस्येदं कन्दमित्यर्थः । तत्पुटपाकयुक्त्या विपाच्य सतैललवणान्वितस्तद्रसोऽर्शोविकारनुद्भवति । सतैललवण इति । सतैललवणेति सामान्यग्रहणेन तिलतैलं सैन्धवलवणं च ग्राह्यम् । एतयोर्मानं प्रक्षेपे पूर्ववत् ॥ ४१ ॥

**गू०**—सतैललवणं पाचयेत् कल्के तैलं लवणं च दत्त्वा पाचयेत् ॥ ४१ ॥

अथ **मृगशृङ्गपुटपाकः शूलादौ—**

**शरावसंपुटे दग्धं शृङ्गं हरिणजं पिबेत् ॥ ४२ ॥**
**गव्येन सर्पिषा युक्तं हृच्छूलं नाशयेद्ध्रुवम् ।**

इति श्रीदामोदरसूनुश्रीशार्ङ्गधराचार्यविरचितायां शार्ङ्गधरसंहितायां मध्यमखण्डे स्वरसादिकल्पना नाम प्रथमोऽध्यायः ॥ १ ॥

**दी०**—इदानीं मृगशृङ्गपुटपाकमाह—शरावेति। हरिणाज्जातं हरिणजं शृङ्गमिति विषाणम्, तच्च खण्डितं कृत्वा ग्राह्यम्। दग्धमिति। पुटपाकयुक्त्येत्यर्थः। अतएव मृदावलिप्तं शरावसम्पुटं कार्यम्। गव्यग्रहणं अन्यघृतव्यवच्छेदार्थं तस्यातिश्रेष्ठत्वात्। भक्षणमत्र फाण्टवज्ज्ञेयम्। ध्रुवमिति—सत्यप्रत्ययकारको योगोऽयम् ॥ ४२ ॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यमखण्डे स्वरसकल्पनाध्यायः प्रथमः ॥ १ ॥

**गू०**—शरावसम्पुटे दग्धं भस्मसात्कृतं हरिणजं शृङ्गं तद्भस्म गव्येन सर्पिषा घृतेन युक्तं पिबेत्। हृच्छूलं नश्यति ध्रुवमिति निश्चयेन। ननु स्वरसे पुटपाके च को भेदः यतः पुटपाको भिन्न एवोक्तः? उच्यते, स्वरसकल्पनायां रस एव गृह्यते इति इयान्भेदः अतो भिन्न एव ॥ ४२ ॥

इति श्रीशार्ङ्गधरसंहितायां चिकित्सास्थाने स्वरसादिकल्पनाध्यायः ॥ १ ॥

## द्वितीयोऽध्यायः ।

**गू०**—इदानीं क्वाथकल्पनां व्याख्यास्यामः। पूर्वं तावत् तत्स्वरूपमाह—

**पानीयं षोडशगुणं क्षुण्णे द्रव्यपले क्षिपेत् ।**
**मृत्पात्रे क्वाथयेद्ग्राह्यमष्टमांशावशेषितम् ॥ १ ॥**
**तज्जलं पाययेद्धीमान्कोष्णं मृद्वग्निसाधितम् ।**

**दी०**—पानीयमिति। क्षुण्णे कुट्टिते द्रव्यपले क्वाथ्यद्रव्यपले पानीयं जलं षोडशगुणं द्रव्यभागापेक्षया, तेन षोडशपलमित्यर्थः। अष्टमांशावशेषितमिति द्विपलावशेषमित्यर्थः। तज्जलमिति क्वथितजलं, कोष्णमिति ईषदुष्णं, उष्णत्वमस्य क्वथितत्वादेव ननु शृतशीतं पुनरुष्णमिति दोषकरत्वात्। तथाचोक्तम्—'तैलं घृतं च पानीयं कषायं व्यञ्जनादिकम्। शृतशीतं पुनरुष्णं तत्सर्वं विषवद्भवेत्' इति। मृद्वग्निसाधितमिति सम्यग्वीर्योत्कृष्टत्वात् मन्दपाचकपाचितमिति भावः। दग्धघनपिच्छिलादिभयादित्येके वदन्ति। धीमानिति ग्रहणेन द्रव्याणां मृदुमध्यकठिनत्वादिकमवेक्ष्य तदनुमानं जलं देयमिति। तथाहि—'चतुर्गुणं मृदौ द्रव्ये कठिनेऽष्टगुणं जलम्। अत्यर्थं कठिने देयं बुधैः षोडशिकं जलम्' इति। एतच्च स्नेहपाकविषये प्रायशः प्रचरति। ननु मृद्वादिक्वाथ्यद्रव्यमष्टगुणिते जले साध्यते इति व्यवहारो दृश्यते तत्कथमत्र षोडशगुणम्? उच्यते—क्वाथ्यगणो मृदुमध्यकठिनद्रव्यैर्मिलित्वा पच्यते, तस्मात् मध्यमानमनुसरन्ति वृद्धवैद्या इति न दोषः। उक्तंच यतः—'मृद्वादिक्वाथ्यसङ्घाते मानानुक्तौ चिकित्सकाः। मध्यस्थोभयभागित्वादिच्छन्त्यष्टगुणं जलम्' इति। द्रव्यमानमपि दोषापेक्षया ननु नियतपलमानमित्येके भाषन्ते। कुतः? धीमानिति ग्रहणात्। तथाहि—'उत्तमस्य पलं मात्रा त्रिभिश्चाक्षैश्च मध्यमा। जघन्यस्य पलार्धेन स्नेहक्वाथ्यौषधेषु च ॥' इति। एतच्च विषाधिकारे उक्तं ननु सर्वत्र। नन्वपरे चतुर्थांशावशेषितं क्वाथं वदन्ति। तथाह्युक्तम्—'क्वाथ्यद्रव्यपले वारि द्विरष्टगुणमिष्यते। चतुर्भागावशेषं तु पेयं पलचतुष्टयम्'। एतदपि विषाधिकारे ननु सर्वत्र। यद्वा क्वाथस्तु पाचनादिकभेदेन सप्तविधः। तद्यथा—'पाचनो दीपनीयश्च शोधनः शमनस्तथा। तर्पणः क्लेदनः शोषी क्वाथः सप्तविधो मतः' तस्मात् पाचनशोधनार्थं चतुर्थांशः। 'पाचनः शोधनीयश्च पादशेषः प्रशस्यते' इत्यादि वचनात्। अवशिष्टार्थं च द्विपलमिति न विरोधः। यद्वा दोषादीनां बलाबलविचाराद्उभयत्रापि न कश्चिद्दोषः। यतः 'दीप्तानलं महाकायं पाययेत् त्वञ्जलिं जलम्। अन्ये त्वर्धं परित्यज्य प्रकृतिं तु चिकित्सकाः' इति ॥ १ ॥

**गू०**—अथ स्वरसानन्तरं क्वाथस्य नामान्याह—ननु पूर्वं 'अथात्र स्वरसः कल्कः क्वाथश्च हिमफाण्टकौ' इत्येवमुक्तत्वात्स्वरसानन्तरं कल्ककल्पनैव युक्ता तत्कथमत्र क्वाथः? तथाच वाग्भटे भेषजकल्पे एवमुक्तम्

'रसः कल्कः शृतः शीतः फाण्टश्चेति प्रकल्पना । पञ्चधैव कषायाणां पूर्वं पूर्वं बलाधिकाः' । अन्यत्राऽप्युक्तम्—'रसःकल्कश्च निर्यूहो हिमः फाण्टः क्रमादमी । यथोत्तरं च लघवः कषायाः पञ्च संस्मृताः' । निर्यूहः क्वाथः । अतो वाग्भटादौ स्वरसानन्तरं कल्क एवोक्तः अन्यैरप्येवमुक्तं । ननु केचित् शार्ङ्गधरपद्ये एवं पठन्ति 'अथात्र स्वरसः क्वाथः कल्कश्च हिमफांटकौ' इति, तत्तु न सम्यक्, यतः वाग्भटादौ स्वरसानन्तरं कल्कस्यैव विधानात् । ततः क्वाथः । अत्र शार्ङ्गधरे तु स्वरसानन्तरं क्वाथ एवोक्तः, कल्कस्तु फाण्टानन्तरमुक्तस्तत्कथं न व्यतिक्रमः, उच्यते—अथात्र स्वरसः कल्कः क्वाथश्चेति पद्यातिक्रमेण लिखितं तत् यथोत्तरं लघुप्रतिपादनार्थं नतु क्रमकथनार्थम् । क्रमस्तु अनुक्रमणिकायां प्रोक्तः । तथा 'स्वरसः क्वाथफाण्टौ च हिमः कल्कश्च चूर्णित'मिति । अतः स्वरसानन्तरं क्वाथ एव युक्तः स प्रोच्यते । मृत्पात्रे क्षुण्णे द्रव्यपले षोडशगुणं पानीयं क्षिपेत् पुनः क्वाथयेत् पुनर्मृद्वग्निसाधितं अष्टमांशावशेषितं द्विपलमात्रं तज्जलं धीमान्वैद्यः पाययेत् । किंभूतं जलं कोष्णं ईषदुष्णं, पाययेत् रोगिणम् ॥ १ ॥

**दी०**—इदानीं क्वाथस्य पर्यायनामान्याह—

**शृतः क्वाथः कषायश्च निर्यूहः स निगद्यते ॥ २ ॥**
**आहाररसपाके च संजाते द्विपलोन्मितम् ।**
**वृद्धवैद्योपदेशेन पिबेत्क्वाथं सुपाचितम् ॥ ३ ॥**
**क्वाथे क्षिपेत्सितामंशैश्चतुर्थाष्टमषोडशैः ।**
**वातपित्तकफातङ्के विपरीतं मधु स्मृतम् ॥ ४ ॥**
**जीरकं गुग्गुलुं क्षारं लवणं च शिलाजतु ।**
**हिङ्गु त्रिकटुकं चैव क्वाथे शाणोन्मितं क्षिपेत् ॥ ५ ॥**
**क्षीरं घृतं गुडं तैलं मूत्रं चान्यद्द्रवं तथा ।**
**कल्कं चूर्णादिकं क्वाथे निक्षिपेत्कर्षसंमितम् ॥ ६ ॥**
**( अपिधानमुखे पात्रे जलं दुर्जरतां व्रजेत् ।**
**तस्मादावरणं त्यक्त्वा क्वाथादीनां विनिश्चयः ॥७॥)**[1]

**दी०**—शृत इत्यादि । शृतः, क्वाथः, कषायः, निर्यूह इति चत्वारि क्वाथस्यैवापरनामानि अत्राचार्यो द्विपलमिति स्वीकृत्योक्तमप्यपरदृष्टान्तेन दर्शयति । तमाह—आहार इति । वृद्धवैद्योपदेशेनेति ग्रहणेन द्विपलमेव इति पारम्पर्यो व्यवहारः, अत एव तन्मतमालोच्य शार्ङ्गधरेणात्र लिखितः, यतः 'क्वाथत्यागमनिच्छन्तस्त्वष्टभागावशेषितम् । पारम्पर्योपदेशेन वृद्धवैद्याः पलद्वयम्' इति । सुपाचितमिति गन्धवर्णरसान्वितम् । तदुक्तम्—'द्रव्यस्य गन्धवर्णैश्च तुल्यं कार्यकरं विदुः । तद्वद्विशुद्धं शुद्धाय कषायममृतोपमम्' इति । आहाररसपाके इतिपदमन्यव्याधिप्रकोपव्यवच्छेदार्थम्, यतः—'औषधशेषे भुक्तं पीतं च तथौषधं सशेषेऽन्ने । न करोति गदोपशमं प्रकोपयत्यन्यरोगांश्च' इति ॥ इदानीं प्रक्षेपनिमित्तं द्रव्याणां परिमाणमाह—क्वाथ इति । सिता शर्करा, साच क्वथितजलस्य चतुर्थाष्टमषोडशैरंशैः प्रक्षिप्ता ज्ञेया । अत्रानुक्रमो बोद्धव्यः । मधु च विपरीतमिति शर्करापरिमाणात्, एतेन किमुक्तम् ? वातातङ्के सिताचतुर्थांशं क्वथितजलादित्यर्थः, पित्तातङ्केऽष्टमांशं, कफातङ्के षोडशांशमिति । मधु विपरीतं यथा—वातातङ्के षोडशांशं, पित्तातङ्केऽष्टमांशं, चतुर्थांशमिति भावः ॥ अपराण्याह—जीरकमित्यादि । जीरकादित्रिकटुकान्तं द्रव्यं टङ्कप्रमितं क्षिपेदिति क्वाथे । तत्र क्षारं यवक्षारादि, लवणं सैन्धवादि, त्रिकटुकं शुण्ठीमरिचपिप्पलीसंज्ञकम् । द्रवप्रक्षेपमाह—क्षीरमित्यादि । क्षीरादीनि कर्षमितानि तत्र गुडोपलक्षितत्वेन सितावशिष्टाः सर्वे इक्षुविकारा गृह्यन्ते । अन्यद्रवमिति तोयमद्यासवारिष्टशुक्तादिकं, चूर्णादिकमित्यत्रादिग्रहणात् गुटिकावलेहादयो बोद्धव्याः । कर्षं पलचतुर्थांशमित्यर्थः ॥२–६॥

**गू०**—आहाररसपाके सञ्जाते सति वृद्धवैद्योपदेशेन आज्ञया सुपाचितं क्वाथं पिबेत् । शृतः, क्वाथः, कषायः, निर्यूहश्चेति पर्यायशब्दैः क्वाथ एव निगद्यते । आहाररसपाके सञ्जाते इति यदुक्तं तद्रसशेषे, औषधपाके दोषदर्शनात् । यदुक्तं 'औषधशेषे भुक्तं पीतं च तथौषधं सशेषेऽन्ने । न करोति गदोपशमं प्रकरोत्यन्यान् हि रोगांश्च' इति । ननु वैद्यास्तु संप्रदायेन द्रव्यपले अष्टगुणं जलं दत्त्वा अष्टमांशं गृहीत्वा पाययन्ति तत्कथं न विरोधः, द्रव्यं षोडशभागकं । वृन्दवङ्गसेने चैवमुक्तं 'क्वाथद्रव्यपले वारि द्विरष्टगुणमिष्यते । चतुर्भागावशिष्टं तु पेयं पलचतुष्टयम्' इति । पलचतुष्टयमिति तु महाकायविषयं । तथाचोक्तं—दीप्तानलं महाकायं पाययेदञ्जलिं जलम् । अन्ये त्वर्धं परित्यज्य प्रसृतिं तु चिकित्सकाः' ॥ वाग्भटे च 'क्वाथं द्रव्यपले कुर्यात्प्रस्थार्धं पादशेषितम्' । द्रव्यपले प्रस्थार्धं जलं दत्त्वा चतुर्भागावशेषितं क्वाथं कुर्यादित्यर्थः । अष्टपलम् । अत्र वाग्भटेनाष्टगुणं जलं लिखितं तत्तु चरका-

१–प्रक्षिप्तः ।

१–'नुक्त' पा० ।

दि मतेन, तथाचोक्तं सुश्रुते—'यथायोगं त्वक्पत्रमूलादीन मातपपरिशोषितानां छेद्यानि खण्डांश्छेदयित्वा भेद्यानि खण्डशो भेदयित्वा चाकुड्याष्टगुणेन षोडशगुणेनांभसाभ्यषिच्य स्थाल्यां चतुर्भागावशिष्टं क्वाथयित्वापहरेदित्येष कषायपाककल्पः' । अतः षोडशगुणं अष्टगुणं च युक्तमेव भक्षणप्रमाणम् । अस्त्याद्यपेक्षया अत्र केचिदाहुः —'त्वक्पत्रमूलादीनां भागाच्चतुर्गुणं जलमवाप्य चतुर्भागावशिष्टं निष्क्वाथ्यापहरेदित्येषः कषायपाककल्पः' । तत्तु न सम्यक्, कस्मात्? आगमासिद्धत्वात्' इति सुश्रुतः । क्वाथे सितामधुप्रमाणमाह—क्वाथे वातपित्तकफातङ्के रोगे क्रमेण चतुर्थाष्टमषोडशैरंशैः सितां क्षिपेत् । वातरोगे चतुर्थांशं, पित्तरोगे अष्टमांशं, कफरोगे षोडशांशं । मधु पित्ते षोडशांशं, वाते अष्टमांशं, कफे चतुर्थांशमिति विपरीतं स्मृतं । यद्वा एवं विपरीतं वाते षोडशांशं, पित्ते अष्टमांशं, कफे चतुर्थांशं । क्वाथे जीरकादीनां प्रमाणमाह—क्वाथे उक्ताञ्जीरकादीन् शाणोन्मितान् क्षिपेत्, यद्वा अवस्थाद्यपेक्षया मात्रायाः प्रमाणत्वात् ॥ २-६ ॥

## सर्वज्वरे गुडूच्यादिक्वाथः—

**स यथा—गुडूचीधान्यकारिष्टरक्तचन्दनपद्मकैः ।**
**गुडूच्यादिगणक्वाथः सर्वज्वरहरः स्मृतः ॥ ८ ॥**
**दीपनो दाहहृल्लासतृष्णाछर्दरुचीर्जयेत् ।**

**टी०**—इदानीं ज्वरादिरोगनाशार्थं बहुविधान् क्वाथान् दर्शयन्नाह—स यथेति । पूर्वं व्याख्यातम् । गुडूच्यादिगणः क्वाथरूपः सर्वज्वरहरो दीपनश्च भवति दाहादींश्च जयति । तत्रारिष्टो निम्बः, पद्मकं काष्ठं, यत्र पद्ममस्ति तत्र पद्मकेसरम् । दीपनमग्नेः । हृल्लास इत्यसकृत् ष्ठीवनम् । ननु गुडूच्यादिको गणः प्रायेण पित्तप्रायोपशमनिमित्तकृदिति तत्कथमत्रादौ सर्वज्वरहरः प्रोक्तः? उच्यते, सर्वज्वरे पित्ताविरोधिनी क्रिया कार्येति सिध्यति । तदुक्तं वाग्भटे—'ऊष्मा पित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना । तस्मात् पित्तविरुद्धानि त्यजेत् पित्ताधिकेऽधिकः' इति न दोषः ॥ ८ ॥

**गू०**—गुडूच्याद्यैः कृतगुडूच्यादिगणक्वाथः सर्वज्वरहरो भवतीति योजना । गुडूच्यादिगणक्वाथः सर्वज्वरहरः सर्वान् वातादिज्वरान्हरतीति । अरिष्टो निम्बत्वक् पद्मकः पद्मकं काष्ठम्, स्पष्टमन्यत् । सामान्यज्वरे नागरादयोऽपि पाचकत्वे न निर्दिष्टास्ते अनुक्ता अप्युच्यन्ते—

१-पद्माख.

"नागरं देवकाष्ठं च धान्यकं बृहतीद्वयम् ।
दद्यात्पाचनकं पूर्वं ज्वरितानां ज्वरापहम् ॥
क्षुद्रा किराततिक्तं च शुण्ठी छिन्ना च पौष्करम् ।
कषाय एषां शमयेत्पीतश्चाष्टविधं ज्वरम् ॥"

नागरं शुण्ठी, देवकाष्ठं देवदारु, बृहतीद्वयं कण्टकारीद्वयम् । बृहत्या द्वयमिति समासः ।

**अथ पञ्चतिक्तकं** क्षुद्रा कण्टकारी छिन्ना गुडूची ।

**अथ कृष्णादिः सर्वज्वरे** । कृष्णा पिप्पली, अग्निः चित्रकः, पथ्या हरीतकी, व्याघ्री कण्टकारी, वृषः वासकम् ।

**अथ विश्वादिको ज्वरे** । विश्वा शुण्ठी, अमृता गुडूची ।

इदानीं दोषादिनिमित्तं पृथग्दर्शयन्नाह—

**गुडूचीपिप्पलीमूलनागरैः पाचनं स्मृतम् ॥ ९ ॥**
**दद्याद्वातज्वरे पूर्णलिङ्गे सप्तमवासरे ।**
**शालिपर्णी बला द्राक्षा गुडूची सारिवा तथा ॥ १० ॥**
**आसां क्वाथं पिबेत्कोष्णं तीव्रवातज्वरच्छिदम् ।**
**काश्मरीसारिवाद्राक्षात्रायमाणामृताभवः ॥ ११ ॥**
**कषायः सगुडः पीतो वातज्वरविनाशनः ।**
**कटुफलेन्द्रयवापाठातिक्तामुस्तैः शृतं जलम् ॥ १२ ॥**
**पाचनं दशमेऽह्नि स्यात्तीव्रे पित्तज्वरे नृणाम् ।**
**पर्पटो वासकस्तिक्ता कैरातो धन्वयासकः ॥ १३ ॥**
**प्रियङ्गुश्च कृतः क्वाथ एषां शर्करया युतः ।**
**पिपासादाहपित्तास्रयुतं पित्तज्वरं जयेत् ॥ १४ ॥**
**द्राक्षा हरीतकी मुस्तं कटुकी कृतमालकः ।**
**पर्पटश्च कृतः क्वाथ एषां पित्तज्वरापहः ॥ १५ ॥**
**तृण्मूर्च्छादाहपित्तासृक्शमनो भेदनः स्मृतः ।**
**(एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः ॥ १६ ॥**
**किं पुनर्यदि युज्येत चन्दनोशीरवालकैः ।)**

**टी०**—गुडूचीति । गुडूच्यादिभिस्त्रिभिर्द्रव्यैः शृतं क्वथितं वातज्वरे पाचनमिति । कथंभूते? पूर्णलिङ्गे सप्तमवासरे वेपथुर्विषमे । वेगादिभिरुपलक्षिते इत्यर्थः । अतएव सप्तमवासरे देयमिति, यतः—'वातिकः सप्तरात्रेण' इत्यादिवाक्यं दृश्यते हि, सप्तमदिनग्रहणं तु ज्वरस्य तारुण्यनिषेधार्थम्, यतः सप्ताहादर्वाक् ज्वरस्य तरुणता कथ्यते । तथाहि—'आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः'; 'न कषायं प्रशंसन्ति नराणां

१-केषुचिन्मुद्रितपुस्तकेषु मूलपाठत्वेन धृतः ।
२-प्रक्षिप्तः ।

तरुणज्वरे । कषायेणाकुलीभूता दोषा जेतुं सुदुस्तराः' इति । ननु सप्तरात्रं ज्वरस्य तरुणत्वं, तत्र भेषजनिषेधः, तदुपरि वातिको ज्वरः पाकं गच्छति तत् कथं पाचनादिकमुक्तम् । एतत् सर्वं व्यर्थम् ? उच्यते—कषायद्रव्यकृतपाचनकषायो निषिद्धः, नतु स्वरसादिः; तथाह्युक्तम्—'नतु कल्पनमुद्दिश्य कषायः प्रतिषिध्यते । यः कषायः कषायः स्यात् स वर्ज्यस्तरुणे ज्वरे' इति । यद्वा आमादयस्तिस्रोऽवस्था दोषाणां, तत्र द्विविधा हि सामता-एका रसस्य, अपरा दोषस्य, दोषसामता तरुणतारूपा, रससामता अष्टाहात् परतोऽप्यनुवर्तते, तरुणतारूपा सामताऽष्टाहादपैति, एतत् प्रयोजनं तरुणतारूपदोषसामतायामौषधं नोपयुज्यते, रससामतायां तु पाचनं दीयते । अत एवाह चरकः—'ज्वरितं षडहेऽतीते लघ्वन्नं प्रतिभोजितम् । पाचनं शमनीयं वा कषायं पाययेत्तु तम्' इति । एवं कफज्वरेऽपि बोद्धव्यम् ॥ अपराण्याह—शालिपर्णीति । शालिपर्ण्यादीनां क्वाथः प्लीहादीन् हन्तीति । शालिपर्णी प्रसिद्धा । सारिवा अनन्तमूलं 'आफोइ' इति लोके । एके द्राक्षास्थाने रास्ना इति पठन्ति । ज्वरोऽत्र वातिकः । ग्रन्थान्तरेऽपि तद्यथा—'गुडूची सारिवा द्राक्षा बला चांशुमती तथा । एषोऽपि परमः सिद्धो वातज्वरविनाशनः' इति । अन्यदपि—काश्मरी गम्भारी, त्रायमाणा स्वनामख्याता, अमृता गुडूची, कषायोऽत्र क्वथितः, सगुड इति गुडप्रक्षिप्तः । अथ पित्तज्वरे कट्फलादिपाचनम् । पित्तज्वरे प्रशस्तमेव तत् । कट्फलं प्रसिद्धम्, इन्द्रयवं कुटजबीजम्, अम्बष्ठा पाठा, तिक्ता कटुरोहिणी । दशमेऽह्नि इति विचारणात्पूर्वं लिखिता तीव्रदाहादियुक्ते । एके शर्कराप्रक्षेपोऽत्र मन्यन्ते, यतः—'शर्करा मधुरा हन्ति कषायं पैत्तिकं ज्वरम्' इति, तत्र सर्वसंमतम् ॥ पर्पट इति । पर्पटादिक्वाथः पित्तज्वरं हन्तीति । पर्पटः स्वनामप्रसिद्धः, वासक आटरूषकः, तिक्ता कटुरोहिणी, कैरातो भूनिम्बः, धन्वयासो दुरालभा, प्रियङ्गुर्लताविशेषः, तस्याः फलानि नतु वृक्षप्रियङ्गुः । तथाचोक्तम्—'फलिनी फलप्रियङ्गुर्लता गोवन्दनी तथा । श्यामा' इत्यादि, 'वृक्षप्रियङ्गुरन्या सा ज्ञेया वमनकल्पिका'

१—'अलोकइ' 'क' पु. । २—वृता पा० । ३—'कल्कलिकेति' वमनवत् 'कलिकेति' पा० ।

इति । एषां द्रव्याणाम् । शर्करात्र प्रक्षेपे । द्राक्षेति । द्राक्षादिक्वाथः पित्तज्वरहरः । कृतमालको राजवृक्षः । तृष्णादयोऽत्र पित्तज्वरस्यैवोपद्रवा ज्ञेयाः । भेदनेति स्वभावगुणेन पक्वदोषस्याधःपातनम् । तथाहि—'सौक्ष्म्यात् कषायः स्रोतांसि विवृणोति स्वभावतः । पक्वं दोषं स्रंसयति विमार्गस्थं शमं नयेत्' इति ॥ ९-१६ ॥

**गू०**—अथ प्रत्येकवातादिज्वरे क्वाथानाह—सप्तमवासरे ज्वरपाकात् समतायां औषधदानात् । तथाच वाग्भटवचनं 'सप्ताहादौषधं केचिदाहुरन्ये दशाहतः । केचिल्लघ्वन्नभुक्तस्य योज्यमामोल्वणे न तु'—तथाच 'वातिकः सप्तरात्रेण दशरात्रेण पैत्तिकः । श्लेष्मको द्वादशाहेन ज्वरः पाकं नियच्छति' ।

**अथ शालिपर्ण्यादिः वातज्वरे ।** शालिपर्णी शालिपत्री, बला खैरकका्छिका, सारिवा अनन्तमूलं द्राक्षा मधुरगुरुत्वाद्वातघ्नी ।

**अथ काश्मर्यादिर्वातज्वरे ।** काश्मरी गम्भारी, सारिवा अनन्तमूलं, त्रायमाणा प्रसिद्धा, अमृता गुडूची ।

**अथ कट्फलादिः पित्तज्वरे,** कट्फलं कायफलः, अम्बष्ठा पाठा । कट्फलेन्द्रयवारिष्टेति वा पाठः । तत्रारिष्टो निम्बः । तिक्ता कटुकी । ननु कट्फलं वातपित्तघ्नं ? उच्यते—पित्ताधिकारे ज्वरनाशकत्वाल्लिखितं । यद्वा अत्राकारविश्लेषस्तेन अपित्तज्वरे पित्तरहिते वातज्वरे वा । तर्हि दशाहीति व्यर्थं स्यात् । तत्रापि पित्ताधिकारात् । यद्वा अपित्तज्वरे ईषत् पित्तज्वरे । अत्र ईषदर्थे तत्र इत्युक्ते तीव्रे इति व्यर्थं स्यात् । यद्वा कफसंसर्गात् पित्ताधिकारे कट्फलप्रयोगः । यदुक्तं सुश्रुते—'न रोगोऽप्येकदोषजः' इति ॥

**अथ पर्पटादिः पित्तज्वरे ।** पर्पटः कैटुपत्रः, तिक्ता कटुकी, कैरातः भूनिम्बः, धन्वयासकः धमासा, प्रियंगुः लताप्रियङ्गुफलं, एषां क्वाथः शर्करया सितया युतः पिपासादियुक्तं पित्तज्वरं जयेत् ।

**अथ द्राक्षादिः पित्तज्वरे ।** कृतमालकः किरवालकी फली । स्पष्टमन्यत् । भेदनः सारकः ॥९-१६॥

**अथ बीजपूरादिः श्लेष्मज्वरे—**

**बीजपूरशिफापथ्यानागरग्रन्थिकैः श्रुतम् ॥ १७ ॥**
**सक्षारं पाचनं श्लेष्मज्वरे द्वादशवासरे ।**

१—कबरा । २—खिरहटी । ३—गोरेसर । ४—कुहेरी । ५—काईफल । ६—माई । ७—पित्तपापडा । ८—चिरायता । ९—फूलफिरंग ।

**दी०**—अथ कफज्वरे बीजपूरादिपाचनम् । बीजपूरेति । श्लेष्मज्वरे प्रशस्तम् । बीजपूरो मातुलुङ्गः, तस्य शिफा जटा, पथ्या हरितकी, नागरं शुण्ठी, ग्रन्थिकं पिप्पलीमूलं, शृतं क्वथितम् । सक्षारमिति यवक्षारप्रक्षिप्तम् । द्वादशवासर इति पूर्ववत् ॥ १७ ॥

**गू०**—बीजपूरशिफा मातुलुङ्गजटा, ग्रन्थिकं पिप्पलीमूलं, एषां शृतं क्वाथं । किंभूतं सक्षारं यवक्षारसहितं । एतत्पाचनं श्लेष्मज्वरे द्वादशवासरे दद्यात् ॥ १७ ॥

### कफज्वरे—भूनिम्बादिक्वाथः ।

**भूनिम्बनिम्बपिप्पल्यः शठी शुण्ठी शतावरी ॥१८॥**
**गुडूची बृहती चेति क्वाथो हन्यात्कफज्वरम् ।**
**पटोलत्रिफलातिक्ताशठीवासामृताभवः ॥ १९ ॥**
**क्वाथो मधुयुतः पीतो हन्यात्कफकृतं ज्वरम् ।**

**दी०**—भूनिम्बादिक्वाथोऽपि कफज्वरं हन्यादिति । भूनिम्बः कैरातः, निम्बः प्रसिद्धः, पिप्पली ख्याता, शठी कर्चूरभेदः, बृहती बृहत्कण्टकारिका । केचित् 'शठी शुण्ठी च पौष्करम्' इति पठन्ति । अयमपि पाठः साधुः । पटोलेति—पटोलादिक्वाथो मधुप्रक्षिप्तः कफजनितज्वरं हन्यादिति । पटोलमत्र पटोलपञ्चाङ्गम् । केवलं पटोलनालं वा । यतः 'नालं तस्य कफापहम्' इति वचनात् । त्रिफला हरीतक्यादिकम् । तिक्ता कटुरोहिणी । अमृता गुडूची ॥ १८ ॥ १९ ॥

**अथ भूनिम्बादिः श्लेष्मज्वरे ।** भूनिम्बः कैरातः, शठी कर्चूरः, बृहती बृहत्कण्टकारी ।

**अथ पटोलादिः कफज्वरे ।** पटोलं पटोलपत्रं, त्रिफला प्रसिद्धा, तिक्ता कटुकी, शठी, कर्चूरः, एषां भव उत्पन्नः क्वाथः ॥ १८ ॥ १९ ॥

### वातपित्तज्वरे—पञ्चभद्रक्वाथः ।

**पर्पटाब्दामृताविश्वकैरातैः साधितं जलम् ॥ २० ॥**
**पञ्चभद्रमिदं ज्ञेयं वातपित्तज्वरापहम् ।**

**दी०**—इदानीं वातपित्तज्वरे योगमाह—पर्पटेत्यादि । पञ्चभद्रकसंज्ञकं क्वथितं जलं वातपित्तज्वरापहं भवति । अब्दो मुस्तम्, विश्वः शुण्ठी । अत्राऽपि संसर्गजनितज्वरे वासरादीनां तन्त्रान्तरेऽवगन्तव्यम् । तद्यथा 'वातपित्तज्वरे देयमौषधं पञ्चमेऽहनि । पित्तश्लेष्मज्वरे चाऽपि औषधं सप्तमेऽहनि । अत ऊर्ध्वं च सप्ताहाद्वातश्लेष्मज्वरे पिबेत्' इति ॥ २० ॥

१–बिजोराजडा । २–बडीकटेरी ।

**गू०**—अथ पञ्चभद्रं वातपित्तज्वरे । पर्पटाद्यैः साधितं जलं पञ्चभद्रं ज्ञेयं, तद्वातपित्तज्वरापहम् । पर्पटः कटुपत्रः, अब्दः मुस्तकः, अमृता गुडूची, विश्वं शुण्ठी, कैरातः भूनिम्बः, पञ्चभद्रं पञ्चभद्रसंज्ञं, भद्ररूपाणां पञ्चानां योगाद्वा पञ्चभद्रम् ॥ २० ॥

### कफवातज्वरादौ लघुक्षुद्रादिक्वाथः ।

**क्षुद्राशुण्ठीगुडूचीनां कषायः पौष्करस्य च ॥ २१ ॥**
**कफवाताधिके पेयो ज्वरे वापि त्रिदोषजे ।**
**कासश्वासारुचिहरे पार्श्वशूलविनाशनः ॥ २२ ॥**

**दी०**—क्षुद्रेति । लघुक्षुद्रादिक्वाथः कफवातजनितज्वरे पेयः त्रिदोषजे वा । तत्र पौष्करं मूलं तदभावे कुष्ठं ग्राह्यमिति सर्वत्र । कासाद्युपद्रवाः सन्निपातज्वरस्याऽपि ज्ञातव्याः । तन्त्रान्तरे पञ्चतिक्तकसंज्ञकमिदम् । तत्र पञ्चमं भूनिम्बम् । तद्यथा—'क्षुद्रामृताभ्यां सह नागरेण सपुष्करश्चैव किराततिक्तम् । पिबेत्कषायं भुवि पञ्चतिक्तं ज्वरं निहन्त्यष्टविधं समग्रम्' इति । अत्राऽपि कैरातो योज्यस्त्रिदोषहरत्वात् ॥ २१ ॥ २२ ॥

**गू०**—अथ लघुक्षुद्रादि कफवातज्वरादौ । क्षुद्रा लघुकण्टकारी, पौष्करं मूलं, एषां यः कषायः कफवाताधिके पेयः । पुनः कासारुचिकरे कारके, पुनः—पार्श्वशूलविधायिनि कारके ज्वरे ॥ २१ ॥ २२ ॥

### वातकफज्वरादौ आरग्वधादिक्वाथः ।

**आरग्वधकणामूलमुस्तातिक्ताभयाकृतः ।**
**क्वाथः शमयति क्षिप्रं ज्वरं वातकफोद्भवम् ॥ २३ ॥**
**आमशूलप्रशमनो भेदी दीपनपाचनः ।**

**दी०**—आरग्वधेति । आरग्वधादिक्वाथः क्षिप्रं शीघ्रं कफवातोद्भवं ज्वरं शमयति । आरग्वधः कृतमालकः, स च चरके फलवर्गे पठितः, सुश्रुते तु पत्रवर्गे; अतोऽन्तःपरिमार्जने फलं, बहिःपरिमार्जनकुष्ठादौ पत्रमिति । कणामूलं पिप्पलीमूलम्, तिक्ता कटुरोहिणी, अभया हरीतकी । आमशूलप्रशमन इति । आमेनापरिपक्वरसेन जनितः शूलस्तस्य प्रशमन इत्यर्थः । अयं शूलः ज्वरस्यैवोपद्रव इत्येके वदन्ति । भेदीति पक्वफलं भित्त्वा योऽधः पातयति स भेदी । अतएव

१–पित्तपापरा । २–चिरायता । ३–करे पा० । ४–विधायिनि पा० ।

सकलवैद्यास्त्रिवृच्चूर्णावक्षिप्तेनानेनैव पक्वदोषस्य निर्हरणं कुर्वन्ति। तस्मादारोग्यपञ्चक इति संज्ञा लोके॥ २३॥

**गू०—अथारग्वधादिक्वाथः वातकफज्वरे।** आरग्वधादिकृतः क्वाथः वातकफोद्भवं ज्वरं क्षिप्रं शीघ्रं शमयति। तथा आमशूलप्रशमनः, तथा भेदी मलभेदकः, तथा दीपनपाचनः। कथं? उच्यते। विरेकविशिष्टो य आमस्तस्य पाचनः॥ २३॥

### पित्तश्लेष्मज्वरे—अमृताष्टकम्।

**अमृतारिष्टकटुकामुस्तेन्द्रयवनागरैः॥ २४॥**
**पटोलचन्दनाभ्यां च पिप्पलीचूर्णयुक्शृतम्।**
**अमृताष्टकमेतच्च पित्तश्लेष्मज्वरापहम्॥ २५॥**
**छर्द्यरोचकहृल्लासदाहतृष्णाविनाशनम्।**

**दी०**—अथ पित्तश्लेष्मज्वरे अमृतेति। अमृताष्टकसंज्ञोऽयं क्वाथः पिप्पलीचूर्णप्रयुक्तः पित्तश्लेष्मज्वरघ्नो भवति। अमृता गुडूची, अरिष्टो निम्बः, चन्दनमत्र रक्तचन्दनम्, पिप्पलीचूर्णमत्र निक्षिपेत्। तन्माषकद्वयव्यवहारः, कुतः? तीक्ष्णत्वात्। छर्द्यादयोऽप्युपद्रवा अस्यैव ज्ञातव्याः॥ २४॥ २५॥

**गू०**—अथामृताष्टकं पित्तश्लेष्मज्वरे। अमृता गुडूची, अरिष्टो निम्बः, कटुका कटुकी, मुस्तं नागरमुस्तं, इन्द्रयवः कटुजबीजं, नागरं शुण्ठी, पटोलपत्रं, चन्दनं रक्तचन्दनम्, अमृतादीनां शृतं पिप्पलीचूर्णप्रक्षेपयुक्तं वातश्लेष्मज्वरापहं पुनश्छर्द्यादिनिवारणकं च भवति। अमृताष्टकमिति अमृताद्यष्टकोक्तत्वात्॥२४॥२५॥

**([1]पटोलं चन्दनं मूर्वातिक्तापाठामृतागणः॥ २६॥**
**पित्तश्लेष्मज्वरच्छर्दिदाहकण्डूविषापहः।**

### सर्वज्वरादौ—कण्टकारिक्वाथः।

**कण्टकारिद्वयं शुण्ठी धान्यकं सुरदारु च॥ २७॥**
**एभिः शृतं पाचनं स्यात्सर्वज्वरविनाशनम्।**

**दी०**—अथ सर्वज्वरेषु पाचनमिदमाह—कण्टकारीति। कण्टकारिद्वयसंज्ञकं पाचनं। इदं सर्वज्वरहरं भवति। कण्टकारिद्वयमिति लघुकण्टकारिका बृहत्कण्टकारिका च, सुरदारु देवदारु, सर्वज्वरमिलष्टविधसंज्ञम्। एतद्वृन्दवङ्गसेनादिभिः सर्वज्वरेषु पठितं तत्र नागरादिपाचनसंज्ञा॥ २७॥

१–प्रक्षिप्तोऽयम्। २–'वृन्द' 'बृहत्' पा०।

**गू०**—अथ कण्टकारिद्वयादिक्वाथः वातश्लेष्मादि सर्वज्वरे। कण्टकारिद्वयं क्षुद्रा बृहती च, सुरदारु देवदारु, एभिः शृतं पाचनं सर्वज्वरविनाशनं स्यात्॥ २७॥

### अथ दशमूलक्वाथः वातश्लेष्मज्वरे।

**शालिपर्णीपृश्निपर्णीबृहतीद्वयगोक्षुरैः॥ २८॥**
**बिल्वाग्निमन्थस्योनाककाश्मरीपाटलायुतैः।**
**दशमूलमिति ख्यातं क्वथितं तज्जलं पिबेत्॥ २९॥**
**पिप्पलीचूर्णसंयुक्तं वातश्लेष्मज्वरापहम्।**
**संनिपातज्वरहरं सूतिकादोषनाशनम्॥ ३०॥**
**शोषशैत्यभ्रमस्वेदकासश्वासविकारनुत्।**
**हृत्कण्ठग्रहपार्श्वार्तितन्द्रामस्तकशूलहृत्॥ ३१॥**

**दी०**—इदानीं सन्निपातज्वरे योगचतुष्टयमाह—शालिपर्णीति। एतच्च दशमूलसंज्ञकं क्वथितजलं पिप्पलीचूर्णं यथा दोषापेक्षया प्रक्षिप्तं सन्निपातज्वरादिकं हन्तीति। शालिपर्णी पृश्निपर्णी च प्रसिद्धा। लोके कवाराद्वयमिति संज्ञा। बृहतीद्वयमिति कण्टकारिद्वयम्। अग्निमन्थोऽरणिः, स्योनाको वृक्षविशेषः ख्यातः। काश्मरी गम्भारी। एतेषां मूलं ग्राह्यम्। कुतः? तत्संज्ञकत्वात्। सूतिकादोषमपि त्रिदोषजमेव। शोषशैत्यादयोऽपि सन्निपातोपद्रवाः। तत्र शोषो मुखशोषः, शैत्यमङ्गानाम्, केचिच्छ्वासशैत्यमिति पठन्ति। तत्राऽपि स एवार्थः॥ २८–३१॥

**गू०**—शालिपर्णी शालिपत्री, पृश्निपर्णी संजीविनी, बृहतीद्वयं कण्टकारिद्वयं, गोक्षुरः [2]त्रिकण्टकः, बिल्वः [3]श्रीफलः, अग्निमन्थः [4]अरणिः, स्योनाकः टुण्टुकः, काश्मरी [5]गम्भारी, पाटला [6]फलेरुहा, इदं दशमूलं तज्जलं क्वाथितं पिप्पलीचूर्णयुतं पिबेत्। वातनाशनं भवति शाखाशैत्यं हस्तपादादिशैत्यम्। स्पष्टमन्यत्॥ २८–३१॥

### अथाभयादिक्वाथस्त्रिदोषादौ—

**अभयामुस्तधान्याकरक्तचन्दनपद्मकैः।**
**वासकेन्द्रयवोशीरगुडूचीकृतमालकैः॥ ३२॥**
**पाठानागरतिक्ताभिः पिप्पलीचूर्णयुक्शृतम्।**
**पिबेत्त्रिदोषज्वरजित्पिपासाकासदाहनुत्॥ ३३॥**
**प्रलापश्वासतन्द्राघ्नं दीपनं पाचनं परम्।**
**विण्मूत्रानिलविष्टम्भवमिशोषारुचिं जयेत्॥ ३४॥**

**दी०**—अभयेति। अभयादिक्वाथः पिप्पलीचूर्णयुक्तस्त्रिदोषज्वरघ्नो भवति। अभया हरीतकी, वासकः

१–कवरा। २–गोखरु। ३–बेलज। ४–अरलू। ५–कुम्हारी। ६–पटोल।

आटरूषकः; उशीरं तृणभेदं प्रसिद्धम्, कृतमालकः आरग्वधफलं, पिपासादयोप्यस्यैवोपद्रवाः, प्रलापोऽसंबद्धभाषणं, विष्टम्भो वातादीनामप्रवृत्तिः, 'गुडूगुडा' शब्द इत्यपरे। एतच्च ग्रन्थान्तरे गुडूच्यादिसंज्ञम् ॥३३-३४॥

**गू०**—अभया हरीतकी, पद्मकं पद्मककाष्ठम्, उशीरं [1]सुगन्धिकं, कृतमालकः [2]आरग्वधः, स्पष्टमन्यत्, पाठा पाटला, तिक्ता कटुकी, एतत् शृतं पिप्पलीचूर्णयुक्तं त्रिदोषज्वरजिद्भवति, तथा पिपासादिनुत् ॥ ३२-३४ ॥

**([3]पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।**
**वचासातिविषाजाजीपाठावत्सकरेणुकैः ॥ ३५ ॥**
**किराततिक्तकं मूर्वा सर्षपा मरिचानि च ।**
**कटुकं पुष्करं भार्ङ्गी विडङ्गं कर्कटाह्वयम् ॥ ३६ ॥**
**अर्कमूलं बृहत्सिंही श्रेयसी सदुरालभा ।**
**दीप्यकं चाजमोदा च शुकनासादिहिङ्गुभिः ॥ ३७ ॥**
**एतानि समभागानि गणोऽष्टविंशको मतः ।**
**कषायमुपभुञ्जीत वातश्लेष्मज्वरापहम् ॥ ३८ ॥**
**हन्ति वातं तथा शीतं छेदजं प्रबलं कफम् ।**
**प्रलापं चातिनिद्रां च रोमहर्षारुची तथा ॥ ३९ ॥**
**महावातेऽपतन्त्रे च सर्वगात्रे च शून्यताम् ।**
**अयं सर्वज्वरान्हन्ति संनिपातांस्त्रयोदश ॥ ४० ॥**

## अथ संनिपातज्वरे अष्टादशाङ्गक्वाथः ।

**कैरातकटुकीमुस्ताधान्येन्द्रयवनागरैः ।**
**दशमूलमहादारुगजपिप्पलिकायुतैः ॥ ४१ ॥**
**कृतः कषायः पार्श्वार्तिसंनिपातज्वरं जयेत् ।**
**कासश्वासवमीहिक्कातन्द्राहृद्ग्रहनाशनः ॥ ४२ ॥**

**दी०**—कैरातेत्यादि । भूनिम्बादिक्वथितः कषायः सोपद्रवं सन्निपातज्वरं जयेत् हन्तीति । कैरातो भूनिम्ब एव । दशमूलं प्रसिद्धं, तदत्र पृथक् सममात्रं, यतो ग्रन्थान्तरे अष्टादशसंज्ञकोऽयं गणः । महादारु देवदारु, गजपिप्पलिका, जविकाफलं प्रसिद्धम् । पार्श्वार्तिरपि त्रिदोषजः स्यात् । हृद्ग्रहमप्येवम् ॥ ४१ ॥ ४२ ॥

**गू०—अथाष्टादशाङ्गः सन्निपातज्वरे**—कैरातः [4]भूनिम्बः, कटु, [5]नागरमुस्तकम्, धान्यं [6]प्रसिद्धम्, इन्द्रयवः, शुण्ठी, दशमूलं, देवदारु, [7]चविकाफलं एष अष्टादशाङ्गः क्वाथः सन्निपातजिद्भवति । पार्श्वार्तिः पार्श्वपीडा, तां जयेत्, स्पष्टमन्यत् ॥ ४१ ॥ ४२ ॥

१–गाण्डरजड । २–किरवाला । ३–प्रक्षिप्ताः । ४–चिरायता । ५–मोथा । ६–धनिया । ७–गजपीपरी ।

## त्रिदोषजज्वरादौ कट्फलादिक्वाथः ।

**कट्फलाम्बुदभार्ङ्गीभिर्धान्यरोहिषपर्पटैः ।**
**वचाहरीतकीशृङ्गीदेवदारुमहौषधैः ॥ ४३ ॥**
**हिक्कां कासज्वरं हन्ति श्वासश्लेष्मगलग्रहान् ।**
**क्वाथो जीर्णज्वरं हन्ति गुडूच्याः पिप्पलीयुतः ॥४४॥**
**तथा पर्पटजः क्वाथः पित्तज्वरहरः परः ।**
**किं पुनर्यदि युज्येत चन्दनोदीच्यनागरैः ॥ ४५ ॥**

**दी०**—कट्फलेति । कट्फलस्त्वग्विशेषः । अम्बुदो मुस्तम्, रोहिषं गन्धतृणम्, शृङ्गी कर्कटाख्या, महौषधं शुण्ठी, ज्वरमत्र त्रिदोषजनितं तेन कर्णमूलमपि गृह्यते बहुवचनग्रहणात् । अयं तन्त्रान्तरे कासश्वासरोगे पठितः, तत्र मधुहिङ्गुयुत इति पठन्ति, शार्ङ्गधरेण सन्निपातज्वरार्थं मध्वादित्यागेनात्र लिखितः, यतो मध्वत्र विरुद्धम् । तथाहि—'सर्वेषु सन्निपातेषु न क्षौद्रमवचारयेत् । शीतोपचारि क्षौद्रं स्यात् शीतं चात्र विरुध्यते' इति । चक्रेणाप्युक्तम् 'विरोध्युष्णं मधु प्रोक्तं त्यक्त्वा चार्द्रकजै रसैः' इति ।

**अथाजीर्णज्वरे योगद्वयमाह**—क्वाथ इति । केवलं गुडूच्याः क्वाथः पिप्पलीचूर्णप्रक्षिप्तः जीर्णं ज्वरं हरतीति केचित् । पिप्पलीयुत इत्यस्य स्थाने मधुसंयुक्त इति पठन्ति । अयमपि प्रक्षेपः साधुः । तथा पर्पटोद्भवः क्वाथः पित्तज्वरहरो भवति । तथेति ग्रहणात् मध्वादिसंयुतोऽयमपि बोद्धव्यः । पित्तज्वरकथनेनैवैतत्प्रायोऽजीर्णज्वर एव कथितः ॥ ४३-४५ ॥

**गू०-अथ कट्फलादिक्वाथः कासज्वरादौ**—कट्फलं काइफरः, अम्बुदं [1]नागरमुस्तं, भार्ङ्गी भारंगी, धान्यं [2]प्रसिद्धं, रोहिषस्तृणजातिः, पर्पटः [3]कट्टपत्रः, शृङ्गी [4]कर्कटशृङ्गी, महौषधं शुण्ठी, सुसाधितः एषां क्वाथः कासज्वरं कासप्रधानं त्रिदोषज्वरं हन्ति ॥

**अथ जीर्णज्वरे गुडूच्यादिक्वाथः**—जीर्णज्वरं बहुदिनज्वरं हन्ति । पर्पटक्वाथः तथा तेनैव प्रकारेण पित्तज्वरहरः । ज्वरोऽत्र जीर्ण एव ॥ ४३-४५ ॥

## अथ निदिग्धिकादिर्जीर्णज्वरे—

**निदिग्धिकामृता[5]शुण्ठीकषायं पाययेद्भिषक् ।**
**पिप्पलीचूर्णसंयुक्तं श्वासकासार्दितापहम् ॥ ४६ ॥**

१–मोथा । २–धनिया । ३–पित्तपापरा । ४–काकडाशिङ्गी । ५–'शृंगी' पा० ।

**पीनसारुचिवैस्वर्यशूलाजीर्णज्वरच्छिदम् ।**

**दी०**—अपरसप्याह—निदिग्धिकेति । निदिग्धिकादिकषायः श्वासादिकान् हन्तीति । निदिग्धिका लघुकण्टकारिका, अमृता गुडूची । अर्दितं रोगविशेषं तच्च वातरोगे पठितम् । वैस्वर्यं विकृतस्वरत्वं । अयमपि प्रायशः सायमुपयोज्यः । तथाहि 'हन्त्यूर्ध्वजामयं प्रायः सायं तेनोपयुज्यते' इति ॥ ४६ ॥

**गू०**—निदिग्धिका कण्टकारी, अमृता गुडूची, शुंठी प्रसिद्धा, एषां कषायं भिषक् पाययेत् । किंभूतं कषायं ? पिप्पलीचूर्णयुतं, जीर्णज्वरच्छिदम्, जीर्णज्वरच्छेदकं भवेत् ॥ ४६ ॥

**(देवदारु[1] वचा कुष्ठं पिप्पली विश्वभेषजम् ॥ ४७ ॥**
**कट्फलं मुस्तभूनिम्बतिक्तधान्या हरीतकी ।**
**गजकृष्णा च दुःस्पर्शा गोक्षुरुर्धन्वयासकम् ॥४८॥**
**बृहत्यतिविषा छिन्ना कर्कटं कृष्णजीरकम् ।**
**क्वाथमष्टावशेषं तु प्रसूतां पाययेत्स्त्रियम् ॥ ४९ ॥**
**शूलकासज्वरश्वासमूर्च्छाकम्पशिरोर्तिजित् । )**

**इदानीं विषमज्वरनाशनार्थं योगपञ्चकमाह—**

**क्षुद्राधान्यकशुण्ठीभिर्गुडूचीमुस्तपद्मकैः ॥ ५० ॥**
**रक्तचन्दनभूनिम्बपटोलवृषपौष्करैः ।**
**कटुकेन्द्रयवाऽरिष्टभार्ङ्गीपर्पटकैः समैः ॥ ५१ ॥**
**क्वाथं प्रातर्निषेवेत सर्वशीतज्वरच्छिदम् ।**

**दी०**—क्षुद्रेति । बृहत्क्षुद्रादिसंज्ञकोऽयं क्वाथः शीतज्वरं हन्तीति । क्षुद्रा लघुकण्टकारी, भूनिम्बः कैरातः, वृषो वासकः, पौष्करं पुष्करमूलं, इन्द्रयवं कुटजबीजं, अरिष्टो निम्बः, भार्ङ्गी ब्राह्मणयष्टिका, तन्त्रान्तरेऽयमपि वातकफज्वरे पठितः । यतो वातश्लेष्माणौ शीतोत्पादकौ । यतः—'त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे' इत्यादि वचनं । तस्मात् तत्र शीतज्वरे लिखितः ॥ ५० ॥ ५१ ॥

**गू०—अथ बृहत्क्षुद्रादिः । शीतज्वरे**—क्षुद्राद्यैः पर्पटकान्तैः समैस्तुल्यैः क्षुण्णं पलमात्रं क्वाथं यदा निषेवते शीतज्वरार्तः तदा सर्वशीतज्वरछिद् भवतीति योजना । क्षुद्रा कंटकारी, धान्यं[2] प्रसिद्धं, मुस्तं[3] नागरमुस्तं, पद्मकं[4] पद्मककाष्ठं, भूनिंबः[5] कैरातः, पटोलं पटोलपत्रम्, वृषः वासकः, पौष्करं पुष्करमूलं, कटुका कटुकी, अरिष्टः निम्बः, पर्पटः[6] कटुपत्रः, स्पष्टमन्यत् ॥ ५० ॥ ५१ ॥

१–प्रक्षिप्ता इमे । २–धनिया । ३–मोथा । ४–पद्माख । ५–चिरायता । ६–पापरा ।

**मुस्तक्षुद्रामृताशुण्ठीधात्रीक्वाथः समाक्षिकः ॥५२॥**
**पिप्पलीचूर्णसंयुक्तो विषमज्वरनाशनः ।**
**पटोलेन्द्रयवादारुत्रिफलामुस्तगोस्तनैः ॥ ५३ ॥**
**मधुकामृतवासानां क्वाथं क्षौद्रयुतं पिबेत् ।**
**संतते सतते चैव द्वितीयकतृतीयके ॥ ५४ ॥**
**ऐकाहिके वा विषमे दाहपूर्वे नवज्वरे ।**

**दी०**—मुस्तेति । मुस्तादिभिर्विषमज्वरे प्रशस्तः । अत्र धात्री आमलकी, मधुपिप्पल्योः प्रक्षेपः पूर्वमात्रया । विषमज्वरा ऐकाहिकादयः ॥ ५२–५४ ॥

**गू०—अथ मुस्तादिर्विषमज्वरे**—मुस्तादीनां समाक्षिकः क्वाथः विषमज्वरनाशको भवतीति । अमृता गुडूची, धात्री आमलकी, माक्षिकं मधु ॥ ५२–५४ ॥

**गू०—अथ ऐकाहिकज्वरे पटोलादिक्वाथः—**

**पटोलत्रिफलानिम्बद्राक्षाशम्याकवासकैः ॥ ५५ ॥**
**क्वाथः सितामधुयुतो जयेदैकाहिकं ज्वरम् ।**

**दी०**—पटोलेति । पटोलादि एष क्वाथः ऐकाहिकं ज्वरं हन्तीति । अत्र त्रिफला ख्याता । सा च प्रत्येकं समभागा, शम्याकः कृतमालकः, सितामधुयुत इति सम्यक् माधुर्यार्थं प्रक्षेपद्वयमुक्तं दोषनाशनार्थं च ॥ ५५ ॥

**गू०**—पटोलादिकृतः क्वाथः सितामधुयुतः ऐकाहिकं एकदिवसजन्यं जयेत् । पटोलं पटोलपत्रम्, त्रिफला हरीतकी–विभीतक–आमलकमिति त्रयाणां संयोगः । निम्बः, द्राक्षा[1] गोस्तनी, शम्याकः आरग्वधः[2], वासकः वासपत्रं, सिता[3] प्रसिद्धा, तथा मधुप्रक्षेपः । प्रमाणं पूर्वोक्तं बलापेक्षया वा ॥ ५५ ॥

**अथ गुडूच्यादिस्तृतीयकज्वरे—**

**गुडूचीधान्यमुस्ताभिश्चन्दनोशीरनागरैः ॥ ५६ ॥**
**कृतं क्वाथं पिबेत्क्षौद्रसितायुक्तं ज्वरातुरः ।**
**तृतीयज्वरनाशाय तृष्णादाहनिवारणम् ॥ ५७ ॥**

**दी०**—गुडूचीति । गुडूच्यादिस्तृतीयज्वरं हन्तीति । चन्दनमत्र रक्तम्, उशीरं तृणभेदः रक्तपत्रं दर्भवत्, केचिदुशीरस्थाने उदीच्यमिति पठन्ति । तत्रोदीच्यो वालकः सुशीतलत्वात् । यतः—'पित्तप्रायस्तृतीयकः' इत्युक्तम्, अतो व्यजनादिना हितं शीतगुणम् ॥५६॥ ॥ ५७ ॥

१–मुनक्का । २–किरवाला । ३–मिश्री ।

गू०—गुडूच्याद्यैः कृतं क्वाथं क्षौद्रसितायुतं ज्वरातुरः पिबेत्। कस्मै? तृतीयज्वरनाशाय। किंभूतं क्वाथम्? तृष्णादाहनिवारणम्। चन्दनं रक्तचन्दनं, उशीरं सुगन्धकं, स्पष्टमन्यत् ॥ ५६ ॥ ५७ ॥

**अथ देवदार्वादि चातुर्थिकज्वरे—**

**देवदारुशिवावासाशालिपर्णीमहौषधैः।**
**धात्रीयुतं श्रृतं शीतं दद्यान्मधुसितायुतम् ॥ ५८ ॥**
**चातुर्थिकज्वरे श्वासे कासे मन्दानले तथा।**

दी०—देवदार्विति। देवदार्वादिक्वाथोऽयं चातुर्थिकज्वरे प्रशस्तः। शिवा हरीतकी, वासा आटरूषकः, महौषधं शुण्ठी। धात्री आमलकी। श्रृतमिति क्वथितं, शीतं हिमस्पर्शं मधुप्रक्षेपजनितत्वात्। तथाहि—'उष्णैर्विरुध्यते शीघ्रं विषान्वयतया मधु। उष्णार्तमुष्णैरुष्णं वा तन्निहन्ति यथा विषम्' ॥ ५८ ॥

गू०—देवदार्वाद्यैर्धात्रीयुक्तैः श्रृतं क्वाथं शीतत्वमागतं मधुसितायुतं चातुर्थिकज्वरे तथा श्वासादौ दद्यात्। शिवा हरीतकी, शालिपर्णी शालिपत्री, महौषधं शुण्ठी, धात्री आमलकी, सिता प्रसिद्धा, स्पष्टमन्यत् ॥ ५८ ॥

**अथ बृहद्गुडूच्यादि ज्वरातीसारे—**

**गुडूचीधान्यकोशीरशुण्ठीवालकपर्पटैः ॥ ५९ ॥**
**बिल्वप्रतिविषापाठारक्तचन्दनवत्सकैः।**
**किराततमुस्तेन्द्रयवैः क्वथितं शिशिरं पिबेत् ॥ ६० ॥**
**सक्षौद्रं रक्तपित्तघ्नं ज्वरातीसारनाशनम्।**

दी०—अथ ज्वरातीसारे योगद्वयमाह—गुडूचीति। गुडूच्यादिकोऽयं गणः। अत्र वत्सकः कुटजत्वक्, किरातो भूनिम्बः, कुटजत्वगभावे शक्रयवा एव द्विगुणा ग्राह्याः। लघुत्वात् पाचनत्वाच्च। शिशिरं शीतस्पर्शम्, एष बृहद्गुडूच्यादिसंज्ञस्तन्त्रान्तरेऽवबोद्धव्यः ॥ ५९ ॥ ६० ॥

गू०—गुडूच्याद्यैः कृतं क्वथितं शिशिरं शीतं सक्षौद्रं पिबेत् रक्तपित्तघ्नं तथा ज्वरातिसारनाशनं भवेदिति योज्यं। उशीरं सुगन्धकं, वालकं सुगन्धितृणविशेषं, पर्पटं कटुपत्रं, बिल्वं बिल्वफलं, प्रतिविषा अतिविषा, पाठा पाटला, वत्सकं कुटजः, किरातं भूनिम्बः, मुस्तः नागरमुस्तं, इन्द्रयवः, स्पष्टमन्यत् ॥५९॥६०॥

**अथ नागरादिक्वाथो ज्वरातीसारे—**

**नागरं कुटजो मुस्तममृतातिविषा तथा ॥ ६१ ॥**
**एभिः कृतं पिबेत्क्वाथं ज्वरातीसारनाशनम्।**

दी०—नागरमिति। नागरादिक्वाथो ज्वरातीसारनाशनो भवति। कुटजोऽत्र कुटजफलम्। एवमविशेषोक्तौ सर्वातीसारे केचित् 'भूनिम्बातिविषामृता' इति पठन्ति। तत्र भूनिम्बः किरातः, उक्तं च तन्त्रान्तरे, 'नागरातिविषा मुस्ता भूनिम्बामृतवत्सकैः। सर्वज्वरहरः क्वाथः सर्वातीसारनाशनः' इति ॥ ६१ ॥

गू०—एभिर्नागरादिभिः कृतं क्वाथं पिबेत् ज्वरातिसारनाशकं भवतीति योजना, नागरं शुण्ठी, कुटजः कूडा, मुस्तं मोथा, अमृता गिलोय, अतिविषा अतीस ॥ ६१ ॥

**अथ धान्यपञ्चकक्वाथ आमशूलादौ—**

**धान्यवालकबिल्वाब्दनागरैः साधितं जलम् ॥ ६२ ॥**
**आमशूलहरं ग्राहि दीपनं पाचनं परम्।**

दी०—अथ आमशूले धान्येति। इदं धान्यपञ्चकसंज्ञकं क्वथितरूपं आमशूलहरं भवति। बिल्वमत्र बिल्वशलाटुः, संग्राहित्वात् एवं सर्वत्र स्तंभनयोगे। अब्दो मुस्तम्। केचिदिति पठन्ति 'पित्ते धान्यचतुष्कं तु शुण्ठीत्यागाद्वदन्ति हि' एतदभिप्रायं न सर्वमतम्, यतः 'शुण्ठी मधुरपाकित्वान्न च पित्तप्रकोपिनी' इति वचनम् ॥ ६२ ॥

गू०—धान्यकाद्यैः साधितं जलं आमशूलादिनाशकं परं ग्राहि, दीपनं, पाचनं भवेदिति योज्यम्। वालकः सुगन्धितृणविशेषः, नागरं शुण्ठी, स्पष्टमन्यत् ॥ ६२ ॥

**धान्यनागरक्वाथः पाचने—**

**धान्यनागरजः क्वाथः पाचनो दीपनस्तथा ॥ ६३ ॥**
**एरण्डमूलयुक्तश्च जयेदामानिलव्यथाम्।**

दी०—अथ आमवाते धान्येति। एतदपि पाचनम्। आमवातपीडां जयेत्। एतदन्यत्राप्यामवाते आमे वा विबन्धेऽपि, पाचनसंज्ञं सामान्यम्। तथाह्युक्तम्—'धान्यनागरवातारिमूलं क्वथितशीतलम्। आमशूलविबन्धघ्नं स्मृतं दीपनपाचनम्' इति ॥ ६३ ॥

गू०—धान्यनागरजः क्वाथः पाचनस्तथा दीपनो भवेत्। पुनः एरण्डमूलयुक्तः आमानिलव्यथां जयेत् ॥ ६३ ॥

१–गाण्डरजडं। २–कवरा। ३–मिश्री। ४–नेत्रवाला। ५–पापरा। ६–चिरायता। ७–मोथा।

१–नेत्रवाला।

**अथ वत्सकादिक्वाथः सामरक्तातीसारे—**

**वत्सकातिविषाबिल्वमुस्तवालकजः शृतः ॥ ६४ ॥**
**अतीसारं जयेत्सामं चिरजं रक्तशूलजित् ।**

दी०—अथामातीसारे योगचतुष्टयमाह—वत्सकेति । वत्सकादिक्वाथः अतीसारं जयेत् इति, वत्सकः कुटजफलः, साममतीसारं चिरजं चिरकालानुबन्धि । शेषं सुगमम् ॥ ६४ ॥

गू०—वत्सकादिशृतः क्वाथः सामं अतीसारं जयेत् । किंभूतं? चिरजं बहुदिनजं, तथा रक्तशूलजित्, वत्सकः कुटजः, अतिविषा प्रतिविषा, वालकः उदीच्यः, ॥ ६४ ॥

**अथ कुटजाष्टकं आमरक्तशूलादौ—**

**कुटजातिविषापाठाधातकीलोध्रमुस्तकैः ॥ ६५ ॥**
**ह्रीबेरदाडिमयुतैः कृतः क्वाथः समाक्षिकः ।**
**पेयो मोचरसेनैव कुटजाष्टकसंज्ञकः ॥ ६६ ॥**
**अतीसाराञ्जयेद्दाहरक्तशूलामदुस्तरान् ।**

दी०—कुटजाष्टकोऽयं क्वाथः अतीसारान् जयेत् । अतीसारानिति बहुवचनत्वेन सप्तविधानित्यर्थः । कुटजः इन्द्रयवः, धातकी धातकीकुसुमानि व्यवहारात्, ह्रीबेरं वालकं, दाडिमं दाडिमफलम् । मोचरसः शाल्मलीनिर्यासः, सचात्र प्रक्षेपे । मध्वपि प्रक्षेपः । अष्टग्रहणं यथालाभनिषेधार्थम् ॥ ६५ ॥ ६६ ॥

गू०—कुटजादिकृतः क्वाथः समाक्षिकः मधुयुतः पुनः मोचरसेन युतः पेयः पातव्यः । अयं कुटजाष्टकसंज्ञः अतीसाराञ्जयेत् । किंभूतान्, रक्तशूलामदुस्तरान् वक्तुमशक्यान् । ह्रीबेरं उदीच्यं, दाडिमं दाडिमवल्कलं मोचरसः शाल्मलीनिर्यासः, स्पष्टमन्यत् ॥६५॥ ६६॥

**अथ ह्रीबेरादिक्वाथोऽतीसारे**

**ह्रीबेरधातकीलोध्रपाठालज्जालुवत्सकैः ॥ ६७ ॥**
**धान्यकातिविषामुस्तागुडूचीबिल्वनागरैः ।**
**कृतः कषायः शमयेदतीसारं चिरोत्थितम् ॥६८॥**
**अरोचकामशूलास्रज्वरघ्नः पाचनः स्मृतः ।**

दी०—ह्रीबेरेति । ह्रीबेरादिकोऽयं क्वथितः कषायश्चिरोत्थितमतीसारं जयेत् । ह्रीबेरं वालकं, लज्जालुः स्वनामख्यातः, वत्सकः कुटजः । अत्र पाठा गुडूची चेति द्रव्यद्वयमधिकं लिखितमन्यनिबन्धात्, न दोषो ज्वरनाशनार्थम् । शेषं सुबोधम् ॥ ६७ ॥ ६८ ॥

गू०—ह्रीबेराद्यैः कृतः कषायः चिरोत्थितं अतीसारं शमयेत् । किंभूतः कषायः अरोचकामशूलास्रज्वरघ्नः, पुनः पाचनः । ह्रीबेरं उदीच्यं, धातकी वृक्षविशेषस्तस्य पुष्पाणि, पाठा गुडूची, लज्जालुः लज्जावती, वत्सकः कुटजत्वक् । स्पष्टमन्यत् ॥ ६७ ॥ ६८ ॥

**अथ धातक्यादिः क्वाथः बालातीसारे—**

**धातकीबिल्वलोध्राणि वालकं गजपिप्पली ॥ ६९॥**
**एभिः कृतं शृतं शीतं शिशुभ्यः क्षौद्रसंयुतम् ।**
**प्रदद्यादवलेहं वा सर्वातीसारशान्तये ॥ ७० ॥**

दी०—धातकीति । धातक्यादिभिः शृतं क्वथितं, शीतं स्पर्शात् । अत्र धातक्याः कुसुमानि । गजपिप्पली प्रसिद्धा । क्षौद्रसंयुतमिति मधुप्रक्षिप्तम् । एतेषां चूर्णं कृत्वा मधुना प्लाव्य बालकेभ्योऽवलेहं दद्यात्॥६९॥७०॥

गू०—एभिर्धातक्यादिभिः शृतं क्वाथं कृतं शीतं पानं क्षौद्रसंयुतं शिशुभ्यः प्रदद्यात् । अवलेहं वा कृत्वा दद्यात्, कस्मै सर्वातीसारशान्तये । धातकी पुष्पाणि, वालकं उदीच्यं, गजपिप्पली प्रसिद्धा, चव्यफलं, तदभावे पिप्पली देया । अन्यत्राप्येवं अवलेहं चूर्णस्य कृत्वा मधुना देयं वा ॥ ६९ ॥ ७० ॥

**अथ शालिपर्ण्यादिक्वाथो ग्रहण्यां—**

**शालिपर्णीबलाबिल्वधान्यशुण्ठीकृतः शृतः ।**
**आध्मानशूलसहितां वातजां ग्रहणीं जयेत् ॥७१॥**
**गुडूच्यतिविषाशुण्ठीमुस्तैः क्वाथः कृतो जयेत् ।**
**आमानुषक्तां ग्रहणीं ग्राही पाचनदीपनः ॥ ७२ ॥**

दी०—इदानीं ग्रहणीशान्तये योगद्वयमाह—शालिपर्णीति । शृतः क्वथितः, शालिपर्णी प्रसिद्धा, बला च प्रसिद्धा, 'सामस' इति लोके । आध्मान उदरापूरः, शूलोऽत्रामजनितपीडा, 'कुरकुरी' इति लोके । गुडूचीति चातुर्भद्रसंज्ञकोऽयं क्वाथः । अत्र गुडूच्यादयो विख्याता एव ॥ ७१ ॥ ७२ ॥

गू०—शालिपर्ण्यादिभिः कृतः शृतः आध्मानशूलसहितां वातजां संग्रहणीं जयेत् । शालिपर्णी शालिपत्री, बला प्रसिद्धा, स्पष्टमन्यत् ।

१–कुडा । २–नेत्रवाला । ३–सिबलगुद ।

१–नेत्रवाला । २–धायटी । ३–पाठा । ४–लजालु । ५–कुडाछाल । ६–गजपीपरी । ७–कवरा । ८–खिरहटी ।

गुडूच्यादिभिः कृतः क्वाथ आमानुषक्तां संग्रहणीं जयेत्, किंभूतः ग्राही ग्राहकः पाचनः दीपनश्च ॥ ॥ ७१ ॥ ७२ ॥

**अथ इन्द्रयवादिक्वाथः सर्वातीसारे—**

**यवधान्यपटोलानां क्वाथः सक्षौद्रशर्करः ।**
**योज्यः सर्वातिसारेषु बिल्वाम्रास्थिभवस्तथा ॥७३॥**

**दी०—**यवेति । छर्द्यतिसारे योगद्वयमपि तद्यथा —इन्द्रयवादीनां क्वाथः सक्षौद्रशर्कर एको योगः । बिल्वाम्रास्थिभवः क्वाथो द्वितीयः । अत्रापि सक्षौद्रशर्कर इति सम्बन्धनीयं तथेति ग्रहणात् । यवोऽत्र कुटजबीजम् । क्षौद्रशर्कराप्रक्षेपः साधुः । छर्दिरत्रातीसारस्योपद्रवः, बिल्वमत्र बिल्वमूलम् । यतः—"बिल्वमूलं मरुच्छ्लेष्मच्छर्दिघ्नं नच पित्तकृत्" इति तदभावे तत्फलमिति सर्वत्र । आम्रास्थि आम्रफलमज्जा ॥७३॥

**गू०—**यवादीनां क्वाथस्तथा बिल्वाम्रास्थिभव उत्पन्नः सर्वातीसारेषु योज्यः । यवः इन्द्रयवः, पटोलं पटोलपत्रं, स्पष्टमन्यत् ॥ ७३ ॥

**अथ फलादिक्वाथः कृमिरोगे—**

**त्रिफला देवदारुश्च मुस्ता मूषककर्णिका ।**
**शिग्रुरेतैः कृतः क्वाथः पिप्पलीचूर्णसंयुतः ॥ ७४ ॥**
**विडङ्गचूर्णयुक्तश्च कृमिघ्नः क्रिमिरोगहा ।**
**फलत्रिकामृतातिक्तानिम्बकैरातवासकैः ॥ ७५ ॥**
**जयेन्मधुयुतः क्वाथः कामलां पाण्डुतां तथा ।**

**दी०—**अथ कृमिरोगे त्रिफलेति । त्रिफला हरीतक्यादि । मूषककर्णिका इति वातिभेदाः, शिग्रुः शोभाञ्जनकः, पिप्पली विडङ्गचूर्णप्रक्षेपे । कृमिघ्नो बाह्याभ्यन्तरकृमिनाशनः । कृमिरोगः कृमिजनितहृद्रोगकुष्ठादिः । अथ कामलायां फलेति । तिक्ता कटुरोहिणी, कैरातो भूनिम्बः, पाण्डुतामिति पाण्डुरोगम् ॥ ७४ ॥ ७५ ॥

**गू०—**त्रिफलादिभिः कृतः क्वाथः पिप्पलीचूर्णसंयुतः तथा विडङ्गचूर्णयुक्तः कृमिघ्नो भवति कृमिरोगहा भवति त्रिफला हरीतक्यादिभिः, मूषककर्णिका 'मूषाकर्णी' ओषधिः । केचिद्दन्तीमाहुः । शिग्रुः[1] शोभाञ्जनम् ।

**अथ त्रिफलादि कामलादौ—**फलत्रिकाद्यैः कृतो मधुयुतः क्वाथः कामलां तथा पाण्डुतां जयेत् । अमृता गुडूची, तिक्ता कटुकी, निम्बः, कैरातः भूनिम्बः[1] ॥ ७४ ॥ ७५ ॥

**अथ पुनर्नवादिक्वाथः पाण्डुशोथादौ—**

**पुनर्नवाभयानिम्बदार्वीतिक्तापटोलकैः ॥ ७६ ॥**
**गुडूचीनागरयुतैः क्वाथो गोमूत्रसंयुतः ।**
**पाण्डुकासोदरश्वासशूलसर्वाङ्गशोथहा ॥ ७७ ॥**

**दी०—**सर्वाङ्गशोथे पुनर्नवादिः । पुनर्नवा वर्षाभूः, 'साठ' इति लोके । दार्वी दारुहरिद्रा । तिक्ताशब्देन कटुकी ग्राह्या नतु तिक्तं पटोलं समासान्तत्वात् तिक्ताया ह्रस्वत्वम् । गोमूत्रेणैव शृतः क्वाथ इति मन्यन्ते केचित् । तत्र युक्तं, मूत्रं तु प्रक्षेपे साधु व्यवहारात् ॥७६॥७७॥

**गू०—**गुडूच्यादिभिः कृतः क्वाथः पुनर्गोमूत्रयुक्तः पाण्ड्वादिनाशको भवति । पुनर्नवा वर्षाभूः[2], अभया हरीतकी, निम्बः, दार्वी दारुहरिद्रा, पटोलपत्रं, तिक्ता कटुकी ॥ ७६ ॥ ७७ ॥

**अथ वासादिक्वाथः रक्तपित्तादौ—**

**वासाद्राक्षाभयाक्वाथः पीतः सक्षौद्रशर्करः ।**
**निहन्ति रक्तपित्तार्तिश्वासकासान्सुदारुणान् ॥ ७८ ॥**
**रक्तपित्तं क्षयं कासं श्लेष्मपित्तज्वरं तथा ।**
**केवलो वासकक्वाथः पीतः क्षौद्रेण नाशयेत् ॥ ७९ ॥**

**दी०—**अथ रक्तपित्ते वासेति । वासा आटरूषकः, अभया हरीतकी, रक्तपित्तार्तिं रक्तपित्तव्यथाम् । श्वासं कासं च दारुणं दुःसाध्यम् । अपरं च वासकः क्वाथः केवल इति । वासोऽत्र पञ्चाङ्गो ग्राह्यः, क्षौद्रमत्र प्रक्षेपे । नाशयेदिति रक्तपित्तादिकान् ॥ ७८ ॥ ७९ ॥

**गू०—**क्षुद्रा कण्टकारी, अमृता गुडूची, क्षौद्रेण मधुना युतो ज्वरकासहा भवति ॥ ७८ ॥ ७९ ॥

**कासे योगद्वयमाह—**

**वासाक्षुद्रामृताक्वाथः क्षौद्रेण ज्वरकासहा ।**
**कासघ्नः पिप्पलीचूर्णयुक्तः क्षुद्राशृतस्तथा ॥ ८० ॥**

**दी०—**वासाक्षुद्रेति । क्षुद्रा लघुकण्टकारिका, अमृता गुडूची । क्षौद्रेणेति क्षौद्रप्रक्षेपः । ज्वरकासहेति ज्वरोपद्रवयुक्तः कास इति । द्वितीयस्तु क्वाथः केवलं पञ्चाङ्गकण्टकारिकायाः कृतः पिप्पलीचूर्णप्रक्षिप्तश्च तथेति ग्रहणादत्रापि मधुप्रक्षेपमाहुः ॥ ८० ॥

**अथ श्वासकासादौ क्षुद्रक्वाथः—**

**क्षुद्राकुलित्थवासाभिर्नागरेण च साधितः ।**
**क्वाथः पौष्करचूर्णाढ्यः श्वासकासौ निवारयेत् ॥ ८१ ॥**

१–सहिजना ।

१–चिरायता । २–साठी ।

दी०—श्वासकासादावपरमप्याह—क्षुद्रेति । कुलित्थोऽन्नविशेषः प्रसिद्ध एव, नागरं शुण्ठी, पुष्करचूर्णाढ्य इति पुष्करमूलचूर्णप्रक्षेपः, पुष्करमूलाभावे कुष्ठं ग्राह्यमिति व्यवहारः ॥ ८१ ॥

गू०—अथ क्षुद्रादिः कासादौ—क्षुद्रा कण्टकारी तस्याः शृतः क्वाथः पिप्पलीचूर्णयुक्तः कासघ्नो भवति। क्षुद्रा कण्टकारी, कुलित्थः द्विदलविशेषः, नागरं शुण्ठी, पौष्करं पुष्करमूलं, स्पष्टमन्यत् ॥ ८१ ॥

**अथ हिक्कायां रेणुकादिक्वाथः—**

**रेणुकापिप्पलीक्वाथो हिङ्गुकल्केन संयुतः ।**
**पानादेव हि पञ्चापि हिक्का नाशयति क्षणात्॥८२॥**
**बिल्वत्वचो गुडूच्या वा क्वाथः क्षौद्रेण संयुतः ।**
**जयेत्रिदोषजां छर्दिं पर्पटः पित्तजां तथा ॥ ८३ ॥**

दी०—अथ हिक्कायां रेणुकेति । रेणुका कौन्तीति पर्यायनाम्ना प्रसिद्धा । निर्गुण्डीबीजानि रेणुकाशब्दवाच्यानीत्येके । व्यवहारादत्र हिङ्गु भर्जितं "कल्के तु भर्जितं देयं हिङ्गु नोत्क्लेदकृद्भवेत्" इति वचनम्। कल्कस्थाने चूर्णमिति पठन्ति केचित् । पञ्चेति अन्नजादयो विख्याताः । क्षणादिति ग्रहणेनास्य दृष्टफलत्वं दर्शितम् । अथ छर्द्यां बिल्वत्वच इति । एतद्योगत्रयं क्षौद्रयुक्तं छर्दिं जयेदिति । किं तत्त्रयम्?—बिल्वत्वचः क्वाथ एको योगः, गुडूच्याः क्वाथो द्वितीयः, पर्पटोद्भवस्तृतीय इति । बिल्वत्वचः बिल्वमूलवल्कलं छर्दिहरत्वात् । तथाहि—"बिल्वमूलं मरुच्छ्लेष्मच्छर्दिघ्नं न च पित्तकृत्" इति । ननु गुडूची सुश्रुते शाकवर्गे कफपित्तहरत्वेनोक्ता; तत्कथं तस्याः क्वाथो वातजायां शस्तत्वेन प्रदर्शितः? उच्यते—अत्र मधुसंयोगोदयेन तद्द्वयशक्तिविशेषात्, किंवा शाकवर्गे तत्पत्रमुक्तम् । लता तु वातमपि शमयति । इति न दोषः । अत्र तु गुडूच्याः क्वाथः सुशीतलो ज्ञेयः । उक्तंच—"छिन्नरुहायाः क्वाथं सुशीतलं यः पिबेन्मधुना । छर्दिं सवातपित्तश्लेष्मसमुत्थां निवारयति" इति । तथेति ग्रहणात् पर्पटक्वाथेऽपि मधुप्रक्षेपः ॥ ८२ ॥ ८३ ॥

गू०—रेणुका प्रसिद्धा, रेणुकापिप्पल्योः कर्षमात्रस्य क्वाथः कटूष्णत्वात् हिङ्गुकल्केन भर्जितहिङ्गुमाषमात्रेण प्रक्षेपः स्थितिर्नास्त्येव मात्राया इत्युक्तत्वात् । पानादेव पानमात्रात्पञ्चापि हिक्का अन्नजादयस्तत्क्षणात्प्रशमं यान्ति । केचिदभर्जितं हिङ्गु ग्राह्यमित्याहुः ।

१–कुलथी ।

**अथ बिल्वादिश्छर्द्यां ।** पर्पटः कटुपत्रः[१] पित्तजां नाशयति । स्पष्टमन्यत् ॥ ८२ ॥ ८३ ॥

**अथ गृध्रस्यां योगद्वयमाह—**

**हिङ्गुपुष्करचूर्णाढ्यं दशमूलशृतं जयेत् ।**
**गृध्रसीं केवलः क्वाथः शेफालीपत्रजस्तथा ॥ ८४ ॥**

हिङ्गुपुष्करेति । दशमूलो विख्यातः । तद्यथा—"शालपर्णी पृश्निपर्णी बृहती कण्टकारिका । तथा गोक्षुरकश्चैव पञ्चमूलं लघु स्मृतम् ॥ बिल्वोऽग्निमन्थः स्योनाकः काश्मरी पाटला तथा । इदं महत्पञ्चमूलं दशमूलमुभे स्मृतं" इति । शेफाली निर्गुण्डी, तस्याः पत्राणि तथेति ग्रहणादत्रापि हिङ्गुपुष्करमूलचूर्णप्रक्षेपो विज्ञेयः ॥ ८४ ॥

गू०—अथ गृध्रस्यां क्वाथः हिङ्गुपुष्करचूर्णाढ्यः दशमूलशृतः क्वाथः गृध्रसीं जयेत् । केवलः शेफालीपत्रजो वा गृध्रसीं जयेत् । हिङ्गु, पुष्करमूलं माषकद्वयं, दशमूले हिङ्गु भर्जितं शेफाली निर्गुण्डी । अत्र क्वाथः केवलः हिङ्ग्वादि विना गृध्रसीहरणात् ॥ ८४ ॥

**रास्नापञ्चकं सप्तधातुगतवाते—**

**रास्नामृतामहादारुनागरैरण्डजैः शृतम् ।**
**सप्तधातुगते वाते सामे सर्वाङ्गजे पिबेत् ॥ ८५ ॥**

दी०—अथ वातविकारेषु योगानाह—रास्नेति । इदं रास्नापञ्चकसंज्ञकं शृतं क्वाथं पिबेत् आतुर इति शेषः । रास्ना सुरभि, महादारु देवदारु, एरण्डं एरण्डमूलं, सप्तधातवः, रसाद्याः शुक्रान्ताः । आमवातोक्तत्वादत्र विरेकार्थं रुबुतैलं प्रक्षिपन्ति केचिच्चिकित्सकाः । तदुक्तम्—"आमवातगजेन्द्रस्य शरीरवनचारिणः । एक एवाग्रणीर्जेता ह्येरण्डस्नेहकेसरी" इति ॥ ८५ ॥

गू०—रास्ना सुरभि, महादारु सुरदारु, अमृता गुडूची, नागरं शुण्ठी, एरण्डमूलं, एषां शृतः क्वाथः सप्तधातुगते वाते तथा सामे आमवातसहिते तथा सर्वाङ्गवाते च पिबेत् ॥ ८५ ॥

गू०—**अथ रास्नासप्तकं जंघावातादौ—**

**रास्ना गोक्षुरकैरण्डदेवदारु पुनर्नवा ।**
**गुडूच्यारग्वधश्चैव क्वाथमेषां विपाचयेत् ॥ ८६ ॥**
**शुण्ठीचूर्णेन संयुक्तं पिबेज्जङ्घाकटिग्रहे ।**
**पार्श्वपृष्ठोरुपीडायामामवाते सुदुस्तरे ॥ ८७ ॥**

दी०—रास्नेति । रास्नासप्तकसंज्ञकोऽयं क्वाथः । रास्ना

१–पित्तपापरा । २–सिभालू ।

सुरभीति लोके। एरण्ड एरण्डजटा, आरग्वधः कृतमालकः शुण्ठीचूर्णमत्र प्रक्षेपे। जङ्घाग्रहे कटीग्रहे वा, पार्श्वपीडा पृष्ठपीडा ऊरुपीडेत्यर्थः। सुदुस्तरे इति कष्टसाध्ये। अत्रापि केचिदैरण्डतैलप्रक्षेपमाहुः॥८६॥८७॥

**गू०**—रास्ना प्रसिद्धा, एरण्डः, पुनर्नवा वर्षाभूः, आरग्वधः कृतमालः, एषां क्वाथः शुण्ठीचूर्णेन टङ्कमात्रं पिबेत्। केषु रोगेषु। जंघाकटिग्रहादौ। उरो हृदयं। स्पष्टमन्यत्॥ ८६ ॥ ८७ ॥

**महारास्नादियोगः सर्ववातरोगे—**

**रास्ना द्विगुणभागा स्यादेकभागास्ततः परे।**
**धन्वयासबलैरण्डदेवदारुशठीवचाः॥ ८८॥**
**वासको नागरं पथ्या चव्या मुस्ता पुनर्नवा।**
**गुडूची वृद्धदारुश्च शतपुष्पा च गोक्षुरः॥ ८९॥**
**अश्वगन्धा प्रतिविषा कृतमालः शतावरी।**
**कृष्णा सहचरश्चैव धान्यकं बृहतीद्वयम्॥ ९०॥**
**एभिः कृतं पिबेत्क्वाथं शुण्ठीचूर्णेन संयुतम्।**
**कृष्णाचूर्णेन वा योगराजगुग्गुलुनाथवा॥ ९१॥**
**अजमोदादिना वापि तैलेनैरण्डजेन वा।**
**सर्वाङ्गकम्पे कुब्जत्वे पक्षाघातेऽपबाहुके॥ ९२॥**
**गृध्रस्यामामवाते च श्लीपदे चापतानके।**
**अन्त्रवृद्धौ तथाध्माने जङ्घाजानुगतेऽर्दिते॥ ९३॥**
**शुक्रामये मेदूरोगे वन्ध्यायोन्यामयेषु च।**
**महारास्नादिराख्यातो ब्रह्मणा गर्भकारणम्॥ ९४॥**

**दी०**—रास्ना द्विगुणभागेति रास्नामत्र पठन्ति एतदपि मनोहरं न दोषः। अपरा धन्वयासादयः, एकभागाः प्रत्येकं, धन्वयासः दुरालभा, शठी कर्चूरभेदः। वृद्धदारु निःसृताभेदः। कृतमालः राजवृक्षफलम्। कृष्णा पिप्पली, सहचरः कुरण्डकः, बृहतीद्वयमिति लघुकण्टकारिका बृहत्कण्टकारिका चेति। प्रक्षेपश्चात्र यथादोषं यथाव्याधि च योजनीयः। योगराजगुग्गुल्वादयोऽग्रे वक्ष्यमाणा ज्ञेयाः। अथवेति ग्रहणात् प्रक्षेपार्थं चालम्बुषादिचूर्णं आभाद्यं वा ग्रन्थान्तरादवगन्तव्यम्। शेषं सुगमम्॥ ८८–९४॥

**गू०**—अथ महारास्नादिः सर्ववातरोगे। एभी रास्नादिभिः कृतः क्वाथः शुण्ठ्यादिचूर्णेन युतः सर्वाङ्गकम्पादौ वातरोगेषु पिबेत्। अयं महारास्नादिः ब्रह्मणा गर्भकारणमाख्यातः। रास्ना द्विगुणभागा स्यात् भवेत् अपरा धन्वयासादय एकभागाः सर्वेभ्यो रास्ना द्विगुणेति शब्दार्थः। धन्वयासः यवासा, बला प्रसिद्धा, एरण्डमूलं, देवदारु, शठी कर्चूरः, वचा खुरासनदेशोद्भवा, वासा, नागरं शुण्ठी, पथ्या हरीतकी, चव्यं, मुस्तं नागरं, पुनर्नवा वर्षाभूः, गुडूची अमृता, वृद्धदारुः प्रसिद्धा, शतपुष्पा गोक्षुरस्त्रिकण्टकः, अश्वगन्धा, प्रतिविषा, आरग्वधः, शतावरी, पिप्पली, सहचरः पीतवासा, बृहतीद्वयं कण्टकारीद्वयं, स्पष्टमन्यत्। योगराजः गुग्गुलाधिकारोक्तः, अजमोदादिचूर्णाधिकारोक्तः, रोगास्तु वातरोगगणनायामुक्ताः। ननु वङ्गसेनवृन्दशतश्लोक्यादौ रास्ना त्रिगुणा उक्ता शार्ङ्गधरेण द्विगुणा कथमुक्ता? तन्निरस्तम्, तथाच 'समभागान्वितैरेतै रास्नात्रिगुणभागिकैः' इति वङ्गसेनः, "त्रैरास्ना शैर्यया साद्रतु वृष वृष चव्य वृश्चो (?) च कृष्णे" इत्यादि बोपदेवशतश्लोक्यां; रास्नात्रिगुणभागा सर्वौषधिभ्यो वा एकौषधभागेति विचारे शार्ङ्गधरादयस्तु सर्वौषधिभ्य एव मन्यन्ते द्विगुणं रास्नामिति। रास्ना द्विगुणभागिकैरिति इदमपि कस्यचित्तन्त्रस्य मतम्। केचित्तु आद्यौषधभागात् द्विगुणं त्रिगुणं मन्यन्ते तत्र रास्नाया बहुत्वेनैव वातनाशकत्वात्॥ ८८–९४॥

**एरण्डसप्तकं स्तनादिगतवाते—**

**एरण्डो बीजपूरश्च गोक्षुरो बृहतीद्वयम्।**
**अश्मभेदस्तथा बिल्व एतन्मूलैः कृतः शृतः॥९५॥**
**एरण्डतैलहिङ्गवाढ्यः सयवक्षारसैन्धवः।**
**स्तनस्कन्धकटीमेढ्रहृदयोत्थां व्यथां जयेत्॥ ९६॥**

**दी०**—एरण्डसप्तकं संप्रत्याह—एरण्ड इति। एरण्डादीनां मूलैर्जटाभिः कृतः क्वाथः उक्तप्रक्षेपयुक्तः स्तनस्कन्धादिगतपीडां जयेदिति। अत्राश्मभेदः पा—

---

१–वायुसरहि। २–साठी। ३–किरवाला।
४–अलम्बुषादिचूर्णं यथा—

अलम्बुषां गोक्षुरकं गुडूचीं वृद्धदारुकम्।
पिप्पलीं त्रिवृतां मुस्तं वरुणं सपुनर्नवम्।
त्रिफलां नागरं चैव श्लक्ष्णचूर्णानि कारयेत्॥
इति चक्रदत्ते।

अलम्बुषा मण्डूरभस्म।
आभाद्यं चूर्णमन्वेषणीयम्, अथवा आभादिगुग्गुलोरत्र ग्रहणम्—
आभाफलत्रिकव्योषैः सर्वैरेभिः समीकृतैः।
तुल्यो गुग्गुलुरायोज्यो भग्नसन्धिप्रसाधकः॥
च. द.॥
आभा स्थूलबब्बूलिका॥

१–खिरहटी। २–मोथा। ३–साठ। ४–गिलोय। ५–विधारा। ६–सौंफ। ७–गोखरु। ८–किरवाला।

षाणभेदः हिंग्वत्र भर्जितम्। समुदायप्रक्षेपे द्रव्याणां मानमिदं वदन्त्येके। तद्यथा—"क्षारसैन्धवचूर्णानां माषैकैकं प्रयोजयेत्। माषार्धं हिङ्गुचूर्णं च तैलं माषचतुष्टयम्" इत्यादि ॥ ९५ ॥ ९६ ॥

**गू०**—बीजपूरः निम्बुकभेदस्तस्य मूलं, अश्मभेदः, एतन्मूलैः कृतः शृतः एरण्डतैलादियुक्तः स्तनादिव्यथां जयेत् ॥ ९५ ॥ ९६ ॥

### नागरादिर्वातशूलादौ—

**नागरैरण्डजः क्वाथः क्वाथ इन्द्रयवस्य च।**
**हिङ्गुसौवर्चलोपेतो वातशूलनिवारणः ॥ ९७ ॥**

**दी०**—अथ शूले वातादिनिमित्तजे योगत्रयमाह—नागरेति। एतद्योगद्वयं वातशूले प्रशस्तम्। नागरं शुण्ठी, एरण्डं एरण्डमूलम्। इन्द्रयवं कुटजबीजम्। केचिद्द्रव्यत्रयेणापि योगमेकं वदन्ति। तथाहि—"हिङ्गुपुष्करमूलाभ्यां हिङ्गुसौवर्चलेन वा। विश्वैरण्डयवक्वाथः पीतः शूलनिवारणः" इति ॥ ९७ ॥

**गू०**—स्पष्टम् ॥ ९७ ॥

### पित्तशूले त्रिफलादिक्वाथः।

**त्रिफलारग्वधक्वाथः शर्कराक्षौद्रसंयुतः।**
**रक्तपित्तहरो दाहपित्तशूलनिवारणः ॥ ९८ ॥**

**दी०**—त्रिफलेति। अयं क्वाथः पित्तशूले विहितः। त्रिफला प्रसिद्धा, आरग्वधः कृतमालकः, केचिदत्र रक्तपित्तोपशमनार्थं त्रिफलाशब्देन द्राक्षादिकं क्षिपन्ति। तथाह्युक्तम्—"द्राक्षाकाश्मर्यखर्जूरफलानीति फलत्रिकः। इयं प्रोक्ता द्वितीया च त्रिफला चरकादिभिः ॥ फलत्रिकाणां योगोऽयं चरकाद्युक्तपैत्तिके" इति ॥ ९८ ॥

**गू०**—आरग्वधः कृतमालः, स्पष्टमन्यत् ॥ ९८ ॥

### कफशूलादौ एरण्डक्वाथः।

**एरण्डमूलं द्विपलं जलेऽष्टगुणिते पचेत्।**
**तत्क्वाथो यावशूकाढ्यः पार्श्वहृत्कफशूलहा ॥ ९९ ॥**

**दी०**—एरण्डेति। अयं क्वाथः कफशूले प्रशस्तः। द्विपलमिति कफस्य दुर्जयत्वात्। जलेऽष्टगुणिते इति द्रव्यभागापेक्षितो यावशूकाढ्य इति यवक्षारचूर्णप्रक्षेपः। पार्श्वशूलं, हृच्छूलं, कफशूलं चेति कफशूलं कफजनितशूलं च जयेत् ॥ ९९ ॥

### हृद्रोगादौ दशमूलक्वाथः।

**दशमूलकृतः क्वाथः सयवक्षारसैन्धवः।**
**हृद्रोगगुल्मशूलानि कासं श्वासं च नाशयेत् ॥ १०० ॥**

**दी०**—दशमूलेति। दशमूलं प्रसिद्धम्, यवक्षारसैन्धवचूर्णप्रक्षिप्तोऽयं क्वाथो हृद्रोगादीन् हन्तीति ॥ १०० ॥

### हरीतक्यादि मूत्रकृच्छ्रादौ—

**हरीतकीदुरालम्भाकृतमालकगोक्षुरैः।**
**पाषाणभेदसहितैः क्वाथो माक्षिकसंयुतः ॥ १०१ ॥**
**विबन्धे मूत्रकृच्छ्रे च सदाहे सरुजे हितः।**

**दी०**—हरीतकीति। मूत्रकृच्छ्रे हरीतक्यादिसंज्ञकोऽयम्। अत्र दुरालभा यवासकः। पाषाणभेदः प्रतीतः, वजेतीति लोके। माक्षिकसंयुत इति मधुप्रक्षेपः। विबन्धे अप्रवर्तके। केचित् पाषाणभेदसहितैरित्यत्र "पाषाणभेदात्रुटिभिः" इति पठन्ति। तत्र त्रुटिरेला अयमपि साधुः ॥ १०१ ॥

**गू०**—दुरालम्भा यवासा कृतमालः आरग्वधः माक्षिकं मधु। विबन्धो वातविष्टम्भः। स्पष्टमन्यत् ॥ १०१ ॥

### वीरतर्वादिगणः।

**वीरतरुवृक्षवन्दा काशः सहचरत्रयम् ॥ १०२ ॥**
**कुशद्वयं नलो गुन्द्रा वकपुष्पोऽग्निमन्थकः।**
**मूर्वा पाषाणभेदश्च स्योनाको गोक्षुरस्तथा ॥ १०३ ॥**
**अपामार्गश्च कमलं ब्राह्मी चेति गणो वरः।**
**वीरतर्वादिरित्युक्तः शर्कराश्मरिकृच्छ्रहा ॥ १०४ ॥**
**मूत्राघातं वायुरोगान्नाशयेन्निखिलानपि।**

वीरतरुरिति। अथाश्मरीरोगे वीरतर्वादिसंज्ञकोऽयं गणः वरः श्रेष्ठः उक्तः कथितः मुनिभिरिति शेषः। वीरतरुः उशीर इति लोके शरो वा। वृक्षवन्दा वृक्षादनी। काशः प्रसिद्धः। सहचरत्रयमिति कुरण्टकत्रयम्। तच्च पीतरक्तनीलकुसुमभेदेन बोद्धव्यम्। तथाह्युक्तम्—"पीतो रक्तोऽथ नीलश्च कुसुमैस्तं विभावयेत्। पीतः कुरण्टको ज्ञेयो रक्तः कुरवकः स्मृतः ॥ नीलश्चार्तगलः प्रोक्तो नामतः परिकीर्तितः" इति। कुशद्वयमिति दर्भद्वयं हरितरक्तपत्रभेदेन, अनलः प्रसिद्धः, गुन्द्रा पटेरकभेदः, वकपुष्पो वसुकः, सामसभेदो वा, अग्निमन्थोऽरणिः, मूर्वा चोरस्नायुः, पाषाणभेदो वजेतीति प्रसिद्धः। कमलमत्र रक्तं, ब्राह्मी स्वनामख्याता। शेषं सुबोधम् ॥ १०२–१०४ ॥

**गू०**—अथ वीरतर्वादिगणः। वीरतरुः शरः, एके भल्लातकमाहुः; अयं च वीरतरुर्जाङ्गलदेशे 'वेलंतर' इति नाम्ना प्रसिद्धः। तथाचोक्तं—'वेलन्तरो जगति वीरतरुः प्रसिद्ध' इति। काशः कासः, सहचरत्रयं

१–बिजोराजड।

१–किरवाला।

वासकत्रयं श्वेतपीतनीलभेदात्, कुशत्रयं दीर्घह्रस्वभेदेन, नलः नलसरः, गुन्द्रा गुन्द्रिणी, बकपुष्पोऽर्कः यद्वा बकुलः, अग्निमन्थारणी, मूर्वा मोरटा, पाषाणभेदः, ब्राह्मी पश्चिमदेशे प्रसिद्धा ॥ १०२–१०४ ॥

### मूत्रकृच्छ्रे एलादिक्वाथः—

**एलामधुकगोकण्टरेणुकैरण्डवासकाः ॥ १०५ ॥**
**कृष्णाश्मभेदसहिताः क्वाथ एषां सुसाधितः।**
**शिलाजतुयुतः पेयः शर्कराश्मरिकृच्छ्रहा ॥ १०६ ॥**
**समूलगोक्षुरक्वाथः सितामाक्षिकसंयुतः।**
**नाशयेन्मूत्रकृच्छ्राणि तथा चोष्णसमीरणम् ॥१०७॥**

**दी०**—अपरमप्याह,—एला मधुकेति। एलादिकोऽयं योगः। अत्र मधुकं मधुयष्टी, गोकण्टको गोक्षुरकः, रेणुका प्रसिद्धा। अश्मभेदः पाषाणभेदः। सुसाधित इति सम्यक् क्वथितः। शिलाजतु प्रक्षेपे साधु। तत्तु माषचतुष्टयं व्यवहारात्। कृच्छ्रहेति मूत्रकृच्छ्ररोगघ्न इत्यर्थः। समूलगोक्षुरेति अयं पञ्चाङ्गगोक्षुरक्वाथोऽपि सितामधुप्रक्षेपयुतः द्वितीयः मूत्रकृच्छ्रनाशनो ज्ञेयः। उष्णसमीरणमिति मूत्राघातभेदः ॥ ॥ १०५–१०७ ॥

**अथ गोक्षुरादिक्वाथः कृच्छ्रादौ**—माक्षिकं मधु, एरण्डजटा, वासकः वासापत्रं, कृष्णा पिप्पली, अश्मभेदः पाषाणभेदः, एषां साधितः क्वाथः शिलाजतुसत्त्वयुतः पेयः शर्करादिनाशकः शर्करा प्रस्तरभेदः उष्णसमीरणं उष्णवातो रोगविशेषः ॥ १०५–१०७ ॥

### अथ प्रमेहे वरादिक्वाथः—

**वरादार्व्यब्ददारूणां क्वाथः क्षौद्रेण मेहहा।**
**वत्सकत्रिफला दार्वी मुस्तको बीजकस्तथा ॥ १०८ ॥**

**दी०**—वरेति। एतद्योगद्वयं प्रमेहेषु संमतम्। किं तद्द्वयम् एको वरादिः, अपरो वत्सकादिरिति। वरा अत्र त्रिफला, दार्वी दारुहरिद्रा, अब्दो मुस्तकम्, दारु देवदारु, एतेषां क्वाथो मधुप्रक्षेपयुतः। द्वितीयः—वत्सकः कुटजः, बीजकोऽसनो वृक्षविशेषः। तथेति ग्रहणादयमपि मधुप्रक्षेपयुक्तो व्यवह्रियते १०८

**गू०**—अथ त्रिफलादिक्वाथः प्रमेहे। वरा त्रिफला, दार्वी दारुहरिद्रा, दारु देवदारु, एषां क्वाथः क्षौद्रेण मधुना मेहहा भवति। मेहः प्रमेहः।

**अथ वत्सकादिर्मेहे।** वत्सकः कुटजः, त्रिफला हरीतक्यादिः, दार्वी दारुहरिद्रा, बीजकः बीजकसारः एषां शृतः क्वाथः मधुयुतः तथेति पूर्ववत् मेहहा स्यात् ॥ १०८ ॥

### फलत्रिकादिः प्रमेहे—

**फलत्रिकाब्ददार्वीणां विशालायाः शृतं पिबेत्।**
**निशाकल्कयुतं सर्वप्रमेहविनिवृत्तये ॥ १०९ ॥**

**दी०**—अपरं च फलत्रिकादिप्रयोगः। फलत्रिकेति। अब्दो मुस्ता, दार्वी दारुहरिद्रा, विशाला इन्द्रवारुणी, निशा हरिद्रा, तस्याः कल्कः प्रक्षेप्तव्यः। अत्र मध्वपि प्रक्षिपन्त्येके व्याधिविहितत्वात् ॥ १०९ ॥

**गू०**—फलत्रिका त्रिफला, अब्दो मुस्तः, दार्वी दारुहरिद्रा, विशाला इन्द्रवारुणी एषां शृतः क्वाथः निशा हरिद्रा तत्कल्कयुतः पिबेत्, कस्मै सर्वप्रमेहविनिवृत्तये निवारणाय ॥ १०९ ॥

### दार्व्यादिक्वाथः प्रदरे—

**दार्वी रसाञ्जनं मुस्तं भल्लातः श्रीफलं वृषः।**
**कैरातश्च पिबेदेषां क्वाथं शीतं समाक्षिकम् ॥११०॥**
**जयेत्सशूलं प्रदरं पीतश्वेतासितारुणम्।**

**दी०**—अथ प्रदरे दार्वीति। दार्व्यादिकोऽयं गणः। अस्य क्वाथं शीतं स्पर्शात्, अत एव समाक्षिकं मधुप्रक्षेपयुतम्। दार्वी दारुनिशा, रसाञ्जनं प्रतीतं, तच्च दार्वीक्वाथसमुद्भवमिति वदन्ति, भल्लातो भल्लातकफलानि, श्रीफलं विल्वं, वृष आटरूषकः, कैरातो भूनिम्बः। सशूलमिति सशूलमुपद्रवं प्रदरस्यैव। असितं कृष्णम् ॥ ११० ॥

**गू०**—दार्वी दारुहरिद्रा, रसाञ्जनं दार्वी क्वाथघनः, मुस्तं नागरं, भल्लातकः प्रसिद्धः, श्रीफलं बिल्वमज्जा, वृषः वासा, किरातः भूनिम्बः, एषां क्वाथः समाक्षिकः पिबेत्। स पीतः क्वाथः पीतश्वेतारुणं सशूलं प्रदरं नाशयेत्। असितं कृष्णं प्रदरं स्त्रीरोगे रुधिरस्रावलक्षणम् ॥११०॥

### न्यग्रोधादिक्वाथः योनिरोगव्रणादौ—

**न्यग्रोधप्लक्षकोशाम्रवेतसा बदरी तुणिः ॥ १११ ॥**
**मधुयष्टी प्रियालश्च लोध्रद्वयमुदुम्बरः।**
**पिप्पलश्च मधूकश्च तथा पारिसपिप्पलः ॥ ११२ ॥**

१–पटेरा। २–बगइल। ३–गोरहरी। ४–मूत्राघातभेद इति प्राचाम्; नव्यास्तु–सोजाकमेवोष्णवातं प्रवदन्ति, युक्ततरं चेदम्।

१–कुडा। २–रसौती। ३–मोथा। ४–भिलावा। ५–चिरायता।

**सल्लकी तिन्दुकी जम्बूद्वयमाम्रतरुः शिवा ।**
**कदम्बककुभौ चैव भल्लातकफलानि च ॥ ११३ ॥**
**न्यग्रोधादिगणक्वाथं यथालाभं च कारयेत् ।**
**अयं क्वाथो महाग्राही व्रण्यो भग्नं च साधयेत् ११४**
**योनिदोषहरो दाहमेदोमेहविषापहः ।**

**दी०**—अथ व्रणरोगे न्यग्रोधेति । न्यग्रोधादिकषायोऽयं व्रणरोगेषु प्रशस्तः ग्राही च भवति । न्यग्रोधो वटवृक्षः, प्लक्षः पाकरीति लोके, कोशाम्रः जन्तुवृक्षः तत्फलमम्लं ग्राही भवति । वेतसो वञ्जुलः जलवेतस इति प्रतीतः, तुणि 'लीदि'पादपो वस्त्ररञ्जनार्थकः पीतवर्णः, पिप्पलश्चिरौंजी, रोध्रद्वयमिति लोध्रं सावरलोध्रं चेति, मधूको वृक्षविशेषः । जम्बुद्वयमिति क्षुद्रजम्बुराजजम्बुभेदेन । पारिशपिप्पलः पिप्पलभेदः प्रसिद्धः । शल्लकी करिप्रिया, शिवा हरीतकी, कदम्बो वृक्षविशेषः नतु भूमिकदम्बः । ककुभः अर्जुनः सुगन्धमूलो विटपविशेषः । अथवा 'कौह' शब्दवाच्यवृक्षविशेषः । यथालाभमिति समस्तं व्यस्तं वा ग्राह्यं क्वाथ्यम् १११–११४

**गू०**—न्यग्रोधो वटः, प्लक्षः पर्कटीवृक्षः[1], कोशाम्रः, अम्बष्ठा[2] आम्रभेदः, वेतसः वञ्जुलः[3], बदरी, तुणी[4] प्रसिद्धः, मधुयष्टी मधुकं[5], प्रियालः फलवृक्षः[6], लोध्रद्वयं लघु-बृहत् भेदेन[7], उदुम्बरः यज्ञवृक्षः[8], पिप्पलः प्रसिद्धः[9], मधुकः गुडपुष्पः[10], पारिसपिप्पलः प्रसिद्धः[11], सल्लकी करिप्रिया, तिन्दुकं जम्बूद्वयं बृहल्लघुभेदेन[12], आम्रः आम्रवृक्षः, शिवा हरीतकी[13], कदम्बकेतुः, ककुभः अर्जुनवृक्षः; भल्लातकफलानि मिलित्वा इदं न्यग्रोधादिकाथद्रव्यं यथालाभं यथाप्राप्तं; अयं क्वाथः महाग्राही महाग्राहकः, व्रण्यः व्रणेषु हितः, भग्नमस्थिभग्नं, योनिदोषः योनिरोगः, दाहमेदोमेहविषापहः स्थावरजङ्गमविषहरः ॥ १११–११४ ॥

### अथ मेदोदोषे योगत्रयं—

**बिल्वोऽग्निमन्थः स्योनाकः काश्मरी पाटला तथा ॥**
**क्वाथ एषां जयेन्मेदोदोषं क्षौद्रेण संयुतः ।**
**क्षौद्रेण त्रिफलाक्वाथः पीतो मेदोहरः स्मृतः ॥११६**
**शीतीभूतं तथोष्णाम्बु मेदोहृत्क्षौद्रसंयुतम् ।**

**दी०**—बिल्व इति । एष महापञ्चमूलाख्यः कषायो मेदोवृद्धौ प्रशस्तः । तत्राग्निमन्थोऽरणिः, स्योनाकः वृक्षविशेषः, काश्मरी गम्भारी, क्षौद्रेण संयुतः इति मधुप्रक्षेपः । एषामिति महापञ्चमूलानां महातरुसंभवत्वात् महच्छब्दोपलक्षितमिदम् । क्षौद्रेणेति । अपरोऽपि त्रिफलाक्वाथो मधुप्रक्षिप्तः दोषहरो भवति । त्रिफलात्र हरीतक्यादिकम् । तथेति **योगान्तरमाह** । उष्णाम्बुशीतलीभूतं कृत्वा तत्र मधुप्रक्षेपो मेदोहृद्भवति । उष्णाम्बु अष्टमांशावशेषितजलं, तच्च द्विपलमितं, मधु चतुर्थांशमिति व्यवहारात् नतु साम्यं । अतः—'मधुसर्पिषी मध्वम्बुनी मानतस्तुल्ये नाश्नीयात्' इति । अयं तु प्रातरेव योज्यः ॥ ११५ ॥ ११६ ॥

**गू०**—**अथ बिल्वादिर्मेदोरोगे** । बिल्वः श्रीफलं[1], अग्निमन्थः अरणिः, स्योनाकः अरलुः, काश्मरी गम्भारी[2], पाटला एषां क्वाथः क्षौद्रेण मधुना युतः मेदोदोषं मेदोरोगं जयेत् । दोषा अपि रोगसंज्ञां लभन्ते ।

**अथ त्रिफलाक्वाथः** । मेदोरोगे शीतीभूतं उष्णाम्बु उष्णजलं मधुयुतं मेदो हरेत् इत्येकयोगः ॥ ११५ ॥ ११६ ॥

### उदररोगे चव्यादिक्वाथः—

**चव्यचित्रकविश्वानां साधितो देवदारुणा ॥ ११७ ॥**
**क्वाथस्त्रिवृच्चूर्णयुतो गोमूत्रेणोदराञ्जयेत् ।**

**दी०**—अथोदरे चव्येति । चव्यं स्वनामख्यातं, विश्वा शुण्ठी, त्रिवृत् त्रिभण्डी, 'निसोथ' इति लोके । अस्याश्चूर्णं प्रक्षेपे साधु । गोमूत्रस्याप्यत्र प्रक्षेपः । उदरानिति सर्वोदरान् ॥ ११७ ॥

**गू०**—चव्यादिना साधितः क्वाथः गोमूत्रेण युतः गोमूत्रगुग्गुलुयुतः शोथोरोगापहो भवति ॥ ११७ ॥

### शोथोदरे पुनर्नवादिक्वाथः—

**पुनर्नवामृतादारुपथ्यानागरसाधितः ॥ ११८ ॥**
**गोमूत्रगुग्गुलुयुतः क्वाथः शोथोदरापहः ।**

**दी०**—पुनर्नवेति । पुनर्नवा वर्षाभूः, अमृता गुडूची, दारु देवदारु, पथ्या हरीतकी, नागरं शुण्ठी प्रत्यूहोपयोगत्वात् प्रक्षेपार्थं गुग्गुलुमाषचतुष्टयं गोमूत्रमक्षप्रमाणं, विरेके तु प्राचुर्यमुभयोः ॥ ११८ ॥

**गू०**—पुनर्नवा वर्षाभूः[3], अमृता गुडूची[4], दारु देवदारु, पथ्या हरीतकी, नागरं शुण्ठी, गोमूत्रम्, गुग्गुलुप्रक्षेपः प्रमाणं पूर्वमेवोक्तं क्वाथविधौ । शोथोदरो रोगविशेषः ॥ ११८ ॥

---

१—पिलखन । २—पिलुखनि । ३—अम्बाडा । ४—बेत । ५—मुलहटी । ६—चिरौंजी । ७—लोधा । ८—गूलर । ९—पीपर । १०—महुवा । ११—पारिखपीपर । १२—छोटीबडी जामुनी । १३—हरडे ।

१—बेलगिर । २—कुम्भेरी । ३—साण्ठी । ४—गिलोय ।

**पथ्यादिक्काथः यकृत्प्लीहगुल्मोदरे—**

**पथ्यारोहितकक्काथं यवक्षारकणायुतम् ॥ ११९ ॥**
**पिबेत्प्रातर्यकृत्प्लीहगुल्मोदरनिवृत्तये ।**

**दी०**—अथ यकृत् प्लीहोदरे पथ्येति । पथ्या हरीतकी, रोहितकः विटपिविशेषः 'रुहेरी'ति लोके, यवक्षारः, पिप्पलीचूर्णं यथा दोषापेक्षया व्यवहरन्ति ॥ ११९ ॥

**गू०**—पथ्या हरीतकी, रोहितकं सुगन्धितृणं, कणा पिप्पलीप्रक्षेपे ॥ ११९ ॥

**शोथे पुनर्नवादिक्काथः—**

**पुनर्नवा दारुनिशा निशा शुण्ठी हरीतकी ॥१२०॥**
**गुडूची चित्रको भार्ङ्गी देवदारु च तैः श्रृतः ।**
**पाणिपादोदरमुखप्राप्तं शोफं निवारयेत् ॥ १२१ ॥**

**दी०**—अथ शोथे पुनर्नवेति । पुनर्नवाभिः श्रृतः क्वथितः । अत्र दारुनिशा दारुहरिद्रा, शेषं सुगमम् ॥ १२० ॥ १२१ ॥

**गू०**—अथ पुनर्नवाद्यैः श्रृतः क्वाथः शोथं निवारयेत् । किंभूतं? पुनर्नवा वर्षाभूः, दारुनिशा दारुहरिद्रा, निशा हरिद्रा, पाणिपादोदरसंभूतं मुखप्राप्तं पाणिर्हस्तः स्पष्टमन्यत् ॥ १२० ॥ १२१ ॥

**वृषणशोथे त्रिफलादिः—**

**फलत्रिकोद्भवं क्वाथं गोमूत्रेणैव पाययेत् ।**
**वातश्लेष्मकृतं हन्ति शोथं वृषणसंभवम् ॥ १२२ ॥**

**दी०**—अथ वृषणशोथे फलत्रिकेति । गोमूत्रेणैव क्वथितं त्रिफलोद्भवं कषायमिति । अयं वातकफकृते वृषणशोफे । तन्त्रान्तरे वातोद्भवे वृषणशोथे कथितः । तत्र त्रिफलाक्वाथः सगोमूत्रप्रक्षेपः प्रातरेव योज्यः ॥

**गू०**—सुगमम् ॥ १२२ ॥

**रास्नादिः अन्त्रवृद्धौ—**

**रास्नामृताबलायष्टीगोकण्टैरण्डजः श्रृतः ।**
**एरण्डतैलसंयुक्तो वृद्धिमन्त्रभवां जयेत् ॥ १२३ ॥**

**दी०**—अथान्त्रवृद्धौ रास्नेति । रास्नादिकोऽयं श्रृतः क्वथितः । रास्ना सुरभी, बला 'खिरहटी'ति लोके । यष्टी मधुयष्टी, गोकण्टको गोक्षुरकः । केचित् पटोलं रेवतं रुबु इति पठन्ति । तच्च बहुषु पुस्तकेषु न दृश्यते ॥ १२३ ॥

**गू०**—रास्ना प्रसिद्धा, अमृता गुडूची, बला प्रतीता, यष्टीमधुकं, गोकण्टकं गोखरु, एरण्डं एरण्डमूलं एषां श्रृतः एरण्डतैलयुतः अन्त्रोद्भवां वृद्धिं जयेत् ॥१२३॥

**काञ्चनारक्वाथः गण्डमालायां—**

**काञ्चनारत्वचः क्वाथः शुण्ठीचूर्णेन नाशयेत् ।**
**गण्डमालां तथा क्वाथः क्षौद्रेण वरुणत्वचः ॥१२४॥**

**दी०**—अथ गण्डमालायां काञ्चनारत्वच इति । एतद्योगद्वयं गण्डमालायां प्रशस्तम् । काञ्चनारो वृक्षविशेषः स्वनामप्रतीतः । शुण्ठीचूर्णमत्र प्रक्षेपः । वरुणोऽपि वृक्षभेदो विख्यातः । अत्र मधुप्रक्षेपे । तथेति गण्डमालाहरो योगोऽयम् ॥ १२४ ॥

**गू०**—काञ्चनारः वृक्षविशेषः तस्य त्वक्क्वाथः गण्डमालां नाशयेदिति सम्बन्धः ॥ १२४ ॥

**अथ शाखोटक्वाथः श्लीपदे मेदोरोगे च—**

**शाखोटवल्कलक्वाथं गोमूत्रेण युतं पिबेत् ।**
**श्लीपदानां विनाशाय मेदोदोषनिवृत्तये ॥ १२५ ॥**
**पुनर्नवावरुणयोः क्वाथोऽन्तर्विद्रधिं जयेत् ।**
**तथा शिग्रुभवः क्वाथो हिङ्गुसैन्धवसंयुतः ॥१२६॥**

**दी०**—अथ श्लीपदरोगे शाखोटेति । शाखोटः प्रसिद्धः 'सिहोरो' इति लोके, गोमूत्रं प्रक्षेपे । एतच्च कफश्लीपदे प्रायशो योज्यम् । अथ विद्रधौ पुनर्नवेति अत्र श्वेतवर्षाभूः तस्या मूलं, वरुणस्य त्वक् । अयं योगोऽन्तर्विद्रधौ अपक्वे योज्यः । **अपरयोगमाह**—तथेत्यादि । शिग्रुः शोभाञ्जनकः । हिङ्गुसैन्धवसंयुत इति व्यवहारात् प्रक्षेपे । हिङ्गु रक्तिकाचतुष्टयं, सैन्धवं माषैकं प्रत्यूहोपयोगित्वात् ॥ १२५ ॥ १२६ ॥

**गू०**—शाखोटकः हिंगोटः तस्य वल्कलक्वाथं गोमूत्रेण युतं श्लीपदानां विनाशाय तथा मेदोदोषनिवृत्तये पिबेत् । अथ पुनर्नवादिरन्तर्विद्रधौ-पुनर्नवावरुणयोः क्वाथस्तथा शिग्रुभवः क्वाथोन्तर्विद्रधिं जयेत्, किंभूतः? हिङ्गुकल्केन संयुतः ॥ १२५ ॥ १२६ ॥

**अपरमपि विद्रधौ वरुणादिकयोगमाह—**

**वरुणादिगणक्वाथमपक्वे मध्यविद्रधौ ।**
**ऊषकादिरजोयुक्तं पिबेच्छमनहेतवे ॥ १२७ ॥**
**वरुणो बकपुष्पश्च बिल्वापामार्गचित्रकाः ।**
**अग्निमन्थद्वयं शिग्रुद्वयं च बृहतीद्वयम् ॥ १२८ ॥**

१–साण्टी । २–रासना । ३–खरहटी ।

१–मोलेटी । २–कचनारः ।

**सौरेयकत्रयं मूर्वा मेषशृङ्गी किराततकः ।**
**अजशृङ्गी च बिम्बी च करञ्जश्च शतावरी ॥१२९॥**
**वरुणादिगणक्वाथः कफमेदोहरः स्मृतः ।**
**हन्ति गुल्मं शिरःशूलं तथाभ्यन्तरविद्रधीन् १३०**

**दी०**—वरुणादिगणेति । वरुणादिगणः अत्रैवाग्रे वक्ष्यमाणोऽस्ति । ऊषकादिर्ग्रन्थान्तरादवगन्तव्यः । स यथेति ग्रहणात् वरुणादिकयोगमाह—वरुण इत्यादि । एवं वरुणादिक्वाथो विद्रधौ प्रशस्तः । स च ऊषकादिगणरजसा प्रक्षिप्तः पूर्वं कथित एव । वरुणः प्रसिद्धः, बकपुष्पः काकई इति लोके । बिल्वः, अपामार्गः शिखरीप्रतीतः । अग्निमन्थद्वयमिति तर्कारी, तस्य भेदोऽरणिः । शिग्रुद्वयमिति शिग्रु मधुशिग्रु च हरितरक्तभेदाभ्यां । बृहतीद्वयमिति कण्टकारीद्वयम्, तेन लघुकण्टकारिका बृहती च । सौरेयकत्रयमिति सहचरत्रयम् । तच्च पुष्पभेदेन भिन्नं विख्यातमेव । मूर्वा चोरस्नायुः, मेषशृङ्गी वल्लीसंज्ञा प्रसिद्धा । मेढाशृङ्गीति लोके । किराततकः भूनिम्बः, अजाशृङ्गी कर्कटाख्या । बिम्बीति विरौती लोके, सा च पीलुपर्णी कथिता, करञ्जो बृहत्करञ्जो वृक्षविशेषः । ऊषकादिगणो यथा—"ऊषकसैन्धवशिलाजतुकासीसद्वयहिङ्गुगुग्गुलु-तुत्थकश्च" इति गणोऽयं ग्रन्थान्तराद्बोद्धव्यः । एतद्व्यस्तं वा प्रक्षेपे प्रशस्तम् । अयं क्वाथो मेदःकफजे विद्रधौ विहितः । वरुणादिगणस्य कफमेदोविशेषत्वात् ॥ १२७–१३० ॥

**गू०**—वरुणादिगणो यथा—वरुणः, बकपुष्पः अगस्तिवृक्षः, बिल्वः, अपामार्गः, हिङ्गुः, चित्रकः, अग्निमन्थः अरणिः तद्द्वयं। शिग्रुः शोभाञ्जनः, तदपि द्वयं द्विप्रकारं। सौरेयकत्रयं तत्र श्वेतपीतकृष्णभेदैः मूर्वा धनुर्गुणा मेषशृङ्गी, किराततकः भूनिम्बः, अजशृङ्गी कर्कटशृङ्गी, बिम्बकरञ्जौ, शतावरी अयं वरुणादिगणः मेदोरोगादिहरः ॥

**अथ ऊषकादिगणः** । ऊषकः क्षारमृत्तिका वाराणसीसमीपे बहडादेशे बाहुल्येन भवति । अन्ये तद्भवद्रव्यमाहुरिति डल्हणः । कासीसद्वयमेकलवणरसं श्वेतं, द्वितीयं पुष्पकासीसं ईषत्पीतं तुवररसं तद्भेद एव, तुत्थं खपरिकातुत्थं, खपरिया इति लोके । अन्ये मयूरग्रीवमाहुः । कासीसद्वयं तथा शुद्धं निर्विमलं कृत्वा मेलनीयम् , शिलाजतु सत्वं, शेषं सुगमं; यद्वा कासीसतुत्थाभावे तद्गणे द्रव्यान्तरं देयम् ॥ १२७–१३० ॥



### खदिरादिर्भगन्दरे—

**खदिरत्रिफलाक्वाथो महिषीघृतसंयुतः ।**
**विडङ्गचूर्णयुक्तश्च भगन्दरविनाशनः ॥ १३१ ॥**

**दी०**—अथ भगंदरे खदिरेति । खदिरादिक्वाथो महिषीघृतप्रक्षिप्तः विडङ्गचूर्णाऽवकीर्णश्च भगंदरे विहितः । खदिरः कण्टकीवृक्षः प्रतीतः तस्य सारो ग्राह्यः, महिषीघृतमिति व्याधिविहितत्वात् ॥ १३१ ॥

**गू०**—खदिरः खदिरसारः, विडङ्गः क्रिमिघ्नः स्पष्टमन्यत् ॥ १३१ ॥

### पटोलादिः उपदंशरोगे—

**पटोलत्रिफलानिम्बकिराततखदिरासनैः ।**
**क्वाथः पीतो जयेत्सर्वानुपदंशान्सगुग्गुलुः ॥ १३२ ॥**

**दी०**—अथोपदंशे पटोलेति । अत्रारिष्टो निम्बः, असनो वृक्षविशेषः पीतसारः, गुग्गुलुरत्र प्रक्षेपे माषचतुष्टयं व्यवहारात् । सर्वानिति पञ्चप्रकारान् ॥ १३२ ॥

**गू०**—पटोलपत्रं, त्रिफला, निम्बः, किराततो भूनिम्बः, खदिरसारः, असनो विजयसार एषां क्वाथ उपदंशं फिरङ्गवातं पञ्चप्रकारं जयेत् । गुग्गुलुः कनकाभस्तस्य मानुष्ये प्रयोगात्; कनकाख्यो मनुष्याणां हितकरत्वात् ॥१३२॥

### अमृतादिर्वातरक्ते—

**अमृतैरण्डवासानां क्वाथ एरण्डतैलयुक् ।**
**पीतः सर्वाङ्गसंचारि वातरक्तं जयेद्ध्रुवम् ॥ १३३ ॥**

**दी०**—अथ वातरक्ते योगद्वयमाह—अमृतेति । एष अमृतादिक्वाथः एरण्डतैलप्रक्षिप्तः अमृता गुडूची वासा आटरूषकः । सर्वाङ्गसञ्चारीति सर्वशरीरप्रसरणे क्षमं । ध्रुवमिति ग्रहणेन दृष्टफलोऽयं योगः । 'अमृतारग्वधवृषैः क्वाथ' इति केचित् पठन्ति । अयमपि साधुः अन्यतो दर्शनात् । तथाहि 'वासागुडूचीचतुरङ्गुलानामेरण्डतैलेन पिबेत् कषायम् । क्रमेण सर्वाङ्गजमप्यशेषं जयेदसृग्वातभवं विकारम्' इति ॥ १३३ ॥

**गू०**—अमृता गुडूची, एरण्डः, वासा, एषां क्वाथ एरण्डतैलयुक्तः सर्वाङ्गसञ्चारि प्रसरणशीलं वातरक्तं जयेत् ॥ १३३ ॥

### अथ पटोलादिक्वाथो वातरक्ते—

**पटोलं त्रिफला तिक्ता गुडूची च शतावरी ।**
**एतत्क्वाथो जयेत्पीतो वातास्रं दाहसंयुतम् ॥१३४॥**

दी०—पटोलमिति । अयं पटोलादिक्काथो वातरक्ते साधुः । तिक्ता कटुरोहिणी, शेषं सुगमं । अयं योगः पित्तप्राये प्रायशः प्रचरति ॥ १३४ ॥

गू०—पटोलादीनां क्काथः पीतः सदाहं दाहसहितं वातास्रं वातरक्तं जयेत् ॥ १३४ ॥

**श्वेतकुष्ठे वाकुचीक्काथः ।**

**क्काथोऽवल्गुजचूर्णाढ्यो धात्रीखदिरसारयोः ।**
**जयेत्सुशीलितो नित्यं श्वित्रं पथ्याशिनां नृणाम् १३५**

दी०—अथ श्वित्रे क्काथोऽवल्गुजेति । असौ क्काथो नित्यं प्रतिदिनं, सुशीलितः सतताभ्यस्तः, पथ्याशिनां श्वित्रविहितपथ्याशिनाम् । अवल्गुजो बाकुचीति शब्दः वाच्यद्रव्यविशेषः तस्य चूर्णं प्रक्षेपे । धात्री आमलकीफलानि ॥ १३५ ॥

गू०—अवल्गुजचूर्णाढ्यो धात्रीखदिरसारयोः क्काथः नित्यं सुशीलितः पथ्याशिनां नृणां मनुष्याणां श्वित्रं श्वेतकुष्ठं जयेत् । धात्री आमलकी, अवल्गुजो बाकुची ॥ १३५ ॥

**रक्तकुष्ठादौ लघुमञ्जिष्ठादिक्काथः ।**

**मञ्जिष्ठा त्रिफला तिक्ता वचा दारुनिशामृता ।**
**निम्बश्चैषां कृतः क्काथो वातरक्तविनाशनः ॥१३६॥**
**पामाकपालिकाकुष्ठरक्तमण्डलजिन्मतः ।**

दी०—अथ कुष्ठादौ क्कथनद्वयमाह—मञ्जिष्ठेति । अयं लघुमञ्जिष्ठादिको योगः । तत्र दारुनिशा दारुहरिद्रा, अमृता गुडूची, एके दारु निशेति द्रव्यद्वयं व्याख्यानयन्ति तेन दारु देवदारुः, निशा हरिद्रा, एतदपि व्यवहरन्ति पामादयोऽपि कुष्ठस्यैव भेदाः ॥१३६ ॥

गू०—मञ्जिष्ठादिर्वातरक्तकुष्ठादौ—तिक्ता कटुकी, दारुनिशा दारुहरिद्रा, अमृता गुडूची, स्पष्टमन्यत् । कपालिका रोगविशेषः ॥ १३६ ॥

**बृहन्मञ्जिष्ठादिः सर्वकुष्ठे—**

**मञ्जिष्ठामुस्तकुटजगुडूचीकुष्ठनागरैः ॥ १३७ ॥**
**भार्ङ्गीक्षुद्रावचानिम्बनिशाद्वयफलत्रिकैः ।**
**पटोलकटुकीमूर्वाविडङ्गासनचित्रकैः ॥ १३८ ॥**
**शतावरीत्रायमाणाकृष्णेन्द्रयवासकैः ।**
**भृङ्गराजमहादारुपाठाखदिरचन्दनैः ॥ १३९ ॥**
**त्रिवृद्वरुणकैरातबाकुचीकृतमालकैः ।**
**शाखोटकमहानिम्बकरञ्जातिविषाजलैः ॥ १४० ॥**
**इन्द्रवारुणिकानन्तासारिवापर्पटैः समैः ।**
**एभिः कृतं पिबेत्क्काथं कणागुग्गुलुसंयुतम् ॥ १४१ ॥**
**अष्टादशसु कुष्ठेषु वातरक्तार्दिते तथा ।**
**उपदंशे श्लीपदे च प्रसुप्तौ पक्षघातके ॥ १४२ ॥**
**मेदोदोषे नेत्ररोगे मञ्जिष्ठादिः प्रशस्यते ।**

दी०—अपरमप्याह—मञ्जिष्ठेति । बृहन्मञ्जिष्ठादिसंज्ञकोऽयं क्काथः प्रसिद्धः । अत्र कुटजो वृक्षविशेषः तस्य त्वक् । निशाद्वयं हरिद्राद्वयम् । मूर्वा चोरस्नायुः, असनो वृक्षविशेषः । त्रायमाणा स्वनामप्रसिद्धा । कृष्णा पिप्पली, वासकः आटरूषकः । भृङ्गराजः केशरञ्जनः, 'बमैना' इति प्रसिद्धः । महादारु देवदारुः, चन्दनं रक्तचन्दनं, त्रिवृत् निःसृता, कैरातो भूनिम्बः, शाखोटको वृक्षविशेषः प्रसिद्धः । महानिम्बो निम्बार्कः, 'बका' इति लोके प्रतीतः । करञ्जो बृहत्करञ्जः, जलं वालकं, अनन्ता यवासकः, सारिवा आस्फोता, सा द्विविधा श्वेता कृष्णा भेदाभ्यां । शुक्ला जम्बुवत्पत्रा व्रततिः, कृष्णा कलहंसवत्पत्रा सुगन्धा । शेषं सुबोधम् । एभिर्मञ्जिष्ठादिद्रव्यैः समैः सममानैः कृतं साधितं क्काथमित्यर्थः । कणागुग्गुलुसंयुतमिति कणाचूर्णं गुग्गुलुश्च प्रक्षेपे साधुः ॥ १३७–१४२ ॥

गू०—अयं मञ्जिष्ठादिः कुष्ठादौ प्रशस्यते उचितो भवति । (उषवो बीजकः?) त्रिवृत् निःसृता, वरुणः प्रसिद्धः, कैरातो भूनिम्बः, बाकुची, कृतमाल आरग्वधः, अनन्ता यवासा, सारिवा अनन्तमूलं यद्वा उत्तरापथे 'सारिस' इति सुगन्धिद्रव्यं, कणा पिप्पली ॥ ॥ १३७–१४२ ॥

**पथ्यादिषडङ्गक्काथः शिरोरोगे नेत्ररोगादौ च—**

**पथ्याक्षधात्रीभूनिम्बैर्निशानिम्बामृतायुतैः ॥१४३॥**
**कृतः क्काथः षडङ्गोऽयं सगुडः शीर्षशूलहृत् ।**
**भ्रूशङ्खकर्णशूलानि तथार्धशिरसो रुजम् ॥ १४४ ॥**
**सूर्यावर्तं शङ्खकं च दन्तपातं च तद्रुजम् ।**
**नक्तान्ध्यं पटलं शुक्रं चक्षुःपीडां व्यपोहति ॥१४५॥**

दी०—अथ शिरोरोगे पथ्यादिकं योगमाह—पथ्या इति । पथ्या हरीतकी, अक्षो विभीतकः, धात्री आ-

१–'ऽपि साध्यः' पा० । २–'प्रशस्तः' पा० ।

१–'घमरा' पा० । २–निशोथ । ३–नास्ति 'ख' पुस्तके । ४–'ह्वा' पा० ।

मलकी, भूनिम्बः कैरातः, निशा हरिद्रा, अमृता गुडूची, निम्बः प्रतीतः । अयं षडङ्गसंज्ञः, षट् अङ्गानि यस्य स तथा । अत्र त्रिफला एकमङ्गं षष्ठमङ्गं गुडमिति गुडोऽत्र प्रक्षेपे साधुः । अयमपि सायमुपयोज्यः, प्रायेण ऊर्ध्वजत्रुगतरोगहरत्वात् । शीर्षशूलं शिरोव्यथा । भ्रूशूलं शङ्खशूलं कर्णशूलमिति च । तद्वजमिति दन्तशूलं । शुक्रमिति नेत्रपुष्पम् ॥ १४३-१४५ ॥

गू०—पथ्यादि । अमृतायुतः (कृतः) क्वाथः षडङ्गो भवति गुडेन सह वर्तते इति सगुडः; सगुडेति प्रक्षिप्तगुडः गुडस्य पक्षैकद्रव्यत्वात् । स षडङ्गः शीर्षशूलहा स्यात् । तथा भ्रूशङ्खकर्णशूलान् व्यपोहति । शङ्खः कपालैकदेशः, सूर्यावर्तः सूर्योदयादारभ्य शूलं, शङ्खकमेकादशशिरोरोगेऽभिहितं, दन्तपातं दन्तशूलं तद्वजं दन्तरुजं । नक्तान्ध्यं रात्रौ दृष्ट्यभावलक्षणं न दिवा, पटलं पटलगतनेत्ररोगः, शुक्रं नेत्रपुष्पं चक्षुः पीडां चक्षुर्व्यथां एतान् व्यपोहति । कः? पथ्यादिः । पथ्या हरीतकी, अक्षो विभीतकः, धात्री आमलकी, भूनिम्बः किरातकः, निशा हरिद्रा, निम्बो निम्बः, अमृता गुडूची एतैर्युतः षडङ्गो गुडोपरि प्रक्षिप्यते । षट् अङ्गानि यस्यासौ षडङ्ग इति विग्रहे कृते पथ्यादीनां सप्तकत्वात् गुडेन सहाष्टकत्वाच्च षडङ्गः, यदि पथ्यादिधात्र्यन्तानां त्रिफला क्रियते त्रिफला एकत्वेन गम्यते तदा पञ्चाङ्गत्वात् गुडस्य प्रक्षेपकत्वाच्च षडङ्गः, अथच त्रिफलेत्युक्ते औषधत्रयस्य ग्रहणं नैकस्य । तथाच सुदर्शनचूर्णे—त्रिफला रजनीयुग्ममित्यत्र त्रिफलेत्युक्ते हरीतक्यामलकविभीतकं गृह्यते; नवायसचूर्णे च "चित्रकं त्रिफला मुस्तं विडङ्गत्र्यूषणानि च । नव भागानि चैतानि नवभागा हतायसः" इत्यत्र त्रिफलाया औषधत्रयं; तथाच कैशोरगुग्गुलौ वनमहिषलोचनोदरसन्निभवर्णस्य गुग्गुलोः प्रस्थं संक्षिप्य तोयराशौ त्रिफलाममृतां यथोक्तपरिमाणां त्रिफलामिति प्रत्येकं प्रस्थं मतम् । तथाच प्रमाणम्—'प्रत्येकं त्रिफला प्रस्था जलं तत्र-षडाष्टकम्' इति । तस्मात्त्रिफलेऽपि सप्तकत्वे सिद्धे संज्ञापरोयं षडङ्गशब्दः । यथा षण्णां यूषः षड्यूषः इति वक्तव्ये षड्यूषः संज्ञापरः । तथान्यान्येव खण्डखाद्यचन्द्रोदयमृगाङ्कादयः संज्ञापरा दृश्यन्ते । तथाच चक्रनिदानमधुकोशे लिखितं अन्त्रोदरावेष्टा हृदया महाकुहा एते नामविशेषाः केचित्सान्वयाः व्यवहारार्थं पूर्वाचार्यैः प्रणीताः, यस्तु वङ्गसेनादिभिर्नेत्ररोगे षडङ्गानि यस्येति व्युत्पत्त्या लिखितः सोऽस्माद्विलक्षणः, तथाचोक्तं "विभीतकशिवाधात्रीपटोलारिष्टवासकैः । क्वाथो षडङ्गकरणं" इति । किमर्थमुच्यते? पथ्यायुक्तेऽपि अस्य षडङ्गकरणं ऋषिप्रणीतसंज्ञाप्रतिपादनार्थम् ॥ १४३-१४५ ॥

## अथ वासादिर्नेत्ररोगे—

**वासाविश्वामृतादार्वीरक्तचन्दनचित्रकैः ।**
**भूनिम्बनिम्बकटुकापटोलत्रिफलाम्बुदैः ॥ १४६ ॥**
**यवकालिङ्गकुटजैः क्वाथः सर्वाक्षिरोगहा ।**
**वैस्वर्यं पीनसं श्वासं नाशयेदुरसः क्षतम् ॥१४७॥**

दी०—अथानन्तरमक्षिरोगे वासेति । एक एव वासादिको गणः अक्षिरोगे प्रशस्तः । वासा आटरूषकः, विश्वं शुण्ठी, अमृता गुडूची, दार्वी दारुहरिद्रा, कटुका तिक्तरोहिणी, समासान्तत्वात् कटुकाया ह्रस्वत्वं च । पटोलः कुलकः तस्य पत्राणि, अम्बुदो मुस्तं, यवोऽन्नविशेषः निजनामविख्यातः, स च निस्तुषो ग्राह्यः । कालिङ्ग इन्द्रयवः, कुटजो वत्सकत्वक् । अयं प्रातरेव योज्यः कषायत्वात् । तथाह्युक्तम्—'वासा घनं निम्बपटोलपत्रं तिक्तामृता चन्दनवत्सकं च । कालिङ्गदार्वीदहनं च शुण्ठी भूनिम्बधात्री विजया बिभीतकम् ॥ तथा यवाः क्वाथमथाष्टभागिकं पिबेदिमं पूर्वदिने कषायम् । तैमिर्यकण्डूं पटलार्बुदं च शुक्रं तथा सव्रणमव्रणं च ॥ निहन्ति दाहं सरुजं सरागं सर्वान् निहन्त्यक्षिगतांश्च रोगान्' इति । तत्र वैस्वर्यं विकृतस्वरत्वं, यवोऽत्र नेत्ररोगविहितत्वात् कथितः ( तथाह्युक्तं—'त्रिफला घृतं मधु यवा पादाभ्यङ्गः शतावरी मुद्गाः । चक्षुष्यः संक्षेपाद्वर्गः कथितो भिषग्भिरयम्' ) ॥१४६-१४७॥

गू०—विश्वं शुण्ठी, अमृता गुडूची, दार्वी दारुहरिद्रा, भूनिम्बः प्रसिद्धः, त्रिफला हरीतक्यामलकबिभीतकानि, अम्बुदो मुस्ता, यवाः, कालिङ्गः इन्द्रयवः, कुटजः वत्सकत्वक् । अयं क्वाथः वासादिः सर्वाक्षिरोगहा भवति तथा वैस्वर्यादिकं नाशयेच्च । वैस्वर्यं स्वरभङ्गः, पीनसं नासारोगः, उरसः क्षतं उरःक्षतम् ॥ ॥ १४६-१४७ ॥

## अथामृतादिर्नेत्ररोगे—

**अमृतात्रिफलाक्वाथः पिप्पलीचूर्णसंयुतः ।**
**सक्षौद्रः शीलितो नित्यं सर्वनेत्रव्यथां जयेत् ॥१४८**

१-नास्ति 'ख' पुस्तके । २-कूडा हि. भा. ।

**दी०**—अपरमपि नेत्ररोगे प्रयोगमाह—अमृतेति। अमृतादिकाथोऽयं सकलनेत्रामये प्रशस्तः। अमृता गुडूची, त्रिफला हरीतक्यादिकं पिप्पलीचूर्णं प्रक्षेपे। सक्षौद्रमिति मध्वपि प्रक्षेपे साधु। अतएव शीतलो हिमस्पर्शः मध्वविरोधात्। नित्यमिति सार्वकालीनमिदमित्यर्थः ॥ १४८ ॥

**गू०**—त्रिफला हरीतक्यादिका अमृता त्रिफलाक्वाथे पिप्पलीचूर्णस्य प्रक्षेपः मधु क्षौद्रं मधुसहितः नित्यं शीलितः अभ्यस्तः क्वाथः सर्वनेत्रव्यथां पीडां जयेत् ॥ १४८ ॥

**पञ्चवल्कलक्वाथो व्रणक्षालनादौ—**

**अश्वत्थोदुम्बरप्लक्षवटवेतसजं शृतम्।**
**व्रणशोथोपदंशानां नाशनं क्षालनात्स्मृतम् ॥ १४९ ॥**

**दी०**—अथ व्रणेष्वपि क्षालनार्थं कषायमाह—अश्वत्थेति। अश्वत्थादीनां पञ्चानामत्र वल्कलं ग्राह्यम्। अयं षडङ्गपानीयेन साध्यः। क्षालनं प्रक्षालनं व्रणस्य। इति क्वाथसमूहोऽभिहितः ॥ १४९ ॥

**गू०**—अश्वत्थः पिप्पलः, उदुम्बरः यैक्षवृक्षः, प्लक्षः पैर्कटीवृक्षः, वटः, वेत एषां क्वाथः, व्रणानां शोथानाम्, उपदंशो मेदोरोगः क्षालनान्नाशनः। मुखरोगे जातीपत्रादिक्वाथः। शेषं सुगमम्। इति क्वाथाः ॥ १४९ ॥

इति क्वाथप्रकथनम्।

---

इदानीं तेद्भेदान्**प्रमथ्या**दीनाह—तस्याः पूर्वं परिभाषां कथयति—

**प्रमथ्या प्रोच्यते द्रव्यपलात्कल्कीकृताच्छृतात्।**
**तोयेऽष्टगुणिते तस्याः पानमाहुः पलद्वयम् ॥ १५० ॥**
**सा यथा—मुस्तकेन्द्रयवैः सिद्धा प्रमथ्या द्विपलोन्मिता।**
**सुशीता मधुसंयुक्ता रक्तातीसारनाशिनी ॥ १५१ ॥**

**दी०**—प्रमथ्येति। द्रव्यपलादिति कल्कार्थं द्रव्यस्य पलप्रमाणम्। कल्कीकृतादिति दृषदि पेषितात्, पेषणमत्र जलेनानुक्तत्वात्। अष्टगुणिते तोये द्रव्यभागापेक्षयाऽष्टगुणपानीये शृता क्वथिता पलद्वयमित्यनेन चतुर्थांशावशेषितं ग्राह्यम्। अथ या प्रमथ्या सा कीदृशीति विवक्षायामाह—सा यथेति—ग्रहणेन तामेव प्रकटयन्नाह—मुस्तकेति। इन्द्रयवं कुटजबीजं। सिद्धेत्यनेन पूर्वं कल्किता पश्चात् क्वथितेत्यर्थः। द्विपलोन्मितेति पाननिमित्तम्। सुशीता हिमस्पर्शा अतएव मधुप्रक्षिप्ता। प्रक्षेपद्रव्याणामपि परिमाणं पूर्ववत् ज्ञातव्यम् ॥ १५०–१५१ ॥

**गू०**—अथ प्रमथ्याविधिज्ञानार्थं अत्रैव प्रमथ्यादय उच्यन्ते। द्रव्यपलात्कल्कीकृताज्जलेन सह पिष्टात् अष्टगुणिततोये शृतात् सा प्रमथ्या मण्डविशेषः प्रोच्यते तस्याः पानफलमाह। सा यथा सुगमम् ॥ १५०–१५१ ॥

इति प्रमथ्या।

---

**इदानीं यवागूपरिभाषामाह—**

**साध्यं चतुष्पलं द्रव्यं चतुःषष्टिपलेऽम्बुनि।**
**तत्क्वाथेनार्धशिष्टेन यवागूं साधयेद्घनाम् ॥ १५२ ॥**
**सा यथा—आम्राम्रातकजम्बूत्वक्कषाये विपचेद्बुधः।**
**यवागूं शालिभिर्युक्तां तां भुक्त्वा ग्रहणीं जयेत् १५३**

**दी०**—साध्यमिति। इयं द्रव्यक्वाथे तण्डुलादिभिः परिपाचिका यवागूशब्दवाच्या। चतुःषष्टिपलेऽम्बुनीति द्रव्यभागात् षोडशगुणं पानीयं देयमित्यर्थः। घनामित्यनेन शाल्यादिना साधयेत् यावत् द्रवरहिता स्यात्। अतएव तण्डुलादीनां परिमाणमनुमानतो निरूपणीयम्। ननु अन्यप्रक्रियोक्ताया मानम्। यथा—"पञ्चकोलेन संसिद्धा यवागूर्दीपनी तथा। बलामूलकषायेण साधिता ग्राहिणी मता" इति। अत्रापि मानं दोषाद्यपेक्षयानुमानतो निरूपणीयम्। अत्र चतुःपलग्रहणं यत् तत् सामान्यं विशेषतो न्यूनमपि दृश्यते। तथाच तन्त्रान्तरे—"वृद्धवैद्याः पलं द्रव्यं ग्राहयन्त्याढकेऽम्भसि। भेषजस्यातिबाहुल्यात् कदाचिदरुचिर्भवेत्" इति। अथ सा यथेत्यनेन तस्याः स्वरूपमाह—आम्रेति। आम्रो वृक्षविशेषो विख्यातः आम्रातकस्तद्भेदः, राजाम्र इति केचित्। जम्बूः प्रसिद्ध एव, एषां त्वक् छल्ली ग्राह्या कषाय इति ग्रहणेन स्वरसादयोऽपि पञ्चकषायास्तैरपि कृतायां न दोषो व्यवहारात्। यतः—पञ्चकोलबलादीनां कल्करसेनैव साधिता बहवो यवागवो दृश्यन्ते। बाहुल्यं च द्रव्यगुणावल्यामुक्तं यथा—"यैर्यैरेवौषधगुणैर्यवागूः साधुसाधिता। तांस्तानेवौषधगुणान् पुष्णाति विधियोजिता"

१–गूलर। २–पिलखन। ३–जातिपत्रादिक्वाथः त्रुटितः प्रतीयते, तद्यथा—'जातीपत्रामृताद्राक्षायासदार्वीफलत्रिकैः। क्वाथः क्षौद्रयुतः शीतो गण्डूषो मुखपाकनुत्' इति भावप्रकाशे। ४–क्वाथभेदानित्यर्थः।

१–जले पा०।

इति बुध इति ग्रहणेनान्नादिपरिमाणेन रन्धनविधौ दक्ष इत्यर्थः ॥ १५२ ॥ १५३ ॥

**गू०**—अथ यवागूः चतुष्पलं द्रव्यं चतुःषष्टिपलेऽम्बुनि जले साध्यं अर्धशिष्टेन क्वाथेन च यवागूं साधयेत् । सा यथा—आम्रं, आम्रातकं अम्बरातका अम्बू प्रसिद्धः, एषां त्वक् चतुःषष्टिपले जले साध्यं अर्धशिष्टे जले शालितण्डुलचतुष्पलसाध्यं सा यवागूः भवति तां भुक्त्वा ग्रहणीं जयेत् ॥ १५२ ॥ १५३ ॥

इति द्रव्यकृतयवागूः ॥

## संप्रति यूषमाह—

**कल्कद्रव्यपलं शुण्ठी पिप्पली चार्धकार्षिकी ।**
**वारिप्रस्थेन विपचेत्स द्रवो यूष उच्यते ॥ १५४ ॥**

### सप्तमुष्टियूषः ।

**स यथा—कुलत्थयवकोलैश्च मुद्गैर्मूलकशुण्ठकैः ।**
**शुण्ठीधान्याकयुक्तैश्च यूषः श्लेष्मानिलापहः॥१५५॥**
**सप्तमुष्टिक इत्येष संनिपातज्वराञ्जयेत् ।**
**आमवातहरः कण्ठहृद्वक्त्राणां विशोधनः ॥ १५६ ॥**

**दी०**—अयं द्रव्यकृतयूषोऽपि विख्यात एव । कीदृशः ? तत्परिभाषामप्यादावाह—कल्कद्रव्यमिति । कल्कार्हं द्रव्यं तच्च धान्यमूलकशुण्ठिकादिकं । यथा शुण्ठी पिप्पली चार्धकार्षिकी प्रत्येकं तीक्ष्णत्वात् । केचित्तु शुण्ठी पिप्पलीचूर्णं पश्चात् प्रक्षेपे क्षिपन्ति । वारिप्रस्थेनेति द्रैवद्वैगुण्यात् द्वात्रिंशत्पलमितेन जलेन स द्रवो द्रवप्रायः । अत्राप्यन्नपरिमाणादिकं यन्नोक्तं तदनुमानतो ग्राह्यं, यद्वा जलानुसारतो रन्धनविधिदक्षसकाशाद् दृष्टपरिपाकपरिपाट्या कुर्यादित्यर्थः । स यथेत्यनेन वक्ष्यमाणसप्तमुष्टिकयूषविधिं दर्शयन्नाह—कुलत्थ इति । अयं सप्तमुष्टिकसंज्ञको यूषः प्रसिद्ध एव । कुलत्थोऽन्नविशेषः, कोलं बदरफलं, मूलकशुण्ठकैरिति लघुमूलकशुण्ठैः शुण्ठमत्र नालग्रन्थिः । "मूलकपोतिकेति" केचिद् गुणप्राबल्यात् । तथाहि—"कटुतिक्तरसा हृद्या रोचनी वह्निदीपनी । सर्वदोषहरा लघ्वी कण्ठ्या मूलकपोतिका" इति । धान्याकं कुस्तुम्बुरु, सप्तमुष्टिक इत्यनेन कुलत्थादीनां मुष्टिसप्तकं ग्राह्यं, तन्त्रान्तरदर्शनात् यथा—'एकैकमुष्टिमाहृत्य' इत्यादि मुष्टिमुखान्तर्मुष्टिः नतु मुष्टिपलम्, अयमेव पक्षः कैश्चिदाद्रियते । चक्रस्तु प्रत्येकमेषां पलं ग्राह्यं सर्वसम्मतत्वात् । ननु सकलमेव द्रव्यं उचितमात्रयान्वितं, यत् क्वाथविधानेन यूषः क्रियते तदस्मत्संप्रदाये न मनोहरं, किंतु व्यवहारात् कर्तव्यविधौ यवकुलत्थमुद्गा अन्यद्रव्यापेक्षया बहु देयाः शुण्ठ्याश्चूर्णं पश्चात् कटुकार्थं तावद्देयं यावत् कटुमात्रं स्यात् । एवमम्लार्थं बदरादीनां दानं, क्वाथो धान्यकमूलकशुण्ठयोः पृथक् पलपरिमितयोश्च दानमिति कर्तव्यविधिः साधुः । कण्ठहृद्वक्त्राणां विशोधन इति । कण्ठविशोधनः हृद्विशोधनः वक्त्रविशोधनश्च । विशोधनं कफस्येत्यर्थः॥१५४–१५६॥

**गू०**—अथ यूषः । यूषे कल्कद्रव्यस्य पलं देयं, शुण्ठी पिप्पली चेदर्धकार्षिकसमुदिता देया, वारिप्रस्थेन विपचेत्, स द्रवः जलमात्रः यूषः उच्यते । स यथा कुलत्थादिभिर्युक्तैः कृतः यूषः श्लेष्मानिलापहो भवति यवोऽन्नविशेषः, कोलं बदरं, मूलकशुण्ठं शुष्कमूलकखण्डम् । शेषं सुगमम् । मुष्टिपलमात्रं, सप्तानां मुष्टिमात्रप्रयोगादयं सप्तमुष्टिकः । एके तु सप्तमुष्टिप्रयोगात्सप्तमुष्टिकाः, यतः यूषक्रियाया यूषद्रव्यस्य पलमात्रगृहीतत्वात् अन्ये सप्तानां 'एकैकमुष्टिमादाय पचेत्तोये चतुर्गुणे' तत्रैवं व्याख्यातं प्रत्येकमेषां सप्तमुष्टिमाहृत्य नतु मुष्टिः पलं, द्रव्यत्वादयमेव पक्षः श्रेष्ठः । चक्रस्तु प्रत्येकमेषां पलं द्रव्यबहुत्वं व्यवहारद्रव्यत्वान्न दोषः । इति सप्तमुष्टियूषः ॥ १५४–१५६ ॥

इति द्रव्यकृतयूषप्रक्रिया ॥

---

## इदानीं पानादिकल्पनामाह—

**क्षुण्णं द्रव्यपलं साध्यं चतुःषष्टिपले जले ।**
**अर्धशिष्टं च तद्देयं पाने भक्तादिसंविधौ ॥ १५७ ॥**

### षडङ्गपानम् ।

**सा यथा—उशीरपर्पटोदीच्यमुस्तनागरचन्दनैः ।**
**जलं शृतं हिमं पेयं पिपासाज्वरनाशनम् ॥ १५८ ॥**

क्षुण्णमिति । इयं पानादिकल्पनायाः परिभाषा । क्षुण्णं कुट्टितं, द्रव्यं व्याधिविहितं, साध्यं क्वथितम् । तदिति द्रवं अर्धावशेषितं जलमित्यर्थः । पाने इति पानस्वरूपे यथा वक्ष्यमाणं षडङ्गादिपानीयम् । भक्तादिसंविधाविति यूषरसयवाग्वादिरूपे । सा यथेति वाक्येन पानादिकार्थं प्रक्रियां प्रकटयति ग्रन्थकारः । उशीरेति । अयं

---

१–'अम्बाडा' हि. भा. । २–षोडशपलपरिमितेन जलेन स द्रवो द्रवप्रायः अत्रावपने परिमाणादिकं पा० ।

१–'सा' पानादिकल्पना इत्यर्थः । २–'विधि' पा० ।

षडङ्गसंज्ञकः । जलं पानीयं शृतं क्वथितं, हिमं शीतस्पर्शं, पेयमिति वारंवारम् यतः—'मुहुर्मुहुश्च तृट्छर्दिहिक्काश्वासगरेषु च' इति वचनात् । अत्रोदीच्यं वालकं, पानीयं शृतं क्वथितं, नागरं शुण्ठी, चन्दनं रक्तम् । एषां योगो ज्वरादौ युक्तः । तथाहि "षडङ्गादेः शृतं तोयं देयमादौ ज्वरस्य वै" ॥ १५७ ॥ १५८ ॥

**गू०**—अथ पानादिकल्पना । भक्तादिसंविधौ पाने भोजनादौ औषधपानार्थं । एतद्धिमलक्षणं ज्ञेयं । सा यथा उशीरादिभिः पूर्वक्रियाशृतं तोयं हिमं हिमसंज्ञं ज्ञेयं पिपासाज्वरनाशकं भवति । पर्पटः कटुपत्रः, उदीच्यं वालकं, स्पष्टमन्यत् ॥ १५७ ॥ १५८ ॥

इति पानादिकल्पना ॥

---

**ज्वरादौ उष्णोदकविधिं दर्शयन्नाह—**

**अष्टमेनांशशेषेण चतुर्थेनार्धकेन वा ।**
**अथवा क्वथनेनैव सिद्धमुष्णोदकं वदेत् ॥ १५९ ॥**
**श्लेष्मामवातमेदोघ्नं बस्तिशोधनदीपनम् ।**
**कासश्वासज्वरहरं पीतमुष्णोदकं निशि ॥ १६० ॥**

**दी०**—अष्टमेनेति । यत् केवलमेव पानीयमष्टमांशादिकल्पनया सिद्धं भवति तदुष्णोदकमिति संज्ञं वदेदिति । अंशशेषेणाष्टादिभिः प्रत्येकमभिसंबध्यते; तेन अष्टांशेन चतुर्थांशेनार्धांशेनेत्यर्थः । अंशस्त्वत्र क्वथनावशिष्टः । अथवेत्यनेन पक्षान्तरमाह । क्वथनेनैवेत्यादि । क्वथनमित्यत्र त्रिपादशेषमित्यर्थः । एतत् क्रियाचतुष्टयं दोषापेक्षयाभिहितम् । तथाहि—"तत्पादहीनं पित्तघ्नं तच्छेषमनिलापहम् । अर्धं क्षयकफहरं शेषं ग्राहि त्रिदोषजित्" इति । ननु यथैवं तर्हि सुश्रुतेन "तत्पादहीनवातघ्नमर्धहीनं तु पित्तजित् । कफघ्नं पादशेषं च पानीयं दीपनं स्मृतम्" इति कथमेतद्विपरीतमुक्तम्? । सत्यम् । आद्यः पक्षो व्यवहारी स च ज्वरादीनां दोषप्रकोपे प्रशस्तः, द्वितीयस्तु षड्ऋतुषु दोषापेक्षयाऽभिहितः । सुश्रुते उक्तं च "शारदं चार्धपादोनं पादहीनं तु हैमकम् । शिशिरे च वसन्ते च ग्रीष्मे पादावशेषितम् । विपरीतमृतुं दृष्ट्वा वार्षिकं चाष्टभागिकम्" इति । यद्विरोधपरिहारः कृतस्तत् साधुभिर्विचारणीयः अत्र विस्तरभयान्न लिखितः । सिद्धमिति यद्ग्रहणं लघूक्तिक्वथननिमित्तम् । यतः "यत् क्वाथ्यमानं निर्वेगं निष्फेनं निर्मलं तथा । शृतशीतं त्रिदोषघ्नं बाष्पान्तर्भावशीतलम्" इति । अन्यथा दोषकरः स्यात् । तथाहि—"धारापातेन विष्टम्भि दुर्जरं पवनाहृतम् । शृतशीतं पुनस्तप्तं तत्सर्वं दोषलं स्मृतम्" इति । अथोष्णोदकस्य निशि पीतस्य गुणमाह—कासेति । एतदुष्णोदकं यदा निशि पीतं तदा श्लेष्मादिकान् हन्तीति । उष्णोदकं वदेदिति । ईषदुष्णं उष्णोदकं कथितं । वातमेदोघ्नमिति वातघ्नं मेदोघ्नं च । श्लेष्मामवातमेदोघ्नमिति वा पाठान्तरम् । बस्तिशोधनं मूत्राशयशुद्धिकरं, दीपनमग्नेः । पीतमुष्णोदकमिति । ईषदुष्णं पीतम् । निशीति निशामुखे शयनकाले वा न तु सकलनिशायां मुहुर्मुहुः पानं तत्र निषेधपरत्वात् । तथाहि—"यथा दिवा तथा रात्रौ यदि तोयं पिबेन्नरः । भवेत् तत्र रसाधिक्यं तच्छेषाद्दोषकोपनम्" इति सत्यम् । एष स्वस्थे प्रसङ्ग इति वर्तते व्यवहारादातुरे न कुत्रचित् प्रतिषेधः । तथाह्युक्तम्—"पानीयं प्राणिनां प्राणा विश्वमेव च तन्मयम् । अतोऽत्यन्तनिषेधेन न क्वचिद्वारि वार्यते" इति ॥ १५९ ॥ १६० ॥

**गू०**—अथ ज्वरादौ उष्णोदकविधिः । अष्टमेनांशेन चतुर्थेन चतुर्थांशशेषे अर्धकेनार्धांशशेषेण अथवा क्वथनेन क्वथितमात्रेण सिद्धं उष्णोदकं वदेत् उष्णोदकं निशि पीतं श्लेष्मामवातादीन्हन्तीति योजना । अत्रानुक्तमपि ग्रन्थान्तरात् ज्वरादौ उष्णजलविधानमाह—कफवातज्वरा इति । कफज्वरे वातज्वरे कफवातज्वरे वा व्यस्ते समस्ते वा उष्णं अर्धावशिष्टं देयं, "अर्धावशिष्टतोयं यत् तदुष्णोदकमुच्यते" इत्युक्तत्वात् पित्तमद्यविषोत्थज्वरेषु तिक्तकैः स्मृतं शीतलं देयं, तिक्तकशृतस्तु षडङ्गकस्तरुणज्वरे तस्यैव विधानात्, तथाचोक्तं 'तिक्तपर्पटकोशीरचन्दनोदीच्यनागरैः । शृतशीतं जलं दद्यात्पिपासाज्वरशान्तये' । अयं षडङ्गस्तिक्तकः स्मृतः, अस्यैव तरुणज्वरे विधानमुक्तं सुश्रुते—"लङ्घनं कारयेत्काले यावनस्तिक्तको रसः । पाचनान्यप्यपक्वानां दोषाणां तरुणज्वरे" सुश्रुतादेतत् । स्वेदनं तरुणज्वरे निषिद्धमपि सन्निपातज्वरे विहितत्वादुक्तं कालोऽपि पावनत्वेन गृहीतस्तथा वातकः सप्तरात्रेणेत्यादि । अन्य एवमाहुः "पादशेषं च वातघ्नं अर्धशेषं च पित्तजित् । कफघ्नं पादशेषं स्यात्पानीयं दीपनं लघु" । इति मदनविनोदात् ॥ १५९ ॥ १६० ॥

इत्युष्णोदकविधिः ॥

इदानीं क्षीरपाकविधिमाह—

**क्षीरमष्टगुणं द्रव्यात्क्षीरान्नीरं चतुर्गुणम् ।**
**क्षीरावशेषं तत्पीतं शूलमामोद्भवं जयेत् ॥ १६१ ॥**

**पञ्चमूलपयः ।**

**(सर्वज्वराणां जीर्णानां क्षीरं भैषज्यमुत्तमम् ।**
**श्वासात्कासाच्छिरःशूलात्पार्श्वशूलात्सपीनसात् १६२**
**मुच्यते ज्वरितः पीत्वा पञ्चमूलीशृतं पयः ।**

**त्रिकण्टकपयः ।**

**त्रिकण्टकबलाव्याघ्रीगुडनागरसाधितम् ॥ १६३ ॥**
**वर्चोमूत्रविबन्धघ्नं कफज्वरहरं पयः ।)**

**दी०**—क्षीरमिति । क्षीरमत्र गव्यम् । अत्रानुक्तत्वात् । द्रव्यमिति शुण्ठीवितुन्नकादिकमन्यतो दर्शनात् । तथाहि—"शुण्ठीवितुन्नकैरण्डशृतं शूलहरं पयः" इति । कर्तव्यतास्य द्रव्याणां भागैकं यथा दोषापेक्षया परिमितं क्षीरस्य भागाष्टकं, पानीयं द्वात्रिंशद्भागयुतम् । एतत् सकलं क्वाथ्यक्षीरावशेषं वस्त्रेण संस्राव्य पिबेत् । पानमानं चास्य क्वाथवद्बोद्धव्यम् । दोषानुसारतो वा । आमोद्भवं शूलमिति । आमशूलं ननु आमवातजनितपीडां तत्र क्षीरस्य निषिद्धत्वात् । तदुक्तम्—"दधिमत्स्यगुडक्षीरपोतकीमाषपिष्टकम् । वर्जयेदामवातार्तो मांसमानूपजं तथा" इति । आमः अपरिपक्वोऽन्नरसः । तथाहि—"जठरानलदौर्बल्यादविपक्वस्तु यो रसः । स आमसंज्ञको देहे सर्वदोषप्रकोपजः" इति । केचिदत्रामशूलं परिणामजं शूलमाभनन्ति एतदपि सङ्गतम् । द्रव्यादिति सामान्यग्रहणेनान्येषामपि क्षीरयोगानां विधानमेव बोद्धव्यम् । यथा—"बस्तिशुद्धिकरावापं चतुर्गुणजलं पयः । आवारिनाशात् क्वथितं शुक्रोदावर्तनाशनम्" इति । एतदपि प्रसङ्गतो व्याचष्टे । अत्र बस्तिशुद्धिकराणि तृणपञ्चमूलीवीरतर्वादीनि आवाप इह क्षीरशोधनार्थं कल्कः । तथाह्युक्तम्—"कुशः काशः शरो दर्भ इक्षुश्चेति तृणोद्भवम् । पित्तकृच्छ्रहरं पञ्चमूलं बस्तिविशोधनम् ॥ एतत् सिद्धं पयः पीतं मेढ्रगं हन्ति शोणितम्" इति॥१६१-१६३॥

**गू०**—अथ क्षीरपाकविधिः । द्रव्यमौषधं तथाच **वृन्दः**—"पञ्चमूलीशृतं क्षीरं पिप्पली वापि तच्छृतं । शिंशिपा गण्डिका निम्बा धारोष्णं वा ज्वरापहम्" । शिंशिपाया गण्डिका न भिन्नं द्रव्यं शिंशिपायाः सुश्रुते सारो गृहीतः, तथाच 'उदकाद्द्विगुणं क्षीरं शिंशिपासारसंयुतं । क्वथितं क्षीरशेषं च सर्वज्वरगदापहम्' ॥१६१-१६३॥

इति क्षीरपाकविधिः ॥

---

संप्रति यवागूप्रभृतिकान्नप्रक्रियामाह—

**अथान्नप्रक्रियात्रैव प्रोच्यते नातिविस्तरात् ॥ १६४ ॥**
**यवागूः षड्गुणजले सिद्धा स्यात्कृशरा घना ।**
**तण्डुलैर्मुद्गमाषैश्च तिलैर्वा साधिता हिता ॥ १६५ ॥**
**यवागूर्ग्राहिणी बल्या तर्पणी वातनाशिनी ।**

**दी०**—अथान्नेति । अथेत्यनन्तरम् । अन्नप्रक्रियेति यवागूविलेपीपेयादिरूपा । अत्रास्मिन्ग्रन्थे नातिविस्तरात् संक्षेपमात्रात्, यतो विस्तरकथनं सर्वेषामप्यालस्यकरं भवति । तेषु पूर्वं यवागूविधिमाह-यवागूरित्यादि । षड्गुणे जले पानीये या सिद्धा सा यवागूशब्दवाच्या, षड्गुणमित्यन्नपरिमाणात् । एषा तण्डुलैरेव साध्या व्यवहारात् तथा साध्या यथा विरलद्रवा भवति । यतः—'यवागूर्विद्रवा' इति वचनात् । अस्या भेदः कृशरेति नाम्ना कथिता, सा घना द्रवरहिता इत्यर्थः । इयमपि तण्डुलादिभिः साधिता भवति अत्र मुद्गमाषैश्चेति चकारात् व्यस्तं ग्राह्यं तेन मुद्गसाधिता माषसाधिता वा । तिलान्यत्रोभयत्र योज्यानि । तन्त्रान्तरेऽपि तिलतण्डुलमाषकृता यवागूरेव कृशरा कथ्यते । केचिदनुक्तत्वात् तिलमाषतण्डुलानामत्र साम्यं मन्यन्ते, तन्न मनोहरम्, किन्तु व्यवहारात्तण्डुलानां भागद्वयं, माषस्य भागैकम्, अर्धभागिकं तिलानामिति । सकलेभ्यः षड्गुणजलमित्यर्थः । यवागूरिति सामान्येनास्या बहवो भेदाः सन्ति । तद्यथा दुग्धतण्डुलयवागूः, घृततण्डुलयवागूः, मांसतण्डुलयवागूः, फलकन्दतण्डुलयवागूरित्येताः सर्वा यवाग्वो द्रव्याऽनुसारतो गुणकराः साधनीयाश्च भवन्ति । इदानीं तस्या गुणमाह-यवागूरित्यादि । ग्राहिणी संग्राहिका अतीसारादीनां, बल्या बलकारिणी ओजोवृद्धिकरीत्यर्थः । तर्पणी धातूनां तृप्तिजननी । वातप्रणाशिनी चेति स्वभावात् ॥१६४॥१६५॥

**गू०**—अथान्नप्रक्रिया । षड्गुणे जले सिद्धा यवागूः स्यात् । ततः घना कृशरा स्यात्, सा तण्डुलैर्मुद्गमाषैश्च तिलैर्वा साधिता वातादीनां, कृशरान्नप्रकारभेदभिन्ना ॥ १६४ ॥ ६५ ॥

इत्यन्नप्रक्रियायां यवागूः ॥

---

१-प्रक्षिप्तम् । पञ्चमूलं—'बिल्वश्योनाकगाम्भारीपाटलागणिकारिका' इति ज्ञेयम् ।

अथ **विलेपी**विवरणं दर्शयन्नाह—

**विलेपी घनसिक्था स्यात्सिद्धा नीरे चतुर्गुणे ॥१६६**
**तर्पणी बृंहणी हृद्या मधुरा पित्तनाशिनी ।**

**दी०**—विलेपीति । या चतुर्गुणे नीरे पानीये सिद्धा निष्पन्ना सा विलेपीशब्दवाच्या । स्वरूपेण घनसिक्था भवति चतुर्गुणनीरत्वात् । चतुर्गुणमित्यत्र अन्नपरिमाणात् । इयमप्यत्र केवलं तण्डुलैः सिद्धेति रूढिः । असौ गुलहथीति लोके कथिता । गुणानप्यस्या दर्शयन्नाह—तर्पणीत्यादि । तर्पणी तृप्तिजनिका, हृद्येत्याह्लादकारिणी, मधुरा मिष्टरसा, अतएव पित्तविनाशिनि विहिता ॥ १६६ ॥

**गू०**—अथ विलेपीत्यादि स्पष्टम् ॥ १६६ ॥

इदानीं **पेयायूषाव**प्याह—

**द्रवाधिका स्वल्पसिक्था चतुर्दशगुणे जले ॥१६७॥**
**सिद्धा पेया बुधैर्ज्ञेया यूषः किंचिद्घनस्ततः ।**
**पेया लघुतरा ज्ञेया ग्राहिणी धातुपुष्टिदा ॥ १६८ ॥**
**यूषो बल्यस्ततः कण्ठ्यो लघुपाकः कफापहः ।**

**दी०**—द्रवाधिका इति । या चतुर्दशगुणे जले सिद्धा भवति सा पेया ज्ञेया । स्वरूपेण च सा द्रवाधिका स्वल्पसिक्था । केचित् स भक्तमण्ड इति वदन्ति । मण्डस्तु सिक्थरहित इति प्रसिद्धः । तथाहि—"यवागूः षड्गुणे तोये संसिद्धा विरलद्रवा । चतुर्गुणाम्बुसंसिद्धा विलेपी घनसिक्थका ॥ पेया सिक्थान्विता तोये चतुर्दशगुणे कृता । मण्डश्चतुर्दशगुणे सिद्धस्तोये ससिक्थकः" इति । यूषमप्याह—तत इति । तस्मात् पेयारूपद्रव्यात् यः किञ्चिद्घनसान्द्रो भवति स यूष इत्युच्यते । एष यूषः केवलमुद्गैः कृतः इति सामान्येनास्य केचित् । यतो मुद्गरस इति लोके अत्रापि चतुर्दशगुणं जलं देयम् । अन्नपरिमाणात् यूष इति सामान्येनास्य बहवो भेदाः सन्ति ते चाष्टादशगुणे जले साध्या इति तन्त्रान्तरीयमतम् । तथाहि "स्विन्नः साधितो यूषस्त्वष्टादशगुणे जले" इति । गुणमनयोर्वक्तुमाह—पेया लघुतरेत्यादि । लघुतरा अत्यर्थं लघुपाका, ग्राहिणी ग्राहिका अतिसारादीनां । ननु द्रवमन्नमतीसारे निषिद्धं । यदुक्तम् । "वर्जयेद्विदलं शूली कुष्ठी मांसं क्षयी स्त्रियम् । द्रवमन्नमतीसारी सर्वं च तरुणज्वरी" तत्कथं पेयाऽतीसारे विहिता ? उच्यते, अविहितद्रवाऽन्ननिषेधार्थं वाक्यमिदम्, पेयायवाग्वादिविहितमेव । तथाचोक्तं—सुश्रुते "कार्यं चानशनस्यान्ते प्रद्रवं लघुभोजनम्" इति । अत्र प्रद्रवं प्रकृष्टद्रवं, लघु यवाग्वादि । तथैव निषिद्धाचरणं भोजेनाऽप्युक्तम् "व्रणोदरस्थापनपातितानां प्रमेहिणां छर्द्यतिसारिणां च । द्रवं न दद्यादथवापि कोष्णं स्वल्पं हितं भेषजसंप्रयुक्तम्" इति । यूषोऽपि बल्यो बलकरः, कण्ठ्यः कण्ठे हितः, पाके लघुः कफापहश्च अत एवात्र मुद्गयूषः कृताकृतश्च कथितः । तथाहि "कफघ्नो दीपनो हृद्यः शुद्धानां व्रणिनामपि । उक्तः पथ्यतमश्चापि मुद्गयूषः कृताकृतः" इति ॥ १६७ ॥ १६८ ॥

**गू०**—पेयायूषौ कृतान्नभेदौ ॥ १६७ ॥ १६८ ॥

इति पेयायूषौ ॥

---

इदानीं **भक्तविधि**माह—

**जले चतुर्दशगुणे तण्डुलानां चतुष्पलम् ॥ १६९ ॥**
**विपचेत्स्रावयेन्मण्डं स भक्तो मधुरो लघुः ।**

**दी०**—जल इति । तण्डुलानां चतुष्पलं कुडवमितं ग्राह्यम् । चतुर्दशगुणे पानीये विपाच्य तद्द्रवं पानीयोऽवशिष्टः स भक्त इति प्रसिद्धः । गुणोऽपि रसे मधुरः, पाके लघुरिति । एतद्बहुजलपरिमाणं परिस्रुतार्थम् । ननु तन्त्रान्तरे भक्तं पञ्चगुणे साध्यमिति । तथाहि—"शृतं पञ्चगुणे भक्तं विलेपीति चतुर्गुणे" इति । तत्कथं चतुर्दशगुणमत्र जलम् ? उच्यते—भक्तं द्विविधं सुधौतप्रस्रुतम् अधौतास्रुतं च, यत् सुधौतप्रस्रुतं तच्च चतुर्दशगुणे जले साध्यम्, अधौतास्रुतं च पञ्चगुणे इति भावः । तथाचोक्तम्—"सुधौतप्रस्रुतं चोष्णं विशदं गुणवन्मतम् । अधौतप्रस्रुतं शीतं गुर्वरुच्यं कफप्रदम्" इति ॥ १६९ ॥

**गू०**—जल इति सर्वं सुगमम् ॥ १६९ ॥

अधुना **शुद्धम**ण्डमाह—

**नीरे चतुर्दशगुणे सिद्धो मण्डस्त्वसिक्थकः ॥१७०॥**
**शुण्ठीसैन्धवसंयुक्तः पाचनो दीपनः स्मृतः ।**

**दी०**—नीरे इति । चतुर्दशगुणे नीरे तण्डुलपरिमाणात् सिद्धो निष्पन्नः । असिक्थक इति सिक्थो भक्तावयवः तेन रहित इत्यर्थः । य ईदृशः मण्डसंज्ञया प्रसिद्धः । एष यदा शुण्ठीसैन्धवचूर्णेन प्रक्षिप्तस्तदा पाचन आमादीनाम्, दीपनो जठराग्नेश्च स्मृतः

कथित इत्यर्थः । अयमभृष्टतण्डुलैर्जनितः । अतएव शुद्धमण्डोऽभिहितः । यतो मण्डस्तन्त्रान्तरे त्रिविधो दर्शितः । तद्यथा "मण्डस्तु त्रिविधो ज्ञेय एकद्वित्रिपरिस्रुतः । लाजैर्भृष्टैरभृष्टैश्च तण्डुलैः परिसंस्कृतः । चतुस्त्रिंशद्गुणं भक्तात् पूर्वः पूर्वो लघुर्हितः" इति ॥ १७० ॥

इति शुद्धमण्डः ॥

---

अथाष्टगुणमण्डमाह—

**धान्यत्रिकटुसिन्धूत्थमुद्गतण्डुलयोजितः ॥ १७१ ॥**
**भृष्टश्च हिङ्गुतैलाभ्यां स मण्डोऽष्टगुणः स्मृतः ।**
**दीपनः प्राणदो बस्तिशोधनो रक्तवर्धनः ॥ १७२ ॥**
**ज्वरजित्सर्वदोषघ्नो मण्डोऽष्टगुण उच्यते ।**

**दी०**—धान्येति । धान्यादिभिर्द्रव्यैः संस्कृतो हिङ्गुतैलाभ्यां सह भृष्टो भर्जितः स मण्डोऽष्टगुणसंज्ञः कथितः । अत्र तण्डुलमुद्गयोर्दानमत्रप्रकरणादवगन्तव्यम् । तथाच तन्त्रान्तरे "सुतण्डुलानां प्रसृतिद्वयं च तदर्धमुद्गाः कटुकत्रयं च । कुस्तुम्बरीसैन्धवहिङ्गुतक्रैरेभिः समस्तैः क्रियते च मण्डः" इत्यादि । अत्र यत् शार्ङ्गधरेण तैलग्रहणं कृतं तत् भर्जनार्थं तण्डुलमुद्गयोः । अन्यत्राप्युक्तम् "तण्डुलैरर्धमुद्गांशैः किंचिद्भृष्टैः सुपाचितः । हिङ्गुसिन्धूत्थधनिकातक्रत्रिकटुसंस्कृतः ॥ ज्ञेयः सोऽष्टगुणो मण्डो ज्वरदोषत्रयापहः" इत्यादि । केचित् कर्तव्यविधौ चास्य कटुकत्रयचूर्णं पश्चात् प्रक्षेपे मनाग् देयमिति वदन्ति । स मण्ड इति स्थाने स भक्त इत्यपरे पठन्ति; तन्मते तु ईषत्सिक्थयुत इत्यर्थः, गतोऽयं पाठः । अष्टगुण इति यत् पूर्वं तानाह—दीपन इत्यादि । अग्नेर्दीपनः, प्राणदो बलकरः, बस्तिशोधनो बस्तिशुद्धिकरः, बस्तिर्मूत्राधारः, अतएव मूत्रलो विख्यातः । रक्तवर्धन इति शोणितवृद्धिकरः । ज्वरजित् सर्वज्वरहरः प्रभावात् । सर्वदोषघ्न इति वातपित्तकफानां प्रत्येकं हन्ता नतु सन्निपातज्वरहरः अष्टसंज्ञत्वात् । तथाच तन्त्रान्तरे "क्षुद्दीपनो बस्तिविशोधनश्च प्राणप्रदो रक्तविवर्धनश्च । ज्वरापहारी कफपित्तहन्ता वायुं जयेदष्टगुणो हि मण्डः" ॥ १७१ ॥ १७२ ॥

**गू०**—अथ मण्डः । असिक्थकः सिक्थरहितः धान्यादिभिर्योजितः हिङ्गुतैलाभ्यां भृष्टश्च स मण्डोऽष्टगुणः स्मृतः कथितः । अष्टौ दीपनादयो गुणा यस्य क्षुद्दीपनादयो ज्वरान्ताः पञ्च । सर्वदोषघ्न इति वातपित्तकफघ्नेति त्रितयं एवमष्टगुणः । तण्डुलं मुद्गं पलमात्रं, धान्यं त्रिकटुसिन्धूत्थं यथापरिमितम् । अन्येऽष्टगुणमण्डमेवाहुः, सुगममन्यत् ॥ १७१ ॥ १७२ ॥

इत्यष्टगुणमण्डः ॥

---

इदानीं **वाट्यमण्डमाह**—

**सुकण्डितैस्तथा भृष्टैर्वाट्यमण्डो यवैर्भवेत् ॥१७३॥**
**कफपित्तहरः कण्ठ्यो रक्तपित्तप्रसादनः ।**

**दी०**—सुकण्डितैरिति । अयं वाट्यमण्डो दलितयवगोधूमादिकृतो व्यक्त एव तथाऽपि किंचिद्व्याचष्टे सुकण्डितैरिति । मुसलादिभिरुलूखले सङ्कुट्टितैः तुषवर्जितैरित्यर्थः । तथा भृष्टैरिति भर्जितैः । तथेति ग्रहणेन यथा न दग्धैरित्यर्थः । ईदृशैः यवैः, यवोऽन्नविशेषः, बहुवचनत्वेन गोधूमादयो ग्राह्याः । सच कफपित्तहरः, कफहरः पित्तहरश्च । संयोगहरो वा । कण्ठ्य इति कण्ठरोगेभ्यो हितः । रक्तपित्तप्रसादन इति प्रकर्षेण सादयति इति सादनः कुपितास्रपित्तशान्तिकर इत्यर्थः, नतु रक्तपित्तप्रवृद्धिकरः । तथाहि "वाट्यमण्डो लघुर्ग्राही शूलानाहास्रपित्तजित्" इति । केचिदिति व्याख्यानयन्ति । अकुपितं रक्तपित्तं निर्मलं करोति स्वप्रकृतिस्थितं करोतीत्यर्थः । अपरे रक्तपित्तनिषूदन इति पठन्ति । तद्युक्तम् ॥ १७३ ॥

**गू०**—अथ वाट्यमण्डः । सुकण्डितैः कृतनिस्तुषैः भृष्टैर्यवैर्वाट्यमण्डः प्रकीर्तितः । कण्ठरोगेषु हितः रक्तपित्तप्रसादनः शमकः ॥१७३ ॥

इति वाट्यमण्डः ॥

---

अथ **लाजमण्डमाह**—

**लाजैर्वा तण्डुलैर्भृष्टैर्लाजमण्डः प्रकीर्तितः ॥ १७४ ॥**
**श्लेष्मपित्तहरो ग्राही पिपासाज्वरजिन्मतः ।**

इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायां चिकित्सास्थाने क्वाथकल्पनाध्यायो द्वितीयः ।

---

**दी०**—लाजैरिति । भृष्टशालिभवा लाजा इत्युच्यन्ते । तैः कृत्वा यः साधितः स लाजमण्डः कथितः । साधनमत्र पूर्ववत् ज्ञातव्यम् । अथवा भृष्टैस्तण्डुलैश्च कृतो यः सोपि लाजमण्डसंज्ञितः । अस्य गुणमाह—श्लेष्मपित्तहरः इत्यादि । श्लेष्महरः पित्तहरश्च । ग्राही संग्राहकः । पिपासाज्वरजिन्मत इति । पिपासा पातुमिच्छा, ज्वर

---

१—'युक्तस्तक्रेण' पा० ।

इति सामान्यग्रहणेनाष्टधा । अत्र लाजादीनां परिमाणं पूर्वमण्डवज्ज्ञातव्यम् । ननु यद्येवं तर्हि किमसौ पृथक् दर्शितः ? उच्यते, लाजमण्डसंज्ञादिज्ञापनार्थं पृथगुक्तम् । इति न दोषः ॥ १७४ ॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यमखण्डे क्वाथकल्पनाध्यायो द्वितीयः ॥ २ ॥

गू०—अथ लाजमण्डः । लाजा पुरातनभर्जितशालिधान्यजाः तैः कृतः तद्वत्तैर्वा भृष्टैः कृतः स लाजमण्डः प्रकीर्तितः स श्लेष्मादिहरः ग्राही ग्रहण्यतिसारसंभक्तः ॥ १७४ ॥

इति लाजमण्डः ।

इति श्रीकाशीरामवैद्यविरचितायां शार्ङ्गधरगूढार्थदीपिकायां चिकित्सास्थाने क्वाथादिकल्पनाध्यायः ॥२॥

## तृतीयोऽध्यायः ।

### फाण्टकल्पना ।

इदानीं फाण्टकल्पनां दर्शयितुमाह—

**क्षुण्णे द्रव्यपले सम्यग्जलमुष्णं विनिक्षिपेत् ।**
**मृत्पात्रे कुडवोन्मानं ततस्तु स्रावयेत्पटात् ॥ १ ॥**
**तस्य चूर्णद्रवः फाण्टस्तन्मानं द्विपलोन्मितम् ।**
**सितामधुगुडादींश्च क्वाथवत्तत्र निक्षिपेत् ॥ २ ॥**

दी०—क्षुण्णे द्रव्येति । अनेन फाण्टपरिभाषा अभिहिता । क्षुण्णे द्रव्यपले इति सम्यक् क्षुण्णे अत्यन्तकुट्टिते, चूर्णसदृश इत्यर्थः । उष्णमित्यर्धविशोषितं कथितमात्रमिति केचित् । विनिक्षिपेत् विशेषेण क्षिपेदिति ग्रहणेन द्रव्यस्य प्रमाणादिकं सूचितम् । एतेनोक्तपरिमितं द्रव्यं जले निर्मथ्य विस्राव्यमित्यर्थः । तस्य द्रवरूपफाण्टस्य पर्यायवाचकशब्दश्चूर्णद्रवः प्रोक्तः । तन्मानमिति पानार्थम् । अथ तत्प्रक्षेपार्थं द्रव्याण्याह —सितेत्यादि । अत्र आदिशब्दात् क्षीरघृततैलमूत्रलवणक्षारहिङ्गुत्रिकटुकप्रभृतयो गृह्यन्ते एतेषां प्रक्षेपमानं क्वाथवज्ज्ञातव्यम् ॥ १ ॥ २ ॥

गू०—अथ फाण्टकल्पना । क्वाथानन्तरं फाण्टविधानात् क्षुण्णे कुट्टिते द्रव्यपले मृत्पात्रे कुडवोन्मितचतुष्पलं उष्णजले विनिक्षिपेत् । ततः पटाद्वस्त्रात्स्रावयेत् । स चूर्णद्रवः स्यात्, तथा फाण्टपर्यायेण तन्मानं भक्षणमानं तु द्विपलं मधुकादीनि क्वाथवत् ॥१॥२॥

१—'स स्याच्चू०' पा० ।

### अथ बृहन्मधूकफाण्टः ।

**स यथा—मधूकपुष्पं मधुकं चन्दनं सपरूषकम् ।**
**मृणालं कमलं लोध्रं कम्भारी नागकेशरम् ॥ ३ ॥**
**त्रिफला-सारिवा-द्राक्षा-लाजान्कोष्णजले क्षिपेत् ।**
**सितामधुयुतः पेयः फाण्टो वासौ हिमोऽथवा ॥४॥**
**वातपित्तज्वरं दाहं तृष्णामूर्च्छारतिभ्रमान् ।**
**रक्तपित्तं मदं हन्यान्नात्र कार्या विचारणा ॥ ५ ॥**

दी०—स यथेत्यनेन तद्दर्शयति ग्रन्थकारः । इदानीं विवरणमस्माभिरपि लिख्यते । मधूकपुष्पमिति । अयं मधूकपुष्पादिफाण्टसंज्ञः हिमसंज्ञो वा कल्पनाद्वयभेदात् । अत्र मधूको वृक्षविशेषः, तस्य पुष्पाणि, मधुकं मधुयष्टी, चन्दनमत्र रक्तं, परूषकमिति फलविशेषं, 'फलसा' इति लोके । मृणालं कमलनालं, 'भसीड' इति लोके; कमलं पुष्पविशेषं विख्यातम् । तदभावे पद्मबीजमिति सर्वत्र । कम्भारीति कम्भारीफलं, त्रिफला इति हरीतक्यादिकं, सारिवा आस्फोता, 'आस्फोई' इति शब्दवाच्या । लाजानिति भृष्टधान्योद्भवान्, ( एतत्सर्वं सममानेन पलैकं ग्राह्यम् । समताऽत्रानुक्तत्वात् ) कोष्ण इतीषदुष्णः, सिता मधु च प्रक्षेपे प्रशस्तम् । हिमोपि पुरतो यदपेक्षमाणोऽस्तीति । अरतिमसौख्यम् । भ्रमश्चक्रारूढस्येव, मदं दुष्टपूगधत्तूरकोद्रवादिजनितम् । अत्र विचारणा न कार्येति यद्ग्रहणम्, तत् "अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः" इति वाक्यानुरोधात् । तथाचोक्तम् "नौषधीर्हेतुभिर्विद्वान् परीक्षेत कथञ्चन । सहस्रेणापि हेतूनां नाम्बष्ठादिर्विरेचयेत्" इति । अतएव वृद्धवैद्यव्यवहारेणानुसर्तव्य इति जनश्रुतिरित्यर्थः । केचित् प्रत्येकद्वितीयान्तद्रव्यग्रहणेन व्यस्तयोगानपि प्रशंसन्ति एतदपि मनोहरं न दोषः । "नात्र कार्या विचारणा" इति वचनात् ॥ ३–५ ॥

गू०—मधूकपुष्पं गुडपुष्पं, मधुकयष्टी, चन्दनं रक्तं, परूषकं गिरिपीलुः, मृणालं कन्दः, कमलं कमलपत्रं फलं वा । लोध्रं प्रसिद्धं, कम्भारी

१ 'फेरुषा' पा० । २ नास्ति 'क' पुस्तके । ३ 'महुवा' हि. भा. । ४ 'फलसा' हि. भा. । ५–'भिष' हि. भा. ।

गम्भारी, सारिवा अनन्तमूलं यद्वा सुगन्धद्रव्यं, लाजा धान्यकृता । कोष्णजले ईषदुष्णे पलमात्रं यद्द्रव्यं चतुष्पले जले स्थितं वस्त्रपूतं द्विपलं पेयं । सिता मत्स्यण्डी, तथा मधुयुतं पेयं । असौ फाण्टः अथवा हिमः क्रियते रात्रिस्थितत्वात्, वातज्वरादीन्हन्यात्मदरोगं च । इति मधूकपुष्पादिफाण्टः ॥ ३–५ ॥

## अथाम्रादिफाण्टः ज्वरादौ ।

**आम्रजम्बूकिसलयैर्वटशुङ्गप्ररोहकैः ।**
**उशीरेण कृतः फाण्टः सक्षौद्रो ज्वरनाशनः ॥ ६ ॥**
**पिपासाछर्द्यतीसारान्मूर्च्छां जयति दुस्तराम् ।**

दी०—अथाम्रादिफाण्टमाह—आम्रजम्बूकिसलयैरिति । आम्रकिसलयैर्जम्बूकिसलयैश्च, किसलयं कोमलपत्रम् । वटशुङ्गप्ररोहकैरिति वटवृक्षस्य शुङ्गानि कोमलपल्लवानि, प्ररोहका वटावरोहाः, वरारोहा इति लोके । उशीरस्तृणभेदः सुगन्धाङ्घ्रिः प्रसिद्धः । कर्तव्यतास्य पूर्ववत् । क्षौद्रमत्र प्रक्षेपे । दुस्तरामित्यनिवार्याम् ॥ ६ ॥

गू०—आम्रस्य तथा जम्बूकिसलयैः पल्लवैर्वटशुङ्गः वटप्ररोहैः वटाङ्कुरः, उशीरः एतैः कृतः फाण्टः क्षौद्रेण ज्वरादिनाशकः ॥ ६ ॥

## लघुमधूकपुष्पादिफाण्टो दाहपित्तादौ ।

**मधूकपुष्पकम्भारीचन्दनोशीरधान्यकैः ॥ ७ ॥**
**द्राक्षया च कृतः फाण्टः शीतः शर्करया युतः ।**
**तृष्णापित्तहरः प्रोक्तो दाहमूर्च्छाभ्रमाञ्जयेत् ॥ ८ ॥**

दी०—इदानीं लघुमधूकपुष्पादिकफाण्टं दर्शयन्नाह—मधूकपुष्पेति । मधूकपुष्पं विख्यातं, 'महुवा' शब्दवाच्यम् । कम्भारी काश्मरी, तस्याः फलानि, चन्दनमत्र रक्तचन्दनं, उशीरं प्रसिद्धं, धान्यकं कुस्तुम्बुरी, द्राक्षा फलोत्तमा । शीत इति स्पर्शात्, यद्वा शीतो हिमः कषायोऽयं कर्तव्यः, पूर्ववाक्यानुरोधात् । शर्करा अत्र प्रक्षेपे । तृष्णाहरः पित्तहरश्च, पित्तं प्रकुपितम् ॥ ७ ॥ ८ ॥

गू०—सुगमम् ॥ ७ ॥ ८ ॥

इति फाण्टः ॥

१–'वरारोह' बडकी दाढी, हि. भा.

## मन्थविधिः ।

**मन्थोऽपि फाण्टभेदः स्यात्तेन चात्रैव कथ्यते ।**
**जले चतुःपले शीते क्षुण्णं द्रव्यपलं क्षिपेत् ॥ ९ ॥**
**मृत्पात्रे मन्थयेत्सम्यक्तस्माच्च द्विपलं पिबेत् ।**

दी०—इदानीं मन्थविधिमाह—मन्थ इति । यतोऽयं मन्थः फाण्टस्य भेदो दर्शितः । तद्भेदिभिस्तेन कारणेनात्र कल्पनया कथ्यते । आचार्येणेति शेषः । शीते जल इति ग्रहणेनैव फाण्टाद्भिन्नोऽयं कथितः । 'जले चतुःपले' इत्यादिकोऽयं श्लोकः प्रक्षेपक इति वदन्ति केचित्, यतो बहुषु पुस्तकेषु न दृश्यते । जलमानं तु द्रव्यानुमानतो बोद्धव्यं यथा वक्ष्यमाणे सक्तुमन्थके ॥ ९ ॥

गू०—अथ मन्थः । स यथा क्षुण्णं कुट्टितं द्रव्यं पलं, चतुःपले शीतजले क्षिपेत् पुनः मन्थयेत् तस्माद्द्विपलं पिबेत् । अतोऽयं भिन्नः ॥ ९ ॥

## मदात्ययादौ खर्जूरादिमन्थः ।

स यथा—

**खर्जूरदाडिमीद्राक्षातिन्तिडीकाम्लिकामलैः ॥ १० ॥**
**सपरूषैः कृतो मन्थः सर्वमद्यविकारनुत् ।**

दी०—स यथेति मन्थसूचकं वाक्यमिदं । अतस्तं दर्शयन्नाह-खर्जूरेति । अत्र खर्जूरादीनां फलानि ग्राह्याणि । खर्जूरी बृहत्खर्जूरिका, तस्याः फलानि 'उतती'ति लोके; दाडिमं दाडिमीफलं, तिन्तिडीकं विटपिविशेषः, तस्य फलानि अम्लानि भवन्ति । अम्लिका चिञ्चा, तस्याः फलानि प्रसिद्धानि, आमलमामलकफलं, परूषकं फालसाशब्दवाच्यं ह्रस्वविटपं, तस्यापि फलैः कृत इत्येषां परिपक्वफलैः संस्कारित इत्यर्थः । सर्वं मद्यं दुष्टपूगकोद्रवारिष्टादिकं तज्जनितं विकारं मदात्ययादिकं, तं नाशयतीत्यर्थः । एके चात्र शर्करां वदन्ति पानकत्वात् ॥ १० ॥

गू०—खर्जूरः प्रसिद्धः, दाडिमफलं तस्य बीजानि, द्राक्षा गोस्तनी, तिन्तिडीकं वृक्षाम्लं, अम्लिका प्रसिद्धा, आमलं आमलकं, परूषको गिरिपीलुः । एतैः कृतः मन्थः मद्यविकारं मदात्ययादिकं हरति । इति खर्जूरादिमन्थो मदात्ययादौ ॥ १० ॥

## अथ मसूरादिमन्थः छर्द्याम्—

**क्षौद्रयुक्ता मसूराणां सक्तवो दाडिमाम्भसा ॥ ११ ॥**
**मथिता वारयन्त्याशु छर्दिं दोषत्रयोद्भवाम् ।**

**तृष्णादाहादौ यवसक्तुमन्थः ।**

**प्लावितैः शीतनीरेण सघृतैर्यवसक्तुभिः ॥ १२ ॥**
**नातिसान्द्रद्रवो मन्थस्तृष्णादाहास्रपित्तहा ।**

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण विरचितायां श्रीशार्ङ्गधरसंहितायां मध्यमखण्डे फाण्टादिकल्पना नाम तृतीयोऽध्यायः ।

---

**दी०**—इदानीं मसूरादिमन्थविवरणमाह—क्षौद्रयुक्ता इति । क्षौद्रयुक्ता मधुप्लाविताः । मसूरोऽन्नविशेषः, स च भर्जितः सक्तुनिमित्तत्वात् । दाडिमाम्भसा परिपक्वदाडिमफलतोयेन मथिता निर्मथिता । दोषत्रयोद्भवामिति व्यस्तां समस्तां वा ।

अथ **यवसक्तुमाह**—प्लावितैरिति । यवसक्तुभिः कृत्वा कृतो यो मन्थः स तृष्णादाहास्रपित्तहा भवति । कीदृशैः ? शीतनीरेण शीतलपानीयेन प्लावितैरालोडितैः । एके प्लावितैः शीतनीरेणेत्यस्य स्थाने "प्लावितैः शर्करातोयैः" इति पठन्ति व्याख्यानयन्ति च । पुनः कीदृशैः ? सघृतैः उक्तपरिमाणघृतयुक्तैः । कथंभूतैः ? नातिसान्द्रद्रवैः नातिशयेन सान्द्रद्रवास्तैरिति । सान्द्रं कठिनं, द्रवं तोयसदृशम् । तथाच तन्त्रान्तरे "सक्तवः सर्पिषाभ्यक्ताः शीतवारिपरिप्लुताः । नातिद्रवा नातिसान्द्रा मन्थ इत्यभिधीयते" । एके "नातिसान्द्रैर्द्रवैर्मन्थ" इति पठन्ति । तन्मते तु सान्द्रत्वं निषिद्धं द्रवत्वं प्रशस्तमिति । तथाच मतान्तरे वाक्यद्वयमाह "गुर्वी पिण्डी खरात्यर्थं लघ्वी सैव विपर्ययात् । न जलान्तरितान् न द्विः सक्तूनद्यान्न केवलान्" इति द्रवेऽपि साफल्यमनुग्राहकेन दर्शयितुमाह । तद्यथा "पीताः संतर्पणा हृद्याः सद्यो बलविवर्धनाः । वातातपाध्वव्यायामकर्शितानां श्रमापहाः ॥ मधुरा लघवः शीताः सक्तवो रक्तपित्तहा" इति । अयमपि शर्करादिसंयुक्तः कर्तव्यो व्यवहारात् । उक्तं च "शर्करेक्षुमधुद्राक्षायुक्तः पित्तविकारनुत् । द्राक्षामधुसमायुक्तः कफरोगहरः स्मृतः ॥ वर्गत्रयेणोपहितो मलदोषानुलोमनः" इति ॥११॥१२॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यखण्डे फाण्टकल्पना नाम तृतीयोऽध्यायः ॥ ३ ॥

---

**गू०**—मसूराणां भर्जितानां सक्तवः दाडिमांभसा दाडिमजलेन अम्लेन वा पीतो दोषत्रयोद्भवां त्रिदोषजां छर्दिं वान्तिं जयन्ति । अथ **यवशक्तुमन्थः ।** प्लावितैः भर्जितैः घृतसहितैर्यवशक्तुभिर्नातिसान्द्रद्रवैः नातिघनैर्नातिद्रवैः कृतः मन्थः तृष्णादिहा; अस्रपित्तं रक्तपित्तम् ॥ ११ ॥ १२ ॥

इति श्रीकाशीरामवैद्यकृतायां शार्ङ्गधरगूढार्थदीपिकायां चिकित्सास्थाने फाण्टादिकल्पनाध्यायः ॥ ३ ॥

---

## चतुर्थोऽध्यायः ।

अथ **हिमकल्पनां** निदर्शयन्नाह—

**क्षुण्णं द्रव्यपलं सम्यक्षड्भिर्नीरपलैः प्लुतम् ।**
**निशोषितं हिमः स स्यात्तथा शीतकषायकः ॥ १ ॥**
**तन्मानं फाण्टवज्ज्ञेयं सर्वत्रैवैष निश्चयः ।**

**दी०**—क्षुण्णमिति । अयं हिमकषायोऽनया परिभाषया प्रथितो भवति । कथं ? यथा "क्षुण्णं सम्यक्कुट्टितं षड्भिर्नीरपलैः" इति द्रव्यपरिमाणात् । निशोषितमिति सकलनिशायामध्युषितं, तेन प्रातः संस्राव्य द्रवं ग्राह्यमित्यर्थः । एतस्य पर्यायनाम्ना शीतकषायः कथितः । तदुक्तं तन्त्रान्तरे–"शीतो रात्रिं द्रवे स्थितः" इति । तन्मानं तु फाण्टवज्ज्ञेयमिति तस्य परिमाणं पानार्थं फाण्टवज्ज्ञातम् । मानग्रहणेनापि प्रक्षेपाद्योऽपि फाण्टवज्ज्ञातव्याः । एष निश्चयः सर्वत्रैव नान्यत् ॥ १ ॥

**गू०**—**हिमकल्पना** । क्षुण्णं कुट्टितं द्रव्यपलैः षड्भिर्नीरपलैः प्लुतं निशोषितं रात्रिस्थापितं हिमः स्यात् तन्मानं भक्षणमानं फाण्टवद्द्विपलम् ॥ १ ॥

### आम्रादिहिमो रक्तपित्ते ।

स यथा—

**आम्र-जम्बू च ककुभं चूर्णीकृत्य जले क्षिपेत् ॥ २ ॥**
**हिमं तस्य पिबेत्प्रातः सक्षौद्रं रक्तपित्तजित् ।**

**दी०**—स यथेति वाक्येन हिमकषाययोगात् दर्शयति । आम्रेति । तद्यथा—अयं आम्रादिकसंज्ञको हिमो मधुप्रक्षिप्तो रक्तपित्तजिद्भवति । अत्र ककुभोऽर्जुनः स च वृक्षविशेषः । आम्रादीनां त्वक्चूर्णमिति व्यवहारात् ॥ २ ॥

**गू०**—ककुभोऽर्जुनवृक्षः, सक्षौद्रो मधुसहितः ॥२॥

**अथ मरीच्यादिहिमस्तृष्णादौ—**

**मरीचं मधुयष्टी च काकोदुम्बरपल्लवाः ॥ ३ ॥**
**नीलोत्पलं हिमस्तस्त्तृष्णाछर्दिनिवारणः ।**

दी०—अथ मरीचादिसंज्ञको हिमः । अत्र काकोदुम्बरिका 'कटुम्बरी'शब्दवाच्या, 'कट्वरी'शब्दवाच्या च । नीलोत्पलं नीलकमलं, तदभावे पद्मबीजमिति व्यवहारात् । तज्ज इति मरीचादिद्रव्यैर्जातः । एके मरीचचूर्णं मनाक्प्रक्षेपेऽप्याहुः तीक्ष्णत्वात् ॥ ३ ॥

गू०—मधुयष्टी मधुकं, काकोदुम्बरीपल्लवः कटुम्बरपल्लवः ॥ ३ ॥

**वातपित्तादौ नीलोत्पलादिहिमः ।**

**नीलोत्पलं बला द्राक्षा मधूकं मधुकं तथा ॥ ४ ॥**
**उशीरं पद्मकं चैव काश्मरी च परूषकम् ।**
**एष शीतकषायश्च वातपित्तज्वराञ्जयेत् ॥ ५ ॥**
**सप्रलापभ्रमच्छर्दिमोहतृष्णानिवारणः ।**

दी०—अथ नीलोत्पलादिजं हिममाह, नीलोत्पलमिति । नीलोत्पलमत्र विख्यातं, तच्चेन्दीवरसंज्ञं । बला प्रसिद्धा । मधूकं गुडपुष्पं, लोके महुआशब्दवाच्यं । मधुकं यष्टीमधु, उशीरं तृणभेदं सुगन्धमूलं, पद्मकं काष्ठविशेषं । काश्मरी कम्भारी, तस्याः फलानि, परूषकं प्रसिद्धं । शीतकषायो हिमकषायः कथितः प्रलापोऽसम्बद्धभाषणं, भ्रमश्चक्रारूढस्येवार्थसंवित्तिः, मोहो मूर्च्छाभेदः ॥ ४ ॥ ५ ॥

गू०—नीलोत्पलं नीलकमलं, बला प्रसिद्धा, मधूकं गुडपुष्पं, मधुकं मधुयष्टी, उशीरं सुगन्धकं, पद्मकं पद्मकाष्ठं, काश्मरी गम्भारी, परूषकं गिरिपीलुः । शीतकषायः वातपित्तज्वरादीन् जयेत् । प्रलापोऽनर्थकं वच इत्यमरः । भ्रमश्चक्रारूढस्येव । मोहो मूर्च्छा ॥ ४ ॥ ५ ॥

**गुडूचीहिमः जीर्णज्वरे—**

**अमृताया हिमः पेयो जीर्णज्वरहरः स्मृतः ॥ ६ ॥**
**वासायाश्च हिमः कासं रक्तपित्तज्वराञ्जयेत् ।**

दी०—इदानीममृताटरूषकसंज्ञकौ हिमावाह–अमृताया इति । अमृता गुडूची तस्या वल्ली ग्राह्या । अत्रापरे मधु प्रक्षिपन्ति तन्त्रान्तरे दर्शनात् । तथाहि "अमृतायाः कषायं तु शीतं सम्यक् पलद्वयम् । मधुपादयुतं पीतं जीर्णज्वरहरं परम्" इति । अपरं च वासा अटरूषकः, स चात्र पञ्चाङ्गो व्यवहारात् ॥ ६ ॥

गू०—अमृता गुडूची तस्या हिमं जीर्णज्वरं पक्षादूर्ध्वं स्थितः । **अथ वासाहिमः** रक्तपित्ते । वासायाश्च हिमः कासरक्तपित्तज्वराञ्जयेत्, सुगमम् ॥ ६ ॥

**अथ धान्यादिहिमोऽन्तर्दाहादौ—**

**प्रातः सशर्करः पेयो हिमो धान्याकसंभवः ॥ ७ ॥**
**अन्तर्दाहं तथा तृष्णां जयेत्स्रोतोविशोधनः ।**

दी०—प्रातरिति । एष धान्याकहिमोऽन्तर्दाहादौ प्रशस्तः, धान्याकं कुस्तुम्बुरु । स्रोतोविशोधन इति मूत्रमार्गस्य शुद्धिकरः मूत्रकृच्छ्रादिहर इत्यर्थः ॥ ७ ॥

गू०—स्रोतोविशोधनः स्रोतःशुद्धिकरः । स्पष्टमन्यत् ॥ ७ ॥

**अथ धान्याकादिर्हिमः रक्तपित्तादौ—**

**धान्याकधात्रीवासानां द्राक्षापर्पटयोर्हिमः ॥ ८ ॥**
**रक्तपित्तज्वरं दाहं तृष्णां शोषं च नाशयेत् ।**

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां श्रीशार्ङ्गधरसंहितायां मध्यमखण्डे हिमकल्पना नाम चतुर्थोऽध्यायः ।

---

दी०—धान्याकेति । अयं धान्याकादिसंज्ञको हिमो रक्तपित्तादिकान् हन्तीति । अत्र धात्री आमलकीफलम्, वासा अटरूषकस्तस्य मूलं ग्राह्यं, पर्पटं स्वनामख्यातं । एतत्सकलं समं तुलितं संगृह्य हिमकषायः कर्तव्यः । अत्रापि शर्कराप्रक्षेपमाहुः पूर्वयोगानुसारात् । शोषं मुखशोषं, क्षयभेदो वा, एके योगद्वयमाहुः ॥ ८ ॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्री**भावसिंहा**त्मजेना**ढमल्लेन** विरचितायां शार्ङ्गधरदीपिकायां मध्यमखण्डे हिमकल्पनाध्यायश्चतुर्थः ॥ ४ ॥

---

गू०—धात्री आमलकी, पर्पटः कटुपत्रः रक्तपित्तं मुखादे रक्तस्रावः, शोषं, यद्वा शोषः क्षयभेदः नाशयेत् ॥ ८ ॥

इति शार्ङ्गधरसंहितायां श्रीकाशीरामवैद्यविरचितगूढार्थदीपिकायां चिकित्सास्थाने हिमकल्पनाध्यायः ॥ ४ ॥

---

## पञ्चमोऽध्यायः ।

---

अथेदानीं **कल्ककल्पनां** व्याख्यास्यामः–

**द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत् ।**
**प्रक्षेपावापकल्कास्ते तन्मानं कर्षसंमितम् ॥ १ ॥**

कल्के मधु घृतं तैलं देयं द्विगुणमात्रया ।
सितागुडं समं दद्याद्द्रवा देयाश्चतुर्गुणाः ॥ २ ॥

दी०—द्रव्यमित्यादि । इयमनेन प्रकारेण कल्कपरिभाषा कथ्यते । द्रव्यं व्याधिविहितं । आर्द्रं सद्य उद्धृतं । पक्षान्तरकल्कविधौ शुष्कमपि द्रव्यं जलेन पिष्टं कल्कसंज्ञकं भवति । ते प्रक्षेपावापकल्का इति पर्यायशब्दवाचकैः कथिताः । तन्मानकल्कपरिमाणं कर्षमितं सार्धटंकद्वयं, एतच्च भक्षणे मानमनुक्तानाम् । अथात्र प्रक्षेपद्रव्याण्याह—कल्के मधुघृतमित्यादि । कल्के पूर्वोक्तं मधुघृततैलं द्विगुणमात्रया देयम् । द्विगुणता कल्कादित्यर्थः । सिता गुडश्च समं सममपि कल्काच्च द्रवा इति अवशिष्टजलक्षीराद्याश्चतुर्गुणा देयाः कल्कादपीत्यर्थः । कल्कः प्रक्षेपसंज्ञः प्रोक्तः । तस्मात् द्रवेषु प्रक्षेपको योज्य इति तात्पर्यार्थः । यथाग्रे वक्ष्यमाणाः पिप्पलीवर्धमानादयो दृश्यन्ते अतएव कर्षपरिमाणं सामान्यं, विशेषतस्तु दोषाद्यनुरूपतः प्रमाणाः बोद्धव्याः ॥ १ ॥ २ ॥

गू०—अथ कल्ककल्पना । आर्द्रं द्रव्यमौषधं शिलापिष्टं शुष्कं जलपिष्टं भवेत् । तन्मानं कर्षसंमितं भवेत् । ते नामतः प्रक्षेप आवापकल्का भवन्ति । कल्के मधु घृतं तैलं द्विगुणमात्रया देयं क्वाथतो द्विगुणमात्रयेति पूर्वोक्तैः सितागुडसमं द्रवा जलदुग्धाद्याः चतुर्गुणा इति ॥ १ ॥ २ ॥

## वर्धमानपिप्पल्यः ।

स[1] यथा—त्रिवृद्ध्या पञ्चवृद्ध्या वा सप्तवृद्ध्याथवा कणाः ।
पिबेत्पिष्ट्वा दशदिनं तांस्तथैवापकर्षयेत् ॥ ३ ॥
एवं त्रिंशद्दिनैः सिद्धं पिप्पलीवर्धमानकम् ।
अनेन पाण्डुवातास्रकासश्वासारुचिज्वराः ॥ ४ ॥
उदरार्शःक्षयश्लेष्मवाता नश्यन्त्युरोग्रहाः ।

दी०—स यथेति शिष्यवाक्येन तद्विधिं दर्शयति ग्रन्थकारः त्रिवृद्ध्येत्यादिना । अयं पिप्पलीवर्धमानप्रयोगो विधीयते । वृद्धिस्तु तावद् यावद्दशदिनमिति । तांस्तथैवापकर्षयेदिति ताः पिप्पल्यः तथैवेति वृद्धियुक्त्यापकर्षयेत् ह्रासयेत् यावद्दशदिनमिति । एवं विंशतिदिनैः कृत्वा पिप्पलीवर्धमानप्रयोगः सिद्धो भवति । एतेन किमुक्तं भवति त्रिभिस्त्रिभिः परिवृद्धिः कृता यावद्दशदिनानि, वृद्धिस्तु प्रतिदिनमेव, ततस्त्रिस्त्रिस्त्रिशोऽपकर्षयेद् यावत्तिस्रः पिप्पल्य एव तिष्ठन्ति, एवं पञ्चवृद्धिरपकर्षश्च तथा सप्तवृद्धिरपकर्षश्च । अथवेति ग्रहणेन दशपिप्पलीनां वृद्धिरपकर्षश्च बोद्धव्यः अन्यतो दर्शनात् । तद्यथा "त्रिभिरथ परिवृद्धं पञ्चभिः सप्तभिर्वा दशभिरथ विवृद्धं पिप्पलीवर्धमानम् । इति पिबति पुमान् यस्तस्य न श्वासकासज्वरजठरगदार्शोवातरक्तक्षयाः स्युः" इति । पिष्ट्वा इत्यत्रापि क्षीरपिष्टा इति मन्यन्ते केचित् ॥ ३ ॥ ४ ॥

गू०—स यथा सुगमम् । पिप्पलीवर्धमानं पाण्डुज्वरादौ । त्रिवृद्ध्या पञ्चवृद्ध्या वा कणाः पिप्पल्यः पिष्ट्वा कल्कविधानेन चतुर्गुणं जलं दत्वा पिबेद्दशदिनं पुनर्दशदिनं अपकर्षयेत्ततो ह्रासयेत् एवं विंशद्दिनैः सिद्धं पिप्पलीवर्धमानसिद्धं भवति तेन व्याधयो नश्यन्तीति योजना ॥ ३ ॥ ४ ॥

## अथ निम्बकल्को व्रणच्छर्द्यादौ—

लेपान्निम्बदलैः कल्को व्रणशोधनरोपणः ॥ ५ ॥
भक्षणाच्छर्दिकुष्ठानि पित्तश्लेष्मकृमीञ्जयेत् ।

दी०—लेपादिति । निम्बपत्राणि शिलापिष्टानि कृत्वा व्रणेषु लेपः कार्यः । पेषणमत्र जलेन, लेपपरिमाणत्वादार्द्रमहिषचर्मोत्सेधम् । व्यवहारतस्तु व्रणानुकारि कुर्यात् । नात्र नियतप्रमाणं । कार्यान्तरमाह—भक्षणादिति । निम्बपत्रकल्कभक्षणादपि कुष्ठादयो विनश्यन्तीति प्रभावात् । निम्ब इति निम्बकल्कः ॥ ५ ॥

गू०—निम्बदलैः पत्रैः कृतः कल्कः पूरणाद्व्रणशोधनो रोपणो भवति भक्षणात् छर्द्यादीन् जयेत् । अनुभूतं छर्द्याम् ॥ ५ ॥

## अथ महानिम्बकल्को गृध्रस्याम्—

महानिम्बजटाकल्को गृध्रसीनाशनः स्मृतः ॥ ६ ॥

दी०—अपरमपि योगमाह महानिम्बेति । महानिम्बः कार्मुकः, 'बकाइनि'[1] इति लोके । तस्य जटा मूलम् । गृध्रसी वातरोगे पठिता, रान्धनीति लोके प्रसिद्धा ॥ ६ ॥

गू०—महानिम्बः कार्मुकः, तस्य जटाकल्कः भक्षितः गृध्रसी 'रीचण' वातनाशकः ॥ ६ ॥

## अथ रसोनकल्कः वातरोगविषमज्वरादौ—

शुद्धः कल्को रसोनस्य तिलतैलेन मिश्रितः ।
वातरोगाञ्जयेत्तीव्रान्विषमज्वरनाशनः ॥ ७ ॥

१—'स' कल्क इत्यर्थः ।

१—'बकायन' हि. भा.

**दी०**—अन्यदप्याह—शुद्ध इति । रसोनः ख्यातः । शुद्ध इति त्वगादिरहितः । तिलतैलेन मिश्रित इति रसोनकल्काद्विगुणितेन तिलतैलेन संप्लाव्य भक्षयेदित्यर्थः । वातरोगान् गृध्रस्यर्दितपक्षाघातप्रभृतीन् तीव्रानिति दुस्तरान्, विषमज्वराः सततकादयः ॥ ७ ॥

**गू०**—रसोनं लशुनं, तस्य कल्कः शुद्धः द्रव्यान्तररहितः तिलतैलेन मिश्रितः वातरोगाञ्जयेत् । विषमज्वरे तिलतैलरहितो देयः ॥ ७ ॥

अथ **द्वितीयरसोनकल्को** वातव्याधौ—

**पक्वकन्दरसोनस्य गुलिका निस्तुषीकृताः ।**
**पाटयित्वा च मध्यस्थं दूरीकुर्यात्तदङ्कुरम् ॥ ८ ॥**
**तदुग्रगन्धनाशाय रात्रौ तक्रे विनिक्षिपेत् ।**
**अपनीय च तन्मध्याच्छिलायां पेषयेत्ततः ॥ ९ ॥**
**तन्मध्ये पञ्चमांशेन चूर्णमेषां विनिक्षिपेत् ।**
**सौवर्चलं यवानीं च भर्जितं हिङ्गु सैन्धवम् ॥१०॥**
**कटुत्रिकं जीरकं च समभागानि चूर्णयेत् ।**
**एकीकृत्य ततः सर्वं कल्कं कर्षप्रमाणतः ॥ ११ ॥**
**खादेदग्निबलापेक्षी ऋतुदोषाद्यपेक्षया ।**
**अनुपानं ततः कुर्यादेरण्डशृतमन्वहम् ॥ १२ ॥**
**सर्वाङ्गैकाङ्गजं वातमर्दितं चापतन्त्रकम् ।**
**अपस्मारमथोन्मादमूरुस्तम्भं च गृध्रसीम् ॥ १३ ॥**
**उरःपृष्ठकटीपार्श्वकुक्षिपीडां क्रिमीञ्जयेत् ।**
**अजीर्णमातपं रोषमतिनीरं पयो गुडम् ॥ १४ ॥**
**रसोनमश्नन्पुरुषस्त्यजेदेतच्चिरन्तरम् ।**
**मद्यं मांसं तथाम्लं च रसं सेवेत नित्यशः ॥ १५ ॥**

**दी०**—इदानीं द्वितीयरसोनकल्कं दर्शयितुमाह—पक्वेति । बृहत्संज्ञकोऽयं रसोनकल्को यद्यपि सुगमस्तथापि केषांचित्सुबोधार्थं किंचिद्व्याचष्टे, पक्वकन्दरसोनस्येत्यादि । पक्वं कालान्तरेण परिणतं, गुलिकाः कन्दस्यावयवविशेषाः, पोथीति शब्दवाच्याः । निस्तुषीकृता इति नखैः संछोलिताः पश्चात् पाटयित्वा द्विधा विदार्य, तदङ्कुरमिति रसोनगुलिकमध्यस्थहरितवर्णाङ्कुरम् तन्मध्यादिति तक्रमध्यात् अपनीय समादायेत्यर्थः । अत्र रसोनकल्के उक्तद्रव्याणां चूर्णं पञ्चमांशेन कृत्वा क्षिपेत् । पञ्चमांशमिति रसोनकल्कात्, तेन रसोनकल्कं भागचतुष्टयं, द्रव्यचूर्णं भागैकमिति, भर्जितं हिङ्ग्वत्रोत्क्लेदव्यवच्छेदार्थम् । तथाहि "योगेषु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत्" इति । एवं सर्वत्र । कटुत्रिकं शुण्ठीमरीचपिप्पल्यः, कल्ककर्षप्रमाणत इति रसोनद्रव्यचूर्णमिलितं कल्कं नतु केवलं कर्षप्रमाणम् । अतएव दोषाग्निबलापेक्षीति वचनेनात्र मानाभावः सूचितः । एरण्डमूलक्वथितमत्रानुपानमुक्तपरिमाणं प्रत्यहमेव कुर्यात् । एकाङ्गजमिति पक्षघातः । अपतन्त्रकं वातरोगे पठितलक्षणम् । पीडाशब्दः उरःप्रभृतिभिः प्रत्येकमभिसम्बद्धः, तेन उरःपीडा पृष्ठपीडा पार्श्वपीडा कटिपीडा कुक्षिपीडा इत्यर्थः । ननु सर्वाङ्गग्रहणेनैव सर्वे वातविकाराः प्राप्ताः तत्कथं पृथग्ग्रहणं ? उच्यते—सर्वाङ्गेण सर्वशरीरप्रकुपितो वातोऽभिहितः अवयवाश्रितः, तस्मात् सर्वाङ्गप्रकुपितं एकदेशप्रकुपितं चानिलं नाशयेदिति न दोषः । अस्याभ्यासादेव त्याज्यमाह अजीर्णमित्यादि । निरन्तरं सर्वकालं, अजीर्णमन्नादिजनितम् । आतपं च घर्मसेवां, रोषं क्रोधं, अतिनीरमत्यम्बुपानं, पयः क्षीरं, गुडं प्रसिद्धं । एके गुडोपलक्षितत्वात् सर्वेक्षुविकारास्त्याज्या इति वदन्ति । सेव्यमाह मद्यमित्यादि । मद्यं सुरासवप्रभृतिकं, मांसं जाङ्गलिकं गुणप्राधान्यात् । अम्लमम्लरसं, तच्च मातुलुङ्गादिकं, रसं मांसजनितं प्रसह्यमित्यर्थः । नित्यशः प्रतिदिनम् ॥ ८–१५ ॥

**गू०**—एरण्डजटाक्वाथः पलमात्रं द्रव्यं । पयो महिषीपयः तस्य वातकर्तृकत्वात् न गोपयः, तस्य पथ्यवर्गे लिखितत्वात्, रोषं क्रोधं, अतिनीरं बहुजलं, स्पष्टमन्यत् ॥ ८–१५ ॥

## पिप्पल्यादिकल्क ऊरुस्तम्भे—

**पिप्पली पिप्पलीमूलं भल्लातकफलानि च ।**
**एतत्कल्कश्च सक्षौद्र ऊरुस्तम्भनिवारणः ॥ १६ ॥**

**दी०**—इदानीमूरुस्तम्भे कल्कस्वरूपं योगमाह, एतेषां कल्क इति । एतत्कल्कः । पिप्पलीपिप्पलीमूले विख्याते, भल्लातकफलान्यत्र निरस्थीनि योज्यानि, कुत्राप्येषां पिप्पल्यादीनां क्वाथोऽपि प्रचरति । तथाहि "पिप्पलीं पिप्पलीमूलं भल्लातकशृतं पिबेत् । कल्को वा समधुर्देय ऊरुस्तम्भविनाशनः" इति ॥ १६ ॥

**गू०**—सक्षौद्रः मधुसहितः । स्पष्टमन्यत् ॥ १६ ॥

अथ **विष्णुक्रान्ताकल्कः** परिणामशूले—

**विष्णुक्रान्ताजटाकल्कः सिताक्षौद्रघृतैर्युतः ।**
**परिणामभवं शूलं नाशयेत्सप्तभिर्दिनैः ॥ १७ ॥**

दी०—परिणामशूलेऽपराजिताकल्कमाह—विष्णुक्रान्तेति । विष्णुक्रान्ता अपराजिता प्रतीता, शतावरी वा । सितादयोऽप्यत्र पूर्वपरिमाणेन प्रक्षिप्ताः । सप्तदिनैरिति योगस्यास्य दृष्टफलत्वं दर्शयति । परिणामशूलं पक्तिशूलं, तच्च शूलरोगे स्पष्टमेव ॥ १७ ॥

गू०—विष्णुक्रान्ता अपराजिता श्वेतपुष्पी वा नीली वा तां केचिद्धन्वन्तरा आहुः, तथा जटाकल्कः सितादिभिर्युक्तः परिणामभवं शूलं नाशयेत् "अन्ने जीर्यति यच्छूलं तदेव परिणामजम्" ॥ १७ ॥

अपरमपि परिणामशूलार्थं प्रयोगमाह—

**शुण्ठीतिलगुडैः कल्को दुग्धेन सह योजयेत् ।**
**परिणामभवं शूलमामवातं च नाशयेत् ॥ १८ ॥**

दी०—शुण्ठीति । अत्रास्य कर्तव्यविधौ शुण्ठीतिलाभ्यां कल्कः कार्यः । गुडमत्र द्वयोः सन्तुलितं चतुर्गुणेन क्षीरेण सह साधयित्वा भक्षयेदिति भावः । चकारादयमपि सप्तदिनाभ्यन्तरे दृष्टफलः । उक्तमन्यत्रापि "नागरतिलगुडकल्कं पयसा संसाध्य यः पुमानद्यात् । उग्रं परिणामशूलं तस्यापैत्यपि च सप्तरात्रेण" इति ॥ १८ ॥

गू०—**अथ शुण्ठीकल्कः** परिणामशूले तथामवाते । सुगमम् ॥ १८ ॥

**अथापामार्गकल्कः रक्तार्शसि—**

**अपामार्गस्य बीजानां कल्कस्तण्डुलवारिणा ।**
**पीतो रक्तार्शसां नाशं कुरुते नात्र संशयः ॥ १९ ॥**

दी०—अथ रक्तार्शसां प्रयोगं दर्शयन्नाह—अपामार्गस्येति । अपामार्गः प्रसिद्धः । तण्डुलवारि तण्डुलक्षालनजलं, तच्च पुटपाके दर्शितं, अनेन चतुर्गुणेनापामार्गस्य बीजानां कल्कः पेयः, न तु तेन मानेन पेषितः, पेषणार्थं त्वपरिमितं जलम्, एतदेव योज्यम् । नास्ति संशय इति दृष्टफलत्वेनास्य प्रभावातिशयो वर्णितः ॥ १९ ॥

गू०—तण्डुलजलेन ॥ १९ ॥

**अथ बदरीमूलकल्कः रक्तातीसारे—**

**बदरीमूलकल्केन तिलकल्कश्च योजितः ।**
**मधुक्षीरयुतः कुर्याद्रक्तातीसारनाशनः ॥ २० ॥**

दी०—इदानीं रक्तातीसारे बदरीमूलकल्कमाह—बदरीमूलकल्केन तिलकल्कश्चेति । कल्कद्वयग्रहणेन समं मेलयित्वा कल्कः कार्यः, इत्यस्मदीयसम्प्रदायस्तेन द्वयोः साम्येन कर्षैकं, पेषणार्थं जलमत्रानुक्तत्वात् । मधुक्षीरौ चोक्तपरिमाणेन प्रक्षेपे योज्यौ । केचिन्मधुक्षीरयुत इति पठन्ति । तत्र क्षीरं छागोद्भवं व्याधिविहितत्वात् । अयमेव पक्षो व्यावहारिको दृश्यते । गुणेनाप्युक्तं "आजं शोषज्वरे श्वासरक्तपित्तातिसारजित्" इति ॥ २० ॥

गू०—बदरी लघुः तस्या जटा तत्कल्कः । क्षीरं गव्यमाजं वा ॥ २० ॥

**रक्तक्षये लाक्षाकल्कः ।**

**कूष्माण्डकरसोपेतां लाक्षां कर्षद्वयं पिबेत् ।**
**रक्तक्षयमुरोघातं क्षयरोगं च नाशयेत् ॥ २१ ॥**

दी०—अथ रक्तपित्ते कूष्माण्डयोगमाह—कूष्माण्डक इति । कूष्माण्डकः प्रसिद्धः, तस्य फलस्वरसेनैव कर्षमात्रां लाक्षां पिष्ट्वा तेनैव चतुर्गुणेन सह पिबेत् । चतुर्गुणतात्र पलमानं, एष विधिः पानादिति वाक्ये दर्शितः । लाक्षाऽलक्तकस्य जननी । अत्रापि मधुप्रक्षेपं कुर्वन्ति वृद्धाः, कुतः ? पूर्वानुयोगानुवृत्तेः ॥ २१ ॥

गू०—लाक्षायोगः रक्तक्षये—लाक्षां पिप्पलजां बदरिजां वा ॥ २१ ॥

**अथ तण्डुलीयकल्कः रक्तप्रदरे—**

**तण्डुलीयजटाकल्कः सक्षौद्रः सरसाञ्जनः ।**
**तण्डुलोदकसंपीतो रक्तप्रदरनाशनः ॥ २२ ॥**

दी०—रक्तप्रदरेऽप्याह—तण्डुलीयेति । तण्डुलीयः शाकविशेषः 'चौराइ' इति शब्दवाच्यः, तस्य जटा मूलं, कर्तव्यतास्य तण्डुलीयजटा रसाञ्जनं च साम्येन कर्षपरिमितं ग्राह्यं । तदनु जलेन संपिष्य मधुयुक्तश्चतुर्गुणेन तण्डुलजलेन सह पातव्यः । तण्डुलजलं पूर्वं व्याख्यातं । रसाञ्जनं स्वनामख्यातम् । तच्च दार्वीक्वाथसमुद्भवमिति प्रसिद्धम् । रक्तप्रदरः स्त्रीरोगे पठितः ॥ २२ ॥

गू०—तण्डुलीयः मेघनादः, तस्य जटाकल्कः सक्षौद्रः, रसाञ्जनं प्रसिद्धं, तण्डुलोदकं तण्डुलप्रक्षालनजलं, प्रदरः योन्या रक्तादिस्रावः ॥ २२ ॥

**अथाङ्कोटककल्कोऽतीसारादौ—**

**अङ्कोटमूलकल्कश्च सक्षौद्रस्तण्डुलाम्बुना ।**
**अतीसारहरः प्रोक्तस्तथा विषहरः स्मृतः ॥ २३ ॥**
**वन्ध्याकर्कोटिकामूलं पाटलाया जटाऽथवा ।**
**घृतेन बिल्वमूलं वा द्विविधं नाशयेद्विषम् ॥ २४ ॥**

---

१–असमीचीनमिदं विष्णुक्रान्ता भिन्ना शतावरी च भिन्ना ।

१–'चौराई' हिं. भा. । २–'रसौत हिं. भा. ।

दी०—अथ विषहरणार्थं योगवरानाह—अङ्कोटमूलेति । अङ्कोटो वृक्षविशेषस्तस्य मूलम् । क्षौद्रमत्र प्रक्षेपे साधु । तण्डुलाम्बुनेति चतुर्गुणेन, चतुर्गुणता च कल्कद्रव्यात् । विषोऽत्र स्थावरः । विषनिमित्तं तु जलेनैव पेय इति सम्प्रदायः । अपराण्याह—वन्ध्येति । एतद्योगत्रयं घृतेन सह पेयम् । विषं नाशयति इति, तच्च द्विविधं स्थावरजंगमात्मकम् । केचिद्वन्ध्याकर्कोटकीमूलकल्केन नस्यमाहुः । तथाहि–'वन्ध्याकर्कोटकीमूलं छागीमूत्रेण भावितम् । नस्यं काञ्जिकसंपिष्टं विषोपहतचेतसः' इति । एवं बिल्वमूलमञ्जनार्थं इति वदन्त्येके ॥ २३ ॥ २४ ॥

गू०—अंकोटो बृहत्तस्य जटाकल्कः मूलकल्कः, स्थावरजङ्गमविषम् ॥ २३ ॥ २४ ॥

## अथाभयादिकल्कः पाचनादौ—

**अभयासैन्धवकणाशुण्ठीकल्कस्त्रिदोषहा ।**
**पथ्यासैन्धवशुण्ठीभिः कल्को दीपनपाचनः ॥२५॥**

दी०—अथैकेन श्लोकेन योगद्वयमाह–अभयेति । अभयादीनां चतुर्णां समतुलितानां मिलित्वा कर्षेण कल्कस्त्रिदोषजिद्भवति । अभया हरीतकी, कणा पिप्पली । **अपरः** । पथ्यादिभिर्द्रव्यैः कल्को दीपनपाचनो भवति । अत्रापि समता द्रव्याणां, भक्षणमानं तु पूर्ववत् । दीपनमग्नेः, पाचनमामादीनाम् ॥ २५ ॥

गू०—अभया हरीतकी, कणा पिप्पली ॥ २५ ॥

## अथ त्रिवृतादिकल्कः कृमिरोगे—

**त्रिवृत्पलाशबीजानि पारसीकयमानिका ।**
**कम्पिल्लकं विडङ्गं च गुडश्च समभागिकम् ॥ २६ ॥**
**तक्रेण कल्कमेतेषां पिबेत् क्रिमिगणापहम् ।**

दी०—कृमिरोगे कल्कमाह–त्रिवृदिति । त्रिवृदादीनां सगुडानां द्रव्याणां साम्यान्येन मिलितानां कर्षप्रमाणेन कल्कं कृत्वा चतुर्गुणेन तक्रेण सहालोड्य पिबेत् । एतच्च कृमिसमूहानुद्धरतीति । त्रिवृत् निःसृता, पलाशबीजानि प्रसिद्धानि । पारसीकयमानिकेति पारस्यदेशभवा पारसी खुरासानीशब्दवाच्या, कम्पिल्लकोरेचनकः, लोके 'कबीला' शब्देन विख्यातः । अयं योगः कोष्ठगतकृमिनाशनार्थमुक्तः । एके त्रिवृदादीनां गुडः सम इति वदन्ति तेन गुडस्यैको भागः शेषद्रव्याणां भागैकमित्यर्थः । सत्यम् । तन्मते तु गुडं प्रथमतो भक्षयित्वा पश्चात्त्रिवृदादीनां कल्कं तक्रेण सह पिबेदिति । तथाच तन्त्रान्तरे प्रयोगान्तरमपि दृश्यते । तद्यथा "पारसीकयमानी पीता पर्युषितवारिणा प्रातः । गुडपूर्वा कृमिजालं कोष्ठगतं पातयत्याशु" ॥ २६ ॥



गू०—त्रिवृत् निःसृता, पलाशबीजानि प्रसिद्धानि, पारसीकयमानिका प्रसिद्धा 'अजवायणि' गुर्जरदेशे प्रसिद्धा, काम्पिल्लकं रक्ताङ्गकः, विडङ्गः क्रिमिघ्नः । सुगममन्यत् ॥ २६ ॥

## रक्तार्शसि तिलकल्कः ।

**नवनीततिलैः कल्को जेता रक्तार्शसां स्मृतः ॥२७॥**
**नवनीतसितानागकेशरैश्चापि तद्विधः ।**

दी०—अथ रक्तार्शसामपि योगद्वयमाह नवनीतेति । अत्रोक्तपरिमाणेन तिलकल्को द्विगुणितेन नवनीतेन संप्लाव्य भक्ष्यः । असौ रक्तार्शसां जेता कथित इत्यर्थः । रक्तार्शसामिति बहुवचनत्वेनान्येषामप्यर्शसां प्रशस्तः । **अपरोऽपि** नवनीतसितानागकेशरैश्च युक्त्या कल्कस्तद्विधोऽयं भवति । तद्विध इति रक्तार्शसां हन्ता इत्यर्थः । नवनीतत्यागेनापि योगोऽयं प्रचरति । तेन सिता शर्करा नागकेशरश्च साम्येन माषाष्टकं प्रत्यहं भक्ष्यं, प्रयोगात् ॥ २७ ॥

## संग्रहण्यां शुण्ठीकल्कः ।

**पीतो मसूरयूषेण कल्कः शुण्ठीशलाटुजः ॥ २८ ॥**
**जयेत्संग्रहणीं तद्वत्तक्रेण बृहतीभवः ।**

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां श्रीशार्ङ्गधरसंहितायां मध्यमखण्डे कल्ककल्पना नाम पञ्चमोऽध्यायः ।

---

दी०—अथ ग्रहण्यां योगद्वयं दर्शयन्नाह–पीत इति । शुण्ठीशलाटुजः कल्क उक्तपरिमाणेन कृतश्चतुर्गुणेन मसूरयूषेण सह पिबेत् । शलाटु बिल्वफलं, मसूरयूषविधिस्तु क्वाथकल्पनायां कथित एव । अपरोऽपि बृहतीभवो **बृहत्कंटकारिकामूलकल्क इति नाम्ना प्रथितः** । अत्रापि चतुर्गुणं तक्रं कल्काज्ज्ञातव्यम् । तद्वदिति ग्रहणीनाशकरः ॥ २८ ॥

इति श्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यमखण्डे कल्ककल्पनाध्यायः पञ्चमः ॥ ५ ॥

---

१–'निशोथ' हि. भा. । २–पलाशपापरा, हि. भा. । ३–'खुरासानीअजवायन' हि.भा. । ४–'कबीला' हि. भा. ।

**गू०**—ग्रहण्यां मसूरकल्कः, मसूरयूषेण मसूरमण्डेन पीतः शुण्ठीशलाटुजः कल्कः संग्रहणीं जयेत्। तद्वत्तक्रेण बृहतीभवः बृहत्कण्टकारीफलकल्कः 'आमे फले शलाटुः स्यादि'त्यमरः। अपक्व इत्यर्थः। सुगमम्॥३८॥

इति श्रीकाशीराममिश्रकृतायां गूढार्थदीपिकायां चिकित्सास्थाने कल्ककल्पनाध्यायः॥

---

## षष्ठोऽध्यायः।

इदानीं **चूर्णकल्पनां** व्याख्यास्यामः। प्रथमतस्तत्स्वरूपमाह—

**अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम्।**
**तत्स्याच्चूर्णं रजः क्षोदस्तन्मात्रा कर्षसंमिता॥ १॥**

**दी०**—अत्यन्तशुष्कमिति। सूर्यांशुभिः शोषितद्रवांशं यद्द्रव्यमिति। पुष्पफलपत्रत्वङ्मूलनिर्यासादिसंज्ञम्। सुपिष्टमित्यादि सुपिष्टमित्यतिशयेन चूर्णितं शिलायामिति शेषः। वस्त्रगालितं वस्त्रपूतं, तत्तु चूर्णं रजः क्षोद इति पर्यायनामभ्यां संज्ञितम्। तन्मात्रेति भक्षणार्थं मानं कर्षसंमितं ज्ञेयमित्यनुक्तप्रयोगेषु॥ १॥

**गू०**—अथ चूर्णकल्पना। यदत्यन्तशुष्कं द्रव्यं चूर्णौषधं संपिष्टं वस्त्रगालितं वस्त्रपूतं तच्चूर्णं स्यात्तदेव रजः क्षोद इत्यादीनि चूर्णनामानि भवन्ति। तन्मात्रा भक्षणमात्रा कर्षसंमिता बलवांश्चेत्, अल्पबले एकटङ्काद्वर्धितव्या। चूर्णादीनामनुपानकम्॥ १॥

### चूर्णे गुडादिमानकल्पना।

इदानीमविशेषोक्तेषु शर्करागुडयोर्मानपूर्वकं प्रक्षेपविधिमाह—

**चूर्णे गुडः समो देयः शर्करा द्विगुणा भवेत्।**
**चूर्णेषु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत्॥ २॥**
**लिहेच्चूर्णं द्रवैः सर्वैर्घृताद्यैर्द्विगुणोन्मितैः।**
**पिबेच्चतुर्गुणैरेव चूर्णमालोडितं द्रवैः॥ ३॥**

**दी०**—चूर्णे इति। गुडसाम्यं चूर्णांशात्, शर्करापि द्विगुणिता चूर्णपरिमाणादित्यर्थः। चूर्णेष्विति बहुवचनत्वेन गुटिकालेहादिष्वपि भर्जितं हिङ्गु बोद्धव्यम्। सर्वैरित्यतो घृताद्यैरिति यत् पुनर्ग्रहणं कृतं तत्तोयक्षीरमद्यमूत्रादीनां व्यवच्छेदार्थम्। यत एतैः सह चूर्णस्य पानमुक्तमेतस्याग्रे, लेहस्तु मधुघृततैलादीनां प्रशस्तः। पिबेदित्यादिचतुर्गुणितात्र चूर्णभागात्, द्रवैरिति तोयक्षीरमद्यमूत्रादिभिः॥ २॥ ३॥

अथ **चूर्णादीनामनुपानमात्रां** दर्शयन्नाह—

**चूर्णावलेहगुटिकाकल्कानामनुपानकम्।**
**वातपित्तकफातङ्के त्रिद्व्येकपलमाहरेत्॥ ४॥**
**यथा तैलं जले क्षिप्तं क्षणेनैव प्रसर्पति।**
**अनुपानबलादङ्गे तथा सर्पति भेषजम्॥ ५॥**

**दी०**—चूर्णावलेहेति। अनुपानमिति अनु पश्चात् पानम्। औषधभक्षणोपरि यत्पीतं तदनुपानमित्यर्थः। "वातपित्तकफातङ्के त्रिद्व्येकपलमाहरेत्" इत्यनुक्रमो ज्ञेयः। आतङ्को रोगः तेन वातातङ्के त्रिपलं, पित्तातङ्के द्विपलं, कफातङ्के पलैकमिति तात्पर्यार्थः। अनुक्तेष्वनुपानेषु जलानुपानं प्रशस्तम्। तथाहि—'सर्वेषामनुपानं स्यान्माहेन्द्रं तोयमुत्तमम्' इति। सुश्रुतेऽपि—"सर्वानुपानेषु वरं वदन्ति मेध्यं यदन्तःशुचिभाजनस्थम्। लोकस्य जन्मप्रभृतिप्रशस्तं तोयात्मकाः सर्वरसाः प्रदिष्टाः" इति। अथानुपानस्य प्रयोजनं निर्देष्टुमाह—यथेति। भिषजा संस्कृतं द्रव्यं तथा अङ्गेषु प्रसर्पति, कुतः? अनुपानबलादनुपानशक्तितः। यथेति दृष्टान्तमाह—तैलमित्यादि सुगमम्॥ ४॥ ५॥

**गू०**—पित्तकफातङ्के पित्तादीनां त्रिद्व्येकपलं हरेत् पित्ते त्रिपलं, वाते द्विपलं, कफ एकपलं। द्रवेण निम्बादिद्रवेण॥ ४॥ ५॥

### अथ चूर्णार्थं भावनापरिमाणमाह—

**द्रवेण यावता सम्यक्चूर्णं सर्वं प्लुतं भवेत्।**
**भावनायाः प्रमाणं तु चूर्णे प्रोक्तं भिषग्वरैः॥ ६॥**

**दी०**—द्रवेणेति। सामान्येन सर्वं तोयादिकम्। अन्यदपि यद्द्रवीकृतं तदपि ग्राह्यं न दोषः। प्लुतमिति प्लावितं, यथा मन्थस्वरसस्वरूपं तद्वदिति भिषग्वरैरित्यनेन युक्त्या कर्तव्यमिति भावः॥ ६॥

**गू०**—यावत्प्लुतं व्याप्तं भवेत् तद्भावनाप्रमाणं। शेषं सुगमम्॥ ६॥

### अथामलक्यादिचूर्णं ज्वरादौ—

**आमलं चित्रकं पथ्या पिप्पली सैन्धवस्तथा।**
**चूर्णितोऽयं गणो ज्ञेयः सर्वज्वरविनाशनः॥ ७॥**
**भेदी रुचिकरः श्लेष्मजेता दीपनपाचनः।**

दी०—स यथेत्यनेन चूर्णानि दर्शयति ग्रन्थकारः। आमलमिति आमलादिकोऽयं गणः सर्वज्वरविनाशनो भवति। आमलमित्यामलकफलं, पथ्या हरीतकी, एतत् सकलं साम्यमनुक्तत्वात्। सर्वज्वरमित्यष्टविधं व्यवहारतस्तु विषमज्वरेषु प्रायशः प्रचरति। भेदी रुचिकरः इत्यादिपदद्वयं केचित् पठन्ति ॥ ७ ॥

गू०—आमलकं, पथ्या हरीतकी, शेषं सुगमम्॥७॥

**अथ पिप्पलीचूर्णं ज्वरे—**

**मधुना पिप्पलीचूर्णं लिहेत्कासज्वरापहम् ॥ ८ ॥**
**हिक्काश्वासहरं कण्ठ्यं प्लीहघ्नं बालकोचितम् ।**

दी०—मधुना इति। अयं मधुपिप्पलीयोगः कासज्वरादीन् हन्ति। विशेषेण बालानामुचितः। बालकेति सामान्येन त्रैविध्यं सूचयति। तद्यथा आषोडशाद्बालः स त्रिविधः क्षीरपः, क्षीराम्नादः, अन्नाद इति॥८॥

गू०—पिप्पलीचूर्णं माषमात्रं मधुना लिहेत्, नतु कर्षमात्रं तीक्ष्णद्रव्यत्वात् ॥ ८ ॥

**मेहादिकेषु त्रिफलाचूर्णम्—**

**एका हरीतकी योज्या द्वौ च योज्यौ बिभीतकौ ९**
**चत्वार्यामलकान्येवं त्रिफलैषां प्रकीर्तिता ।**
**त्रिफला मेहशोथघ्नी नाशयेद्विषमज्वरान् ॥ १० ॥**
**दीपनी श्लेष्मपित्तघ्नी कुष्ठहन्त्री रसायनी ।**
**सर्पिर्मधुभ्यां संयुक्ता सैव नेत्रामयाञ्जयेत् ॥ ११ ॥**

दी०—अथ त्रिफलाचूर्णमाह—एकेति। उक्तपरिमाणेन मेहादिकान् हन्तीति। यदा सैव त्रिफला सर्पिर्मधुभ्यामवलेहिता तदा नेत्रामयान् जयेदिति। अवलेहस्तु सायमुपयोज्यः। तथाह्युक्तम् 'ऊर्ध्वजत्रुगरोगघ्नी सायं स्यादवलेहिका'इति। कीदृशमुक्तपरिमाणं तदाह—एका हरीतकीत्यादि। एतद्गणनापरिमाणं त्रिफलायाः कथितं नतु तुलनायां विषममानं, यतः गुणकसंख्यामानेनैव समत्वमस्याः, कुतः ? द्विकार्षिकी हरीतकीति वाक्यानुरोधात्। तथाहि—'नवादिगुणसम्पन्नं तथैकत्वं द्विकर्षता। हरीतक्याः फले यत्र त्रयं तत् श्रेष्ठमुच्यते' इति। नवादिगुणोऽपि प्रसङ्गतो लिख्यते। यथा "नवा स्निग्धा घना वृत्ता गुर्वी क्षिप्ता तथाऽम्भसि। निमज्जेया प्रशस्तत्वाद्गुणकृत् सा प्रकीर्तिता" इति। बिभीतकमपि कर्षाक्षपर्यायनामभ्यां कथितमिति प्रसिद्धिः। उक्तं निघण्टौ 'बिभीतकः कर्षफलो वासन्तोऽक्षः कलिद्रुमः' इति तेन द्वे बिभीतकफले कथिते। आमलमपि कोलसंज्ञं वदन्ति, कोलस्त्वर्धकर्षस्य पर्यायनामेति। तेन चत्वार्यामलकानि भवन्ति। एतेन त्रिफलायास्तुलना साम्यमपि दर्शितम्। गणनायां च विषमत्वमिति, नतु तस्या भागेषु विषमता, यतो दृश्यते हि वृद्धवैद्यानां व्यवहारोऽयमेव। यद्यपि त्रिफला द्वितीयाप्यस्ति तथापि सर्वत्रैवाविशेषोक्तौ त्रिफलाशब्देन हरीतक्यादिकमेव गृह्यते। यदुक्तम् "द्राक्षाकाश्मर्यखर्जूरफलानीति फलत्रिका। इयं प्रोक्ता च द्वितीया त्रिफला चरकादिभिः" इति ॥ ९-११ ॥

गू०—एका हरीतकी, द्वौ बिभीतकौ, चत्वारि आमलकान्येवं त्रिफला स्यात्। अन्ये त्वेवमाहुः एका एकभागा हरीतकी, द्वौ विभागौ बिभीतकं, आमलकं चत्वारि भागानि, तथाच वचनं—'भागमेकं हरीतक्या द्वौ भागौ च बिभीतकात्। आमलक्यास्त्रयो भागाः सहैकत्र प्रयोजयेत्' इति। अन्ये सुश्रुतवाग्भटादयो भागप्रमाणं नेच्छन्ति। तथाच 'हरीतकी चामलकं बिभीतकादिभिस्त्रयम्। त्रिफलेयं स्मृता सद्भिरायुर्वेदविशारदैः' इति। मानेऽनुक्ते साम्यं स्यादित्युक्तेः समभागा त्रिफलाऽत्र सुश्रुतादिमते केचिद्भागमाहुः। अतः अक्षद्वयं प्रमाणं भूनिम्बो दृश्यते, **शार्ङ्गधरेण** युक्तभागवृद्ध्या त्रिफला लिखिता केवलं त्रिफलाचूर्णक्वाथविषयानुपानगुणविषयाण्यन्यथा नवायसचूर्णादौ विरोधः स्यात्, यतः केवलत्रिफलाक्वाथे चूर्णे च भागवृद्धिः दृश्यते। तथाच "पथ्यास्तिस्रो बिभीतक्यः षड् धात्र्यो द्वादशेति च। प्रस्थार्धसलिले क्वाथमष्टभागावशेषितं"मिति, नेत्ररोगे एका हरीतक्यादिचूर्णमात्रैव अतो न विरोधः। सर्पिर्मधुभ्यां नेत्रभयहारि सर्पिर्घृतं मधु च अतो द्वयं, अतुल्यं गृह्यते तुल्ययोर्मधुसर्पिषोर्विरुद्धत्वात्। अथ च अन्यैर्लिखितं हविर्मधुभ्यां समाभ्यामिति त्रिफलाप्रयोगे लिखितं। इति त्रिफलाचूर्णम् ॥ ९-११ ॥

**अथ त्र्यूषणचूर्णं दीपनादौ—**

**पिप्पली मरिचं शुण्ठी त्रिभिस्त्र्यूषणमुच्यते ।**
**दीपनं श्लेष्ममेदोघ्नं कुष्ठपीनसनाशनम् ॥ १२ ॥**
**जयेदरोचकं सामं मेहगुल्मगलामयान् ।**

दी०—अथ त्र्यूषणचूर्णमाह–पिप्पलीति। इदमपि त्रिकटुकपर्यायनाम्ना कथितं, त्रयाणां साम्यमित्यनुक्तत्वात्। साममित्यरोचकं दोषं वा। मेहगुल्मगलामयानिति मेहामयान् गुल्मामयान् गलामयान् ॥ १२ ॥

गू०—सुगमम् ॥ १२ ॥

### अथ पञ्चकोलमरुच्यादौ—

**पिप्पलीचव्यविश्वाह्वपिप्पलीमूलचित्रकैः ॥ १३ ॥**
**पञ्चकोलमिति ख्यातं रुच्यं दीपनपाचनम् ।**
**आनाहप्लीहगुल्मघ्नं शूलश्लेष्मोदरापहम् ॥ १४ ॥**

दी०—पञ्चकोलमप्याह—पिप्पलीति । अत्र चव्यं गजपिप्पलीमूलं, विश्वाह्वा शुण्ठी, पिप्पलीमूलं पिप्पलीजटा, चित्रकः स्वनामख्यातः । अत्रापि पञ्चानां समत्वम् । रुच्यं रुचिकरं, दीपनमग्नेः, पाचनमामादीनां, आनाह उदरापूरः । (ऊषकादिगणः—'ऊषकं सैन्धवं हिङ्गु काशीसद्वयगुग्गुलुः । शिलाजतु तुत्थकं च ऊषकादिरुदाहृतः । ऊषकादिः कफं हन्ति गणो मेदोविशोधनः । अश्मरीशर्करामूत्रशूलघ्नः कफगुल्मनुत्' इति । अयमपि पाठः क्वचित्) ॥ १३ ॥ १४ ॥

गू०—सुगमम् ॥ १३ ॥ १४ ॥

### इदानीं त्रिगन्धचातुर्जातकचूर्णमाह—

**त्रिगन्धमेलात्वक्पत्रैश्चतुर्जातं सकेशरैः ।**
**त्रिगन्धं सचतुर्जातं रूक्षोष्णं लघु पित्तकृत् ॥ १५ ॥**
**वर्ण्यं रुचिकरं तीक्ष्णं विषश्लेष्मामयाञ्जयेत् ।**

दी०—त्रिगन्धमिति । एलात्वक्पत्रैः कृत्वा त्रिगन्धं कथितं, चातुर्जातं तु सकेशरैरेलात्वक्पत्रैरेव प्रोक्तं, एला सूक्ष्मैला, त्वक् गुडत्वक्, पत्रं पत्रकं, केशरं नागकेशरम् । रूक्षोष्णमिति वीर्यतः लघुपाकित्वात् । वर्ण्यं कान्तिकरम् । तीक्ष्णं मरीचादिवत् ॥ १५ ॥

गू०—अथ त्रिसुगन्धं । एला त्वक्पत्रजं एतैस्त्रिभिस्त्रिगन्धमुच्यते । चतुर्जातकं सकेशरैरेतैश्चतुर्जातं केशरं । स्पष्टमन्यत् ॥ १५ ॥

### अथ जीवनीयगणः—

**काकोली क्षीरकाकोली जीवकर्षभकौ तथा ॥१६॥**
**मेदा चान्या महामेदा जीवन्ती मधुकं तथा ।**
**मुद्गपर्णी माषपर्णी जीवनीयो गणस्त्वयम् ॥ १७ ॥**
**जीवनीयगणः स्वादुर्गर्भसंधानकृद्गुरुः ।**
**स्तन्यकृद्बृंहणो वृष्यः स्निग्धः शीतस्तृषापहः ॥१८॥**
**रक्तपित्तं क्षयं शोषं ज्वरदाहानिलाञ्जयेत् ।**

दी०—जीवनीयगणमाह—काकोलीत्यादि । अत्र जीवनीयगणे काकोली क्षीरकाकोली च स्वनामतः प्रसिद्धा । किञ्चिदनयोर्ज्ञापनार्थं लक्षणमप्याह तद्यथा—काकोली मधुरा चर्वणतः क्षीरप्राया वर्णतः शुक्ला च । क्षीरकाकोली अत्यन्तक्षीरयुक्ता । एतद्वयं विटपविशेषेण दक्षिणोत्तरेतीव प्रसिद्धम् । जीवकर्षभकाविति । जीवकश्च ऋषभकश्चैतौ, जीवको मधुररसः ह्रस्वविटपः कूर्चशीर्षकः, ऋषभकोऽपि ह्रस्ववृक्षः सहस्रछिद्रो विषाणीति । तथेति ग्रहणेन एतद्द्वयमपि दक्षिणदेशे प्रचरति मेदा चान्या महामेदा इति मेदा स्वल्पपर्णी । मेदगन्धोल्पवृक्षसंज्ञकः, सच काष्ठविशेषो नखच्छेद्यो देशान्तरादवगन्तव्यः । महामेदाऽष्टच्छिद्रान्विता काष्ठविशेषः, सच दक्षिणोत्तरपथे पर्वतेषु प्रसिद्धः । तत्र देवमणिरिति प्रसिद्धः । जीवन्ती शाकविशेषः । सा चोत्तरापथे पर्वतेषु, वन्दा वृक्षशाखासु तत्रैवोत्पद्यते । मधुकं मधुयष्टीति जलजाता वल्लीविशेषः, मधुरा भक्षणतश्च, असौ विख्याता सर्वत्रैव, मुद्गपर्णी माषपर्णी चेति द्रव्ययुग्मं निजनाम्ना प्रसिद्धम् । मुद्गवत्पर्णं यस्याः सा मुद्गपर्णी । एवं माषपर्णीति सापि क्षुद्रा वनसम्भवा । मार्जारमोदिनीति माषपर्णी च कृष्णनाला हयपुच्छिकाकारा पर्वतोद्भवा मधुरा च । एभिरयं जीवनीयगणसंज्ञः स्वादुर्मधुररसः । गर्भसन्धानकृदिति वन्ध्यागर्भकरः प्रभावात्, स्तन्यकृदिति क्षीरवृद्धिकरः, बृंहणो धातुवृद्धिकरः, वृष्यः शुक्रवृद्धिकरः ॥ ॥ १६–१८ ॥

गू०—अयं जीवनीयगणः काश्मीरादौ प्रसिद्धः । काकोल्यादीनां लक्षणमाह ग्रन्थान्तरात्—"पीवरीसन्निभः कन्दः शुष्कसारं सुगन्धिकम् । काकोली क्षीरकाकोली अथोर्ध्वं तं विनिर्दिशेत् ॥ ईषच्छुक्ला तु काकोली क्षीरवत्पाण्डुरा परा । जीवकर्षभकौ श्वेतौ हेमाद्रिशिखरोद्भवौ ॥ जीवकः कूर्चिकाकार ऋषभो वृषशृङ्गवत् ॥ शुष्कार्द्रकनिभं कन्दं स्निग्धं मधुरशीतलम् । महामेदेति विख्याता दुर्गन्धो मेद उच्यते" ॥ जीवन्ती दोडीशाकः, मधुकं मधुयष्टी, मुद्गपर्णी मुगोनी, माषपर्णी माषोनी ॥ १६–१८ ॥

१–नास्ति 'ख' पुस्तके । २–ऊषः क्षारमृत्तिका । ३–'तेजपत्र' हि. भा.

१–वृक्षेति भ्रममात्रम् कन्दस्वरूपेणान्यत्र प्रतिपादनात् । मेदे काकोल्यौ जीवकर्षभकाविति राज्ञामपि दुर्लभाः, उत्तरापथे त्वसन्दिग्ध एव । २–पर्वतेष्वुपलक्षणम्, तेन समभूमावप्युद्भवति ।

अथाष्टकवर्गः—

**द्वे मेदे द्वे च काकोल्यौ जीवकर्षभकौ तथा ॥१९॥**
**ऋद्धिवृद्धी च तैः सर्वैरष्टवर्ग उदाहृतः ।**
**अष्टवर्गो बुधैः प्रोक्तो जीवनीयसमो गुणैः ॥ २० ॥**

दी०—अथाष्टवर्गमप्याह—द्वे मेदे इति। असौ गुणैः कृत्वा जीवनीयगणसाम्यः सचाष्टभिर्द्रव्यैर्मिलितः । तद्यथा—"द्वे मेदे द्वे च काकोल्यौ जीवकर्षभकौ तथा।" द्वौ च ऋद्धिवृद्धी च द्वे, अत्र ऋद्धिवृद्धी तु नाम्ना प्रसिद्धे । तयोश्चिह्नमिति यस्य गृहे ऋद्धिवृद्धी स्तः तस्य वसुवृद्धिर्भवतीति प्रसिद्धिः । अयंच सुश्रुतगणसंग्रहे जीवनीयाष्टकसंज्ञः । चरकयोगे तत् पूर्वोक्तं जीवनीयदशकमिति ॥ १९ ॥ २० ॥

गू०—द्वे मेदे मेदा, महामेदा, द्वे काकोल्यौ, काकोली क्षीरकाकोली, जीवकऋषभकौ एतौ द्वौ एषां लक्षणं जीवनीयगण उक्तं । ऋद्धिवृद्धिलक्षणमाह–'श्वेतलोमान्वितं कन्दं लताजातं सच्छिद्रकम् । ऋद्धिर्वृद्धिः सा विज्ञेया विख्याता कोषयामले । भूमिग्रन्थिसमा ऋद्धिर्वामवर्तफलं तथा । वृद्धिस्तु दक्षिणावर्ता फलाल्लक्ष्याकुया कृता(?)। एषामभावे औषधान्तरमाह—"मेदो जीवश्च काकोली ऋद्धिर्द्वन्द्वेऽपि चाऽसति । यष्टी विदार्यश्वगन्धा वाराहश्च क्रमात्क्षिपेत् ॥ वाराह्याश्च तथाऽभावे चर्मकाराकुला मता । वाराहीकन्द एवात्र चर्मकारालुको मतः ॥ अनूपे स भवेद्देशे वाराह इव लोमवान् । वाराहीकन्दसंज्ञस्तु पश्चिमे गृष्टिसंज्ञक" अयं अष्टकवर्गो गुणैर्जीवनीयसमः स्तन्यगर्भसन्धानादिकारकः ॥१९॥२०॥

अथ लवणपञ्चकं सृष्टविण्मूत्रादौ—

**सिन्धु सौवर्चलं चैव बिडं सामुद्रिकं गडम् ।**
**एकद्वित्रिचतुष्पञ्चलवणानि क्रमाद्विदुः ॥ २१ ॥**
**तेषु मुख्यं सैन्धवं स्यादनुक्ते तत्प्रयोजयेत् ।**
**सैन्धवाद्य रोमकान्तं ज्ञेयं लवणपञ्चकम् ॥ २२ ॥**

१–अष्टवर्गप्रतिनिधिः—मेदामहामेदाऽभावे शतावरी, जीवकर्षभकाभावे भूमिकूष्माण्डमूलं, काकोलीद्वयाभावे अश्वगन्धा, ऋद्धिवृद्ध्यभावे च वाराहीकन्दः (भा. मू. भ १) 'मेदाऽभावे अश्वगन्धा, महामेदे च शारिवा । जीवकर्षभकाभावे गुडूची वंशलोचना ॥ ऋद्ध्यभावे बला देया वृद्ध्यभावे महाबला' इत्यपि मतान्तरम् ॥

**मधुरं सृष्टविण्मूत्रं स्निग्धं सूक्ष्मं बलापहम् ।**
**वीर्योष्णं दीपनं तीक्ष्णं कफपित्तविवर्धनम् ॥ २३ ॥**

दी०—लवणपञ्चकमाह–सिन्ध्विति । अयं लवणपञ्चकसंज्ञको गणः सिन्धु सैन्धवं तच्च सिन्धूद्भवमित्यर्थः । सौवर्चलं प्रसिद्धम् । तदेव निर्गन्धं काचलवणमित्युच्यते । बिडं कृत्रिमं, तच्च प्रसारणीं कल्कमुक्तलवणसंयोगादग्निदाहेन निर्वृतं बिडमिति ख्यातं । सामुद्रिकमिति दक्षिणसमुद्रसमीपे भवं सामुद्रिकं, तच्च गडलवणाकारं विमलतरं ज्ञेयं । गडं तच्च रोमकं, तच्च शाकम्भरीदेशोत्पन्नम् । एकद्वित्रिचतुःपञ्चेति लवणक्रमो व्यस्तसमस्तग्रहणार्थं सूचितः यथा "द्वौ क्षारौ लवणत्रयं" इत्यादिवचनात् । त्रिलवणं सैन्धवसौवर्चलबिडमित्यर्थः । एवमन्यदपि बोध्यम् । तेषु मुख्यं सैन्धवं स्यादित्यनेनानुक्तमेषु मुख्यं लवणं तच्च सैन्धवं योज्यमिति भावः । ( ननु सैन्धवाद्यं रोमकान्तं लवणपञ्चकसंज्ञं पुनः किमर्थं कृतं । उच्यते–आदौ सैन्धवमन्ते रोमकस्य च ग्रहणं तन्त्रान्तरेऽपि नियतं मध्ये क्वचिद्विपरीतमिति । तथाच सुश्रुते "सैन्धवसामुद्रबिडसौवर्चलरोमकाणि पञ्च मुख्यानि" इति मतद्वयाभिप्रायेण पुनर्ग्रहणं न दोषः । पूर्वमतं तु चरके प्रतीतम् । मधुरं परिपाकात्, सुश्रुते तु यथापूर्वं स्वादूनि । स्वादुरत्र गुणः । यतः रसेषु गुणसंज्ञा इति केचित् । अपरे तु लवणेषु मधुरत्वमनुरससंज्ञकमामनन्ति । सृष्टविण्मूत्रमिति स्रंसकं, सूक्ष्ममिति रोमकूपादिप्रवेशकत्वात्, तीक्ष्णं मरीचादिवत् ॥ २१–२३ ॥

गू०—सिन्धु सैन्धवं, सौवर्चलं प्रसिद्धम्, बिडलवणं काचलवणमाहुः । सामुद्रं समुद्रलवणं गडं कृत्रिमं क्षारलवणं तदेवमेतानि एकद्वित्रिचतुष्पञ्चलवणानि क्रमादेवं विदुर्ऋषय इति शेषः । एकादिकथनं तु एकद्वित्रिचतुःपञ्चलवणादिक्षेपणार्थं । चूर्णादौ तेषु सैन्धवं मुख्यं तदनुक्तेऽपि क्षिपेत् । सैन्धवाद्यं रोमकान्तं ज्ञेयं लवणपञ्चकमिति पुनः पञ्चलवणाभिधानं रोगादौ पञ्चलवणभक्षणार्थमेतदुक्तं । मधुरं मधुरपाकः नतु मधुररसः । यतः मिष्टः मधुरमिति पाकक्रमे लिखितं सृष्टविण्मूत्रं प्रवर्तनशीलं सूक्ष्मं स्रोतःप्रवेशि कफवर्धनं मधुरपाकात् पित्तवर्धनं तीक्ष्णोष्णत्वात् ॥ २१–२३ ॥

१–नास्ति 'ख' पुस्तके ।

अथ क्षारयोगं दर्शयन्नाह—

खर्जिका यावशूकश्च क्षारयुग्ममुदाहृतम् ।
ज्ञेयौ वह्निसमौ क्षारौ खर्जिकायावशूकजौ ॥ २४ ॥
क्षाराश्चान्येऽपि गुल्मार्शोग्रहणीरुक्छिदः सराः ।
पाचनाः कृमिपुंस्त्वघ्नाः शर्कराश्मरिनाशनाः ॥२५॥

टी०—खर्जिकेति । तत्र खर्जिका प्रसिद्धा, 'साजी' शब्दवाच्या । यावशूको यवक्षारः । वह्निसमौ उष्णवीर्यतमौ । यावशूकश्चेति चकाराट्टङ्कणक्षारमपि क्षारत्रितयग्रहणेन योज्यम् । यथा 'क्षारत्रीणि रसेन्द्रशुद्धममृतं' इत्यादिवचनात् । अन्ये क्षाराश्चेति । अन्ये मुष्ककपाटलापामार्गगोजिह्विकाकदलीसुधाप्रभृतयः । गुल्मार्शो ग्रहणीरुक्छिदा इति । अत्र रुक्शब्दो गुल्मादिभिः प्रत्येकमभिसम्बध्यते । तेन गुल्मरुक् अर्शोरुक्ग्रहणीरुगिति । सराः स्रंसकाः, कृमिघ्नाः पुंस्त्वघ्नाश्च पुंस्त्वं वीर्यम् ॥ २४ ॥ २५ ॥

गू०—अथ क्षारकथनम् । खर्जिका सर्जीक्षारः, यावशूको यवक्षारः एतौ द्वौ क्षारौ खर्जिका यावशूकजौ वह्निसमौ अग्नितुल्यौ । अन्ये टङ्कणेन सह क्षारत्रयमाहुः । अन्येऽपि अर्कसेहुण्डचित्रसौभाञ्जनमूलकदल्यपामार्गादिजास्ते गुल्मादिच्छिदः ते क्षारकर्मणि चूर्णादौ च योजनीयाः ॥ २४ ॥ २५ ॥

## सुदर्शनचूर्णम्

त्रिफला रजनीयुग्मं कण्टकारीयुगं शठी ।
त्रिकटु ग्रन्थिकं मूर्वा गुडूची धन्वयासकः ॥ २६ ॥
कटुका पर्पटो मुस्तं त्रायमाणा च वालकम् ।
निम्बः पुष्करमूलं च मधुयष्टी च वत्सकम् ॥ २७ ॥
यमानीन्द्रयवो भार्ङ्गी शिग्रुबीजं सुराष्ट्रकम् ।
वचा त्वक्पद्मकोशीरं चन्दनातिविषाबलाः ॥ २८ ॥
शालिपर्णी पृष्ठपर्णी विडङ्गं तगरं तथा ।
चित्रको देवदारुश्च चव्यं पत्रं पटोलजम् ॥ २९ ॥
जीवकर्षभकौ चैव लवङ्गं वंशलोचना ।
पुण्डरीकं च काकोली पत्रकं जातिपत्रकम् ॥ ३० ॥
तालीसपत्रं च तथा समभागानि चूर्णयेत् ।
सर्वचूर्णस्य चार्धांशं कैरातं निक्षिपेत्सुधीः ॥ ३१ ॥
एतत्सुदर्शनं नाम चूर्णं दोषत्रयापहम् ।
ज्वरांश्च निखिलान्हन्यान्नात्र कार्या विचारणा ॥३२॥
पृथग्द्वन्द्वागन्तुजांश्च धातुस्थान्विषमज्वरान् ।
संनिपातोद्भवांश्चापि मानसानपि नाशयेत् ॥ ३३ ॥
शीतज्वरैकाहिकादीन्मोहं तन्द्रां भ्रमं तृषाम् ।
श्वासं कासं च पाण्डुं च हृद्रोगं हन्ति कामलाम्॥३४॥
त्रिकपृष्ठकटीजानुपार्श्वशूलनिवारणम् ।
शीताम्बुना पिबेद्धीमान्सर्वज्वरनिवृत्तये ॥ ३५ ॥
सुदर्शनं यथा चक्रं दानवानां विनाशनम् ।
तद्वज्ज्वराणां सर्वेषामिदं चूर्णं प्रणाशनम् ॥ ३६ ॥

टी०—इदानीं सुदर्शनचूर्णं निदर्शयन्नाह—त्रिफलेति । रजनीयुग्ममिति हरिद्राद्वयम् । कण्टकारीयुगमिति लघुकण्टकारी बृहत्कण्टकारी च । शठी कर्चूरभेदः, ग्रन्थिकं पिप्पलीमूलं, मूर्वा चोरस्नायुः, त्रायमणा स्वनामख्याता । वत्सकः कुटजः, शिग्रुबीजं शोभाजनं, श्वेतमरिचमिति प्रसिद्धम् । सुराष्ट्रकं मृत्तिकाविशेषः । फटकरीति लोके । केचित् सुराष्ट्रकमित्यस्य स्थाने श्वदंष्ट्रकमिति पठन्ति । तत्र श्वदंष्ट्रको गोक्षुरः, त्वक् वराङ्गज इति लोके । चन्दनं श्वेतं, पद्मकं काष्ठविशेषः, शालिपर्णी, पृष्ठपर्णी कवरद्वयशब्दवाच्यम् । तगरं स्वनामख्यातं पटोलपत्रं, जीवकर्षभकौ निजनाम्ना प्रसिद्धौ, पुण्डरीकं कमलं, तालीसपत्रं प्रसिद्धं मूम्यामलकी आमलीविटपविशेषः शेषं सुबोधम् । एतत् सकलं शाणमात्रं गृहीत्वा चूर्णं कर्तव्यम् । कैरातो भूनिम्बः, तच्च समस्तचूर्णस्य द्वौ भागौ कैरातचूर्णस्य चैको भाग इति । केचित् सर्वचूर्णस्य चार्धांशमित्यनेन सर्वचूर्णस्यैको भागः भूनिम्बस्य भागैक इति व्याख्यानयन्ति । अपरं तु अर्धांशमित्यनेनार्धस्य अंशं चतुर्थांशं तेन सममिति व्याख्यानयन्ति च । अंशश्चतुर्थांश इति प्रसिद्धः । एतेनाष्टमांशं कैरातमित्यर्थः । एतद्व्याख्यानद्वयमसङ्गतम् । कुतः ? सर्वजनासम्मतत्वात् दोषत्रयापहमिति प्रकुपितदोषत्रयं, व्यस्तं समस्तं वा । निखिलानित्यष्टधा । ननु पृथग् द्वन्द्वागन्तुजांश्चेति यत् पुनर्ग्रहणं कृतं तद्यर्थं अखिलानित्यनेनैव लभ्यते ? उच्यते पौनरुक्त्यं तु ज्वराणां यत् तदस्य ज्वरनाशनत्वे विशिष्टत्वं दर्शितम् । अतएव नात्र कापि विचारणेति ग्रहणं कृतं, तद्वा सर्वज्वरेष्वयं प्रायशः प्रचरति नान्येषु । तेन पुनर्ज्वरग्रहणं कृतं न दोषः । ऐकाहिकादीनिति । आदिशब्दात् तृतीयकचातुर्थकादयः । शूलशब्दस्त्रिकादिकं प्रत्येकमभिसम्बध्यते । तत्र त्रिकं वातस्थानम् । यथा सुदर्शनं विष्णुचक्रं दानवविनाशनं

भवति, तथा सर्वज्वराणामयमपि नाशनः, तस्मात्सुदर्शन इतिसंज्ञा ॥ २६-३६ ॥

**गू०**—अथ ज्वरे सुदर्शनचूर्णं । त्रिफला हरीतक्यामलकविभीतकानीति औषधत्रयं, प्रत्येकभागमेकं त्रयाणां फलानां समाहारस्त्रिफलेति उक्तत्वात् । रजनीयुग्मं हरिद्रा दारुहरिद्रेति द्वयं प्रत्येकभागमेकं, कण्टकारीयुग्मं बृहतीद्वयं, प्रत्येकं भागमेकं, सठी कर्चूरः, त्रिकटु शुण्ठी मरिचं पिप्पली प्रत्येकभागं, ग्रन्थिः पिप्पलीमूलं, मूर्वा मोरटा, गडूची अमृता, धन्वयासकं यवासा, कटुकी प्रसिद्धा, पर्पटः कटुपत्रः, मुस्तं नागरमुस्तं, त्रायमाणा प्रसिद्धा, वालकं उदीच्यं, निम्बः निम्बत्वक्, पुष्करं पुष्करमूलं, मधुयष्टी मधुकं, वत्सकः कुटजः, यवानी अजमोदा, इन्द्रयवः कुटजवीजं, भार्ङ्गी शिग्रुबीजं, शोभाञ्जनं तस्य वीजं, सुराष्ट्रजा स्फटिका वा वचा, त्वक् तज, पद्मकाष्ठं, उशीरं, चन्दनं रक्तचन्दनं, अतिविषा प्रसिद्धा, बला प्रसिद्धा, शालिपर्णी शालिपत्री, पृष्ठपर्णी सञ्जीवनी, विडङ्गं, तगरं, चित्रकं, देवदारु, चव्यं, पटोलपत्रं पटोलजं, जीवकर्षभकावष्टवर्गोक्तौ, तदभावे लवङ्गवंशलोचनौ, पुण्डरीकं श्वेतकमलम् । काकोली अष्टवर्गोक्ता तदभावे पत्रजं, जातिपत्रं तालीसपत्रम्, एतानि समभागानि सर्वचूर्णस्यार्धभागं कैरातं भूनिम्बं एतत्सुदर्शनं नाम चूर्णं दोषत्रयादिनाशकं तथा नानाविधान् ज्वरान्हन्यात् । सुगममन्यत् ॥ २६–३६ ॥

### अथ ज्वरे पिप्पलीचूर्णम् ।

**कासश्वासज्वरहरी त्रिफला पिप्पलीयुता ।**
**चूर्णिता मधुना लीढा भेदिनी चाग्निबोधिनी॥३७॥**

**दी०**—अथापराणि चूर्णान्याह—कासेति । अत्र त्रिफला समतुलिता ग्राह्या । पिप्पलीयुतेति । पिप्पली एकद्रव्यभागापेक्षया, मध्वत्रावलेहयोर्यं चूर्णमानं तु दोषबलापेक्षया ॥ ३७ ॥

**गू०**—त्रिफला हरीतक्यामलकविभीतकानि भागत्रयं, पिप्पलीभागैका एवंभूता चूर्णिता मधुनालोड्य त्रिफला कासश्वासज्वरहरा भवति । यद्वा भागवृद्ध्या त्रिफला, एका हरीतकी, द्वौ विभीतकौ, चत्वारि आमलकानि एवंभूता त्रिफला पिप्पलीयुता पिप्पली त्रिफलातुल्या कासादिज्वरहरा भवति । केवलत्रिफलाचूर्णस्य भागवृद्धिर्न बहुगुणयुक्तत्वात् ॥ ३७ ॥

**गू०—अथ कट्फलादिचूर्णं ज्वरादौ—**

**कट्फलं मुस्तकं तिक्ता शठी शृङ्गी च पौष्करम् ।**
**चूर्णमेषां च मधुना शृङ्गबेररसेन वा ॥ ३८ ॥**
**लेह्यं ज्वरहरं कण्ठ्यं कासश्वासारुचीर्जयेत् ।**
**वायुशूलं तथा छर्दिं क्षयं चैव व्यपोहति ॥ ३९ ॥**

**दी०**—कट्फलमिति । अयं कट्फलादिसंज्ञकश्चूर्णगणः । तत्र तिक्ता कटुरोहिणी, शृंगी कर्कटाख्या, पौष्करं पुष्करमूलम् । तदभावे कुष्ठं ग्राह्यम् । शृङ्गबेररसेनेति आर्द्रकरसेन चतुर्गुणेन सह पानमुक्तं व्यवहारात्तु लेह्यम् । लेहमस्य मधुना द्विगुणेनेत्यर्थः । वायुशूलमिति ग्रहणं वातजनितशूलम् । एके वायुशूलमिति पठन्ति तत्र गुदागतवातपीडामित्यर्थः । ननु वातादेव सकलशूलस्योपपत्तिरिति, यतः 'न वातेन विना शूलं' इत्यादिवचनं, तत् कथमत्र पृथग् वातशूलग्रहणम् ? उच्यते वायुशूलं वातप्रायं शूलं न पित्तकफादिप्रायं, यस्मात् 'शूलान्यष्टौ बुधा जगुः' इति ॥ ३८ ॥ ३९ ॥

**गू०**—कट्फलं काफलं, पौष्करं पुष्करमूलं, मुस्तं नागरमुस्तं, तिक्ता कटुकी, सठी कर्चूरः, शृङ्गी कर्कटशृङ्गी, एषां चूर्णं मधुना शृंगबेरमार्द्रकं तद्रसेन च लिहेज्ज्वरहरं स्यात् ॥ ३८ ॥ ३९ ॥

### अथ बृहत्कट्फलादिचूर्णं—

**कट्फलं पौष्करं शृङ्गी मुस्ता त्रिकटुकं शठी ।**
**समस्तान्येकशो वापि सूक्ष्मचूर्णानि कारयेत् ॥४०॥**
**आर्द्रकस्वरसक्षौद्रैर्लिह्यात्कफविनाशनम् ।**
**शूलानिलारुचिच्छर्दिकासश्वासक्षयापहम् ॥ ४१ ॥**
**कट्फलं पौष्करं कृष्णा शृङ्गी च मधुना सह ।**
**श्वासकासज्वरहरः श्रेष्ठो लेहः कफान्तकृत् ॥ ४२ ॥**

**गू०**—त्रिकटुकं त्रिकटुसमस्तानि मिलित्वैकशः भिन्नं वा चूर्णं तुल्यं मेलयेत् । आर्द्रकस्वरसैस्तथा क्षौद्रैर्लेहयेत् कफादिनाशकं भवति ॥ ४०–४२ ॥

### शृङ्गीचूर्णम् ।

**शृङ्गीं प्रतिविषां कृष्णां चूर्णितां मधुना लिहेत् ।**
**शिशोः कासज्वरच्छर्दिशान्त्यै वा केवलां विषाम् ४३**

शृंगीमिति । एतत् शृंग्यादिचूर्णं बालरोगेऽतीव प्रशस्तम् । शृङ्गी कर्कटाख्या, प्रतिविषा शुक्लकन्दा, कृष्णा

१–'मोरहरी' हि. भा. । २–अतीस ।

१–दीपिकायां नाऽस्ति ।

पिप्पली । वैत्यनेन योगान्तरमाह–केवलां विषामिति । एवमतिविषां मधुना सहावलिह्य बालो ज्वरेभ्यो विमुक्तः स्यादित्यर्थः । तथाच तन्त्रान्तरे "शृंगीं सकृष्णातिविषां विचूर्ण्य लेहं विदध्यान्मधुना शिशूनाम् । कासज्वरच्छर्दिभिरर्दितानां समाक्षिकं चातिविषामथैकाम्' इति । बालानामतीसारेऽपि मुस्तान्वितोऽयं योगः प्रचरति । चतुर्भुजीति तत्र चौर्हेषदिति शब्दवाच्यः । तथाहि "घनकृष्णारुणाशृङ्गीचूर्णं क्षौद्रेण संयुतम् । शिशोर्ज्वरातिसारघ्नं कासं श्वासं वमिं जयेत्" इति ॥ ४३ ॥

गू०—शृंगी कर्कटशृङ्गी, प्रतिविषा अतिविषा, कृष्णा पिप्पली, एषां चूर्णं मधुना लिहेत् शिशुर्बालस्तस्य कासादिशान्त्यै केवलमेकां विषां अतिविषां मधुना लिहेत् । इति शृङ्गीचूर्णं बालज्वरादौ ॥ ४३ ॥

## यवक्षारादिचूर्णम्—

**(यवक्षारविषाशृङ्गीमागधीपौष्करोद्भवम् ।**
**चूर्णं क्षौद्रयुतं लीढं पञ्चकासाञ्जयेच्छिशोः ॥४४॥)**

अतीसारे शुण्ठ्यादिचूर्णमाह—

**शुण्ठीप्रतिविषाहिङ्गुमुस्ताकुटजचित्रकैः ।**
**चूर्णमुष्णाम्बुना पीतमामातीसारनाशनम् ॥ ४५ ॥**

दी०—शुण्ठीति । हिङ्ग्वत्र भर्जितं देयम् । कुटजमत्रेन्द्रयवं पाचनत्वात् । उष्णाम्बुनेति चतुर्गुणितोष्णपानीयेन सहालोड्य त्रिदोषेण तु क्वाथवद्विलाव्य पिबेत् चूर्णकल्पनायां कथितत्वात् ॥ ४४–४५ ॥

गू०—अथ शुण्ठ्यादिचूर्णमामातीसारादौ । प्रतिविषा अतिविषा ॥ ४५ ॥

## अथ हरीतक्यादिचूर्णमामातीसारादौ—

**हरीतकी प्रतिविषा सिन्धु सौवर्चलं वचा ।**
**हिङ्गु चेति कृतं चूर्णं पिबेदुष्णेन वारिणा ॥ ४६ ॥**
**आमातीसारशमनं ग्राहि चाग्निप्रबोधनम् ।**

दी०—अपरमप्याह–हरीतकीति । सिन्धु सैन्धवं हिङ्ग्वत्र भार्जितं देयम् । पानमानं तु पूर्ववत् । अयं योगो ग्रहण्यामपि प्रशस्तः । एके हरीतकीत्यागेनापि योगमेनं कुर्वन्ति । तदुक्तमत्रैव परिभाषाध्याये 'व्याधेरयुक्तं यद्द्रव्यं गणोक्तमपि तत् त्यजेत्' इत्यादिवचनात् ॥ ४६ ॥

१–'चौदी' पा. । २–प्रक्षिप्तम् ।

## लघुगङ्गाधरचूर्णम् ।

**मुस्तमिन्द्रयवं बिल्वं लोध्रं मोचरसं तथा ॥ ४७ ॥**
**धातकीं चूर्णयेत्तक्रगुडाभ्यां पाययेत्सुधीः ।**
**सर्वातीसारशमनं निरुणद्धि प्रवाहिकाम् ॥ ४८ ॥**
**लघुगङ्गाधरं नाम चूर्णं संग्राहकं परम् ।**

दी०—इदानीं गङ्गाधरसंज्ञकं चूर्णद्वयमाह मुस्तमित्यादि । एतल्लघुगङ्गाधरं नाम चूर्णं संग्राहकं परं विख्यातम् । अत्र बिल्वं बिल्वपेशिका, मोचरसः शाल्मलीनिर्यासः, धातकी धातकीकुसुमानि । अत्र तक्रोपलक्षितत्वात् मथितमपि ग्राह्यम् । अन्यतो दर्शनाद्वा 'मथितगुडसाम्प्रयुक्तम्' इति । ननु मथिततक्रयोः को भेदः ? उच्यते 'सजलं गोरसं घोलं मस्तु तच्चार्धवारिकम् । तक्रं त्रिभागभिन्नं तु केवलं मथितं स्मृतं' इति । कल्पना चास्य मुस्तादिचूर्णं कार्षिकं मथितचतुर्गुणेन गुडकर्षविमर्दितेन सह पीतम् । पक्वातीसारे योगोऽयम् ॥ ४७ ॥ ४८ ॥

गू०—प्रवाहिकां निरुणद्धि रोधयेत् ॥ ४७ ॥ ४८ ॥

## अथ वृहद्गङ्गाधरचूर्णम्—

**मुस्तारलुकशुण्ठीभिर्धातकीलोध्रवालकैः ॥ ४९ ॥**
**बिल्वमोचरसाभ्यां च पाठेन्द्रयववत्सकैः ।**
**आम्रबीजं प्रतिविषा लज्जालुरिति चूर्णितम् ॥ ५० ॥**
**क्षौद्रतण्डुलपानीयैः पीतैर्याति प्रवाहिका ।**
**सर्वातिसारग्रहणी प्रशमं याति वेगतः ॥ ५१ ॥**
**वृद्धगङ्गाधरं चूर्णं सरिद्वेगस्य रोधकम् ।**

दी०—अन्यदपि । मुस्तेति । अत्रारलुको वृक्षविशेषः स्वनामप्रसिद्धः । वत्सकः कुटजत्वक् । आम्रबीजमिति आम्रफलास्थिमज्जा, लज्जालुर्विख्याता । अत्रापि द्विगुणितेन क्षौद्रेण विमृद्य चतुर्गुणेन तण्डुलजलेन पेयम् । सरिद्वेगस्य रोधकमिति नदीप्रवाहावरोधकत्वेनोत्कृष्टप्रभावयुक्तः, अतएव गङ्गाधरसंज्ञा ॥४९॥५१॥

गू०—मुस्तं नागरं, अरलुकः स्योनाकः, धातकी वृक्षस्तस्य पुष्पाणि, लोध्रः प्रसिद्धः, वालकं उदीच्यं, लज्जालुः लज्जावन्ती । स्पष्टमन्यत् ॥ ४९–५१ ॥

## अथाजमोदादिचूर्णमतीसारे—

**अजमोदा मोचरसं सशृङ्गवेरं सधातकी कुसुमम् ।**
**गोदधिमथितयुक्तं गंगामपि वाहिनीं रुंध्यात्॥५२॥**

## मरिचादिचूर्णं—

**तक्रेण यः पिबेन्नित्यं चूर्णं मरिचसंभवम् ।**

१–'०रोऽपि बन्धकम्' पा० ।

चित्रसौवर्चलोपेतं ग्रहणी तस्य नश्यति ।
उदरप्लीहमन्दाग्निगुल्मार्शोनाशनं भवेत् ॥ ५३ ॥

**दी०**—अथ ग्रहण्यां प्रयोगानाह—तक्रेणेति। इदं मरिचाद्यं नाम चूर्णं ग्रहण्यां प्रशस्तम् । मरिचचित्रकसौवर्चलं समचूर्णं सार्धशाणद्वयं चतुर्गुणेन तक्रेण सह पिबेत् । नित्यमित्यनेन सेव्यमिदं महारोगोपयुक्तत्वात् ॥ ५२ ॥ ५३ ॥

**गू०**—अजमोदा, मोचरसः, शृङ्गबेरं–शुण्ठी, धातकी, गोदधिमथितं घोल उच्यते । गङ्गामपि वाहिनीं वहनशीलां प्रवाहिणीं रुन्ध्यात् ॥ ५२ ॥ ५३ ॥

**अथ कपित्थाष्टकं चूर्णं ग्रहण्यादौ—**

अष्टौ भागाः कपित्थस्य षड्भागा शर्करा मता ।
दाडिमं तिन्तिडीकं च श्रीफलं धातकी तथा ॥५४॥
अजमोदा पिप्पली च प्रत्येकं स्युस्त्रिभागिकाः ।
मरिचं जीरकं धान्यं ग्रन्थिकं वालकं तथा ॥ ५५ ॥
सौवर्चलं यमानी च चातुर्जातं सचित्रकम् ।
नागरं चैकभागाः स्युः प्रत्येकं सूक्ष्मचूर्णितम् ॥५६॥
कपित्थाष्टकसंज्ञं स्याच्चूर्णमेतद्गलामयान् ।
अतीसारं क्षयं गुल्मं ग्रहणीं च व्यपोहति ॥ ५७ ॥

**दी०**—इदानीं कपित्थकाष्टकं नाम चूर्णं दर्शयन्नाह—अष्टाविति । दाडिममत्राम्लं, 'अनारदाना' शब्दवाच्यम् । तिन्तिडीकं स्वनामप्रसिद्धम् । अम्लफलमित्येके । श्रीफलं बिल्वम् । अत्रापि तिन्तिडीकस्थाने वृक्षाम्लमिति, ग्रन्थिकस्थाने च तिन्तिडीकमिति केचित् । चातुर्जातकमिति त्वक्पत्रैलं सकेशरमित्यर्थः । कर्तव्यविधावपि कपित्थफलमष्टभागिकमेकद्रव्यभागापेक्षया, द्रव्यं तु एकभागसंज्ञितम् । शर्करा षड्भागा, दाडिमादीनि पिप्पलीपर्यन्तानि प्रत्येकं त्रिभागिकं, मरिचादिनागरान्तं भागैकं सत्येकमिति भावः । एतेन किमुक्तम्? कपित्थं कर्षाष्टकं, सिता षट्कर्षप्रमिता, दाडिमादिषट्द्रव्यमष्टादशकर्षमितं, मरिचादित्रयोदशद्रव्याणि त्रयोदशकर्षाणीत्यर्थः । अस्य खाण्डवसंज्ञा तन्त्रान्तरे । कुतः? "लवणाम्लसितायुक्तं चूर्णं स्यात् खाण्डवं मतम्" इत्यादिवचनात् । कपित्थाष्टकसंज्ञयाऽस्य रूढिः ॥५४–५७॥

**गू०**—कपित्थस्याष्टौ भागाः पलानि वा कर्षाणि वा टङ्कानि वा भागशब्देन पलादीनां अभिधानात् । शर्करा सिता षड्भागा षट्पलादिका, दाडिमाद्याः षट्, प्रत्येकं त्रिभागिका स्यादेतच्चूर्णितं कपित्थाष्टकं स्यात् तच्च गलामयादिकान् व्यपोहतीति स्पष्टार्थः । अत्र कपित्थाष्टके केचित्प्रकारान्तरेण भागमानमिच्छन्ति तदर्थं शतश्लोक्यां बोपदेवमतमाह—"धान्याजाजीयमानी रुचकजलचतुर्जातविश्वोषणाग्निग्रन्थ्येकांशं त्रिभागं करककणमदादीप्यवृक्षाम्लबिल्वम् । श्वेताषट्कं कपित्थाष्टकमिदमरुचिं गुल्मयक्ष्मातिसारं साग्नीसादं ग्रहणिगलगदश्वासकासान्निहन्ति" । अस्य व्याख्यानं च धान्यादिग्रन्थिकान्तं त्रयोदशौषधमेकांशं प्रत्येकमेककर्षं, करकादिबिल्वान्तं षोडशौषधं त्रिभागं प्रत्येकं कर्षत्रयमात्रं, करकं दाडिमं, कणा पिप्पली, मदा धातकी, दीप्यो अजमोदः, वृक्षाम्लं तिन्तिडीकं, बिल्वफलं, श्वेता शर्करा, तस्याः षट्कं पूर्ववत् षट्कर्षाः कपित्थं दधिफलं शेषं स्पष्टं पूर्ववत् । अष्टौ कर्षा अत्र कपित्थाष्टके येऽन्ये भागप्रकारमिच्छन्ति, तत्र सूक्तिशून्यत्वात् त्यक्ता इति **बोपदेवमतं, वङ्गसेनादि**निबन्धकारपाठे न केचिद्भागप्रकारान्तरमाहुस्तदपि लिख्यते । तदुक्तं **वङ्गसेने** "यमानीपिप्पलीमूलचतुर्जातकनागरैः । मरिचाग्निजलाजाजीधान्यसौवर्चलैः समैः ॥ वृक्षाम्लधातकीकृष्णाबिल्वदाडिमदीप्यकैः । त्रिगुणैः षड्गुणसितैः कपित्थाष्टगुणीकृतैः॥ चूर्णोऽतीसारग्रहणीक्षयगुल्मगलामयान् । कासश्वासाग्निमांद्यार्शःपीनसारोचकान् जयेत्" इति । यवान्यादिसौवर्चलान्तैः समैः प्रत्येकमेकभागैः वृक्षाम्लादिदीप्यकान्तैस्त्रिगुणैः प्रत्येकं त्रिभागैः षड्गुणसितैः कपित्थाष्टगुणैः कृतैः कपित्थाष्टभागैरिति पूर्वोक्त एवार्थ इत्येके । बोपदेवेनाप्यष्टौ व्याख्यातत्वात् । चूर्णं इति प्रस्तुतत्वात् पुंलिङ्गे । तथाच **शतश्लोक्यां** चूर्णस्तुल्यसितो बलाग्निरुचिभ्यश्चेति चातुर्जातादिचूर्णे लिखितं अन्य एवं व्याख्यानयन्ति 'यवान्यादित्रयोदशौषधयः समाः' प्रत्येकं टङ्कमात्रास्त्रयोदशटङ्का एतैः तिन्तिडीकाद्यैः षड्भिस्त्रिगुणैस्त्रयोदशेभ्यस्त्रिगुणैरेकोनचत्वारिंशटङ्कैः षड्गुणसितैस्त्रयोदशेभ्य एवाष्टसप्ततिटङ्कैः' । अस्मिन्पक्षे सर्वतो द्विगुणा सिता भवति यथा लुम्बादौ अर्धांशां केचिच्छर्करां मेलयन्ति ॥ ५४–५७॥

## दाडिमाष्टकम् ।

दाडिमी द्विपला ग्राह्या खण्डाद्दशपलानि च ।
त्रिगन्धस्य पलं चैकं त्रिकटु स्यात्पलत्रयम् ॥ ५८ ॥
एतदेकीकृतं सर्वं चूर्णं स्याद्दाडिमाष्टकम् ।
रुचिकृद्दीपनं कण्ठ्यं ग्राहि कासज्वरापहम् ॥ ५९ ॥

**दी०**—दाडिमीति । अयं लघुगुरुभेदेन दाडिमाष्ट-

कसंज्ञको योगोऽतीसारादीनां प्रशस्तः । खण्डाद्दशपलानीति संमिलितचूर्णात् पलद्वयन्यूना द्विगुणा शर्करा ज्ञेया तीक्ष्णत्वात् । त्रिगन्धस्य पलमेकं मिलितस्येत्यर्थः । त्र्यूषणस्यापि पलत्रयं प्रत्येकं पलमित्यर्थः । खण्डाद्दशपलानि चेत्यत्र स्थाने खण्डादष्टपलानि चेति केचित् पठन्ति । तन्मते चूर्णसमं खण्डमिति व्याधिविहितत्वात्, अयं पक्षः प्रचरति । साम्यार्थं त्रिगन्धस्य प्रत्येकं पलं ग्राह्यम् । दाडिमाष्टकेत्यष्टमं द्रव्यमत्र दाडिमं तेन दाडिमाष्टकं प्रोक्तम् ॥ ५८ ॥ ५९ ॥

गू०—अथ दाडिमाष्टकम् । दाडिमादम्लदाडिमात् द्वे पले, खण्डात्सिताया अष्टपलानि, त्रिगन्धस्यैलात्वक्पत्रकाणामेकं पलं समुदितस्य त्रिगन्धस्य पलं, त्रिकटु शुण्ठीमरिचपिप्पल्यः एषां पलत्रयं, प्रत्येकमेतदेकीकृतं दाडिमाष्टकं भवति । दाडिमादीनि अष्टौ द्रव्याणि यत्र तद्दाडिमाष्टकम् । स्पष्टमन्यत् ॥ ५८ ॥ ५९ ॥

### अथ बृहद्दाडिमाष्टकं अतीसारादौ–

**दाडिमस्य पलान्यष्टौ शर्करायाः पलाष्टकम् ।**
**पिप्पली पिप्पलीमूलं यमानी मरिचं तथा ॥ ६० ॥**
**धान्यकं जीरकं शुण्ठी प्रत्येकं पलसंमितम् ।**
**कर्षमात्रा तुगाक्षीरी त्वक्पत्रैलाश्च केशरम् ॥ ६१ ॥**
**प्रत्येकं कोलमात्राः स्युस्तच्चूर्णं दाडिमाष्टकम् ।**
**अतीसारं क्षयं गुल्मं ग्रहणीं च गलग्रहम् ॥ ६२ ॥**
**मन्दाग्निं पीनसं कासं चूर्णमेतद्व्यपोहति ।**

दी०—द्वितीयं दाडिमाष्टकमाह—दाडिमस्येति । एतद्बृद्धदाडिमाष्टकसंज्ञं चूर्णमतीसारादीन् हन्ति । अत्र तुगाक्षीरी वंशरोचना तदभावे तवक्षीरं ग्राह्यम् । तवक्षीरं कर्चूरकृतः प्रकारः । सा कर्षप्रमाणा त्वक् वराङ्गम्, पत्रं पत्रकं, एला सूक्ष्मैला, केशरं नागकेशरं, एतच्चतुष्टयं कोलमात्रम् । कोलं कर्षार्धं, तेन संमिलितं टङ्काष्टकमित्यर्थः । शेषं सुगमम् । गलग्रहं गलरोगम् । अस्याष्टकसंज्ञा पलाष्टकेन बोद्धव्या नतु द्रव्यसंख्यया॥६०–६२॥

गू०—तुगाक्षीरी वांशी तदादौ कर्षमात्रा, कोलः टङ्कद्वयं स्यात् । दाडिममष्टौ अष्टपलानि यत्र तद्दाडिमाष्टकं अत्र भागानिरुक्तिः, औषधबहुत्वात्पूर्वं अधरं भागाल्पत्वात् पूर्वं लघुदाडिमाष्टकं ततोऽतीसारादिकं व्यपोहति ॥ ६०—६२ ॥

### पिप्पल्यादिचूर्णम् ।

**(पिप्पली बृहती व्याघ्री यवक्षारकलिङ्गकाः ॥६३॥**
**चित्रकं सारिवा पाठा शठी लवणपञ्चकम् ।**
**तच्चूर्णं पाययेद्दध्ना सुरयोष्णाम्बुनापि वा ॥ ६४ ॥**
**मारुतग्रहणीदोषशमनं परमं हितम् ।)**

### अथ लवङ्गादिचूर्णं अरोचकादौ—

**लवङ्गं शुद्धकर्पूरमेलात्वङ्नागकेशरम् ॥ ६५ ॥**
**जातीफलमुशीरं च नागरं कृष्णजीरकम् ।**
**कृष्णागरुस्तुगाक्षीरी मांसी नीलोत्पलं कणा ॥ ६६ ॥**
**चन्दनं तगरं वालं कङ्कोलं चेति चूर्णयेत् ।**
**समभागानि सर्वाणि सर्वेभ्योऽर्धा सिता भवेत् ६७**
**लवङ्गाद्यमिदं चूर्णं राजार्हं वह्निदीपनम् ।**
**रोपणं तर्पणं वृष्यं त्रिदोषघ्नं बलप्रदम् ॥ ६८ ॥**
**हृद्रोगं कण्ठरोगं च कासं हिक्कां च पीनसम् ।**
**यक्ष्माणं तमकं श्वासमतीसारमुरःक्षतम् ॥ ६९ ॥**
**प्रमेहारुचिगुल्मादीन्ग्रहणीमपि नाशयेत् ।**

दी०—अथ लवङ्गाद्यं चूर्णं दर्शयन्नाह—लवङ्गमिति । शुद्धकर्पूरमिति शुद्धं च तत् कर्पूरं चेति, पक्वकर्पूरमित्यर्थः । अतिलघुत्वात् । तथाहि—"पक्वस्तु द्विविधः प्रोक्तो सदलो निर्दलस्तथा । दृढश्च पीतवर्णश्च विशेषाल्लघुतां गतः" इति । केचित्तु शुद्धशब्देन जात्युत्कृष्टं गृह्णन्ति, तच्च ईशावास इति संगीतम् । तथाह्युक्तम्——"ईशावासो हिमसंज्ञः पोताश्रय इति त्रिधा । अपक्वे कथ्यते भेदः कर्पूरे तु भिषग्वरैः" । स्वरूपेणाऽपि——"ईशावासो भृशं श्वेतो हिमसंज्ञस्तु पाण्डुरः । श्वेतपोताश्रयश्चेति" सर्वे । गुणेनापि "रसवीर्यविपाकतः । प्रभावेणापि ते प्रोक्ताः पूर्वं पूर्वं गुणाधिकाः" । प्रकृष्टत्वेनापि——"तत्रापि यो न च क्षुद्रः स्फटिकाभः स उत्तमः" इति । कृष्णजीरकमिति पाश्चात्यं खुरासानीति लोके । कृष्णागुरु अगुर्विति प्रसिद्धम् । तुगाक्षीरी वांशी मांसी जटाख्या । नीलोत्पलोपलक्षितत्वात् पद्मबीजं ग्राह्यं, कणा पिप्पली, चन्दनं श्वेतं, तगरं स्वनामख्यातं, वालं वालकं, कङ्कोलफलद्रव्यं निजनामप्रसिद्धं, तच्च द्विविधं मरीचकङ्कोलं क्षीरकङ्कोलं चेति । एतत् सकलं द्रव्यं समभागं चूर्णयितव्यं, सर्वेभ्यः सितार्धा भवेत् । तेन सकलचूर्णस्य भागैकं, सितायाश्च भागैकं, तच्चूर्णसमाना च सितेत्यर्थः । एके सितार्धा भवेदित्यनेन संमितचूर्णस्य द्वौ भागौ सिताया एको भाग इति व्याख्यानयन्ति, एतदसङ्गतं व्यवहारात् । राजार्हमिति प्रभुयोग्यं अतिसुगन्धत्वात् बहुलगुणकरत्वाच्च । रोपणं शरीरस्थि–

१–प्रक्षिप्तम् ।

रकरं व्रणरोपणं च, तर्पणं धातूनां तृप्तिजनकं, वृष्यं शुक्रवृद्धिकारि, बलमोजस्तत्प्रदमित्यर्थः । तमकः श्वासभेदः, उरःक्षतं क्षयरोगे पठितम् । अस्याग्रे कर्पूराद्यं नाम चूर्णं केचित् पठन्ति । तच्च बहुपुस्तकेषु न दृश्यते, क्षेपकोऽयं इति मन्यमानैरस्माभिर्न लिखितः । **कर्पूरादिः** क्वचिल्लिखितः "सकर्पूरं च कङ्कोलं जातीफलदलं समम् । लवङ्गनागमरिचकृष्णाशुण्ठीविवर्धितम् । चूर्णं सितासमं ग्राह्यं रोचनं क्षयकासनुत् । वैस्वर्यश्वासगुल्मार्शःकण्ठामयभयापहम् । प्रयुक्तं चान्नपानेषु भिषजा रोगिणां हितम्" । इति **कर्पूराद्यं चूर्णम्** । **अथ लघुलवङ्गादिचूर्णं तन्त्रान्तरे**—"लवङ्गजातीफलपिप्पलीनां भागान् प्रकल्प्याक्षसमानशेषान् । पलार्धमेकं मरिचस्य दत्वा पलानि चत्वारि महौषधस्य ॥ सितासमं चूर्णमिदं प्रसह्य रोगानिमानाशु बलान्निहन्ति । कासज्वरारोचकगुल्ममेहश्वासाग्निमान्द्यं ग्रहणीविकारान्" इति । लघुलवङ्गादिचूर्णम् ॥ ६३-६९ ॥

**गू०**—शुद्धकर्पूरः निर्मलभीमसेन, तुगाक्षीरी वंशरोचना, मांसी जटामांसी, नीलोत्पलं नीलकमलं, कणा पिप्पली, चन्दनं श्वेतं, अगरु, वालं उदीच्यं, कङ्कोलं मरिचकंकोलं, स्पष्टमन्यत् ॥ ६३-६९ ॥

## अथ जातीफलाद्यं चूर्णं ग्रहण्यादौ—

**जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः ॥ ७० ॥**
**कर्पूरचन्दनतिलैस्त्वक्क्षीरीतगरामलैः ।**
**तालीसपिप्पलीपथ्यास्थूलजीरकचित्रकैः ॥ ७१ ॥**
**शुण्ठीविडङ्गमरिचैः समभागविचूर्णितैः ।**
**यावन्त्येतानि सर्वाणि कुर्याद्भङ्गां च तावतीम्॥७२॥**
**सर्वचूर्णसमा देया शर्करा च भिषग्वरैः ।**
**कर्षमात्रं ततः खादेन्मधुना प्लावितं सुधीः ॥ ७३ ॥**
**अस्य प्रभावाद्ग्रहणीकासश्वासारुचिक्षयाः ।**
**वातश्लेष्मप्रतिश्यायाः प्रशमं यान्ति वेगतः ॥७४॥**

**दी०**—इदानीं जातीफलाद्यं नाम चूर्णं दर्शयन्नाह—जातीफलेति । अत्र चन्दनं श्वेतं चूर्णत्वात् । तिलैरिति कृष्णतिलाः निस्तुषा ग्राह्याः । त्वक्क्षीरी वंशरोचना, तगरं प्रसिद्धं, (आमलमामलकफलं, पथ्या हरीतकी, स्थूलजीरकः कृष्णजीरकः एतत्सकलं समभागं गृहीत्वा चूर्णितं) अस्य भागमेकं भङ्गाया भागैकमिति तेन सकलचूर्णसमाना भङ्गा देया इति । भङ्गाऽत्र भर्जिता देया व्यवहारात् । सर्वचूर्णसमा देया शर्करा चेति तेन द्वयोः समा शर्करेत्यर्थः । एतत् सिद्धं यथोचितमात्रं मधुना प्लाव्य भक्ष्यं, नात्र कर्षमानं नियतं यतः—"मात्राया नास्त्यवस्थानम्" इत्यादिवचनात् ॥ ७०-७४ ॥

**गू०**—एला सूक्ष्मा, पत्रं पत्रजत्वक् । कृष्णा अगरु, त्वक्क्षीरी वांशी, तगरं, आमलकं, तालीसं, पथ्या हरीतकी, स्थूलजीरकं श्वेतजीरकम् । शेषं सुगमम् ॥ ७०-७४ ॥

## अथ महाखाण्डवचूर्णमरुच्यादौ—

**मरिचं नागपुष्पाणि तालीसं लवणानि च ।**
**प्रत्येकमेकभागाः स्युः पिप्पलीमूलचित्रकैः ॥ ७५ ॥**
**त्वक्कणा तिन्तिडीकं च जीरकं च द्विभागिकम् ।**
**धान्याम्लवेतसौ विश्वं भद्रैला बदराणि च ॥ ७६ ॥**
**अजमोदा जलधरः प्रत्येकं स्युस्त्रिभागिकाः ।**
**सर्वौषधिचतुर्थांशं दाडिमस्य फलं भवेत् ॥ ७७ ॥**
**द्रव्येभ्यो निखिलेभ्यश्च सिता देयार्धमात्रया ।**
**महाखाण्डवसंज्ञं स्याच्चूर्णमेतत्सुरोचनम् ॥ ७८ ॥**
**अग्निदीप्तिकरं हृद्यं कासातीसारनाशनम् ।**
**हृद्रोगकण्ठजठरमुखरोगप्रणाशनम् ॥ ७९ ॥**
**विषूचिकां तथाध्मानमर्शोगुल्मकृमीनपि ।**
**छर्दिं पञ्चविधां श्वासं चूर्णमेतद्व्यपोहति ॥ ८० ॥**

**दी०**—अथ महाखाण्डवसंज्ञकं चूर्णमाह—मरिचमिति । नागपुष्पाणीति नागकेशरम् । लवणानीति बहुवचनत्वेन पञ्चलवणानि ग्राह्याणि, तानि च 'सिन्धुसौवर्चलोपेतं बिडं सामुद्रकं गडं' इति । अस्मत्संप्रदाये लवणानीत्यनेन सैन्धवमेव ग्राह्यं नान्यत्, स्वजात्युत्कृष्टत्वेन बहुवचनग्रहणम् । त्वक् तजशब्दवाच्यम् । अत्र मरिचादिलवणान्तं प्रत्येकं टङ्कैकं; पिप्पलीमूलादिजीरकान्तं प्रत्येकं टङ्कद्विमितं; अम्लवेतसं स्वनामप्रसिद्धम्, विश्वं शुण्ठी, भद्रैला बृहदेला, बदराणि बदरफलानि, अजमोदाऽत्र यमानी । एवं सर्वत्रान्तःपरिमार्जने, बहिःपरिमार्जने तु अजमोदा अजमोदैव । तथाहि "अन्तःसंमार्जने प्रायश्चाजमोदा यमानिका । बहिःसंमार्जने योज्या त्वजमोदैव निश्चितम्" इति । यत्राजमोदायमान्यौ स्तस्तत्र यमान्येव द्विगुणा अन्तःपरिमार्जने । जलधरो मुस्तम् । धान्यादि जलधरान्तं प्रत्येकं टङ्कत्रय-

१-नास्ति 'ख' पुस्तके ।

१-'तज' हि. भा.

मिति; एतत्सकलचूर्णस्य चतुर्थांशं दाडिमफलं तेन माषाधिकदशटङ्कमित्यर्थः। दाडिमफलमत्राम्लं यल्लोके 'अनारदाना' शब्दवाच्यम्। खाण्डवत्वात्समस्तद्रव्येभ्यःसिता शर्करा अर्धभागिका देया, तेन सकलचूर्णसाम्यमित्यर्थः। सकलचूर्णसाम्यं कियत्प्रमाणं? टङ्काधिककुडवमानमिति भावः। महाखाण्डवमिति 'लवणाम्लसितायुक्तः खाण्डवः परिकीर्तितः' इति पाठान्तरं इति। ननु "चूर्णे गुडः समो देयः शर्करा द्विगुणा भवेत्" इति नियमेन कथमत्र चूर्णसमतुलिता सिता? उच्यते,अयमपि योगोऽग्निमान्द्ये प्रधानतमः, अग्निसादो हि प्रायेण श्लेष्माधिकः स्यात् श्लेष्मणि च मधुरो बहुतरो न युक्त इत्यदोषः। यद्वा 'द्विगुणमानमनुक्तेषु यदुक्तं तत्तथैव च' इति॥७५-८०॥

गू०—नागपुष्पाणि नागकेशरं, लवणानि पञ्च लवणानि बहुवचनात्। एतानि प्रत्येकभागानि पञ्चलवणानामपि प्रत्येकभागम्। त्वक् तजः, कणा पिप्पली, धान्यं प्रसिद्धं, अम्लवेतसः तस्य चुक्रं वा रसो वा गृह्यते, विश्वं शुण्ठी, भद्रैला बृहदेला, बदरं लघुबदरं, जलधरो मुस्तं। महाखाण्डवसंज्ञमेतत् सुरोचनं सुष्ठु रुचिकरं अरोचकाधिकारित्वात् तथाग्निमान्द्यादिहरं खाण्डवो द्विविधः एको लेह्यः अपरश्चूर्णसंज्ञः। यथा चोक्तं "आमे ह्यम्लपलं चैव खण्डपक्कं घृतान्वितम्। एलामरिचसंयुक्तं ज्ञातव्यः स च खाण्डवः"। अन्ये त्वेवमाहुः—"कपित्थतिन्तिडीकबीजकर्पूरकदाडिमैः। तथामलकयुक्तैश्च सषड्भिः खाण्डवः स्मृतः"। पूर्वोक्तस्तु अवलेह्यः। तथाचोक्तं "आम्लमधुरैः स्पष्टः, कषायलवणोषणः अतिक्तखाण्डवः कोलकपित्थाद्यपक्कं हि" इति॥ ७५-८०॥

### अथ नारायणचूर्णमुदरादौ—

**चित्रकं त्रिफला व्योषं जीरकं हपुषा वचा।**
**यमानी पिप्पलीमूलं शतपुष्पाऽजगन्धिका॥ ८१॥**
**अजमोदा शठी धान्यं विडङ्गं स्थूलजीरकम्।**
**हेमाह्वा पौष्करं मूलं क्षारौ लवणपञ्चकम्॥ ८२॥**
**कुष्ठं चेति समांशानि विशाला स्याद्विभागिका।**
**त्रिवृत्त्रिभागा विज्ञेया दन्त्या भागत्रयं भवेत्॥८३॥**
**चतुर्भागा शातला स्यात्सर्वाण्येकत्र चूर्णयेत्।**
**पाचनस्नेहनाद्यैश्च स्निग्धकोष्ठस्य रोगिणः॥ ८४॥**
**दद्याच्चूर्णं विरेकाय सर्वरोगप्रणाशनम्।**
**हृद्रोगे पाण्डुरोगे च कासे श्वासे भगन्दरे॥८५॥**
**मन्दाग्नौ च ज्वरे कुष्ठे ग्रहण्यां च गलग्रहे।**
**दद्याद्युक्तानुपानेन तथाध्माने सुरादिभिः॥ ८६॥**
**गुल्मे बदरनीरेण विड्भेदे दधिमस्तुना।**
**उष्णाम्बुभिरजीर्णे च वृक्षाम्लैः परिकर्तिषु॥ ८७॥**
**उष्ट्रीदुग्धेनोदरेषु तथा तक्रेण वा गवाम्।**
**प्रसन्नया वातरोगे दाडिमाम्बुभिरर्शसि॥ ८८॥**
**द्विविधे च विषे दद्याद्घृतेन विषनाशनम्।**
**चूर्णं नारायणं नाम दुष्टरोगगणापहम्॥ ८९॥**

टी०—इदानीं नारायणचूर्णं प्रकटयन्नाह—चित्रकमिति। त्रिफला हरीतक्यादिकं, व्योषं त्रिकटुकम्। हपुषेति स्वनामतः प्रसिद्धम्। केचित्तु 'रुउ' शब्दवाच्यं वदन्ति। क्षाराविति द्वौ क्षारौ तेन स्वर्जिका यवक्षारश्चेति। लवणपञ्चकं प्रसिद्धम्। कुष्ठं चेति समांशानीति। विशालेन्द्रवारुणी सा द्विभागिका एकद्रव्यभागापेक्षया, त्रिवृत्त्रिशोथः द्विभागा, अत्रापि द्रव्यैकभागापेक्षया, दन्ती च प्रसिद्धा तस्या भागत्रयं, द्रव्यैकमानादपि बोद्धव्यम्। शातला चर्मकषा इति लोके शेहुण्डभेद इति त्रिसटेनापि यवतिक्तकशब्देन लिखितः। सच द्रव्यैकभागापेक्षया चतुर्भागः। पाचनस्नेहाद्यैरिति। पाचनं दोषाणां पाचनं व्याधिविहितं, स्नेहनं घृतपानादिकम्। आदिशब्दात् स्वेदादिकं च, एतेन कृतपूर्वैः पाचनाद्यैः कृत्वा स्निग्धकोष्ठस्य रोगिण एतच्चूर्णं विरेकाय दद्यादित्यर्थः। तथाहि—"वातोदरं बलवतः पूर्वं स्नेहैरुपाचरेत्। स्निग्धाय स्वेदिताङ्गाय दद्यात् स्नेहविरेचनं" इति। नन्विह "विवर्जयेत् स्नेहपानमजीर्णी चोदरी ज्वरी" इति वचनात् स्नेहो निषिद्धः, "नैते स्वेद्या नोदरी नातिसारी" इत्यनेन स्वेदस्यापि निषेधः कृतः। तत्कथं स्वेदस्नेहोपदेशः? उच्यते, स्वतन्त्रयोः स्नेहस्वेदयोर्निषेधो बोद्धव्यः, नतु शोधनाङ्गभूतयोस्तयोः अन्यथा दोषहरणस्य दुष्करत्वात्। दद्याद्युक्तानुपानेनेति। युक्तानुपानमत्रैव कथ्यते तद्यथा—आध्माने सुरादिभिरिति। आदिग्रहणादासवारिष्टसीधुमाध्वीकादिभिः। गुल्मे बदरनीरेणेति बदरक्वाथेनेत्यर्थः। विड्भङ्गे दधिमस्तुनेति दधि च मस्तु च यद्वा दध्नो मस्तु नानाजातिकं, यतः मस्तु सप्तविधं भवेत्। तद्यथा—'स्वाद्वम्लमत्यम्लकमन्दजातं तथामृतक्षीरभवं सरश्च। असारमेवंविधसप्तधाऽस्मिन् वर्गे स्मृतं मस्तुगुणास्तथैव' इति। प्रसंगतोऽस्यार्थं प्रकटयन्नाह—स्वाद्वम्लमित्यादि स्वादु दधि अम्लं दधि अत्यम्लं दधि रसजातं अत्यम्लं दधि मन्दजातं दधि पुष्पो

जातमित्यर्थः । तथाऽमृतक्षीरभवमिति । विनष्टदुग्धजातं सर इति दध्न उपरि घनो भागः स्नेहबहुलः सर इति प्रसिद्धः । असारं साररहितं उद्धृतस्नेहस्य दध्नो विनिर्मितमित्यर्थः । इति सप्तविधं मस्तु दर्शितम् । अन्ये कूर्चिका दधितक्रभेदेन मस्तु द्विविधमिति पठन्ति, उष्णाम्बुना सह पेयमिति व्यवहारः । उष्णाम्बुभिरिति बहुवचनत्वेनाष्टमांशावशेषादिकं ग्राह्यम् । तच्च यथादोषानुरूपमिति योज्यम् । वृक्षाम्लैरिति अस्य क्राथेनेत्यर्थः । परिकर्तिष्विति । गुदे परिकर्तनमिव वेदनावृद्धिरिति परिकर्तिका कथ्यते । उष्ट्रीदुग्धेन गवां तक्रेण वा । उदरेषु इति सर्वोदरेष्वित्यर्थः । प्रसन्नया वातरोगे इति । प्रसन्ना सुरामण्डः प्रसिद्धः । तथाचोक्तं 'प्रसन्ना स्यात् सुरामण्डस्तस्मात् कादम्बरी घना । जगलस्तदधः प्रोक्तो जगलान्मदको घनः ॥ वक्कसो हृतसारः स्यात् सुरावीजं तु किण्वकं' इति गुणेनापि प्रसन्नामाह—'गुल्मार्शश्छर्दरोचकवातनुत्' इति रास्नया वातरोगेष्विति वा पाठः । तत्र रास्नाक्राथेन सहेत्यर्थः । दाडिमाम्बुभिरर्शसीति । दाडिमफलस्वरसैः क्वचित्फलरसैर्वा । द्विविधे विषे इति स्थावरजङ्गमात्मके । विष्णुसंहितायामुक्तं नारायणसंज्ञं यद्वा विष्णुवीर्यतुल्यं नारायणसंज्ञं यथा विष्णुतेजसा दैत्यगणाः पलायन्ते तथैवास्य प्रभावेण दुष्टा रोगगणा नश्यन्तीति तात्पर्यार्थः ॥ ८१–८९ ॥

गू०—त्रिफला हरीतकीविभीतकमामलकं प्रत्येकमेकभागं, व्योषं शुण्ठीमरिचपिप्पल्यः, प्रत्येकमेकभागं; हपुषा[1] विगन्धिका, अजगन्धिका[2] वनतुलसी, शठी कर्चूरं, स्थूलजीरकं स्थूलकणा, हेमाह्वा चोषं पौष्करमूलं, क्षारौ द्वौ स्वर्जायवक्षारौ, कुष्ठं प्रसिद्धं, एतानि समांशानि प्रत्येकमेकभागं विशाला इन्द्रवारुणी तस्या जटाचूर्णं द्विभागं त्रिवृत् निशोथः द्विभागा दन्ती दात्येणी तस्या भागत्रयं, शातला पीतसेहुण्डस्तदभावे सेहुण्डजटा त्वचा पत्राणि वा तस्याश्चतुर्भागा एतान् द्वित्रिचतुर्गुणान्; चित्रकादिचूर्णानि मन्यन्ते केचिद्भ्यौषधानि मन्यन्ते तत्सर्वं संप्रदायतो ज्ञेयम् । पाचनं पाचनक्राथं धान्यत्रिकादि आरग्वधादि वा । स्नेहनं घृतपानादि तदार्थः स्निग्धकोष्ठस्य रोगिणः विरेकाय चूर्णं दद्यात् । सर्वरोगप्रणाशनं हृद्रोगादौ दद्यात् वृक्षाम्लं तिन्तिडीकं । तैः परिकर्तिषु गुदे कर्तनवत् पीडा । सुप्रसन्ना मदिराभेदः, नारायणं नारायणसंज्ञं तद्वद्रोगनाशकत्वात् ॥ ८१–८९ ॥

### अथ हपुषाद्यं चूर्णमजीर्णोदरादौ—

हपुषा त्रिफला चैव त्रायमाणा च पिप्पली ।
हेमक्षीरी त्रिवृच्चैव शातला कटुका वचा ॥ ९० ॥
नीलिनी सैन्धवं कृष्णं लवणं चेति चूर्णयेत् ।
उष्णोदकेन मूत्रेण दाडिमत्रिफलारसैः ॥ ९१ ॥
तथा मांसरसेनापि यथायोग्यं पिबेन्नरः ।
अजीर्णे प्लीह्नि गुल्मेषु शोफार्शोविषमाग्निषु ॥ ९२ ॥
हलीमकामलापाण्डुकुष्ठाध्मानोदरेष्वपि ।

दी०—अथ हपुषाद्यं चूर्णं दर्शयन्नाह—हपुषेति । हपुषा स्वनामाख्याता सा च जम्बुवद्विटपविशेषः, त्रायमाणा लोकतः प्रसिद्धा हेमक्षीरी स्वर्णक्षीरी, कंकुष्ठभेद इत्यर्थः । चोक इति लोके । त्रिवृन्निशोथः, शातला सेहुण्डभेदः, कृष्णलवणं सौवर्चलं सौवर्चलसममन्यद्द्रव्यतो यदुक्तं "न काललवणे गन्धः सौवर्चलसमो गुणैः" इति । मूत्रेणेति गोमूत्रेण श्रेष्ठत्वात् । दाडिमत्रिफलारसैरिति क्वथितैः । मांसरसः प्रलेहशब्दवाच्यः । यथायोग्यमिति व्याध्यनुरूपम् । विषमाग्निष्विति विषमतीक्ष्णमन्दादिष्वपि हलीमं हलीमकम् ॥ ९०–९२ ॥

गू०—हपुषा विगन्धिका, त्रायमाणा हेमक्षीरी, त्रिवृत्, शातला, सेहुण्डः, कुटकी, नीलपुष्पी अपराजिता, कृष्णलवणं सौवर्चलं, उष्णोदकाद्यैः पिबेत् । हलीमं हलीमकं, स्पष्टं चान्यत् ॥ ९०–९२ ॥

### अथ पञ्चसमं चूर्णं शूलादौ–

शुण्ठी हरीतकी कृष्णा त्रिवृत्सौवर्चलं तथा ॥९३॥
समभागानि सर्वाणि सूक्ष्मचूर्णानि कारयेत् ।
ज्ञेयं पञ्चसमं चूर्णमेतच्छूलहरं परम् ॥ ९४ ॥
आध्मानजठरार्शोघ्नमामवातहरं स्मृतम् ।

दी०—आध्मानादौ पञ्चसमचूर्णं दर्शयन्नाह—शुण्ठीति । अत्र कृष्णा पिप्पली, त्रिवृन्निशोथः, शेषं सुबोधम् ॥ ९३ ॥ ९४ ॥

गू०—सुगमम् ॥ ९३ ॥ ९४ ॥

### अथ नाराचचूर्णमाध्मानशूलादौ–

कर्षमात्रा भवेत्कृष्णा त्रिवृता स्यात्पलोन्मिता ९५॥
खण्डात्पलं च विज्ञेयं चूर्णमेकत्र कारयेत् ।

१–'हाउबेर' हि. भा. । २–'बावरी' हि. भा. ।

**कर्षोन्मितं लिहेदेतत्क्षौद्रेणाध्माननाशनम् ॥ ९६ ॥**
**गाढविट्कोदरकफान्पित्तशूलं च नाशयेत् ।**

दी०—इदानीं नाराचकं नाम चूर्णं विवर्णयन्नाह—कर्षमात्रेति। कर्षमात्रमिति भक्षणार्थं, क्षौद्रं तु यावदवलेहः स्यात् तावन्मात्रम्। एतच्च प्रातरेव भक्ष्यं विरेकार्थत्वात् तथाह्युक्तं—"खण्डं पलं त्रिवृता सममुपकुल्या कर्षचूर्णितं श्लक्ष्णं। प्राग्भोजने च मधुना बिडालपदकं लिहेत् प्राज्ञः' इति गाढविट्कमतिबद्धपुरीषमिति ॥ ॥ ९५ ॥ ९६ ॥

गू०—कृष्णा पिप्पली, त्रिवृत् निःसृता। स्पष्टमन्यत् ॥ ९५ ॥ ९६ ॥

### अथ लवणत्रितयाद्यं चूर्णं यकृत्प्लीहशूलादौ—

**लवणत्रितयं क्षारौ शतपुष्पाद्वयं वचा ॥ ९७ ॥**
**अजमोदाऽजगन्धा च हपुषा जीरकद्वयम् ।**
**मरिचं पिप्पलीमूलं पिप्पली गजपिप्पली ॥ ९८ ॥**
**हिङ्गुश्च हिङ्गुपत्री च शठी पाठोपकुञ्चिका ।**
**शुण्ठी चित्रकचव्यानि विडङ्गं चाम्लवेतसम् ॥९९॥**
**दाडिमं तिन्तिडीकं च त्रिवृद्दन्ती शतावरी ।**
**इन्द्रवारुणिका भार्ङ्गी देवदारु यमानिका ॥ १०० ॥**
**कुस्तुम्बुरुस्तुम्बुरूणि पौष्करं बदराणि च ।**
**शिवा चेति समांशानि चूर्णमेकत्र कारयेत्॥१०१॥**
**भावयेदार्द्रकरसैर्बीजपूररसैस्तथा ।**
**तत्पिबेत्सर्पिषा जीर्णमद्येनोष्णोदकेन वा ॥ १०२ ॥**
**कोलाम्भसा वा तक्रेण दुग्धेनौष्ट्रेण मस्तुना ।**
**यकृत्पृष्ठकटीशूलगुदकुक्षिहृदामयम् ॥ १०३ ॥**
**अर्शोविष्टम्भमन्दाग्निगुल्मप्लीहोदराणि च ।**
**हिक्काध्मानश्वासकासाञ्जयेदेतान्न संशयः ॥ १०४ ॥**
**एतैरेवौषधैः सम्यग्घृतं वा साधयेत्सुधीः ।**

दी०—अथ त्रिलवणाद्यं चूर्णं दर्शयन्नाह—लवणत्रितयमिति। अयं त्रिलवणाद्यो योगश्चूर्णसंज्ञकः। अनेनैव घृतमपि साधयेत्। सुधीरिति स्नेहयुक्त्या विपचेदित्यर्थः। अत्र त्रिलवणं च सैन्धवसौवर्चलविडसंज्ञं क्षाराविति द्वौ क्षारौ तेन स्वर्जिकाक्षारो यवक्षारश्च । शतपुष्पाद्वयमिति लघुस्थूलभेदेन। एका 'सौंफ' इति प्रसिद्धा। अपरा 'सोवा' शब्दवाच्या, अजगन्धा वर्वरिका, हपुषा निजनामख्याता, जीरकद्वयमिति पीतकृष्णभेदेन प्रतीतम्, कुस्तुम्बुरु धान्यकं, तुम्बुरु स्वनामप्रसिद्धं, पौष्करं, कुष्ठं, हिङ्गुपत्री, विटपविशेषः तस्याः पत्राणि हिङ्गुगन्धसदृशानि भवन्ति। सा द्विविधा एका वारुणपत्रिका तन्वी अपरा वेणुपत्रिका हिंगुलफला। उपकुञ्चिका जीरकभेदः 'करौंजी' शब्दवाच्यः। बदराणि बदरफलानि, शिवा हरीतकी शेषं सुबोधम्। एतत् सकलं समभागेन श्लक्ष्णचूर्णीकृतं चार्द्रकरसैर्बीजपूररसैश्च प्रत्येकं भावयेत्; रसैरिति बहुवचनत्वेन सप्तवारान् भावयेदिति भावः। तथाचोक्तं—'बीजपूरार्द्रकरसेनासकृद्भावितं' इति। घृतसाधने तु चतुर्गुणो रसो देयः। स्नेहपरिमाणात् चतुर्गुणता च प्रत्येकं। तत्पिबेत् सर्पिषा जीर्णे इति। अन्ने जीर्णे सति पिबेदित्यर्थः। अन्यरोगोत्पत्तिभयात्। तथाहि—'औषधशेषे भुक्तं पीतं तथौषधं सशेषेऽन्ने। न करोति गदोपशमं प्रकोपयत्यन्यरोगांश्च' इति। कोलाम्भसा बदरक्वाथेन। 'वा' ग्रहणात् कुलत्थयूषेण क्षारनिश्चोलनेन दाडिमरसेन दोषापेक्षया पिबेदिति तात्पर्यार्थः। यकृत्पृष्ठकटीशूलमिति। यकृच्छूलं पृष्ठशूलं कटिशूलं चेति गुदकुक्षिहृदामयमिति। आमयो गुदादिभिः सह प्रत्येकमभिसंबध्यते ॥ ९७–१०४ ॥

गू०—लवणत्रितयं सैन्धवं सौवर्चलं विडलवणं, क्षारौ द्वौ सर्जीयवक्षारौ, शतपुष्पा द्वयम्। अजगन्धा बाकुची, हपुषा प्रसिद्धा, जीरकद्वयं श्वेतकृष्णजीरकम्। पिप्पली गजपिप्पली, तदभावे पिप्पली, हिङ्गु भर्जितं, हिङ्गुपत्रीः, शठी कर्चूरः पाठा प्रसिद्धा, उपकुञ्चिका कलवञ्जीका, अम्लवेतसः चुक्रं वा रसो वा, दाडिमं अम्लतिन्तिडीकं, त्रिवृत् निःसृता, दन्ती जयपालमूलं, शतावरी, इन्द्रवारुणी प्रसिद्धा तस्या जटा, कुस्तुम्बुरु धान्यकं, तुम्बुरुः शूलघ्नः, पौष्करमूलं, बदराणि, शिवा हरीतकी, कोलाम्भसा बदरजलेन, मस्तुना दधिजलेन। स्पष्टमन्यत् ॥ ९७–१०४ ॥

### अथ शूलादौ तुम्बुरादिचूर्णम् ।

**तुम्बुरूणि त्रिलवणं यमानी पुष्कराह्वयम् ॥ १०५ ॥**
**यवक्षाराभयाहिङ्गुविडङ्गानि समानि च ।**
**त्रिवृत्त्रिभागा विज्ञेया सूक्ष्मचूर्णानि कारयेत्॥१०६**
**पिबेदुष्णेन तोयेन यवक्वाथेन वा पिबेत् ।**
**जयेत्सर्वाणि शूलानि गुल्माध्मानोदराणि च १०७॥**

दी०—अथ तुम्बुरादिचूर्णं दर्शयन्नाह—तुम्बुरू-

१—'अष्ठीला' पा०।

१–सोवा, सौंफशब्दवाच्यौ। २–'हिङ्गोट' हि. भा.। ३–पाढा। ४–कलौंजी। ५–'तेजबल' हि. भा.।

णीति । अयं तुम्बुरादिको योगः अष्टविधशूलेषु प्रशस्तः । तत्र तुम्बुरूणि फलविशेषाः प्रसिद्धाः, त्रिलवणं सैन्धवं सौवर्चलं विडं, पुष्कराह्वयं पुष्करमूलम्, तदभावे कुष्ठं, अभया हरीतकी, हिंग्वत्र भर्जितं, एतत् सकलं समभागं, त्रिवृत् त्रिभागिकेति एकद्रव्यभागापेक्षया, यवक्राथेनेति यवोऽन्नविशेषः ॥ १०५–१०७ ॥

**गू०**—सैंधवसौवर्चलबिडेति लवणानि, यमानी, पुष्करं, पुष्करमूलं, यवक्षारः, अभया हरीतकी, हिङ्गु भर्जितं, विडङ्ग एतानि समानि प्रत्येकं टङ्कमात्राणि सर्वौषधानि; त्रिवृत् निःसृता भागत्रयं आद्यौषधात्। अपरे सर्वान्धातृगुणानाहुः । तथाच **बोपदेवशतश्लोक्यां** 'दीप्यस्तुम्बुरुपौष्करं त्रिलवणं क्षाराभया जंतुजित् व्योषं हिङ्गु ततस्तृवृत्त्रिरुदराद्यर्शोग्रहेबुद्धिमान्। व्याख्यातं च त्रिवृत्त्रिगुणः, ततः दीप्यादिचूर्णात्—दीप्यादिति समांशात् । तथाच **वृन्देऽपि** "तुम्बुरूणि त्रिलवणं पाठा कृष्णा महौषधम् । एतानि स्वर्जिकाक्षारो यवक्षाराभया निशिः ॥ लवङ्गं चित्रकं हिङ्गु समान्येकत्र चूर्णयेत् । त्रिवृत्त्रिगुणितं चूर्णमेतदुष्णाम्बुना पिबेत् । शूलं निवारयत्येष आध्मानमुदराणि च ॥" **वृन्दात्** बृहत्तुम्बुराद्यं चूर्णं शूलादौ ॥ १०५–१०७ ॥

**अथ चित्रकाद्यं चूर्णं मन्दाग्न्यादौ—**

**चित्रकं नागरं हिङ्गु पिप्पली पिप्पलीजटा ।**
**चव्याजमोदा मरिचं प्रत्येकं कर्षसंमितम् ॥ १०८ ॥**
**स्वर्जिका च यवक्षारः सिन्धु सौवर्चलं विडम् ।**
**सामुद्रकं रोमकं च कोलमात्राणि कारयेत् ॥१०९॥**
**एकीकृत्याखिलं चूर्णं भावयेन्मातुलुङ्गजैः ।**
**रसैर्दाडिमजैर्वापि शोषयेदातपेन च ॥ ११० ॥**
**एतच्चूर्णं जयेद्गुल्मं ग्रहणीमामजां रुजम् ।**
**अग्निं च कुरुते दीप्तं रुचिकृत्कफनाशनम् ॥ १११ ॥**

**दी०**—चित्रकाद्यं चूर्णमाह—चित्रकमिति। अत्र नागरं शुण्ठी, पिप्पली, पिप्पलीजटा पिप्पली मूलं, चित्रकादि मरिचान्तं द्रव्यं कर्षप्रमाणं प्रत्येकं, स्वर्जिकादिरोमकान्तं कोलमात्रं, प्रत्येकमित्यर्थः । कोलं कर्षार्धसंज्ञं रोमकं गडलवणम्। एतत्सर्वं चूर्णीकृत्य मातुलुङ्गदाडिमफलोद्भवैः रसैः पृथग्भावयेत्, मातुलुङ्गो बीजपूरकः । वाग्रहणादेतच्चूर्णं मातुलुङ्गदाडिमरसेनाप्लाव्य गुटिकाः कार्याः ग्रन्थान्तरदर्शनाच्च । तथाहि "चित्रकं पिप्पलीमूलं द्वौ क्षारौ लवणत्रयम् । व्योषं हिंग्वजमोदं च चव्यं चैकत्र चूर्णयेत् । गुटिका मातुलुङ्गस्य दाडिमस्य रसेन वा । कृता विपाचयन्त्यामं दीपयन्त्याशु चानलं" इति॥१०८-१११

**गू०**—हिङ्गु भर्जितं । स्पष्टमन्यत् ॥१०८–१११॥

**अथ वडवानलचूर्णं मन्दाग्न्यादौ—**

**सैन्धवं पिप्पलीमूलं पिप्पली चव्यचित्रकम् ।**
**शुण्ठी हरीतकी चेति क्रमवृद्धानि चूर्णयेत् ॥११२॥**
**वडवानलनामैतच्चूर्णं स्यादग्निदीपनम् ।**

**दी०**—अथ वडवानलचूर्णमाह—सैन्धवमिति । चव्यमिति विटपविशेषो निजनामप्रतीतः तस्य फलं गजपिप्पली इति । क्रमवृद्ध्या वृद्धिं कृत्वा योज्यं, वृद्धिस्तु आदिद्रव्याद्भवति । तद्यथा सैन्धवमेकभागं, पिप्पलीमूलं द्विभागिकं, पिप्पली त्रिभागा, चव्यं भागचतुष्टयं, चित्रकं पञ्चभागं शुण्ठी षड्भागा हरीतकी सप्तभागेति क्रमवृद्धिः । अत्यन्ताग्निकरत्वात् वडवानलसंज्ञम् ॥ ॥ ११२ ॥

**गू०**—क्रमवृद्धानि–सैन्धवं एकं, पिप्पलीमूलं द्वयं, पिप्पली चत्वारि, चव्यमष्टौ, चित्रकं षोडश, शुण्ठी द्वात्रिंशत्, हरीतकी चतुःषष्टिः, एवमेव क्रमवृद्धम् ॥ ११२ ॥

**अथ अजमोदाद्यं चूर्णं आमवातशोथादौ—**

**अजमोदा विडङ्गानि सैन्धवं देवदारु च ॥ ११३ ॥**
**चित्रकः पिप्पलीमूलं शतपुष्पा च पिप्पली ।**
**मरिचं चेति कर्षांशं प्रत्येकं कारयेद्बुधः ॥ ११४ ॥**
**कर्षास्तु पञ्च पथ्याया दश स्युर्वृद्धदारुकात् ।**
**नागराच्च दशैव स्युः सर्वाण्येकत्र चूर्णयेत् ॥११५॥**
**पिबेत्कोष्णजलेनैव चूर्णं श्वयथुनाशनम् ।**
**आमवातरुजं हन्ति संधिपीडां च गृध्रसीम् ॥११६**
**कटिपृष्ठगुदस्थां च जङ्घयोश्च रुजां जयेत् ।**
**तूनीप्रतूनीविश्वाचीकफवातामयाञ्जयेत् ॥ ११७ ॥**
**समेन वा गुडेनास्य वटकान्कारयेद्भिषक् ।**

**दी०**—अथ अजमोदाद्यं चूर्णमपि दर्शयन्नाह—अजमोदेति । अयमजमोदादिसंज्ञको योगश्चूर्णरूपो गुटिकारूपश्च । अजमोदादिमरिचान्तं नवद्रव्यं प्रत्येकं कर्षमात्रम्। पथ्या हरीतकी तस्यास्त्वक् पञ्चकर्षमिता, वृद्धदारकं दशकर्षं, नागरं शुण्ठी चैव दशकर्षान्विता एतत्सकलं चूर्णं कृत्वा उचितमात्रया कोष्णजलेन पानं बोद्धव्यम्। अथवा पक्षान्तरमपि । इदमेव चूर्णं गुडमिश्रितं गुडसमानं कृत्वा भक्षयेत् । गुडसाम्यमत्र

चूर्णत्वात्। अत्रापि कोष्णजलानुपानं बोद्धव्यम्। कटिपृष्ठगुदस्थां चेति। अत्र रुजामित्यन्वयः। जङ्घयोरुभयोः अत्रापि रुजां। तूनीप्रतूणीवातरोगे पठिता विश्वाची च ॥ ११३-११७ ॥

**गू०**—अजमोदादिप्रत्येकं कर्षांशं, पथ्या हरीतकी पञ्चकर्षाः, वृद्धदारुः प्रसिद्धः एतस्माद्दशकर्षाः स्युः, शुण्ठी नागरशुण्ठी तस्माच्च दशकर्षाः स्युः, एतानि सर्वाणि एकत्र चूर्णयेत्। एतच्चूर्णं अजमोदादिकं कोष्णजलेन पिबेत् शोथादिनाशकं भवति। समेन गुडेन वा अस्य वटकान् कारयेत् ॥ ११३-११७ ॥

### श्वासादौ शुण्ठ्यादिचूर्णम्।

**(शुण्ठी सौवर्चलं हिङ्गु दाडिमं चाम्लवेतसम् ११८**
**चूर्णमुष्णाम्बुना पेयं श्वासहृद्रोगशान्तये।)**

### अथ हिंग्वादिचूर्णं शूलादौ—

**हिङ्गु पाठाऽभया धान्यं दाडिमं चित्रकः शठी ११९**
**अजमोदा त्रिकटुकं हपुषा चाम्लवेतसम्।**
**अजगन्धा तिन्तिडीकं जीरकं पौष्करं वचा ॥१२०॥**
**चव्यं क्षारद्वयं पञ्च लवणानि विचूर्णयेत्।**
**प्राग्भोजनस्य मध्ये वा चूर्णमेतत्प्रयोजयेत् ॥१२१॥**
**पिबेद्वा जीर्णमद्येन तक्रेणोष्णोदकेन वा।**
**गुल्मे वातकफोद्भूते हृद्ग्रहेऽष्ठीलिकासु च ॥ १२२॥**
**हृद्बस्तिपार्श्वशूलेषु शूले च गुदयोनिजे।**
**मूत्रकृच्छ्रे तथानाहे पाण्डुरोगेऽरुचौ तथा ॥१२३॥**
**हिक्कायां यकृति प्लीह्नि श्वासे कासे गलग्रहे।**
**ग्रहण्यर्शोविकारेषु चूर्णमेतत्प्रशस्यते ॥ १२४ ॥**
**भावितं मातुलुङ्गस्य बहुशः स्वरसेन वा।**
**कुर्याच्च गुटिका बह्वीर्वातश्लेष्मामयापहाः॥ १२५॥**

**दी०**—अधुना हिंग्वाद्यं चूर्णमाह—हिंग्विति। अत्र हिङ्गु भर्जितं योज्यं, पाठा प्रसिद्धा तस्या मूलं, अभया हरीतकी, दाडिमं दाडिमफलबीजानि, हपुषा जम्बुद्वीपविशेषो विख्यातः, अजगन्धा बर्बरिका, तिन्तिडीकमम्लफलं प्रसिद्धं, पुष्करं पुष्करमूलं, क्षारद्वयमिति यवक्षारः स्वर्जिकाक्षारः। पञ्चलवणानि सैन्धवप्रभृतिकानि। प्राग्भोजनस्येति प्रातःकाले मध्ये वा भोजनमिश्रम्। जीर्णमद्येनेति जीर्णं पुरातनं गुणाधिकत्वात्। तथाहि 'नवं मद्यमभिष्यन्दि गुददोषकरं परम्। जीर्णं च सर्वदोषघ्नं लघुत्वं च कफापहं' इति। कल्पनान्तरमाह। अथवा एतच्चूर्णं मातुलुङ्गस्य रसेन वा बहुशो भावयित्वा गुटिकाः कार्याः। ताश्च वातश्लेष्मामयापहा भवन्ति। बहुश इति सप्तवारान्। बह्वीरिति द्विशाणप्रमिताः ॥ ११८-१२५ ॥

**गू०**—हिङ्गु भर्जितं, पाठा, अभया हरीतकी, धान्यं प्रसिद्धं, दाडिमं, चित्रकं, शठी कर्चूरः, अजमोदा, त्रिकटु, हपुषा प्रसिद्धा, अम्लवेतस्य रसो वा चुक्रं वा, अजगन्धा वनतुलसी, तिन्तिडीकं, पौरुषं पुष्करमूलं; वचा, चव्यं, क्षारद्वयं सर्जी इति द्वयं, यवक्षारं, पञ्चलवणं सैन्धवं शाकम्भरीयं सौवर्चलं सामुद्रं बिडं इति। सर्वं चूर्णं मद्यादिना पिबेत्। केषु गुल्मादिषु एतच्चूर्णं प्रशस्यते। मातुलुङ्गस्य स्वरसेन वा गुटिकां कुर्यात् ॥ ११८-१२५ ॥

### अथ यमानीखाण्डवचूर्णमरोचकादौ—

**यमानी दाडिमं शुण्ठी तिन्तिडीकाम्लवेतसौ।**
**बदराम्लं च कुर्वीत चतुःशाणमितानि च ॥ १२६॥**
**सार्धद्विशाणं मरिचं पिप्पली दशशाणिका।**
**त्वक्सौवर्चलधान्याकं जीरकं द्विद्विशाणकम् ॥१२७**
**चतुःषष्टिमितैः शाणैः शर्करामत्र योजयेत्।**
**चूर्णितं सर्वमेकत्र यमानीखाण्डवाभिधम् ॥ १२८॥**
**चूर्णं जयेत्पाण्डुरोगं हृद्रोगं ग्रहणीं ज्वरम्।**
**छर्दिशोषातिसारांश्च प्लीहानाहविबन्धताम् ॥१२९॥**
**अरुचिं शूलमन्दाग्निमर्शोजिह्वागलामयान्।**

**दी०**—अथ यमानीखाण्डवसंज्ञकं चूर्णमाह—यमानीति। यमानी प्रसिद्धा, दाडिमं दाडिमफलबीजानि, तिन्तिडीकं प्रसिद्धं, बदराम्लमिति बदरं प्रसिद्धं, अम्लं वृक्षाम्लं वृक्षभेदः स च फलाम्लः, यद्वा बदराम्लमम्लबदरं खाण्डवत्वात्, चतुःशाणमितानीति प्रत्येकं सार्धद्विशाणं। मरिचमिति तेन दशमाषकमित्यर्थः। त्वगादिजीरकान्तं प्रत्येकं द्विशाणं त्वक् सौवर्चलधान्यकमित्यस्य स्थाने "कृमिघ्नमक्षं धान्यत्वक्" इति पठन्ति तत्रापि अक्षं सौवर्चलं खाण्डवाभिधमिति प्रसिद्धेः। यतः "लवणाम्लसितायुक्तः खाण्डवः परिकीर्तितः" इति। शोषो मुखशोषः क्षयभेदो वा, आनाह उदरापूरः, विबन्धो वातादिनामप्रवृत्तिः, जिह्वागलामयानिति जिह्वामयान्, गलामयानित्यर्थः ॥ १२६-१२९ ॥

१ 'विधारा' हि. भा.। २ प्रक्षिप्तम्। ३ 'विड्ग्रहे' पा०।

१—'बावरी' हि. भा.।

गू०—यमान्यादीनि चतुःशाणमितानि, मरिचं सार्धद्विशाणं अर्धटङ्कोपरि द्विटङ्कं, पिप्पली दशशाणा, त्वगादिकं द्विद्विशाणकम् । अत्र शर्करां चतुःषष्टिमितशाणैर्योजयेत् । एतत् यमानीखाण्डवाभिधं पाण्डुरोगादीन् जयेत् । दाडिमं अम्लं मधुरं वा, सौवर्चलं प्रसिद्धं, अम्लवेतसस्य स्वरसं वा, शुक्रं कर्षमात्रं, पिप्पलीनां एकं शतं, मरिचस्य द्वे शते, गुणनयनात्त्वन्यसंख्यया अत्र शर्करायाश्चत्वारि फलानि, पलमत्र षोडशटङ्कानाम्, अन्यथा चतुःषष्टिमितैः शाणैः शर्करामत्र योजयेदित्यनेन विरोधः स्यात् । केचित्खाण्डवे लवणं मधुरयोगे साधु स्वभावात्; लवणं निक्षिपेदिति वदन्ति ॥

**अथ पृथ्वीकाद्यं चूर्णं अरोचकादौ ग्रन्थान्तरात्**—"पृथ्वीका जीरकं धान्यं दाडिमं च तथैव च । चित्रकं पिप्पलीमूलं नागकेशरकं तथा । मरिचं दीप्यकं चैव वृक्षाम्लं चाम्लवेतसम् ॥ अजमोदाजगन्धा च दधित्थं चेति कार्षिकान् । प्रदेयं चातिशुद्धायाः शर्करायाः पलाष्टकं ॥ चूर्णमेतत्प्रसादं स्यात् परमं रुचिवर्धनं । तीव्रकासामयार्शांसि शूलं कासं वमिं ज्वरं ॥ निहन्ति दीपयत्यग्निं बलवर्णप्रदं परं । वातानुलोमनं हृद्यं कण्ठजिह्वाविशोधनं" इति । पृथ्वीका सूक्ष्मैला, अजगन्धा वावरी, दधित्थं कपित्थं । इदमपि खाण्डवं चूर्णम् ॥ १२६–१२९ ॥

**अथ तालीसादिचूर्णं अरोचकादौ—**

**तालीसं मरिचं शुण्ठी पिप्पली वंशरोचनम् ॥ १३० ॥**
**एकद्वित्रिचतुःपञ्चकर्षैर्भागान्प्रकल्पयेत् ।**
**एलात्वचोस्तु कर्षार्धं प्रत्येकं भागमाचरेत् ॥ १३१ ॥**
**द्वात्रिंशत्कर्षतुलिता प्रदेया शर्करा बुधैः ।**
**तालीसाद्यमिदं चूर्णं रोचनं पाचनं स्मृतम् ॥ १३२ ॥**
**कासश्वासज्वरहरं छर्द्यतीसारनाशनम् ।**
**शोषाध्मानहरं प्लीहाग्रहणीपाण्डुरोगजित् ॥ १३३ ॥**
**पक्त्वा वा शर्करां चूर्णं क्षिपेत्स्याद्गुटिका ततः ।**

दी०—तालीसादिकमप्याह—तालीसमिति । तालीसं स्वनामख्यातं, वंशरोचनं वंशक्षीरी, एतद्द्रव्यपञ्चकमादिद्रव्यात् कर्षैकैकेन वर्धितं ग्राह्यम् । तेन तालीसं कर्षैकं, मरिचं कर्षद्वयं, शुण्ठी कर्षत्रया, पिप्पली चतुःकर्षा, वंशरोचनं पञ्चकर्षं, एलात्वचोस्तु कर्षार्धमिति । एला क्षुद्रैला, त्वग् वराङ्गं कर्षार्धमिति शाणद्वयमित्यर्थः । प्रत्येकमिति पृथगित्यर्थः । शर्कराऽत्र द्वात्रिंशत् कर्षतुलिता देया, एतेन सकलचूर्णाद्द्विगुणा शर्करा भवति तीक्ष्णत्वात् । वेति ग्रहणेन पक्षान्तरमाह—समजले शर्करां पक्त्वा तत्र चूर्णं प्रक्षिप्य गुटिका कार्या लघुतरत्वात् तथाहि—"कल्पयेद्गुटिकाश्चैतच्चूर्णात् पक्त्वा सितोपलाम् । गुटिका ह्यग्निसंयोगाच्चूर्णाल्लघुतराः स्मृता" इति । एतदपि वांशीं विना प्रचरति । तथाच तन्त्रान्तरे—"तालीशं मरिचं शुण्ठी पिप्पल्येकांशकोत्तरा । त्वगेलार्धांशकं दद्यात् शर्करा कुडवं भवेत्" इत्यादि । अन्यत्रापि "तालीसमरिचनागरं कृष्णाः कर्षोत्तराः क्रमस्त्वगेले चार्धांशे कुडवं सिता गुटिका विपाच्य कृताः" इति केचिद्वदन्ति । पित्ते वंशरोचना देयेति । तथाह्युक्तम्—"पित्तयुक्ते भवेच्छ्रेष्ठं वंशरोचनयान्वितम्" इति ग्रन्थान्तरदर्शनात् । तदुक्तं—"वांशीपिप्पलिशुण्ठीनां तालीसोषणयोस्तथा । भागवृद्धिः क्रमादन्त्या त्वगेले चापि सार्धके ॥ कृष्णा त्वष्टगुणा चात्र प्रदेया सितशर्करा" इत्यादि ॥ १३०–१३३ ॥

गू०—तालीसं एककर्षं, मरिचं द्विकर्षं, शुण्ठी त्रिकर्षा, पिप्पली चतुःकर्षा, वांशी रोचना पञ्चकर्षा, एवं भागान्प्रकल्पयेत्, एला लघ्वेला, त्वक् तजः, एतयोः प्रत्येकं कर्षार्धं शर्करायाः द्वात्रिंशत्कर्षा । शर्करां पक्त्वा चूर्णं निक्षिपेत् । ततो गुटिका स्यात् । इदं तालीसाद्यं चूर्णं रोचनं पाचनं तथा कासादिहरम् ॥ १३०–१३३ ॥

**अथ सितोपलादिचूर्णं कासक्षयपित्तदाहादौ—**

**सितोपला षोडश स्यादष्टौ स्याद्वंशरोचना ॥ १३४ ॥**
**पिप्पली स्याच्चतुष्कर्षा स्यादेला च द्विकार्षिकी ।**
**एकः कर्षस्त्वचः कार्यश्चूर्णयेत्सर्वमेकतः ॥ १३५ ॥**
**सितोपलादिकं चूर्णं मधुसर्पिर्युतं लिहेत् ।**
**श्वासकासक्षयहरं हस्तपादाङ्गदाहजित् ॥ १३६ ॥**
**मन्दाग्निं सुप्तजिह्वत्वं पार्श्वशूलमरोचकम् ।**
**ज्वरमूर्ध्वगतं रक्तं पित्तमाशु व्यपोहति ॥ १३७ ॥**

दी०—अथ सितोपलादिचूर्णमाह—सितोपलेति । सितोपला शर्कराभेदः । षोडशेति षोडशकर्षमिता । वंशरोचना अष्टौ स्यादिति अष्टकर्षमिता, अग्रिमकर्षग्रहणात् । अन्त्यात् द्विगुणितत्वान्माननिर्देशोऽयम् । तथाचोक्तं—"सितोपला तुगाक्षीरी पिप्पलीबहुला त्वचः । अन्त्यादूर्ध्वं द्विगुणितं लेहयेन्मधुसर्पिषा ॥" इति । बहुला क्षुद्रैला, मधु सर्पिश्चात्र लेहवत् परिमितं । हस्तपादाङ्गदाहजिदिति । तेन हस्तदाहं, पाददाहं, अङ्गदाहमिति सुप्तजिह्वत्वमिति जिह्वारोगे पठितम् ॥ १३४–१३७ ॥

गू०—सितोपला प्रसिद्धा, अष्टौ कर्षाः वंशरोचना, पिप्पली चतुःकर्षा स्यात्, एला द्विकार्षिकी, त्वचः एककर्षः, एवं षोडशकर्ष स्यात्। एतत्सितोपलादिचूर्णं मधुसर्पिर्भ्यां लिहेत् श्वासादिकान्व्यपोहति ॥१३४–१३७॥

**अथ लवणभास्करचूर्णं ग्रहणीगुल्मादौ—**

**सामुद्रलवणं कार्यमष्टकर्षमितं बुधैः ।**
**पञ्च सौवर्चलं ग्राह्यं बिडं सैन्धवधान्यकात् ॥१३९॥**
**पिप्पली पिप्पलीमूलं कृष्णजीरकपत्रकम् ।**
**नागकेशरतालीसमम्लवेतसकं तथा ॥ १३८ ॥**
**द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्बुधः ।**
**मरिचं जीरकं विश्वमेकैकं कर्षमात्रकम् ॥ १४० ॥**
**दाडिमं स्याच्चतुष्कर्षं त्वगेले चार्धकार्षिके ।**
**एतच्चूर्णीकृतं सर्वं लवणं भास्कराभिधम् ॥१४१॥**
**शाणप्रमाणं देयं तु मस्तुतक्रसुरासवैः ।**
**वातश्लेष्मभवं गुल्मं प्लीहानमुदरं क्षयम् ॥१४२॥**
**अर्शांसि ग्रहणीं कुष्ठं विबन्धं च भगन्दरम् ।**
**शोफं शूलं श्वासकासावामवातं च हृद्रुजम् ॥१४३॥**
**मन्दाग्निं नाशयेदेतद्दीपनं पाचनं परम् ।**
**सर्वलोकहितार्थाय भास्करेणोदितं पुरा ॥ १४४ ॥**

गू०—इदानीं लवणभास्करं नाम चूर्णं प्रकटयन्नाह—सामुद्रलवणमिति । दक्षिणसमुद्रसमीपे भवं सामुद्रं लवणं तच्च समटीशब्दवाच्यं अष्टकर्षं पलद्वयम्, पञ्च सौवर्चलं ग्राह्यमिति सौवर्चललवणं पञ्चकर्षं ग्राह्यमित्यर्थः । बिडलवणाद्यम्लवेतसान्तं द्विगुणकर्षप्रमाणं प्रत्येकं, बिडं कृत्रिमं लवणं तच्च प्रसारिणी कल्कभक्तलवणसंयोगादग्निदाहेन निवृत्तमित्येके, सिन्धुभवं सैन्धवं, कृष्णजीरकं पाश्चात्यं, तच्च खुरासानशब्दवाच्यं, मरिचादिविश्वान्तं द्रव्यत्रयं कर्षं प्रत्येकमित्यर्थः । जीरकमत्र शुक्लं, विश्वं शुण्ठी, दाडिमं स्याच्चतुःकर्षमिति दाडिमफलबीजानि ग्राह्याणि तच्च अनारदानाशब्दवाच्यं, चतुःकर्षं पलपरिमितं । त्वगेले चार्धकार्षिके इति मिलित्वा कर्षमात्रमित्यर्थः । भक्षणे च शाणप्रमाणं टङ्कमात्रं देयं, तीक्ष्णत्वात् । तत् पुनः इति ग्रहणेनाधिकमात्रमपि प्रचरति दोषादीनां बलातिशयत्वात्। मस्तुतक्रसुरासवैरिति। मस्तु दध्नोऽधस्तोयविशेषः । 'दध्नस्तु यदधस्तोयं तन्मस्तु परिकीर्तितम् ।' तक्रमिति त्रिभागभिन्नं, सुरासवौ प्रसिद्धौ, सुरा लोहितवर्णा, पिष्टकिण्वकल्केन किञ्चित् कलुषा आशु क्रियन्ते ये ते आसवाः, भास्करेण भास्कराचार्येण उदितं कथितं पुरा पूर्वपौरुषेयग्रन्थानामादावित्यर्थः । नतु ऋषिप्रणीतेभ्य इति केचित् ॥ १३८–१४४ ॥

गू०—सामुद्रलवणं बुधैः अष्टकर्षं कार्यं, पञ्चकर्षं सौवर्चलं, बिडं बिडलवणं तदाद्यम्लवेतसकान्तं दशौषधं प्रत्येकं द्विद्विकर्षं, आम्लवेतसस्य रसं वा चुक्रं वा ग्राह्यं, मरिचं जीरकं, विश्वं एतत्प्रत्येकं कर्षमात्रं, जीरकं श्वेतं, विश्वं शुण्ठी, दाडिमं चतुःकर्षं, त्वगेला च अर्धकार्षिकं प्रत्येकं द्विद्विटङ्कं । एतच्चूर्णकृतं लवणभास्करं भवति शाणप्रमाणं टङ्कप्रमाणं भक्षणार्थं देयं, आर्शादीनि च नाशयति । इदं भास्करेण सूर्येण उदितम् ॥१३८–१४४॥

**अथ एलादिचूर्णं छर्दिरोगे—**

**एलाप्रियङ्गुमुस्तानि कोलमज्जा च पिप्पली ।**
**श्रीचन्दनं तथा लाजा लवङ्गं नागकेशरम् ॥१४५॥**
**एतच्चूर्णीकृतं सर्वं सिताक्षौद्रयुतं लिहेत् ।**
**वातपित्तकफोद्भूतां छर्दिं हन्त्यतिवेगतः ॥ १४६ ॥**

**व्याघ्रीचूर्णम् ।**

**(व्याघ्रीजीरकधात्रीणां चूर्णं मधुयुतं लिहेत् ।**
**ऊर्ध्ववातमहाश्वासतमकैर्मुच्यते क्षणात् ॥ १४७ ॥)**

दी०—एलादिचूर्णमाह—एला प्रियङ्गुमुस्तानीति । एला सूक्ष्मैला, प्रियङ्गुर्लताविशेषः तस्याः फलानि, कोलमज्जा बदरफलास्थिमध्यगतद्रव्यविशेषः, श्रीचन्दनं श्वेतचन्दनं, लाजा भृष्टधान्योद्भवा । एतत्सकलं सममात्रं संगृह्य वस्त्रपूतं चूर्णं कुर्यात् । भक्षणमानमस्य दोषाग्निबलापेक्षया कार्यम् । सिताक्षौद्रयुतमितीत्यर्थः । (सिता शर्करा सा धान्यचूर्णसमा ग्राह्या, मधुमानं च यावदवलेहत्वं स्यात् तावद्देयमित्यर्थः) । अतिवेगत इति वचनेनास्य विशिष्टत्वं दर्शितम् ॥ १४५–१४७ ॥

गू०—कोलं बदरं तन्मज्जा, श्रीचन्दनं मलयजं लाजा भृष्टधान्यजा सर्वसमं सिता सितोपला ॥ १४५–१४७ ॥

**अथ पञ्चनिम्बचूर्णं कुष्ठादौ—**

**मूलं पत्रं फलं पुष्पं त्वचं निम्बात्समाहरेत् ।**
**सूक्ष्मचूर्णमिदं कुर्यात्पलपञ्चदशोन्मितम् ॥ १४८ ॥**
**लोहभस्महरीतक्यौ चक्रमर्दकचित्रकौ ।**
**भल्लातकं विडङ्गानि शर्करामलकं निशा ॥ १४९ ॥**
**पिप्पली मरिचं शुण्ठी बाकुची कृतमालकः ।**

१–'क्षतं' पा० । २–'विविधं' पा० ।

१–प्रक्षिप्तम् । २–नास्ति 'ख' पुस्तके ।

**गोक्षुरश्च पलोन्मानमेकैकं कारयेद्बुधः ॥ १५० ॥**
**सर्वमेकीकृतं चूर्णं भृङ्गराजेन भावयेत् ।**
**अष्टभागावशिष्टेन खदिरासनवारिणा ॥ १५१ ॥**
**भावयित्वा च संशोष्य कर्षमात्रं ततः पिबेत् ।**
**खदिरासनतोयेन सर्पिषा पयसाथवा ॥ १५२ ॥**
**मासेन सर्वकुष्ठानि विनिहन्ति रसायनम् ।**
**पञ्चनिम्बमिदं चूर्णं सर्वरोगप्रणाशनम् ॥ १५३ ॥**

**दी०**—अधुना पञ्चनिम्बचूर्णं दर्शयन्नाह—मूलमिति। मूलमित्यादिना निम्बवृक्षस्य पञ्चाङ्गं कथितं; मूलं जटा पत्रं पलाशं फलमामबीजं पुष्पं कुसुमं त्वक् छल्ली। समाहरेदिति सम्यक् प्रकारेण आहरेदिति यदुक्तं तत् कालविशेषं सूचयति । तथाहि "पुष्पकाले च पुष्पाणि फलकाले फलानि च। संचूर्ण्य पिचुमर्दस्य त्वङ्मूलानि दलानि च" इति । एके मूलस्थाने सारमिति पठन्ति व्याख्यानयन्ति च तत्र सारं मध्यभागस्थितं काष्ठविशेषं, उक्तमन्यत्रापि "काले त्वगूदलसारबीजकुसुमैर्निम्बस्य तुल्यांशकैः" इत्यादि । पञ्चदशोन्मितं फलमिति सकलपञ्चाङ्गं पञ्चदशपलपरिमितं ग्राह्यमित्यर्थः । तेन प्रत्येकं त्रिपलमितं भवति । लोहभस्मेति मृतलोहचूर्णं, चक्रमर्दकः प्रपुन्नाटबीजानि, आमलमामलकीफलं, निशा हरिद्रा, कृतमालको राजवृक्षः एतल्लोहभस्मादिगोक्षुरकान्तं पृथक् पलमानं ग्राह्यम्, तेन निम्बचूर्णसमं भवति । एतत् सकलं चूर्णीभूतं द्रव्यं भृङ्गराजरसेन भावितं कृत्वा पश्चादष्टभागावशेषेण खदिरक्काथेन तत् पश्चादसनक्काथेन च भाव्यं, असनः पीतमारो वृक्षविशेषः, पश्चात् संशोष्य कर्षपरिमाणमितं वक्ष्यमाणानुपानेन सह पिबेदित्यर्थः । अनुपानान्याह—खदिरासनतोयेनेति । खदिरकाष्ठक्कथितेन असनकाष्ठक्कथितेन वेत्यर्थः । अथवा सर्पिषा पयसा च अत्र दोषापेक्षा बोद्धव्या । रसायनमिति जराव्याधिनाशकत्वेन रसायनं कथितं । पञ्चनिम्बमिति निम्बसम्बन्धिपुष्पादिपञ्चकमेव निम्बपञ्चकं कथितं। तथाहि "निम्बपत्रं तथा पुष्पं त्वङ्मूलं फलमुच्यते। पञ्चनिम्बमिति ख्यातं नामतः शास्त्रकोविदैः" इति । सर्वरोगप्रणाशनमिति । सर्वरोगा भगन्दरप्रमुखाः । तथाह्युक्तम्—"भगंदरः श्लीपदवातरक्तजडान्धनाडीव्रणशीर्षरोगान् । सर्वान् प्रमेहान् प्रदरांश्च सर्वान् दंष्ट्राविषं मूलविषं निहन्ति ॥ स्थूलोदरः सिंहकृशोदरः स्यात् सुश्लिष्टसन्धिर्मधुनोपयोगात् । सदोपयोगादपि ये दशन्ति सर्पादयो यांति विनाशमाशु ॥ जीवेच्चिरं व्याधिजराविमुक्तः शुभेतरश्चंद्रसमानकान्तिः" इति ॥ १४८-१५३ ॥

**गू०**—निम्बान्मूलादिकं पञ्चाङ्गं समाहरेत् । इदं पञ्चदशोन्मितैः पलैश्चूर्णं कुर्यात् । एकं एकपललोहभस्मादिकं एकैकं पलोन्मितं कारयेत् । चक्रमर्दः प्रपुन्नाटः, शर्करा सितोपला, निशा हरिद्रा, बाकुची कृमिघ्नः, कृतमालः आरग्वधः, खदिरः वृक्षविशेषस्तस्य सारः, असनः पीतसारः एषां क्वाथेन भावयेत् वारत्रयं वा सप्त वा पुनः संशोष्य कर्षं खदिरासनं पिबेत् ॥ १४८-१५३॥

## शतावरीचूर्णम्—

**शतावरी गोक्षुरश्च बीजं च कपिकच्छुजम् ।**
**गाङ्गेरुकी चातिबला बीजमिक्षुरकोद्भवम् ॥ १५४ ॥**
**चूर्णितं सर्वमेकत्र गोदुग्धेन पिबेन्निशि ।**
**न तृप्तिं याति नारीभिर्नरश्चूर्णप्रभावतः ॥ १५५ ॥**

## अश्वगन्धादिचूर्णम्—

**अश्वगन्धा दशपला तन्मात्रो वृद्धदारुकः ।**
**चूर्णीकृत्योभयं विद्वान्घृतभाण्डे निधापयेत् ॥ १५६ ॥**
**कर्षैकं पयसा पीत्वा नारीभिर्नैव तृप्यति ।**
**अगत्वा प्रमदां भूयाद्वलीपलितवर्जितः ॥ १५७ ॥**

**दी०**—इदानीं वाजीकरणचूर्णद्वयमाह—शतावरीत्यादि । कपिकच्छुजं बीजमिति वानरीबीजं, गांगेरुकीति नागबला "गुडसकरीति" शब्दवाच्या, अतिबला बृहद्बला, बीजमिक्षुरकोद्भवमिति इक्षुरकः कोकिलाक्षः "तालमखाना" इति लोके, एतत् सर्वं चूर्णीकृतमुक्तमानपरिमितं च चतुर्गुणेन गोदुग्धेन सह पिबेत् । निशि रात्रौ । वाजीकरणमिति वाजीवात्यर्थमैथुनसामर्थ्यात् वाजीकरणं, किंवा वाजः शुक्रं तदस्यास्तीति वाजी अवाजी वाजी क्रियते येन पुरुषस्तद्वाजीकरणं। तदुक्तम् "येन नारीषु सामर्थ्यं वाजीवल्लभते नरः। येन वात्यधिकं बीजं वाजीकरणमेव तत्" इति । तत्तु त्रिविधं प्रवर्तकं जनकं प्रवर्तकजनकं च । उक्तंच तन्त्रान्तरे—"शुक्रवृद्धिकरं किञ्चित् किञ्चित् शुक्रप्रवर्तकम् । च्युतिवृद्धिकरं किञ्चित् त्रिविधं वृष्यमुच्यते" इति । वृष्यं तु वाजीकरणसंज्ञम् । तथाच युवतिस्पर्शादि च्युतिकरं, क्षीरादि वृद्धिकरं, माषो जनकः प्रवर्तकश्च। द्वितीयवाजीकरणचूर्णं सुबोधं केचिन्नात्र पठन्ति ॥ १५४-१५७ ॥

**गू०**—अथाश्वगन्धादिचूर्णं पुष्टौ सुगमं वृद्धदारुकः प्रसिद्धः ॥ १५४-१५७ ॥

१-'धनवाड' हि. भा. । २-विजयसार' हि. भा. ।

### मुसलीचूर्णम्—

(मुसलीकन्दचूर्णं तु गुडूचीसत्त्वसंयुतम्।
वानरीगोक्षुराभ्यां च शाल्मलीशर्करामलैः॥१५८॥
आलोड्य घृतदुग्धेन पाययेत्कामवर्धनम्।)

### नवायसचूर्णम्—

चित्रकस्त्रिफला मुस्तं विडङ्गं त्र्यूषणानि च॥१५९॥
समभागानि कार्याणि नव भागा हतायसः।
एतदेकीकृतं चूर्णं मधुसर्पिर्युतं लिहेत्॥ १६० ॥
गोमूत्रमथवा तक्रमनुपाने प्रशस्यते।
पाण्डुरोगं जयत्युग्रं हृद्रोगं च भगन्दरम्॥ १६१॥
शोथकुष्ठोदरार्शांसि मन्दाग्निमरुचिं कृमीन्।

दी०—अथ नवायसं चूर्णमाह—चित्रक इति। चित्रकश्चित्रकजटास्त्वक्, त्रिफला हरीतक्यादि, त्र्यूषणं कटुत्रिकं एतच्चित्रकादित्र्यूषणान्तं नवद्रव्यं प्रत्येकं सममात्रं, नवभागा हतायस इति हतायसो मृतलोहस्य एकद्रव्यभागापेक्षया नवभागा ग्राह्याः, तेनैकत्र मिलितानां चित्रकादीनां चूर्णेन सममयश्चूर्णमित्यर्थः। मधुसर्पिषी चात्र लेहपरिमाणवद्ग्राह्ये॥ १५८-१६१॥

गू०—चित्रकः, त्रिफला, मुस्तं नागरं, विडङ्गं, त्र्यूषणं त्रिकटु एतानि प्रत्येकं शाणमात्राणि हतायसं मृतलोहं सर्वतुल्यं मधुसर्पिर्घृतं ताभ्यां लिहेत्। शेषं सुगमम्॥ १५८-१६१॥

### आकारकरभादिचूर्णं स्तम्भनादौ—

आकारकरभः शुण्ठी कङ्कोलं कुङ्कुमं कणा॥ १६२॥
जातीफलं लवङ्गं च चन्दनं चेति कार्षिकान्।
चूर्णानि मानतः कुर्यादहिफेनं पलोन्मितम्॥१६३॥
सर्वमेकीकृतं चूर्णं माषैकं मधुना लिहेत्।
शुक्रस्तम्भकरं चूर्णं पुंसामानन्दकारकम्॥ १६४॥
नारीणां प्रीतिजननं सेवेत निशि कामुकः॥

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यमखण्डे चूर्णकल्पना नाम षष्ठोऽध्यायः।

---

दी०—अथाकारकरभादिचूर्णं दर्शयन्नाह—आकारकरभ इति। 'अकरकरहा' इति लोके प्रसिद्धः, कंकोलं त्वेख्यातं कणा पिप्पली, चन्दनं श्वेतं, एतत्सर्वं कर्षोन्मितं प्रत्येकमिति। अहिफेनं पलोन्मितमिति अहिफेनं आफूशब्दवाच्यं 'अफीम' इति लोके, पलोन्मितं पलप्रमाणम्, तेन पूर्वचूर्णभागद्वयं अहिफेनस्य भागैकमित्यर्थः। शर्करारहितत्वात् कुत्रचित् सितासहितमपि प्रचरति, तत्र अहिफेनं पूर्वद्रव्यचूर्णसाम्यं। तदुक्तं "जातीफलार्ककरहाटलवङ्गशुण्ठीकंकोलकुंकुमकणाहरिचन्दनानि। एतैः समानमहिफेनमनेन तुल्यां सितां निधाय मधुना वटकं विदध्यात्॥ माषद्वयोन्मितममुं निशि भक्षयित्वा मिष्टं पयस्तदनु माहिषमाशु पीत्वा। कुर्वन्तु कामुकजना नतु बिन्दुपातं चेतांसि तानि चकितानि कलावतीनां" इति॥ १६२-१६४॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यमखण्डे चूर्णकल्पनाध्यायः षष्ठः॥ ६॥

---

गू०—आकारकरभः आकल्लकः, शुण्ठी, कंकोलं, कुङ्कुमं केशरम्, कणा पिप्पली, जातिफलं, लवङ्गं, चन्दनं चेति, कङ्कोलं केचित् शीतलचीनीति केचित्पूगम् इत्याहुः। कार्षिकान्प्रत्येकं कार्षिकान्। अहिफेनं पलोन्मितं कर्षचतुष्टयं तत् शुद्धं कृत्वा देयं। तस्य शोधनं आर्द्रकद्रवेण सेहुण्डपत्रद्रवेण वा निम्बद्रवेण वा निम्बूकद्रवेण भावनाभिः सप्तभिर्वा शोधयित्वा शोषयित्वा देयम्॥ १६२-१६४॥

इति श्रीकाशिरामवैद्यकृतायां गूढार्थदीपिकायां चिकित्सास्थाने चूर्णाध्यायः॥ ६॥

---

## सप्तमोऽध्यायः।

इदानीं गुटिकाः कथ्यन्ते—

वटकाश्चाथ कथ्यन्ते तन्नाम गुटिका वटी।
मोदको वटिका पिण्डी गुडो वर्तिस्तथोच्यते॥ १॥
लेहवत्साध्यते वह्नौ गुडो वा शर्करा तथा।
गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्मिता वटी॥ २॥
कुर्यादवह्निसिद्धेन क्वचिद्गुग्गुलुना वटीम्।
द्रवेण मधुना वापि गुटिकां कारयेद्बुधः॥ ३॥

वटकाश्चेति। अथेति चूर्णकल्पनानन्तरं वटका गुटिकादिसंज्ञाः अतएव तन्नाम गुटिकावटीप्रभृतयो ज्ञातव्याः। तस्य वटकस्य नाम पर्यायवाचकाः शब्दा यथा

---

( )=प्रक्षिप्तम्।

तन्नामेति तस्य वटकस्य नाम पर्यायवाक्यं गुटिकादिकमित्यर्थः । अथ तेषां कर्तव्यविधिमाह—लेहवत्साध्यत इति । यथावलेहार्थं गुडादिकं साध्यते तथैवाऽत्र गुडः, शर्करा, गुग्गुलुर्वापि पक्तव्यः, पाके सति चूर्णं प्रक्षिप्य वटकादीन् कुर्यादिति भावः । पक्षान्तरमाह—क्वचिदिति । न सर्वत्र अवह्निसिद्धेन कुट्टितेन गुग्गुलुना वटकाः कार्याः गुडादिकेनापि क्वचिदिति संचाराद्वा, अथवा द्रवेण तोयक्षीरादिना मधुना क्षौद्रेणापि संप्लाव्य गुटिकां कारयेत् बुधः पण्डितः अत्रापि वह्निं विनेति सम्बन्धः ॥ १–३ ॥

**गू०**—अथ गुटिकाधिकारः ॥ १–३ ॥

**सिता चतुर्गुणा देया वटीषु द्विगुणो गुडः ।**
**चूर्णाच्चूर्णसमः कार्यो गुग्गुलुर्मधु तत्समम् ॥ ४ ॥**
**द्रवं च द्विगुणं देयं मोदकेषु भिषग्वरैः ।**

**दी०**—इदानीमनुक्तेषु गुडशर्करादीनां मानमाह—सितेति । सिता शर्करा चतुर्गुणा देया चूर्णादित्यर्थः । गुडोऽत्र द्विगुणः, अत्राऽपि चूर्णभागादिति भावः । (गुग्गुलुश्च चूर्णसमः चूर्णभागसमान इत्यर्थः । मधु तत्सममिति मधु क्षौद्रं तत्समं चूर्णसमं द्रव्यं क्षीरतोयादिकं द्विगुणं चूर्णभागादित्यर्थः) । चूर्णमत्र सकलद्रव्याणां भिषग्वरैरिति ग्रहणेन स्वबुद्ध्या वा यथायोग्यमवचारयेदिति सांप्रदायिकाः ॥ ४ ॥

**कर्षप्रमाणं तन्मानं बलं दृष्ट्वा प्रयुज्यते ॥ ५ ॥**

**दी०**—अथ भक्षणमानमनुक्तानां दर्शयन्नाह—कर्षप्रमाणमिति । कर्षप्रमाणं कर्षमात्रं तन्मानमिति तत् तेषां वटकादीनां मानं परिमाणं । बलमिति देहबलं दोषबलं व्याधिबलं च । बलग्रहणेन कर्षमानमत्र सामान्यं सूचितं । अतएव दृष्ट्वा विचार्येत्यर्थः । विचारणात्र बालवृद्धानामेव मध्यानां तु कर्षमात्रैव ॥ ५ ॥

**अथ श्रीबाहुशालो गुडः अर्शादौ—**

स यथा–**इन्द्रवारुणिका मुस्तं शुण्ठी दन्ती हरीतकी ।**
**त्रिवृच्छठी विडङ्गानि गोक्षुरश्चित्रकस्तथा ॥ ६ ॥**
**तेजोह्वा च द्विकर्षाणि पृथग्द्रव्याणि कारयेत् ।**
**सूरणस्य पलान्यष्टौ वृद्धदारु चतुष्पलम् ॥ ७ ॥**
**चतुष्पलं स्याद्भल्लातः क्राथयेत्सर्वमेकतः ।**
**जलद्रोणे चतुर्थांशं गृह्णीयात्क्राथमुत्तमम् ॥ ८ ॥**

१–नास्ति 'ख' पुस्तके.

**क्राथ्यद्रव्यात्त्रिगुणितं गुडं क्षिप्त्वा पुनः पचेत् ।**
**सम्यक्पक्वं च तं ज्ञात्वा चूर्णमेतत्प्रदापयेत् ॥ ९ ॥**
**चित्रकत्रिवृतादन्तीतेजोह्वाः पलिकाः पृथक् ।**
**पृथक्त्रिपलिकाः कार्या व्योषैलामलकत्वचः ॥ १० ॥**
**निक्षिपेन्मधु शीते च तस्मिन्प्रस्थप्रमाणतः ।**
**एवं सिद्धो भवेच्छ्रीमान्बाहुशालगुडाऽभिधः ॥ ११ ॥**
**जयेदर्शांसि सर्वाणि गुल्मं वातोदरं तथा ।**
**आढ्यवातप्रतिश्यायं महान्तं क्षयपीनसम् ॥ १२ ॥**
**हलीमकं पाण्डुरोगं प्रमेहं च रसायनम् ।**

**दी०**—स यथेति वचनं गुटिकासमूहप्रतिपादनार्थमभिहितमाचार्येण । तत्रादौ श्रीबाहुशालो नाम गुडस्तं दर्शयन्नाह—इन्द्रवारुणिकेति । अयं बाहुशालगुडोऽर्शोव्याधौ शस्तः, तथेन्द्रवारुणिका चिर्भटी तस्या मूलं, दन्ती विटपविशेषः तस्यापि मूलं; त्रिवृन्निशोथमूलमेव, शठी कर्चूरभेदः, तेजोह्वाऽत्र चव्यं यत्र च तेजोह्वा चविका तत्र तेजोह्वा ज्योतिष्मती एवं सर्वत्र । (एतत्सर्वं प्रत्येकं द्विकर्षपरिमितं भवति । सूरणस्य पलान्यष्टाविति सूरणः कन्दविशेषः प्रसिद्धः तस्याष्टौ पलानि भवन्ति; वृद्धदारु चतुष्पलमिति निशोथभेदः तस्य चतुष्पलानि, भल्लातमिति भल्लातकफलानि तानि चतुष्पलमितानि भवन्ति) एतत्सकलं पानीयद्रोणे संक्राथ्य चतुर्थांशं गृह्णीयात् । जलद्रोणमिति चतुराढकपरिमितं जलं तेन षट्पञ्चाशोत्तरशतद्वयपलानि जलपरिमाणं भवति । उत्तममिति वस्त्रगालितादिकं तेनोत्तमता कथितस्येत्यर्थः । चतुर्थांशमित्याढकमात्रं क्राथ्यद्रव्यात् त्रिगुणितं गुडमिति गुडमत्र जीर्णं ग्राह्यं, क्राथ्यद्रव्यादिति इन्द्रवारुणिकादितेजोह्वान्तात् त्रिगुणितं त्रिभागं एतद्गुडं पादशेषक्राथे क्षिप्त्वा पुनः पचेद्यावत् सान्द्रो भवति । अत्र चूर्णमाह—चित्रकेत्यादि । चित्रकश्चित्रकजटा, त्रिवृन्निशोथः, दन्ती प्रसिद्धा, तेजोह्वा चवी एतद्द्रव्यचतुष्टयं पलप्रमाणं, अन्यदप्याह—व्योषैलामलकत्वच इत्यादि । व्योषं त्रिकटुकं त्वक् गुडत्वक् इदमपि द्रव्यषट्कं त्रिपलप्रमाणं प्रत्येकं । श्रीबाहुशालो गुड एवं सिद्धो भवति । बाहुशाल आचार्यविशेषस्तेन निर्मितो गुडः वटकसंज्ञ इत्यर्थः । आढ्यवात ऊरुस्तम्भभेदः । महान्तं प्रबलमित्यर्थः । रसायन इति प्रभावात् । तद्यथा "यज्जराव्याधिविध्वंसि भेषजं तद्रसायनं" इति ॥ ६–१२ ॥

१–'मरिचं' पा० । २–'नास्ति 'ख' पुस्तके ।

**गू०**—स यथा सुगमम् । तेजोह्वा[1] तुम्बुरुः, क्वाथांशद्रव्यं इन्द्रवारुणिकाद्या तस्मात्त्रिगुणं गुडं संपक्वे चित्रकादीनि दापयेत् । त्रिवृता निःसृता, दन्ती जयपालमूलं, तेजोह्वा तुम्बुरुः, व्योषं त्रिकटु, एला सूक्ष्मा; मरिचं षट्पलं त्रिकटुमध्ये ग्रहणात् "एकमप्यौषधं यस्मिन् योगे यत्पुनरुच्यते । मानतो द्विगुणं ज्ञेयं" इत्युक्तत्वात् । द्विगुणं मरिचकं यद्वा मरिचकङ्कोलं, त्वक्[2] प्रसिद्धं, मधु प्रस्थप्रमितं प्रस्थमानं, एवं प्रसिद्धः श्रीबाहुशालगुडः बाहुशालो नाम कश्चित्, तदर्थं प्रणीतत्वात् बाहुशालः श्रीमान् श्रीकरत्वात्; स्पष्टमन्यत् । ननु आदौ ज्वरघ्नी गुटिका कथं नोक्ता रोगगणनायां ज्वरस्यैव प्राधान्यात्? उच्यते, अस्य रसायनत्वात् ज्वरादिव्याधिनाशकत्वं समागतं, "यज्जराव्याधिविध्वंसि भेषजं तद्रसायन"मित्युक्तेः । व्याधिमात्रग्रहणे ज्वरस्याऽपि ग्रहणात् । यद्वा अर्शोरोगस्यापि ज्वरादिव्याधिसंज्ञकत्वादादावभिधानं क्रमाभावाद्व्यतिक्रमाभिधानम् ॥ ६-१२ ॥

## अथ मरिचादिगुटिका कासादौ—

**मरिचं कर्षमात्रं स्यात्पिप्पली कर्षसंमिता ॥ १३ ॥**
**अर्धकर्षो यवक्षारः कर्षयुग्मं च दाडिमम् ।**
**एतच्चूर्णीकृतं युञ्ज्यादष्टकर्षगुडेन हि ॥ १४ ॥**
**शाणप्रमाणां गुटिकां कृत्वा वक्त्रेण धारयेत् ।**
**अस्याः प्रभावात्सर्वेऽपि कासा यान्त्येव संक्षयम् १५**

## श्वासकासादौ गुडवटिका ।

**गुडशुण्ठीशिवामुस्तैर्गुटिकां धारयेन्मुखे ।**
**श्वासकासेषु सर्वेषु बिभीतं वापि केवलम् ॥ १६ ॥**

**दी०**—इदानीं मरिचादिगुटिकां दर्शयन्नाह—मरिचमिति । अस्या मरिचादिकाया वटिकायाः प्रभावादचिन्त्यशक्तिः । सर्वे कासा इति पञ्चप्रकाराः । अत्र दाडिमं दाडिमफलबीजानि कर्षयुग्ममिति कर्षद्वयं वक्त्रे धारयेदिति, अत्र वक्त्रधारणादिदमौषधं धूमरूपमित्याहुरेके, **चक्रेण** तु स्वसंग्रहे भक्षणचूर्णद्वयं वक्त्रे धारयेदिति प्रस्तावे लिखितं **वैद्यप्रसारके**ऽपि ॥ ( गुटिकास्वरूपभक्षणमस्योक्तम्, एतदभिप्रायेणात्र लिखितं । गुडशुण्ठीति स्पष्टम्[3] ) ॥ १३-१६ ॥

**गू०**—दाडिमं अम्लं; स्पष्टमन्यत् ॥ १३-१६ ॥

१-तेजवल । २-दालचीनी । ३-नास्ति 'ख' पुस्तके ।

## आमलक्यादिगुटिका तृष्णादौ—

**आमलं कमलं कुष्ठं लाजाश्च वटरोहकः ।**
**एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे ॥ १७ ॥**
**तृष्णां प्रवृद्धां हन्त्येषा मुखशोषं च दारुणम् ।**

**दी०**—अथामलक्यादिगुटिकामाह—आमलमिति । आमलमामलकफलं, कमलमुत्पलं तदभावे कमलबीजानि ग्राह्याणि, लाजाः भृष्टधान्योद्भवाः, वटरोहक इति वटवृक्षप्ररोहः सच वटरोहशब्दवाच्यः, मध्वत्र गुटिकाकरणमानं परिभाषोक्तम्, धारयेन्मुख इति । एतेन यथा यथा गुटिका द्रवति तथा तथा शीलनीया पुनरिमां सहसैवाभ्यवहरेदिति दृष्टपरिचयः । प्रवृद्धामिति कैरपि योगैरनिवार्याम् । मुखशोषं च दारुणमिति दारुणं दुःखकरमसाध्यमित्यर्थः ॥ १७ ॥

**गू०**—आमलं आमलकं, कमलं कमलपत्रं फलं वा, कुष्ठं प्रसिद्धं, लाजा धान्यजा, वटरोहकं वटारोहः, कुष्ठाऽभावे द्राक्षा वा देया कुष्ठस्यातीवोष्णत्वात् ॥ १७ ॥

## अथ ज्वरे सञ्जीवनीवटी त्रिदोषे च—

**विडङ्गं नागरं कृष्णा पथ्यामलबिभीतकम् ॥ १८ ॥**
**वचा गुडूची भल्लातं सद्विषं चात्र योजयेत् ।**
**एतानि समभागानि गोमूत्रेणैव पेषयेत् ॥ १९ ॥**
**गुञ्जाभा गुटिका कार्या दद्यादार्द्रकजैः रसैः ।**
**एकामजीर्णगुल्मेषु द्वे विषूच्यां प्रदापयेत् ॥ २० ॥**
**तिस्रश्च सर्पदष्टे तु चतस्रः सांनिपातिके ।**
**वटी संजीवनी नाम्ना संजीवयति मानवम् ॥ २१ ॥**

**दी०**—अथ सञ्जीवनीगुटिकां दर्शयन्नाह—विडङ्गमिति । अत्र नागरं शुण्ठी, कृष्णा पिप्पली, पथ्या हरीतकी, आमलमामलकफलं, भल्लातं भल्लातकफलं, सद्विषमिति शुद्धं विषं एतेषां समानमात्रा बोद्धव्या । गोमूत्रमत्र गुटिकार्धपरिमितं । गुञ्जाभा गुञ्जापरिमाणा वटी कार्या, आर्द्रकरसोऽत्रानुपानं, अजीर्णगुल्मयोरेकैका वटी देया, विसूच्यां द्वे वट्यौ, सर्पदष्टे तिस्रो गुटिकाः, सन्निपाते चतस्र इति नाम्ना कृत्वा सञ्जीवनी कथिता यतोऽस्याः प्रभावान्मानवो यदा मुमूर्षुस्तदा जीवतीति । विचारणात्र न कार्या, "अविचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः" इति वचनात् ॥ १८-२१ ॥

**गू०**—नागरं शुण्ठी, पथ्या हरीतकी, आमलकं, बिभीतकं अक्षः; भल्लातकं प्रसिद्धं । तदभावे बाकुचिर्देया, सद्विषं उत्तमं विषं, स्पष्टमन्यत् ॥ १८-२१ ॥

**अथ व्योषादिगुटिका पीनसादौ—**

**व्योषाम्लवेतसं चव्यं तालीसं चित्रकं तथा ।**
**जीरकं तिन्तिडीकं च प्रत्येकं कर्षभागिकम् ॥ २२ ॥**
**त्रिसुगन्धं त्रिशाणं स्याद्गुडः स्यात्कर्षविंशतिः ।**
**व्योषादिगुटिका सेयं पीनसश्वासकासजित् ॥ २३ ॥**
**रुचिस्वरकरी ख्याता प्रतिश्यायप्रणाशिनी ।**

दी०—इदानीं व्योषादिगुटिकामाह—व्योषेति । व्योषमत्र त्रिकटुकं, अम्लवेतसः प्रसिद्धः, चव्यं लोके चावशब्दवाच्यं, तालीसं स्वनामख्यातं, तिन्तिडीकमित्यम्लफलद्रव्यं, त्रिसुगन्धं त्रिशाणमिति । एला–त्वक्–पत्रकं, तच्च मिलितं त्रिकं ननु प्रत्येकं, व्योषादि तिन्तिडीकान्तं द्रव्यं च प्रत्येकं कर्षमात्रमित्यर्थः । गुडः स्यात् कर्षविंशतिरिति । गुडोऽत्र पुरातनो ग्राह्यः । कर्षविंशतिरिति पञ्चपलानि तेन सकलद्रव्याद्द्विगुणितो गुड इत्यर्थः, तथाहि—'व्योषचित्रकतालीसतिन्तिडीकाम्लवेतसम् । सचव्याजाजितुल्यांशमेलात्वक्पत्रपादिकम् । व्योषादिकमिदं चूर्णं पुराणगुडसंयुतं' इति ॥२२॥२३॥

गू०—व्योषं त्रिकटु; अम्लोऽम्लवेतसस्तस्य चुक्रं वा रसं वा देयं, त्रिसुगन्धं त्वक्–त्वज–एला एतत् त्रिशाणम् प्रत्येकं टङ्कं । स्पष्टमन्यत् ॥ २२ ॥ २३ ॥

**अथ गुडचतुष्टयगुटिका आमादौ—**

**आमेषु सगुडां शुण्ठीमजीर्णे गुडपिप्पलीम् ॥ २४ ॥**
**कृच्छ्रे जीरगुडं दद्यादर्शःसु सगुडाभयाम् ।**

दी०—अथ गुडचतुष्टयगुटिकां व्याचष्टे—आमेष्विति । गुडचतुष्टयगुटिका इति कोऽर्थः ? गुडेन सह चत्वारो योगाः कथिता इत्यर्थः । तथथा आमेषु सगुडां शुण्ठीमित्येको योगः, आमेषु आमदोषेषु सगुडामित्यत्र गुडद्वैगुण्यं एवं योगचतुष्टयेषु बोद्धव्यं; अजीर्णे गुडपिप्पलीमिति द्वितीयः, अजीर्णे विष्टब्धादिके, कृच्छ्रे जीरकगुडं दद्यादिति तृतीयो योगः, कृच्छ्रे मत्रकृच्छ्रे; अर्शःसु च सगुडाभयामिति चतुर्थो योग इति ॥ २४ ॥

गू०—आमेषु आमरोगेषु सगुडां शुण्ठीं दद्यात् । वटीं तुल्यगुडां कृत्वा अजीर्णे षड्विधाजीर्णे गुडपिप्पलीं दद्यात्; कृच्छ्रे मूत्रकृच्छ्रे जीरगुडं जीरं श्वेतजीरकं; अर्शःसु गुडाभयां गुडयुक्तां अभयां हरीतकीम् ॥२४॥

**अथ वृद्धदारुमोदकः—**

**वृद्धदारुकभल्लातशुण्ठीचूर्णेन योजितः ॥ २५ ॥**
**मोदकः सगुडो हन्यात्षड्विधार्शःकृतां रुजम् ।**

दी०—इदानीं वृद्धदारुकमोदकमाह—वृद्धादारुकेति वृद्धदारुको विख्यातः तदभावे निशोथा ग्राह्या यतोऽस्या भेदो वृद्धदारक इति । एतेषां द्रव्यत्रयाणां चूर्णं समभागमाहुः । सगुड इत्यत्र मोदकत्वेन गुडो द्विगुणितो ज्ञेयः । केचित्तु नाद्रियन्ते यतस्तत्र चतुःसमग्रहणेन सम एव गुडो युज्यते साम्येनाऽपि किञ्चिद्द्रवं दत्वा अग्नौ मोदकाः कार्याः । रुजमिति पीडाम् ॥ २५ ॥

गू०—वृद्धदारुकः प्रसिद्धः, भल्लातकः प्रसिद्धः, तदसहने रक्तचन्दनं देयं । अयं मोदकः षड्विधार्शःकृतां रुजां हन्यात् ॥ २५ ॥

**अथ सूरणपिण्डी अर्शोरोगे—**

**शुष्कसूरणचूर्णस्य भागान्द्वात्रिंशदाहरेत् ॥ २६ ॥**
**भागान्षोडश चित्रस्य शुण्ठ्या भागचतुष्टयम् ।**
**द्वौ भागौ मरिचस्यापि सर्वाण्येकत्र चूर्णयेत् ॥ २७ ॥**
**गुडेन पिण्डिकां कुर्यादर्शसां नाशनीं पराम् ।**

दी०—अथ सूरणपिण्डीमाह—शुष्कसूरणेति । सूरणः कन्दविशेषः प्रसिद्धः, स च शुष्कः कृत्वा चूर्णं कार्यं, द्वात्रिंशद्भागाः पञ्चद्वयभागाः सूरणस्येत्यर्थः । चित्रकस्य चित्रकमूलस्य त्वचः षोडशभागाः, शुण्ठ्याश्चत्वारो भागाः, मरिचस्य द्वौ भागौ गुडेन पिण्डिकां कुर्यादिति सकलद्रव्यद्विगुणितेनेत्यर्थः । अर्शसामिति बहुवचनत्वेन षड्विधत्वमित्यर्थः । परामित्यनेन विशिष्टत्वमस्या दर्शितम् ॥ २६ ॥ २७ ॥

गू०—चित्रस्य चित्रकस्य । स्पष्टमन्यत्॥२६॥२७॥

**सूरणवटकाः ।**

**सूरणो वृद्धदारुश्च भागैः षोडशभिः पृथक् ॥ २८ ॥**
**मुशलीचित्रकौ ज्ञेयावष्टभागमितौ पृथक् ।**
**शिवा बिभीतकी धात्री विडङ्गं नागरं कणा ॥२९॥**
**भल्लातः पिप्पलीमूलं तालीसं च पृथक्पृथक् ।**
**चतुर्भागप्रमाणानि त्वगेला मरिचं तथा ॥ ३० ॥**
**द्विभागमात्राणि पृथक्कृतस्त्वेकत्र चूर्णयेत् ।**
**द्विगुणेन गुडेनाथ वटकान्कारयेद्बुधः ॥ ३१ ॥**
**प्रबलाग्निकरा एते तथार्शोनाशनाः पराः ।**
**ग्रहणीं वातकफजां श्वासं कासं क्षयामयम् ॥ ३२ ॥**
**प्लीहानं श्लीपदं शोथं प्रमेहं च भगन्दरम् ।**
**निहन्युः पलितं वृष्यास्तथा मेध्या रसायनाः ॥३३॥**

दी०—अथ सूरणवटकानाह सूरण इति । सूरणः

शुष्कसूरणचूर्णं तच्च षोडशकर्षप्रमाणं, वृद्धदारुकोऽप्येवं, मुशाली तालमूली, लोके मूशरीशब्दवाच्या, साष्टकर्षमिति भवति, चित्रकजटाचूर्णमप्येवमेव, शिवादितालीसान्तं नवद्रव्यं प्रत्येकं चतुःकर्षमितम्। तत्र शिवा हरीतकी, धात्री आमलकी, कणा पिप्पली, भल्लातः भल्लातकफलानि, तालीसं प्रसिद्धं, त्वगेलामरिचमपि द्विकर्षमात्रं प्रत्येकं। तेनैव चूर्णयेदित्यनेन चूर्णोक्तविधिना चूर्णयेदित्यर्थः। द्विगुणेन गुडेनेति सकलचूर्णद्रव्यात् गुडो द्विगुणितो ग्राह्यः। ग्रहणीं वातकफजामिति वातजां कफजां (वातकफजां वा, क्षयामयं क्षयरोगं, पलितं वार्धक्यं वृद्धा एके वृद्ध्येति स्थाने वृष्येति पठन्ति) व्याख्यानयन्ति च मेध्या इति। बुद्धिप्रदाः रसायना इति जराव्याधिविध्वंसकाः॥ २८–३३॥

गू०—अर्शोरोगे (सूरणवटकानाह—) शिवा हरीतकी, धात्री आमलकी, त्वक् तजः॥ २८–३३॥

**मण्डूरवटकाः कामलादौ—**

**त्रिफला त्र्यूषणं चव्यं पिप्पलीमूलचित्रकौ।**
**दारु माक्षिकधातुश्च दार्वी मुस्तं विडङ्गकम्॥ ३४॥**
**प्रत्येकं कर्षमात्राणि सर्वद्विगुणितं तथा।**
**मण्डूरं चूर्णयेच्छुद्धं गोमूत्रेऽष्टगुणे क्षिपेत्॥ ३५॥**
**पक्त्वा च वटकान्कृत्वा दद्यात्तक्रानुपानतः।**
**कामलापाण्डुमेहार्शःशोथकुष्ठकफामयान्॥ ३६॥**
**ऊरुस्तम्भमजीर्णं च प्लीहानं नाशयेदपि।**

दी०—इदानीं मण्डूरवटकानाह—त्रिफलेति। त्रिफला हरीतक्यादिकं, त्र्यूषणं त्रिकटुकं, दारु देवदारु, माक्षिकधातुः स्वर्णमाक्षिकं, दार्वी दारुहरिद्रा, एके 'दारुमाक्षिकधातुस्त्वग् दार्व्या मुस्तं विडङ्गकं' इति पठन्ति तत्र दारुहरिद्रायास्त्वगेव ग्राह्या श्रेष्ठत्वात्, काष्ठं त्वगभावे गृह्यते, नतु त्वक्शब्देन गुडत्वक् ग्राह्या; यतस्तन्त्रान्तरे चतुर्दशद्रव्यं मिलितं। सर्वद्विगुणितं तथेति मण्डूरमित्यनेन संबध्यते। समानमिलितात् सकलद्रव्यचूर्णात् मण्डूरचूर्णं द्विगुणं देयमित्यर्थः। मण्डूरं लोहकिट्टं, लोहमलमित्यर्थः। यद्वा पुराणमण्डूरमिति विख्यातं गुणाधिक्यात्। तथाहि 'शतोर्ध्वमुत्तमं किट्टं मध्यं चाशीतिवार्षिकम्। अधमं षष्टिवार्षीयं ततो हीनं विषोपमं' इति। केचित् लोहकिट्टात् पृथक् पार्थिवद्रव्यं मण्डूरमिति वदन्ति (शुद्धमिति मण्डूरमित्यर्थः। 'मण्डूरं चूर्णितं शुद्धं' इति वचनात्। अत्र चूर्णमञ्जनसदृशं चूर्णीभूतं एतादृशमेव श्रेष्ठं भवति) शुद्धमिति ध्मायनेन सप्तधा गोमूत्रे निर्वापणादिना शुद्धिः, अत एवोक्तं तन्त्रान्तरे—'निर्वापितं हि गोमूत्रे मण्डूरं ग्राह्यमिष्यते' इति। कर्तव्यतास्य मण्डूरचूर्णमेव पृथग् गोमूत्रे पक्तव्यं आसन्नपाके च तस्मिन् त्रिफलादिचूर्णप्रक्षेपः यतः चूर्णानां पाको नास्तीति (अत्रार्थे क्वचित् श्लोकः 'प्रायो न पाकश्चूर्णानां भूरिचूर्णस्य तेन हि। आसन्नपाके प्रक्षेपः स्वल्पस्य पाकमागतेः'। पाकलक्षणमपि प्रसङ्गतो लिख्यते यथा—'रागो गन्धः शुभः पाके वर्तिः स्यादङ्गपीडनात्' इति। अष्टगुणे गोमूत्रे इति मूत्रं तु मण्डूरादष्टगुणं भवति। तथाहि 'ग्राह्यं त्वष्टगुणं मूत्रं शुद्धमण्डूरचूर्णतः' इति। एके 'मण्डूरं चूर्णयेत् सर्वं गोमूत्रेऽष्टगुणे क्षिपेत्' तत्र सकलद्रव्यादष्टगुणं गोमूत्रं ग्राह्यं इति पठन्ति, एतदसङ्गतं, अयं पाठो बहुपुस्तकेषु न दृष्टत्वात्। कफामयानिति क्षयकासप्रभृतीन्॥ ३४–३६॥

गू०—त्रिफला, त्र्यूषणं त्रिकटुकं, दारु देवदारुः, माक्षिकधातुः स्वर्णमाक्षिकं शुद्धा निर्मला मारिता च देया, मण्डूरं मूतं पुरातनं लोहकिट्टं सर्वतोऽष्टगुणं गोमूत्रं दत्वा पचेत्। तक्रेण च देयम्॥ ३४–३६॥

**धातुगतज्वरादौ पिप्पलीमोदकः—**

**(क्षौद्राद्द्विगुणितं सर्पिर्घृताद्द्विगुणपिप्पली॥ ३७॥**
**सिता द्विगुणिता तस्याः क्षीरं देयं चतुर्गुणम्।**
**चातुर्जातं क्षौद्रतुल्यं पक्त्वा कुर्याच्च मोदकान्॥ ३८॥**
**धातुस्थांश्च ज्वरान्सर्वान् श्वासं कासं च पाण्डुताम्।**
**धातुक्षयं वह्निमान्द्यं पिप्पलीमोदको जयेत्॥ ३९॥)**

**अथ चन्द्रप्रभागुग्गुलुः प्रमेहादौ—**

**चन्द्रप्रभा वचा मुस्तं भूनिम्बामृतदारुकम्।**
**हरिद्रातिविषा दार्वी पिप्पलीमूलचित्रकौ॥ ४०॥**
**धान्यकं त्रिफला चव्यं विडङ्गं गजपिप्पली।**
**व्योषं माक्षिकधातुश्च द्वौ क्षारौ लवणत्रयम्॥ ४१॥**
**एतानि शाणमात्राणि प्रत्येकं कारयेद्बुधः।**
**त्रिवृद्दन्तीपत्रकं च त्वगेला वंशरोचना॥ ४२॥**
**प्रत्येकं कर्षमात्राणि कुर्यादेतानि बुद्धिमान्।**
**द्विकर्षं हतलोहं स्याच्चतुष्कर्षा सिता भवेत्॥ ४३॥**
**शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः।**
**एभिरेकत्र संक्षुण्णैः कर्तव्या गुटिका शुभा॥ ४४॥**

१–नास्ति 'ख' पुस्तके।

१–नास्ति 'ख' पुस्तके। २–प्रक्षिप्तम्। तस्याः पिप्पल्याः। क्षीरं गव्यं, चातुर्जातं चूर्णाधिकारोक्तम्।

**चन्द्रप्रभादिविख्याता सर्वरोगप्रणाशिनी ।**
**प्रमेहान्विंशतिं कृच्छ्रं मूत्राघातं तथाऽश्मरीम् ॥४५॥**
**विबन्धाऽऽनाहशूलानि मेहनं ग्रन्थिमर्बुदम् ।**
**अन्त्रवृद्धिं कटीशूलं श्वासं कासं विचर्चिकाम् ॥४६॥**
**अण्डवृद्धिं तथा पाण्डुं कामलां च हलीमकम् ।**
**कुष्ठान्यर्शांसि कण्डूं च प्लीहोदरभगन्दरम् ॥ ४७ ॥**
**दन्तरोगं नेत्ररोगं स्त्रीणामार्तवजां रुजम् ।**
**पुंसां शुक्रगतान्दोषान्मन्दाग्निमरुचिं तथा ॥ ४८ ॥**
**वायुं पित्तं कफं हन्याद्बल्या वृष्या रसायनी ।**
**चन्द्रप्रभायां कर्षस्तु चतुःशाणो विधीयते ॥ ४९ ॥**

**दी०**—इदानीं चन्द्रप्रभागुटिकां दर्शयन्नाह—चन्द्रप्रभेत्यादि । चन्द्रप्रभा कर्पूरः, एके चन्द्रप्रभाशब्देन शठीं शतावरीं वा कथयन्ति संज्ञाशब्दत्वात् । भूनिम्बः कैरातः, अमृता गुडूची, दारुकं देवदारु, क्वचिद्भूनिम्बामरदारुकमिति पाठो दृष्टः । तत्रामरदारु देवदारु, दार्वी दारुहरिद्रा, व्योषं त्रिकटुकं, माक्षिकधातुः स्वर्णमाक्षिकम्, द्वौ क्षाराविति स्वर्जिकाक्षारयवक्षारौ, लवणत्रयमिति सैन्धवं सौवर्चलं विडं इति लवणत्रयं त्रिवृत्त्रिशोथः, दन्तीति दन्तीमूलत्वक्, तदभावे दन्तीबीजान्यपि मनाग् देयानि इति कस्मिंश्चित् सम्प्रदाये न सर्वत्र । हतलोहं सम्यङ्मृतलोहचूर्णं, शिलाजतु प्रसिद्धं, तच्चात्र शुद्धं ग्राह्यं,शुद्धिरस्यान्यत्रोक्ता ज्ञातव्या विस्तरेण । शेषं द्रव्यं सुबोधम् । मात्रापि चैतेषां व्यस्ता सुबोधा ज्ञातव्या । चन्द्रप्रभादिविख्यातेति चन्द्रप्रभेयं वटी आदिविख्याता पूर्वं प्रसिद्धेत्यर्थः, चन्द्रप्रभेवेत्यर्थः । अस्याः सतताभ्यासाच्चन्द्रस्येव प्रभा कान्तिर्भवतीति, यद्वा चन्द्रप्रभा नाम द्रव्यमादिर्यस्याः । सर्वरोगमित्यवशिष्टं रोगजातमुक्तरोगसमूहात्, तमपि नाशयितुं योग्या भवतीति भावः । कृच्छ्रं मूत्रकृच्छ्रं, विबन्धो वातादीनामप्रवृत्तिः,आनाह उदरापूरः, मेहनमिति ग्रहणेनैवोपदंशशूकदोषादयोऽभिधीयन्ते, बल्या बलकरी, वृष्या शुक्रवृद्धिकरी, रसायनी जराव्याधिविनाशिनीत्यनेन पौनरुक्त्येन प्रभावोत्कृष्टत्वमस्या दर्शितं । "चन्द्रप्रभायां कर्षस्तु चतुःशाणो विधीयते" इति पादद्वयं क्षेपकमामनन्ति केचित् ॥ ४०–४९ ॥

**गू०**—चन्द्रप्रभा कर्पूरः, चन्द्रवत्प्रभा यस्येति व्युत्पत्त्या, यद्वा चन्द्रप्रभा गन्धालिकाख्यकर्पूरभेदः तथान्वयवृत्त्या ।'पथ्ये गन्धालिका गन्धवधूः पृथुपलाशिका। शठी सुगन्धचण्डा स्यात्सोमभा सोमसंभवा', अमरदारु देवदारु, दार्वी दारुहरिद्रा, गजपिप्पली चव्यफलं, व्योषं त्रिकटु, माक्षिकधातुः स्वर्णमाक्षिकं शुद्धं मारितं च, एतानि प्रत्येकं शाणमात्राणि टङ्कमात्राणि । त्रिवृत् निःसृता, दन्ती जयपालमूलं, पत्रकं तजः, एला, वंशलोचना, एतानि प्रत्येकं कर्षमात्राणि । हतलोहं मृतलोहं द्विकर्षं, सिता सितोपला चतुःकर्षा, शिलाजतुसत्वं अष्टकर्षाणि, गुग्गुलुर्दशकर्षैः एवमेकत्रीकृतः चन्द्रप्रभा भवति । इयं चन्द्रप्रभादित्वात् चन्द्रप्रभागुटिका । केचित्तु एवं व्याख्यानयन्ति चन्द्रवत्प्रभा यस्यासौ चन्द्रप्रभो गुग्गुलुः स तु आदौ विडङ्गमधिकृत्य लिखितस्तथापि चन्द्रप्रभानाम्ना चन्द्रप्रसादेन प्राप्ता, सा **वङ्गसेनादि**भिः प्रमेहाधिकारे लिखिता । तथाच 'किमिरिपुदहनव्योषत्रिफलामरदारुचव्यभूनिम्बं । मागधिमूलं मुस्तं शठी वचाधातुमाक्षिके चैव' इत्यादि ॥ ४०–४९ ॥

## अथ काङ्कायनगुटिका गुल्मादौ—

**यमानी जीरकं धान्यं मरिचं गिरिकर्णिका ।**
**अजमोदोपकुञ्ची च चतुःशाणाः पृथक्पृथक् ॥५०॥**
**हिङ्गु षट्शाणिकं कार्यं क्षारौ लवणपञ्चकम् ।**
**त्रिवृच्चाष्टमितैः शाणैः प्रत्येकं कल्पयेत्सुधीः ॥ ५१ ॥**
**दन्ती शठी पौष्करं च विडङ्गं दाडिमं शिवा ।**
**चित्रोऽम्लवेतसः शुण्ठी शाणैः षोडशभिः पृथक् ५२**
**बीजपूररसेनैषां गुटिकां कारयेद्बुधः ।**
**घृतेन पयसा मद्यैरम्लैरुष्णोदकेन वा ॥ ५३ ॥**
**पिबेत्काङ्कायनप्रोक्तां गुटिकां गुल्मनाशिनीम् ।**
**मद्येन वातिकं गुल्मं गोक्षीरेण च पैत्तिकम् ॥५४॥**
**मूत्रेण कफगुल्मं च दशमूलैस्त्रिदोषजम् ।**
**उष्ट्रीदुग्धेन नारीणां रक्तगुल्मं विनाशयेत् ॥ ५५ ॥**
**हृद्रोगं ग्रहणीं शूलं क्रिमीनर्शांसि नाशयेत् ।**

**दी०**—अथ काङ्कायनगुटिकाविवरणमाह—यमानीति । अत्र गिरिकर्णिका 'गणियारी' शब्दवाच्या, लोके 'इस्फन्द' इति प्रसिद्धा, उपकुञ्ची कृष्णजीरक, हिंग्वत्र भर्जितं देयं, क्षाराविति यवक्षारः स्वर्जिकाक्षारश्च, लवणपञ्चकं प्रसिद्धं,त्रिवृत्त्रिशोथः, दन्ती प्रसिद्धा, शठी कर्चूरभेदः, पौष्करं पुष्करमूलं तदभावे कुष्ठमेव, दाडिमं दाडिमबीजं, शिवात्र हरीतकी, चित्रश्चित्रकजटा एतेषां उक्तमानतुलितानां चूर्णं कृत्वा गुटिकाकरणार्थपरिमितेन बीजपूररसेनाल्पाव्य मोदकाः कार्याः । घृताद्यनुपानं सामान्यमुक्त्वा विशेषानुमानं मद्यादिकं यदुक्तं तद्विशि-

र्शोरोगनिवृत्त्यर्थं इति न दोषः पौनरुक्त्या । मूत्रमत्र गोमूत्रं, दशमूलैरिति क्वथितदशमूलजलैः । काङ्कायनप्रोक्तामिति काङ्कायनाचार्येण प्रोक्तां कथितां गुटिकामित्यर्थः । तन्त्रान्तरे गुटिकेयमर्शोविनाशिनी विहिता। तथाहि—'**काङ्कायनेन** शिष्येभ्यः शस्त्रक्षाराग्निभिर्विना । कथितो वटको ह्येष गुदजानां विनाशनः' इति ॥ ५०–५५॥

**गू०**—गिरिकर्णिका अपराजिता, उपकुञ्ची कलञ्जिका, द्वौ क्षारौ स्वर्जितयवक्षारौ, त्रिवृदिति निःसृता, दन्ती जयपालमूलं, शठी कर्चूरः, शिवा हरीतकी, चित्रश्चित्रकः, अम्लोऽम्लवेतसस्तस्य चुक्रं वा रसो वा, षोडशशाणं । **काङ्कायनो मुनि**स्तत्प्रोक्तां गुटिकां, स्पष्टमन्यत् ॥ ५०–५५ ॥

## अथ योगराजगुग्गुलुर्वातरोगे आमवाते वा—

नागरं पिप्पली चव्यं पिप्पलीमूलचित्रकौ ॥ ५६ ॥
भृष्टं हिङ्ग्वजमोदा च सर्षपो जीरकद्वयम् ।
रेणुकेन्द्रयवाः पाठा विडङ्गं गजपिप्पली ॥ ५७ ॥
कटुकातिविषा भार्ङ्गी वचामूर्वे त्रिभागतः ।
प्रत्येकं शाणकानि स्युर्द्रव्याणीमानि विंशतिः ॥५८॥
द्रव्येभ्यः सकलेभ्यश्च त्रिफला द्विगुणा भवेत् ।
एभिश्चूर्णीकृतैः सर्वैः समो देयश्च गुग्गुलुः ॥ ५९ ॥
(वङ्गं रौप्यं च नागं च लोहसारस्तथाभ्रकम् ।
मण्डूरं रससिन्दूरं प्रत्येकं पलसंमितम् ॥ ६० ॥[1]
गुडपाकसमं कृत्वा इमं दद्याद्यथोचितम् ।
एकपिण्डं ततः कृत्वा धारयेद्घृतभाजने ॥ ६१ ॥
गुटिकाः शाणमात्रास्तु कृत्वा ग्राह्या यथोचिताः ।
गुग्गुलुर्योगराजोऽयं त्रिदोषघ्नो रसायनः ॥ ६२ ॥
मैथुनाहारपानानां त्यागो नैवात्र विद्यते ।
सर्वान्वातामयान्कुष्ठानर्शांसि ग्रहणीगदम् ॥ ६३ ॥
प्रमेहं वातरक्तं च नाभिशूलं भगन्दरम् ।
उदावर्तं क्षयं गुल्ममपस्मारमुरोग्रहम् ॥ ६४ ॥
मन्दाग्निं श्वासकासं च नाशयेदरुचिं तथा ।
रेतोदोषहरः पुंसां रजोदोषहरः स्त्रियाम् ॥ ६५ ॥
पुंसामपत्यजनको वन्ध्यानां गर्भदस्तथा ।
रास्नादिकाथसंयुक्तो विविधं हन्ति मारुतम् ॥६६॥
काकोल्यादिशृतात्पित्तं कफमारग्वधादिना ।
दार्वीशृतेन मेहांश्च गोमूत्रेण च पाण्डुताम् ॥६७॥
मेदोवृद्धिं च मधुना कुष्ठं निम्बशृतेन च ।
छिन्नाक्वाथेन वातास्रं शोथं शूलं कणाशृतात् ॥६८॥
पाटलाक्वाथसहितो विषं मूषकजं जयेत् ।
त्रिफलाक्वाथसहितो नेत्रार्तिं हन्ति दारुणाम् ॥ ६९॥
पुनर्नवादिक्वाथेन हन्यात्सर्वोदराण्यपि ।

**टी०**—अथ योगराजगुग्गुलुवटकमाह—नागरमिति । नागरं शुण्ठी, हिंग्वजमोदेति भृष्टं भर्जितं हिङ्गु देयं उत्क्लेदभयात्, (यतः 'चूर्णेषु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत्' इति) । अजमोदाऽत्र यमानी ग्राह्या, अन्तःपरिमार्जनत्वात्, जीरकद्वयमिति श्वेतकृष्णभेदेन विहितं, रेणुका प्रसिद्धा, गजपिप्पली चव्यफलं, मूर्वा चोरस्नायुः, शेषं प्रसिद्धं, एतद्विंशतिसंख्याकं द्रव्यगणं विंशतिशाणतुलितमित्यर्थः । प्रत्येकं टङ्कमितमाहुः । सकलद्रव्येभ्यस्तु त्रिफलाचूर्णं द्विगुणितं देयम्, तच्च चत्वारिंशत् शाणमितमित्यर्थः । त्रिफलाऽप्यत्र सममात्रा बोद्धव्या गणनायां तुलनायां वा साम्यत्वमस्याः, सर्वसमो गुग्गुलुर्देय इति । तेन षष्टिशाणमितो गुग्गुलुर्भवति । एकपिण्डमित्यादि वाक्येनास्य करणार्थं यावत् पिण्डीभूतं स्यात् तावत्परिमाणेन घृतं ग्राह्यमिति वृद्धानां व्यवहारोऽस्ति । पिण्डमत्र कुट्टनैर्निर्घातादिना, तत एव घृतभाजने धारयेत् । अतिस्निग्धत्वात् । गुटिकाः शाणमात्रास्त्विति । यद्यपि शाणपरिमिता गुटिका भवति तथापि भक्षणविधौ यथोचिता ग्राह्या, तेन दोषादिकं वीक्ष्य देया इति तात्पर्यार्थः । तथाह्युक्तं—'चत्वारो माषका हीने मध्ये त्वष्टौ च माषकाः । श्रेष्ठे द्वादशकाः प्रोक्ताः कोष्ठं विज्ञाय तत्त्रिधा' इति । यद्वा शोधनार्थं च गुग्गुलोः कर्षः शमनार्थं तु माषचतुष्टयमिति व्यवहारः । मैथुनाहारपानानामित्यादि अस्याभ्यासे मैथुनादयो न त्याज्याः, मैथुनं स्त्रीसेवा, एके मैथुनाहारपानाभ्यां प्रयोजनं चात्र विद्यादिति पठन्ति । एतत् सङ्गतं; तेन मैथुनादयो बाहुल्यमात्रं भवन्तीत्यर्थः । किंतु उच्यते यतः 'क्षाराम्लरसयूषाक्तं दोषधात्ववलोचितम् । बुभुक्षितो मात्रपानमद्याद्गुग्गुलुसेवकः' इत्यादिवचनात् उचितं यथा मैथुनमपि । तथाहि—

---

१—नास्ति 'ख' पुस्तके ।

१–'मूलकजात्' पा० । २–नास्ति ख पुस्तके । ३–कुट्टनं च लक्षसंख्याकनिर्घातैरविच्छेदं कार्यमिति सम्प्रदायः । यावत् सिक्थतुल्यमायाति तावद्वाऽष्टप्रहरमविच्छेदमिति केचित् । घृतं कुट्टनसमय एव वारंवारं दातव्यम् ।

'सेवेत कामतः कामं तृप्तो वाजीकृतैर्हिमे । त्र्यहाद्वसंतशरदोः पक्षाद्वृष्टिनिदाघयोः ॥ प्रकामं च निषेवेत मैथुनं शिशिरागमे । शीते रात्रौ दिवा ग्रीष्मे प्रावृड्वर्जितवर्षणे ॥ वसन्ते च दिवा रात्रौ ना स्मरेत् शरदि स्मरम्' इति । अस्यानुपानविशेषमाह—रास्नादिक्वाथसंयुक्त इत्यादि । रास्नादिक्वाथः क्वाथकल्पनायां कथितः, सच बृहद्रास्नादिर्लघुर्वा काङ्कोल्यादिचूर्णकल्पनायां ज्ञातव्यः, तच्च जीवनीयादिगणसंज्ञं, अस्य शृतेन क्वाथेनेत्यर्थः । आरग्वधादिनेति आरग्वधादिगणक्वाथेनेत्यर्थः । अयमपि क्वाथकल्पनायां उक्तः । दार्वीशृतेनेति । दार्वी दारुहरिद्रा तस्याः शृतेन क्वाथेन । गोमूत्रेण च पाण्डुतामिति अत्र आजं वा मूत्रं प्रशस्तं व्यवहारात् । मधुना क्षौद्रेण, निम्बशृतेनेति निम्बक्वाथेनेत्यर्थः । छिन्ना गुडूची तस्याः क्वाथेन । पाटला प्रसिद्धा तस्या मूलत्वक् ग्राह्या, त्रिफला हरीतक्यादिकं पुनर्नवादिक्वाथः क्वाथकल्पनायां प्रसिद्धः ॥ ५६–६९ ॥

**गू०**—नागरं शुण्ठी, तदादिर्विंशतिद्रव्याणि शाणमात्राणि, सर्वेभ्यस्त्रिफला द्विगुणा चत्वारिंशत् टङ्कमिता प्रत्येकं त्रयोदशटङ्कगुग्गुलुः सर्वैः समः षष्टिटङ्कमितः चूर्णीकृत्य गुग्गुलुः कवकाख्यः घृतेन संकुट्य गुटिकाः कार्याः । शाणमितं भक्षयेत् । केचित् गुग्गुलुं वातहरद्रव्यैर्दशमूलादिभिरुत्क्वाथ्य वस्त्रपूतं कृत्वा क्षिपन्ति । तथाच 'गन्धवर्णरसोपेतो गुग्गुलुर्मात्रया पुनः । भैषज्यैः सहितः क्वाथ्यो यथा व्याधिहरः पृथक् ॥ मात्रावशिष्टं तं ज्ञात्वा गालयेत् शुष्कवाससा । अथवा मर्दयेत् क्वाथे यदुष्णे साधुसाधिते ॥ मृण्मये हेमपात्रे वा राजते स्फाटिकेपि वा' । **इति गुग्गुलुशोधनं गुग्गुलुकल्पात्** ॥ ५६–६९ ॥

## अथ कैशोरगुग्गुलुर्वातरक्तादौ—

**त्रिफलायास्त्रयः प्रस्थाः प्रस्थैका चामृता भवेत्॥७०॥**
**संकुट्य लोहपात्रेण सार्धद्रोणाम्बुना पचेत् ।**
**जलमर्धशृतं ज्ञात्वा गृह्णीयाद्वस्त्रगालितम् ॥ ७१ ॥**
**ततः क्वाथे क्षिपेच्छुद्धं गुग्गुलुं प्रस्थसंमितम् ।**
**पुनः पचेदयःपात्रे दर्व्या संघर्षयेन्मुहुः ॥ ७२ ॥**
**सान्द्रीभूतं ततो ज्ञात्वा गुडपाकसमाकृतिम् ।**
**चूर्णीकृत्य ततस्तत्र द्रव्याणीमानि निक्षिपेत् ॥ ७३ ॥**
**त्रिफला द्विपला ज्ञेया गुडूची पलिका मता ।**
**षडक्षं त्र्यूषणं प्रोक्तं विडङ्गानां पलार्धकम् ॥ ७४ ॥**
**दन्ती कर्षमिता कार्या त्रिवृत्कर्षमिता स्मृता ।**
**ततः पिण्डीकृतं सर्वं घृतपात्रे विनिक्षिपेत् ॥ ७५ ॥**
**गुटिकाः शाणमात्रेण युञ्ज्याद्दोषाद्यपेक्षया ।**
**अनुपाने भिषग्दद्यात्कोष्णं नीरं पयोऽथवा ॥ ७६ ॥**
**मञ्जिष्ठादिशृतं वापि युक्तियुक्तमुतापरम् ।**
**जयेत्सर्वाणि कुष्ठानि वातरक्तं त्रिदोषजम् ॥ ७७ ॥**
**सर्वव्रणानि गुल्मानि प्रमेहपिडिकास्तथा ।**
**प्रमेहोदरमन्दाग्निकासश्वयथुपाण्डुजान् ॥ ७८ ॥**
**हन्ति सर्वामयान्नित्यमुपयुक्तो रसायनः ।**
**कैशोरकाभिधानोऽयं गुग्गुलुः कान्तिकारकः ॥७९॥**
**वासादिना नेत्रगदान्गुल्मादीन्वरुणादिना ।**
**क्वाथेन खदिरस्यापि व्रणकुष्ठानि नाशयेत् ॥ ८० ॥**
**अम्लं तीक्ष्णमजीर्णं च व्यायामं श्रममातपम् ।**
**मद्यं रोषं त्यजेत्सम्यग्गुणार्थी पुरसेवकः ॥ ८१ ॥**

**दी०**—अधुना कैशोरगुग्गुलुवटकानाह—त्रिफलाया इत्यादि । सम्मिलितत्रयस्य त्रय एव प्रस्थाः तेन द्वादशकुडवा इत्यर्थः । प्रस्थैका चामृता भवेत् इति । अमृता गुडूची तस्याः प्रस्थैकं, एके 'द्विप्रस्थममृता भवेत्' इति पठन्ति । अयमपि पाठः प्रचरति आदृतत्वात् ग्रन्थान्तरदर्शनाद्वा । तथाच 'द्वात्रिंशच्छिन्नरुहायाः फलानि देयानि यत्नत' इति । संकुट्येति त्रिफलागुडूचीमित्यर्थः । द्रोणाम्बुना पचेदिति एतद्द्रव्यं चतुराढकपरिमितेन जलेन सार्धं परिपचेदिति । क्वाथविधानेन क्वाथार्धावशेषं शृतं वस्त्रगालितं गृह्णीयात् । अपरकार्यमाह—शुद्धं गुग्गुलुमित्यादि । शुद्धताऽस्य निष्पात्रादित्वेन सप्तरात्रं घृतोषितत्वात् । यद्वा शुद्धं जात्युत्कृष्टमित्यामनन्ति । यतः गुग्गुलोः पञ्च जातयः, तद्यथा—'सुवर्णवर्णः प्रथमो द्वितीयः कुसुमद्युतिः । तृतीयः पद्मरागस्तु चतुर्थश्चन्द्रनीलकः ॥ पञ्चमो महिषाक्षश्च नामतः शास्त्रकोविदैः' इति । तत्र महिषाक्षं विहितं । उक्तं च तन्त्रान्तरे—'वरमहिषलोचनोदरसन्निभवर्णस्य गुग्गुलोः प्रस्थं' इत्यादि । अयःपात्रे लोहपात्रे । दर्व्या सङ्घर्षयेन्मुहुरिति । दर्वी सञ्चालनक्रियायां प्रसिद्धैव । मुहुरिति वारंवारं, कुतः ? दग्धभयात् गुडपाकसमाकृतिमिति यथा गुडपाकं तथा गुग्गुलोः पाकमित्यर्थः । यतः 'गुडवद्गुग्गुलोः पाकः सुगन्धस्तु विशेषतः' इति । लक्षणमपि गुडपाकस्य तन्त्रान्तरे प्रथितं तद्यथा—'तोयपूर्णे यदा पात्रे क्षिप्तो न प्लवते गुडः । क्षिप्तस्तु निश्चलस्तिष्ठेत्

१–'व्यवायं' पा० । २–'कुसुमाह्वयः' पा० ।

पतितस्तु न शीर्यते ॥ एष पाको गुडादीनां सर्वेषां परिकीर्तितः' इति । अपरकार्यमाह—चूर्णीकृत्य ततस्तत्रेति । तत इति गुडपाकादनन्तरं तत्र इति गुग्गुलुपाकद्रव्ये । त्रिफला द्विपला ज्ञेयेत्यादि । संमिलितत्रिफलाया द्विपलमितं चूर्णं ग्राह्यं, गुडूची पलपरिमिता । व्यवहारतस्तु गुडूच्याः सत्वमादाय क्षिपेदिति मनोहरम् । त्र्यूषणं त्रिकटुकं तच्च मिलित्वा षडक्षम्, विडङ्गचूर्णमप्यर्धपलं, दन्तीमूलं जयपालमूलं कर्षप्रमाणम् । केचित्तु दन्तीबीजान्यत्र क्षिपन्ति । तच्च सर्वमतं । त्रिवृत्त्रिशोथः। ततः पिण्डीकृतमित्यादिनात्र कर्त्तव्यविधिरपि योगराजवद्बोद्धव्यः । गुटिका इति । शाणमात्रेति शाणपरिमिता गुटिकाः कृत्वा दोषाद्यपेक्षया, नतु नियतशाणमात्रमेव । दोषापेक्षया यथा—कफे निष्कैकं, पित्ते द्विनिष्कं वायौ त्रिनिष्कं इति । कोष्ठापेक्षया यथा 'चत्वारो माषका हीने, मध्ये त्वष्टौ च माषकाः । श्रेष्ठे द्वादशकाः प्रोक्ताः कोष्ठं विज्ञाय तत्त्रिधा' इति । ऋत्वपेक्षया यथा 'प्रावृट्काले च ग्रीष्मे च घृतयुक्तं प्रदापयेत् । शरत्काले वसन्ते च दापयेत् त्रिफलायुतम् । हेमन्ते शिशिरे चैव गोमूत्रेण समायुतं' इति । अनुपाने तु कोष्णं नीरं पयोऽथवेत्यादि । पयः क्षीरं, मञ्जिष्ठादिशृतमिति मञ्जिष्ठादिक्वाथं क्वाथकल्पनायां कथितं, युक्तियुक्तमुतापरमिति उताथवा अपरमनुपानं युक्तियुक्तं रोगसात्म्यं दद्यादिति सम्बन्धः । तथाहि—'यस्य रोगस्य यत् सात्म्यं दद्यात् तदनुपानकं' इति । एतच्चाग्रे वक्ष्यमाणमस्ति । वासादिना नेत्रगदानिति वासादिना वासादिक्वाथेन, वरुणादिना वरुणादिक्वाथेन कृच्छ्रं मूत्रकृच्छ्रं, गुल्मादीनिति आदिग्रहणात् कृच्छ्राश्मरीप्रभृतीन्, खदिरस्य क्वाथेनेति खदिरो वृक्षविशेषः तस्य मूलत्वक् । अस्याभ्यासे त्याज्यमाह अम्लमित्यादि । अम्लमम्लीका मातुलुङ्गादि, तीक्ष्णं राजिकादि, अजीर्णमन्नादिजं, व्यायामं शरीरायासजनकं कर्म श्रमं बह्वायासकृतकष्टं कर्म, आतपं घर्मसेवा, मद्यं मद्यपानं, रोषं क्रोधं, सम्यक् त्यजेदिति यतोऽम्लादीनि वातरक्तप्रकोपीणि भवन्ति । एके अम्लं तीक्ष्णमित्यादि श्लोकं न पठन्ति क्षेपकोऽयमिति मन्यन्ते । कैशोरगुग्गुलुरिति कैशोरो बालकः तस्य रूपं कैशोरकं तेनास्याभ्यासे बालकस्येव रूपं भवतीत्यर्थः । अतएव कान्तिकारकः कथितः ॥ ७०–८१ ॥

**गू०**—त्रिफला त्रयः प्रस्था इति । एकं प्रस्थं हरीतकी, एकं विभीतकं, एकं आमलकं एवं त्रयः; अमृता गुडूची प्रस्थैका संकुट्य लोहपात्रे सार्धद्रोणजले पचेत्, अर्धजलं गृहीत्वा वस्त्रपूतं पुनः पचेत् । दर्व्या मुहुः संघट्टयेत्, सान्द्रीभूतं गुडपाकं ज्ञात्वा इमानि क्षिपेत् । त्रिफलार्धपला ज्ञेया प्रत्येकमर्धपला, गुडूची पलिका त्र्यूषणं त्रिकटु षडक्षं प्रत्येकं द्व्यक्षं, विडङ्गानां अर्धपलं, दन्ती कर्षमिता, त्रिवृत्कर्षमिता । ततः पिण्डीकृत्वा घृतपात्रे क्षिपेत् । शाणिका गुटिका दोषापेक्षया शुद्धं गुग्गुलुं तृणवालशर्करादिरहितं, यद्वा वातरक्तादौ औषधं क्वाथशोधितं क्षिपेत् । अनुपाने कोष्णं नीरं पयः दुग्धं मञ्जिष्ठादिर्वा । स्पष्टमन्यत् । पुरसेवकः गुग्गुलुभक्षकः गुणार्थी अम्लादीन् त्यजेत् । अयं गुग्गुलुः कैशोरकाभिधानः किशोरावस्थावद्रूपकरः स्यात् ॥ ७०–८१ ॥

### अथ त्रिफलागुग्गुलुर्भगन्दरादौ—

**त्रिपलं त्रिफलाचूर्णं कृष्णाचूर्णं पलोन्मितम् ।**
**गुग्गुलुं पाञ्चपलिकं क्षोदयेत्सर्वमेकतः ॥ ८२ ॥**
**ततस्तु गुटिकां कृत्वा प्रयुञ्ज्याद्वह्न्यपेक्षया ।**
**भगन्दरं गुल्मशोथावर्शांसि च विनाशयेत् ॥ ८३ ॥**

**टी०**—इदानीं त्रिफलागुग्गुलुवटकमाह—त्रिपलमित्यादि । संमिलितफलत्रिकचूर्णं त्रिपलप्रमाणं ग्राह्यं, तेन हरीतकी पलमानं, विभीतकं पलप्रमाणं, आमलकमपि पलमानमिति; कृष्णा पिप्पली तस्याश्चूर्णं पलप्रमितमिति । गुग्गुलुं पाञ्चपलिकमिति । पञ्चपलप्रमाणं गुग्गुलुं संगृह्य घृतेन सह संकुट्य चूर्णेन सह मोदकाः कार्याः, अतएव क्षोदयेदित्युक्तं घृतमत्र व्यवहारदर्शनात् । वह्न्यपेक्षयेत्यादिना भक्ष्यमाणस्येति बोद्धव्यम् । गुल्मशोथाविति गुल्मश्च शोथश्च । एके 'भगन्दरं गुल्मशोथमर्शांसि च विनाशयेत्' इति पठन्ति । तत्र गुल्मेन जनितं शोथमिति ॥ ८२ ॥ ८३ ॥

**गू०**—त्रिपलं त्रिफलाचूर्णं प्रत्येकं पलं हरीतक्यादीनां, कृष्णचूर्णं पिप्पलीचूर्णं पलोन्मितं, गुग्गुलुः पञ्चपलं, स्पष्टमन्यत् ॥ ८२ ॥ ८३ ॥

### अथ गोक्षुरादिगुग्गुलुः प्रमेहादौ—

**अष्टाविंशतिसंख्यानि पलान्यानीय गोक्षुरात् ।**
**विपचेत्षड्गुणे नीरे क्वाथो ग्राह्योऽर्धशेषितः ॥ ८४ ॥**
**ततः पुनः पचेत्तत्र पुरं सप्तपलं क्षिपेत् ।**
**गुडपाकसमाकारं ज्ञात्वा तत्र विनिक्षिपेत् ॥ ८५ ॥**
**त्रिकटु त्रिफला मुस्तं चूर्णितं पलसप्तकम् ।**
**ततः पिण्डीकृतस्यास्य गुटिका मुखयोजिता ॥ ८६ ॥**

हन्यात्प्रमेहं कृच्छ्रं च प्रदरं मूत्रघातकम् ।
वातास्रं वातरोगांश्च शुक्रदोषं तथाऽश्मरीम् ॥ ८७ ॥

**दी०**—अथ गोक्षुरादिगुग्गुलुं दर्शयन्नाह—अष्टाविंशतीति । गोक्षुरादिति पञ्चाङ्गगोक्षुरकस्याष्टाविंशतिपलानि ग्राह्याणि, तानि संकुट्य षड्गुणे पानीये संक्वाथ्यार्धावशेषो ग्राह्यः, षड्गुणता च गोक्षुरपरिमाणात्, अर्धावशेषो जलपरिमाणात् । ततः पुनः पचेदित्यादि पुनः पचेदित्यर्धावशेषितः क्वाथः । तत्रार्धावशेषिते पुरं गुग्गुलुं सप्तपलपरिमितम् । गुडपाकसमाकारमिति । यथा गुडपाको भवति तथायमपि कर्तव्यः, तच्च गुडपाकलक्षणं पूर्वमुक्तं । तत्र विनिक्षिपेदिति तत्र गुग्गुलुपाके विनिक्षिपेद्वक्ष्यमाणद्रव्याणीत्यर्थः । तानि कानि इत्यत्राह—त्रिकटुत्रिफलामुस्तमिति । त्रिकटु त्र्यूषणं, त्रिफला हरीतक्यादिकं, मुस्तं प्रसिद्धं, एतत् सकलं पलसप्तकं ग्राह्यं, प्रत्येकं पलमात्रमित्यर्थः । गुटिका मुखयोजितेति । अस्य गुटिका शाणमात्रा प्रकल्प्य यथादोषं भक्षणीया इति भावः । कृच्छ्रं मूत्रकृच्छ्रं, वातरोगान् हनुस्तम्भाक्षेपकादीन् ॥ ८४–८७ ॥

**गू०**—गोक्षुरं अष्टाविंशतिसंख्यानि पलान्यानीय षड्गुणे नीरे विपचेत् अर्धशेषः क्वाथो ग्राह्यः । पुनः सप्तपलं पुरं गुग्गुलुं दत्वा पचेत् त्रिकटु त्रिफलामुस्तं एतानि सप्तद्रव्याणि सप्तपलानि प्रत्येकं पलम् । इति गोक्षुरादिः प्रमेहादौ ॥ ८४–८७ ॥

### अथ त्रिफलामोदकः कुष्ठादौ—

त्रिफलाष्टपला कार्या भल्लातं च चतुष्पलम् ।
बाकुची पञ्चपलिका विडङ्गानां चतुष्पलम् ॥ ८८ ॥
हतलोहं त्रिवृच्चैव गुग्गुलुश्च शिलाजतु ।
एकैकं पलमात्रं स्यात्पलार्धं पौष्करं भवेत् ॥ ८९ ॥
चित्रकस्य पलार्धं स्याद्विशाणं मरिचं भवेत् ।
नागरं पिप्पली मुस्ता त्वगेलापत्रकुङ्कुमम् ॥ ९० ॥
शाणोन्मितं स्यादेकैकं चूर्णयेत्सर्वमेकतः ।
ततस्तत्प्रक्षिपेच्चूर्णं पक्वखण्डे च तत्समे ॥ ९१ ॥
मोदकान्पलिकान्कृत्वा प्रयुञ्जीत यथोचितान् ।
हन्यात् सर्वाणि कुष्ठानि त्रिदोषप्रभवामयान् ॥ ९२ ॥
भगन्दरप्लीहगुल्माञ्जिह्वाताल्वुगलामयान् ।
शिरोऽक्षिभ्रूगतान्रोगान्हन्यात्पृष्ठगतानपि ॥ ९३ ॥
प्राग्भोजनस्य देयं स्यादधःकायस्थिते गदे ।
भेषजं भक्तमध्ये च रोगे जठरसंस्थिते ॥ ९४ ॥
भोजनस्योपरि ग्राह्यमूर्ध्वजत्रुगदेषु च ।

**दी०**—अथ त्रिफलामोदकमप्याह—त्रिफलेत्यादि । सम्मिलितफलत्रिकमष्टपलपरिमितं भवति । भल्लातं भल्लातकफलं, हतलोहमिति सम्यङ्मृतलोहचूर्णं, 'हतलोहं गुग्गुलुश्च शिलाजतु त्रिकत्रिकम्' इति पाठे त्रिकत्रिकं त्रिपलमित्यर्थः । अयं पाठस्त्वसङ्गत एव, किन्तु "हतलोहं त्रिवृच्चैव गुग्गुलुश्च शिलाजतु" इति पाठः साधुः । तत्र त्रिवृत्त्रिशोथं, तेन लोहचूर्णादिशिलाजतुपर्यन्तं पलमात्रमाहुः, पौष्करं पुष्करमूलं पलार्धं ग्राह्यं, नागरादिकुङ्कुमान्तं द्रव्यसप्तकं शाणोन्मितं, प्रत्येकमिति भावः । पक्वखण्डे च तत्समे इति तत्समे सकलद्रव्यसम्भारसाम्ये तेन सप्तविंशतिपलानीत्यर्थः । यथोचितानिति, यथा दोषापेक्षया जिह्वाताल्वुगलामयानित्यनेन जिह्वामयान्, तात्वामयान्, गलामयान्, एते मुखरोगे पठिताः, हन्यात् पृष्ठागतान् रोगानित्यर्थः । प्राग्भोजनस्येति प्रातःकाले; अधःकायस्थिते गदे इति गृध्रस्यादौ; जठरसंस्थिते उदरादौ; ऊर्ध्वजत्रुगदेष्विति शिरोरोगादिषु भोजनस्योपरि सायंकाले ॥ ८८–९४ ॥

**गू०**—पक्वखण्डं पक्वतां प्राप्ते खण्डे त्रिफलाऽष्टपला प्रत्येकमष्टपला, त्वक् तजः, एला, पत्रं पत्रजं, कुङ्कुमं केशरं; स्पष्टमन्यत् ॥ इति त्रिफलामोदकः ॥ ॥ ८८–९४ ॥

### अथ काञ्चनारगुग्गुलुः गण्डमालाऽपचीग्रन्थीभगन्दरादौ—

काञ्चनारत्वचो ग्राह्यं पलानां दशकं बुधैः ॥ ९५ ॥
त्रिफला षट्पला कार्या त्रिकटु स्यात्पलत्रयम् ।
पलैकं वरुणं कुर्यादेलात्वक्पत्रकं तथा ॥ ९६ ॥
एकैकं कर्षमात्रं स्यात्सर्वाण्येकत्र चूर्णयेत् ।
यावच्चूर्णमिदं सर्वं तावन्मात्रस्तु गुग्गुलुः ॥ ९७ ॥
संकुट्य सर्वमेकत्र पिण्डं कृत्वा च धारयेत् ।
गुटिकाः शाणमात्रेण प्रातर्ग्राह्या यथोचितम् ॥ ९८ ॥
गण्डमालां जयत्युग्रामपचीमर्बुदानि च ।
ग्रन्थीन्व्रणांश्च गुल्मांश्च कुष्ठानि च भगन्दरम् ॥ ९९ ॥
प्रदेयश्चानुपानार्थं क्वाथो मुण्डितकाभवः ।
क्वाथः खदिरसारस्य पथ्याक्वाथोऽथ कोष्णकम् १००

**दी०**—अथ काञ्चनारगुग्गुलुं प्रकटयन्नाह—काञ्चनारत्वच इति । काञ्चनारो वृक्षविशेषः प्रसिद्ध एव निजनाम्ना, तस्य त्वक् दशपलपरिमिता ग्राह्या । त्रिफ-

लेति संमिलितफलत्रिकं षट्पलप्रमितं; त्रिकटोरपि मिलित्वा पलत्रयं भवति वरुणोऽपि स्वनामप्रसिद्धो वृक्षविशेषः तस्यापि त्वगेव ग्राह्या। एला त्वक् पत्रकमिति सुगन्धत्रयं प्रत्येकं कर्षमात्रं देयं, गुग्गुलुरत्र सकलचूर्णसमः, तेन त्रिकर्षोत्तराणि विंशतिपलानि भवन्ति; पिण्डं कृत्वेत्यादिना घृतेन सह संकुट्य स्निग्धभाण्डे धारयेदिति संप्रदायः। यथोचितमिति यथादोषापेक्षया अनुपानार्थं द्रव्याण्याह—क्राथो मुण्डतिकाभव इति। मुण्डतिका भूकदम्बकं केदारमुण्डी इति लोके, खदिरः प्रसिद्धः तस्य सारो मध्यभागस्थितकाष्ठविशेषः। पथ्या हरीतकी कोष्णमित्युष्णोदकं, यतः- 'कं शिरोम्बुनोः' इति कोशः॥ ९५-१००॥

**गू०**—काञ्चनारः वृक्षविशेषस्तस्य त्वचः विंशतिपलं, त्रिकटु द्वादशपलं समुदितं प्रत्येकं, शुण्ठ्यादीनां चतुःपलं, त्रिफला षट्पला समुदिता च प्रत्येकं, त्रिफला हरीतक्यादिका, वरुणं पलैकं, एला त्वक्पत्रकं, एकैकं कर्षं गुग्गुलुः सर्वसमः। स्पष्टमन्यत्॥ ९५-१००॥

**अथ माषादिमोदकः पुष्टौ—**

**निस्तुषं माषचूर्णं स्यात्तथा गोधूमसंभवम्।**
**निस्तुषं यवचूर्णं च शालितण्डुलजं तथा॥ १०१॥**
**सूक्ष्मं च पिप्पलीचूर्णं पलिकान्युपकल्पयेत्।**
**तत एकीकृतं सर्वं भर्जयेद्गोघृतेन च॥ १०२॥**
**अर्धमात्रेण सर्वेभ्यस्ततः खण्डं समं क्षिपेत्।**
**जलं च द्विगुणं दत्त्वा पाचयेत शनैः शनैः॥ १०३॥**
**ततः पक्वं समुद्धृत्य वृत्तान्कुर्वीत मोदकान्।**
**भुक्त्वा सायं पलैकं च पिबेत्क्षीरं चतुर्गुणम्॥ १०४॥**
**वर्जनीयौ विशेषेण क्षाराम्लौ द्वौ रसावपि।**
**कृत्वैवं रमयेन्नारीर्बह्वीर्न क्षीयते नरः॥ १०५॥**

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यमखण्डे वटककल्पना नाम सप्तमोऽध्यायः॥

---

**दी०**—अथ माषादिमोदकमाह—निस्तुषमित्यादि। माषचूर्णं निस्तुषं तुषरहितं ग्राह्यं, तथेति ग्रहणाद्गोधूमचूर्णमपि निस्तुषमित्यर्थः। शालिर्धान्यविशेषः स च षष्टिको ग्राह्यः तस्य तण्डुलान्कृत्वा तज्जातं चूर्णं देयं, पलिकानीति बहुवचनेन माषचूर्णादिपिप्पलीचूर्णान्तं द्रव्यं प्रत्येकं पलमात्रमाहुः कर्तव्यविधावत्र। तत एकीकृतमित्यादि चूर्णादर्धमात्रेण गोघृतेन चूर्णं मनाग्भर्जयित्वा तदनु सकलचूर्णसमानं खण्डं संगृह्य खण्डाद्द्विगुणितेन जलेन सह पक्त्वा पलप्रमिता मोदकाः कार्याः। सायं सन्ध्यासमये। पिबेत् क्षीरं चतुर्गुणमिति पलप्रमाणं द्रव्यं भक्षयित्वा पलचतुष्टयं क्षीरमनुपेयमित्यर्थः। क्षाराम्लौ द्वौ रसौ विशेषेण वर्जनीयौ यतस्तौ शुक्रच्युतिकरौ भवतः, न क्षीयते नर इति शुक्रहानिर्न भवतीति तात्पर्यार्थः॥ १०१-१०५॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यमखण्डे गुटिकाकल्पनाध्यायः समाप्तः॥ ७॥

---

**गू०**—निस्तुषं त्वग्रहितं माषचूर्णं, पिप्पलीचूर्णं एतानि पलिकानि पलमानानि, सर्वेभ्योऽर्धेन गोघृतेन भर्जयेत्। ततः खण्डं समं द्विगुणं जलं दत्वा पाचयेत् द्विगुणं खण्डात् ततः पक्वमोदकं पलमात्रं खादेत् एवं कृत्वा नरः बह्वीर्नारी रमयेत् क्षीयते न॥ ॥ १०१-१०५॥

इति श्रीकाशीरामवैद्यकृतायां गूढार्थदीपिकायां चिकित्सास्थाने गुटिकाधिकारः॥ ७॥

---

## अष्टमोऽध्यायः।

अधुनावलेहानां प्रथमतस्तत्स्वरूपविषयं दर्शयन्नाह—

**क्वाथादीनां पुनः पाकाद्घनत्वं सा रसक्रिया।**
**सोऽवलेहश्च लेहः स्यात्तन्मात्रा स्यात्पलोन्मिता॥१॥**

**दी०**—क्वाथादीनामिति। क्वाथादीनामित्यादि ग्रहणात् स्वरसफाण्टकल्कादयोऽभिधीयन्ते घनत्वमिति। सान्द्रत्वं यावद्भवति तावत्पाकः कर्तव्य इति भावः। पाकस्तु क्वाथादीनां भवति, यतः प्रथमतः क्वाथविधिना पाकं कृत्वा पश्चात् पाकेन लेहः स्यादिति। तन्मात्रेति तस्याऽवलेहभक्षणार्थं मानं पलमितं बोद्धव्यं, इति सामान्यमानं भक्षणेऽभिहितम्॥ १॥

इदानीमनुक्ते **सितादीनां परिमाणमाह—**

**सिता चतुर्गुणा कार्या चूर्णाच्च द्विगुणो गुडः।**
**द्रवं चतुर्गुणं दद्यादिति सर्वत्र निश्चयः॥ २॥**

**दी०**—अनुक्तमानावलेहे सिता चतुर्गुणा देया। चतुर्गुणताऽत्र सकलद्रव्यादित्यर्थः। गुडस्तु द्विगुण इति चूर्णद्रव्यात्। द्रवं तोयक्षीरादिकं चतुर्गुणं। अत्रापि चूर्णादिति भावः। सर्वत्र निश्चय इति स्वतन्त्रे परतन्त्रे वा॥ २॥

### अथावलेहस्य सिद्धिलक्षणमाह—

**सुपक्के तन्तुमत्त्वं स्यादवलेहोऽप्सु मज्जति।**
**खरत्वं पीडिते मुद्रागन्धवर्णरसोद्भवः॥ ३॥**

**दी०**—सुपक्क इति। सम्यक् पक्केऽवलेहे एतादृशं लक्षणं भवति, कीदृशं तदाह—तन्तुमत्त्वमित्यादि। दर्व्या सञ्चालनेन तन्तुसंयुक्त इव दृश्यते, तेन मृद्यमानोऽङ्गुलिग्राही भवतीत्यर्थः। अप्सु मज्जतीति पानीयमध्ये यदा क्षिप्तस्तदा निमग्नो भवति। स्थिरत्वमिति निश्चलत्वं एतेन द्रवरहित इत्यर्थः। तथाहि—"तोयपूर्णे यदा पात्रे क्षिप्तो न प्लवते गुडः। क्षिप्तस्तु निश्चलस्तिष्ठेत् पतितस्तु न शीर्यते॥ एष पाको गुडादीनां सर्वेषां परिकीर्तितः" इति। पीडिते मुद्रेति तस्मिन्नङ्गुल्यादिपीडिते सति मुद्रादीनामुद्भवो भवति, मुद्राऽत्र निम्नता। यदुक्तं "पीडिते तु यदाङ्गुल्या निम्नता तत्र जायते" इति। गन्धवर्णरसोद्भव इति सुगन्धोपेतः सुरसोपेत इति। योऽवलेहो भवति स सुपक्क इत्यर्थः॥ ३॥

**गू०**—क्वाथादेः कषायादेर्यत्पुनः पक्कात् सा रसक्रिया उच्यते अवलेहो लेहश्च उच्यते नामतः तन्मात्रा पलोन्मिता स्यात्। चूर्णात् सिता चतुर्गुणा, गुडो द्विगुणः, एवं चतुर्गुणमिति निश्चयः। अवलेहे सुपक्के तन्तुमत्त्वं स्यात्, स्पर्शेन पीडिते खरसत्वे मुद्रा च भवति। गन्धवर्णरसोद्भवस्तदा सिद्धं भवेत्॥ ३॥

### इदानीमनुक्तेष्वनुपानमाह—

**दुग्धमिक्षुरसो यूषः पञ्चमूलीकषायजम्।**
**वासाक्काथो यथायोग्यमनुपानं प्रशस्यते॥ ४॥**

**दी०**—दुग्धमिति। दुग्धमिति सामान्यग्रहणेन सर्वाणि क्षीराणि यथादोषं ग्राह्याणि। इक्षुरसग्रहणेन सर्वे इक्षुविकारा गृह्यन्ते। पञ्चमूली महती ह्रस्वा वा यथा व्याधिविहिता ग्राह्या। कषायजमिति यूषमित्यर्थः। तेन पञ्चमूलस्य कषायेण कृत्वा यूषः सोऽनुपानमिति भावः। कषायग्रहणेन स्वरसक्काथकल्कादयो ग्राह्याः। वासाक्काथ इति। वासा आटरूषकः, यथायोग्यमिति यद् यस्य दोषस्य योग्यं तद्यथायोग्यं। एतेन दोषानुरूपमिति व्याध्यनुसारं कथितः, तद्यथा—वातेऽम्लमधुरलवणप्रायाः स्निग्धादयः, पित्ते मधुरकषायतिक्तप्रायाः शीतादयः, कफे तिक्तोषणकषायप्राया रूक्षादयः। मात्रा यथा तथाह्युक्तम्—"अनुपानं प्रयोक्तव्यं कफव्याधौ पलं भवेत्। पलद्वयं तु पित्ते वानिलजे च पलत्रयं" इति। यद्वा "गण्डूषं मात्रया देयं मृदौ क्रूरे तु पञ्च च। अनुपानं प्रयोक्तव्यं देशकालाद्यपेक्षया" इति। अनुपानमिति। अनु पश्चात्पानं तत् कुतः तदाह—"यथा जलगतं तैलं तत्क्षणादेव सर्पति। तथा भैषज्यमङ्गेषु प्रसर्पत्यनुपानतः" इति॥ ४॥

**गू०**—अवलेहे दुग्धादिर्यथायोग्यमनुपानम्॥४॥

### अथ कासश्वासादौ कण्टकार्यवलेहः—

स यथा—

**कण्टकारीतुलां नीरद्रोणे पक्त्वा कषायकम्।**
**पादशेषं गृहीत्वा च तस्मिंश्चूर्णानि दापयेत्॥ ५॥**
**पृथक्पलानि चैतानि गुडूचीचव्यचित्रकाः।**
**मुस्तं कर्कटशृङ्गी च त्र्यूषणं धन्वयासकः॥ ६॥**
**भार्गी रास्ना शठी चैव शर्करा पलविंशतिः।**
**प्रत्येकं च पलान्यष्टौ प्रदद्याद्घृततैलयोः॥ ७॥**
**पक्त्वा लेहत्वमानीय शीते मधुपलाष्टकम्।**
**चतुष्पलं त्वगाक्षीर्याः पिप्पलीनां चतुष्पलम्॥ ८॥**
**क्षिप्त्वा निदध्यात्सुदृढे मृण्मये भाजने शुभे।**
**लेहोऽयं हन्ति हिक्कार्तिश्वासकासानशेषतः॥ ९॥**

**दी०**—स यथेति तं दर्शयन्नाह—कण्टकारीति। लघुकण्टकारिका सा समूलफलशाखा ग्राह्या। नीरद्रोण इति चतुराढकपरिमिते पानीये त्र्यूषणं प्रत्येकं पलप्रमाणमाहुः। धन्वयासकः दुरालभा रास्ना, सुरभी, शर्करा पलविंशतिरिति सुगमम्। घृततैलयोरिति मिलित्वा षोडशपलानि। घृतमत्र गोघृतं आजं वा व्याधिविहितत्वात् तैलं कटुतैलमत्र वदन्त्येके। यतः "कासे श्वासे च हिक्कायां कटुतैलं प्रयोजयेत्" इति। क्वचिदस्य प्रयोगोऽपि दृश्यते "गुडं कटुकतैलेन मिश्रयित्वा समं लिहेत्। त्रिसप्ताहप्रयोगेण श्वासं निर्मूलतो जयेत्" इति। शीते मधुपलाष्टकमिति। मधुक्षौद्रमष्टपलप्रमाणं शीते हिमस्पर्शे विनिक्षिपेदित्यर्थः। यतः 'उष्णार्तमुष्णैरुष्णे च तन्निहन्ति यथाविषं' इति वचनात्। अपराणि द्रव्याण्याह—चतुष्पलं त्वगाक्षीर्या इत्यादि। त्वगाक्षीरी वांशी। पिप्पली प्रसिद्धा सुदृढे त्वतिचिक्कणे भाजने पात्रे शुभे अभग्ने मङ्गलत्वात्। अयं लेहः कण्टकारी-

संज्ञः । अशेषत इति सम्पूर्णारिष्टदर्शनादपि आसंचयादित्यर्थः । एतेनास्य प्रामाण्यं दर्शितम् ॥ ५–९ ॥

**गू०**—कण्टकारीतुलां नीरद्रोणे पक्त्वा चूर्णानि दापयेत् । तानि चूर्णान्याह—गुडूच्यादीनि पलांशानि, धन्वयासकः[1] यवासकः । शर्करा विंशतिपलानि । पादशेषकं गृहीत्वा तस्मिन् घृततैलयोरष्टौ पलानि प्रत्येकं पुनः पक्त्वावलेहत्वं आनीय मधु पलाष्टकं दद्यात्तैलं तिलतैलं तैलाभावे घृतमेव द्विगुणं वा सुखिनां तैलस्य त्याज्यत्वात् । अयं लेहः हिक्कादीन्निहन्ति ॥ ५–९ ॥

**अथ च्यवनप्राशः क्षयक्षीणादौ—**

**पाटलाऽरणिकाश्मर्यबिल्वारलुकगोक्षुराः ।**
**पर्ण्यौ बृहत्यौ पिप्पल्यः शृङ्गी द्राक्षामृताभयाः ॥ १० ॥**
**बला भूम्यामली वासा ऋद्धिर्जीवन्तिका शठी ।**
**जीवकर्षभकौ मुस्तं पौष्करं काकनासिका ॥ ११ ॥**
**मुद्गपर्णी माषपर्णी विदारी च पुनर्नवा ।**
**काकोल्यौ कमलं मेदे सूक्ष्मैलागरुचन्दनम् ॥ १२ ॥**
**एकैकं पलसंमानं स्थूलचूर्णितमौषधम् ।**
**एकीकृत्य महत्पात्रे पञ्चामलशतानि च ॥ १३ ॥**
**पचेद्द्रोणजले क्षिप्त्वा ग्राह्यमष्टावशेषितम् ।**
**ततस्तु तान्यामलानि निष्कुलीकृत्य वाससा ॥ १४ ॥**
**दृढहस्तेन संपीड्य क्षिप्त्वा तत्र ततो घृतम् ।**
**पलसप्तमितं तानि किंचिद्भृष्टाल्पवह्निना ॥ १५ ॥**
**ततस्तत्र क्षिपेत्क्वाथं खण्डं चार्धतुलोन्मितम् ।**
**लेहवत्साधयित्वा च चूर्णानीमानि दापयेत् ॥ १६ ॥**
**पिप्पली द्विपला देया तुगाक्षीरी चतुष्पला ।**
**प्रत्येकं च त्रिशाणं स्यात्त्वगेलापत्रकेशरम् ॥ १७ ॥**
**ततस्त्वेकीकृतं सर्वं क्षिपेत्क्षौद्रं च षट्पलम् ।**
**इत्येतच्च्यवनप्रोक्तं च्यवनप्राशसंज्ञितम् ॥ १८ ॥**
**लेहं वह्निबलं दृष्ट्वा खादेत्क्षीणो रसायनम् ।**
**बालवृद्धक्षतक्षीणा नारीक्षीणाश्च शोषिणः ॥ १९ ॥**
**हृद्रोगिणः स्वरक्षीणा ये नरास्तेषु युज्यते ।**
**कासं श्वासं पिपासां च वातास्रमुरसो ग्रहम् ॥ २० ॥**
**वातपित्तं शुक्रदोषं मूत्रदोषं च नाशयेत् ।**
**मेधां स्मृतिं स्त्रीषु हर्षं कान्तिं वर्णप्रसन्नताम् ॥ २१ ॥**
**अस्य प्रयोगादाप्नोति नरो जीर्णविवर्जितः ।**

**टी०**—अधुना च्यवनप्राशावलेहमाह—पाटलेत्यादि । पाटला प्रसिद्धा, अरणिः अग्निमन्थकः, काश्मर्यः गाम्भारी, बिल्वं प्रसिद्धं, अरलुकः स्योनाकः, पर्ण्यौ द्वे तेन शालिपर्णी पृष्टपर्णी चेति, तच्च द्वयं ‘कवराद्वयशब्दवाच्यं, बृहत्याविति द्वे बृहत्यौ कण्टकारीद्वयमित्यर्थः । शृङ्गी कर्कटाख्या, भूम्यामली तामलकी, ऋद्धी इति द्विवचनत्वेन ऋद्धिवृद्धी ग्राह्ये, जीवन्ती शाकविशेषः जीवकर्षभकाविति द्वौ तेन जीवक ऋषभकश्चेति, काकनासिका ‘कौवाडोडीति’ लोके, विदारी कन्दविशेषः, काकोल्याविति द्रव्यद्वयं तेन काकोली क्षीरकाकोली चेति, कमलमुत्पलं तदभावे पद्मबीजं ग्राह्यं, मेदे द्वे मेदा महामेदा च, अगरुः कृष्णागरुः, चन्दनं श्वेतं, स्थूलचूर्णमिति उदूखले मुसलादिभिः कुट्टितमित्यर्थः । नतु वस्त्रगालितं, पञ्चामलशतानि चेति । आमलकफलानां गुटिकानि पञ्चशतानि अत्र गणनामानम् । एवं सर्वत्र पलादिमानाभावे यथा वक्ष्यमाणवर्गे अगस्त्यहरीतक्यवलेहे “हरीतकीशतं भद्रं” इत्यादि । एवं भल्लातकगुडे “भल्लातकसहस्रे द्वे” इति । यत्र पलादिमानमुक्तं तत्र तु पलादिमानेनैव व्यवहारः । यथा पूर्वोक्ता बाहुशालगुडे “चतुष्पलं स्याद्भल्लातं” इति । पचेदिति हस्तपरिपाटीव्यवहारात्, तद्यथा अखण्डितामलकफलं कर्पटे पोट्टलीं बध्वा क्वथनीयं तेन तानि सुग्रहाणि स्युः । अष्टावशेषितमित्यत्र यद्ग्रहणं तद्वृन्दटिप्पणकारमतमालोक्य कृतं । **वृन्दे तु** “ज्ञात्वा गतरसं द्रव्यं रसं गृह्णीत गालितं” इत्यस्य व्याख्यायां अष्टभागावशेषेण द्रव्याणां गतरसत्वं स्यात् इति । केचित्तु ग्राह्यं पादावशेषितमिति पठन्ति तत्र सुश्रुते वाग्भटे च पादशेषे रसे इत्येवोक्तम् । निष्कुलीकृत्येति । निष्कुलमिति क्षौमादिघर्षणात् पेषणाद्वा तेन अस्थित्वगादिरहितमित्यर्थः । सप्तपलपरिमितेन सर्पिषा तद्भर्जनं कार्यं **चक्रदत्तोक्तं**—“सिता मत्स्यण्डिकाभावे धात्र्याश्च मृदुभर्जनं । चतुर्भागे जले प्रायो द्रव्यं गतरसं भवेत्” इति । खण्डस्य क्वाथमिति शीताशब्दवाच्यं, खण्डेनापि केचिद्व्यवहरन्ति । क्षौद्रमत्र शीतीभूते दद्यात् च्यवनप्रोक्तमिति च्यवनो नाम मुनिस्तेन प्रोक्तं कथितम्, प्राश्यत इति प्राशः च्यवनस्य प्राश इति भावः । क्षीणो धातुक्षयो रसायनमिति जराव्याधिनाशनं, नरो जीर्णविवर्जित इति नरोऽस्य सेवी पुरुषः जीर्णविवर्जितः जरारहितो भवतीत्यर्थः । यद्वा अजीर्णविवर्जी भवति, तदपि रोगमूलमेव यतः “प्रायेणाहारवैषम्यादजीर्णं जायते नृणाम् । तन्मूलो रोगसंघातस्तद्विनाशाद्विनश्यति” इति ॥ १०–२१ ॥

१—‘धवांसा’ हि. भा. ।

गू०—पाटलादिकमौषधं प्रत्येकं एकैकं पलसंमानं स्थूलचूर्णितमौषधं महत्पात्रे बृहत्पात्रे एकीकृत्य पञ्चामलकशतानि द्रोणजलं क्षिप्त्वा पचेत्। अष्टावशेषितं ग्राह्यं, ततस्तस्मात्तान्यामलकानि निष्कुलीकृत्य निस्त्वचानि वाससा दृढहस्तेन संमर्द्य सप्तपलमितं घृतं दत्वा तानि किञ्चिद्भृष्टानि अर्धतुलोन्मितं खण्डं च दत्वा क्वाथं पचेत्। लेहवत्साधयित्वा पुनः इमानि चूर्णानि दापयेत्। इमानि पिप्पल्यादीनि क्षौद्रं च षट्पलं क्षिपेत्। पाटला पाण्डुरा, अरणिः, काश्मरी गम्भारी, बिल्वः श्रीफलः, अरलुः स्योनाकः, गोक्षुरः त्रिकण्टकः, पर्ण्यौ शालिपर्णी मुद्गपर्णी च, बृहत्यौ बृहल्लघुकण्टकारीद्वयं, पिप्पल्यः, शृङ्गी कर्कटशृङ्गी, द्राक्षा गोस्तनी, अमृता गुडूची, अभया हरीतकी, बला प्रसिद्धा, भूम्यामलकी प्रसिद्धा, वासा, ऋद्धिः, जीवन्ती, शठी कर्चूरः, जीवकर्षभकौ अष्टवर्गोक्तौ, मुस्तं नागरं, पुष्करमूलं, काकनासिका, विष्णुक्रान्ता, मुद्गपर्णी, माषपर्णी, विदारीकन्दः, पुनर्नवा, काकोली, कमलं, मेदा, सूक्ष्मैला, अगरु चन्दनं एतानि प्रत्येकपलानि क्वाथ्यद्रव्याणि अष्टवर्गविधानामभावे जातिमेलनीयानि। स्पष्टमन्यत्। एतच्च्यवनऋषिणा प्रोक्तं च्यवनप्राशसंज्ञं भवति ॥ १०-२१ ॥

अथ कूष्माण्डावलेहः—

**निष्कुलीकृत्य कूष्माण्डखण्डात्पलशतं पचेत् ॥२२॥**
**निक्षिप्य द्विर्गुणं नीरमर्धशिष्टं च गृह्यते।**
**तानि कूष्माण्डखण्डानि पीडयेद्दृढवाससा ॥ २३ ॥**
**आतपे शोषयेत्किंचिच्छूलाग्रैर्बहुशो व्यधेत्।**
**क्षिप्त्वा ताम्रकटाहे च दद्यादष्टपलं घृतम् ॥ २४ ॥**
**तेन किंचिद्भर्जयित्वा पूर्वोक्तं तज्जलं क्षिपेत्।**
**खण्डात्पलशतं दत्वा सर्वमेकत्र पाचयेत् ॥ २५ ॥**
**सुपक्के पिप्पली शुण्ठी जीरकं द्विपलं पृथक्।**
**पृथक्पलार्धं धान्याकं पत्रैला मरिचं त्वचम् ॥ २६ ॥**
**चूर्णीकृत्य क्षिपेत्तत्र घृतार्धं क्षौद्रमावपेत्।**
**खादेदग्निबलं दृष्ट्वा रक्तपित्ती क्षयी ज्वरी ॥ २७ ॥**
**शोषतृष्णावमिच्छर्दिश्वासकासक्षतातुरः।**
**कूष्माण्डकावलेहोऽयं बालवृद्धेषु युज्यते ॥ २८ ॥**
**उरःसन्धानकृच्छ्रष्यो बृंहणो बलकृन्मतः।**

दी०—अथ कूष्माण्डावलेहविवरणं दर्शयन्नाह—निष्कुलीति। निष्कुलीकृत्येति त्वग्बीजादिरहितानि कूष्माण्डशकलानि संगृह्येत्यर्थः। द्विगुणं नीरमिति कूष्माण्डपरिमाणात् तेन कूष्माण्डशकलानि तुलापरिमितानि द्वितुलामितं नीरमिति अर्धावशिष्टं क्वाथरूपं जलं। शूलाग्रैरिति काष्ठमयशङ्कुमुखैः। बहुशो व्यधेदिति बहुच्छिद्राणि कूष्माण्डशकलानि कारयेदिति भावः। उक्तं च—हस्तपाद्भ्यां पूर्वं निष्कुलीकृतं तदनु कृतच्छिद्रं पश्चात् संवेष्ट्य क्षौमेण वेष्टयित्वा पीडयेत्, आतपे मनाक् संशोष्य पिष्ट्वा पलशतं गृहीत्वा पक्तव्यं, तेन किञ्चिद्भर्जयित्वेति किंचिदत्र यथापाकं भर्जयेत्। तथा हि "मुक्तसर्पिषि कूष्माण्डे पाको गन्धेन मुद्रयेत्" इति। तज्जलमित्यर्धावशेषितं पूर्वोक्तं क्वाथं। खण्डात् पलशतमिति शर्करापलशतं। घृतार्धं क्षौद्रमावपेदिति घृतमानादर्धं क्षौद्रं मधु क्षिपेदिति भावः। आवपेदिति ग्रहणेन शीतीभूते तस्मिन् पश्चात् मेलयेदित्यर्थः। आतुरशब्दः शोषादिभिः प्रत्येकमभिसंबध्यते। बालवृद्धेषु योजयेदिति सौम्यत्वात् धातुपोषकत्वाच्च वृष्यः शुक्रवृद्धिकरः बृंहणो धातुवृद्धिकरः बलकृदोजसो वृद्धिकर इति ॥ ॥ २२-२८ ॥

गू०—पलशतं निष्कुलीकृतकूष्माण्डखण्डात् द्वितुलानीरे निक्षिप्य पचेत् अर्धशिष्टं गृह्यते तानि कूष्माण्डखण्डानि दृढवाससा पीडयेत्। पुनः किञ्चिदातपे शोषयेत्। पुनर्बहुशूलाग्रैर्वेधयेत्। पुनः कटाहे क्षिप्त्वा अष्टपलं घृतं दद्यात्। तेन घृतेन किञ्चित् भर्जयेत् पूर्वोक्तं जलं क्षिपेत् खण्डात्पलशतं दत्वा सर्वमेकत्र कारयेत्। सुपक्के पिप्पली शुण्ठी जीरं जीरकं एषां पृथक् द्विपलं, धान्याकं, पत्रज, एला, मरिचं, त्वक् तज एषां

१-इदं परिमाणं हरितामलकीनां, एकामलकी तोलकमिता भवति ततश्च ५०० शतामलकीनां ६ प्रस्थमितं भारं पञ्चप्रस्थमितं वा भवति। शुष्कामलकीनां त्वर्धपरिमाणं २॥ प्रस्थं निक्षिपेदिति सम्प्रदायः। सर्वदार्द्रामलकीनामलाभात् ॥ च्यवनप्राशे 'क्षिप्त्वा तत्र ततो घृत'मित्यत्र 'क्षिप्त्वा तैलं ततो घृतं' इति चरकादिसम्मतः पाठः। तैलमपि देयं तच्च तिलतैलम्। २-'कौवाठोडी' हि. भा.। ३-तत्प्रतिनिधिद्रव्याणि इत्यर्थः। ४-'द्वितुलं' पा०।

१-'भ्रम' पा०। २-कूष्माण्डं शूलाग्रैर्वेधनं प्राचां, साम्प्रदायिकास्तु कूष्माण्डं अलाबुघर्षणयन्त्रेण (घियाकस, कदुकस) घर्षयन्ति तेनातिसूक्ष्माः कूष्माण्डस्य तन्तवो भवन्ति युक्ततरं चेदम्।

पृथक् पलार्धं घृतार्धं चतुःपलं क्षौद्रं मधु । स्पष्टमन्यत् ॥ २२–२८ ॥

**अथ खण्डसूरणावलेहः अर्शोरोगे—**

**युक्त्या कूष्माण्डखण्डस्य सूरणं विपचेत्सुधीः ॥२९॥**
**अर्शसां मूढवातानां मन्दाग्नीनां च युज्यते ।**

**टी०**—इदानीं खण्डसूरणावलेहमाह—युक्त्येति । कूष्माण्डखण्डस्य युक्त्या कर्तव्यविधिना अयमपि सूरणाऽवलेहः कर्तव्यः । सुधीरिति ग्रहणेन पूर्वोक्तकूष्माण्डखण्डे यद्द्रव्यं यन्मानं या कर्तव्यता तत् सकलं विचार्य तेनैव प्रकारेण सूरणावलेहः साध्यः । विशेषेण मूढवातानां मन्दाग्नीनां च युज्यते ॥ २९ ॥

**गू०**—सुगमम् ॥ २९ ॥

**अथ अगस्त्यहरीतक्यवलेहः—**

**हरीतकीशतं भद्रं यवानामाढकं तथा ॥ ३० ॥**
**पलानि दशमूलस्य विंशतिं च नियोजयेत् ।**
**चित्रकः पिप्पलीमूलमपामार्गः शठी तथा ॥ ३१ ॥**
**कपिकच्छुः शङ्खपुष्पी भार्ङ्गी च गजपिप्पली ।**
**बला पुष्करमूलं च पृथग्द्विपलमात्रया ॥ ३२ ॥**
**पचेत्पञ्चाढके नीरे यवैः स्विन्नैः शृतं नयेत् ।**
**तत्राभयाशतं दद्यात्क्काथे तस्मिन्विचक्षणः ॥ ३३ ॥**
**सर्पिस्तैलाष्टपलकं क्षिपेद्गुडतुलां तथा ।**
**पक्त्वा लेहत्वमानीय सिद्धे शीते पृथक्पृथक् ॥३४॥**
**क्षौद्रं च पिप्पलीचूर्णं दद्यात्कुडवमात्रया ।**
**हरीतकीद्वयं खादेत्तेन लेहेन नित्यशः ॥ ३५ ॥**
**क्षयं कासं ज्वरं श्वासं हिक्कार्शोऽरुचिपीनसान् ।**
**ग्रहणीं नाशयेदेष वलीपलितनाशनः ॥ ३६ ॥**
**बलवर्णकरः पुंसामवलेहो रसायनम् ।**
**विहितोऽगस्त्यमुनिना सर्वरोगप्रणाशनः ॥ ३७ ॥**

**टी०**—अथागस्त्यहरीतक्यवलेहं दर्शयन्नाह—हरीतकीशतमित्यादि । हरीतकीशतं हरीतकीगुटिकाशतं नतु हरीतकीपलशतं 'संख्या फलानां शतशः पलानां' इति वचनात् । भद्रमिति श्रेष्ठं हरीतकीफलशतं तेन नवादिगुणसहितमित्यर्थः । तथाह्युक्तम्—'नवा स्निग्धा घना वृत्ता गुर्वी क्षिप्ता तथाऽम्भसि । निमज्जेद्या प्रशस्तत्वाद्गुणकृत् सा प्रकीर्तिता' इति । यवानामाढकमिति । यवोऽन्नविशेषः तस्य चतुःषष्टिपलानि । केचित्तु 'हरीतकीशतं भद्रयवानां आढकं तथा' इति पठन्ति, तत्र भद्रयवा इन्द्रयवा इति व्याख्यानयन्ति, एतन्न प्रचरति सर्वेषां संप्रदायविरोधात् । तस्माद्धरीतकीशतं भद्रमिति पाठः साधुः । दशमूलस्य विंशतिपलानि प्रत्येकं द्विपलमित्यर्थः । शेषं द्रव्यं प्रसिद्धं । यवैः स्विन्नैरिति उपलक्षणे तृतीया । यवस्विन्नता च चतुर्भागावशेषे जले एव भवति तेन चतुर्भागावशिष्टमेव ग्राह्यं । तन्त्रान्तरेऽप्युक्तं—'यवाढकैः पञ्चभिरङ्घ्रिशेषं क्वाथं नयेत्' इत्यादि । पक्त्वावलेहत्वमानीयेति व्यवहारात् । हरीतकीशतस्य कर्पटे पोट्टले बद्ध्वा क्वथनं पश्चादुत्स्विन्नहरीतकीशतस्य घृततैलयोर्भर्जनं तद्दृढार्थं । यथा तन्त्रान्तरे सर्वार्थसिद्धहरीतक्यां हरीतकीभर्जनमुक्तं । तदनु क्वाथे गुडतुलां लोडयित्वा पाकः कर्तव्यः, अवतरणसमये पिप्पलीचूर्णप्रक्षेपः । शीतीभूते चापरेऽह्नि मधुदानमिति वृद्धानां मतं; सुगन्धार्थं मनाक् चातुर्जातमिति केचित् । तदुक्तं—'पिप्पलीचूर्णकुडवं चातुर्जातावचूर्णितम्' इति । सर्पिस्तैलाष्टकपलमिति यदुक्तं तन्मिलित्वा ग्राह्यं । 'हरीतकीद्वयं खादेत् तेन लेहेन नित्यश' इति । यद्यपि गुडस्य भक्षणमानं नोक्तं तथापि हरीतकीद्विरूपग्रहणेन लेहस्य पलमानं भवत्येव यथा तन्त्रान्तरे भार्गीगुडे 'भक्षयेदभयादेकां लेहस्यार्धपलं लिहेत्' इति । तेनाऽत्र हरीतकीभक्षणविधाना-[१]द्गुडपलं भक्ष्यमिति । अन्ये तु गुल्मोच्छेदे हरीतकीन्यायाद्गुडं द्विपलमाहुः, एतत् सर्वमेव व्याधेर्बलाबलत्वात् प्रचरति । अगस्त्यमुनिविहितत्वेनास्य सिद्धफलत्वमुच्यते ॥ ३०–३७ ॥

**गू०**—हरीतकीशतं भद्रं उत्तमं शतं गणनया, यवानामाढकं यवोऽन्नविशेषः, दशमूलस्य विंशतिपलानि प्रत्येकं द्विपलं शालिपर्ण्यादिकं दशौषधं चित्रकादीनि च पृथङ्मात्रया द्विपलं, अपामार्गः, शठी कर्चूरः-कपिकच्छुर्वानरी तस्या बीजं, शङ्खपुष्पेकं श्वेतपुष्पी, भार्गी, गजपिप्पली चव्यफलं, तदभावे चव्यं वा, बला प्रसिद्धा, पुष्करमूलं एतानि पञ्चाढके नीरे पचेत् । स्विन्नैः पक्वैर्यवैः शृतं क्वाथं नयेत् । तस्मिन्क्वाथे अभयाशतं दद्यात् पक्वं शुष्कं पुनः पचेत् यद्वा पश्चादभयापाकः पक्त्वा लेहत्वं आनीय सर्पिर्घृतं अष्टपलिकं तिलजं क्षौद्रं मधु गुडं चतुःपलं पिप्पलीचूर्णं च कुडवं । तेन लेहेन सिद्धेन हरीतकीद्वयं खादेत् बलापेक्षया एकं वा आदौ, क्षयादिकं हरेत् । अयं अगस्त्यमुनिनाऽभिहित अगस्त्यावलेहः ॥ ३०–३७ ॥

---

१–'शङ्खाडुली' द्वि. भा. ।

## अर्शादौ कुटजावलेहः ।

कुटजत्वक्तुलां द्रोणे जलस्य विपचेत्सुधीः ।
कषायं पादशेषं च गृह्णीयाद्वस्त्रगालितम् ॥ ३८ ॥
त्रिंशत्पलं गुडस्यात्र दत्त्वा च विपचेत्पुनः ।
सान्द्रत्वमागतं दृष्ट्वा चूर्णानीमानि दापयेत् ॥ ३९ ॥
रसाञ्जनं मोचरसं त्रिकटु त्रिफलां तथा ।
लज्जालुं चित्रकं पाठां बिल्वमिन्द्रयवं त्वचाम् ॥४०॥
भल्लातकं प्रतिविषां विडङ्गानि च वालकम् ।
प्रत्येकं पलसंमानं घृतस्य कुडवं तथा ॥ ४१ ॥
सिद्धशीते ततो दद्यान्मधुनः कुडवं तथा ।
जयेदेषोऽवलेहस्तु सर्वाण्यर्शांसि वेगतः ॥ ४२ ॥
दुर्नामप्रभवान्रोगानतीसारमरोचकम् ।
ग्रहणीं पाण्डुरोगं च रक्तपित्तं च कामलाम् ॥४३॥
अम्लपित्तं तथा शोथं कार्श्यं चैव प्रवाहिकाम् ।
अनुपाने प्रयोक्तव्यमाजं तक्रं पयो दधि ॥ ४४ ॥
घृतं जलं वा जीर्णे च पथ्यभोजी भवेन्नरः ।

**दी०**—इदानीं कुटजावलेहमाह—कुटजत्वगिति । कुटजो वृक्षविशेषः तस्य त्वक् छल्ली सा पलशतपरिमिता ग्राह्या । पादशेषमिति चतुर्थांशं कषायं वस्त्रपूतं कृत्वा ग्राह्यं । कुत्रचिदेतन्न प्रचरति किन्तु पादशेषमिति पादस्य चतुर्थांशस्य यच्छेषं चतुर्भागं तद्ग्राह्यं, एतेनाष्टभागावशेषं कथितम्; तथाच तन्त्रान्तरे—'कुटजत्वक्पलशतं जलद्रोणे विपाचयेत् । अष्टभागावशेषं तु कषायमवतारयेत् । वस्त्रपूतं ततः क्वाथं पचेल्लेहत्वमागतं' इति । त्रिंशत्पलं गुडस्यात्रेति अत्र क्वाथे गुडस्य पुरातनस्य त्रिंशत्पलं दत्वा पुनर्विपचेदिति यावत् सान्द्रत्वं भवति । चूर्णार्थमपराणि द्रव्याण्याह—रसाञ्जनमिति रसाञ्जनं प्रतीतं तच्च दार्वीक्वाथसमुद्भवमिति प्रसिद्धिः, मोचरसं शाल्मलीवेष्टकं, इन्द्रयवं त्वचमिति इन्द्रयवं कुटजबीजं, त्वक् गुडत्वक् । दुर्नामप्रभवान् रोगानिति गुल्मोदरप्रभृतीन्, अनुपाने प्रयोक्तव्यमिति आजं तक्रं, आजं पयः, आजं दधि, आजं घृतं चेति । अलं पानीयं, तक्रादीनामभावात् एतत्सकलमनुपानं यथासात्म्यं निषेवेदित्यर्थः । जीर्णे चेति द्रव्ये परिमिते सति पथ्यभोजी भवेन्नर इति भावः । यतः—'औषधशेषे भुक्त' मित्यादिवाक्यानुरोधात् ॥ ३८–४४ ॥

**गू०**—कुटजः वृक्षविशेषस्तस्य त्वक् तुलां पलशतं जलस्य द्रोणे विपचेत् । सान्द्रत्वं घनत्वमागतं दृष्ट्वा इमानि रसाञ्जनादीनि प्रत्येकं पलमानानि क्षिपेत् । रसाञ्जनं प्रसिद्धं, प्रतिविषा अतिविषा, बालकं उदीच्यं, लज्जालुः लज्जावती, स्पष्टमन्यत् ॥ ३८–४४ ॥

## अतीसारादौ कुटजाष्टकावलेहमाह—

कुटजत्वक्तुलामार्द्रां द्रोणनीरे विपाचयेत् ॥ ४५ ॥
पादशेषं शृतं नीत्वा चूर्णान्येतानि दापयेत् ।
लज्जालुर्धातकी बिल्वं पाठा मोचरसस्तथा ॥ ४६ ॥
मुस्तं प्रतिविषा चैव प्रत्येकं स्यात्पलं पलम् ।
ततस्तु विपचेद्भूयो यावद्दर्वीप्रलेपनम् ॥ ४७ ॥
जलेन छागदुग्धेन पीतो मण्डेन वा जयेत् ।
सर्वातिसारान्घोरांस्तु नानावर्णान्सवेदनान् ॥ ४८ ॥
असृग्दरं समस्तं च सर्वार्शांसि प्रवाहिकाम् ।

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यमखण्डेऽवलेहकल्पना नामाष्टमोऽध्यायः ॥ ८ ॥

---

**दी०**—कुटजेति । अयं कुटजाष्टकावलेहो व्याख्यायां सुगम एवावगन्तव्यः । कर्तव्यविधिस्तु पूर्ववद्बोद्धव्यः । दर्वीप्रलेपनं ह्यवलेहस्य संसिद्धिलक्षणं सूचितं पूर्वोक्तावलेहविधौ ज्ञातव्यम् ॥ ४५–४८ ॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यमखण्डेऽवलेहकल्पनाध्यायोऽष्टमः ॥ ८ ॥

---

**गू०**—अथ कुटजाष्टकमतीसारादौ—आर्द्रां कुटजत्वक्, तुलां द्रोणनीरे विपाचयेत्, पादशेषं शृतं क्वाथं नीत्वा इमानि चूर्णानि दापयेत् । लज्जालुर्लज्जावती, धातकी वृक्षविशेषस्तस्य पुष्पाणि, बिल्वं, पाठा, मोचरसः, मुस्तं नागरं, अतिविषा एतानि प्रत्येकं पलं ततो भूयो विपचेत् यावद्दर्व्याः प्रलेपलेपनं भवति लिप्त्वा तिष्ठति दर्वी लोहनिर्मिता । ततो जलादिभिः पिबेत् । स्पष्टमन्यत् ॥ ४५–४८ ॥

इति श्रीकाशीराममिश्रकृतायां गूढार्थदीपिकायामवलेहाधिकारः ॥ ८ ॥

---

१–'त्वचां' पा० ।

## नवमोऽध्यायः।

### अथ स्नेहपरिभाषा।

अथ स्नेहेति। तत्र तावत् प्रथमतः परिभाषामस्य व्याचष्टे—

**कल्काच्चतुर्गुणीकृत्य घृतं वा तैलमेव वा।**
**चतुर्गुणे द्रवे साध्यं तस्य मात्रा पलोन्मिता॥ १॥**
**निक्षिप्य क्राथयेत्तोयं क्राथ्यद्रव्याच्चतुर्गुणम्।**
**पादशिष्टं गृहीत्वा च स्नेहं तेनैव साधयेत्॥ २॥**

**दी०**—इदानीं स्नेहकल्पनां दर्शयन्नाह—कल्कादिति। अनुक्ते कल्कात्कल्कयोग्यद्रव्यात् घृतं तैलं वा चतुर्गुणं ग्राह्यं, नतु दृषदि पेषितात्कल्कात्। द्रवमपि चतुर्गुणं स्नेहपरिमाणात् द्रवं तोयादि। तस्य मात्रा पलोन्मितेति। तस्य संसिद्धस्नेहस्य पानार्थं पलोन्मिता पलप्रमाणा मात्रा ज्ञेया इत्यनुक्तेषु मानमिदं सामान्यं। परिभाषायामयमपि सामान्यस्नेहपाकविधौ बोद्धव्यः, तथाहि—'कल्काच्चतुर्गुणः स्नेहः स्नेहात्क्वाथश्चतुर्गुणः। क्वाथाच्चतुर्गुणं वारि क्वाथः क्वाथ्यसमो मतः' इति। विशेषोऽपि क्वचिद्वर्तते यथा तन्त्रान्तरे वासाघृते बलाये घृते वा तद्यथा—"अत्राप्यष्टगुणैस्तोयैः क्वथितं क्वाथदुग्धयोः। प्रत्येकं द्विगुणो भागो भिषक् सर्पिषि निक्षिपेत्" इति॥ १॥ २॥

**गू०—अथ घृताधिकारः**। तत्रादौ घृततैलादिसाधनमाह—तत्कल्केत्यादि। कल्कात् द्रव्यात् घृतं तैलं चतुर्गुणे द्रव्ये दुग्धादौ साध्यं अग्निद्वारा कटाहादौ पक्त्वा सिद्धं भवति। तस्य मात्रा वातादिरोगविषये मानमात्रा पलोन्मिता पलप्रमाणा। इदानीं स्नेहसाधने क्वाथविधानमाह—निक्षिप्येत्यादि। क्वाथद्रव्याच्चतुर्गुणं तोयं जलं निक्षिप्य क्वाथयेत्। पुनः पादशिष्टं च चतुर्थांशावशिष्टं गृहीत्वाऽनेन क्वाथेन स्नेहं घृतं तैलं वा साधयेत्। क्वाथं क्वाथयोग्यं कुट्टितं यद्द्रव्यं दशमूलादि तस्मादित्यर्थः॥ १॥ २॥

मृदुद्रव्यादौ क्वथने **जलप्रमाणमाह—**

**चतुर्गुणं मृदुद्रव्ये कठिनेऽष्टगुणं जलम्।**
**तथाच मध्यमे द्रव्ये दद्यादष्टगुणं पयः॥ ३॥**
**अत्यन्तकठिने द्रव्ये नीरं षोडशिकं मतम्।**

**दी०**—इदानीं द्रव्यविशेषे क्वाथनिमित्तं जलमानमाह—चतुर्गुणमिति। अत्र चतुर्गुणप्रभृतिकं द्रव्यपरिमाणाद्बोद्धव्यम्। यावत्परिमाणं क्वाथ्यं द्रव्यं भवति तावत्परिमाणाच्चतुर्गुणितं जलं ग्राह्यमित्यर्थः। मृदु कठिनं कठिनतरं च द्रव्यं तत्रैवानुमानतोऽवगन्तव्यम्। तथाच मध्यमे द्रव्ये दद्यादष्टगुणं पय इति। मध्यमे मृद्वादिसंभारे पयः पानीयं यत्र मृदुकठिनतरद्रव्यमेकत्र मिलित्वा क्वाथ्यं तत्राष्टगुणं पानीयं दत्वा पादशेषं ग्राह्यमिति सर्वत्र। तथाहि—'मृद्वादिक्वाथ्यसंघाते मानानुक्ते चिकित्सकाः। मध्यस्थोभयभागित्वादिच्छन्त्यष्टगुणं जलम्' इति॥ ३॥

**गू०**—मृदुद्रव्ये गुडूच्यादौ चतुर्गुणं जलं, कठिने दशमूलादौ अष्टगुणं, तथाच मध्यमद्रव्ये आरग्वधादौ अष्टगुणं पयः। पयोऽत्र जलं। अत्यन्तकठिने पद्मकादौ षोडशिकं षोडशगुणं मतं कथितं चतुर्थांशं गृह्यते॥ ३॥

अथ **मतान्तरे परिमाणविशेषमाह—**

**कर्षादितः पलं यावत्क्षिपेत्षोडशिकं जलम्॥ ४॥**
**तदूर्ध्वं कुडवं यावत्तद्वेदष्टगुणं पयः।**
**प्रस्थादितः क्षिपेन्नीरं खारी यावच्चतुर्गुणम्॥ ५॥**

**दी०**—कर्षादित इति। कर्षादित इत्यादिपरिमाणं सामान्यद्रव्यविषये वर्तते अन्यथा स्वतन्त्रविरोधः, यावत्क्वाथ्यद्रव्यं कर्षादिपरिमाणात्पलं भवति तावत्तत्र षोडशांशं जलं दत्वा क्वाथं पादशेषं ग्राह्यं। षोडशिकमत्र क्वाथ्यद्रव्यपरिमाणात्, ततस्तु पलादुपरि यावत्कुडवं क्वाथ्यद्रव्यपरिमाणं भवति तावदत्र तोयं पानीयमष्टगुणं भवेत्, क्वाथ्यद्रव्यादित्यर्थः। अत्र क्वाथं चतुर्थांशं ग्राह्यमिति सर्वत्र। प्रस्थादित इति। प्रस्थादिपरिमाणात् यावत् खारी भवति तावदत्र चतुर्गुणं नीरं पानीयं प्रक्षिप्य संक्वाथ्य च पादशेषं ग्राह्यमिति तात्पर्यार्थः। आदिशब्दात् आढकद्रोणशूर्पद्रोणीप्रभृत्यो[illegible]प्रस्थस्यादेः प्रस्थादिस्तस्मात् तेन शरावमपि गृह्यते, शरावादित इत्यर्थः॥ ४॥ ५॥

**गू०**—कर्षादारभ्य खारीपर्यन्तं क्वाथ्यद्रव्ये जलमानमाह—कर्षादितः यावत्पलं प्रमाणं तावत् षोडशिकं षोडशगुणं जलं क्षिपेत्। तदूर्ध्वं पलादूर्ध्वं यावत्कुडवं कुडवप्रमाणं तावदष्टगुणं पयो जलं भवेत्। प्रस्थादितः यावत् खारीप्रमाणं तावच्चतुर्गुणं जलं क्षिपेत्। पूर्वं चतुर्गुणादिजलं यल्लिखितं तन्मृदुद्रव्यादिविषयं ज्ञेयं। कर्षादित इदं तु मानविषयं अतः केचिन्मृद्वादितो गृह्णन्ति केचिन्मानतो गृह्णन्ति॥ ४॥ ५॥

**अम्बुक्वाथरसैर्यत्र पृथक्स्नेहस्य साधनम् ।**
**कल्कस्यांशं तत्र दद्याच्चतुर्थं षष्ठमष्टमम् ॥ ६ ॥**
**दुग्धे दध्नि रसे तक्रे कल्को देयोऽष्टमांशकः ।**
**कल्कस्य सम्यक्पाकार्थं तोयमत्र चतुर्गुणम् ॥ ७ ॥**

**दी०**—अपरमप्यनुक्तमाह—अम्बुक्वाथेति । यत्र स्नेहपाके पानीयादित्रयाणां द्रव्याणां मध्ये यदा एकेन पाकः स्यात् तदा कल्कस्य कल्कद्रव्यस्य चतुर्थांशं षष्ठांशं अष्टमांशं यथाऽनुक्रमेण देयं । अनुक्रमो यथा—यदि अम्बुना केवलेन पाकस्तर्हि कल्कद्रव्यस्य चतुर्थांशं देयम्, स्नेहपरिमाणादित्यर्थः । यदा केवलेन क्वाथेनैव पाकस्तदा कल्कद्रव्यस्य षष्ठांशं देयम्, अत्रापि स्नेहपरिमाणादित्यर्थः । यत्र तु केवलस्वरसेनैव साध्यते स्नेहः तत्र कल्कद्रव्यस्याष्टमांशं देयम् । स्नेहमानादित्यत्रापि सम्बन्धः **इत्यनुक्रमः** । अपरमपि—दुग्धे इत्यत्रापि एकद्रव्यसाध्यता सूच्यते तदा कल्कद्रव्यं स्नेहपरिमाणादष्टमांशं देयमिति भावः । कल्कस्येति । यत्र तु अन्यद्रवैः केवलकल्केनैव साध्यते स्नेहस्तदा चतुर्गुणं कल्कद्रव्यं चतुर्गुणं तोयं निक्षिपेदिति सर्वत्र । सम्यक् पाकार्थं बोद्धव्यम् । एतेन किमुक्तं यदा क्षीरादिभिः प्रत्येकेन स्वकल्केन पाकस्तदा चतुर्गुणं चतुर्थांशं पानीयं देयम् । पानीयं विना पाको नास्तीति सर्वमतम् ॥ ६ ॥ ७ ॥

**गू०**—अम्ब्वादिभिर्यत्र स्नेहमानं तत्र कल्कप्रमाणमाह—'तत्राम्बुपिष्टमुक्तं स्याज्जलं चात्र चतुर्गुणम्', यत्र भिन्नं साधनं भवति, तत्र कल्कस्यांशं चतुर्गुणं षष्ठं क्रमात् अम्बुपाके चतुर्थांशं रसो मांसरसस्तत्पाके अष्टमांशं । उक्तोऽप्यम्ब्वादौ पाके दुग्धादौ अष्टमांश एव कल्कपाक इत्याह—कल्कस्य सम्यगिति । दुग्धे तथा दध्नि तथा तक्रे पाकानन्तरं कल्कः अष्टमांशकादयः रसो मांसरसः । यद्वा रसो धत्तूररसः मांसरसस्य पूर्वोक्तत्वात् कल्कस्य सम्यक् पाकार्थं चतुर्गुणं स्नेहादित्यर्थः ॥ ६ ॥ ७ ॥

**द्रवाणि यत्र स्नेहेषु पञ्चादीनि भवन्ति हि ।**
**तत्र स्नेहसमान्याहुर्यथापूर्वं चतुर्गुणम् ॥ ८ ॥**

**दी०**—इदानीमनुक्तद्रवाणां मानमाह—द्रवाणीति । यत्र स्नेहपक्वद्रवाणि क्षीरतक्ररसमूत्रक्वाथानि अन्यान्यपि पञ्चादीनि पञ्चप्रभृतीनि भवन्ति अनुक्तमानानीति विषयः । तत्र तानि द्रवाणि स्नेहसमानि प्रत्येकमाहुराचार्याः । यथा वक्ष्यमाणत्रिफलाघृते अर्वाक् द्रवं चत्वारस्त्रयो वा तर्हि स्नेहपरिमाणाच्चतुर्गुणं ज्ञेयं प्रत्येकमित्यर्थः । एके यथापूर्वं चतुर्गुणमिति पठन्ति तत्रापि स एवार्थः । कुत्रचित् द्रव्याणीति पाठो दृश्यते सोऽसङ्गत एव ॥ ८ ॥

**गू०**—द्रव्याणीति । यत्र पञ्चाधिकानि द्रव्याणि तत्र स्नेहेषु कियत्परिमितं द्रव्यं देयं तदाह—स्नेहेषु घृततैलादिषु द्रवाणि दुग्धादीनि यत्र पञ्चप्रभृतीनि भवन्ति तत्र स्नेहसमानं भवति न चतुर्गुणानीति यावत् । यथापूर्वं चतुर्गुणमित्येतस्यायमर्थः । एको द्रवस्तत्र पाकेन चातुर्गुण्यं, द्वौ द्रवौ यत्र तत्र द्वाभ्यां चातुर्गुण्यं यदुक्तं **जैज्झटे** 'एकद्वित्रिद्रवैर्द्रव्यैः कुर्यात् स्नेहाच्चतुर्गुणं । क्षीरं स्नेहसमं दद्यात् चतुर्भिश्च चतुर्गुणम्, इति । अस्यायमर्थः यत्रैको द्रवस्तत्रैकेन चातुर्गुण्यं, एवं द्वाभ्यां, त्रिभिर्मिलित्वा चातुर्गुण्यमित्यर्थः । यत्र पञ्चाधिकानि भवन्ति तत्र स्नेहसमानीति पूर्वार्थः । 'तैलस्यार्धप्रमाणेन दद्यादिक्षुरसं बुधः । तथा मांसरसं चार्धं दत्वा स्नेहं विपाचयेत्' स्नेहसमान्याहुरित्यस्य त्रुटिमाहुरित्यर्थः इत्यन्ये । तद्यथा—सक्तुन्मांसौषधिरसं मूत्रसौवीरकादिकं । स्नेहतुल्यं दधि क्षीरं जलं चैव चतुर्गुणं ॥ ग्रन्थज्ञानार्थमेतद्व्याख्याप्रसङ्गेनोक्तम् ॥ ८ ॥

केवल**क्वाथपाके विधान**माह—

**द्रव्येण केवलेनैव स्नेहपाको भवेद्यदि ।**
**तत्राम्बुपिष्टः कल्कः स्याज्जलं चात्र चतुर्गुणम् ॥ ९ ॥**
**क्वाथेन केवलेनैव पाको यत्रेरितः क्वचित् ।**
**क्वाथ्यद्रव्यस्य कल्कोऽपि तत्र स्नेहे प्रयुज्यते ॥ १० ॥**

**दी०**—अथ केवलद्रव्यस्य स्नेहपाकार्थं मानमाह—द्रव्येणेति । अत्र द्रव्यं स्नेहाच्चतुर्थांशं कल्कार्थं वारि तावद्देयं यावत् कल्कः स्यात् । यतः पेषणे जलस्य परिमाणं न स्यात् । जलं चात्र चतुर्गुणमिति । अत्र कल्के जलं पानीयम् । चतुर्गुणं देयं स्नेहमानादित्यर्थः । एके द्रव्यमानाच्चतुर्गुणं जलमिति व्याख्यानयन्ति तन्न मनोहरं कल्कद्रव्याल्पत्वात् । अपरमप्याह—क्वाथेनेति । यत्र स्नेहे क्वचिदिति अनुक्ते केवलेन क्वाथेन कृत्वा पाकः कथितः तत्र स्नेहे क्वाथ्यद्रव्यस्य कल्कः कार्यः, कल्कार्थं चात्र चतुर्गुणं जलमिति तेन येनैव

द्रव्येण क्वाथः क्रियते तेनैव तत्परिमितेन च द्रव्येणायमपि कृत्वाऽत्र चतुर्गुणेन च जलेन सह साध्यः । पूर्वं क्वाथेन साध्यः पश्चात्कल्केनेत्यर्थः ॥ ९ ॥ १० ॥

**गू०**—केवलेन क्वाथेन यदि स्नेहपाको भवेत् तत्राम्बुपिष्टः कल्को जलं चतुर्गुणक्वाथेनेति । इदं पद्यं पूर्वश्लोकस्यैकार्थत्वात् प्रक्षिप्तं ज्ञेयं ॥ ९ ॥ १० ॥

**कल्कहीनस्तु यः स्नेहः स साध्यः केवले द्रवे ।**

**दी०**—कल्कहीन इति । यः स्नेहो घृतं तैलादिकः कल्कहीनः कल्करहितो भवेत् सः केवले द्रवे साध्यः । द्रवमत्र चतुर्गुणं स्नेहपरिमाणात् ॥

**गू०**—अथ केवलद्रवसाधनमाह—कल्कहीने स्नेहे साधनमाह—यः कल्कहीनः स्नेहः स केवले द्रवे साध्यः ।

**पुष्पकल्कस्तु यः स्नेहस्तत्र तोयं चतुर्गुणम् ॥ ११ ॥**
**स्नेहे स्नेहाष्टमांशश्च पुष्पकल्कः प्रयुज्यते ।**

**दी०**—इदानीं पुष्पकल्कस्य परिमाणमाह पुष्पकल्क इति । यः पुष्पकल्कसंज्ञः स्नेहः तत्र स्नेहे तोयं पानीयं चतुर्गुणं देयं चतुर्गुणता च स्नेहात् स्नेहपरिमाणादित्यर्थः । सः पुष्पकल्कः स्नेहाष्टमांशो योज्यत इत्यर्थः । स्नेहस्याष्टमांशं तेन साम्यो योज्य इत्यर्थः । पुष्पाणि यथा नागकेशरकुङ्कुमलवङ्गदमनकसुरपुष्पचम्पकोत्पलपुण्डरीककेतकीजातीकुसुम्भप्रभृतीनि । एके पुष्पकल्कः प्रयुज्यत इत्यस्य स्थानेऽत्र कल्कं प्रयुज्यते इति पठन्ति व्याख्यानयन्ति तत् पत्रकल्कं प्रक्षेपमाहुः, तथाहि—'गन्धनिर्यासपुष्पाणां सिद्धशीतेऽवतारिते । प्रक्षेपो गन्धवृद्ध्यर्थं पत्रकल्कं तु तद्विदुः' ॥ ११ ॥

**गू०**—पुष्पकल्कैः स्नेहसाधऽमाह—पुष्पेति । यस्मिन्स्नेहे पुष्पकल्को दीयते स पुष्पकल्कः स्नेहः, तत्र तोयं जलं चतुर्गुणं स्नेहात्पुष्पकल्कः कियत्परिमितो दीयते इत्यत्राह—स्नेहाष्टमांशश्च पुष्पकल्कः प्रयुज्यते इति ॥ ११ ॥

इदानीं स्नेहानां संसिद्धिलक्षणान्याह—

**वर्तिवत्स्नेहकल्कः स्याद्यदाङ्गुल्या विमर्दितः ॥ १२ ॥**
**शब्दहीनोऽग्निनिक्षिप्तः स्नेहः सिद्धो भवेत्तदा ।**
**यदा फेनोद्गमस्तैले फेनशान्तिश्च सर्पिषि ॥ १३ ॥**
**गन्धवर्णरसोत्पत्तिः स्नेहसिद्धिस्तदा भवेत् ।**
**स्नेहपाकस्त्रिधा प्रोक्तो मृदुर्मध्यः खरस्तथा ॥ १४ ॥**
**ईषत्सरसकल्कस्तु स्नेहपाको मृदुर्भवेत् ।**
**मध्यपाकस्य सिद्धिश्च कल्के नीरसकोमलः ॥ १५ ॥**
**ईषत्कठिनकल्कश्च स्नेहपाको भवेत्खरः ।**
**तदूर्ध्वं दग्धपाकः स्याद्दाहकृन्निष्प्रयोजनः ॥ १६ ॥**

**दी०**—वर्तिवदिति । यदा स्नेहे परिपाचितः कल्कः अङ्गुल्या विमर्दितो वर्तिसदृशो भवति तदा सिद्धो ज्ञेयः । अथवा स एव कल्कः यदाऽग्नौ निक्षिप्तः शब्दरहितो भवति तदा सिद्धो ज्ञातव्यः इति सामान्यम् । अपरमपि विशेषमाह—यदा स्नेहस्य पाकान्ते तैले फेनोद्गमो भवति सर्पिषि च फेनशान्तिर्भवति तदा सिद्धलक्षणं बोद्धव्यं । वर्णगन्धरसोत्पत्तिरपि स्नेहसिद्धिः स्यात् वर्णादिकमपि तैले सर्पिषि च ज्ञातव्यम् । अधुना त्रिविधस्नेहपाकस्य लक्षणमाह—ईषत्सरसकल्क इति । यदा कल्के सान्द्रता किञ्चिद्भवति अग्नौ निक्षिप्ते सति चटचटाशब्दो भवति तदा मृदुपाको ज्ञेयः, यदा नीरसो कल्को भवति कोमलश्च नातिकठिनो नातिमृदुरिति तदा मध्यपाकः, यदा किञ्चित् कठिनकल्को जातः नीरसश्च भवति तदा खरपाक इति । एतेषां परीक्षणमनुमानतोऽवगन्तव्यं गुरुसकाशदर्शनाद्वा । तदूर्ध्वं खरपाकादूर्ध्वं यदा स्नेहकल्कः कठिनतरो भवति तदा दग्धो ज्ञेयः, सच सर्वकर्मसु निष्फलः स्यात् दाहकरश्च भवति ॥ १२-१६ ॥

**गू०**—इदानीं स्नेहसिद्धलक्षणमाह—यदा स्नेहकल्कः अङ्गुल्या वर्तितः वर्तीकृतः वर्तिवद्भवेत् अग्निनिक्षिप्तः शब्दहीनश्च भवेत् तदा सिद्धं वदेत् । यदा वर्णगन्धरसोत्पत्तिस्तदापि स्नेहसिद्धिर्भवेत् । इति च लक्षणं वर्णस्तैलपक्ववर्णो रक्तादिः, गन्धः सुगन्धत्वं, रसोत्पत्तिर्मधुरादिरसोत्पत्तिः, तदा खेदनाल्लक्ष्यते । स्नेहपाकस्य त्रिविधत्वमाह—एको मृदुः, एको मध्यः, एकः खरः; एवं त्रिधा स्नेहपाकः । तेषां लक्षणमाह—ईषत्सरसकल्कः ईषज्जलकल्कः मृदुस्नेहपाकः नीरसकोमले कल्के सिद्धः पाको मध्यपाकः नीरसकोमले जलसहिते आर्द्रे ईषत्कठिनकल्कः स्नेहपाकः खरः तदूर्ध्वं दग्धपाको दाहकृन्निष्प्रयोजनः, न कार्यकारी ॥ १२ ॥ १६ ॥

इदानीं तस्य चतुर्विधपाकस्य गुणमाह—

**आमपाकश्च निर्वीर्यो वह्निमान्द्यकरो गुरुः ।**
**नस्यार्थं स्यान्मृदुः पाको मध्यमः सर्वकर्मस्वसु ॥ १७ ॥**

**अभ्यङ्गार्थं खरः प्रोक्तो युञ्ज्यादेवं यथोचितम् ।**
**घृततैलगुडादींश्च साधयेन्नैकवासरे ॥ १८ ॥**
**प्रकुर्वन्त्युषिता ह्येते विशेषाद्गुणसंचयम् ।**

**दी०**—आमपाकश्चेति । आमपाकोऽपरिपाककल्कः स्नेहो निर्वीर्यो भवति, निःशेषेण वीर्यरहित इत्यर्थः । वह्निमान्द्यकृद्भक्षणयोगे च भवति । नस्यविषये मृदुपाकः स्नेहः । मध्यपाकस्तु सर्वकर्मसु युज्यते सर्वकर्म नस्याभ्यङ्गपानादिकं । खरपाकस्नेहः केवलाभ्यङ्गे विहितः नान्यकर्मसु । यथोचितमिति यथायोग्यं युंज्यादित्यर्थः । एके नस्याभ्यङ्गे खरः प्रोक्त इति पठन्ति, तन्न सर्वसंमतम्, नस्ये तु सौम्यमाहुः । स्नेहस्तु किमेकाहेनैव साध्यः उत दीर्घदिवसैः तद्विषयमाह—घृतेति । घृततैले प्रसिद्धे गुडोऽवलेहः । आदिग्रहणात् ईदृशसम्भारा ये चाऽन्ये प्रयोगाः ते सर्वे एकस्मिन्नेव वासरे न साध्याः न पाचनीया इत्यर्थः । कुतस्तदाह—प्रकुर्वन्ति इत्यादि । ते स्नेहादयस्तु यदा उषिताः सन्ति तदा गुणसञ्चयं प्रकुर्वन्ति । अतएव बहुदिवसैः कृत्वा साधनीया इति भावः । तन्त्रान्तरेषु एतद्बहुद्रव्यसम्भारविषयम्, अस्मत्सम्प्रदायेऽपि स्वल्पमपि स्नेहं किञ्चिद्विपाच्यापरेऽह्नि सिद्धोऽवतार्यः गुडादिकमपि चापरेऽह्नि मधुदानादिकमुक्तं कुर्यात् नैवं सर्वमतविरोधः ॥ ॥ १७ ॥ १८ ॥

**गू०**—आमपाकस्त्रिविधपाकाद्धीनः सजल एवेत्यर्थः, स वह्निमान्द्यकरः, तथा गुरुः । येषु मृद्वादयः प्रयुज्यन्ते, तानाह—नस्यार्थमिति । नस्यार्थं मृदुपाकः सर्वकर्मसु, भक्षणावस्थायां मध्यमः, अभ्यङ्गार्थं खरः एवं यथोचितं युञ्ज्यात् प्रयोजयेत्, घृततैलादीन् एकस्मिन्नेव दिने न साधयेत्, कुतः? उषिता रात्रौ वासिता विशेषाद्गुणसञ्चयं कुर्वन्ति ॥ शार्ङ्गधरानुक्तमपि तैलसाधनं आत्रेयादाह—"स्नेहो वारिसमं नीत्वा पाचयेत् मृदुवह्निना । पञ्चपल्लवकल्केन द्वात्रिंशांशेन संयुतं ॥ किंचित्सरसगर्भेण वस्त्रपूतं प्रकल्पयेत् । इत्येतद्दुष्टगन्धादिदोषस्तैलाद्विमुच्यते ॥ निर्दोषकरणादेतत्कृत्वा तैलं विपाचयेत्" इति । ग्रन्थान्तरे एवं शोधनं —"तैलं कृत्वा कटाहे दृढतरविमले मन्दमन्दाग्निना च पक्वं निष्फेनभावं गतमिह हि यदा शैत्यभावं तदैव । मञ्जिष्ठारात्रिलोध्रैर्जलधरनलिकैः सामलैः साक्षपथ्यैः सूचीपुष्पावरोहैर्नयति हि सततं गन्धयोगं जहाति" ॥ मञ्जिष्ठाद्यैर्मिलितैः अम्भिनीरैः पादांशकैः कल्कीकृतैः पचेत्, रात्रिर्हरिद्रा, जलधरो मुस्तकः, नलिका गन्धनलिका उत्तरदेशे प्रसिद्धा तदभावे त्वक्; सामलैः सामलकैः, अक्षं बिभीतकं, पथ्या हरीतकी, सूचीपुष्पं केतकी, अवरोहः वटावरोहः, चकारात् ग्रन्थान्तरे चैव "तैलस्येन्दुकलांशकेन विकचा ग्राह्या तु मूर्च्छाविधौ ये चान्ये त्रिफलादयस्तु रजनीह्रीबेरलोध्रान्विताः । सूचीपुष्पवटावरोहनलिकाद्रव्यास्तु पादांशिकाः प्रोच्यास्तैलजगन्धदोषहरणे कल्कीकृतास्तद्विदैः" । विकचा मञ्जिष्ठा, इन्दुकलांशेन तैलात् षोडशांशेन ग्राह्याः, मूर्च्छाविधौ तैलमूर्च्छाविधौ, ये चान्ये त्रिफलादयस्ते मिलित्वा कल्कीकृताः । पयोदो मुस्ता, रजनी हरिद्रा, ह्रीबेरं उदीच्यं, लोध्रः प्रसिद्धः, सूचीपुष्पं केतकी, वटावरोहः, नलिका गन्धनलिका, तथाच—'मध्ये सारविहीना च सरसा कीटवर्जिता । नलिका सा भवेद्भद्रा विपरीता तु निन्दिता' । केचिन्नलिकां त्वचमाहुः । इति घृततैलसाधनप्रकारः ॥ ॥ १७ ॥ १८ ॥

## अथ घृतकल्पना

**स यथा—**

**दी०**—स यथेत्यनेन तं स्नेहपाकसमूहं दर्शयति ग्रन्थकारः । तत्रादौ पूर्वं तावद्घृतकल्पनां दर्शयन्नाह यतस्तैलाद्विशिष्टो घृतकल्पः पूर्वाचार्यैर्दर्शितः तथैवात्रापि लिखितः ।

**गू०—अथ क्षीरषट्पलघृतम्—**

**पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ॥ १९ ॥**
**ससैन्धवैश्च पलिकैर्घृतप्रस्थं विपाचयेत् ।**
**क्षीरं चतुर्गुणं दत्वा तद्घृतं प्लीहनाशनम् ॥ २० ॥**
**विषमज्वरमन्दाग्निहरं रुचिकरं परम् ।**

**दी०**—प्रथमतः क्षीरषट्पलकघृतव्याख्यानमाह—पिप्पलीति । अत्र पिप्पल्यादिकं पञ्चद्रव्यं पञ्चकोलसंज्ञं बोद्धव्यम्, यतस्तन्त्रान्तरे पञ्चकोलघृतमस्य नाम प्रसिद्धम्, अत्र चव्यमिति विटपविशेषः, यस्य फलं गजपिप्पलीति श्रुतिः, पलिकैरिति पलप्रमाणता प्रत्येकमाहुः । अतएव क्षीरषट्पलकघृतमिदम्, चतुर्गुणक्षीरेण सह षट्पलप्रमाणषड्द्रव्यैश्च साधितमित्यर्थः । अत्र चतुर्गुणं नीरमपि देयम्, सम्यक्पाकार्थमित्यस्मत्सम्प्रदायाभिप्रायः । घृतप्रस्थमिति । षोडशपलमितम् 'क्षीरस्य चतुर्गुणतात्र घृतपरिमाणात् तत्सिद्धमिति सिद्धताऽस्य परिभाषोक्तविधानात् ॥१९॥२०॥

गू०—तत्रादौ घृताधिकारः पिप्पल्याद्यैः षट्पलैः कल्कितैर्घृताच्चतुर्गुणं क्षीरं दत्वा पचेत् तद् घृतं षट्पलं भवति पिप्पल्यादीनां षट्पलत्वात् । प्लीहा दक्षिणाङ्गे रोगविशेषः हृदयादधः, विषमज्वरहरं, तथा रुचिकरं, विषमज्वराः संततादयः पञ्च ॥ १९ ॥ २० ॥

## अथ चांगेरीघृतं अतीसारग्रहण्योः—

**पिप्पली पिप्पलीमूलं चित्रको हस्तिपिप्पली ॥ २१ ॥**
**श्वदंष्ट्रा नागरं धान्यं पाठा बिल्वं यवानिका ।**
**द्रव्यैश्च पलिकैरेतैश्चतुःषष्टिपलं घृतम् ॥ २२ ॥**
**घृताच्चतुर्गुणं देयं चाङ्गेरीस्वरसं बुधैः ।**
**तथा चतुर्गुणं दत्वा दधि सर्पिर्विपाचयेत् ॥ २३ ॥**
**शनैः शनैर्विपक्तव्यं चाङ्गेरीघृतमुत्तमम् ।**
**तद्घृतं कफवातघ्नं ग्रहण्यर्शोविकारनुत् ॥ २४ ॥**
**हन्त्यानाहं गुदभ्रंशं मूत्रकृच्छ्रं प्रवाहिकाम् ।**

दी०—अथ चाङ्गेरीघृतमाह—पिप्पलीति । अत्र हस्तिपिप्पली गजपिप्पली, श्वदंष्ट्रा गोक्षुरकः, नागरं शुण्ठी, बिल्वमत्र बिल्वशलाटु, पलिकैरिति पलप्रमाणं प्रत्येकं, चाङ्गेरीस्वरसमिति चाङ्गेरी प्रसिद्धा, साचाम्लरसा आमचाङ्गेरीति लोके प्रसिद्धा, तस्याः स्वरसमिति सद्योरसं, बुधैरिति ग्रहणेन सद्योरसाभावे क्वाथमपि देयम्, दधि चतुर्गुणं घृतपरिमाणात् । शनैः शनैः पक्तव्यमिति मन्दपाचनपाचितमिति भावो दग्धभयात् ॥ २१–२४ ॥

गू०—हस्तिपिप्पली गजपिप्पली, चांगेरी तत्स्वरसः दधि गोदधि ॥ २१–२४ ॥

## अथ मसूरघृतं अतीसारादौ—

**मसूराणां पलशतं नीरद्रोणे विपाचयेत् ॥ २५ ॥**
**पादशेषं शृतं नीत्वा दत्वा बिल्वपलाष्टकम् ।**
**घृतप्रस्थं पचेत्तेन सर्वातीसारनाशनम् ॥ २६ ॥**
**ग्रहणीं भिन्नविट्कं च नाशयेच्च प्रवाहिकाम् ।**

दी०—अथ मसूराद्यं घृतमप्याह—मसूराणामिति । मसूरोऽन्नविशेषः प्रसिद्धः, नीरद्रोणे जलद्रोणे चतुःषष्टिकुडवपरिमितं भवति । बिल्वं पलाष्टकमितं भवति बिल्वं बिल्वमज्जा तच्च कल्कीकृतं जलेन सह देयम्, कर्तव्यविधावपि मसूराः कर्पटबद्धाः क्वाथ्याः, मृद्वग्निना च साधनं कार्यम् ॥ २५ ॥ २६ ॥

गू०—सुगमम् ॥ २५ ॥ २६ ॥

१–'खट्टीमीठी' हि. भा. ।

## अथ कामदेवघृतं रक्तपित्तादौ—

**अश्वगन्धा पलशतं तदर्धं गोक्षुरं स्मृतम् ।**
**शतावरी विदारी च शालपर्णी बलाऽमृता ॥ २७ ॥**
**अश्वत्थस्य च शुङ्गानि पद्मबीजं पुनर्नवा ।**
**काश्मर्याश्च फलं चैव माषबीजं तथैव च ॥ २८ ॥**
**पृथग्दशपलान्भागान् चतुर्द्रोणेऽम्भसि पचेत् ।**
**द्रोणे शेषे रसे तस्मिन् पचेदेव घृताढकम् ॥ २९ ॥**
**मृद्वीका पद्मकं कुष्ठं पिप्पली रक्तचन्दनम् ।**
**पत्रकं नागपुष्पं च आत्मगुप्ताफलं तथा ॥ ३० ॥**
**नीलोत्पलं सारिवे द्वे जीवनीयो गणस्तथा ।**
**पृथक्कर्षसमान्भागान् शर्करायाः पलद्वयम् ॥ ३१ ॥**
**रसस्य पौण्ड्रकेक्षूणामाढकैकं समाहरेत् ।**
**चतुर्गुणेन पयसा घृताढकं विपाचयेत् ॥ ३२ ॥**
**घृतमेतन्निहन्त्याशु रक्तपित्तं क्षतक्षयम् ।**
**हलीमकं पाण्डुरोगं वर्णभेदं स्वरक्षयम् ॥ ३३ ॥**
**मूत्रकृच्छ्रमुरोदाहं पार्श्वशूलं च नाशयेत् ।**
**एतत्सर्पिः प्रयोक्तव्यं बहुस्त्रीपुरवासिनाम् ॥ ३४ ॥**
**स्त्रीणां चैवाप्रजातानां दुर्बलानां च देहिनाम् ।**
**श्रेष्ठं बलकरं वर्ण्यं हृद्यं वृष्यं रसायनम् ॥ ३५ ॥**
**ओजस्तेजस्करं हृद्यमायुष्यं प्राणवर्धनम् ।**
**संवर्धयति शुक्रं हि पुरुषं दुर्बलेन्द्रियम् ॥ ३६ ॥**

१–'अश्वगन्धा पलशतं तदर्धं गोक्षुरं मतम् ।
पुनर्नवाश्वत्थशुण्ठीशालपर्णीस्तु कल्पयेत् ॥
पद्मबीजं माषबीजं दशपलं पृथक् ।
चतुर्द्रोणाम्भसा पक्त्वा द्रोणशेषं शृतं नयेत् ॥
जीवनीयगणः कुष्ठं पद्मकं रक्तचन्दनम् ।
पत्रकं पिप्पली द्राक्षा काश्मर्याफलं तथा ॥
नीलोत्पलं नागपुष्पं सारिवे द्वे बले तथा ।
पृथक्कर्षसमा भागाः शर्करायाः पलद्वयम् ॥
रसश्च पौण्ड्रकेक्षूणामाढकैकं समाहरेत् ।
घृतस्य चाढकं दत्वा पचेन्मृदुनाग्निना ॥
घृतमेतन्निहन्त्याशु रक्तपित्तमुरःक्षतम् ।
हलीमकं पाण्डुरोगं वर्णभेदं स्वरक्षयम् ॥
वातरक्तं मूत्रकृच्छ्रं पार्श्वशूलं च कामलाम् ।
शुक्रक्षयमुरोदाहं कार्श्यमोजःक्षयं तथा ॥
स्त्रीणां चैवाप्रजातानां बल्यं शुक्रदं नृणाम् ।
कामदेवघृतं नाम हृद्यं वर्ण्यं रसायनम्' ॥

इति पाठान्तरम् ।

**सर्वरोगविनिर्मुक्तो पयःसिक्तो यथा द्रुमः।**
**कामदेव इति ख्यातं सर्पिरुक्तं महागुणम्॥ ३७॥**

दी०—इदानीं कामदेवघृतविवरणं दर्शयन्नाह—अश्वगन्धेति। अश्वगन्धामूलं पलशतं ग्राह्यम्, तदर्धो गोक्षुर इति पञ्चाशत्पलं; गोक्षुरोऽत्र पञ्चाङ्गो ग्राह्यः, अपराणि दशद्रव्याणि दशपलमिति प्रत्येकमाहुः, तानि कानीत्यत्राह—शतावरीत्यादि सुगमम्। तत्र तु अश्वत्थस्य च शुङ्गानीति पिप्पलशुङ्गानि सिद्धानि, काश्मरी गम्भारी तस्याः फलानि, पद्मबीजं प्रसिद्धं 'कमलगटा' शब्दवाच्यम्, माषबीजमिति मषाः प्रतीतः, एतत् सकलं पानीयद्रोणचतुष्टये संक्वाथ्य पादशेषं वस्त्रगालितं ग्राह्यं। अपराण्यपि कल्कयोग्यानि द्रव्याण्याह—मृद्वीकेत्यादि। मृद्वीका द्राक्षा, पद्मकं काष्ठविशेषं तत्तु चम्पकवद्वृक्षविशेषः, आत्मगुप्ता कपिकच्छुः तस्याः फलानि, नीलोत्पलं नीलकमलवाच्यम्, तदभावे कमलबीजं ग्राह्यम्। सारिवे द्वे इति कृष्णसारिवा शुक्लसारिवे। ते 'अफोई' शब्दवाच्ये; कृष्णसारिवा कलहंसवत्पत्रा सुगन्धा, शुक्लसारिवा जम्बूवत्पत्रा व्रततिः, जीवनीयो गण इति जीवनीयो जीवन्तीशाकविशेषः, तदादिसंज्ञको जीवनीयो गणः, तथाहि—'जीवन्ती सूर्यपर्णीयुक्ताकोल्यौ जीवकर्षभौ। मेदे यष्टीति मधुरो जीवनीयो गणो मतः' इति। तस्याऽप्रसिद्धत्वात् तत्साम्यगुणद्रव्याणि योज्यानि इति वृद्धवैद्यानां सम्मतम्, एतानि मृद्वीकादीनि द्रव्याणि पृथक् कर्षप्रमाणानि ग्राह्याणि, शर्करायाः पलद्वयमिति। केचित् सिद्धेऽस्मिन् शर्करायाः प्रक्षेपमाहुः। रसस्य पौण्ड्रकेक्षूणामिति। पौण्ड्रको विख्यातः इक्षुविशेषः, इक्षुः सामान्यः सच लोहितेक्षुप्रभृतिको यथालाभं ग्राह्यः, ननु इक्षुग्रहणेनैव पौण्ड्रकग्रहणप्राप्तिः तत्कथं भिन्नग्रहणं? उच्यते—पौण्ड्रकग्रहणं गुणप्राबल्यात् कृतं यतः 'पौण्ड्रकः शीतलः स्निग्धो बृंहणो कफकृत् सरः' इति। तस्मात् पौण्ड्रको विशेषेणात्र पाचनीयः। अस्य रसस्याढकं प्रत्येकं द्विराढकग्रहणात् घृताढकमेकम्, गोदुग्धं चतुराढकमिति॥ २७–३७॥

गू०—अमृता गुडूची, काश्मरी, गम्भारी, पद्मबीजं कमलबीजं, माषबीजमन्नं, जीवन्तीयगणश्चूर्णोक्तः, नागपुष्पं नागकेशरं, सारिवे द्वे श्वेतकृष्णभेदेन, द्वे बले बला नागबला, शर्करा सिता; पौण्ड्रकेक्षूणां रसः। स्पष्टमन्यत्॥ २७–३७॥

१–पौंडा। २–गाण्डा (ना)।



### अपस्मारादौ पानीयकल्याणकं घृतं—

**त्रिफला द्वे निशे कौन्ती सारिवे द्वे प्रियङ्गुका।**
**शालिपर्णी पृष्टिपर्णी देवदार्व्येलवालुकम्॥ ३८॥**
**नतं विशाला दन्ती च दाडिमं नागकेशरम्।**
**नीलोत्पलैला मञ्जिष्ठा विडङ्गं कुष्ठपद्मकम्॥ ३९॥**
**जातिपुष्पं चन्दनं च तालीसं बृहती तथा।**
**एतैः कर्षसमैः कल्कैर्जलं दत्त्वा चतुर्गुणम्॥ ४०॥**
**घृतप्रस्थं पचेद्धीमानपस्मारे ज्वरे क्षये।**
**उन्मादे वातरक्ते च कासे मन्दानले तथा॥ ४१॥**
**प्रतिश्याये कटीशूले तृतीयकचतुर्थके।**
**मूत्रकृच्छ्रे विसर्पे च कण्डूपाण्ड्वामये तथा॥ ४२॥**
**विषद्वये प्रमेहेषु सर्वथैवोपयुज्यते।**
**वन्ध्यानां पुत्रदं भूतयक्षरक्षोहरं स्मृतम्॥ ४३॥**

दी०—अथ पानीयकल्याणकं घृतं आह—त्रिफलेति। त्रिफलात्र हरीतकीप्रभृतिफलत्रयम्, द्वे निशे हरिद्राद्वयं, कौन्ती रेणुका, सारिवे द्वे कृष्णशुक्लभेदेन, प्रियङ्गुर्लताविशेषः तस्याः फलानि, शालिपर्णी पृष्टिपर्णी चेति कवराद्वयशब्दवाच्यम्, एलवालुकं स्वनामख्यातं तच्च कुष्ठगन्धि षट्फलसदृशम्; नतं तगरपादिका, विशाला इन्द्रवारुणी, दन्ती प्रसिद्धा, दाडिमं दाडिमफलं बीजानि च, नीलोत्पलं नीलकमलं, तदभावे पद्मबीजं द्रव्यं ग्राह्यं, एला बृहत्फला, जाती मालती तस्याः कुसुमानि, चन्दनं श्वेतं, तालीसं स्वनामप्रसिद्धम्, बृहती बृहत्कण्टकारिका एतानि कर्षप्रमाणानि प्रत्येकं। जलं पानीयं चतुर्गुणं देयं घृतपरिमाणात्। घृतप्रस्थमिति कुडवचतुष्टयप्रमितं गव्यं घृतं भवति केवलपानीयपरिपाचनात् पानीयकल्याणकमस्य संज्ञारूढिः॥३८–४३॥

गू०—कौन्ती रेणुका, एलवालुकं प्रसिद्धं, विशाला इन्द्रवारुणी, दाडिमं प्रसिद्धं तस्य बीजानि, पद्मकं जातिपुष्पं, मालतीपुष्पाणि, कल्कद्रव्यात् चतुर्गुणं जलं दत्त्वा प्रस्थं घृतं पचेत्। तत्पानीयकल्याणकं घृतं नामतः॥ ३८–४३॥

### अमृताघृतं कुष्ठादौ—

**अमृताक्वाथकल्काभ्यां सक्षीरं विपचेद्घृतम्।**
**वातरक्तं जयत्याशु कुष्ठं जयति दुस्तरम्॥ ४४॥**

दी०—अमृताद्यघृतविवरणमप्याह—अमृतेति। अमृता गुडूची तस्याः क्वाथकल्काभ्यां कृत्वा सक्षीरं घृतं विपाच्य वातरक्तादिके देयम्, तेन क्वाथश्चतुर्गुणजलेन

सिद्धः स च घृताच्चतुर्गुण इति परिभाषायां प्रतीतः। कल्कं दृषदि पेषितं तच्च घृतांशं तेन कल्कद्रव्यं घृताच्चतुर्थांशं देयमित्यर्थः। सक्षीरमिति चतुर्गुणं क्षीरं घृतपरिमाणात्। केचित्तु स्नेहसमं प्रोक्तमिति पठन्ति एतदपि सङ्गतं न विरुद्धं द्रवान्तरत्वात्। कल्केऽपि चतुर्गुणं पानीयं दत्वा पाचनीयमिति व्यवहारः। अस्य पानमाहुरभ्यङ्गं च ॥ ४४ ॥

गू०—अमृता गुडूची, तस्याः क्वाथः कल्कश्च, क्षीरं दुग्धं घृताच्चतुर्गुणं। स्पष्टमन्यत् ॥ ४४ ॥

### अथ महातिक्तकघृतं वातरक्तकुष्ठादौ—

**सप्तच्छदः प्रतिविषा श्यामाकः कटुरोहिणी।**
**पाठा मुस्तमुशीरं च त्रिफला पर्पटस्तथा ॥ ४५ ॥**
**पटोलनिम्बमञ्जिष्ठाः पिप्पली पद्मकं शठी।**
**चन्दनं धन्वयासश्च विशाले द्वे निशे तथा ॥ ४६ ॥**
**गुडूची सारिवे द्वे च मूर्वा वासा शतावरी।**
**त्रायन्तीन्द्रयवायष्टीभूनिम्बाश्चाक्षभागिकाः ॥ ४७ ॥**
**घृतं चतुर्गुणं दद्याद्घृताद्दामलकीरसः।**
**द्विगुणः सर्पिषश्चात्र जलमष्टगुणं भवेत् ॥ ४८ ॥**
**तत्सिद्धं पाययेत्सर्पिर्वातरक्तेषु सर्वथा।**
**कुष्ठानि रक्तपित्तं च रक्तार्शांसि च पाण्डुताम् ॥ ४९ ॥**
**हृद्रोगगुल्मवीसर्पप्रदरं गण्डमालिकाम्।**
**क्षुद्ररोगान् ज्वरांश्चैव महातिक्तमिदं जयेत् ॥ ५० ॥**

दी०—इदानीं महातिक्तकघृतमाह—सप्तच्छद इति। सप्तच्छदः सप्तपर्णशब्दवाच्यः स च शाल्मलीपत्रसदृशो युग्मपत्रः; प्रतिविषा अतिविषा श्यामाको राजवृक्षस्तस्य फलं, चन्दनं श्वेतं, विशाले द्वे इतीन्द्रवारुणीद्वयं, द्वे निशे इति हरिद्राद्वयं, सारिवे द्वे इति शुक्लकृष्णभेदेन, मूर्वा चोरस्नायुः, वासा आटरूषकः, त्रायन्ती त्रायमाणा, शेषं द्रव्यं प्रसिद्धम्, अक्षभागिकाः कर्षप्रमाणाः, प्रत्येकं घृतं चतुर्गुणमिति पूर्वद्रव्यसम्भारात् आमलकफलस्वरसो द्विगुणो घृतपरिमाणात् स्वरसाभावे क्वाथोऽपि देयः न दोषः, जलं पानीयं चाष्टगुणं देयं सम्यक्पाकार्थं सर्पिषो घृतपरिमाणात्, एतत्सिद्धं महातिक्तकं नाम घृतं वातरक्तादिषु प्रशस्तम् ॥ ४५–५० ॥

गू०—सप्तच्छदः सप्तपुटा, प्रतिविषा अतिविषा, श्यामाक आरग्वधः, कटुरोहिणी कटुकी, पाठा, मुस्तं नागरं, उशीरं सुगन्धकं, त्रिफला हरीतक्यादिका, पर्पटः कटुपत्रः, पटोलं फलशाकस्तस्य पत्राणि, पद्मकं पद्मककाष्ठं, शठी कर्चूरः, चन्दनं रक्तचन्दनं, धन्वयासको यवासकः, विशाला इन्द्रवारुणी, द्वे निशे हरिद्रा दारुहरिद्रा च, द्वे सारिवे श्वेतकृष्णभेदेन, मूर्वा मोरटा, त्रायन्ती त्रायमाणा, इन्द्रयवः, यष्टी मधुयष्टी, भूनिम्बः तिक्तकं। अक्षभागिकाः प्रत्येकं कर्षभागाः। घृतं चतुर्गुणं सर्वद्रव्येभ्यश्चतुर्गुणं। घृतात् द्विगुण आमलकीरसः सर्पिषो घृतात् जलमष्टगुणं सर्वं पक्त्वा सिद्धं कारयेत्। स्पष्टमन्यत्। महातिक्तकं सिद्धत्वात् ॥ ४५–५० ॥

### अथ कासीसाद्यं घृतं कुष्ठे दद्रूपामाशिरःस्फोटादौ—

**कासीसं द्वे निशे मुस्तं हरितालं मनःशिलाम्।**
**कम्पिल्लकं गन्धकं च विडङ्गं गुग्गुलुं तथा ॥ ५१ ॥**
**सिक्थकं मरिचं कुष्ठं तुत्थकं गौरसर्षपान्।**
**रसाञ्जनं च सिन्दूरं श्रीवासं रक्तचन्दनम् ॥ ५२ ॥**
**इरिमेदं निम्बपत्रं करञ्जं सारिवां वचाम्।**
**मञ्जिष्ठां मधुकं मांसीं शिरीषं लोध्रपद्मकम् ॥ ५३ ॥**
**हरीतकीं प्रपुन्नाटं चूर्णयेत्कार्षिकान्पृथक्।**
**ततस्तच्चूर्णमालोड्य त्रिंशत्पलमिते घृते ॥ ५४ ॥**
**स्थापयेत्ताम्रपात्रे च घर्मे सप्त दिनावधि।**
**अस्याभ्यङ्गेन कुष्ठानि दद्रूपामाविचर्चिकाः ॥ ५५ ॥**
**शूकदोषा विसर्पाश्च विस्फोटा वातरक्तजाः।**
**शिरःस्फोटोपदंशाश्च नाडीदुष्टव्रणानि च ॥ ५६ ॥**
**शोथो भगन्दरश्चैव लूताः शाम्यन्ति देहिनाम्।**
**शोधनं रोपणं चैव सवर्णकरणं घृतम् ॥ ५७ ॥**

दी०—अधुना कासीसाद्यघृतविवरणमाह—कासीसमिति। कासीसं द्रव्यविशेषं भस्मवदल्पमृत् अस्य भेदः पुष्पकासीसं, तच्च किञ्चित् पीतम्, द्वे निशे हे हरिद्रे, कम्पिल्लको रोरीशब्दवाच्यो वृक्षविशेषः, कम्पिल्लकः[illegible], सिक्थकं मधूच्छिष्टं, रसाञ्जनं दार्वीक्वाथोद्भवं, सिन्दूरं प्रसिद्धं श्रीवासं निर्यासद्रव्यं रालशब्दवाच्यं, इरिमेदो विट्खदिर ओजशब्दवाच्यः करञ्जो बृहत्करञ्जो वृक्षविशेषः लोके चोला इति प्रसिद्धः। सारिवा आस्फोता 'आस्फोट' लोके; मांसी गन्धमांसी जटावल्लिटपः, पद्मकं पद्मकाष्ठं, प्रपुन्नाटं चक्रमर्दबीजानि, एतानि पृथक् कर्षप्रमितानि चूर्णीकृत्य त्रिंशत्पलपरिमिते घृते आलोड्य ताम्रपात्रे

१–'परवल' हि. भा.।

निधाय घर्मे धारयेत् यावत् सप्त दिनानि भवन्ति । एतच्चाद्रवाभिसिद्धं सूर्यपाकसंज्ञमिति बोद्धव्यम् । अस्मत्संप्रदाये तु कल्कार्हं द्रव्यं कल्कीभूतं कृत्वा चतुर्गुणेन पानीयेन सह घृतं विपाच्य पश्चात् प्रक्षेपयोग्यं द्रव्यं चूर्णीकृत्य तत्र प्रक्षिप्यालोड्य घर्मे सप्तदिनं यावद्धारयेत् एवं सिद्धो भवति । कल्कार्थं द्रव्यं यथा—हरिद्रामुस्तरक्तचन्दनैरिमेदनिम्बपत्रकरञ्जसारिवावचामञ्जिष्ठामधुमांसीशिरीषलोध्रपद्मकहरीतकीप्रभृतिकं शेषं प्रक्षेपार्थं ज्ञेयम् ॥ ५१–५७ ॥

गू०—कासीसं प्रसिद्धं, द्वे निशे हरिद्राद्वयं, रसाञ्जनं दार्वीक्वाथोद्भवं प्रसिद्धं, शिरीषं प्रसिद्धं, पद्मकं पद्मककाष्ठं, प्रपुंन्नाटं चक्रमर्दस्तस्य बीजानि, एतान् पृथक् कर्षमितान् त्रिंशत्पलमिते घृते ताम्रपात्रे घर्मे सप्तदिनं स्थापयेत् ॥ ५१–५७ ॥

### अथ व्रणे जात्यादिघृतं—

**जातीनिम्बपटोलं च द्वे निशे कटुरोहिणी ।**
**मञ्जिष्ठा मधुकं सिक्थं करञ्जोशीरसारिवाः ॥ ५८ ॥**
**तुत्थं च विपचेत्सम्यक्कल्कैरेभिर्घृतं बुधः ।**
**अस्य लेपाद्विरोहन्ति सूक्ष्मनाडीव्रणा अपि ॥ ५९ ॥**
**मर्माश्रिताः क्लेदिनश्च गम्भीराः सरुजो व्रणाः ।**

दी०—इदानीं जात्यादिकं घृतमाह—जातीत्यादि । जातीनिम्बपटोलमित्यत्र त्रयाणां पत्राणि ग्राह्याणि तन्त्रान्तरदर्शनात् । तथाच–'जातीनिम्बपटोलानां नक्तमालस्य पल्लवा' इत्यादि । द्वे निशे द्वे हरिद्रे, तेन हरिद्रा दारुहरिद्रा, कटुरोहिणी कटुकी शब्दवाच्यम्, मधुकं यष्टीमधु, सिक्थकं मदनकं, करञ्जो वृहत्करञ्जः तस्य पत्राणि फलानि वा, उशीरं सुगन्धद्रव्यम् । सारिवा आस्फोता, तुत्थं हरितपाषाणवत् कृत्रिमं द्रव्यविशेषं, एतत् साध्यमानं सकलद्रव्याद् घृतं चतुर्गुणं साध्यम् । अत्र कल्कपाचनार्थं चतुर्गुणितं जलं देयम् । एके सिक्थतुत्थयोः सिद्धे प्रक्षेपमाहुः । तथाच—'प्रक्षेपं कारयेद्धीमान् सिद्धे सिक्थकतुत्थयोः' इत्यादि । जातीकार्यं गौरार्थं च तैलमपि पच्यते । तथाच **चक्रः**—'गौरार्थं जातीकार्यं च तैलमेवं प्रसाध्यते । तैलं सूक्ष्मानने दुष्टे व्रणे गम्भीर एव च' इति ॥ ५८ ॥ ५९ ॥

गू०—जाती मालती तस्याः पत्राणि, निम्बपत्राणि, द्वे निशे हरिद्रा दारुहरिद्रा, मधुकं यष्टीमधु, सिक्थं करञ्जमूलं, उशीरं सुगन्धकं, सारिवा अनन्ता, तुत्थं प्रसिद्धं, एभिः कल्कैर्घृतं पचेत् कल्कद्रव्यात् घृतं चतुर्गुणम् । अस्य लेपात् सूक्ष्मा नाडीव्रणा रोहन्ति ॥ ५८ ॥ ५९ ॥

### अथ बिन्दुघृतं जलोदरविरेचनादौ—

**चित्रकं शङ्खिनी पथ्या कम्पिल्लस्त्रिवृतायुगम् ॥ ६० ॥**
**वृद्धदारुश्च शम्याको दन्ती दन्तीफलं तथा ।**
**कोशातकी देवदाली नीलिनी गिरिकर्णिका ॥ ६१ ॥**
**सातला पिप्पलीमूलं विडङ्गं कटुकी तथा ।**
**हेमक्षीरी च विपचेत्कल्कैरेभिः पिचून्मितैः ॥ ६२ ॥**
**घृतप्रस्थं स्नुहीक्षीरं षट्पले तु पलद्वयम् ।**
**अर्कक्षीरस्य मतिमांस्तत्सिद्धं गुल्मकुष्ठहृत् ॥ ६३ ॥**
**हन्ति शूलमुदावर्तं शोथाध्मानं भगन्दरम् ।**
**शमयत्युदराण्यष्टौ निपीतं बिन्दुसंख्यया ॥ ६४ ॥**
**गोदुग्धेनोष्ट्रदुग्धेन कौलत्थेन शृतेन वा ।**
**उष्णोदकेन वा पीत्वा बिन्दुवेगैर्विरिच्यते ॥ ६५ ॥**
**एतद्बिन्दुघृतं नाम नाभिलेपाद्विरिच्यते ।**

दी०—अधुना बिन्दुघृतमाह—चित्रकमिति । अत्र चित्रकः प्रसिद्धः, शङ्खिनी यवतिक्ता, शङ्खपुष्पीशब्दवाच्या, कंपिल्लः कबीला विख्याता 'रोरी' शब्दवाच्यमिति केचित् । त्रिवृतायुगमिति श्वेतकृष्णभेदेन, 'निशोथ' द्वयं, वृद्धदारु महाश्यामो दीर्घपत्रः स च त्रिधाराशब्दवाच्यः, शम्याकः कृतमालकः, दन्ती लोके 'दन्तिवनी 'ति वाच्या, तस्याः फलं जयपालशब्दवाच्यं, त्रिफला हरीतक्यादिकं, कोशातकी घोषारी, देवदाली वल्लीविशेषः । गिरिकर्णिका 'शोफन्दईशफन्द' इति प्रसिद्धः । सातला सेहुण्डभेदः, 'घटघव' इति लोके । हेमक्षीरी कङ्कुष्ठं केचिच्चोकशब्दवाच्यमिति वदन्ति । पिचून्मितैरिति कर्षप्रमाणैः प्रत्येकमत्र कल्कार्थं तोयं चतुर्गुणं देयं व्यवहारात् । तथाच—'स्नुह्यर्कपयसोरत्र पाकार्थमुपपत्तितः । चतुर्गुणं जलं देयं' इत्यादि । स्नुहीक्षीरं सेहुण्डस्य क्षीरं षट्पलप्रमितं देयम्, अर्कक्षीरं तु पलद्वयमिति वदन्ति केचित् । अस्मत्संप्रदाये तु अष्टपलपरिमितं स्नुहीक्षीरं एतत्परिमाणं तु अर्कक्षीरमिति । निपीतं बिन्दुसंख्यया इति 'बिन्दुः स्यात्तर्जनीपर्वद्वयमग्रार्धतो मितः' इति व्यवहारात् । षडष्टमाषका देया बिन्दुवेगैरिति यावत्संख्यान् बिन्दून् पिबेत् तावन्मात्रेण विरिच्यत इत्यर्थः ।

१–'पनवाड' हि. भा. ।

१–नीलाथोथा ।

'नाभिलेपाद्विरिच्यते' इत्यनेनास्य प्रभावोत्कृष्टत्वं दर्शितम् ॥ ६०-६५ ॥

**गू०**—शङ्खिनी शङ्खपुष्पी, पथ्या हरीतकी, कम्पिल्लः, त्रिवृतायुग्मं निःसुताद्वयं श्वेतकृष्णभेदेन, वृद्धदारुः प्रसिद्धः, शम्याकः कृतमालः, दन्ती जयपालमूलं, दन्तीफलं जयपालं, कोशातकी कटुर्घोषा, देवदाली बंदाली, नीलिनी नीलपुष्पी, गिरिकर्णिका अपराजिता, श्वेतपुष्पी पराजिता, सातला सेहुण्डः, हेमक्षीरी प्रसिद्धा। पिचून्मितैः प्रस्थं घृतं स्नुहीक्षीरे सेहुण्डदुग्धे षट्पले पचेत्, पलद्वये अर्कक्षीरस्य विपचेत् तत्सिद्धं बिन्दुघृतं भवति। बिन्दुप्रयोगात् बिन्दुघृतं नाम्ना प्रसिद्धम् ॥ ॥ ६०-६५ ॥

## अथ त्रिफलाघृतं नेत्ररोगे तिमिरादौ—

**त्रिफलाया रसप्रस्थं प्रस्थं वासारसोद्भवम् ॥ ६६ ॥**
**भृङ्गराजरसप्रस्थं प्रस्थमाजं पयः स्मृतम् ।**
**दत्त्वा तत्र घृतप्रस्थं कल्कैः कर्षमितैः पृथक् ॥ ६७ ॥**
**त्रिफला पिप्पली द्राक्षा चन्दनं सैन्धवं बला ।**
**काकोली क्षीरकाकोली मेदा मरिचनागरम् ॥ ६८ ॥**
**शर्करा पुण्डरीकं च कमलं च पुनर्नवा ।**
**निशायुग्मं च मधुकं सर्वैरेभिर्विपाचयेत् ॥ ६९ ॥**
**नक्तान्ध्यं नकुलान्ध्यं च कण्डूं पिल्लं तथैव च ।**
**नेत्रस्रावं च पटलं तिमिरं काचकं जयेत् ॥ ७० ॥**
**अन्येऽपि प्रशमं यान्ति नेत्ररोगाः सुदारुणाः ।**
**त्रैफलं घृतमेतद्धि पाने नस्यादिषूचितम् ॥ ७१ ॥**

**टी०**—इदानीं त्रिफलाघृतव्याख्यानमाह—त्रिफलेति। त्रिफलाया रसप्रस्थमिति । स्वरसाभावे क्वाथः कल्कं वा प्रचरति। वासारसोद्भवं प्रस्थमिति वासा आटरूषकः, भृङ्गराजो मार्कवः लोके भमराशब्दवाच्यः, आजं पयश्छागीदुग्धम्, एके 'प्रस्थमाजं पयः स्मृत'–मित्यस्याग्रे 'गुडूच्याश्च रसप्रस्थं आमलात्मरसं तथा। प्रस्थं प्रस्थं समाहृत्य सर्वैरेभिर्घृतं पचेत्' इति पठन्ति व्याख्यानयन्ति च । कल्कैरिति वक्ष्यमाणद्रव्याणां तद्यथा—त्रिफला हरीतक्यादिकं, चन्दनं श्वेतं, पुण्डरीकं श्वेतकमलं कमलसामान्यत्वेन रक्तं नीलं वा; निशायुग्ममिति हरिद्राद्वयं, मधुकं मधुयष्टी, एतत् सिद्धं भोजनाग्रे भोजनमध्ये भोजनान्ते च विहितम्। तथाच तन्त्रान्तरे–'ऊर्ध्वपानमधःपानं मध्यपानं च शस्यते' इति। शर्करायाः सिद्धे प्रक्षेपमाहुरेके। नक्तान्ध्यादयो नेत्ररोगे विख्याताः ॥ ६६-७१ ॥

**गू०**—त्रिफलारसप्रस्थमित्यत्र हरीतकीस्वरसप्रस्थः, आमलकरसप्रस्थः, प्रत्येकं त्रिफलाप्रस्थो जलं ननु षड्ढकमितं, कैशोरगुग्गुल्वादौ निर्णीतत्वात्। तीसटे स्पष्टमेव लिखितं,–'पथ्याक्षामलकीजले पयसि च च्छागेऽथ वासारसे भृङ्गस्य स्वरसे विपाचितमिति प्रोक्तैश्च कल्कौषधैः। काकोलीत्रिफलामृतोत्पलकणा क्षुण्णासिताषष्टिकाव्याघ्रीभिः सह नेत्ररुक् प्रशमते सर्पिर्महात्रैफलं' इति ॥ हरीतक्यादीनां स्वरसस्तु अग्निसंयोगं विना कर्तव्यः । यद्वा स्वरसं प्राप्याग्निसंयोगकरणादग्निसंयोगः । स्वरसः क्वाथस्तत्र प्रस्थं हरीतकी, चतुर्गुणं जलं दत्वा क्वाथः, द्विगुणं जलं दत्वा स्वरसः प्रस्थमात्रं गृह्यते एवमन्येषाम् । ननु समुदितस्य त्रिफलायाः स्वरसः प्रस्थः, उक्तायां च त्रिफलायां आमलकीरसस्य भिन्नग्रहणात्, तथाच **वृन्दवङ्गसेनादयः** 'त्रिफलाया रसप्रस्थं प्रस्थं भृङ्गरसस्य च । वृषस्य च रसः प्रस्थं शतावर्याश्च तत्समम् । अजाक्षीरं गुडूच्याश्च आमलक्या रसं तथा। प्रस्थं प्रस्थं समाहृत्य सर्वैरेभिर्घृतं पचेत्' । अत्र गुडूचीस्वरसत आमलकीस्वरसोऽधिकः, शार्ङ्गधरे तु नास्ति तत्कथं न विरोधः ? उच्यते, शार्ङ्गधरेण तु **तीसटमतं** गृहीतमिति तस्य न दोषः ॥ ६६-७१ ॥

## अथ गौराद्यं घृतं व्रणे—

**द्वे हरिद्रे स्थिरा मूर्वा सारिवा चन्दनद्वयम् ।**
**मधुपर्णी च मधुकं पद्मकेशरपद्मकम् ॥ ७२ ॥**
**उत्पलोशीरमेदाभिस्त्रिफलापञ्चवल्कलैः ।**
**कल्कैः कर्षमितैरेतैर्घृतप्रस्थं विपाचयेत् ॥ ७३ ॥**
**विसर्पलूताविस्फोटविषकीटव्रणापहम् ।**
**गौराद्यमिति विख्यातं सर्पिर्विषहरं परम् ॥ ७४ ॥**

**टी०**—अधुना गौराद्यं घृतमाह—द्वे हरिद्रे इति। हरिद्रा दारुहरिद्रा, स्थिरा शालिपर्णी, मूर्वा चोरस्नायुः, सारिवा आस्फोता, चन्दनद्वयमिति श्वेतरक्तभेदेन, मधुपर्णी यष्टीमधुभेदः, मधुकं मधुयष्टी। केचित्तु मधुयष्ट्या एव भागद्वयं ग्राह्यं द्विःपाठात्। पद्मकः काष्ठविशेषः, पञ्चवल्कलैरित्यस्याग्रे 'जातीनिम्बपटोलं च करञ्जं तिक्तरोहिणीकं' इति पठन्ति तद्बहुपुस्तकेषु न दृश्यते। अत्रापि कल्कपाकार्थं पानीयं चतुर्गुणमितं देयम्। परिभाषामतानुसारतः गौरादिकमिति। गौरा हरिद्रा ॥ ॥ ७२-७४ ॥

गू०—द्वे हरिद्रे हरिद्रा दारुहरिद्रा च, शालिपर्णी, मूर्वा मोरटा, सारिवा अनन्ता, चन्दनद्वयैः रक्तचन्दनः श्वेतचन्दनः, मधुपर्णी माषपर्णी, मधुकं यष्टीमधु, पद्मकेशरं, पद्मकं पद्मककाष्ठं, उत्पलं रक्तकमलं, उशीरं मेदा अष्टवर्गोक्ता, पञ्चवल्कलैः वट–उदुम्बर–शिरीष–पर्कटी-वेतस एषां वल्कलैः एतैः कर्षमितैः प्रत्येकं जलपिष्टैः पचेत् । गौरा हरिद्रा तदाद्यत्वात् इदं गौरादिघृतं स्पष्टमन्यत् ॥ ७२–७४ ॥

**अथ मयूरघृतं शिरोरोगादौ—**

**बलामधुकरास्नाभिर्दशमूलफलत्रिकैः ।**
**पृथग्द्विपलिकैरेभिर्द्रोणनीरेण पाचयेत् ॥ ७५ ॥**
**मयूरं पक्षपित्तान्त्रयकृत्पादास्यवर्जितम् ।**
**पादशेषं शृतं नीत्वा क्षीरं दत्त्वा च तत्समम् ॥७६॥**
**घृतप्रस्थं पचेत्सम्यग्जीवनीयैः पिचून्मितैः ।**
**तत्सिद्धं शिरसः पीडां मन्यापृष्ठग्रहं तथा ॥ ७७ ॥**
**अर्दितं कर्णनासाक्षिजिह्वागलरुजो जयेत् ।**
**पाने नस्ये तथाभ्यङ्गे कर्णपूरेषु युज्यते ॥ ७८ ॥**
**हेमन्तकालशिशिरवसन्तेषु च शस्यते ।**

दी०—अथ मयूराद्यं घृतमाह–बला इति । बला, मधुकं यष्टीमधु, रास्ना सुरभिः, दशमूलं प्रसिद्धम् । फलत्रिकं हरीतक्यादि पृथक् द्विपलिकैरेभिरित्यस्य स्थाने केचित् त्रिफलिकैरिति पठन्ति व्याख्यानयन्ति च । पक्षपित्तान्त्रयकृत्पादास्यवर्जितं मयूरमेकं द्रोणनीरेणेति चतुराढकमितेन पानीयेन पाचयेत्, किन्तु व्यवहारतः अधिकं जलं देयम् । यतः मयूरेण सह द्रव्याणां क्वाथविधानं भवति । तथाच चक्रः 'दशमूलादिभिस्तुल्यो मयूर इह गृह्यते' इति । एवं मिलित्वा यावत्क्वाथं भवति तावज्जलं देयम्, तत्र 'क्वाथ्याच्चतुर्गुणं वारि' इत्यादि परिभाषया जलव्यवस्थेति पूर्वव्याख्याप्रचारः । क्षीरं दत्त्वा च तत्सममिति क्वाथसममित्यर्थः, एके घृतसमं क्षीरमिति मन्यन्ते, तदपि सङ्गतं द्रवान्तरत्वात्, जीवनीयैः पिचून्मितैरिति जीवनीयो मधुरगणः स यथालाभं ग्राह्यः । पिचून्मितैः कर्षप्रमाणैः प्रत्येकं जीवनीयस्तु कल्परूप इत्याहुः । एतद् घृतं पानाभ्यञ्जनस्यादिषु योज्यम् । हेमन्तकालशिशिरवसन्तेषु इति । अन्यथा दोषकृत् स्यात् । तथाह्युक्तम् 'हेमन्तकाले शिशिरे च सेव्यं वसन्तकाले च मयूरसर्पिः । उष्णाद्रिदाहीं विषभक्षणाच्च वर्षाशरद्ग्रीष्मसुखेष्वपथ्यम् । आहारजातं हि विहंगमस्य कीटाश्च सर्पाश्च सरीसृपाश्च । पिपीलिका मत्कुणमक्षिकाश्च तेनोष्णकालेष्वहितो मयूरः । तथैव काले जलदाभिरामे विसृज्य शुक्रं च बलं च बर्हीं । कृशत्वमायात्यतिहीनभावात् शरन्मुखे तेन विवर्जनीयम्' इति ॥ ७५–७८ ॥

गू०—बला, मधुकं यष्टीमधु, रास्ना, दशमूलं, त्रिफला एतैः षोडशद्रव्यैः द्विपलिकैः द्रोणनीरेण मयूरं क्षिप्त्वा पाचयेत् । पादशेषं नयेत् तत्समं रससमं क्षीरं दत्वा पचेत् । घृतप्रस्थं पिचून्मितैः जीवनीयद्रव्यगणैः जीवनीयचूर्णोक्तैः । किंभूतं मयूरं पक्षपित्तअंत्रयकृत्पादं आस्यं मुखं तद्रहितं । स्पष्टमन्यत् ॥ ७५–७८ ॥

**अथ फलघृतं वन्ध्यादोषे—**

**त्रिफला मधुकं कुष्ठं द्वे निशे कटुरोहिणी ॥ ७९ ॥**
**विडङ्गं पिप्पली मुस्तं विशाला कट्फलं वचा ।**
**द्वे मेदे द्वे च काकोल्यौ सारिवे द्वे प्रियङ्गुका ॥८०॥**
**शतपुष्पा हिङ्गु रास्ना चन्दनं रक्तचन्दनम् ।**
**जातीपुष्पं तुगाक्षीरी कमलं शर्करा तथा ॥ ८१ ॥**
**अजमोदा च दन्ती च कल्कैरेतैश्च कार्षिकैः ।**
**जीवद्वत्सैकवर्णाया घृतप्रस्थं च गोः क्षिपेत् ॥ ८२ ॥**
**चतुर्गुणेन पयसा पचेदारण्यगोमयैः ।**
**सुतिथौ पुष्यनक्षत्रे मृद्भाण्डे ताम्रजे तथा ॥ ८३ ॥**
**ततः पिबेच्छुभदिने नारी वा पुरुषोऽथवा ।**
**एतत्सर्पिर्नरः पीत्वा स्त्रीषु नित्यं वृषायते ॥ ८४ ॥**
**पुत्रानुत्पादयेद्धीमान्वन्ध्यापि लभते सुतम् ।**
**अनायुषं या जनयेद्या च सूता पुनः स्थिता ॥८५॥**
**पुत्रं प्राप्नोति सा नारी बुद्धिमन्तं शतायुषम् ।**
**एतत्फलघृतं नाम भारद्वाजेन भाषितम् ॥ ८६ ॥**
**अनुक्तं लक्ष्मणामूलं क्षिपेत्तत्र चिकित्सकः ।**

दी०—इदानीं बृहत्फलघृतमाह—त्रिफलेति । विशालेन्द्रवारुणी, द्वे मेदे इति मेदा महामेदा, द्वौ च काकोल्याविति काकोली क्षीरकाकोली, सारिवे द्वे इति सारिवा कृष्णसारिवा 'साव' इति लोके, प्रियङ्गुर्लताविशेषः, रास्ना सुरभी, जाती सुमना तस्याः पुष्पं, कमलमुत्पलं शेषं द्रव्यं सुबोधम् । एतेषां प्रत्येकं कर्षप्रमितानां कल्कमाहुः । जीवद्वत्सा एकवर्णा वा गौस्तस्या घृतमिति जीवद्वत्साग्रहणमिति मङ्गलत्वात् । चतुर्गुणेन पयसेति घृतपरिमाणात् । आरण्यगोमयैरिति मन्दपावकपाचनत्वात्, अनुक्तं लक्ष्मणामूलमिति क्वचित् पठ्यते । लक्ष्मणा श्वेतकण्टकारिका, अन्ये अल्पविटपमाहुः, तथाहि—'पुत्रकाऽकाररक्ताल्पबिन्दुभिर्लाञ्छिता

सदा। लक्ष्मणा पुत्रजननी बस्तगन्धाकृतिर्भवेत्। शरत्काले भवति सा फलपुष्पाऽन्विता सदा। गृह्णीयात् पुष्यमूलार्के हस्तार्के चाभिमंत्र्य च' इत्यादि ॥ ७९–८६ ॥

**गू०**—मधुकं यष्टी, विशाला इन्द्रवारुणी, जातीपुष्पं मालतीपुष्पं, तुगाक्षीरी वंशरोचनं, शर्करा सितोपला, दंती जयपालमूलं, पयसा दुग्धेन । स्पष्टमन्यत् ॥ ७९–८६ ॥

**अथ लघुफलघृतं योनिरोगे—**

**त्रिफलां द्वे सहचरे गुडूचीं सपुनर्नवाम् ।**
**शुकनासां हरिद्रे द्वे रास्नां मेदां शतावरीम् ॥८७॥**
**कल्कीकृत्य घृतप्रस्थं पचेत्क्षीरे चतुर्गुणे ।**
**तत्सिद्धं पाययेन्नारीं योनिशूलनिपीडिताम् ॥ ८८ ॥**
**पीडिता चलिता या च निःसृता विवृता च या ।**
**पित्तयोनिश्च विभ्रान्ता षण्ढयोनिश्च या स्मृता ॥८९॥**
**प्रपद्यन्ते हि ताः स्थानं गर्भं गृह्णन्ति चासकृत् ।**
**एतत्फलघृतं नाम योनिदोषहरं परम् ॥ ९० ॥**

**दी०**—अथ लघुफलघृतमाह–त्रिफलमिति । सहचरे द्वे पीतरक्तभेदेन (शुक[1]नासा स्योनाकः, रास्ना सुरभिः) शेषं द्रव्यं सुगमम् । एतत् सकलं घृतचतुर्थांशं ग्राह्यं, कल्कं कृत्वा क्षीरचतुर्गुणेन सह घृतं साध्यम्, अत्र कल्कार्थं चतुर्गुणं पानीयं देयम् । चतुर्गुणात् स्नेहपरिमाणात् । एतद् घृतं योनिदोषेषु प्रायशः प्रचरति पलिताचलितेत्यादयो योनिगदविशेषाः कथिताः । ते तु तत्रैव बोद्धव्याः ॥ ८७–९० ॥

**गू०**—शुकनासा, हरिद्रे द्वे हरिद्रा दारुहरिद्रा, मेदा अष्टवर्गोक्ता तदभावे । (दध्यं ?) देयं, कल्कद्रव्याणि घृतात् चतुर्थांशघृतात्क्षीरं चतुर्गुणं पीडिताया योनिर्योनिव्यापत्सूक्ता ॥ ८७–९० ॥

**अथ पञ्चतिक्तकं घृतं विषमज्वरादौ—**

**वृषनिम्बामृताव्याघ्रीपटोलानां शृतेन च ॥ ९१ ॥**
**कल्केन पक्वं सर्पिस्तु निहन्याद्विषमज्वरान् ।**
**पाण्डुं कुष्ठं विसर्पं च कृमीनर्शांसि नाशयेत् ॥९२॥**

**दी०**—अथ पञ्चतिक्तकघृतमाह–वृषेति । आटरूषकः, निम्बः प्रसिद्धः, अमृता गुडूची, व्याघ्री कण्टकारिका, पटोलः प्रसिद्धः, एतेषां शृतेन क्वाथेन क्वाथार्थं द्रव्यं स्नेहद्विगुणम् । पानीयमत्र चतुर्गुणं क्वाथश्चतुर्थावशेषो ग्राह्यः । कल्केनेति वृषादीनामपि कल्केन पाकमाहुः। कल्कार्थं घृतं चतुर्थांशं द्रव्यकदम्बमाहुः—पानीयमप्यत्र चतुर्गुणं शोभनपाकार्थम् । अस्य पानाभ्यङ्गमाहुः । इति घृतं समाप्तम् ॥ ९१ ॥ ९२ ॥

**गू०**—वृष आटरूषकः एषां पञ्चानां शृतेन क्वाथेन कल्केन च, पक्वकल्कं घृतं पञ्चतिक्तकं भवति ॥ ९१ ॥ ९२ ॥

इति श्रीकाशिरामभिश्रकृतायां गूढार्थदीपिकायां
चिकित्सास्थाने घृताधिकारः ॥

---

इदानीं तैलकल्पनायां प्रथमतो **लाक्षादितैल**माह—

**लाक्षाढकं क्वाथयित्वा जलस्य चतुराढकैः ।**
**चतुर्थांशं शृतं नीत्वा तैलप्रस्थे विनिक्षिपेत् ॥ ९३ ॥**
**मस्त्वाढकं च गोदध्नस्तत्रैव विनियोजयेत् ।**
**शतपुष्पामश्वगन्धां हरिद्रां देवदारु च ॥ ९४ ॥**
**कटुकीं रेणुकां मूर्वां कुष्ठं च मधुयष्टिकाम् ।**
**चन्दनं मुस्तकं रास्नां पृथक्कर्षप्रमाणतः ॥ ९५ ॥**
**चूर्णयेत्तत्र निक्षिप्य साधयेन्मृदुवह्निना ।**
**अस्याभ्यङ्गात्प्रशाम्यन्ति सर्वेऽपि विषमज्वराः॥९६॥**
**कासश्वासप्रतिश्यायत्रिकपृष्ठग्रहास्तथा ।**
**वातं पित्तमपस्मारमुन्मादं यक्षराक्षसान् ॥ ९७ ॥**
**कण्डूं शूलं च दौर्गन्ध्यं गात्राणां स्फुरणं जयेत् ।**
**पुष्टगर्भा भवेदस्य गर्भिण्यभ्यङ्गतो भृशम् ॥ ९८ ॥**

**दी०**—लाक्षाढकमिति । अत्र लाक्षारसं तैलाच्चतुर्गुणं ज्ञेयं लाक्षाया आढकमपि निर्यासत्वाद्बहुतरं मस्त्वाढकमपि तैलाच्चतुर्गुणं ज्ञेयमित्यर्थः । गोदध्न इति गोदधिसंभवं मस्तु नतु दध्याढकमपि तैले पचनीयं यतस्तन्त्रान्तरेऽपि 'लाक्षारसं समादाय तैलप्रस्थाच्चतुर्गुणम् । मस्तुनश्चाढकं दद्याद्द्रव्यैरेभिश्च कार्षिकैः' इत्यादि । दधिग्रहणमत्र दधिसंभवमस्तुप्राप्तिनिमित्तं कृतं, यतः मस्तु सप्तविधं भवति 'स्याद्धम्लमत्यम्लकमन्दजातं तथा मृतक्षीरभवं सरश्च । असारमेवंविधसप्तमस्तुवर्गे स्मृतं मस्तुगुणास्तथैव' इति । द्रव्याण्यत्र प्रसिद्धानि, केचित्तु 'कुष्ठं च मधुयष्टिकाम्' इत्यस्याग्रे 'मञ्जिष्ठापद्मकोशीर-

---

१–नास्ति 'ख' पुस्तके ।

मांसीलोहितचन्दनं' इति पठन्ति व्याख्यानयन्ति च । कल्कात्तैलं चतुर्गुणं इति परिभाषया यद्द्रव्यग्रहणं तदनुक्तकल्कपरिमाणार्थं मनोहरम्, चूर्णयेदित्यत्र चूर्णोपलक्षितत्वात् प्रथमं चूर्णीभूतं कृत्वा पश्चाद्दृषदि पेषितं कुर्यादिति भावः । त्रिकपृष्ठग्रहा इति तृतीयकज्वरभेदः कथितः, यतः 'कफपित्तात् त्रिकग्राही पृष्ठाद्वातकफात्मकः' इति वचनात् । यद्यपि पूर्वं विषमज्वरग्रहणेनैव तृतीयकज्वरप्राप्तिस्तथापि विशेषेण तृतीयकज्वरनाशनेऽस्य प्रभाव इत्यदोषः । अस्य तैलस्याभ्यङ्गात् गर्भिणी स्त्री पुष्टगर्भा भवेत् इति पानाद्वास्येति केचित् ॥ ९३–९८ ॥

**गू०—अथ तैलानि ।** लाक्षाढकं चतुराढके जले क्राथयित्वा चतुर्थांशं शृतं क्राथं नीत्वा तैलप्रस्थे विनिक्षिपेत् आढकं गोदध्नः मस्तु दधिजलं तत्रैव निक्षिपेत्, शतपुष्पादीनि पृथक् कर्षप्रमाणतः कल्कं कृत्वा तत्र निक्षिप्य मृदुवह्निना तैलं साधयेत्, तैलं तिलतैलं, शतपुष्पा प्रसिद्धा, हरिद्रा शुद्धा ग्राह्या, टङ्कणादिभिः यद्वारि निक्षिप्यते तैलं पीतं स्यात् । चन्दनं तैले अनुक्तान्यपि सुगन्धद्रव्याणि देयानि, सौरभार्थं यथा–कर्पूरश्वेतचन्दनकेशरलवङ्गजातिपत्रीजातिफलं सिह्लकमञ्जिष्ठानलिका–कुष्ठ–पतंगभर्जितनखानि कर्षमात्राणि सौगन्धीनि प्रयोजयेत्; अनुक्तान्यपि लाक्षादौ सौरभार्थं महीभृतं । ननु ग्रन्थान्तरे तैलात्समो लाक्षारसः अत्र चतुर्गुणः, तथाच–'मूर्वावृंदारुकरकामधुकाश्वगन्धारास्नाहरेणुमिसिचन्दनरुग्निशाभिः । लाक्षारसेन च समेन समस्तसिद्धं तैलं ज्वरापहरमेतदतिप्रसिद्धम्' इति तत्कथं ? उच्यते—**अश्विनीकुमारमते** तैलाच्चतुर्गुणं लाक्षारसः इति अतो न दोषः, तथाच 'लाक्षारसाढके प्रस्थं तैलस्य विपचेद्भिषक् । मस्त्वाढकसमायुक्तं पिष्ट्वा चात्र समाचरेत्' इत्यादि । अत्र लाक्षाक्राथे स्वार्जिकापलं लोध्रं पलं चूर्णितं अधिकरक्तवर्णार्थं क्षिपेत् अस्याभ्यंगात् ज्वरादयः संयान्ति ॥ ९३–९८ ॥

## ( अङ्गारतैलम्[1] )—

**मूर्वा लाक्षा हरिद्रे द्वे मञ्जिष्ठा सेन्द्रवारुणी ।**
**बृहती सैन्धवं कुष्ठं रास्ना मांसी शतावरी ॥९९ ॥**
**आरनालाढके तत्र तैलप्रस्थं विपाचयेत् ।**
**तैलमङ्गारकं नाम सर्वज्वरविमोक्षणम् ॥ १०० ॥**

[1]–प्रक्षिप्तम् ।

## अथ वातरोगादौ नारायणतैलम्—

**अश्वगन्धां बलां बिल्वं पाटलां बृहतीद्वयम् ।**
**अदंष्ट्रातिबला निम्बं स्योनाकं च पुनर्नवा ॥ १०१ ॥**
**प्रसारिणीमग्निमन्थं कुर्याद्दशपलं भिषक् ।**
**चतुर्द्रोणे जले पक्त्वा पादशेषं शृतं नयेत् ॥१०२॥**
**तैलाढकेन संयोज्य शतावर्या रसाढकम् ।**
**क्षिपेत्तत्र च गोक्षीरं तैलात्तस्माच्चतुर्गुणम् ॥१०३॥**
**शनैर्विपाचयेदेभिः कल्कैर्द्विपलिकैः पृथक् ।**
**कुष्ठैलाचन्दनबलामांसीशैलेयसैन्धवैः ॥ १०४ ॥**
**अश्वगन्धावचारास्नाशतपुष्पेन्द्रदारुभिः ।**
**पर्णीचतुष्टयेनैव तगरेण च साधयेत् ॥ १०५ ॥**
**तत्तैलं नावनेऽभ्यङ्गे पाने बस्तौ च योजयेत् ।**
**पक्षाघातं हनुस्तम्भं मन्यास्तम्भं गलग्रहम् ॥१०६॥**
**खल्लत्वं बधिरत्वं च गतिभङ्गं कटिग्रहम् ।**
**गात्रशोषेन्द्रियध्वंसावसृक्शुक्रज्वरक्षयान् ॥१०७॥**
**अन्त्रवृद्धिं कुरण्डं च दन्तरोगं शिरोग्रहम् ।**
**पार्श्वशूलं च पाङ्गुल्यं बुद्धिहानिं च गृध्रसीम् ॥१०९॥**
**अन्यांश्च विषमान्वाताञ्जयेत्सर्वाङ्गसंश्रयान् ।**
**अस्य प्रभावाद्वन्ध्यापि नारी पुत्रं प्रसूयते ॥ १०९ ॥**
**मर्त्यो गजो वा तुरगस्तैलादस्मात्सुखी भवेत् ।**
**यथा नारायणो देवो दुष्टदैत्यविनाशनः ॥ ११० ॥**
**तथैव वातरोगाणां नाशनं तैलमुत्तमम् ।**

दी०—अथ नारायणतैलव्याख्यानमाह—अश्वगन्धामिति । अत्राश्वगन्धादीनि प्रसिद्धानि, एतेषां मूलं ग्राह्यम् । केचित्तु "श्वदंष्ट्रातिबलाभद्रम्" इति पठन्ति । तत्र भद्रः पारिभद्रो रक्तकुसुमः कण्टको वृक्षविशेषः स्वनाम्ना प्रसिद्धः, फलहदामूलमित्यन्ये तदभावे देवदारु ग्राह्यम् । दशपलमिति प्रत्येकम् । पादशेषमिति द्रोणमेकं, शतावरी प्रसिद्धा, तस्याः सद्योरसो यन्त्रपीडनादिना ग्राह्यः तदभावे क्वथितरसो वा । तत्र गोक्षीरं क्षिपेदिति । तत्र तैले चकारादाजं वा ग्राह्यम्, ग्रन्थान्तरदर्शनाच्च । तथाहि—"आजं वा यदि गव्यं च" इत्यादि । कुत्रचिद्गव्याजपयसोर्यद्यपि गुणसाम्यं तथापि छागीक्षीरेण पक्वमनभिष्यन्दि त्रिदोषहरं च भवति । कल्कैरिति कल्कार्हद्रव्यैः पृथग् द्विपलिकैरित्यर्थः । तद्यथा कुष्ठैलेत्यादि । अत्र चन्दनं श्वेतं शैलेयं शिलापुष्पं बला अतिबला इन्द्रदारु देवदारु पर्णीचतुष्टयेनेति तेन शालिपर्णी, पृष्टिपर्णी, माषपर्णी, मुद्गपर्णी चेति पर्णीचतुष्टयं कथितम्, तगरं तगरपादिका तदभावे ग्रन्थिपर्णमिति सर्वत्र । एतत्सिद्धं तैलं नावनादिषु

योज्यम्, खञ्जत्वं मन्दवचनम्, इन्द्रियध्वंस इतीन्द्रियविषयनाशः। गजतुरगावपि वातविकारपीडितौ। केचित्तु सुगन्धार्थमवतरणसमये सुगन्धद्रव्याण्यनुक्तान्यपि प्रक्षिपन्ति। तद्यथा—'समङ्गानखकङ्कोलनलिकाजातिकोषकम्। त्वक् कुन्दुरुष्ककर्पूरतुरुष्कश्रीनिवासकं॥ स्पृक्काकुङ्कुमकस्तूरी दद्यादत्रावतारिते' इति। एवमन्यत्रापि बोद्धव्यम्। अस्य ग्रन्थान्तरे पत्रकल्कसंज्ञा यतः 'गन्धनिर्यासपुष्पाणां सिद्धे शीतेऽवतारिते। प्रक्षेपो गन्धवृद्ध्यर्थं पत्रकल्कं तु तद्विदुः' इति। नारायणसंज्ञा विष्णुकृतत्वात् शतावरी साधनाद्वा ज्ञेया। यतः नारायणीति शतावर्याः पर्यायोऽस्ति। यद्वाऽत्रैवोक्तत्वात् 'यथा नारायणो देवो दुष्टदैत्यविनाशनः। तथेदं वातरोगाणां नाशनं तैलमुत्तमम्' इति। अतएव नारायणसंज्ञा। शतावरीसाधनात् शतावरी नारायणतैलसंज्ञा इति प्रसिद्धिः॥ ॥ १०१–११०॥

गू०—अथ नारायणं तैलं वातव्याधौ—अश्वगन्धा हयगन्धा, बला प्रसिद्धा, बिल्वं बिल्वमूलं, पाटला, बृहतीद्वयं लघुबृहत्कण्टकारी, श्वदंष्ट्रा गोक्षुरः, अतिबला गाङ्गेरुकी, निम्बत्वक्, स्योनाकः अरलुः, पुनर्नवा, प्रसारिणी पूर्वदेशे प्रसिद्धा, अग्निमन्थः अरणिः, बलादिकं दशपलं चतुर्द्रोणे जले पक्त्वा पादशेषं शृतं क्वाथं नयेत्, तैलाढकेन संयोज्य पचेत् शतावर्या रसं च आढकं पचेत् तैलात् चतुर्गुणं गोक्षीरं पचेत् आदौ तैलं अतीव तप्तं कृत्वा पञ्चपलं दत्वा संशोध्य दुग्धे पचेत् ततः शतावरीरसे पचेत् ततः क्वाथे पचेत् ततः कल्कद्रव्ये पचेत् कल्कद्रव्याणि कुष्ठादीनि एला चन्दनं बालकं उदीच्यं, मांसी जटामांसी, शैलेयः सैन्धवं, इन्द्रदारु देवदारु, पर्णीचतुष्टयेन शालिपर्णी माषपर्णी मुद्गपर्णी पृष्ठिपर्णीति। एभिः कल्कद्रव्यैर्जलपिष्टैः पचेत्। सगन्धा आदिका चन्दनमलयागरू आदीनि पश्चाद्दीयन्तेऽनुक्तान्यपि॥ १०१–११०॥

## (वारुणीतैलं कम्परोगे)

**वारुण्या औत्तरं मूलं कुट्टितं तु पलत्रयम्।**
**पलद्वादशकं तैलं क्षणं वह्नौ विपाचितम्॥ १११॥**
**निष्कत्रयं भक्तयुक्तं सेवेतास्माद्विनश्यति।**
**हस्तकम्पः शिरःकम्पः कम्पो मन्याशिरोभवः॥ ११२॥**

## अथ बलाद्यं तैलं वातव्याधौ—

**बलामूलकषायेण दशमूलशृतेन च॥ ११३॥**
**कुलत्थयवकोलानां क्वाथेन पयसा तथा।**
**अष्टाष्टभागयुक्तेन भागमेकं च तैलतः॥ ११४॥**
**गणेन जीवनीयेन शतावर्येन्द्रदारुणा।**
**मञ्जिष्ठाकुष्ठशैलेयतगरागरुसैन्धवैः॥ ११५॥**
**वचापुनर्नवामांसीसारिवाद्वयपत्रकैः।**
**शतपुष्पाश्वगन्धाभ्यामेलया च विपाचयेत्॥ ११६॥**
**गर्भार्थिनीनां नारीणां नराणां क्षीणरेतसाम्।**
**व्यायामक्षीणगात्राणां सूतिकानां च युज्यते॥ ११७॥**
**राजयोग्यमिदं तैलं सुखिनां च विशेषतः।**
**बलातैलमिति ख्यातं सर्ववातामयापहम्॥ ११८॥**

दी०—इदानीं बलातैलमाह—बलामूलेति। बलामूलकषायेणेति कषायोऽत्र क्वाथरूपः कल्कस्वरूपो वेति केचित्। दशमूलं प्रसिद्धम्। तच्छृतेन क्वाथेनेत्यर्थः। कुलत्थयवकोलानां मिलित्वा क्वाथ्यः। पयोऽत्र गव्यमाजं वा। अष्टाष्टभागयुक्तेनेति तेन बलक्वाथस्याष्टौ भागाः। तैलभागापेक्षया दशमूलक्वाथस्याप्यष्टौ संमिलितयवादीनां क्वाथस्याप्यष्टौ पयसश्चाष्टौ भागाः तैलस्यैको भागः। जीवनीयगणो मधुरवर्गः, तद्यथा—'जीवंती सूर्यपर्णीयुक् काकोल्यौ जीवकर्षभौ। मेदे यष्टीति मधुरो जीवनीयगणो मतः' इति। शेषं सुबोधम्, तन्त्रान्तरेऽस्य दशपाकबलातैलमिति संज्ञा तत्रैव यथोक्तमानेन दशवारं यावत् पक्तव्यम्। वीर्योत्कर्षार्थं बहुपाकेन स्नेहक्षयोऽप्यत्र नास्ति क्षीरगतस्नेहपूरणात्। एतदभिप्रायेणैव केचिदित्यत्र मन्यन्ते तद्यथा—बलामूलकषायेणैकः पाकः, दशमूलशृतेन द्वितीयः, कुलत्थादीनां पृथक् त्रयः पाकाः, तत्र कुलत्थादीनां पृथक् तैलादष्टगुणो ज्ञेयः, पयसा षष्ठः पाकः, जीवनीयशृतेन सप्तमः, शतावरीरसेनाष्टमः, देवदारुशृतेन केवलेन नवमः, देवदारुपरिमाणं क्वाथवत्। यतः जीवनीयगणशतावरीदेवदारूणां त्रयः पाकास्तृतीयान्तपदत्वेन व्याख्याताः, वक्ष्यमाणं मञ्जिष्ठादिकल्केन दशम इति। तस्माद्दशपाकबला इति संज्ञामस्य वदन्ति केचित्। अस्मत्संप्रदाये पूर्वपक्षः प्रचरति। केचित्तु सकलोचितद्रव्यैर्दशवारं यावत् पाकस्य पुनरावृत्तिर्भवतीति मन्यन्ते तदव्यवहारादसङ्गतम्॥ ११३–११८॥

---

१–समङ्गा मञ्जिष्ठा। नलिका सुगन्धतृणविशेषः, कुन्दुरुष्कः–धूपः निर्यासविशेषः, तुरुष्कः सिह्लकनिर्यासविशेषः, स्पृक्का–मालती। २–प्रक्षिप्तम्। वारुणी–इन्द्रवारुणी।

गू०—बला प्रसिद्धा, तन्मूलकषायेण तथा दश-मूलश्वतेन तथा कुलत्थादीनां त्रयाणां क्वाथेन;—कोलं बदरं, पयसा दुग्धेन, बलादीनामष्टौ भागाः, तैलस्यैकः एवं पचेत्। पश्चात् जीवनीयादिभिः कल्कीकृतैः पाचयेत्। जीवनीयो गणः चूर्णोक्तः, शैलेयः प्रसिद्धः। स्पष्टमन्यत् ॥ ११३–११८ ॥

**वातकफामयादौ प्रसारिणीतैलमाह—**

**प्रसारिणीपलशतं जलद्रोणेन पाचयेत् ।**
**पादशिष्टः श्रतो ग्राह्यस्तैलं दधि च तत्समम्॥११९॥**
**काञ्जिकं च समं तैलात्क्षीरं तैलाच्चतुर्गुणम् ।**
**तैलात्तथाष्टमांशेन सर्वकल्कानि योजयेत् ॥ १२० ॥**
**मधुकं पिप्पलीमूलं चित्रकः सैन्धवं वचा ।**
**प्रसारिणी देवदारु रास्ना च गजपिप्पली ॥१२१॥**
**भल्लातः शतपुष्पा च मांसीचैभिर्विपाचयेत् ।**
**एतत्तैलवरं पक्वं वातश्लेष्मामयाञ्जयेत् ॥ १२२ ॥**
**कौब्जं पङ्गुत्वखञ्जत्वे गृध्रसीमर्दितं तथा ।**
**हनुपृष्ठशिरोग्रीवाकटीस्तम्भं च नाशयेत् ॥ १२३ ॥**
**अन्यांश्च विषमान्वातान्सर्वानाशु व्यपोहति ।**

दी०—प्रसारिणीति। प्रसारिणी प्रसिद्धा तन्मूलं कुट्टयित्वा पलशतं संगृह्य द्रोणपरिमितेन जलेन संक्वाथ्य पादावशेषो ग्राह्यः, तेन समं तैलं तिलसंभवं ग्राह्यम्, द्रोणस्तु चतुराढक इति । आढकश्चतुःषष्टिपलमित्यर्थः। दधि च तैलसमं काञ्जिकमपि तैलसमं क्षीरं चतुर्गुणं तैलपरिमाणात्। तैलस्याष्टमांशेन कृत्वा वक्ष्यमाणद्रव्याणां भागः। तत्र मधुकं यष्टीमधु, भल्लातो भल्लातकफलं, मांसी जटाख्या । एतच्च तन्त्रान्तरेषु कुब्जप्रसारिणीतैलमिति संज्ञितं कौब्जेऽस्यार्थं विहितत्वात्। हनुपृष्ठशिरोग्रीवाकटीस्तम्भमिति तेन स्तम्भशब्दो हन्वादिभिः प्रत्येकमभिसम्बध्यते॥११९–१२३॥

गू०—अथ प्रसारिणीतैलं। प्रसारिणी गन्धमादालिपूर्वदेशे, पलशते द्रोणजले पाचयेत्, पादशेषं आढकं गृह्यते, तैलं तत्समम्। आढकमिति। दधि तैलसमं काञ्जिकं च तैलात्समं तैलादष्टमांशेन कल्कानि कल्कद्रव्याणि तानि मधुकादीनि मधुकं यष्टीमधु स्पष्टमन्यत् ॥ ११९–१२३ ॥

**अथ माषादितैलं वातविकारादौ—**

**माषो यवातसी क्षुद्रा मर्कटी च कुरण्टकः ॥१२४॥**
**गोकण्टष्टुण्टुकश्चैषां कुर्यात्सप्तपलं पृथक् ।**
**चतुर्गुणाम्बुना पक्त्वा पादशेषं शृतं नयेत् ॥१२५॥**
**कार्पासास्थीनि बदरं शणबीजं कुलत्थकम् ।**
**पृथक्चतुर्दशपलं चतुर्गुणजले पचेत् ॥ १२६ ॥**
**चतुर्थांशावशिष्टं च गृह्णीयात्क्वाथमुत्तमम् ।**
**प्रस्थैकं छागमांसस्य चतुःषष्टिपले जले ॥ १२७ ॥**
**निक्षिप्य पाचयेद्धीमान्पादशेषं शृतं नयेत् ।**
**तैलप्रस्थे ततः सर्वान्क्वाथानेतान्विनिक्षिपेत् ॥१२८॥**
**कल्कैरेभिश्च विपचेदमृताकुष्ठनागरैः ।**
**रास्नापुनर्नवैरण्डैः पिप्पल्या शतपुष्पया ॥ १२९ ॥**
**बलाप्रसारिणीभ्यां च मांस्या कटुकया तथा ।**
**पृथगर्धपलैरेतैः साधयेन्मृदुवह्निना ॥ १३० ॥**
**हन्यात्तैलमिदं शीघ्रं ग्रीवास्तम्भापबाहुकौ ।**
**अर्धाङ्गशोषमाक्षेपमूरुस्तम्भापतानकौ ॥ १३१ ॥**
**शाखाकम्पं शिरःकम्पं विश्वाचीमर्दितं तथा ।**
**माषादिकमिदं तैलं सर्ववातविकारनुत् ॥ १३२ ॥**

दी०—सम्प्रति माषादितैलमाह—माष इति । माषादिटुण्टुकान्तं द्रव्यं पृथक्सप्तपलमितं मिलित्वा षट्पञ्चाशत्पलानि भवन्ति। तत्र अतसी उमाबीजं, क्षुद्रा कण्टकारिका, मर्कटी कपिकच्छुः, कुरण्टकः सहचरः, गोकण्टः गोक्षुरकः, टुण्टुकः स्योनाकः, कार्पासास्थिप्रभृति कुलत्थान्तं पृथक्चतुर्दशपलं, तेन मिलित्वा षट्पञ्चाशत्पलानि भवन्ति । अत्र बदरं बदरीफलानि। छागमांसस्येहाप्युक्तपरिमाणस्य क्वाथः तैलस्य प्रस्थं। क्वाथानेतानिति पूर्वोक्तान् एभिस्त्रिभिर्द्रवैर्मिलित्वा चातुर्गुण्यं द्रवत्वात् तैलभागादित्यर्थः। कल्कार्थद्रव्याण्यपि पृथगर्धपलमितानि भवन्ति । तत्रामृता गुडूची, नागरं शुण्ठी, एरण्डः एरण्डमूलं, शतपुष्पा मिसी, मांसी जटाख्या, कटुका रोहिणी । एतत् तैलं प्रायेण नस्यार्थमाहुः । 'सर्ववातविकारनुत्' इत्यनेन वातनाशनायात्र प्रचुरतरमस्य माहात्म्यं दर्शितम् ॥ १२४–१३२ ॥

गू०—माषोऽन्नविशेषः,यवः,अतसी,क्षुद्रा कण्टकारी, मर्कटी कपिकच्छुः,कुरण्टकः पीतवासा, गोकण्टकः गोक्षुरः,टुण्टुकः स्योनाकः एषां पृथक् सप्तपलं चतुर्गुणाम्बुना पक्त्वा पादशेषं शृतं क्वाथं नयेत्। कार्पासकास्थि, बदरी बदरं, शणबीजं, कुलत्थं, पृथक्चतुर्दशपलं बदरादिकं चतुर्गुणे जले पचेत्। चतुर्थांशावशिष्टं उत्तमं

क्काथं गृह्णीयात्, छागमांसस्य प्रत्येकं चतुःषष्टिपलैर्विनिक्षिप्य पाचयेत्। पादशेषे रसं नयेत्. तैलप्रस्थे एतान् क्वाथान्निक्षिप्य पचेत्। पुनः अमृताद्यैः कल्कैः पचेत् पृथगर्धपलैरमृताद्यैः, अमृता गुडूची, रास्ना, प्रसारिणी गन्धभादालि, मांसी जटामांसी, कटुकी स्पष्टमन्यत् ॥ १२४–१३२ ॥

### अथ शतावरीतैलं वातादौ—

**शतावरी बलायुग्मं पर्ण्यौ गन्धर्वहस्तकः।**
**अश्वगन्धा श्वदंष्ट्रश्च बिल्वः काशः कुरण्टकः ॥१३३॥**
**एतान् सार्धपलान्भागान्कल्कयेच्च विपाचयेत्।**
**चतुर्गुणेन नीरेण पादशेषं शृतं नयेत् ॥ १३४ ॥**
**नियोज्य तैलप्रस्थे च क्षीरप्रस्थं विनिक्षिपेत्।**
**शतावरीरसप्रस्थं जलप्रस्थं च योजयेत् ॥ १३५ ॥**
**शतावरीदेवदारुमांसीतगरचन्दनम्।**
**शतपुष्पा बला कुष्ठमेला शैलेयमुत्पलम् ॥ १३६ ॥**
**ऋद्धिर्मेदा च मधुकं काकोली जीवकस्तथा।**
**एषां कर्षसमैः कल्कैस्तैलं गोमयवह्निना ॥ १३७ ॥**
**पचेत्तन्मूर्धतैलेन नरः स्त्रीषु वृषायते।**
**नारी च लभते पुत्रं योनिशूलं च नश्यति ॥१३८॥**
**अङ्गशूलं शिरःशूलं कामलां पाण्डुतां गरम्।**
**गृध्रसीप्लीहशोषांश्च मेहान्दण्डापतानकम् ॥१३९॥**
**सदाहं वातरक्तं च वातपित्तगदार्दितम्।**
**असृग्दरं तथाध्मानं रक्तपित्तं च नश्यति ॥ १४० ॥**
**शतावरीतैलमिदं कृष्णात्रेयेण भाषितम्।**
**ॐ नारायण्यै स्वाहा ॥**
**उत्तराभिमुखो भूत्वा खनेत्खदिरशङ्कुना ॥ १४१ ॥**
**ॐ सर्वव्याधिनाशिन्यै स्वाहा।**
**इत्युत्पाटनमन्त्रः।**
**ॐ कुमारीजीवन्यै स्वाहा। इति पानमन्त्रः।**

---

**दी०**—अथ शतावरीतैलमप्याह—शतावरीति। शतावरी दिव्यौषधिः बलायुग्ममिति बला अतिबला नागबला, पर्ण्यौ द्वे ते शालिपर्णी पृष्टिपर्णी चेति, गन्धर्वहस्तकः एरण्डः, श्वदंष्ट्रो गोक्षुरकः, बिल्व इत्यत्र बिल्वमूलं, काशः प्रसिद्धः तस्य मूलं, कुरण्टकः सहचरः, अस्यापि मूलमेव। एतान् सार्धपलान् भागानिति। एतान् पूर्वोक्तान् भागानिति, पृथग्भूतान् सार्धपलानिति, अर्धपलेन सह पलं तेन षट्कर्षमितं प्रत्येकमाहुः। मिलित्वा प्रस्थमेकम्। जलप्रस्थं च योजयेदिति। जलं पानीयं तच्चात्र कल्कपाकार्थमभिहितम्। तत् कल्कद्रव्यमाह शतावरीत्यादि। तत्र मांसी गन्धाख्या, तगरं प्रसिद्धं, चन्दनं श्वेतं, शैलेयं शिलापुष्पं, उत्पलं कमलं, तदभावे पद्मबीजं। ऋद्ध्यादि जीवकान्तद्रव्यस्यालाभात् तत्साम्यगुणद्रव्यं प्रयोज्यमिति सर्वत्र। गोमयवह्निनेति ग्रहणं मृद्वग्निसाधनार्थं। मूर्धतैलेनेति श्रेष्ठतैलेन तथा मूर्ध्नि पूरितेन तैलेनेत्यर्थः। नरः पुरुषः अस्य पानादभ्यङ्गतो वा स्त्रीषु वृषायते हर्षं प्राप्नोतीत्यर्थः। **कृष्णात्रेयेणेति** कृष्णात्रेयः पुनर्वसुरिति तेन कथितमित्यर्थः। अत्र क्वाथस्वरसकल्कार्थं यत् शतावरीमूलं प्रोक्तं तदनेनैव मन्त्रेणोत्पाट्यम्, कुतः ? वन्ध्यापत्यादिकरणार्थं; तद्यथा—वक्ष्यमाणेनोङ्कारपूर्वकाष्टाक्षरमन्त्रेण कृत्वोत्तराभिमुखो भूत्वा खदिरशङ्कुना खदिरकाष्ठकीलकेन खनेत्। पश्चात् ॐकारसहितेनैकादशाक्षरमन्त्रेणोत्पाटनं कुर्यात्। मन्त्रस्त्वस्याग्रे कथितः। अथ पानमन्त्रमाह ॐकारयुतेन दशाक्षरेण मन्त्रेण स्नेहपानमिति। एते मन्त्राः मूले प्रसिद्धाः ते तत एव ज्ञातव्याः शतावरी दिव्यौषधिरित्यनेन याः सर्वाः शतावरीसदृशा ओषध्यस्ताः सर्वा एवमेव ग्राह्या इत्यर्थः ॥ १३३–१४१ ॥

**गू०**—बलायुग्मं गांगेरुकी, पर्ण्यौ शालिपर्णी पृष्ठिपर्णी, गन्धर्वहस्तकः एरण्डः, श्वदंष्ट्रः गोक्षुरः, काशः, कुरण्टकः, पीतवासा एषामर्धपलान् पृथगेव। शैलेयः प्रसिद्धः। स्पष्टमन्यत् ॥ १३३–१४१ ॥

इदानीं अपराणि क्षुद्रतैलान्याह—तत्रादौ **अर्शादौ कासीसाद्यं तैलं** दर्शयन्नाह—

**कासीसं लाङ्गली कुष्ठं शुण्ठी कृष्णा च सैन्धवम्।**
**मनःशिलाश्वमारश्च विडङ्गं चित्रको द्रुमः ॥ १४२ ॥**
**दन्ती कोशातकीबीजं हेमाह्वा हरितालकम्।**
**कल्कैः कर्षमितैरेतैस्तैलप्रस्थं विपाचयेत् ॥ १४३ ॥**
**स्नुह्यर्कपयसी दद्यात्पृथग्द्विपलसंमिते।**
**चतुर्गुणं गवां मूत्रं दत्त्वा सम्यक्प्रसाधयेत् ॥१४४॥**
**कथितं खरनादेन तैलमर्शोविनाशनम्।**
**क्षारवत्पातयत्येतदर्शांस्यभ्यङ्गतो भृशम् ॥ १४५ ॥**
**वलीर्न दूषयत्येतत्क्षारकर्मकरं स्मृतम्।**

---

१–'साधनीये' पा०।

**दी०**—कासीसमिति । कासीसं द्रव्यविशेषः, भस्मवदल्पसृत् तद्भेदः पुष्पकासीसं किंचित्पीतम्, लाङ्गली कलिहारिका, कृष्णपिप्पली, अश्वमारः करवीरकः द्रुमः, कुटजो वृक्षविशेषः, कोशातकी जालिनी तस्या बीजमिति, हेमाह्वा स्वर्णक्षीरी सत्ता तु रक्तक्षीरसेहुण्डभेदविशेषा यस्या मूलं चोक इति प्रसिद्धम् । तैलप्रस्थमिति चतुष्कुडवम् । स्नुह्यर्कपयसी इति स्नुही सेहुण्डः, अर्कः प्रसिद्धः, तयोः पयसा पृथक् द्विपलमितेन साधितमित्यर्थः । गोमूत्रं चतुर्गुणमत्र तैलपरिमाणात् । **खरनादाचार्येण** कथितमिदं दुर्नामनिकृन्तनार्थम्, एतच्च क्षारकर्मकरत्वेन न गुददूषकमित्यर्थः ॥ १४२–१४५ ॥

**गू०**—अथ कासीसाद्यं तैलं अर्शोरोगे । कासीसं, लाङ्गली कलिहारी, मनःशिला, स्नुही अर्कः,–अनयोर्दुग्धं पृथक् द्विपलं कासीसाद्यैः कर्षमितैः एभिस्तैलप्रस्थं पचेत् ॥ १४२–१४५ ॥

## अथ पिण्डतैलं वातरक्ते—

**मञ्जिष्ठासारिवासर्जयष्टीसिक्थैः पलोन्मितैः ॥ १४६ ॥**
**पिण्डाख्यं साधयेत्तैलमभ्यङ्गाद्वातरक्तनुत् ।**

**दी०**—अथ पिण्डतैलमाह–मञ्जिष्ठेति । अत्र सारिवा आस्फोता सा च द्विविधा शुक्ला कृष्णा च या जम्बूवत्पत्रव्रततिः सा शुक्ला या कलहंसवत्पत्रा सुगन्धा सा कृष्णेति, सर्जो धूपनः लोके राल इति प्रसिद्धः । यष्टी मधुयष्टी सिक्थो मधूच्छिष्टः 'मयन' शब्दवाच्यः, एतद्द्रव्यं तैलांशं कल्प्यं अंशश्चतुर्थांशः । ग्रन्थान्तरे पयोन्वितैरिति पाठः तत्र पयः क्षीरं तच्च द्रवत्वाच्चतुर्गुणं तैलपरिमाणात् नैतन्मनोहरम्, यतः पिण्डाख्यत्वेन सकलं द्रव्यं क्षीरेण पिण्डफलसदृशं कल्कीभूतं कृत्वा साधयेदिति संप्रदायो बहूनां दृश्यते अतएव पिण्डाख्यमिति पिण्डीभूतत्वात् पिण्डनामकं तैलं पिण्डतैलमित्यर्थः । पिण्डरूपत्वात् कल्कोऽस्य न घोलनीय इत्याहुः । तैलमत्रैरण्डजमपि गृह्णन्ति अन्यतो दर्शनात् तथाहि—'सारिवा सर्जयष्ट्याह्वा मधूच्छिष्टैः पयोन्वितैः । सिद्धमैरण्डजं तैलं वातरक्तरुजापहम्' इति । पयोऽत्र सामान्यत्वाद्द्रव्यम् ॥ १४६ ॥

**गू०**—मञ्जिष्ठा, सारिवा अनन्ता, सर्जः, मधुकं, सिक्थं एतैः पलोन्मितैः कल्कद्रव्याच्चतुर्गुणं तैलं दत्वा पचेत् ॥ १४६ ॥

## कुष्ठरोगादौ अर्कतैलम्—

**अर्कपत्ररसे पक्वं हरिद्राकल्कसंयुतम् ॥ १४७ ॥**
**नाशयेत्सार्षपं तैलं पामां कच्छूं विचर्चिकाम् ।**

**दी०**—अथार्कतैलमाह—अर्केति । अर्कपत्रस्वरसोऽत्र चतुर्गुणस्तैलपरिमाणादिति व्यवहारः द्रवत्वात् । हरिद्रा चतुर्थांशा तैलमानात् अस्याः कल्कार्थं जलमाहुः । तस्य मानं यावत् कल्कं स्यात् सार्षपग्रहणं व्याधिविहितत्वात् । पामादयो रोगाः कुष्ठरोगे पठिताः ॥ १४७ ॥

## अथ मरिचादितैलं कुष्ठव्रणादौ—

**मरिचं हरितालं च त्रिवृतं रक्तचन्दनम् ॥ १४८ ॥**
**मुस्तं मनःशिला मांसी द्वे निशे देवदारु च ।**
**विशाला करवीरं च कुष्ठमर्कपयस्तथा ॥ १४९ ॥**
**तथैव गोमयरसं कुर्यात्कर्षमितान्पृथक् ।**
**विषं चार्धपलं देयं प्रस्थं च कटुतैलकम् ॥ १५० ॥**
**गोमूत्रं द्विगुणं दद्याज्जलं च द्विगुणं भवेत् ।**
**मरिचाद्यमिदं तैलं सिद्धं कुष्ठव्रणापहम् ॥ १५१ ॥**
**जयेत्कुष्ठानि सर्वाणि पुण्डरीकं विचर्चिकाम् ।**
**पामां श्वित्राणि रक्तं च कण्डूं कच्छूं प्रणाशयेत् ॥ १५२**

**दी०**—मरिचाद्यं तैलमाह–मरिचमिति । अत्र त्रिवृन्निशो द्वे निशेथः हरिद्रे द्वे तेन हरिद्रा दारुहरिद्रा, विशालेन्द्रवारुणी, करवीर अश्वघ्नः, अर्कपयः । गोमयरसश्च किंचिदधिको देयः द्रवद्रव्यत्वात् । प्रस्थमिति चतुर्भिः कुडवैः प्रमितं कुडवो चतुष्पल इति गोमूत्रं द्विगुणमिति । अत्र यद्गोमूत्रं द्विगुणं कथितं तद्द्विगुणितजलग्रहणात्, अन्यच्च चतुर्गुणं गोमूत्रमिति तत्र जलं नास्ति जलमत्र सम्यक् पाकार्थमुक्तं केचिदिति मन्यन्ते । अत्र कल्कालोडनार्थं जलमुक्तं नतु केवलजलपाकार्थं एतदपि संगतं न विरोधः । कुष्ठव्रणापहमिति कुष्ठान्तं व्रणानि तानपहन्तीति । श्वित्रपुण्डरीकादयो भेदाः कुष्ठस्यैवावगन्तव्याः ॥ १४८–१५२ ॥

**गू०**—त्रिवृत् निःसृता, मांसी जटामांसी, द्वे निशे, हरिद्रा दारुहरिद्रा, विशाला इन्द्रवारुणी, करवीरं अश्वमारः, कुष्ठं, अर्कपयः, गोमयः तद्रसं, मरिचादीनि पृथक् कर्षमितानि विषं अर्धपलं कटुतैलं प्रस्थं गोमूत्रं द्विगुणं तैलानि देयं पाचनं सिद्धं भवति पामा दद्रुविशेषः, कच्छूः वृषणसन्धिगतमलजो रोगः ॥ १४८–१५२ ॥

### अरूंषिकायां त्रिफलादितैलम्—

**त्रिफलारिष्टभूनिम्बं द्वे निशे रक्तचन्दनम्।**
**एतैः सिद्धमरूंषीणां तैलमभ्यञ्जने हितम् ॥१५३॥**

दी०—अथ त्रिफलाद्यं तैलमाह—त्रिफलारिष्टेति। अत्र त्रिफला हरीतकीप्रभृतिकम्, अरिष्टो निम्बः, भूनिम्बः किराततिक्तः, द्वे निशे हरिद्रे द्वे। एतैरिति द्रव्यैः कल्कं कृत्वा तैलं साध्यम्; तत्र तैलाच्चतुर्गुणं जलं देयं सम्यक् पाकार्थं द्रवानुक्तत्वात् तैलांशं कल्कद्रव्यमिति एतदपि तैलं कुष्ठोक्तं सवर्णकरमाहुः ॥ १५३ ॥

गू०—अरिष्टो निम्बः, भूनिम्बः किराततिक्तः, द्वे निशे हरिद्राद्वयं एतैः कल्कैस्तैलं पाचितं, अरूंषिकायां 'कफासृक्कृमिकोपेन नृणां विद्यादरूंषिकां' इति ॥ १५३ ॥

### अथ निम्बबीजतैलं पलिते—

**भावयेन्निम्बबीजानि भृङ्गराजरसेन हि।**
**तथासनस्य तोयेन तत्तैलं हन्ति नस्यतः ॥ १५४ ॥**
**अकालपलितं सद्यः पुंसां दुग्धान्नभोजिनाम्।**

दी०—इदानीं केशरञ्जनार्थं निम्बबीजतैलमाह—भावयेदिति। एतेन निम्बबीजानि निस्तुषाणि गृहीत्वा भृङ्गराजरसेन असकृद्भाव्य तदनु बीजसारक्वाथेनापि बहुशो भावयित्वा पुनस्तानि संशोष्य यन्त्रे संपीड्य तैलं ग्राह्यम्। अस्य नावनमकालपलितघ्नं भवति। पथ्यमत्र दुग्धौदनं भवति ॥ १५४ ॥

गू०—भृङ्गराजरसेन निम्बबीजानि भावयेत्, अथासनस्य बीजकस्य तोयेन भावयेत्। तत्तैलं पीडनाजातं अकालपलितं नस्यतः हन्ति ॥ १५४ ॥

### अथ यष्टीमधुकतैलं पलिते—

**यष्टीमधुकक्षीराभ्यां[१] नवधात्रीफलैः शृतम् ॥१५५॥**
**तैलं नस्यकृतं कुर्यात्केशान्श्मश्रूणि सङ्घशः।**

दी०—अथ यष्टीमधुकतैलमाह—यष्टीमधुकेति। अत्र यष्टीमधुकं 'मुलहटी' शब्दवाच्यं, क्षारः यवक्षारः, एतद्द्वयं समं तैलाच्चतुर्थांशं भवति। नवधात्रीफलैरिति नूतनामलकीफलानि। एतेनाभिनवधात्रीस्वरसेन तैलाच्चतुर्गुणेन कृत्वा तैलं पाच्यं पश्चान्मधुयष्टीयवक्षारकल्केन साध्यमित्यर्थः। अस्य नावनात् केशान् शिरोरुहान् श्मश्रूणि मुखलोमानि सङ्घश इति सुघनान् कुर्यादित्यर्थः ॥ १५५ ॥

१—'क्षीराभ्या'मिति गूढार्थ० सम्मतः पाठः।

गू०—यष्टीमधुकं मधुयष्टी, क्षीरं गोक्षीरं, ताभ्यां तथा नवधात्रीफलैः शृतैः नस्येन जनयति केशान् श्मश्रूणि चाप्यथ ॥ १५५ ॥

### अथ करञ्जतैलं इन्द्रलुप्ते—

**करञ्जश्चित्रको जाती करवीरश्च पाचितम् ॥१५६॥**
**तैलमेभिर्हुतं हन्यादभ्यङ्गादिन्द्रलुप्तकम्।**

दी०—इदानीं करञ्जाद्यं तैलमाह—करञ्ज इति। करञ्जो बृहत्करञ्जो वृक्षविशेषः तस्य फलानि पल्लवानि वा, चित्रकः प्रसिद्धः तस्य मूलं पत्राणि वा, जाती सुमना तस्याः पत्राणि, करवीरो अश्वघ्नः तस्याऽपि पत्राणि, एतद्यथोक्तपरिमितेन कल्केन पाचितं तैलमिन्द्रलुप्तापहं वातपित्तजः भवति इन्द्रलुप्तं केशप्रच्यावकः शिरोरोगः अस्याभ्यङ्गमाहुः, ॥ १५६ ॥

गू०—केशनाशः। स्पष्टमन्यत् ॥ १५६ ॥

### अथ नीलिकाद्यं तैलं केशकल्पादौ—

**नीलिका केतकीकन्दं भृङ्गराजः कुरण्टकः ॥१५७॥**
**तथार्जुनस्य पुष्पाणि बीजकात्कुसुमान्यपि।**
**कृष्णास्तिलाश्च तगरं समूलं कमलं तथा ॥ १५८ ॥**
**अयोरजः प्रियङ्गुश्च दाडिमत्वग्गुडूचिका।**
**त्रिफला पद्मपङ्कश्च कल्कैरेभिः पृथक् पृथक्॥१५९॥**
**कर्षमात्रैः पचेत्तैलं त्रिफलाक्वाथसंयुतम्।**
**भृङ्गराजरसेनैव सिद्धं केशस्थिरीकृतम् ॥ १६० ॥**
**अकालपलितं हन्ति दारुणं चोपजिह्विकाम्।**

दी०—अधुना नीलिकाद्यं तैलमाह—नीलिकेति। नीलिका नीलिनी प्रसिद्धा तस्याः पत्राणि, केतकी विख्याता तस्याः कन्दं मूलविशेषः, भृङ्गराजकुरण्टकयोः पत्राणि, कुरण्टकः सहचरः, अर्जुनो वृक्षविशेषस्तस्य कुसुमानि, बीजकोऽसनस्तस्य सारो ग्राह्यः, सुमना जाती तस्याः पत्राणि, तगरं प्रसिद्धं, समूलकमलमिति, सकन्दकमलमित्यर्थः, अयोरजो लोहचूर्णं, प्रियङ्गुर्लताविशेषस्तस्याः फलानि। दाडिमत्वक् दाडिमफलत्वक्, त्रिफला हरीतक्यादित्रिकम्, पद्मपङ्कं कमलमूलस्थितमृत्तिका तदभावेऽन्यतडागोद्भवा कृष्णमृत्तिका ग्राह्या। एतानि पृथक्कर्षप्रमाणानि गृहीत्वा कल्कः कार्यः। तैलमत्र तिलतैलं, तच्च सकलद्रव्याच्चतुर्गुणं, त्रिफलाक्वाथोऽत्र चतुर्गुणस्तैलपरिमाणाच्च भृङ्गराजरसोऽपि त्रिफलाक्वाथसमः, एतत्तैलं केशकृष्णीकरणयोग्यमित्याहुः सतताभ्यञ्जत्वात्, दारुणस्तु कफमारुतजकोपजः शिरोरोगः ॥ १५७–१६० ॥

१—केशशातनं खीराशब्दवाच्यम् दी०।

गू०—नीलिका नीलं, केतकीकन्दं केलाकन्दं, भृङ्गराजः, कुरण्टकः पीतवासा, अर्जुनवृक्षस्य पुष्पाणि कृष्णतिलाः यमलं कमलकन्दः, अयोरजः लोहचूर्णं, प्रियङ्गुः, दाडिमत्वक्, गुडूची, त्रिफला, कमलपङ्कः एतैः कर्षमात्रैः पृथक् कल्कद्रव्याच्चतुर्गुणं तैलं तैलात्त्रिफलाक्वाथश्चतुर्गुणं तथा भृङ्गराजरसः एभिः सिद्धं तैलं नीलिकाद्यं नाम ॥ १५७-१६० ॥

### अकालपलितादौ भृङ्गराजतैलम्—

**भृङ्गराजरसेनैव लोहकिट्टं फलत्रिकम् ॥ १६१ ॥**
**सारिवां च पचेत्कल्कैस्तैलं दारुणनाशनम् ।**
**अकालपलितं कण्डूमिन्द्रलुप्तं च नाशयेत् ॥१६२॥**

दी०—अथ भृङ्गराजतैलमाह—भृङ्गराजेति। भृङ्गराजरसोऽत्र चतुर्गुणः स्नेहात् लोहकिट्टादिकं सर्वं तैलाच्चतुर्थांशं कुर्यात् कल्कत्वात्; केचित्तु भृङ्गराजपत्राणि कल्कमिलितान्याहुः । तथाहि 'भृङ्गराजत्रिफलोत्पलशारि लोहपुरीषसमन्वितकारि। तैलमिदं पच दारुणहारि कुञ्चितकेशघनस्थिरकारि' इति । एतच्च कस्यचित्सम्प्रदाये कर्तव्यविधानम् ॥ १६१ ॥ १६२ ॥

गू०—अथ भृङ्गराजतैलं अकालपलितादौ। भृङ्गराजरसं तैलाच्चतुर्गुणं, लोहकिट्टं, फलत्रिकं, सारिवा अनन्ता एषां कल्कैः पचेत्। दारुणं केशमूलनाशकं रोगं नाशयेत् ॥ १६१ ॥ १६२ ॥

### हरिमेदाद्यं तैलं मुखदन्तरोगादौ—

**हरिमेदत्वचं क्षुण्णां पचेच्छतपलोन्मिताम् ।**
**जलद्रोणे ततः क्वाथं गृह्णीयात्पादशेषितम् ॥१६३॥**
**तैलस्यार्धाढकं दत्वा कल्कैः कर्षमितैः पचेत् ।**
**हरिमेदलवङ्गाभ्यां गैरिकागरुपद्मकैः ॥ १६४ ॥**
**मञ्जिष्ठालोध्रमधुकैर्लाक्षान्यग्रोधमुस्तकैः ।**
**त्वग्जातीफलकर्पूरकङ्कोलखदिरैस्तथा ॥ १६५ ॥**
**पतङ्गधातकीपुष्पसूक्ष्मैलानागकेशरम् ।**
**कट्फलेन च संसिद्धं तैलं मुखरुजं जयेत् ॥१६६॥**
**प्रदुष्टमांसं पलितं शीर्णदन्तं च सौषिरम् ।**
**श्यावदन्तं प्रहर्षं च विद्रधिं कृमिदन्तकम् ॥ १६७॥**
**दन्तस्फुरणदौर्गन्ध्यं जिह्वाताल्वोष्ठजां रुजम् ।**

दी०—अथ हरिमेदाद्यं तैलमाह—हरिमेदेति। हरिमेदो विट्खदिरः 'रेउज'[1] शब्दवाच्यः तस्य त्वक् छल्ली पलशतोन्मिता तुलैकमाना ग्राह्या तां च संकुट्य जलद्रोणे निष्क्वाथ्य पादशेषं ग्राह्यं तैलमानाद्द्विगुणितमित्यर्थः । तैलस्यार्धाढकमिति तैलं तिलसंभवमर्धाढकं द्वात्रिंशत्पलमितम् । कल्कैरिति कल्कार्थद्रव्यैः कर्षमितैः प्रत्येकं । तत्र हरिमेदो विट्खदिरः; अत्रेदं यत् पुनर्ग्रहणं कल्कार्थं ग्राह्यम् । अगुरुः कृष्णागुरुः, पद्मकं काष्ठविशेषं, मधुकं यष्टीमधु; लाक्षाऽत्र लाक्षारसः किञ्चिदधिको देयः द्रवत्वात् । न्यग्रोधो वटवृक्षस्तस्य पत्राणि त्वग्वा, त्वक् वराङ्गं, खदिरः खदिरसारः, पतङ्गं कुचन्दनं, कट्फलं प्रसिद्धम्, कर्पूरमत्र प्रक्षेपे साधु भवति। तैलमिदं मुखरोगे प्रायशो गण्डूषत्वेन प्रचरति प्रदुष्टमांसादिदन्तस्फुरणान्तं सर्वं दन्तरोगे ज्ञातव्यम्। दौर्गन्ध्यं मुखकुहरस्य जिह्वाताल्वोष्ठजां रुजमिति तेन जिह्वारुजं तालुरुजं ओष्ठरुजं वा ॥ १६३-१६७ ॥

गू०—हरिमेदो दुर्गन्धखदिरः तस्य त्वचं क्षुण्णां कुट्टितां शतपलोन्मितजलद्रोणे पचेत् पादशेषितं क्वाथं गृहीत्वा तैलस्यार्धाढकं पचेत् । हरिमेदाद्यैः कार्षिकैः कल्कद्रव्यैः पुनः पचेत्। अगरु, गैरिकं, पद्मककाष्ठं, मधुकं मधुयष्टी, न्यग्रोधो वटः, त्वक् तजः, कर्पूरः, कङ्कोलः, खदिरः, पतङ्गः, धात्रीपुष्पाणि, सूक्ष्मैला, नागकेशरं एतैः कल्कद्रव्यैः पचेत्। स्पष्टमन्यत् ॥ ॥ १६३-१६७ ॥

### जात्यादितैलम्।

**([1]जातीनिम्बपटोलानां नक्तमालस्य पल्लवाः ॥१६८॥**
**सिक्थं समधुकं कुष्ठं द्वे निशे कटुरोहिणी ।**
**मञ्जिष्ठा पद्मकं लोध्रमभया नीलमुत्पलम् ॥१६९॥**
**तुत्थकं सारिवा बीजं नक्तमालस्य दापयेत् ।**
**एतानि समभागानि पिष्ट्वा तैलं विपाचयेत् ॥१७०॥**
**नाडीव्रणे समुत्पन्ने स्फोटके कच्छुरोगिषु ।**
**सद्यः शस्त्रप्रहारेषु दग्धविद्धेषु चैव हि ॥ १७१ ॥**
**नखदन्तक्षते देहे व्रणे दुष्टे प्रशस्यते ।)**

### अथ हिंग्वाद्यं तैलं कर्णशूले—

**हिङ्गुतुम्बुरुशुण्ठीभिः कटुतैलं विपाचयेत् ॥ १७२ ॥**
**तस्य पूरणमात्रेण कर्णशूलं प्रणश्यति ।**

दी०—इदानीं हिंग्वाद्यं तैलमाह—हिंग्विति । हिंग्वादीनां द्रव्याणामत्र समभागेन कल्कमाहुः । विपाचयेदिति ग्रहणात् । कल्कार्थं तोयमाहुरुक्तत्वात् ।

---

१–'दुर्गन्धखदिर' शब्दवाच्यम् ।

१–प्रक्षिप्तम् । नक्तमालः—करञ्जः ।

अससम्प्रदायेऽपि छागमूत्रेण कल्कं कृत्वा तेनैव मूत्रेणालोड्य हिंग्वादि पचेत्। कटुतैलं सार्षपमत्र तीक्ष्णत्वात्। पूरणमत्र कर्णपूरणं तच्च ग्रन्थान्तरादवगन्तव्यं तद्यथा —'धारयेत् पूरणं कर्णे कर्णशूलविमर्दनात् । रुजः स्यान्मार्दवं यावन्मात्रा शतमवेदनः' इति । मात्रालक्षणमपि प्रसङ्गतो लिख्यते 'यावत् पर्येति हस्ताग्रं दक्षिणो जानुमण्डले । निमेषोन्मेषकालं वा सा मात्रा परिकीर्तिता' । तुम्बुरु स्वनामप्रसिद्धम् ॥१६८–१७२॥

**गू०**—कल्कद्रव्यात् हिंग्वादेश्चतुर्गुणं तैलम् ॥

### अथ बिल्वाद्यं तैलं बाधिर्ये—

**बालबिल्वानि गोमूत्रे पिष्ट्वा तैलं विपाचयेत्॥१७३॥**
**साजक्षीरं च नीरं च बाधिर्यं हन्ति पूरणात् ।**

**टी०**—अथ बालबिल्वतैलं यथा बालेति । बालबिल्वानि बिल्वशलाटूनि, तानि गोमूत्रेण कल्कीकृतानि गोमूत्रेणैवावलोड्य तैले पाच्यानि । तैलमत्र सार्षपं पूर्वयोगानुवर्तनात् आजं क्षीरं नीरं च तैलाच्चतुर्गुणं प्रत्येकमाहुः, कुत्रचिज्जलपाको न दृश्यते केवलं क्षीरपाको बिल्वकल्कपाकश्चेति सम्प्रदायो वृद्धानां, तन्त्रान्तरेऽपि 'फलं बिल्वस्य मूत्रेण पिष्ट्वा तैलं विपाचयेत् । सक्षीरं तच्च विपचेद्बाधिर्ये कर्णपूरणम्' इति । अत्र यन्नीरमुक्तं तत्सम्यक् पाकार्थं पानीयं विना स्नेहपाको न सुगम इति केचित् ॥ १७३ ॥

**गू०**—बालबिल्वानि लघुबिल्वानि, गोमूत्रे पिष्ट्वा तैलं पचेत् साजक्षीरं अजादुग्धं चतुर्गुणतैलान्नीरं जलं च दत्वा पचेत् ॥ १७३ ॥

### अथ क्षारतैलं कर्णरोगेषु—

**बालमूलकशुण्ठीनां क्षारः क्षारयुगं तथा ॥ १७४ ॥**
**लवणानि च पञ्चैव हिङ्गु शिग्रु महौषधम् ।**
**देवदारु वचा कुष्ठं शतपुष्पा रसाञ्जनम् ॥ १७५ ॥**
**ग्रन्थिकं भद्रमुस्तं च कल्कैः कर्षमितैः पृथक् ।**
**तैलप्रस्थं च विपचेत्कदलीबीजपूरयोः ॥ १७६ ॥**
**रसाभ्यां मधुशुक्तेन चातुर्गुण्यमितेन च ।**
**पूयस्रावं कर्णनादं शूलं बधिरतां कृमीन् ॥ १७७ ॥**
**अन्यांश्च कर्णजात्रोगान्मुखरोगांश्च नाशयेत् ।**

**टी०**—अथ क्षारतैलमाह—बालमूलकेति । बालमूलकं लघुमूलकं तस्य शुण्ठी नालविशेषास्तज्जातं क्षारमिति । क्षारयुगमिति क्षारद्वन्द्वं तेन स्वर्जिकाक्षारो यवक्षारश्चेति । पञ्चलवणानि प्रसिद्धानि, शिग्रुः शोभाञ्जनकः अस्य मूलस्वरसो ग्राह्यः, महौषधं शुण्ठी, रसाञ्जनं प्रसिद्धं निजनाम्ना, तदभावे दारुहरिद्रा ग्राह्या तन्मूलत्वात्, ग्रन्थिकं पिप्पलीमूलं, भद्रमुस्तं नागरमुस्तं, तैलं सर्षपमत्राप्याहुः, प्रस्थं षोडशपलानि कदलीकन्दस्वरसं बीजपूरफलरसं च प्रत्येकं तैलाच्चतुर्गुणमाहुः द्रवत्वात्। मधुशुक्तमपि चतुर्गुणम्। पूयस्रावं कर्णस्येति शूलमपि कर्णसम्बन्धिकृमयस्त्वत्र कर्णसंभवाश्च । एतदपि तैलं मुखरोगे प्रशस्तं गण्डूषकरणत्वात् ॥ १७४–१७७ ॥

**गू०**—बालमूलकशुण्ठीनां क्षारः बालमूलकं तेषां शुंडानि गंडिकाः शुष्कास्तेषां दग्ध्वा क्षारः कार्यः, तथा क्षारयुगं स्वर्जी यवक्षारः, शोभाञ्जनं, महौषधं शुण्ठी, रसाञ्जनं, ग्रन्थिकं पिप्पलीमूलं, भद्रमुस्तं नागरमुस्तं, एतैः कर्षमितैः तैलप्रस्थं पचेत् । कदलीस्वरसे बीजपूरफलरसे च चतुर्गुणालाभे तुल्येनापि पचेत् मधुशुक्तेन च तैलाच्चातुर्गुण्येन पचेत् ॥ १७४–१७७ ॥

केचित्तु मधुशुक्तलक्षणमेतस्याग्रे पठन्ति तद्यथा—

### मधुशुक्तम् ।

**जम्बीराणां फलरसः प्रस्थैकः कुडवोन्मितम् ॥१७८॥**
**माक्षिकं तत्र दातव्यं पलैका पिप्पली स्मृता ।**
**एतदेकीकृतं सर्वं मृद्भाण्डे च निधापयेत् ॥१७९॥**
**वचाम्भो मधुसंयुक्तं शृङ्गवेरगुडान्वितम् ।**
**धान्यराशौ त्रिरात्रिस्थं मधुशुक्तमुदाहृतम् ॥१८०॥**

**टी०**—तन्त्रान्तरे तु—'यवांभो मधुयुक्तं च शृंगवेरगुडान्वितम् । धान्यराशौ त्रिरात्रस्थं मधुशुक्तमुदाहृतम्' इति । अथवा 'यन्मस्त्वशुचौ भाण्डे सक्षौद्रगुडकाञ्जिकम् । धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते' इति । एतेषां यथालाभं देयमिति न दोषः ॥ ॥ १७८–१८० ॥

### अथ पाठाद्यं तैलं पीनसे—

**पाठा द्वे च निशे मूर्वा पिप्पली जातिपल्लवैः॥१८१॥**
**दन्त्या च तैलं संसिद्धं नस्यं स्याद्दुष्टपीनसे ।**

**टी०**—संप्रति पाठाद्यं तैलं दर्शयन्नाह—पाठेति । पाठा प्रसिद्धा, द्वे निशे इति हरिद्राद्वयं, मूर्वा चोरस्नायुः जातिपल्लवैरिति जाती सुमना तस्याः पत्राणि, दन्ती प्रसिद्धा, पाठादिद्रव्याणां समानमिलितानां कल्कं तैलांशमाहुः ॥ १८१ ॥

**गू०**—पाठा, द्वे निशे हरिद्राद्वयं, मूर्वा मोरटा, पिप्पली जाती मालतीपत्राणि, दन्ती जयपालमूलं एभिः संसिद्धं कल्कीकृतं कल्कात्तैलं चतुर्गुणम् ॥१८१॥

### अथ व्याघ्रीतैलं पीनसे—

**व्याघ्रीदन्तीवचाशिग्रुतुलसीव्योषसैन्धवैः ॥ १८२॥**
**कफस्य पाचनं तैलं पूतिनासोदकापहम् ।**

**दी०**—अथ व्याघ्रीतैलमाह—व्याघ्रीति । व्याघ्री-कण्टकारिका, दन्ती प्रसिद्धा, शिग्रुः शोभाञ्जनकः, तुलसी प्रतीता तस्याः पत्राणि, व्योषं त्रिकटुकं, तेन शुण्ठी-मरिचपिप्पल्य इति । एतेषां कल्कैः सिद्धं तैलं कफस्य पाचनमुक्तम् पानरवात् । पूतिनासोदकापहमिति च पूतिनासो नासादुर्गन्धः । नासोदकं नासास्रावः एत-द्वयं हन्ति नस्याभ्यासात् ॥ १८२ ॥

**गू०**—व्याघ्री, कण्टकारी, दन्ती, शिग्रुः शोभाञ्जनं, तुलसी, व्योषं, त्रिकटु, पूतिनासागदं पीनसम् ॥१८२॥

### अथ कुष्ठाद्यं तैलं छिक्कायां—

**कुष्ठं बिल्वकणाशुण्ठीद्राक्षाकल्ककषायवत् ॥१८३॥**
**साधितं तैलमाज्यं वा नस्यात्क्षवथुनाशनम् ।**

**दी०**—इदानीं कुष्ठतैलमाह—कुष्ठमिति । बिल्व-मत्र बिल्वफलं मूलं वा तदभावे कणा पिप्पली कल्क-कषायवदिति कल्करूपस्तेन साधितमित्यर्थः । पञ्चक-षायाः कथिताः । यद्वा कुष्ठादीनां कल्केन कषायेण च तैलं साध्यम् । कषायशब्दः क्वाथे प्रायशः प्रचरति तत्र क्वाथार्थमेतद्द्रव्यं स्नेहसमं ग्राह्यं, चतुर्गुणेन नीरेण संक्वाथ्य पादशेषेण साध्यं, कल्कार्थं च तैलांशेन साम्य-मित्यर्थः । एवमाज्यं घृतमपि साध्यम् । क्षवथु-श्छिक्का ॥ १८३ ॥

**गू०**—कुष्ठादीनां कल्कः कषायवत्कार्यस्तेन तैलं आज्यं घृतं वा साधितं न स्यात् क्षवथुनाशनः क्षवथुश्छिक्का ॥ १८३ ॥

### गृहधूमतैलं नासार्शसि—

**गृहधूमकणादारुक्षारनक्ताह्वसैन्धवैः ॥ १८४ ॥**
**सिद्धं शिखरिबीजैश्च तैलं नासार्शसां हितम् ।**

**दी०**—अथ गृहधूमतैलमाह—गृहधूमेति । गृहधूमः विख्यातः, कणा पिप्पली, दारु देवदारु, क्षारं यवक्षारं, नक्ताह्वं करञ्जफलं । शिखरिबीजैश्चेति । शिखरी अपा-मार्गः तस्य बीजैः फलैः । एके सिद्धं शिरीषबीजैश्चेति पठन्ति व्याख्यानयन्ति च । एतेषां कल्कं तैलांश-माहुः । सिद्धमिदं नावनेऽभ्यङ्गे वा प्रशस्तम् ॥१८४॥

**गू०**—गृहधूमः 'अङ्गारधूमः', कणा पिप्पली, दारु देवदारु, क्षारो यवक्षारः नक्ताह्वः करञ्जः, सैन्धवं, शिखरिबीजं तुगाबीजं एभिः कल्कितैः सिद्धं तैलं नासा-र्शसां हरं भवति ॥ १८४ ॥

### अथ वज्रीतैलं कुष्ठादौ—

**वज्रीक्षीरं रविक्षीरं द्रवं धत्तूरचित्रजम् ॥ १८५ ॥**
**महिषीविड्भवं द्रावं सर्वांशं तिलतैलकम् ।**
**पचेत्तैलावशेषं च गोमूत्रेऽथ चतुर्गुणे ॥ १८६ ॥**
**तैलावशेषं पक्त्वा च तत्तैलं प्रस्थमात्रकम् ।**
**गन्धकाग्निशिलातालं विडङ्गातिविषाविषम् ॥१८७॥**
**तिक्तकोशातकीकुष्ठवचामांसीकटुत्रयम् ।**
**पीतदारु च यष्ट्याह्वं स्वर्जिकाक्षारजीरकम् ॥१८८॥**
**देवदारु च कर्षांशं चूर्णं तैले विनिक्षिपेत् ।**
**वज्रतैलमिदं ख्यातमभ्यङ्गात्सर्वकुष्ठनुत् ॥ १८९ ॥**

**दी०**—अधुना वज्रीतैलमाह—वज्रीति । वज्री सेहु-ण्डस्तस्य क्षीरं दुग्धं रविक्षीरमित्यर्कदुग्धं धत्तूरकचित्रक-पत्रयोर्द्रवं स्वरसमित्यर्थः । महिषीविड्भवं द्रावं महिषी-शकृत्स्वरसम् । सर्वांशं तिलतैलकमिति सर्वं वज्रीक्षीरादि पञ्चद्रवं तस्यांशं चतुर्थांशं भागं तत्सममिति तैलमित्यर्थः । एके सर्वांशं तैलमित्यनेन सर्वपञ्चद्रव्यसाम्यं तैलमिति वदन्ति, एतन्न प्रचरति यतः पञ्चद्रवत्वेन प्रत्येकं तैलस-ममाहुः । तथाचोक्तमत्रैव परिभाषायाम् 'द्रवाणि यत्र स्नेहेषु पञ्चादीनि' इत्यादिवाक्यम् । पुनरपि तद्गोमूत्रच-तुर्गुणेन पक्त्वा तैलावशेषं प्रस्थमात्रं गृहीत्वा वक्ष्यमाण-द्रव्याणां प्रत्येकं कर्षप्रमितानां चूर्णं तत्तैले मिश्रयित्वा स्वनुगुप्तं धारयेत् । गोमूत्रं पृथगुक्तत्वाच्चतुर्गुणम् । चूर्णद्र-व्याण्याह—तत्राग्निर्भल्लातकः, चित्रकजटा वा, शिला मनःशिला, तालं हरितालं, विषं प्रसिद्धं, तिक्तकोशातकी कटुकोशातकीफलमिति, मांसी जटाख्या, कटुत्रयं त्रिकटुकं, पीतदारु दारुहरिद्रा, यष्ट्याह्वं मधुयष्टी, स्व-र्जिकाक्षारं प्रसिद्धं तत्तेषां चूर्णार्थं द्रव्याणामपि कल्क-माहुरेके सर्वकुष्ठनुदिति । सर्वकुष्ठम् अष्टादशप्रकारम् ॥ ॥ १८५-१८९ ॥

**गू०**—वज्रीक्षीरं, रविरर्कस्तस्य क्षीरं, द्रवं तज्जलं, धत्तूरपत्रस्वरसः, चित्रकस्वरसश्च, महिषीविड्द्रवं, तिल-तैलकं सर्वांशं सर्वसमं, गोमूत्रं चतुर्गुणं तैलात् । तत्सिद्धं तैलं प्रस्थमात्रकं तस्मिन्गन्धकादीन् क्षिपेत् अग्निश्चि-त्रकः, शिला मनःशिला, तालं हरितालं, विषा अति-विषा, विषं प्रसिद्धं, तिक्तकोशातकी जालिनी, पीतदारुः, हरिद्रा, क्षारो यवक्षारः, कर्षांशं चूर्णितं क्षिपेत् । सर्व-कुष्ठहृत् दद्रुविचर्चिकादिककुष्ठहरम् ॥ १८५-१८९ ॥

### करवीरादितैलम् ।

**करवीरशिखादन्तीत्रिवृत्कोशातकीफलम् ।**

रम्भाक्षारोदके तैलं प्रशस्तं लोमशातनम् ॥१९०॥

दी०—अथ करवीरादितैलमाह—करवीरेति । सुगमम् ॥ १९० ॥

### चन्दनादितैलम्—

(चन्दनाम्बुनखैर्याभ्यं यष्टीशैलेयपद्मकम् ।
मञ्जिष्ठा सरलं दारु सेव्यैलं पूतिकेसरम् ॥१९१॥
पत्रकैलं मुरा मांसी कङ्कोलं वनिताम्बुदम् ।
हरिद्रा सारिवा तिक्ता लवङ्गागरुकुङ्कुमम् ॥१९२॥
त्वग्रेणुर्नलिका चेति तैलं मस्तु चतुर्गुणम् ।
लाक्षारससमं सिद्धं ग्रहघ्नं बलवर्धनम् ॥ १९३ ॥
अपस्मारज्वरोन्मादकृत्यालक्ष्मीविनाशनम् ।
आयुःपुष्टिकरं चैव वशीकरणमुत्तमम् ॥ १९४ ॥
विशेषात्क्षयरोगघ्नं रक्तपित्तहरं परम् । )

अम्बु मुस्तकं, नखं सुगन्धौषधिः, याभ्यं चन्दनं, सरलं धूपवृक्षः, सेव्यं उशीरं, पूतिकेसरं गन्धमार्जारी, मुरा गन्धद्रव्यं, वनिता प्रियङ्गुः, अम्बुदं मुस्तं, तिक्ता लताकस्तूरी, नलिका इन्दीवरा ॥ १९१-१९४ ॥

### वचातैलम्—

(वचां शठीं हरिद्रे द्वे देवदारुमहौषधी ॥ १९५ ॥
हरीतकीमतिविषामुस्तमैन्द्रयवान्समान् ।
एतान्दशपलान्भागांश्चतुर्द्रोणेऽम्भसः पचेत्॥१९६॥
चक्रमर्दरसैस्तैलं कटुकं मृदुनाऽग्निना ।
पादशेषे विनिक्षिप्य सिन्दूरमवतारयेत् ॥ १९७ ॥
एतत्तैलं निहन्त्याशु गण्डमालां सुदारुणाम् ।)

महौषधः शुण्ठी, कटुकं तैलं सार्षपम् ॥१९५-१९७॥

### लाङ्गलीतैलम् ।

(निर्गुण्डीस्वरसे तैलं लाङ्गलीमूलकल्कितम्॥१९८॥
तैलं नस्यान्निहन्त्याशु गण्डमालां सुदारुणाम् ।)

लाङ्गली—कलिहारी ॥ १९८ ॥

केषुचित्पुस्तकेष्वेतत्–पाठभेदत्रयं दृश्यते ।

### धत्तूरतैलम्—

धत्तूररसमादाय हयमारान्तिकारसम् ।
भृङ्गराजरसश्चैव सारिणी निम्बपत्रकम् ॥ १९९ ॥
शोभाञ्जनश्चित्रकश्च अश्वगन्धाप्रसारिणी ।
शिरीषः कुटजोऽनन्ता शाल्मली नक्तपत्रकम्॥२००
रविप्रियो महानिम्बो डिण्डिघोषा महेरणा ।
बला ज्योतिष्मती चैव श्यामाकश्चक्रमर्दकः॥२०१॥
एतैस्तु रसमादाय तैलतुल्यं च दीयते ।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम् ॥२०२॥
मरिचं त्रिवृता दन्ती हरितालं मनःशिला ।
कम्पिल्लको गन्धकश्च खदिरः पिप्पली वचा॥२०३॥
रसाञ्जनं च सिन्दूरं श्रीवासो रक्तचन्दनम् ।
इरिमेदस्तथा तुम्बी मञ्जिष्ठा सिन्दुवारकः ॥२०४॥
करवीरजटा रास्ना विश्वा श्रेष्ठा च पौष्करम् ।
शठी तालीसपत्रं च प्रियङ्गू रेणुका तथा ॥२०५॥
चातुर्जातकमजीरं कङ्कोलं जातिपत्रिका ।
ज्योतिष्मती च पलिका विषस्य द्विपलं भवेत् २०६
आढकं कटुतैलस्य गोमूत्रं च चतुर्गुणम् ।
मृत्पात्रे लोहपात्रे च शनैर्मृद्वग्निना पचेत् ॥२०७॥
मज्जाश्रितं त्वग्गतं च वातं चास्थिगतं तथा ।
ऊरुग्रहं चाढ्यवातं कृच्छ्रं दण्डापतानकम् ॥२०८॥
कुब्जत्वं चाथ शोथं च पक्षाघातं तथार्दितम् ।
हनुस्तम्भं शिरःकम्पं मूर्च्छितं दृष्टिविभ्रमम् ॥२०९॥
अपस्मारं तथोन्मादं तथाचैवाऽपतन्त्रकम् ।
आक्षेपकं चास्थिभग्नं सन्धिभग्नं च नाशयेत्॥२१०॥

इत्यप्यधिकः पाठो दृश्यते ।

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां घृततैलकल्पना नाम नवमोऽध्यायः ।

---

दी०—हयमारो करवीरः, नक्तपत्रकं करञ्जपत्रकं, रविप्रियो रक्तकमलं, डिण्डीघोषा रक्तैरण्डः, महेरणा सल्लकीवृक्षः, श्रीवासः सरलनिर्यासः, सिन्दुवारकः निर्गुण्डी, श्रेष्ठा स्थलपद्मिनी ॥ १९९-२१० ॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यमखण्डे स्नेहकल्पनाऽध्यायो नवमः ॥ ९ ॥

---

इति काशीरामवैद्यविरचितायां श्रीशार्ङ्गधरगूढार्थदीपिकायां तैलाधिकारः ॥

---

## दशमोऽध्यायः ।

### इदानीं संधानकल्पनां दर्शयन्नाह–

द्रवेषु चिरकालस्थं द्रव्यं यत्संधितं भवेत् ।
आसवारिष्टभेदैस्तु प्रोच्यते भेषजोचितम् ॥ १ ॥

दी०—द्रवेष्विति । तत्र सामान्यं यथा द्रवेषु कल्पनागणितेषु द्रवद्रव्येषु यद्द्रव्यं चिरकालं संधानीभूतं भवति

---

१,२,३—प्रक्षिप्तपाठाः.

तच्च आसवारिष्टादिभेदैः कृत्वा मद्यमित्युच्यते । आसवारिष्टभेदैरिति बहुवचनत्वेन सीधुसुरादिकमपि गृह्यते । आसव इति प्रसिद्धः, सुरा पैष्टी, आसवो गुडयोनिः । सूयते तोयकार्यं क्रियते यस्मिन् स आसवः । स्थिरमद इति चिरकालमत्तताकारी । अरिष्टमिति द्रव्यप्रधानः अस्य भेदः । सीधुरिति । सीधुशब्देन मद्यभेदमाहुः, तच्चोभयप्रधानम् । एतदपि त्रिविधमिति केचित् । पैष्टिकं माध्वीकं गौडमिति । मैरेयक इत्यपि भेदोऽस्य वदन्त्येके । स यथा—सुरासवयोः प्रत्येकनिष्पादितयोरेकीकृत्य पुनःसन्धानो मैरेय इति संक्षेपेणोक्ता मद्यभेदाः ॥१॥

**गू०**—अथ आसवारिष्टाध्यायमाह । यद्द्रव्यं औषधादिद्रव्येषु पानीयादिषु चिरकालस्थं सन्धितं तत् उचितं भेषजं आसवारिष्टभेदैः प्रोच्यते । उचितं स्वरोगोचितम् ॥ १ ॥

### तत्रापि आसवारिष्टयोर्भेदमाह—

**यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः ।**
**अरिष्टः क्वाथसिद्धः स्यात्तयोर्मानं जलोन्मितम् ॥२॥**

**दी०**—इदानीं तस्य विशेषलक्षणान्याह—यदिति । तयोरासवारिष्टयोर्मानं पानार्थं तुलनारूपं जलोन्मितमिति । जलपानमात्रं जलपानं तु अल्पमेव कथितं नैतन्मनोहरम्, कुतो मदात्ययविषयत्वात् । नीरुजानां तन्त्रान्तरीयमानं यत् तज्जलशब्देन कल्प्यते । तद्यथा—"शुद्धकायः पिबेत् प्रातः सोपदंशं पलद्वयम् । मध्याह्ने द्विगुणं तच्च स्निग्धाहारेण पाययेत्" इत्यादि वचनात् । एके त्रिपलोन्मितमिति पठन्ति व्याख्यानयन्ति च ॥ २ ॥

**गू०**—यत् अपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः तद्गुणाः—'छेदी मध्वासवस्तीक्ष्णः' इति प्रोच्यते । अपक्वौषधं अम्बु च वह्निपाकरहितं । यस्तु क्वाथसिद्धः स अरिष्टः स्यात् । वह्नियोगाद्भूयान्भेदः । तयोरासवारिष्टयोर्मानं भक्षणप्रमाणं, तद्गुणास्तु "यथा द्रव्यगुणोऽरिष्टः सर्वमद्यगुणाधिकः" ॥ २ ॥

### अनुक्तमानारिष्टेषु जलादिप्रमाणमाह—

**अनुक्तमानारिष्टेषु द्रवद्रोणे तुलां गुडम् ।**
**क्षौद्रं क्षिपेद्गुडादर्धं प्रक्षेपं दशमांशिकम् ॥ ३ ॥**

**दी०**—अथारिष्टेषु द्रव्यपरिमाणमनुक्तत्वाद्दर्शयन्नाह—अनुक्तमानेति । द्रव्यद्रोणे द्रोणद्वयपरिमिते द्रवे क्वाथादिके । तत्र तुलामिति सन्धानिकद्रव्याणां क्षिपेत् । तानि मधुकपुष्पप्रभृतीनि गुडपरिमाणादर्धपरिमाणम् । मध्विति गुडमानमपि क्वाथद्रव्यपरिमाणादर्धं बोद्धव्यम् । तथाच परिभाषायां—"क्वाथ्यद्रव्यस्य हि समं क्वाथं नीत्वा तु धारयेत् । पात्रे मृण्मयके भूमौ निखाते तु गुडं न्यसेत् । क्वाथादर्धं ततो द्रव्यं प्रदेयं चाष्टमांशिकम् । क्षौद्रं क्षिपेद्गुडादर्धम् शर्करां च तथा न्यसेत् । कर्कन्धूमूलप्रभृतीन् गुडतुल्यं प्रदापयेत् । धातकीकुसुमं देयं शर्कराक्षौद्रयोर्द्विकम् । सम्यक् पक्वं ततो ज्ञात्वा न्यसेद्यन्त्रे प्रसाधयेत्" इति । प्रक्षेपं दशमांशिकमिति । प्रक्षेपं पश्चाद्देयं द्रव्यं दशमांशिकं गुडपरिमाणादित्यर्थः ॥ ३ ॥

**गू०**—अनुक्तमानारिष्टेषु द्रवद्रोणे सति गुडं तुलां क्षिपेत् । तुलां पलशतप्रमाणं, अनुक्तमानं गुडप्रमाणं येषु एवंभूतेष्वासवारिष्टेषु क्षौद्रं मधु गुडादर्धं क्षिपेत् । अनुक्त एवं प्रक्षेपं चूर्णादिप्रक्षेपम् । दशमांशिकं चूर्णप्रक्षेपं दशमांशिकमिति ॥ ३ ॥

### अथ क्वाथभेदेन सीधुलक्षणमाह—

**ज्ञेयः शीतरसः सीधुरपक्वमधुरद्रवैः ।**
**परिपक्वान्नसन्धानसमुत्पन्नां सुरां जगुः ।**
**सिद्धः पक्वरसः सीधुः संपक्वमधुरद्रवैः ॥ ४ ॥**

**दी०**—इदानीं सीधुप्रभृतीनां प्रत्येकलक्षणान्याह—ज्ञेय इति । यः सीधुः अपक्वमधुरद्रवैरिक्षुरसप्रभृतिकैः सिद्धो ज्ञातः स शीतरससंज्ञो ज्ञेयः । यः संपक्वमधुरद्रवैः सिद्धः स पक्वरससंज्ञः एतद्द्वयं तत्कर्मकारकसकाशादवगन्तव्यम् ॥ ४ ॥

**गू०**—अपक्वमधुरद्रवैः सिद्धः शीतरसः सीधुर्ज्ञेयः यथा सिरकासम् । पक्वमधुरद्रवैः सिद्धः पक्वरसः सीधुर्ज्ञेयः, अपक्वरससीधुः, पक्वरससीधुश्च भेदद्वयं ज्ञेयं, तद्गुणास्तु—"वातपित्तकरः सीधुः स्नेहश्लेष्मविकारहा । मेदःशोफोदरार्शोघ्नस्तत्र पक्वरसो वरः" इति॥४॥

### अथ सुराप्रसन्नादीनां मद्यभेदानां लक्षणमाह—

**परिपक्वान्नसंधानसमुत्पन्नां सुरां जगुः ।**
**सुरामण्डः प्रसन्ना स्यात्ततः कादम्बरी घनः ॥ ५ ॥**
**तदधो जगलो ज्ञेयो मेदको जगलाद्घनः ।**
**बक्कसो हृतसारः स्यात्सुराबीजं च किण्वकम् ॥६॥**

१–'तच्च' माषांशकवाच्यम् । दी० । २–लोके 'धानु' शब्दवाच्य इति वदन्ति । दी० ।

दी०—इदानीं सुराविशेषणलक्षणमाह—परिपक्वान्नेति । यत् शाल्यादिकं सम्पाच्य पुनः सन्धितं भवति तेन यत् समुत्पन्नं तां सुरां जगुः । एषा पैष्टी सुरा लोके 'बगनी' शब्दवाच्या विख्याता । अथान्ये बहवो भेदास्तानाह—सुरामण्ड इत्यादि । यः सुरामण्डः उपर्यच्छो भागः सा प्रसन्ना कथिता, यो घनः स एव कादम्बरीशब्देन वाच्यः । घनस्तु सुराभाग एव, यः सुराया अधस्थितो भवति स जगलो ज्ञेयः । यो जगलात् किञ्चिद्घनः स मेदकसुरासंज्ञः कादम्बर्या भिन्नः किञ्चिद्घनत्वात् । यो हृतसारः स 'वक्कस'संज्ञः । सुराबीजं तु किण्वकमिति । शालिपिष्टप्रभवं किण्वकमिति कथितम् । एते सुराभेदा दर्शिताः । ते च लोकतो ज्ञातव्याः ॥ ५ ॥ ६ ॥

गू०—अथ सुरा । परिपक्वस्य पाचितान्नस्य यत्संधानं तस्मात्समुत्पन्नां सुरां जगुः । अथ प्रसन्नां कादम्बरीं चाह—उक्तायाः सुरायाः मण्डः फेनः प्रसन्ना स्यात् ततः घना दृढा कादम्बरी स्यात् । अथ जगलं मेदकं चाह—तदधः सुराया अधः यो द्रवभागः स जगलस्तस्मात् यश्चघनः मेदकः । अथ सुराबीजं किण्वकमाह—स मेदकः हृतसारः सुराबीजं भवति च पुनः किण्वकं भवति बीजमुत्पत्तिस्थानं विवकलहस्तीति भाषायाम् ॥ ५ ॥ ६ ॥

**अथ वारुणीमाह—**

**यत्तालखर्जूररसैः संधिता सा हि वारुणी ।**

दी०—अथ वारुणीलक्षणमाह—यत्तालेति । इदमपि सुराभेदः । तालः तालवृक्षः, खर्जूरो वृक्षविशेषः प्रसिद्धा, रस इति फलरसः, सन्धितमिति पूर्ववत्, यद्वा तालखर्जूरवृक्षयोरुपरिभागं छित्वा तत्र घटमारोप्य यो रसो घटे पतितस्तत्रैव चिरकालस्थो भवति सा वारुणी; लोके 'सेन्धी' शब्दवाच्या । 'तद्गुणा वारुणी हृद्या लघुतीक्ष्णा निहंति च' ॥

**अथ शुक्तमाह—**

**कन्दमूलफलादीनि सस्नेहलवणानि च ॥ ७ ॥**
**यत्र द्रवेऽभिषूयन्ते तच्छुक्तमभिधीयते ।**
**विनष्टमम्लतां यातं मद्यं वा मधुरद्रवम् ॥ ८ ॥**
**विनष्टः संधितो यस्तु तच्चुक्रमभिधीयते ।**
**गुडाम्बुना सतैलेन कन्दमूलफलैस्तथा ॥ ९ ॥**
**संधितं चाम्लतां यातं गुडशुक्तं तदुच्यते ।**

दी०—अधुना शुक्तादिलक्षणं दर्शयन्नाह—कन्दमूलेति । एतच्च सामान्यलक्षणमभिहितम्, कन्दमूलफलादीनि इति । कन्दानि सूरणप्रभृतीनि, मूलानि मूलकप्रभृतीनि, फलानि करमर्दकरंभाफलप्रभृतीनि, आदिशब्दात् पत्रपुष्पमालादयो गृह्यन्ते । न केवलं लवणतैलं, चकाराद्राजिकाहरिद्रादीनामपि ग्रहणं, व्यवहारतस्तु लवणत्यागेनापि प्रचरति । यत्र द्रवे पानीयप्रभृतिके एतानि वस्तूनि सूयन्ते सन्धानीभूतानि क्रियन्ते तत् शुक्तमभिधीयते इति । ननु 'शुक्तं चुक्रमुच्यते' इति वदन्ति तत्कथमस्य शुक्तसंज्ञा कथ्यते? सत्यम् । शुक्तवत् सन्धितानां कन्दादीनामपि चुक्रसंज्ञात्राप्यभिहिता नतु साक्षात् शुक्तं चोक्तं । अथ अत्रापि मद्यलक्षणमाह एतदपि शुक्तभेदमाहुः । तदुक्तं गुणावल्यां "गौडानि रसशुक्तानि मद्यशुक्तानि यानि च । यथापूर्वं गुरुतराण्यभिष्यन्दकराणि च" इति । विनष्टमम्लतां यातं मद्यमिति तदुच्यते । सर्वं मद्यं पक्वरसं कालान्तरवशाद् यदा संत्यज्य परमम्लत्वं याति शुक्तं तदुच्यते इति । मधुरद्रवमिति । गुडेक्षुरसमधुप्रभृतिकम् । तथाहि—'यन्मस्त्वादौ शुचौ भाण्डे सगुडक्षौद्रकाञ्जिकम् । धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते' इति । विनष्ट इति विगतरसः । सन्धितः सन्धानीभूतः । इदानीं गुडादिशुक्तलक्षणमाह—गुडेति । गुडशुक्तमिति गुडप्रधानं शुक्तमित्यर्थः । शेषं सुगमम् ॥ ७-९ ॥

गू०—शुक्तगुणाः-'रक्तपित्तकफोत्क्लेदि शुक्तं वातानुलोमनं' अभिषूयन्ते क्षिप्यन्ते, स्पष्टमन्यत् । चुक्रमाहुः चुक्रं मद्यभेदः, अथ गुडशुक्तं एवमेवेक्षुशुक्तं इति मद्यभेदः ॥ ७-९ ॥

**इक्षुशुक्तम्—**

**एवमेवेक्षुशुक्तं स्यान्मृद्वीकासंभवं तथा ॥ १० ॥**

दी०—एवमेवेति । गुडशुक्तवदिक्षुरसशुक्तं सन्धेयम् । इक्षुशुक्तमितीक्षुरसादिकृतं, मृद्वीका द्राक्षा तत्सम्भवं शुक्तम् । एतदपि पूर्ववत् सन्धेयम् । एके मृद्वीकासम्भवमित्यस्य स्थाने 'मधुना संभव'मिति पठन्ति व्याख्यानयन्ति च । मधुना संभवमिति मधुकृतशुक्तमुच्यते तदुक्तं "जम्बीराणां फलरसं पिप्पलीमूलसंयुतम् । मधुभाण्डे विनिक्षिप्य धान्यराशौ निधापयेत् ॥ त्र्यहेण तज्जातरसं मधुशुक्तमुदाहृतम्" इति । मधुभाण्डे मधुपूर्णप्राये भाण्डे इत्यर्थः । तद्गुणाः क्रमेण "गुडेक्षुमद्यमाद्वीकशुक्तं लघु यथोत्तरम्" ॥ १० ॥

**इदानीं तुषाम्बुकाञ्जिकमप्याह—**

**तुषाम्बु संधितं ज्ञेयमामैर्विदलितैर्यवैः ।**

**यवैस्तु निस्तुषैः पक्वैः सौवीरं संधितं भवेत् ॥ ११ ॥**

**दी०**—तुषाम्ब्विति । आमैरपरिपक्वैर्विदलितैः खण्डितैः ईदृशैर्यवैर्यत् सन्धानं क्रियते तत् तुषाम्बु कथितं, यवैस्तु निस्तुषैः पक्वैः सौवीरमिति । निस्तुषैस्तुषरहितैः पक्वैः स्विन्नैर्यवैरिति शेषः, यवैः निस्तुषैरिति ग्रहणेनापि गोधूमसंभवमिति सूचयति । तथाहि—'सौवीरकं सुवीराम्लं ज्ञेयं गोधूमसंभवं' इति । तुषाम्बु सौवीरकं च काञ्जिकभेदमाहुः, ते तु विरेचनप्रकरणे प्रायशः प्रचरतः ॥ ११ ॥

**गू०**—अथ तुषाम्बु, विदलितैः आमैरपक्वैः यवैः संधितं तुषाम्बु ज्ञेयं । **अथ सौवीरं** निस्तुषैः पक्वैः क्वथितैर्यवैः संधितं सौवीरं भवेत् ॥ ११ ॥

### अथ काञ्जिकम्—

**कुल्माषधान्यमण्डादि संधितं काञ्जिकं विदुः ।**

**दी०**—संप्रति काञ्जिकस्यापि लक्षणं प्रकटयन्नाह—कुल्माषेति । काञ्जिकं धान्याम्लं, कुल्माषाः कुत्सितमाषाः, धान्यं रक्तशाल्यादि, तेन च तृणाह्वकोद्रवादिकमपि गृह्यते । मण्डं शालिप्रभवं प्रसिद्धम् । एके कुल्माषभवं धान्यभवं मण्डं च व्याख्यानयन्ति, आदिशब्दात् यवचूर्णादिकृतमपि बोद्धव्यम्, यतः अस्य बहवो भेदाः दृश्यन्ते ते तु दक्षिणेऽतीव प्रसिद्धाः ॥

**गू०**—कुल्माषधान्यमण्डादि यत्सन्धितं तत्काञ्जिकं विदुः । कुल्माषः अर्धस्विन्नमाषः, धान्यं षष्टिकादि तयोर्मण्डसंधितं, तद्गुणाः—'धान्याम्लं भेदि तीक्ष्णोष्णं पित्तकृत्स्पर्शशीतलम् ॥'

### अथ सण्डाकी—

**सण्डाकी संधिता ज्ञेया मूलकैः सार्षपादिभिः ॥ १२ ॥**

**दी०**—अथ सण्डाकीमाह—सण्डाकीति । सन्धानकभेदः, मूलकं प्रसिद्धम्, सार्षपादिभिरिति सार्षपशाकेन संधानं आदिग्रहणादन्यशाकैरपि क्रियते ॥ १२ ॥

**गू०**—मूलकैस्तथा सर्षपादिभिः संधितं सण्डाकीनाम्नी ज्ञेया ॥ १२ ॥

### अथ आसवाः—

### रक्तपित्तादौ उशीरासवः—

**उशीरं वालकं पद्मं काश्मरीं नीलमुत्पलम् ।**
**प्रियङ्गुं पद्मकं लोध्रं मञ्जिष्ठां धन्वयासकम् ॥ १३ ॥**

१–कापि शब्दवाच्या दी० ।

**पाठां किराततिक्तं च न्यग्रोधोदुम्बरं शठीम् ।**
**पर्पटं पुण्डरीकं च पटोलं काञ्चनारकम् ॥ १४ ॥**
**जम्बूशाल्मलिनिर्यासं प्रत्येकं पलसंमितान् ।**
**भागान्सुचूर्णितान्कृत्वा द्राक्षायाः पलविंशतिम् ॥ १५ ॥**
**धातकीं षोडशपलां जलद्रोणद्वये क्षिपेत् ।**
**शर्करायास्तुलां दत्त्वा क्षौद्रस्यैकतुलां तथा ॥ १६ ॥**
**मासैकं स्थापयेद्भाण्डे मांसीमरिचधूपिते ।**
**उशीरासव इत्येष रक्तपित्तविनाशनः ॥ १७ ॥**
**पाण्डुकुष्ठप्रमेहार्शःकृमिशोथहरस्तथा ।**

**दी०**—इदानीमासवानां प्रकारभेदमाह—उशीरमिति । एतदुशीरासवव्याख्यानं सुबोधमेव । मासं मासैकपर्यन्तं स्थापयेत् संधानवदित्यर्थः । भाण्डे मांसीमरिचधूपिते इति । मांसी जटाख्या भाण्डे साधनपात्रे केचित्तु अत्र मांसीमरिचचूर्णस्य प्रक्षेपमाहुः, रक्तपित्तमिति व्यस्तं मिलितं वा ॥ १३–१७ ॥

**गू०**—उशीरं वालकं पद्मं कमलं, काश्मरी गम्भारी, नीलमुत्पलं नीलकमलं, प्रियङ्गु, पद्मकं पद्मकाष्ठं, लोध्रं प्रसिद्धं, मञ्जिष्ठा, धन्वयासकं यवासा, पाठा, भूनिम्बः, न्यग्रोधो वटः, उदुम्बरो यज्ञीयवृक्षः, शठी कर्चूरः, पर्पटः कटुपत्रः, पुण्डरीकं श्वेतकमलं, पटोलं पत्रं, काञ्चनारं जम्बूला, जम्बूशाल्मलीनिर्यासः मोचरसः, एतान्प्रत्येकान्पलसंमितान्द्राक्षा विंशतिपलानि धातकीपुष्पाणि षोडशपलानि जलद्रोणद्वये क्षिपेत्, शर्करायास्तुलां पलशतं क्षौद्रस्य मधुनस्तुलां शतपलं मांसीमरिचधूपिते भाण्डे मासमेकं स्थापयेत् । उशीरासवः रक्तपित्तादिहरः । इति उशीरासवः ॥ १३–१७ ॥

### कुमार्यासवः—

**(सुपक्वरससंशुद्धं कुमार्याः पत्रमाहरेत् ॥ १८ ॥**
**यत्नेन रसमादाय पात्रे पाषाणमृन्मये ।**
**द्रोणे गुडतुलां दत्त्वा घृतभाण्डे निधापयेत् ॥ १९ ॥**
**माक्षिकं पक्वलोहं च तस्मिन्नर्धतुलां क्षिपेत् ।**
**कटुत्रिकं लवङ्गं च चातुर्जातकमेव च ॥ २० ॥**
**चित्रकं पिप्पलीमूलं विडङ्गं गजपिप्पली ।**
**चविकं हपुषा धान्यं क्रमुकं कटुरोहिणी ॥ २१ ॥**

१–प्रक्षिप्तम् । माक्षिकं मधु नतु माक्षिकधातुः, पक्वलोहं लोहचूर्णं, चातुर्जातकं चूर्णाध्यायोक्तं, क्रमुकं पूगीफलं, फलत्रिकं हरीतक्यादिकं, मधुरसा द्राक्षा ॥

मुस्ता फलत्रिकं रास्ना देवदारु निशाद्वयम् ।
मूर्वा मधुरसा दन्ती मूलं पुष्करसंभवम् ॥ २२ ॥
बला चातिबला चैव कपिकच्छूस्त्रिकण्टकम् ।
शतपुष्पा हिङ्गुपत्री आकल्लकमुटिङ्गणम् ॥ २३ ॥
पुनर्नवाद्वयं लोध्रं धातुर्माक्षिकमेव च ।
एषां चार्धपलं दत्त्वा धातक्यास्तु पलाष्टकम् ॥२४॥
पलं चार्धपलं चैव पलद्वयमुदाहृतम् ।
वपुर्वयःप्रमाणेन बलवर्णाग्निदीपनम् ॥ २५ ॥
बृंहणं रोचनं वृष्यं पङ्क्तिशूलनिवारणम् ।
अष्टावुदरजान्रोगान्क्षयमुग्रं च नाशयेत् ॥ २६ ॥
विंशतिं मेहजान्रोगानुदावर्तमपस्मृतिम् ।
मूत्रकृच्छ्रमपस्मारं शुक्रदोषं तथाऽश्मरीम् ॥ २७ ॥
कृमिजं रक्तपित्तं च नाशयेत्तु न संशयः । )

## पिप्पल्यासवः क्षयादौ ।

पिप्पली मरिचं चव्यं हरिद्रा चित्रको घनः ॥२८॥
विडङ्गं क्रमुको लोध्रः पाठा धात्र्येलवालुकम् ।
उशीरं चन्दनं कुष्ठं लवङ्गं तगरं तथा ॥ २९ ॥
मांसी त्वगेलापत्रं च प्रियङ्गुर्नागकेशरम् ।
एषामर्धपलान्भागान्सूक्ष्मचूर्णीकृताञ्शुभान् ॥३०॥
जलद्रोणद्वये क्षिप्त्वा दद्याद्गुडतुलात्रयम् ।
पलानि दश धातक्या द्राक्षा षष्टिपला भवेत् ॥३१॥
एतान्येकत्र संयोज्य मृद्भाण्डे च विनिक्षिपेत् ।
ज्ञात्वाऽऽगतरसं तस्य पाययेदग्न्यपेक्षया ॥ ३२ ॥
क्षयं गुल्मोदरं कार्श्यं ग्रहणीं पाण्डुतां गदम् ।
अर्शांसि नाशयेच्छीघ्रं पिप्पल्याद्यासवस्त्वयम् ॥३३॥

दी०—अथ पिप्पल्यासवमाह—पिप्पलीति । अयं पिप्पल्याद्यासवः क्षयादिरोगे प्रशस्तः । अत्र घनो मुस्तं, क्रमुकः पूगीफलं, धात्री आमलकी, एलवालुकं स्वनामख्यातं, कुष्ठं गन्धि कट्फलसदृशद्रव्यविशेषं, त्वक् वराङ्गं, शेषं प्रसिद्धम् । शुभानिति श्लक्ष्णान् वस्त्रगालितानित्यर्थः । ज्ञात्वागतरसमिति आगतरसं ज्ञात्वा तदनु दण्डेन कृत्वा घर्षयेत् । पश्चाद्वस्त्रगालितं प्रापयेत् । एके मासेनागतरसं भवतीति वदन्ति समीचीनमेतत् । अग्न्यपेक्षया अग्निबलापेक्षया एतदातुरविषयं, स्वस्थानां तु परिभाषोक्तमात्रया पानं । तद्यथा—'द्वावञ्जली स्तुत्तमायां मात्रा हीना च षट्पला । चतुष्पला मध्यमा च ग्राह्या सान्नं च सामिषं। अतोऽन्यथा भक्षणे हि शरद्ग्रीष्मऋतौ तथा । शोषादिकं प्रकुरुते विधिवत् तेन गृह्यते' इति ॥ २८–३३ ॥

गू०—घनो मुस्तकः, पूगीफलं, धात्री आमलकी, एलवालुकं हरिवालुकं सुगन्धद्रव्यं, मांसी जटामांसी, पत्रं पत्रं, एषां पिप्पल्यादीनां अर्धपलांश्चूर्णीकृतान् । जलद्रोणद्वये क्षिप्त्वा गुडतुलात्रयं दद्यात् । तुलापलशतं धातक्या दशपलानि द्राक्षा षष्टिपला एतानि चात्र योज्यानि । मृद्भाण्डे विनिक्षिपेत् आगतरसं प्राप्तरसं ज्ञात्वा अग्न्यपेक्षया पाययेत् । क्षयं गुल्मादिकं च नाशयेत् । अयं पिप्पल्यासवः । इति पिप्पल्यासवः ॥ २८–३३ ॥

## पाण्ड्वादौ लोहासवः ।

लोहचूर्णं त्रिकटुकं त्रिफलां च यवानिकाम् ।
विडङ्गं मुस्तकं चित्रं चतुःसंख्यापलं पृथक् ॥ ३४ ॥
धातकीकुसुमानां तु प्रक्षिपेत्पलविंशतिम् ।
चूर्णीकृत्य ततः क्षौद्रं चतुःषष्टिपलं क्षिपेत् ॥ ३५ ॥
दद्याद्गुडतुलां तत्र जलद्रोणद्वयं तथा ।
घृतभाण्डे विनिक्षिप्य निदध्यान्मासमात्रकम् ॥३६॥
लोहासवममुं मर्त्यः पिबेद्वह्निकरं परम् ।
पाण्डुश्वयथुगुल्मानि जठराण्यर्शसां रुजम् ॥ ३७ ॥
कुष्ठं प्लीहामयं कण्डूं कासं श्वासं भगन्दरम् ।
अरोचकं च ग्रहणीं हृद्रोगं च विनाशयेत् ॥ ३८ ॥

दी०—इदानीं लोहासवविवरणमाह—लोहचूर्णमिति । इमं लोहासवं मर्त्यः पुरुषः पिबेत्, यस्मात् परं वह्निकरं भवति लोहचूर्णमयश्चूर्णं, त्रिकटुकं प्रसिद्धम् । त्रिफलां हरीतक्यादिकं चतुष्पलमितं, पृथगिति प्रत्येकं कुडवप्रमाणमित्यर्थः । घृतभाण्ड इति चिक्कणत्वाद्दृढत्वात् । मासैकं यावत् संचितव्यं ततो जातरसं भवति । धातक्या विंशतिपलं गुडस्य च ( तुलां क्षिपेत् ) ॥ ३४–३८ ॥

गू०—अथ लोहासवः । लोहचूर्णादिकं पृथक् चतुःसंख्यापलं । चित्रं चित्रकं, क्षौद्रं मधु चतुःषष्टिपलं गुडतुलां जलद्रोणद्वये घृतभाण्डे विनिक्षिप्य मासमात्रं स्थापयेत् । इमं लोहासवं मर्त्यः पिबेत् । स्पष्टमन्यत् ॥ ३४–३८ ॥

## मृद्वीकारिष्टः ।

(मृद्वीकायाः पलशतं चतुर्द्रोणेऽम्भसः पचेत् ।
द्रोणशेषे सुशीते च पूते तस्मिन्प्रदापयेत् ॥ ३९ ॥
तुले द्वे क्षौद्रखण्डाभ्यां धातक्याः प्रस्थमेव च ।

१–प्रक्षिप्तम् । तत्र मृद्वीका गोस्तनी, केसरं नागकेसरम् ।

कङ्कोलकं लवङ्गं च फलं जात्यास्तथैव च ॥ ४० ॥
पलांशकं च मरिचत्वगेलापत्रकेसरम् ।
पिप्पली चित्रकं चव्यं पिप्पलीमूलरेणुके ॥ ४१ ॥
घृतभाण्डे विनिक्षिप्य चन्दनागरुधूपिते ।
कर्पूरवासितो ह्येष ग्रहण्या दीपनः परः ॥ ४२ ॥
अर्शसां नाशने श्रेष्ठ उदावर्तस्य गुल्मनुत् ।
जठरक्रिमिकुष्ठानि व्रणास्तु त्रिविधास्तथा ॥ ४३ ॥
अक्षिरोगशिरोरोगगलरोगांश्च नाशयेत् ।)

### अथारिष्टाः, तत्रादौ कुटजारिष्टः ज्वरादौ—

तुलां कुटजमूलस्य मृद्वीकार्धतुलां तथा ॥ ४४ ॥
मधूकपुष्पकाश्मर्यभागान्दशपलोन्मितान् ।
चतुर्द्रोणेऽम्भसः पक्त्वा क्वाथे द्रोणावशेषिते ॥४५॥
धातक्या विंशतिपलं गुडस्य च तुलां क्षिपेत् ।
मासमात्रं स्थितो भाण्डे कुटजारिष्टसंज्ञितः ॥४६॥
ज्वरान्प्रशमयेत्सर्वान्कुर्यात्तीक्ष्णं धनञ्जयम् ।

**दी०**—इदानीमरिष्टं दर्शयन्नाह—तुलामिति । अयं कुटजारिष्टः सर्वज्वरान् हन्ति इति । सर्वानिति अष्टप्रकारान् । अथच धनञ्जयमग्निं तीक्ष्णं पाचनसामर्थ्यं यथा स्यात् तथा कुर्यात् । अत्र कुटजो वृक्षविशेषः, मृद्वीका द्राक्षा, तुला पलशतं ज्ञेयं, मधूकपुष्पकाश्मर्यफलानां पृथक् दशपलानि देयानि । काश्मर्यफलाभावे छल्ली ग्राह्या । एतत् सकलं मासमात्रं यावत्संधितव्यम् ॥ ४४–४६ ॥

**गू०**—कुटजमूलस्य वत्सकमूलस्य तुलां पलशतं । मृद्वीका द्राक्षा तस्या अर्धतुलां पञ्चाशत्पलानि, मधुकद्रवा तत्पुष्पं, काश्मर्यं गम्भारी, एतौ दशपलौ बहुवचनं पुष्पाणां बहुत्वात्, अम्भसश्चतुर्द्रोणशेषे क्वाथे धातक्या विंशतिपलं गुडस्य च तुलां शतपलं क्षिपेत् मासमेकं च स्थापयेत् । ततः पिबेत् । अरिष्टः क्वाथसिद्धत्वात् क्वाथकरणम् ॥ ४४–४६ ॥

### अथ विडङ्गारिष्टः विद्रध्यादौ—

विडङ्गं ग्रन्थिकं रास्ना कुटजत्वक्फलानि च ॥ ४७ ॥
पाठैलवालुकं धात्री भागान्पञ्चपलान्पृथक् ।
अष्टद्रोणेऽम्भसः पक्त्वा कुर्याद्द्रोणावशेषितम्॥४८॥
पूते शीते क्षिपेत्तत्र क्षौद्रं पलशतत्रयम्।
धातकीं विंशतिपलां त्रिजातं द्विपलं तथा ॥ ४९ ॥
प्रियङ्गुकाञ्चनाराणां सलोध्राणां पलं पलम् ।
व्योषस्य च पलान्यष्टौ चूर्णीकृत्य प्रदापयेत् ॥५०॥
घृतभाण्डे विनिक्षिप्य मासमेकं निधापयेत् ।
ततः पिबेद्यथार्हं तु जयेद्विद्रधिमुत्थितम् ॥ ५२ ॥
ऊरुस्तम्भाश्मरीमेहान्प्रत्यष्ठीलाभगन्दरान् ।
गण्डमालां हनुस्तम्भं विडङ्गारिष्टसंज्ञकम् ॥ ५३ ॥

**दी०**—अथ विडङ्गारिष्टमाह—विडङ्गमिति । एष विडङ्गारिष्टो विद्रधिप्रभृतीन् रोगान् जयेत् । तत्राश्मरीरोगं । द्रव्याणि तु ग्रन्थिकं पिप्पलीमूलं । केचिद्ग्रन्थिकस्थाने क्रमुकमिति पठन्ति तत्र क्रमुकं पूगीफलं, रास्ना सुरसी, फलानीति कुटजफलानि, पाठा अम्बष्ठा, एलवालुकं प्रसिद्धम्, धात्री आमलकी एतत् पृथक्पञ्चपलपरिमितं पूते वस्त्रगालिते शीते हिमस्पर्शे । शीतग्रहणमत्र मधुमेलनत्वात् । 'उष्णैर्विरुध्यते मधु' इति वचनात् । त्रिजातमिति त्रिसुगन्धं विख्यातं, तच्च मिलित्वा द्विपलमित्यर्थः । व्योषस्य त्रिकटुकस्य मिलित्वाऽष्टौ पलानि । कर्तव्यताऽस्य व्यवहारतो बोद्धव्या । यथार्हमिति यथायोग्यं तेन दोषाद्यपेक्षया दातव्यमित्यर्थः ॥ ४७–५२ ॥

**गू०**—कुटजत्वक् वत्सकत्वक्, फलानि, इन्द्रयवा, पाठा अम्बष्ठा, एलवालुकं हरिवालुकं, धात्री आमलकी । विडङ्गादीन् पृथक्पञ्चपलानि अष्टद्रोणे जले पक्त्वा द्रोणावशेषितपूते वस्त्रपूते त्रिजातं एलात्वक्पत्रकानि । स्पष्टमन्यत् ॥ ४७–५२ ॥

### अथ देवदार्व्याद्यरिष्टः प्रमेहादौ—

तुलार्धं देवदारोः स्याद्वासा च पलविंशतिः ।
मञ्जिष्ठेन्द्रयवा दन्ती तगरं रजनीद्वयम् ॥ ५३ ॥
रास्ना कृमिघ्नं मुस्तं च शिरीषं खदिरार्जुनौ ।
भागान्दशपलान्दद्याद्यवान्या वत्सकस्य च ॥ ५४ ॥
चन्दनस्य गुडूच्याश्च रोहिण्याश्चित्रकस्य च ।
भागानष्टपलानेतानष्टद्रोणेऽम्भसः पचेत् ॥ ५५ ॥
द्रोणशेषे कषाये च पूते शीते प्रदापयेत् ।
धातक्याः षोडशपलं माक्षिकस्य तुलात्रयम् ॥५६॥
व्योषस्य द्विपलं दद्यात्त्रिजातस्य चतुष्पलम् ।
चतुष्पलं प्रियङ्गोश्च द्विपलं नागकेशरम् ॥ ५७ ॥
सर्वाण्येतानि संचूर्ण्य घृतभाण्डे निधापयेत् ।
मासादूर्ध्वं पिबेदेनं प्रमेहं हन्ति दुर्जयम् ॥ ५८ ॥
वातरोगान्ग्रहण्यर्शोमूत्रकृच्छ्राणि नाशयेत् ।
देवदार्वादिकोऽरिष्टः कण्डूकुष्ठविनाशनः[1] ॥ ५९ ॥

---

१–'दद्रुकुष्ठनिवारणः' पा० ।

दी०—अथ देवदार्वादिकारिष्टमाह—तुलार्धमिति। देवदारोरिति षष्ठ्यन्तत्वात् काष्ठं ग्राह्यं, वासा आटरूषकस्तस्य मूलं ग्राह्यं, इन्द्रयवाः कुटजबीजानि, दन्ती प्रसिद्धा, तगरं प्रसिद्धं, रजनीद्वयं हरिद्राद्वयं, रास्ना प्रसिद्धा, क्रुमिघ्नं विडङ्गं, शिरीषो वृक्षविशेषः, खदिरोऽपि वृक्षः, अर्जुन इति च वृक्षविशेषः, एतत् सकलं पृथक् दशपलपरिमितम् । सकलमिति मञ्जिष्ठादि अर्जुनान्तं यमान्यादिचित्रकान्तं पृथक् चाष्टपलमितं तत्र वत्सकः कुटजः रोहिणी कटुकीशब्दवाच्या पूते वस्त्रगालिते शीते शीतीभूते व्योषस्य मिलित्वा द्विपलं त्रिजातस्यापि मिलित्वा चतुष्पलानि । त्रिजातं त्रिसुगन्धं । प्रियङ्गोरिति फलानि । एष पूर्वयुक्त्या कर्तव्यः दृष्टव्यवहारेण वा ॥ ५३–५९ ॥

गू०—कृमिघ्नं विडङ्गं, अर्जुनं अर्जुनवृक्षः, वत्सकस्य कुटजस्य, चन्दनस्य रक्तस्य, रोहिण्या कटुरोहिण्या अष्टद्रोणे जले । स्पष्टमन्यत् ॥ ५३–५९ ॥

### अथ खदिरारिष्टं कुष्ठादौ—

खदिरस्य तुलार्धं तु देवदारु च तत्समम् ।
बाकुची द्वादशपला दार्वी स्यात्पलविंशतिः ॥ ६० ॥
त्रिफला विंशतिपला ह्यष्टद्रोणेऽम्भसः पचेत् ।
कषाये द्रोणशेषे च पूते शीते विनिक्षिपेत् ॥ ६१ ॥
तुलाद्वयं माक्षिकस्य तुलैका शर्करा मता ।
धातक्या विंशतिपलं कङ्कोलं नागकेशरम् ॥ ६२ ॥
जातीफलं लवङ्गैलात्वक्पत्राणि पृथक्पृथक् ।
पलोन्मितानि कृष्णाया द्द्यात्पलचतुष्टयम् ॥ ६३ ॥
घृतभाण्डे विनिक्षिप्य मासादूर्ध्वं पिबेन्नरः ।
महाकुष्ठानि हृद्रोगं पाण्डुरोगार्बुदे तथा ॥ ६४ ॥
गुल्मं ग्रन्थिं कृमीन्कासं श्वासं प्लीहोदरं जयेत् ।
एष वै खदिरारिष्टः सर्वकुष्ठनिवारणः ॥ ६५ ॥

दी०—अथ खदिरारिष्टमाह–खदिरस्येति । खदिरः प्रसिद्धः तथास्य सारो ग्राह्यः, देवदारोः काष्ठं तत्सममिति खदिरसारपरिमाणं, बाकुची सोमराजी तस्याः फलानि, दार्वी दारुहरिद्रा, त्रिफला हरीतकीप्रभृतिकफलत्रयं तत्र मिलित्वा विंशतिपलानि एतत् सकलं संकुट्य अष्टद्रोणे पानीये संक्काथ्य द्रोणशेषं ग्राह्यम् । तत्र वक्ष्यमाणद्रव्याणि प्रक्षिपेत् । तानि कानि इत्यत्राह— माक्षिकस्य मधुनः तुलैकेति । तुला पलशतमिति । धातक्या इति धातकीकुसुमानि, कंकोलं प्रसिद्धम्, त्वग् वराङ्गं । कृष्णा पिप्पली तस्याः पलचतुष्टयं । घृतभाण्डे इति । घृतावलिप्ते भाण्डे इति वा योज्यम् । एष खदिरारिष्टः कुष्ठेष्वपि प्रसिद्धः ॥ ६०–६५ ॥

गू०—बाकुची बकुची, दार्वी दारुहरिद्रा, कंकोलं मरिचकंकोलं, स्पष्टमन्यत् ॥ ६०–६५ ॥

### अथ बब्बूलारिष्टः क्षयकासादौ—

तुलाद्वयं तु बब्बूलयाश्चतुर्द्रोणे जले पचेत् ।
द्रोणशेषे रसे शीते गुडस्य च तुलां क्षिपेत् ॥ ६६ ॥
धातकीं षोडशपलां कृष्णां च द्विपलां तथा ।
जातीफलानि कङ्कोलमेलात्वक्पत्रकेशरम् ॥ ६७ ॥
लवङ्गं मरिचं चैव पलिकान्युपकल्पयेत् ।
मासं भाण्डे स्थितस्त्वेष बब्बूलारिष्टको जयेत् ॥ ६८ ॥
क्षयं कुष्ठमतीसारं प्रमेहश्वासकासकम् ।

दी०—अथ बब्बूलारिष्टमाह—तुलाद्वयं चेति । बब्बूलः कण्टकीवृक्षविशेषः । तस्य त्वग् ग्राह्या, कृष्णा कृष्णपिप्पली, शेषं सुगमम् । कर्तव्यताऽस्य पूर्ववत् ॥ ६६–६८ ॥

गू०—बब्बूल्या बब्बूलत्वचः तुलाद्वयं द्विशतपलानि चतुर्द्रोणजले पचेत्, पादशेषे तुलां गुडस्य क्षिपेत् । स्पष्टमन्यत् ॥ ६६–६८ ॥

### अथ द्राक्षारिष्टः पुष्ट्यादौ—

द्राक्षातुलार्धं द्विद्रोणे जलस्य विपचेत्सुधीः ॥ ६९ ॥
पादशेषे कषाये च पूते शीते विनिक्षिपेत् ।
गुडस्य द्वितुलां तत्र त्वगेलापत्रकेशरम् ॥ ७० ॥
प्रियङ्गुर्मरिचं कृष्णा विडङ्गं चेति चूर्णयेत् ।
पृथक्पलोन्मितैर्भागैस्ततो भाण्डे निधापयेत् ॥ ७१ ॥
समन्ततो घट्टयित्वा पिबेज्जातरसं ततः ।
उरःक्षतं क्षयं हन्ति कासश्वासगलामयान् ॥ ७२ ॥
द्राक्षारिष्टाह्वयः प्रोक्तो बलकृन्मलशोधनः ।

दी०—अथ द्राक्षारिष्टमाह—द्राक्षेति । समन्ततो घट्टयित्वेति समन्ततः सर्वतः सङ्घर्षयेदित्यर्थः । जातरसमिति मासमेकं यावद्भवति तावद् संधितं धारयेत् तस्माज्जातरसं भवति । मलशोधनो वातादीनां शोधनः पुरीषादिशोधनो वा, शेषं सुगमम् ॥ ६९–७२ ॥

गू०—द्राक्षातुलार्धं जलस्य द्विद्रोणे पचेत् पादशेषे कषाये सति पूते वस्त्रपूते शीते वा गुडस्य द्वितुलां क्षिपेत् समन्ततः मुद्रयित्वा जातरसं पिबेत् ॥ ६९–७२ ॥

**अथ रोहितकारिष्टः गुदजग्रहण्यादौ—**

रोहितकतुलामेकां चतुर्द्रोणे जले पचेत् ॥ ७३ ॥
पादशेषे रसे शीते पूते पलशतद्वयम् ।
दद्याद्गुडस्य धातक्याः पलषोडशिकं मतम् ॥ ७४ ॥
पञ्चकोलं त्रिजातं च त्रिफलां च विनिक्षिपेत् ।
चूर्णयित्वा पलांशेन ततो भाण्डे निधापयेत् ॥७५॥
मासादूर्ध्वं च पिबतां गुदजा यान्ति सङ्क्षयम् ।
ग्रहणीपाण्डुहृद्रोगप्लीहगुल्मोदराणि च ॥ ७६ ॥
कुष्ठशोफारुचिहरो रोहितारिष्टसंज्ञकः ।

दी०—अथ रोहितकारिष्टमाह—रोहितको वृक्षविशेषो विख्यातः तस्य मूलत्वक् ग्राह्या, पादशेषे द्रोणावशिष्टे रसे क्वाथे पूते वस्त्रगालिते शीते हिमस्पर्शे पलशतद्वयमिति तुलाद्वयं गुडस्येत्यन्वयः । पञ्चकोलमिति । पिप्पली पिप्पलीमूलं, चव्यं, चित्रकं, नागरम् इति पञ्चकोलम्, त्रिजातमिति त्रिसुगन्धं तच्च एलात्वक्पत्रकं, त्रिफला हरीतक्यादिकं एतत्पञ्चकोलप्रभृतिकं पृथक्पलपरिमितं ग्राह्यं शेषं सुगमम् ॥ ॥ ७३-७६ ॥

गू०—रोहितकं रोहिषतृणः, पञ्चकोलं पिप्पली पिप्पलीमूलं चव्यचित्रकनागरैरिति, त्रिजातं एलात्वक्पत्रजमिति, त्रिफला हरीतक्यादिका ॥ ७३-७६ ॥

**अथ दशमूलारिष्टः वातादौ—**

( पर्ण्यौ बृहत्यौ गोकण्टो बिल्वोऽग्निमन्थकोऽरलुः ७७
पाठला काश्मरी चेति दशमूलमिहोच्यते ।)
दशमूलानि कुर्वीत भागैः पञ्चपलैः पृथक् ॥ ७८ ॥
पञ्चविंशत्पलं कुर्याच्चित्रकं पौष्करं तथा ।
कुर्याद्विंशत्पलं लोध्रं गुडूची तत्समा भवेत् ॥७९॥
पलैः षोडशभिर्धात्री रविसंख्यैर्दुरालभा ।
खदिरो बीजसारश्च पथ्या चेति पृथक्पलैः ॥ ८० ॥
अष्टभिर्गणितैः कुष्ठं मञ्जिष्ठा देवदारु च ।
विडङ्गं मधुकं भार्गी कपित्थोऽक्षः पुनर्नवा ॥ ८१ ॥
चव्यं मांसी प्रियङ्गुश्च सारिवा कृष्णजीरकम् ।
त्रिवृता रेणुकं रास्ना पिप्पली क्रमुकः शठी ॥८२॥
हरिद्रा शतपुष्पा च पद्मकं नागकेशरम् ।
मुस्तमिन्द्रयवः शुण्ठी जीवकर्षभकौ तथा ॥ ८३ ॥
मेदा चान्या महामेदा काकोल्यौ ऋद्धिवृद्धिके ।
कुर्यात्पृथग्द्विपलिकान्पचेदष्टगुणे जले ॥ ८४ ॥
चतुर्थांशं शृतं नीत्वा भृङ्गाण्डे संनिधापयेत् ।
ततः षष्टिपलां द्राक्षां पचेन्नीरे चतुर्गुणे ॥ ८५ ॥
त्रिपादशेषं शीतं च पूर्वक्वाथे शृतं क्षिपेत् ।
द्वात्रिंशत्पलिकं क्षौद्रं दद्याद्गुडचतुःशतम् ॥ ८६ ॥
त्रिंशत्पलानि धातक्याः कङ्कोलं जलचन्दनम् ।
जातीफलं लवङ्गं च त्वगेलापत्रकेशरम् ॥ ८७ ॥
पिप्पली चेति संचूर्ण्य भागैर्द्विपलिकैः पृथक् ।
शाणमात्रां च कस्तूरीं सर्वमेकत्र निक्षिपेत् ॥८८॥
भूमौ निखातयेद्भाण्डं ततो जातरसं पिबेत् ।
कतकस्य फलं क्षिप्त्वा रसं निर्मलतां नयेत् ॥८९॥
ग्रहणीमरुचिं श्वासं कासं गुल्मं भगन्दरम् ।
वातव्याधिं क्षयं छर्दिं पाण्डुरोगं च कामलाम् ॥९०॥
कुष्ठान्यर्शांसि मेहांश्च मन्दाग्निमुदराणि च ।
शर्करामश्मरीं मूत्रकृच्छ्रं धातुक्षयं जयेत् ॥ ९१ ॥
कृशानां पुष्टिजननो वन्ध्यानां गर्भदः परः ।
अरिष्टो दशमूलाख्यस्तेजःशुक्रबलप्रदः ॥ ९२ ॥

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यमखण्डे आसवारिष्टकल्पना नाम दशमोऽध्यायः ॥

---

गू०—अथ दशमूलारिष्टमाह—दशमूलानि कुर्वीतेति । दशमूलं विख्यातमेव । तथाहि—'पर्ण्यौ बृहत्यौ गोकण्टो विल्वोऽग्निमन्थनोऽरलुः । पाटला काश्मरी चेति दशमूलमिहोच्यते' इति । तच्च पृथक् पञ्चपलमितं भवति । मिलित्वा पञ्चाशत्पलानि इत्यर्थः । पुष्करं तथेति पुष्करं पुष्करमूलं तदभावे कुष्ठं ग्राह्यम् । तथेति ग्रहणेनैतदपि पञ्चविंशतिपलमितं स्यात् । गुडूची तत्समा भवेदिति । तत्समा लोध्रपरिमाणसमा तेन विंशतिपलप्रमाणेयमपि बोद्धव्या । रविसंख्यैर्दुरालभेति दुरालभो धन्वयासकः । स च रविसंख्यैर्द्वादशकैः पलैरिति शेषः । खदिरः खदिरसारः, बीजसारः, रक्तपीतको वृक्षविशेषः, पथ्या हरीतकी एतत्त्रयं पृथक् पलाष्टकं देयं कुष्ठपूर्वकं वृद्धिप्रान्तं द्रव्यं पञ्चत्रिंशद्गणितं च पृथक् द्विपलप्रमाणं ज्ञेयम् । तत्र मधुकं मधुयष्टी, इक्षुरत्र इक्षुरसः एतच्च प्रचरति । तत्र 'कपित्थोऽक्षः, पुनर्नवा' इति पाठः । तेनाक्षः बिभीतकं, प्रियङ्गुर्लताविशेषः, सारिवा आस्फोता, त्रिवृन्निशोथः, रेणुका खनामतः ख्याता, क्रमुकः पूगीफलं, शठी कर्चूरभेदः, पद्मकं काष्ठं नतु कमलम् । इहाष्टवर्गेऽस्याप्रसिद्धत्वात् । समद्रव्याणि योज्यानि । अष्टगुणे जल इति सकलक्वाथ्यद्रव्यपरिमाणात् । शृतं क्वथितं चतुर्थांशं पादशेषम् ।

ततः इति पश्चात् । षष्टिपलमितां द्राक्षां चतुर्गुणे पानीये क्राथयित्वा त्रिपादशेषं ग्राह्यं पादहीनमित्यर्थः । चतुर्गुणताऽत्र द्राक्षापरिमाणात् एतदपि पूर्वक्राथे क्षिपेदित्यर्थः । दद्याद् गुडचतुःशतमिति । गुडस्य तुलाचतुष्कं ग्राह्यमित्यर्थः । कंकोलप्रभृतिपिप्पलीपर्यवसानं दशद्रव्यं पृथक् द्विपलमितं भवति तत्र जलं वालकं, चन्दनं श्वेतम् । जातरसः जातरसताऽत्र तत्कर्मकारकसकाशादवगन्तव्या । कतकफलप्रक्षेपं तन्निर्मलार्थम् । इदानीमेते अरिष्टादयोऽपि कच्छपयन्त्रेण साधिता दृश्यन्ते तद्गुणा एव भवन्ति च अतस्तज्ज्ञापनार्थं यन्त्रविधिमाह—'आसवादिकमुक्तं यत् सन्धानं चेद्विपाचयेत् । कच्छपे भिषजां श्रेष्ठस्तद्गुणं तस्य निर्दिशेत् । सम्यक् पक्वं ततो ज्ञात्वा न्यसेद्यन्त्रे प्रसाधयेत् । द्रव्यं सौगन्धिकं यच्च न्यसेत् पश्चाच्च पातयेत् । धाराऽधो दापयेदन्यं मृगनाभिं च कुङ्कुमम् । तेनासौ तु भवेन्नूनं सुगन्धश्च मनोरमः । क्लेददाहादिदोषं यच्छीघ्रं तेनोपशाम्यति । इति आसवादिकसिध्यर्थमयमेव विधिः स्मृतः। काञ्चने राजते पात्रे काचे वापि मनोहरे । रक्षणीयः प्रयत्नेन वृद्धवैद्योपदेशतः' इति । सौगन्धिकं द्रव्यमिति चन्दनादि प्रभृतिकं न्यसेदिति । 'संधानपात्रे केचिदासवादिकमुक्तं यत्' इत्यादि पाठं न पठन्ति आक्षेपकोऽयमिति वदन्ति यतो बहुपुस्तकेषु न दृश्यते ॥ ॥ ७७–९२ ॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यमखण्डे संधानकल्पनाध्यायो दशमः ॥ १० ॥

---

गू०—पर्ण्यौ शालिपर्णी पृश्निपर्णी, बृहत्यौ कण्टकारीद्वयं क्षुद्रा बृहती च, गोकण्टकः गोक्षुरः, बिल्वः, अग्निमन्थः अरणिः, अरलुः स्योनाकः, पाटला, काश्मरी गम्भारी, इदं दशमूलं दशमूलानि पञ्चपलैः, प्रत्येकमर्धपलं, पञ्चविंशत्पलं चित्रकः तावत्, पुष्करं पुष्करमूलं, गुडूची विंशत्पला, धात्री आमलकी षोडशपलैः, दुरालभा यवासा रविसंख्यैर्द्वादशपलैः, खदिरः, विजयसारः, पथ्या हरीतकी, एते पृथक् अष्टभिः पलैर्गणिताः । कुष्ठाद्यैः ऋद्धिवृद्ध्यन्तैः पृथक् द्विपलैः । ग्रन्थान्तरे—'आसवादिकमुक्तं यत्संधानं चेद्विपाचितं । कच्छपे भिषजा श्रेष्ठं तद्गुणं तस्य निर्दिशेत् । सम्यक्पक्वं ततो ज्ञात्वा न्यसेद्यंत्रे प्रसाधयेत् । द्रव्यं सौगन्धिकं यच्च न्यसेत् पश्चाच्च पाचयेत् । धाराधो दापयेन्नूनं मृगनाभिं च कुंकुमम् । तेन सौम्यं भवेन्नूनं सुगन्धं च मनोरमम् । क्लेददाहादिदोषं यत् शीघ्रं तेनोपशाम्यति । आसवादिकसिद्ध्यर्थमयमेव विधिः स्मृतः । काञ्चने रजते पात्रे काचे वापि मनोहरे । रक्षणीयं प्रयत्नेन आदिवैद्योपदेशतः' इति । आसवाद्यरिष्टसत्त्वपातनम् ॥ ७७–९२ ॥

इति श्रीकाशीरामवैद्यकृतायां गूढार्थदीपिकायां चिकित्सास्थाने आसवारिष्टाध्यायः ॥ १० ॥

---

## एकादशोऽध्यायः ।

अथेदानीं **धातूनां समुदायेन शोधनमारणं** दर्शयन्नाह—

**स्वर्णतारारताम्राणि नागवङ्गौ च तीक्ष्णकम् ।**
**धातवः सप्त विज्ञेयास्ततस्तान् शोधयेद्बुधः ॥ १ ॥**

**दी०**—तावत् पूर्वं तत्संख्याह यथा स्वर्णेति । स्वर्णादितीक्ष्णान्ताः सप्त धातवो विज्ञेयाः । विशेषेण सप्त धातवो बोद्धव्याः । यतस्तन्त्रान्तरे अष्ट धातव इति मन्यन्ते तत्राऽष्टधा लोहसंज्ञा । तथाहि—'स्वर्णं तारं ताम्रनागं रङ्गं कान्तं च तीक्ष्णकं । मुण्डान्तमष्टधा लोहं कांस्यारं घोषकं त्रिधा । उपलोहं समाख्यातं' इत्यादि । ततस्तान् शोधयेदथ इति बुधस्तद्विशेषज्ञः । तान् स्वर्णादीन् अत्र स्वर्णं प्रसिद्धम्, तारं रौप्यं, आरं पीतलोहं तच्च ताम्रघोषभेदाभ्यां संजातमित्येके भाषन्ते । अत्रैव घोषभेदो लोके जसद इति वाच्यः । **शिवमते** तु देवजातत्वेन षडेव ग्राह्याः । तथाहि—शिवस्य तेजः प्रथितो रसेन्द्रो देवीभवं गन्धमथाभ्रकं च । शुल्वं तु सूर्यस्य सहस्ररश्मेश्चन्द्रस्य रौप्यं परमेश्वरस्य ॥ हेमं तु विष्णोः प्रभवं वदन्ति नागं च नागस्य तु वासुकेश्च । लोहं यमस्यैव तु कालमूर्तेर्वङ्गं च शुक्रस्य पुराविदो बुधाः' इति । तस्मादारसंज्ञस्त्वौपाधिकः ॥ १ ॥

**गू०**—अथ धातुशोधनम् । स्वर्णादयः एते सप्तधातवो विज्ञेयास्तान् बुधः तद्दोषनिःसारणार्थं शोधयेत् । तारः रौप्यं इति, पित्तलो नागः, सीसकः सीसकं, तीक्ष्णलोहम् ॥ १ ॥

---

१–कच्छपयत्रं 'भट्टी' शब्दवाच्यम् ।

### इदानीं तच्छोधनमारणमाह—

**स्वर्णताराारताम्रायःपत्राण्यग्नौ प्रतापयेत् ।**
**निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥ २ ॥**
**गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ।**
**एवं स्वर्णादिलोहानां विशुद्धिः संप्रजायते ॥ ३ ॥**
**नागवङ्गौ प्रतप्तौ च गालितौ तौ निषिंचयेत् ।**
**त्रिधा त्रिधा विशुद्धिः स्याद्रविदुग्धेन च त्रिधा ॥४॥**

**दी०**—स्वर्णेति । सुवर्णादीनां चतुर्णां पत्राणि कृत्वा तानि चाग्नौ पुनः संतप्तानि कृत्वा वक्ष्यमाणद्रव्येषु त्रिधा त्रिवेलं यथा स्यान्निषिंचयेत् प्रत्येकमिति शेषः । एवं सुवर्णादीनां चतुर्णां विशुद्धिर्भवति स्वर्णादिलोहानामिति ग्रहणेन तीक्ष्णादीनामपि शुद्धिरेवं बोद्धव्या । अत्र तैलं तिलसंभवं च तक्रं त्रिभागभिन्नं काञ्जिकं प्रसिद्धम्, कुलत्थोऽन्नविशेषः । अथ नागवङ्गयोर्विशेषशुद्धिं दर्शयन्नाह—नागेति । प्रतप्तावित्यग्नौ संतापितौ अत एव गालिताविति द्रवीभूतौ कृत्वा तैर्निषिञ्चयेदिति[1], तैः पूर्वोक्ततैलतक्रादिद्रवैः, त्रिधा त्रिधेति प्रत्येकं तैलादिभिर्निषिञ्चयेदित्यभिप्रायः । विशेषमपि न केवलं पूर्वोक्तद्रव्यैर्निषिञ्चयेत् किंतु रविदुग्धेनार्कक्षीरेणाऽपि त्रिधा कृत्वा शोधयेदिति पूर्वशोधनादयमेव विशेषः ॥ २–४ ॥

**गू०**—अथ धातुशोधनं । स्वर्णादिधातूनां पत्राणि तैलादौ त्रिधा त्रिवारं अग्नौ प्रतापयेत् तप्त्वा तप्त्वा निषिंचयेत् निर्वापयेत् । एवं स्वर्णादिलोहानां शुद्धिः संप्रजायते । नागवङ्गयोर्विशेषेण शोधनमाह—तदा विशुद्धि स्यात् । ननु पित्तलः कृत्रिमस्तत्कथं सप्त?—उच्यन्ते, एके यशदेन सह सप्त आहुः । तथाच 'स्वर्णं रूप्यं च ताम्रं च रङ्गं यशदमेव च । सीसं लोहं च सप्तैते धातवो गिरिसम्भवाः' इति । अथ स्वर्णादिधातुमारणं तत्रादौ शार्ङ्गधरानुक्तमपि स्वर्णोत्पत्तिभेदशुद्धाशुद्धलक्षणमाह—**अथोत्पत्तिः** 'पुरा निजाश्रमस्थानां सप्तर्षीणां जितात्मनां । पत्न्यो विलोक्य लावण्यं लक्ष्मीसम्पन्नयौवनाः ॥ कन्दर्पदर्पविध्वस्तचेतसो जातवेदसः । पतितं यद्धराष्ठे रेतः सौवर्णतामगात् ॥' **अथ भेदाः** 'प्राकृतं सहजं वह्निसंभूतं खनिजं तथा । रसेन्द्रवेधसंजातं स्वर्णं पञ्चविधं मतं ॥ ब्रह्माण्डं संवृतं येन दुर्लभं प्राकृतं हि तत् । ब्रह्मव्रतं तु सहजं वह्निजं परिकीर्तितम् । एतत्स्वर्णत्रयं दिव्यं वर्णैर्यञ्चाशुभिर्युतं । धारणादेव तत्कुर्याच्छरीरमजरामरं ॥ खनिजं खननाज्जातं वेधजं रसवेधतः । तच्चतुर्दशवर्णाढ्यं भक्षितं सर्वरोगजित्' ॥ **अथाशुद्धस्वर्णपरीक्षा**—'श्वेताङ्गं कठिनं रूक्षं विवर्णं च समर्दलम् । दाहे च्छेदे सितं श्वेतं घर्षे चापि मलं त्यजेत्' ॥ २–४ ॥

### अथ स्वर्णमारणम्—

**स्वर्णाच्च द्विगुणं सूतमम्लेन सह मर्दयेत् ।**
**तद्गोलकसमं गन्धं निदध्यादधरोत्तरम् ॥ ५ ॥**
**गोलकं च ततो रुन्ध्याच्छरावदृढसंपुटे ।**
**त्रिंशद्वनोपलैर्दद्यात्पुटान्येवं चतुर्दश ॥ ६ ॥**
**निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः ।**

**दी०**—अथ धातुमध्ये स्वर्णमारणमाह—स्वर्णाच्चेति । सूतं पारदं तच्च सुवर्णपरिमाणात् द्विगुणं ग्राह्यम् । अम्लेन बीजपूरादिना तद्गोलकसमं गन्धमिति तत् स्वर्णपारदकृतेन गोलकेन साम्यं शोधितगन्धकं संगृह्य तद्गोलकस्याधः उपरि च दत्वा शरावसंपुटे संधार्य पुटेदिति ग्रन्थाभिप्रायः । सम्प्रदाये किञ्चिद्गन्धकं दत्वा गोलकं कार्यं पश्चात् शेषं गन्धमुपरि देयम् । दृढसंपुट इति । दृढग्रहणेन मृत्कर्पटकं सूच्यते तेन मृत्कर्पटकेनाऽत्र दृढता कार्या । एवं चतुर्दशपुटैः कृत्वा निरुत्थं जायते सुवर्णमिति शेषः । निरुत्थताऽत्रात्यर्थमूर्च्छना कथ्यते नतु स्वर्णस्य मृतिर्भवति[1] । पुटमत्र त्रिंशद्वनोपलैः कृत्वा देयम् । तच्च कुक्कुटपुटसंज्ञया विहितम् । वनोपलं शुष्कगोमयम्, तच्च करण्डाशब्दवाच्यम् । गन्धो देयः पुनः पुनः इति । शुद्धगन्धकं च पूर्वोक्तविधानेन प्रत्येकं पुटं योज्यमित्यर्थः ॥ ५ ॥ ६ ॥

**गू०**—स्वर्णस्य भूर्जवत्पत्रीकृतस्य कुट्टनेनेत्यर्थः । सूतं शुद्धं हिङ्गुलोत्थं वा द्विगुणं अम्लेन निम्बुकादिरसेन सह मर्दयेत् । तद्गोलकसमं गन्धकं अधरोत्तरं दद्यात् ऊर्ध्वाधः स एव मध्ये मुद्रयित्वा त्रिंशद्वनोपलैः पुटेत् । एवं चतुर्दशपुटात् निरुत्थं जायते । गन्धकस्तुल्यः पुटे पुटे देयः ॥ ५ ॥ ६ ॥

---

१—हंडिकायां द्रवाणि पूरयित्वा हंडिकामुखे 'चिलम' संज्ञकं धूम्रपानयन्त्रोपर्यग्निपात्रमधोनालीं कृत्वा बन्धयेत्, तच्छिद्रेणैव नागवङ्गौ पुनःपुनः निर्वाप्यौ नतु द्राविते वङ्गे द्रवाणि स्फुटतया निषिंचयेत् । उत्प्लुत्य हि तौ उपद्रवं कुरुतः ।

१—आधुनिका रसायनशास्त्रज्ञाः स्वर्णस्यात्यन्तमूर्च्छनैव भवति नतु भस्म इति वदन्ति । विविधप्रकारैः निष्पन्नस्वर्णविभूते रसायनशास्त्रतो विश्लेषणात् परीक्षायां जीवत्येव । केवलं तु चिक्कणप्रस्तर(सङ्गमर्मर)चणकाम्ललवणयोगतश्चोत्पन्नं स्वर्णाम्लं निरुत्थं भवति इति वदन्ति ।

### अथापरो विधिः—

**काञ्चने गालिते नागं षोडशांशेन निक्षिपेत् ॥ ७ ॥**
**चूर्णयित्वा तथाम्लेन घृष्ट्वा कृत्वा च गोलकम् ।**
**गोलकेन समं गन्धं दत्त्वा चैवाधरोत्तरम् ॥ ८ ॥**
**शरावसंपुटे धृत्वा पुटेत् त्रिंशद्वनोपलैः ।**
**एवं सप्तपुटैर्हेम निरुत्थं भस्म जायते ॥ ९ ॥**

**दी०**—अपरमपि स्वर्णमारणमाह—काञ्चन इति। काञ्चने स्वर्णे गालिते द्राविते सति तत्र नागं सीसकं निक्षिपेत् षोडशांशेन काञ्चनपरिमाणात् नागं ग्राह्यम्। अम्लं मातुलुङ्गप्रतीकं। अधरोत्तरमिति । गोलकस्योपरि चाधश्च गन्धकं देयम्। संपुटविधानं च पूर्ववत् कार्यम्। केचिदत्र वनोपलैर्विंशतिसंख्यकैरेव मन्यन्ते एवमिलनेन प्रकारेण सप्तपुटैः कृत्वा हेमभस्म भवति ॥७–९॥

**गू०**—काञ्चने स्वर्णे गालिते नागं सीसकं षोडशांशेन निक्षिपेत् । तच्चूर्णयित्वा अम्लेन घृष्ट्वा गोलकं कृत्वा समं गन्धकं ऊर्ध्वाधः शरावसंपुटे पूर्ववत् ॥ ७–९ ॥

### अन्यच्च स्वर्णमारणमाह—

**काञ्चनाररसैर्घृष्ट्वा समसूतकगन्धयोः ।**
**कज्जल्या हेमपत्राणि लेपयेत्सममात्रया ॥ १० ॥**
**काञ्चनारत्वचः कल्कैर्मूषायुग्मं प्रकल्पयेत् ।**
**धृत्वा तत्संपुटे गोलं मृन्मूषासंपुटे पचेत् ॥ ११ ॥**
**निधाय संधिरोधं च कृत्वा संशोष्य कोकिलैः ।**
**वह्निं खरतरं कुर्यादेवं दद्यात्पुटत्रयम् ॥ १२ ॥**
**निरुत्थं जायते भस्म सर्वकार्येषु योजयेत् ।**
**काञ्चनारप्रकारेण लाङ्गली हन्ति काञ्चनम् ॥ १३ ॥**
**ज्वालामुखी यथा हन्यात्तथा हन्ति मनःशिला ।**

**दी०**—काञ्चनारेति । काञ्चनारो वृक्षविशेषः प्रसिद्धः। तस्य पत्राणां त्वचो वा रसः स्वरसः, सूतकः पारदः गन्धकश्च समानस्तयोः कज्जली कार्येति सम्बन्धः। हेमपत्राणि स्वर्णपत्राणि सममात्रयेति । तया कज्जल्या समया स्वर्णपत्रपरिमाणया शेषं विधानं पूर्ववत्। कोकिलैरिति शुष्कगोमयसंज्ञैः अङ्गारैर्वा यतः वह्निं खरतरं कुर्यादिति ग्रहणात् एवमिलमुना प्रकारेण पुटत्रयमिलत्राग्नेर्बोद्धव्यम्। अथवा काञ्चनारप्रकारेण लाङ्गलीप्रकारमपि जानीयात्। लाङ्गली कलिहारी, अथवा ज्वालामुखीप्रकारमपि काञ्चनारप्रकारवद्बोद्धव्यम्। ज्वालामुखी जयन्ती सा चतुर्विधा भवति 'श्वेता रक्ता तथा पीता कृष्णा ज्वालामुखी भवेत्' इति। एतज्जातिचतुष्टयं श्वेता रक्ता रक्तादिकुसुमैः कृत्वा जानीयात् ॥ १०–१३ ॥

**गू०**—अन्यच काञ्चनाररसैः समसूतकगन्धयोः कज्जली हेमपत्राणि लेपयेत्। सममात्रया स्वर्णसममात्रया, स्पष्टमन्यत् ॥ १०–१३ ॥

### अथान्यदपि स्वर्णमारणप्रकारमाह—

**शिलासिन्दूरयोश्चूर्णं समयोरर्कदुग्धकैः ॥ १४ ॥**
**सप्तैव भावना दद्याच्छोषयेच पुनः पुनः ।**
**ततस्तु गालिते हेम्नि कल्कोऽयं दीयते समः ॥१५॥**
**पुनर्धमेदतितरां यथा कल्को विलीयते ।**
**एवं वेलात्रयं दद्यात्कल्कं हेममृतिर्भवेत् ॥ १६ ॥**

**दी०**—शिलेति । शिला मनःशिला, सिन्दूरः प्रसिद्धः, समयोः समानमानयोः, भावनापरिमाणं च यावद्द्रव्यं लुतं भवति गालिते प्रद्राविते हेम्नि सुवर्णे कल्कोऽयमिति । अयं कल्कः शिलासिंदूरजः। कल्कग्रहणेन सान्द्रो योज्यः । सम इति । स्वर्णमानसमः कल्क एवमिलमुना प्रकारेण वेलात्रयं त्रिवारमिलर्थः ॥ १४–१६ ॥

**गू०**—अन्यदपि स्वर्णमारणं । शिला मनःशिला सिन्दूरं तयोः समयोस्तुल्ययोश्चूर्णं अर्कदुग्धं दद्यात्। धमेत्ततो हेम्नि दुग्धकैः सप्तैव भागतो दद्यात् धमेत्ततो हेम्नि गालिते समः हेमसमः कल्कः दीयेत ततो धमेत्। यथा कल्को न तिष्ठति एवं क्षारत्रयं दद्यात् स्वर्णमृतिर्भवेत् ॥ १४–१६ ॥

### अथान्यप्रकारमाह—

**पारावतमलैर्लिम्पेदथवा कुक्कुटोद्भवैः ।**
**हेमपत्राणि तेषां च प्रदद्यादन्तरान्तरम् ॥ १७ ॥**
**गन्धचूर्णं समं धृत्वा शरावयुग्मसंपुटे ।**
**प्रदद्यात्कुक्कुटपुटं पञ्चभिर्गोमयोपलैः ॥ १८ ॥**
**एवं नवपुटान्दद्याद्दशमं च महापुटम् ।**
**त्रिंशद्वनोपलैर्देयं जायते हेमभस्मकम् ॥ १९ ॥**
**(सुवर्णं च भवेत्स्वादु तिक्तं स्निग्धं हिमं गुरु ।**
**बुद्धिविद्यास्मृतिकरं विषहारि रसायनम् ॥ २० ॥**

**दी०**—पारावतेति । पारावतः प्रसिद्धः मलं पुरीषं लिंपेत् इति हेमपत्राणीलर्थः । अथवा कुक्कुटोद्भवैरिति कुक्कुटस्ताम्रचूडः तदुद्भवैर्मलैरिति सम्बन्धः, तेषां स्वर्णपत्राणामन्तरान्तरान्तरं यथा स्यात् तथा स्वर्णपत्रसमं गन्धकचूर्णं देयं तानि च शरावयुग्मसंपुटे धृत्वा तत्सं-

१—क्षारत्रयं इति पा० । २—केचिदिमं न पठन्ति ।

पुटं कुक्कुटपुटविधानेन पाच्यम्, पञ्चभिर्गोमयोपलैरिति पञ्चसंख्याकैः शुष्कगोमयैः एवमित्यनेन प्रकारेण नवसंख्याकानि पुटानि दद्यात्। दशमं च महापुटमिति महापुटं त्रिंशद्वनोपलैः कृत्वा देयम्॥ १७–२०॥

**गू०**—तथाच पारावतेति सुगमं। अन्यच्च ग्रन्थान्तरात्। दरदं हिंगुलं स्वर्णतुल्यं नागं सीसकं मृतनागचूर्णं वज्रीक्षीरेण मर्दितं अस्य मध्ये सुवर्णस्य कल्कश्च म्रियते इति स्वर्णमारणम्॥ १७–२०॥

**इदानीं रौप्यमारणं प्रकटयन्नाह—**

**भागैकं तालकं मर्द्यं जम्बेनाम्लेन केनचित्।**
**तेन भागत्रयं तारपत्राणि परिलेपयेत्॥ २१॥**
**धृत्वा मूषापुटे रुद्ध्वा पुटेत् त्रिंशद्वनोपलैः।**
**समुद्धृत्य पुनस्तालं दत्त्वा रुद्ध्वा पुटे पचेत्॥ २२॥**
**एवं चतुर्दशपुटैस्तारं भस्म प्रजायते।**

**दी०**—भागैकमिति। तालकं हरितालं भागैकं तारपत्रभागादित्यर्थः, जम्बेन जम्बीरकरसेन अम्लग्रहणं मधुरजम्बीरनिषेधार्थं, केनचिदित्यनेन केनाप्यम्लेन वा कुतः जम्बीराभावात् तेन चुक्रादिकमपि ग्राह्यम्, तेन तालकेन सह भागत्रयमिति तारपत्राणि रौप्यपत्राणि प्रलेपयेत् भागत्रयं तालकपरिमाणात् पुटविधानं पूर्ववत् त्रिंशद्वनोपलैरित्यनेन महापुटं दर्शितम्। एवमित्युक्तपुटविधानेन चतुर्दशपुटकं बोद्धव्यम्॥ २१॥ २२॥

**गू०**—अथ रजतोत्पत्तिभेदानाह ग्रन्थान्तरात्—'त्रिपुरस्य वधार्थाय निर्निमेषैर्विलोचनैः। निरीक्षयामास शिवः क्रोधेन परिपूरितः॥ ततस्तूल्काभिसमये तस्मात् कस्माच्च लोचनात्। ततो रुद्रः समभवद्वैश्वानर इव ज्वलन्॥ द्वितीयस्मात् परं नेत्रादश्रबिन्दुस्तु कामुकात्। तस्माद्रजतमुद्भूतं शुक्रकर्मसु संस्थितं' इति। **अथ तद्भेदाः**—'सहजं खनिसंभूतं कृत्रिमं च त्रिधा मतं। रजतं पूर्वपूर्वं हि स्वगुणैरुत्तरोत्तरं। कृत्रिमं रसवादोत्थं किं वा रामपदोद्भवं। निःकल्मषं प्रभाहीनं दाहे च्छेदे सितं शुभं। अशुद्धं सर्वथा शोध्यं नागं दत्त्वा विचक्षणैः' इति। अथ मारणं भागैकमिति। स्पष्टमन्यत्॥ २१॥ २२॥

**अपरमपि तारमारणमाह—**

**स्नुहीक्षीरेण संपिष्टं माक्षिकं तेन लेपयेत्॥ २३॥**
**तालकस्य प्रकारेण तारपत्राणि बुद्धिमान्।**
**पुटेच्चतुर्दशपुटैस्तारं भस्म प्रजायते॥ २४॥**

**दी०**—स्नुहीक्षीरेणेति। पूर्वोक्तहरितालविधानवन्माक्षिकविधानेन कृत्वा चतुर्दशपुटानि यावत् भवन्ति तावत् तारं रौप्यं भस्म स्यात्। माक्षिकं धातुमाक्षिकं स्नुहीक्षीरेणेति स्नुही सेहुण्डभेदः॥ २३॥ २४॥

**गू०**—अन्यच्च। स्नुहीक्षीरेण सेहुण्डदुग्धेन संपिष्टमाक्षिकं स्वर्णमाक्षिकं मूत्रादौ शुद्धं तालकस्य प्रकारेण भागैकतारपत्राणि त्रिभागं त्रिलेपयेत् पुनः मूषासंपुटेन रुद्ध्वा चतुर्दशपुटैः पुटेत्। तारं भस्म प्रजायते। ग्रन्थान्तरे पारदेन मारणं कृतं तदपि लिख्यते तथाच 'विधाय पिष्टं सूतेन रजतस्याथ मेलयेत्। तालं गन्धं समं पश्चान्मर्दयेन्निम्बुकद्रवैः। द्वित्रिपुटैर्भवेद्भस्म योज्यमेतद्रसादिषु' इति। **अथ गुणाः** 'रूप्यं शीतं कषायाम्लं स्वादुपाकरसं सरं। वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित्। प्रमेहादिकरोगांश्च नाशयत्यचिरं ध्रुवम्॥ २३॥ २४॥

**पीतलोहमारणमाह—**

**अर्कक्षीरेण संपिष्टो गन्धकस्तेन लेपयेत्।**
**समेनारस्य पत्राणि शुद्धान्यम्लद्रवैर्मुहुः॥ २५॥**
**ततो मूषापुटे धृत्वा पुटेद्गजपुटेन च।**
**एवं पुटद्वयेनैव भस्मारं भवति ध्रुवम्॥ २६॥**
**आरवत्कांस्यमप्येवं भस्मतां याति निश्चितम्।**

**दी०**—अर्कक्षीरेणेति। आरं पीतलोहं तच्च ताम्रसंभवं वदन्त्येके, तेन गन्धककल्केन समेनारसमानेन शुद्धान्यम्लद्रवैर्मुहुरिति पूर्वं आरपत्राणि अम्लद्रवैर्जम्बीरप्रभृतिकैः मुहुरिति वेलात्रयं विशुद्धानि कृत्वा पश्चाद्गन्धककल्केन लेपयेदित्यभिप्रायः। गजपुटं पूर्वं दर्शितमेव एवमित्यमुना प्रकारेण पुटद्वयं कार्यम्। आरवदित्यादि। कांस्यं प्रसिद्धम्। आरवदित्यनेन शोधनमारणे चास्य तद्वदेवेति बोद्धव्यम्। एकमिति ग्रहणेन घोषमपि आरवदिति ज्ञेयम्। विशुद्धौ मारणे च। तथाहि 'कांस्यारघोषपत्राणि तेन कल्केन लेपयेत्। रुद्ध्वा गजपुटे पक्त्वा शुद्धिमायान्ति निश्चितम्। ताम्रवच्च मृतिं तेषां कृत्वा सर्वत्र योजयेत्' इति। घोषं कांस्यभेदः 'जसद' इति लोके॥ २५॥ २६॥

**गू०**—अथ आरमारणं। आरस्य पीतलोहस्य पत्राणि अम्लद्रवैर्निम्बुकाद्यैः शुद्धे मूषापुटे पचेत्॥ ॥ २५॥ २६॥

अपरमप्याह—

अर्कक्षीरवदाजं स्यात्क्षीरनिर्गुण्डिका तथा ॥ २७ ॥
ताम्ररीतिध्वनिवधे समगन्धकयोगतः।

दी०—अर्कक्षीरवदित्यादि। अर्कक्षीरप्रकारवदजाक्षीरेण गन्धककल्कं कार्यम्। तथाऽनेन प्रकारेण निर्गुण्डीस्वरसेन गन्धककल्कं कार्यमिति प्रयोगान्तरम्। ताम्रादीनां वधे मारणे। ताम्रारीत्यारं, ध्वनिः कांस्यं, समगन्धकयोगत इति। धातुसमानगन्धको ग्राह्य इत्यभिप्रायः ॥ २७ ॥

गू०—निर्गुण्डिका, ताम्रं प्रसिद्धं, रीतिः पित्तलिः, ध्वनिः कांस्यं तद्वधे तन्मारणे स्पष्टमन्यत् ॥ २७ ॥

सम्प्रति ताम्रमारणं दर्शयन्नाह—

सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद्बुधः।
वासरत्रयमम्लेन ततः खल्वे विनिक्षिपेत् ॥ २८ ॥
पादांशं सूतकं दत्त्वा याममम्लेन मर्दयेत्।
तत उद्धृत्य पत्राणि लेपयेद्द्विगुणेन च ॥ २९ ॥
गन्धकेनाम्लघृष्टेन तस्य कुर्याच्च गोलकम्।
ततः पिष्ट्वा च मीनाक्षीं चाङ्गेरीं वा पुनर्नवाम् ॥ ३० ॥
तत्कल्केन बहिर्गोलं लेपयेदङ्गुलोन्मितम्।
धृत्वा तद्गोलकं भाण्डे शरावेण च रोधयेत् ॥ ३१ ॥
वालुकाभिः प्रपूर्याथ विभूतिलवणाम्बुभिः।
दत्त्वा भाण्डमुखे मुद्रां ततश्चुल्ल्यां विपाचयेत् ॥ ३२ ॥
क्रमवृद्धाग्निना सम्यग्यावद्यामचतुष्टयम्।
स्वाङ्गशीतलमुद्धृत्य मर्दयेत्सूरणद्रवैः ॥ ३३ ॥
दिनैकं गोलकं कुर्याद्दद्यर्धगन्धेन लेपयेत्।
सघृतेन ततो मूषां पुटे गजपुटे पचेत् ॥ ३४ ॥
स्वाङ्गशीतं समुद्धृत्य मृतं ताम्रं शुभं भवेत्।
वान्तिं भ्रान्तिं क्लमं मूर्च्छां न करोति कदाचन ॥ ३५ ॥

दी०—सूक्ष्माणि ताम्रपत्राणि इति। सूक्ष्मत्वमत्र कण्टकवेधिसंज्ञम्। संस्वेदयेद्बुध इति अम्लेन काञ्जिकादिना वासरत्रयं दिनत्रितयं यावद्दोलायन्त्रेण स्वेदनं कुर्यादिति भावः। पत्राणामिति शेषः। सम्यक्ग्रहणं ताम्रस्यातिदोषनिवृत्तिं सूचयति। यद्यपि शुद्धिरस्य पूर्वं कथिता, तथाऽपि पुनः शोधनमस्य विषनिवृत्त्यर्थं कालिमाऽपगमार्थं च विहितम्, । यतः 'न विषं विषमित्याहुस्ताम्रमेव महाविषं । विषस्य चैकदोषस्तु शुल्बदोषोऽष्टधा मतः' । तद्यथा—'विषं मूर्च्छा विदाहश्च छर्दिः क्लेदनभेदने । सन्तापश्चारुचिश्चैव शुल्बदोषो विषोपमः' इति । कालिमारहितमपि । 'शुकतुण्डकिंशुकाभं छेदे रक्तं तथा मृदुस्निग्धम् । ताम्रं भवति सकृष्णं तच्छुद्धं कालिमारहितं' अतएवाम्लेन पुनः शोधनमभिहितं न दोषः। बुध इति तज्जात्यादिविशेषज्ञः। यतस्तत् ताम्रं द्विविधम्। एकं म्लेच्छसंज्ञमपरं नेपालमिति। तथाहि—'म्लेच्छं नेपालकं ताम्रं तयोर्नेपालमुत्तमम्। नेपालादन्यदेशोत्थं शुल्वं म्लेच्छमिति स्मृतं। सितकृष्णारुणच्छायं वान्तिभेदकरं च यत्। क्षालनाच्च पुनः कृष्णं ताम्रं म्लेच्छमुदाहृतम्। सुस्निग्धं मृदुलं रक्तं विशोधनक्षमं गुरु। त्रिदोषहरणं श्रेष्ठं क्षाराम्लैर्नैति वैकृतिम्। तन्नेपालकमित्युक्तं देहलोहविधायकम्। वान्तिभ्रान्तिज्वरहरं क्लेदभेदभ्रमापहम्' इति। तत इति पश्चात्। पादांशं सूतकमिति। सूतकं पारदं पादांशं, ताम्रमानचतुर्थांशं यामं प्रहरमेकं यावत् अम्लेन जम्बीरनिम्बुकप्रभृतिरसेन मर्दयेत् इति भावः। पुनस्तेनैवाऽम्लेन घृष्टेन द्विगुणगन्धकेन कृत्वा लेपयेत् पत्राणीति शेषः। द्विगुणता रसपरिमाणात्। ननु ताम्रमानात् अस्मत्सम्प्रदाये तु गन्धकं बहुतरं योज्यं तेन ताम्रमानाद्द्विगुणमित्यर्थः। अन्यत्राऽप्युक्तम् 'ताम्रपादेन सूतेन सार्धं पत्रं प्रलेपयेत्। ताम्राद्द्विगुणगन्धेन ह्यम्लपिष्टेन तत् पुनः। लिप्त्वा ह्यधोर्ध्वगं देयं सुपिष्टां चाम्लपत्रिकाम्। तत् पिण्डं भाण्डगर्भे तु रुद्ध्वा चुल्ल्यां विपाचयेत्' इत्यादि। तस्य कुर्याच्च गोलकमिति तस्य ताम्रमयद्रव्यस्य मीनाक्षी "मछेछी" शब्दवाच्या। चाङ्गेरी अम्लपत्रिका प्रसिद्धा तत्कल्केनेति त्रयाणां द्रव्याणां व्यस्तानां मिलितानां वा कल्कं वदन्ति तज्ज्ञाः। अङ्गुलोन्मितमिति अङ्गुलोत्सेधं त्रयाणामेकस्य वा अङ्गुलमत्र मध्यमाङ्गुलिमध्यपर्वसंज्ञम्। रोधयेदित्यनेन विभूतिलवणाम्बुभिः कृत्वा शरावसन्धौ मुद्रां कारयेदिति भावः। भाण्डमुखे च कारयेत्। विभूतिर्गोमयभस्म लवणमत्र पांशुलवणम्। अम्बु पानीयं क्रमवृद्धाग्निनेति मृदुमध्यखराऽग्निना शेषं सुबोधम्। ( अथ च मारितस्याऽस्य

१—अर्कक्षीरं वटक्षीरं निर्गुण्डी क्षीरिका तथा इ० पा०।

१—'न विषं विषमित्याहुस्ताम्रं तु विषमुच्यते। एक एव विषे ताम्रे त्वष्टौ दोषाः प्रकीर्तिताः। भ्रमो मूर्च्छा विदाहश्च स्वेदः क्लेदो वमिस्तथा। अरुचिश्चित्तसंताप इति दोषा विषोपमाः। तस्मात् शुद्धं तु संग्राह्यं ताम्रं रोगप्रशान्तये॥' इ० पा०। २—नास्ति 'ख' पुस्तके।

शुद्ध्यर्थं विधिमप्याह—'स्वांगशीतलमुद्धृत्येत्यादि तत्ताम्रं स्वाङ्गशीतलं संगृह्य पश्चात् सूरणद्रवैः कृत्वा दिनमेकं संमर्द्य पश्चाद्गोलकं कृत्वा सघृतेनार्धगन्धककल्केन गोलकं लेपयित्वा तदनु मूषान्तर्धृत्वा निरोध्य च गजपुटे पचेत् । अनेन तत् क्षणेन भक्षणयोग्यं भवति अर्धगन्धकं ताम्रपरिमाणात् । तेन ताम्रं भागद्वयं गन्धकमेकभागमित्यर्थः । घृतमपि गन्धकसाम्यं भवति) ॥ २८–३५ ॥

**गू०**—अथ ताम्राद्युत्पत्तिभेदमारणगुणाः—'उल्वं यत्कार्तिकेयस्य पतितं धरणीतले । तस्मादेतत्समुद्भूतं ताम्रमाहुः पुराविदः' इति । **अथ भेदाः** 'द्वावकौ नेपालम्लेच्छौ रसे नेपालमुत्तमं । सितं कृष्णारुणच्छायं म्लेच्छकं त्वतिवामि च । सुस्निग्धं मृदुलं शोणं नेपालं निर्विकारकं । इमं रूक्षमतिस्तब्धं श्वेतं वापि च वासहं । लोहनागयुतं चेति श्रुत्वा तद् दोषसप्तकं । एको दोषो विषे, ताम्रे त्वष्टौ दोषाः प्रकीर्तिताः । भ्रमो मूर्च्छा विदाहश्च स्वेदोत्क्लेदनवान्तयः । अरुचिश्चित्तसंतापः पाने दोषा विषोपमाः । विषवत्स्थापितं ताम्रं यत्नतः साध्यते हि तत्' इति । **अथ मारणं ।** मीनाक्षी मत्स्यगन्धा चांगेरी स्पष्टमन्यत् । अन्यच्च 'सूक्ष्माणि ताम्रपत्राणि पलद्वितयमात्रया । गोमूत्रे स्वेदयेन्नित्यमेकविंशतिवासरं ॥ पुनरम्ले विनिक्षिप्य स्थापयेद्दिनसप्तकं । सूततूर्यांशकं दत्वा तत्तुल्यं विडचूर्णकं ॥ पत्राणि खल्वे निक्षिप्य मर्दयेत्सर्वमेव तत् । दिनसप्तप्रमाणेन सर्वतुल्यं च गन्धकं ॥ कज्जलीकृत्य पत्रेषु अध ऊर्ध्वं प्रदापयेत् । हंडिकायां शरावेण मुद्रयित्वा विधानतः ॥ वालुकाभिः प्रपूर्याथ पाचयेत्प्रहरद्वयं । स्वाङ्गशीतं समुद्धृत्य भक्षयेद्रक्तिकाद्वयम् ॥ लवङ्गं पिप्पलीसार्धं कफरोगविनाशनम् । श्वासकासहरं ताम्रं वातघ्नं वह्निमांद्यजित् ॥ अत्यन्तकफरोगेषु वासा क्षुद्रा पिबेदनु' इति ग्रन्थान्तरात्ताम्रेश्वरः । 'ताम्रं कषायं मधुरं सतिक्तमम्लं च पाके कटु सारकं च । पित्तापहं श्लेष्महरं च शीतं तद्रोपणं स्याल्लघुलेखनं वा ॥ पाण्डुरर्शो ज्वरः कुष्ठं कासश्च क्षतसक्षयान्' । 'पीतं समस्तपित्तं शोथकफं शूलमुपाकरोति । प्राहुः परे बृंहणमल्पमेतत्' इति ताम्रगुणाः ॥ २८–३५ ॥

## अथ सीसकमारणमाह—

**ताम्बूलीरससंपिष्टशिलालेपात्पुनः पुनः ॥ ३६ ॥**
**द्वात्रिंशद्भिः पुटैर्नागो निरुत्थो याति भस्मताम् ।**

**दी०**—ताम्बूलीति । ताम्बूली ताम्बूलवल्ली प्रसिद्धा । नागः सीसकम् । शिला मनःशिला, सा चतुर्थांशा सम्प्रदायात् । पुनः पुनरिति । प्रत्येकपुटे मनःशिलया प्रलिप्य पुटेत् । एवं द्वात्रिंशत्पुटानि प्रसिद्धानि भवन्ति । नतु प्रत्येकपुटे वारंवारं प्रलेपनम् । प्रलेपनं त्वेकवारमेकपुटं प्रतीत्यर्थः ॥ ३६ ॥

**गू०**—अथ नागोत्पत्तिभेदविवरणम् 'दृष्ट्वा भोगिसुतां रम्यां वासुकिर्व्यमुचद्यतः । वीर्यं जातस्ततो नागः सर्वरोगापहो नृणां ॥ द्रवद्रावं महाभारं छेदे कृष्णं समुज्ज्वलं । पूतिगन्धि बहिः कृष्णं शुद्धं सीसमतोऽन्यथा' इति । अथ मारणं । शिला मनःशिला ताम्बूलरससंपिष्टनागपत्रलेपः त्रिंशद्भिः पुटैर्भोगी निरुत्थं भस्मतां याति ॥ ३६ ॥

## अथापरमपि नागमारणमाह—

**अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निक्षिपेत् ॥ ३७ ॥**
**मृत्पात्रे द्राविते नागे लोहदर्व्या प्रचालयेत् ।**
**यामैकेन भवेद्भस्म तत्तुल्यां च मनःशिलाम् ॥३८॥**
**काञ्जिकेन द्वयं पिष्ट्वा पचेद्दृढपुटेन च ।**
**स्वाङ्गशीतं पुनः पिष्ट्वा शिलया काञ्जिकेन च ॥३९॥**
**पुनः पुटेच्छरावाभ्यामेवं षष्टिपुटैर्मृतिः ।**

**दी०**—अश्वत्थचिञ्चात्वक्चूर्णमिति । अश्वत्थः पिप्पलः, चिञ्चा अम्लिका, चतुर्थांशं भस्मतः सीसकपरिमाणात्, एतेन वारंवारं भस्मनः क्षेपणमुक्तम्, नतु एकवारं, यतो वक्ष्यमाणवङ्गमारणे प्रोक्तं 'क्षिप्त्वा' इति तद्वदत्रापि । तेन यावन्नागस्य भस्म भवति तावत् क्षारं देयं; पश्चान्नागभस्मनः शिलां च काञ्जिकेन समं पिष्ट्वा सह दृढपुटे गजपुटसंज्ञके पचेत् । एवं षष्टिपुटैः कृत्वा मृतिर्भवति । षष्टिपुटान्यत्र शिलयैव सह कार्याणि नतु चिञ्चाश्वत्थयोर्भस्मना, भस्मसंस्कारस्त्वेकदैव ॥ ३७–३९

**गू०**—अन्यच्च । अश्वत्थः पिप्पलः, चिञ्चा अम्लिका, तस्योस्त्वक्चूर्णं । अन्यच्च 'त्रिभिः कुम्भपुटैर्नागो वासारसविमर्दितः । सशिलो भस्मतामेति तद्रजः सर्वरोगहृत्' इति ग्रन्थान्तरात् । कुम्भपुटैः गजपुटैः सशिलः मनःशिलया सहितः । इति नागमारणम् ॥ ३७–३९ ॥

## इदानीं वङ्गमारणं दर्शयन्नाह—

**मृत्पात्रे द्राविते वङ्गे चिञ्चाश्वत्थत्वचो रजः ॥ ४० ॥**
**क्षिप्त्वा क्षिप्त्वा चतुर्थांशमयोदर्व्या प्रचालयेत् ।**
**ततो द्वियाममात्रेण वङ्गभस्म प्रजायते ॥ ४१ ॥**
**अथ भस्मसमं तालं क्षिप्त्वाम्लेन प्रमर्दयेत् ।**
**ततो गजपुटे पक्त्वा पुनरम्लेन मर्दयेत् ॥ ४२ ॥**
**तालेन दशमांशेन याममेकं ततः पुटेत् ।**

**एवं दशपुटैः पक्वो वङ्गस्तु म्रियते ध्रुवम् ॥ ४३ ॥**

**दी०**—मृत्पात्रेति। मृत्पात्रं खर्परं, चिञ्चा अम्लिका, अश्वत्थः पिप्पलः, रजश्चूर्णमनयोर्वल्कलस्य क्षिप्त्वा क्षिप्त्वा इति वारंवारं चतुर्थांशमिति वङ्गपरिमाणात्, वल्कलचूर्णस्य एतत् परिमाणमेकवारं क्षेपणार्थं अतस्तावत् क्षिपेद्यावद्भस्म भवति तेन वङ्गपरिमाणसमं वल्कलरजः कार्यमिति सम्प्रदायः। अयोदर्व्या लोहमयदण्डेन अथेति पश्चात् कार्यकर्माह—भस्मसममित्यादि। तालं हरितालं, तद्वङ्गभस्म साम्यं भवति, तेन किमुक्तं? वङ्गभस्म हरितालं च सममात्रं संगृह्य अम्लेन काञ्जिकादिना विमर्द्य तद्गोलकाकारं कृत्वा शरावसम्पुटे धार्यं संपुटनिरोधं च कृत्वा गजपुटे पचेत् तत्पश्चात्तमुद्धृत्य पुनर्दशमांशेन तालकेन सह संमर्द्याम्लरसैः कृत्वा ततः पुटेत्। दश एवं सम्पुटविधानवदिति शेषः। अग्निपुटं तु किञ्चिन्न्यूनमिति सम्प्रदायः एवं दशपुटैः कृत्वा वङ्गो मृतो भवति ॥ ४०-४३ ॥

**गू०**—अथ वङ्गं। 'मिश्रकं खुरकं चेति द्विविधं वङ्गमुच्यते। खुरकं तु गुणैः श्रेष्ठं मिश्रकं न रसे हितं॥ धवलं मृदुलं स्निग्धं द्रुतद्रावश्च गौरवं। निःशब्दं खुरवङ्गं स्यात् मिश्रकं श्यामशुभ्रकं' इति। स्पष्टमन्यत् **अथ मारणं**। 'वङ्गो दाहकरः शीतः कफपीडामयान् जयेत्। क्रिमीनष्टादशविधान् प्रमेहान्नात्र संशयः' इति। केचिद्दाहहरः शीत' इति पठन्ति तत्र **मदनविनोदपथ्यापथ्यनिघण्ट्वादौ** वङ्गस्योष्णगुणस्य लिखितत्वात्। विशेषतस्तालेन मृत उष्ण एव भवतीति। **ग्रन्थान्तरात् वङ्गेश्वरः** 'शुद्धं सूतं शुद्धवङ्गं द्रावयित्वैकतश्चरेत्। तालकं तु द्वयोस्तुल्यं शटीद्रावेण मर्दयेत्। शुष्कं काचमये पात्रे पचेद्यामचतुष्टयं। तुर्यांशं तालकं दत्वा पुनर्यामत्रयं पचेत्। गुञ्जार्धं वाथ गुञ्जैकं बलमानेन भक्षयेत्। जयेद्वातं कफश्वासं कुष्ठं कासं भगन्दरं। वातरक्तं क्षयं वापि वह्निमांद्यं त्रिदोषकं। नाम्ना वङ्गेश्वरः सूतः सर्वरोगेषु पूजितः। पक्षाघातादिवातेषु प्रसूत्यादौ विशेषतः' इति वङ्गेश्वरः ग्रन्थान्तरात्। अथ वङ्गशोधनमारणानुपानाश्च विशेषत उच्यन्ते 'गोमूत्रे प्रथमं दद्यात् तक्रे दद्याद्द्वितीयकं। तृतीयं काञ्जिके देयं चतुर्थं कटुतैलके। शुभलग्नेन योगेन शोधनं कारयेद्भिषक्। निर्लिप्तं द्रावितं वङ्गं सर्वरोगेषु योजयेत्' इति वङ्गशोधनं। अथ मारणं—'चुल्ल्युपरि स्थितं पात्रं पाचयेद्यामकद्वयं। घर्षणं लोहदण्डेन चूर्णं देयं पुनः पुनः। प्रथमं रजनीचूर्णं दीप्यकं च द्वितीयकं। तृतीयं जीरकं द्वयं चतुर्थं तिंतिडीत्वचं। एवं क्रमेण चूर्णेन वङ्गं निश्चन्द्रिकं भवेत्। स्वाङ्गशीतं समुद्धृत्य भस्म चन्द्रसमं सितं। गुञ्जामात्रं प्रदातव्यं वङ्गभस्म सुभक्षितं। अनुपानं प्रवक्ष्यामि यथाव्याध्यनुपानतः। धात्रीस्वरससंयुक्तं प्रमेहं हन्ति दुस्तरं। शतावरीरसेनैव मूत्रकृच्छ्रविनाशनं। बहुमूत्रहरं तत्तु पारिभद्ररसेन तु। रजनीचूर्णमधुकं धात्रीफलरसेन तु। चतुःप्रकारं प्रदरं नाशयेन्नात्र संशयः। पञ्चतिक्तकषायेण पाययेत्सर्वकुष्ठजित्। शर्करामधुसंयुक्तं कूष्माण्डस्य रसेन तु। रक्तपित्तक्षयं कासं श्वासं हन्ति सुदुस्तरं। कण्टकारीरसेनैव पातव्यं पञ्चकासजित्। मुद्गं सशर्करं क्षौद्रं जांगलं पिशितं रसं। उदुंबरफलं चैव तन्दुलीयकवास्तुकं। रम्भाप्रसूतं चाङ्गेरीमयकं कदलीफलं। नवनीतं तथा क्षीरमभ्यङ्गस्नानमाचरेत्'। इति वङ्गकल्पः ॥ ४०-४३ ॥

## अथ लोहमारणमाह—

**शुद्धं लोहभवं चूर्णं पातालगरुडीरसैः।**
**मर्दयित्वा पुटेद्वह्नौ दद्यादेवं पुटत्रयम् ॥ ४४ ॥**
**पुटत्रयं कुमार्याश्च कुठारकुलत्थरसैः।**
**पुटषट्कं ततो दद्यादेवं तीक्ष्णमृतिर्भवेत् ॥ ४५ ॥**

**दी०**—शुद्धमिति। शुद्धं शोधितं जात्युत्कृष्टं वा शोधनमस्य पूर्वं कथितमेव। जातिभेदाः केषाञ्चिज्ज्ञापनार्थं लिख्यन्ते यथा—'देवाः सुरसमाजेन मथ्यमाने महोदधौ। समुत्पन्नं पुरा तस्मिन्नमृतं देवजीवनम्। पीयमानात्सुरैस्तस्मादुत्थिताः क्षुद्रबिन्दवः। ज्ञात्वा तान् भूगतान् बिन्दून् योगमासाद्य धूर्जटिः॥ लोहपाषाणरूपेण कृत्वा तान् वसुधातले। पापरोगाभिभूता ये मानवास्ते भजन्तु तान्॥ इत्येवं शिवगुप्ता ये सुधाया बिन्दवः परम्। तेषां मया समासेन कथ्यते साधनं स्फुटम्' इति। अथ जातिभेदा यथा यद्यपि नागार्जुनमते अष्टादश लोहजातयः सन्ति तद्यथ माण्डूरं, माण्डूकं, सारं, लोहं, मध्यसारलोहं, स्थूलसारलोहं, चक्रमर्दलोहं, बन्धलोहं, वज्रकलोहं, सुरायसं कलिङ्गं, भद्रलोहं, गरलस्थितलोहं, वज्रं, पाण्डिनिरवं अर्बुदकम्, कान्तं, कुलिशमिति तथाप्यन्येषां मते त्वष्टैव श्रेष्ठतमाः। तथाहि 'सामान्याद्द्विगुणं सारं तस्मादष्टगुणं कलिः। कलेः शतगुणं भद्रं भद्राद्वज्रं सहस्रधा वज्रात् षष्टिगुणं पाण्डिनिरिवाद्दशभिर्गुणैः। ततः को

द्विगुणं तस्मादयसः कान्तकं मतम्' इति । एतेषां व्यञ्जनं च तन्त्रान्तरादेव लिख्यते लक्षणविशेषं विना श्रेष्ठमश्रेष्ठं न ज्ञायते तस्माल्लिख्यते । यथा 'क्ष्माभृच्छिखराकारलिङ्गान्येवाम्लिते सति । दृश्यन्ते यत्र सूक्ष्माणि सारं च तदुदाहृतम् ॥ यत्र कृष्णायसे विशल्लक्षणानि सितानि च । पल्लवाल्पकृतीन्याहुस्तद्बुधाः कृष्णवज्रकम् ॥ यत्र कृष्णतरा भूमिर्वर्तुलाङ्गानि सर्वशः । रेखा स्याद्धेमवर्णा च तत्पिण्डी च विधीयते ॥ कलिस्वरसमावर्तो यदुक्तं च विचक्षणैः । किंचित्तत्स्थे जले क्षिप्तं तैलबिन्दुर्न सर्पति ॥ अपि केनापि कालेन निर्मलत्वं न मुञ्चति । श्रूयते यच्च कालेन निर्द्रवं तदयो मतम् । येन पर्वतसारेण भिद्यन्ते शुष्ककाष्ठवत् । अन्यानि गिरिसाराणि तत्तीक्ष्णं कान्तमुच्यते' ॥ कान्तस्य लक्षणमन्यत्राप्युक्तम् । 'पात्रे यस्मिन् प्रविशति जले तैलबिन्दुर्निषिक्तो हिङ्गुर्गन्धं विसृजति निजं तिक्ततां निम्बकल्कः । पाके दुग्धं भवति शिखराकारकं नैति भूमौ कान्तं लोहं भवति तदिदं लक्षणोक्तं नचान्यत् ॥' इति तस्मादेतेषां मध्ये कान्तलोहं श्रेष्ठतमं, यतः-'किट्टाद्दशगुणं मुण्डं मुण्डात्तीक्ष्णं शतोन्मितम् । तीक्ष्णाल्लक्षगुणं कान्तं भक्षणात्कुरुते गुणम् ॥ तस्मात् कान्तं सदा सेव्यं जरामृत्युहरं नृणां' इति । तच्च कान्तं चतुर्विधं भवति । तथाहि 'भ्रामकं शकटं चैव चुम्बकं द्रावकं तथा । चतुर्विधं भवेत् कान्तमेकैकं द्विगुणं मतम्' इति । जातिभेदाः संक्षेपेणोक्ताः । सम्प्रति मारणविधिरपि तेषां कथ्यते—लोहभवं चूर्णमित्यादि । पातालगरुडी पातालमूली प्रसिद्धा साच च्छिन्नरुहाऽऽकृतिस्तद्भेदश्च तदभावे छिरहण्टैव ग्राह्या पुटमत्र जगपुटम् । कुमारी प्रसिद्धा कुठारकुलत्थरसैरिति । कुठारः कुठारच्छिन्ना कुटजभेद इत्यन्ये तदभावे जम्बूत्वक् गृह्यन्त्यपरे; अस्मत्सम्प्रदाये कुठारच्छिन्ना लोके तिपानीतिशब्दवाच्यो द्रव्यविशेषो ग्राह्यः । कुलत्थोऽन्नविशेषः प्रसिद्धः । पुटषट्कमित्यनेन प्रत्येकं पुटत्रयं पूर्ववद्बोध्यम् ॥ ४४ ॥ ४५ ॥

गू०—अथ लोहमारणं । पातालगरुडी पातालमूली कुठारः अन्यच्च दरदं हिंगुलं तीक्ष्णगतवल्लीचूर्णं ॥ ॥ ४४ ॥ ४५ ॥

१–सा च वारि शब्दवाच्या दी० । २–सा च कुरैया शब्दवाच्यो द्रव्यविशेषः ।

**अन्यच्चेत्यपरमपि मारणमाह—**

**क्षिपेद्वा दशमांशेन दरदं तीक्ष्णचूर्णतः ।**
**मर्दयेत्कन्यकाद्रावैर्यामयुग्मं ततः पुटेत् ॥ ४६ ॥**
**एवं सप्तपुटैर्मृत्युं लोहचूर्णमवाप्नुयात् ।**
**रसैः कुठारच्छिन्नायाः पातालगरुडीरसैः ॥ ४७ ॥**
**स्तन्येन चार्कदुग्धेन तीक्ष्णस्यैवं मृतिर्भवेत् ।**

दी०—क्षिपेदिति । दरदं हिङ्गुलम् । दशमांशं दरदं लोहचूर्णात् । कन्यका कुमारी । पुटमत्र गजपुटविधानं यामयुग्ममिति मर्दनपरिमाणम् । एवमित्यनेन सप्तपुटैः कृत्वा सिद्धं भवति । अथवा कुठारच्छिन्नाया रसैः कृत्वा दरदं लोहचूर्णं च पूर्ववत् संमर्द्य पुटेत् । अनेनापि सप्तपुटैः सिद्धमेतत् । अथवा पातालगरुडीरसैस्तद्वदेव वा अथवा स्तन्येन पूर्ववद्योगः कर्तव्यः । अर्कदुग्धेन तद्वदेव प्रचारः । एतद्योगचतुष्टयं दरदसंबन्धि भवति । सप्तपुटसंबन्धि वा विज्ञेयं । अत्र कुठारच्छिन्ना प्रसिद्धा 'तिपानी' शब्दवाच्येत्यपरे, पातालगरुडी छिरहण्टः स्तन्यं स्त्रीभवं नान्यत् प्रयोगान्तरदर्शनात् । तथाच 'हिङ्गुलस्य पलान् पञ्च नारीस्तन्येन पेषयेत् । तेन लोहस्य पत्राणि लेपयेत् पलपञ्चकम्' इत्यादि ॥ ४६ ॥ ४७ ॥

गू०—अन्यच्च । रसैरिति । अन्यदपि सुगमम् ॥ ४६ ॥ ४७ ॥

**अन्यदपि मारणमाह—**

**सूतकाद्द्विगुणं गन्धं दत्त्वा कुर्याच्च कज्जलीम् ॥४८॥**
**द्वयोः समं लोहचूर्णं मर्दयेत्कन्यकाद्रवैः ।**
**यामयुग्मं ततः पिण्डं कृत्वा ताम्रस्य पात्रके ॥४९॥**
**घर्मे धृत्वा रुवूकस्य पत्रैराच्छादयेद्बुधः ।**
**यामार्धेनोष्णतां भूयाद्धान्यराशौ न्यसेत्ततः ॥५०॥**
**दत्त्वोपरि शरावं तु त्रिदिनान्ते समुद्धरेत् ।**
**पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत् ॥ ५१ ॥**
**एवं सर्वाणि लोहानि स्वर्णादीन्यपि मारयेत् ।**
**शिलागन्धार्कदुग्धाक्ताः स्वर्णाद्याः सर्वधातवः॥५२॥**
**म्रियन्ते द्वादशपुटैः सत्यं गुरुवचो यथा ।**

दी०—सूतकादिति । सूतं पारदं, गन्धं गन्धकं, द्वयोरिति पारदगन्धकयोः । कन्यका कुमारी, यामार्धेनोष्णता भूयादित्यनेन तद्द्रव्यपिण्डं घटिकाचतुष्टयं यावद्धर्मे धारयेदित्यर्थः । तत इति पश्चात् । दत्त्वोपरि शरावमित्यनेन तद्द्रव्यपिण्डं पूर्वम् । एरण्डपत्रैर्वेष्टयित्वा

पश्चात्ताम्रसंपुटे मृण्मयसंपुटे वा सन्निधाय तदनु धान्यराशौ स्थापयेदित्यर्थः। तथाहि—'शुद्धं सूतं द्विधा गन्धं कृत्वा खल्वेन कज्जलीम्। द्वयोः समं लोहचूर्णं मर्दयेत् कन्यकाद्रवैः॥ यामद्वयात् समुद्धृत्य तद्गोलं ताम्रपात्रके। आच्छाद्यैरण्डपत्रैश्च यामार्धेनोष्णता भवेत्' इत्यादि। एवमिति पूर्वोक्तविधिना सर्वाणि लोहानि कान्ततीक्ष्णमुण्डप्रभृतीनि स्वर्णादीनि अपि अनया युक्त्या च मारयेदिति भावः। आदिशब्द-ग्रहणात् रौप्यताम्रादयः। अपरमपि शिलागन्धार्क-दुग्धाक्ता इत्यादि सुगमम्। सत्यमित्यनेन वारितरं भवेदित्यर्थः। यथा गुरुवचस्तथाऽत्र बोद्धव्यम्। एतेन किमुक्तं? मृतं लोहं तु पश्चात् संस्कारितं कुर्यादित्यभि-प्रायः। तथाहि—'घृततुल्यं मृतं लोहं लोहपात्रगतं पचेत्। जीर्णे घृतं समादाय योगवाहेषु योजयेत्।' इत्यादि॥ ४८-५२॥

**गू०**—अथ लोकल्पः। 'पातञ्जले तथा तन्त्रे लोहा बहुविधा मताः। दुष्प्राप्यत्वान्निष्फलत्वाच्च लिख्यते हि भिदा मया। चारुत्वाद्धद्रवज्रं तु पाण्डिकान्तादयो यथा। रूपैर्गुणैश्च कथ्यन्ते ते नागार्जुनदेशतः॥ सामान्याद्द्विगुणं प्रोक्तं तस्मादष्टगुणं कलिः। कलेर्दशगुणं भद्रं भद्राद्वज्रं सहस्रधा॥ वज्रात् सहस्रगुणितात् पाण्डिनी दशभि-र्गुणैः। ततः कोटिसहस्रत्वादयः कान्तं महाफलम्॥' इति। तत्र विशेष उच्यते 'काञ्जीजितं तुलाङ्गं स्यादा-ज्यवर्णमयो विदुः। काशताडं कुशाङ्गं च शुल्वं गन्धो दुर्देशतं (?)॥ पंडितं द्विविधं कृष्णं शुक्लञ्च समतार्द्रकं। भद्रमेरण्डबीजाभं स्नुहीपत्रनिभं तथा॥ वज्रं दमनपत्रा-भमीषत् स्वर्णच्छविस्तथा। कान्तं मृदुतरं ताररुक्म-कान्तो सिताकरं॥ स्वादुर्यत्र भवेन्निम्बकल्को रात्रिदि-वोषितः। कान्तं तदुत्तमं यच्च शिलारूपेण वार्तिकं॥ कल्लोणमुत्तमं कान्तमतोऽन्यन्मध्यमं मतं।क्षुद्राडं गुरुताडं स्यात्कलिङ्गजमयो मतं॥ रुक्मारुक्मप्रतीकाशं तीक्ष्णं मृदुफलं मतं। तत्तदाऽकरसंभूतं तत्तद्रोगविनाशनं॥ तेन तस्य परीक्षायां याते मदिमदेतकं' इति(?)। लोहभेदाः। अथ मारणं—'वज्रं पद्मादिकं तेषां भेदा याज्यतमं शुभं। प्राक्पञ्चपलादूर्ध्वं यावदाषोडशं पलं'। अथ लोह-शोधनं'त्रिफलात्रिगुणैस्तोयैस्त्रिफला षोडशं पलं। तत्क्वाथे पादशेषे तु लोहस्य पलपञ्चकं॥ कृत्वा पत्राणि तप्तानि सप्तवारं निषेचयेत्। एवं प्रलीयते दोषो गिरिजो लोह-संभवः' इति। अथ मारणे पुटप्रशंसा—'पुटैर्दोषविनाशः स्यात् पुटादेव गुणोदयः। म्रियते च पुटाल्लोहं पुटांस्त-स्मात्समाचरेत्॥ यथा यथा प्रदीयन्ते पुटाश्च बहवोऽ-यसि। तथा तथा प्रवर्धन्ते गुणाः शतसहस्रशः। ताव-ल्लोहं पुटेद्वैद्यो यावच्चूर्णीकृतं जले। तन्निस्तरेल्लघुत्वेन नीरे तरति हंसवत्॥ तावच्च चूर्णयेदेवं यावत्कज्जलसंनिभं। करोति निहितं नेत्रे नैव पीडां मनागपि॥ पुटे पुटे क्वाथयित्वा स्थालीपाकं प्रदापयेत्। पुटैकमन्तरे वापि क्षालनं व्ययमीतितः' इति। अथ दोषभेदेन पुटानाह—'पाकः फलाम्बुदशमूलरसेन वायौ पित्ते तु शीतमधुरै-स्त्रिफलैर्विदार्याः। तज्ज्ञैः शतावरिजटास्वरसेन देयः श्ले-ष्माणके तु दशमूलरसार्द्रकेण॥ वातश्लेष्मविकारेषु क्षय-थौ विविधात्मके। वर्षाभूश्शृङ्गवेराभ्यां माणकेन विशेषतः' इति। माणकः माणकन्दः, 'पित्तानिले पित्तयुते च रक्ते द्राक्षाविदारीशतमूलिकाभिः। क्षीरकाकोली काकोल्या च मधूकपुष्पैः खर्जूरकेणापि तथैव देयाः। अथ व्याधिभेदेन पुटानाह-'जीर्णज्वरे गुडूची कासे श्वासे च शस्यते व्याघ्री। यक्ष्माऽसृक् पित्तरुजोर्वासा शस्ता बला नाम॥ नासा-व्रणशोणितशांत्यर्थं स्वरसयवदूर्वायाः। कक्केल्लिच्छलसलिलं शस्तं प्रदरेषु सर्वेषु॥ निचुलदलोद्भवसलिलैः प्रवाहिकायां च शस्यते सुतरां। ग्रहणीषु मुस्तकानां कुटजक्वाथा-तिसारेषु॥ मेहे वरावरे कृच्छ्रे पाषाणभेदिकातिवने। वर्षाभूनागरयोः क्वाथः श्वयथुप्रशान्त्यर्थं॥ गोमूत्रं त्रिषु शस्तं उदरापस्मारपाण्डुरोगेषु। अष्ठेषु माणकंदो गुल्मे रोहीतकः क्वाथः॥ हिक्काश्वासे ब्राह्मीभार्गीस्वरसेन शस्त-श्च। एरण्डनागरयोः क्वाथः सामेऽतिशस्तः॥ शूलेषु दश-मूलेन गोमूत्रेण फलाम्बुना। यकृति प्लीह्नि दातव्यो गृह-कन्यार्कजं पयः॥ देवदारुविडङ्गेन पलाशेन कृमौ मतः। कुष्ठे संपाकनिंबेन सप्तपर्णाटरूषकैः॥ भल्लातकेन वाकुच्य-वृन्दार्कैणाशनेन च। मधुरेक्षुरसंपाकैः अभीरूवरुणेन च। एरण्डतृणपञ्चानां मूले शैलुषकेन च। त्रिफलेन च कर्तव्यो मूलस्तम्भे त्रिदोषजे॥ अश्मरीषु च सर्वासु मूत्राघाते वि-शेषतः। वृक्षक्षीरामृता द्राक्षा अभीरूदशमूलकैः॥ वाजि-गन्धान्वितैरेभिः क्षयेषु च निगद्यते। अम्लपित्ते शता-वर्याः पुटा देयाश्च सर्वतः'। मुण्डिका शतमूली च चि-त्राङ्गकरिकर्णकेशराजैस्तु।मधुकगुडूचीमार्कवमुशलीभल्ला-तकैः कल्पे, रसायने नागबला हयगन्धा गोकर्णकवृद्ध-दारकामलकी, वाजीकरणे विहिता वानरीशतमूलिका क्षु-रिका ज्ञात्वैवं। रोगविशेषानेभिर्वारत्रयं पुटेन स्थालीपाके अधिकतः पुरुषस्वभावं बुद्धिमान् कथितमपि हेममौषध-

मुचितमुपादेयमन्यदपि । 'यः कल्पकामः कुरुते च लोहं स सर्वशङ्कापरिवर्जिताङ्गः। द्विरष्टवर्षाकृतिरेष नित्यं जीवेत् पृथिव्याममरोपमानः' इति । लोहकल्पः समाप्तः ॥ अथ किट्टं—'गोमूत्रत्रिफलाक्काथे तप्तं शोध्यं त्रिसप्तधा । स्वर्णादिसर्वलोहानां किट्टस्य च गुणावहं' इति लोहादिकिट्टमारणम् । अथ स्वर्णादिधातुभक्षणप्रमाणं—'यवद्वयं प्रयोक्तव्यं हेमगुञ्जाष्टकाऽवधि । तारं तद्द्विगुणं लोहमन्यत्तत्रिगुणात्मकम्' ॥ ४८–५२ ॥

**अथोपधातुशोधनमारणं, ते के उपधातवः ? इति दर्शयन्नाह—**

**माक्षिकं तुत्थकाभ्रे च नीलाञ्जनशिलालकाः ॥५३॥**
**रसकश्चेति विज्ञेया एते सप्तोपधातवः ।**

**दी०**—माक्षिकमिति । माक्षिकं धातुमाक्षिकं । तद्द्विविधं एकं स्वर्णमाक्षिकं अपरं तारमाक्षिकं कांस्यमाक्षिकमिति । तुत्थकं प्रसिद्धम् । अभ्रं अभ्रकं, नीलाञ्जनं प्रसिद्धम्, शिला मनःशिला, तालकं हरितालं, रसकं खर्परकः, सच तुत्थकभेदः । एते सप्तोपधातवः कथिताः ॥ ५३ ॥

**गू०**—अथोपधातुशोधनं मारणं । माक्षिकं स्वर्णमाक्षिकं, तुत्थं तुत्थकं, अभ्रं अभ्रकं, नीलाञ्जनं कृष्णाञ्जनम्, मनःशिला, आलकः हरितालकः, रसकः खर्परम् । एते सप्त उपधातवो ज्ञेयाः ॥ ५३ ॥

**अथ माक्षिकशोधनमारणम्—**

**माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च ॥५४॥**
**मातुलुङ्गद्रवैर्वाथ जम्बीरोत्थद्रवैः पचेत् ।**
**चालयेल्लोहजे पात्रे यावत्पात्रं तु लोहितम् ॥५५॥**
**भवेत्ततस्तु संशुद्धिं स्वर्णमाक्षिकमृच्छति ।**
**कुलत्थस्य कषायेण घृष्ट्वा तैलेन वा पुटेत् ॥ ५६ ॥**
**तक्रेण वाजमूत्रेण म्रियते स्वर्णमाक्षिकम् ।**
**कर्कोटीमेषशृङ्ग्युत्थैर्द्रवैर्जम्बीरजैर्दिनम् ॥ ५७ ॥**
**भावयेदातपे तीव्रे विमला शुध्यति ध्रुवम् ।**

**दी०**—इदानीं प्रत्येकेन शोधनमारणमाह—अथेत्यादि । माक्षिकस्येति स्पष्टम् । कर्कोटीति । विमला स्वर्णमाक्षिकभेदः, कर्कोटी वन्ध्याकर्कोटी ग्राह्या, मेषशृङ्गी वल्लीसंज्ञा प्रसिद्धा, एतयोर्द्रवैः सद्योरसैः पत्राणामिति शेषः । जम्बीरजैरिति जम्बीरफलरसैः दिनमिति मर्दयेत् इति शेषः । तेन प्रत्येकरसेन कृत्वा दिनैकं मर्दयेदित्यर्थः । आतपे तीव्र इति तीव्रघर्मे । तीव्रघर्माभावे अग्नौ शोधयेदित्यपि सम्प्रदायः । उक्तंच 'जम्बीराणां रसैः स्विन्नं मेषशृङ्गीरसेऽथवा । रम्भातोयेन वा पाच्यं घस्रं विमलशोधनम्' इति ॥ ५४–५७ ॥

**गू०**—यावत् पात्रं लोहितं रक्तं भवति तावत् पचेत् । तदा माक्षिकं शुद्धिमृच्छति शुद्धिं प्राप्नोति । ऋ गताविरयस्य ऋच्छादेशे प्रयोगः । माक्षिकं कुङ्कुभूतं नपुंसकत्वात् । अथ मारणं । कुलत्थस्येति स्पष्टमन्यत् । अथ तारमाक्षिकशोधनमारणं । कर्कोटी वन्ध्याकर्कोटी, मेषशृंगी प्रसिद्धा । अथ मारणं स्वर्णमाक्षिकवत् ॥ ५४–५७ ॥

**अथ तुत्थकशोधनमाह—**

**विष्ठया मर्दयेत्तुत्थं मार्जारककपोतयोः ॥ ५८ ॥**
**दशांशं टङ्कणं दत्त्वा पचेन्मृदुपुटेन तु ।**
**पुटं दध्ना पुटं क्षौद्रैर्देयं तुत्थविशुद्धये ॥ ५९ ॥**

**दी०**—विष्ठया मर्दयेत् इति विष्ठा पुरीषम् । मार्जारककपोतयोरिति मार्जारको बिडालः, कपोतः प्रसिद्धः अनयोः पुरीषं त्वनुमानतो ग्राह्यम्, टङ्कणं सौभाग्यक्षारं दशांशमिति तुत्थकपरिमाणात् । मृदुपुटं तु कुक्कुटपुटप्रभृतिकं पश्चाद्दध्ना कृत्वा पुटमेकं देयम् । तदनु क्षौद्रैरपि पुटमेकं दद्यादित्यर्थः ॥ ५८ ॥ ५९ ॥

**गू०**—अथ तुत्थशोधनं विष्ठयेति । ग्रन्थान्तरे चैवं शोधनं—'अतः विष्ठासमं तुत्थं सक्षौद्रं टंकणं कृतम् । त्रिवारं पुटितं शुद्धं वान्तिभ्रान्तिविवर्जनम्' ॥५८॥५९॥

**अथाभ्रकशोधनम्—**

**कृष्णाभ्रकं धमेद्वह्नौ ततः क्षीरे विनिक्षिपेत् ।**
**भिन्नपत्रं तु तत्कृत्वा तण्डुलीयाम्लयोर्द्रवैः ॥६०॥**
**भावयेदष्टयामं तदेवं शुद्ध्यति चाभ्रकम् ।**

**दी०**—अधुना अभ्रकशोधनमाह—कृष्णेति । कृष्णाभ्रकं वज्रजातिसंज्ञं कथितम् । यतस्त्वभ्रकं तु चतुर्विधं भवति । तथाहि तन्त्रान्तरादुत्पत्तिप्रभृतिकं लिख्यते यथा 'पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतम् । विस्फुलिङ्गास्ततस्तस्य गगनं परिसर्पिताः ॥ निपेतुर्मेघनिर्घोषात् शिखरेषु महीभृताम् । तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकम् ॥ तद्वज्रं वज्रजातत्वादभ्रमभ्ररवोद्भवात् । गगनच्युतजातत्वाद्रूचिरे गगनं सुराः ॥ तद्ब्राह्मणक्षत्रियविट्शूद्रभेदाच्चतुर्विधं । क्रमेणैव सितं रक्तं पीतं कृष्णं च वर्णतः ॥ पिनाकं दर्दुरं नागं वज्रं चेति चतुर्विधम् ।

पिनाकाद्यास्त्रयो वर्ज्या वज्रजातिं समाहरेत् ॥ मुञ्चत्यग्नौ विनिक्षिप्तं पिनाकं दलसंचयम् । दर्दुरं निहितं ह्यग्नौ कुरुते दर्दुरध्वनिम् ॥ नागं चाग्नौ विनिक्षिप्तं फूत्कारं च विमुञ्चति । वज्राभ्रकं तु वह्निस्थं न कचिद्विकृतिं व्रजेत् ॥ तस्माद्वज्राभ्रकं योज्यं व्याधिवार्धक्यमृत्युजित् । तत्र दक्षिणशैलेऽर्कशोषादल्पगुणं हि तत् ॥ अल्पसत्वं तदा धत्ते अभ्रे सत्वं गुणप्रदम् । अथ चोत्तरशैलोत्थं बहुसत्वं गुणाधिकं । शंसन्ति मुनयः सर्वे प्रयोगे कृष्णमभ्रकं' इति । शोधनं चाह—तण्डुलीयाम्लयोरिति । तण्डुलीयो मेघनादः, अम्लः काञ्जिकं, तदभावे जम्बीरप्रभृतिकं ग्राह्यम् । अष्टयामं द्वयोर्द्रव्ययोस्तेन प्रत्येकं चतुर्याममित्यर्थः ॥ ६० ॥

**गू०**—कृष्णाभ्रकमिति । ननु ग्रन्थान्तरे चतुर्विधमभ्रकमुक्तं, तद्यथा—'पिनाकं दर्दुरं नागं वज्रं चेति चतुर्विधं । तत् पुन्नपुंसकं ज्ञेयं प्रत्येकं तत्र लक्षणैः । **वङ्गसेनादाय**स्त्रिविधमाहुः 'वज्रं भेकवपुः कृष्णाभ्रकं च त्रिविधं मतं । ततः कृष्णं समादाय पाचयेत्कांजिके शुभे' इति । एतद्विवृणोति **त्रिविक्रमः**। ततः कृष्णं समादायेत्यनेन कृष्णत्वसाम्याद्वज्रकृष्णाभ्रयोर्ग्रहणं । भेकवपुः हरितपीतादिवर्णं त्याज्यं । अतः **शार्ङ्गधरेण** कृष्णस्यैव ग्रहणं कृतम् ॥ ६० ॥

**अथ मारणम् ।**

**कृत्वा धान्याभ्रकं तत्तु शोषयित्वाथ मर्दयेत् ॥ ६१ ॥**
**अर्कक्षीरैर्दिनं खल्वे चक्राकारं च कारयेत् ।**
**वेष्टयेदर्कपत्रैश्च सम्यग्गजपुटे पचेत् ॥ ६२ ॥**
**पुनर्मर्द्यं पुनः पाच्यं सप्तवारं प्रयत्नतः ।**
**ततो वटजटाक्वाथैस्तद्वद्देयं पुटत्रयम् ॥ ६३ ॥**
**म्रियते नात्र संदेहः सर्वयोगेषु योजयेत् ।**
**तुल्यं घृतं मृताभ्रेण लोहपात्रे विपाचयेत् ॥ ६४ ॥**
**घृते जीर्णे तदभ्रं तु सर्वयोगेषु योजयेत् ।**
**मृतं त्वभ्रं हरेन्मृत्युं जरापलितनाशनम् ॥ ६५ ॥**
**अनुपानैश्च संयुक्तं तत्तद्रोगहरं परम् ।**[1]

**दी०**—अथ मारणं यथा—कृत्वा धान्याभ्रकमित्यादि । धान्याभ्रकविधानं तु तन्त्रान्तरादवगन्तव्यं । तद्यथा—'बद्ध्वा धान्ययुते वस्त्रे मर्दयेत् काञ्जिकैः सह । आदायाऽधोगतं शुद्धं शुष्कं धान्याभ्रकं भवेत्' इति । अथवा 'चूर्णाभ्रं शालिसंयुक्तं बद्ध्वा कम्बलके तथा । त्रिरात्रं कांजिके स्थाप्यं तत् क्लिन्नं मर्दयेद्दृढम् । कम्बलाद्गलितं श्लक्ष्णो मारणादौ प्रशस्यते इति । वेष्टयेदर्कपत्रैश्चेत्यनेन चक्राकारं द्रव्यं पत्रैर्वेष्टयित्वाऽग्नौ पुटेत् । सम्यगिति ग्रहणेन तत् पत्रवेष्टितं चक्राकारं द्रव्यं खर्परे निधाय उपरि च खर्परं दत्वा तदूर्ध्वाधः आरण्यकोपलानि च दत्त्वाग्निं प्रज्वाल्य गजपुटे पुटेदिति तात्पर्यार्थः । एवं सप्तवारं यावत् पुटेत् । अर्कक्षीरैरेवेत्यर्थः । ततः पश्चाद्वटजटाक्काथैः कृत्वा पुटत्रयमेव देयम् । अथ मृताभ्रस्याऽपि शुद्धिमाह—तुल्यमित्यादि सुगमम् । अधुना मृताभ्रस्य गुणमप्याह—मृतमिति । केचिदमुं श्लोकं न पठन्ति, बहुस्थानेष्वप्रचारत्वात् ॥ ६१-६५ ॥

**गू०**—सुगमम् ॥ ६१-६५ ॥

**अथान्यप्रकारोऽभ्रकमारणस्य तमपि व्याचष्टे—**

**शुद्धं धान्याभ्रकं मुस्तं शुण्ठीषड्भागयोजितम् ॥ ६६ ॥**
**मर्दयेत्काञ्जिकेनैव दिनं चित्रकजै रसैः ।**
**ततो गजपुटं दद्यात्तस्मादुद्धृत्य मर्दयेत् ॥ ६७ ॥**
**त्रिफलावारिणा तद्वत्पुटेदेवं पुटैस्त्रिभिः ।**
**बलागोमूत्रमुसलीतुलसीसूरणद्रवैः ॥ ६८ ॥**
**मर्दितं पुटितं वह्नौ त्रिस्त्रिवेलं व्रजेन्मृतिम् ।**

**दी०**—शुद्धं धान्याभ्रकमिति । शुद्धिः पूर्वं कथिता । धान्याभ्रकविधानं पूर्वमेव प्रदर्शितम् । मुस्तं शुण्ठी च षड्भागयोजितं प्रत्येकं । षड्भागताऽत्र अभ्रकपरिमाणात् । काञ्जिकेन मर्दनं चैकदिनमित्यर्थः । त्रिफलावारिणा त्रिफलाक्काथेनेत्यर्थः । तद्वत् पुटेदिति गजपुटविधानेन । एवं पुटैस्त्रिभिरिति त्रिफलाक्काथेन पुटत्रयं दद्यादित्यभिप्रायः । एवमिति गजपुटविधानादिना बलाप्रभृतीनां पञ्चद्रव्याणां द्रवैः कृत्वा प्रत्येकेन त्रिवेलं मर्दितं पश्चाद्वह्नौ पुटितं चाभ्रकं मृतिं व्रजेदित्यर्थः । एके चात्र योगत्रयं मन्यन्ते तन्मते तु मुस्तप्रभृति चित्रकान्तैरेको योगः । केवलत्रिफलाया द्वितीयः । बलाप्रभृति सूरणान्तैस्तृतीय इति ॥ ६६-६८ ॥

**गू०**—अथान्यप्रकारः । पुटे संपुटे पुटत्रयं देयं । बला प्रसिद्धा । स्पष्टमन्यत् । इत्यभ्रकमारणम् ॥ ॥ ६६-६८ ॥

**अभ्रसत्वप्रकारः ।**[1]

**धान्याभ्रकस्य भागैकं द्वौ भागौ टङ्कणस्य च ।**
**पिष्ट्वा तदन्धमूषायां रुद्ध्वा तीव्राग्निना पचेत् ॥ ६९ ॥**
**स्वभावशीतलं चूर्णं सर्वयोगेषु योजयेत् ।**

१—चौराईशब्दवाच्यः ।

१—क्षेपकमिदम् ।

**अथ नीलाञ्जनम्—**

**नीलाञ्जनं चूर्णयित्वा जम्बीरद्रवभावितम् ॥ ७० ॥**
**दिनैकमातपे शुद्धं भवेत्कार्येषु योजयेत् ।**
**एवं गैरिककासीसटङ्कणानि वराटिका ॥ ७१ ॥**
**तौरी शङ्खं च कङ्कुष्ठं शुद्धिमायाति निश्चितम् ।**

**दी०**—सम्प्रति नीलाञ्जनशोधनविधिमाह—नीलाञ्जनमिति । नीलाञ्जनं प्रसिद्धम् । अस्य भेदः सौवीराञ्जनं श्वेतकृष्णवर्णभेदात् । एतस्मादपि सीसकोत्पत्तिर्जायते । जम्बीरद्रवभावितमिति जम्बीरफलरसेन भावितं शेषं सुगमम् । एवमित्यादि । एवं नीलाञ्जनशोधनप्रकारेणैव गैरिकादयो विशोध्याः । गैरिकं प्रसिद्धम् । गैरिकं स्वर्णगैरिकं च । कासीसमिति । तच्च द्विविधं । कासीसं पुष्पकासीसं च । कासीसं भस्मवदल्पमृत् पुष्पकासीसं तद्भेदः किञ्चित्पीतः, टङ्कणं सौभाग्यक्षारः, वराटिका कपर्दिका, शेषं प्रसिद्धम् । तौरी स्फटिका 'फिटकारी' शब्दवाच्यो मृद्भेदः । कङ्कुष्ठं सुवर्णक्षीरी, अस्य भेदः चोक इति प्रसिद्धः । सच रक्तक्षीरसेहुण्ड इति प्रतीतेः । निश्चितमित्यनेनान्यत् शोधनमपि नापेक्षयेत् । यतस्तन्त्रान्तरेष्वपि नानाप्रकारेण शोधनमस्ति तस्मादनेनैवाऽत्र शोधनमेतेषां प्रतिपादितम् ॥ ७० ॥ ७१ ॥

**गू०**—अथ गैरिककासीसटंकणवराटकाशङ्खतोरीशोधनं सुगमम् । एवं नीलाञ्जनप्रकारेण जम्बीरभावनयेत्यर्थः । गैरिकं प्रसिद्धं, कासीसं प्रसिद्धं, टङ्कणं क्षारः, वराटिका, शङ्खं, तोरी स्फटिका, कङ्कुष्ठं चोकनिर्यासः ॥ ॥ ७० ॥ ७१ ॥

**अथ मनःशिलाशोधनम्—**

**पचेत्र्यहमजामूत्रैर्दोलायन्त्रे मनःशिलाम् ॥ ७२ ॥**
**भावयेत्सप्तधा पित्तैरजायाः शुद्धिमृच्छति ।**

**दी०**—अथ मनःशिलाशोधनमाह—पचेदिति । मनःशिला प्रसिद्धा । दोलायन्त्रविधानं च सम्प्रदायतो लिख्यते । मनःशिलां कणशः कृत्वा कदलीदलैः संवेष्ट्य तदनु चतुर्गुणेन वस्त्रेण च पोट्टलीं बद्ध्वा मूत्रपूरिते भाण्डे विधिवत् स्वेदयेत् यावद्दिनत्रयं भवति । दिनग्रहणेन रात्रिरपि गृह्यते । तेनाहोरात्रमपि स्वेदयेत् इत्यभिप्रायः एके तु दिनत्रयमेव नतु रात्रौ स्वेदनं विहितम्, यतो रात्रावदृष्टत्वे दग्धादिभयात् तथाहि—'सुदृढे कदलीपत्रे वस्त्रखण्डे चतुर्गुणे । तन्मध्ये तान् विनिक्षिप्य बध्नीयाच्च सुपोट्टलीम् । क्षाराम्लमूत्रवर्गेण स्वेदयेच्च दिनत्रयम् । तथा स्वेदः प्रकर्तव्यो मज्जयेत् पोटली यथा । भवेन्नच तलस्पर्शो भाण्डस्यापि कदाचन' इति मन्यन्ते । ततो दोलायन्त्रप्रमाणमपि । 'द्रवद्रव्येण भाण्डस्य पूरितार्धस्य तस्य च । मुखे तिर्यक् कृते दण्डे यद्द्रव्यं सूत्रलम्बितम् । स्वेदयेत्तन्मध्यगतं दोलायन्त्रमिति स्मृतम्' इति । भावयेत् सप्तधा पित्तैरिति । तदनु स्वेदिता मनःशिला अजायाः पित्तद्रवैः कृत्वा सप्तधा घर्मे भावयेत् । भावनार्थद्रवस्तु यावद्द्रव्यं द्रावितं भवति एवं शुद्धिमृच्छतीति । एके 'क्षालयेदारनाले वा सर्वयोगेषु योजयेत्' इति पठन्ति तथा व्याख्यानयन्ति च ॥ ७२ ॥

**गू०**—पचेत्र्यहमिति । अन्ये एवमाहुः—'जयन्तीरससंपिष्टा शिला शुद्ध्यति घर्मणा । विषघ्नी च त्रिदोषघ्नी सा शुद्धा परिकीर्तिता' ॥ ७२ ॥

**अथ तालकशुद्धिः—**

**तालकं कणशः कृत्वा सचूर्णं काञ्जिके क्षिपेत् ॥७३॥**
**दोलायन्त्रेण यामैकं ततः कूष्माण्डजैर्द्रवैः ।**
**तिलतैले पचेद्यामं यामं च त्रिफलाजलैः ॥ ७४ ॥**
**एवं यन्त्रे चतुर्यामं पाच्यं शुध्यति तालकम् ।**

**दी०**—इदानीं तालकशोधनं प्रकटयन्नाह—तालकमिति । तालकं हरितालं सचूर्णकाञ्जिके क्षिपेदिति चूर्णं कणिकाभावमित्यर्थः । कथं ? यथा ईषच्चूर्णयुक्तं काञ्जिकं भाण्डे क्षिप्त्वा दोलायन्त्रविधानेन स्वेदयेत् । दोलायन्त्रविधिस्तु पूर्वं दर्शित एव । तत इत्यनेन यामैकं स्वेदनं सूचितम् । कूष्माण्डजैर्द्रवैरिति कूष्माण्डफलस्य सद्योरसैः क्वाथैर्वा । त्रिफलाजलैरिति । क्वथितत्रिफलाजलैः क्वथितत्रिफलातोयैः । शेषं सुगमम् ॥७३॥७४॥

**गू०**—कणशः खण्डशस्तालं हरितालचूर्णं कलिचूर्णसहितकाञ्जिके क्षिपेत् । दोलपात्रे यामं पचेत् हण्डिकायां काष्ठं दत्वा काष्ठे लम्बमानां पोट्टलिकां स्थापयेत् । इदं दोलायन्त्रं । स्पष्टमन्यत् ॥७३॥७४॥

**अथ रसकशुद्धिः—**

**नरमूत्रैश्च गोमूत्रैः सप्ताहं रसकं पचेत् ॥ ७५ ॥**
**दोलायन्त्रेण शुद्धिः स्यात्ततः कार्येषु योजयेत् ।**

**दी०**—अथ रसकशोधनं व्याचष्टे—नरमूत्रैरिति । रसकं खर्परकं, तच्च तुत्थभेदः । नरमूत्रैर्गोमूत्रैश्च पृथक् पचेत् नतु मिलितमूत्रद्वयैः । नरमूत्रं सप्ताहं यावत् चेत् दोलायन्त्रेण अथवा गोमूत्रैः 'सप्ताहात् स्वेदितः शुद्धो रसको नरवारिणा' इत्यादि वचनात् ॥ ७५ ॥

१ नास्ति खपुस्तके ।

गू०—रसकं खर्परं ॥ ७५ ॥

**अथेदानीं समुदायेन सत्वनिर्गमं प्रकटयन्नाह—**

**लाक्षा मीना पयश्छागं टङ्कणं मृगशृङ्गकम् ॥७६॥**
**पिण्याकं सर्षपाः शिग्रुर्गुञ्जोर्णागुडसैन्धवाः ।**
**यवास्तिक्ता घृतं क्षौद्रं यथालाभं विचूर्णयेत् ॥७७॥**
**एभिर्विमिश्रिताः सर्वे धातवो गाढवह्निना ।**
**मूषाध्माताः प्रजायन्ते मुक्तसत्वा न संशयः ॥७८॥**

टी०—लाक्षेति । लाक्षा प्रसिद्धा । शिग्रुर्शोभाञ्जनत्वक् मूलं वा । गुञ्जाफलानि, ऊर्णा मेषरोमाणि, गुडसैन्धवे प्रसिद्धे । यवतिक्ता सर्पाक्षी । यथालाभमिति व्यस्तं समस्तं वा ग्राह्यम् । सर्वे धातव इति धातुग्रहणेन उपधातव उपरसाश्च ग्राह्याः । यतः 'यन्त्रोपरि स्वभागेऽस्ति रसे तत्सर्वभाजने । कर्तव्यं तद्गुणाधिक्याद्रसज्ञैरिति निश्चितम्' इति । गाढवह्निना मूषाध्माता इति । तेन पातालयन्त्रेण वा यथायोग्यं सत्वनिर्गमं कारयेदित्यर्थः । तथाहि—'सर्वतुल्यं च धान्याम्लं भूनागं मृत्तिका पुनः । तथा पाषाणचूर्णानि कठिनोपरसाश्च ये । मेलयेन्माहिषैः पञ्चदुग्धादिशकृदन्तकैः । दृढं मर्द्य वटीं कुर्यात् कर्षमात्रं च शोषयेत् । कोटीयन्त्रैर्धमेद्गाढवङ्गारे खादिरोद्भवैः । त्रिवारं ध्मापयेदेवं सत्वं पतति निर्मलम् । असाध्यान्मोचयेत् सत्वमभ्रकादेस्तु का कथा' कोटीयन्त्रं प्रसिद्धमेतत् । **पातालयन्त्रनलिकायन्त्रयोः स्वरूपं लिख्यते—**




नलिकासम्पुटयन्त्रमेतत्

१–संगवसरीति लोके ।




ग० पातालयन्त्रम्

एतेषां सत्वनिर्गमः सम्प्रदायतो यथा गुरुसकाशां दृष्ट्वा वा कार्यो न दोषः ॥ ७६—७८ ॥

गू०—अथ सत्वनिर्गमः । धमनद्रव्यात् लाक्षादयः प्रत्येकमष्टमांशाः टङ्कणं चतुर्थांशमिति ग्रन्थान्तरात् । धमनाद्धातव इति निरुक्तेः । अभ्रादिसत्वद्रव्याणि तेन नागताम्रादिद्रव्याणि ग्राह्याणि । मीनाः क्षुद्रमत्स्याः । यवतिक्ता सर्पाक्षी । यद्वा यवः प्रसिद्धः । तिक्ता कटुकी ॥७६–७८॥

**अथ रत्नानां शोधनमारणम्—**

**कुलत्थकोद्रवक्वाथैर्दोलायन्त्रे विपाचयेत् ।**
**व्याघ्रीकन्दगतं वज्रं त्रिदिनं तद्विशुध्यति ॥ ७९ ॥**
**तप्तं तप्तं तु तद्वज्रं खरमूत्रैर्निषेचयेत् ।**
**पुनस्तप्यं पुनः सेच्यमेवं कुर्यात्त्रिसप्तधा ॥ ८० ॥**
**मत्कुणैस्तालकं पिष्ट्वा यावद्भवति गोलकम् ।**
**तद्गोले निहितं वज्रं तद्गोलं वह्निना धमेत् ॥ ८१ ॥**
**सिञ्चयेदश्वमूत्रेण तद्गोले च क्षिपेत्पुनः ।**
**रुद्ध्वा ध्मातं पुनः सेच्यमेवं कुर्यात्त्रिसप्तधा ॥८२॥**
**एवं च म्रियते वज्रं चूर्णं सर्वत्र योजयेत् ।**

टी०—रत्नानां शोधनमारणमप्याह—तावत्पूर्वं वज्रस्य शोधनमाह—कुलत्थकेति । वज्रं हीरकं । तच्चतुर्विधं भवति । तथाहि—'श्वेतरक्तपीतकृष्णाश्चतुर्धा वज्रजातयः । रसायने भवेद्विप्रः शुभ्रः सिद्धिप्रदायकः ॥ क्षत्रियो मृत्युजिद्रक्तो बलीपलितरोगहा । धनप्रदो भवेद्वैश्यः पीतो देहस्य दार्ढ्यकृत् ॥ कृष्णः शूद्रो रुजां हन्ता वपुस्तम्भं करोति च । पुंस्त्रीनपुंसकाश्चैते लक्षणेन तु लक्षयेत् ॥ सुवृत्ताः फलसंपूर्णास्तेजोवन्तो

बृहत्तराः । पुरुषास्ते समाख्याता रेखाबिन्दुविवर्जिताः ॥ रेखाबिन्दुसमायुक्ताः षडस्रास्ताः स्त्रियः स्मृताः । त्रिकोणदेहदीर्घं च तन्नपुंसकमेव च ॥ पूर्वपूर्वं तु ते श्रेष्ठाः पुरुषा रसबन्धकाः । शरीरकान्तिजनका भोगदा वज्रयोषितः । नपुंसकास्त्वल्पवीर्या अकामाः सत्त्ववर्जिताः । स्त्रियः स्त्रीणां प्रदातव्याः क्लीबे क्लीबं तथैव च ॥ सर्वेषां सर्वदा योज्याः पुरुषा बलवत्तराः' इति । अन्यत्राऽपि 'पञ्च दोषा गुणाः पञ्च छाया चैव चतुर्विधा। श्वेता रक्ता तथा पीता कृष्णा चैव निगृह्यते ॥ षट्कोणं लघु तीक्ष्णं च बृहदष्टदलं च यत् । जले तरति तद्वज्रं तद्ग्राह्यं रसकर्मणि' इति । एतस्य शोधनादिकमप्याह— कुलत्थेत्यादि । कुलत्थोऽन्नविशेषः प्रसिद्धः । कोद्रवोऽप्यन्नविशेषः । क्वाथेन कृत्वा दोलायन्त्रे विपाचयेदित्यभिप्रायः । तप्तमिति दोलायन्त्रस्वेदितं तद्वज्रं पश्चादग्नौ संतप्तं कृत्वा तदनु खरमूत्रे निषेचयेत् । एवं त्रिसप्तधा कृत्वा मृतं वज्रं श्रेष्ठं भवतीत्यर्थः । केचित्तु दोलायन्त्रे स्वेदनं अहोरात्रेणैव भवति । तथाच तन्त्रान्तरे 'कुलत्थकोद्रवक्वाथे दोलायन्त्रेण पाचयेत् । अहोरात्रात् समुद्धृत्य हयमूत्रेण भावयेत्' इति ॥ ७९–८२ ॥

गू०—अथेत्यनन्तरं शार्ङ्गधरानुक्तमपि रत्नसंख्यामाह—तत्र पञ्च नवरत्नानि भवन्ति तान्याह—'पञ्चरत्नानि मुख्यानि उपरत्नचतुष्टयं । वज्रं मुक्ताफलं चैव प्रवालं मार्कतं तथा । पुष्परागं नीलवज्रं गोमेदं च विडूर्यकं । नवरत्नानि चैतानि शोधयेन्मारयेद्भिषक्' इति । वज्रं हीरकं, प्रवालं विद्रुमं, मरकतः तद्धरितवर्णं, पुष्परागं चम्पकहेमवर्णाभं, नीलं इन्द्रनीलं नीलवर्णं, वैडूर्यकं वैदूर्यमणिर्विडालनेत्रवर्णं नीलपीतवर्णं । अथ वज्रशोधनं–व्याघ्रीकन्दं गुहरीकन्दं इति शोधनं । अथ मारणं । खरो गर्दभः । मत्कुणः खट्वमल्लः । अन्यदपि हिंग्विति । अन्यच्च सुगमम् ॥ ७९–८२ ॥

**अथान्यदपि वज्रमारणमाह—**

**हिङ्गुसैन्धवसंयुक्ते क्वाथे कौलत्थजे क्षिपेत् ॥ ८३ ॥**
**तप्तं तप्तं पुनर्वज्रं भूर्याच्चूर्णं त्रिसप्तधा ।**

दी०—हिङ्गुसैन्धवेति । कुलत्थं प्रसिद्धम् । तद्भवे क्वाथे हिङ्गुसैन्धवकल्केन वज्रं लिप्त्वाऽग्नौ संताप्य कुलत्थक्वाथेनैव सेचयेदिति सम्प्रदायः ॥ ८३ ॥

१–वज्रकमृतिनैव सुगमा । खरदंष्ट्रामध्ये भवत्येव इति केचन ।

**अपरमपि वज्रमारणमाह—**

**मण्डूकं कांस्यजे पात्रे निगृह्य स्थापयेत्सुधीः ॥ ८४ ॥**
**स भीतो मूत्रयेत्तत्र तन्मूत्रे वज्रमावपेत् ।**
**तप्तं तप्तं च बहुधा वज्रस्यैवं मृतिर्भवेत् ॥ ८५ ॥**

दी०—मण्डूकमिति । मण्डूकानां मूत्रविधानमत्र सुबोधं ज्ञातव्यम् । तत्रादौ वज्रमग्नौ संतप्तं कृत्वा तन्मण्डूकमूत्रे आवपेत् । सेचयेदित्यर्थः । तप्तं च बहुधा इति कोऽर्थः सप्तवारं यावत्कुर्यादित्यर्थः ॥ ८४ ॥ ८५ ॥

**इदानीं वैक्रान्तमारणमाह—**

**वैक्रान्तं वज्रवच्छोध्यं नीलं वा लोहितं तथा ।**
**हयमूत्रेण तत्सेच्यं तप्तं तप्तं द्विसप्तधा ॥ ८६ ॥**
**ततस्तु मेषदुग्धस्य पञ्चाङ्गे गोलकं क्षिपेत् ।**
**पुटेन्मूषापुटे रुद्ध्वा कुर्यादेवं च सप्तधा ॥ ८७ ॥**
**वैक्रान्तं भस्मतां याति वज्रस्थाने नियोजयेत् ।**

दी०—वैक्रान्तमिति । वज्रवच्छोध्यमिति । यथा वज्रं पूर्वं शोधितं कुलत्थादिक्वाथेन तथा वैक्रान्तमपि संशोध्य पश्चान्मारयेदित्यभिप्रायः । यतो 'वैक्रान्तं वज्रभेदं स्यात्' इति । केषांचिन्मते चतुर्विधं भवति । वज्रं अत्र द्विविधमेव ग्राह्यं श्रेष्ठत्वात् हयमूत्रेण घोटकमूत्रेण । तप्तं तप्तमिति कोऽर्थः[1] तत्त्वाग्नौ संताप्य मूत्रे आवपेदित्यर्थः । एवं चतुर्दशावारं यावत् कुर्यात् । ततः पश्चात् वैक्रान्तं मेषदुग्धं तस्य पञ्चाङ्गं तस्य गोलकं कृत्वा तत्र वैक्रान्तं मेलयित्वा पश्चान्मूषापुटे संरुध्याऽग्नौ पचेत् । मेषदुग्धं मेषदुग्धिका तस्याः पञ्चाङ्गमित्यर्थः, पञ्चाङ्गं त्वक्पत्रपुष्पफलमूलानि । एवं सप्तधा कृत्वा भस्मतां याति । केचित्तु मेषदुग्धस्येत्यस्य स्थाने 'लतास्त्वोत्तरवारुण्या' इति पठन्ति तस्मात् पञ्चाङ्गं लघ्विन्द्रवारुण्या ग्राह्यम् । ग्रन्थान्तरदर्शनाच्च । ( तथाहि 'ततश्चोत्तरवारुण्या पञ्चाङ्गं गोलकं क्षिपेत् । रुद्ध्वा मूषापुटे पश्चात्पचेदुद्धृत्य गोलकात् । क्षिप्त्वा रुद्ध्वा पचेच्चैवं सप्तधा भस्मतां नयेत्' इति । वज्रस्थाने नियोजयेदिति तद्वैक्रान्तं तस्य कार्ये नियोजयेदित्यभिप्रायः । अतएव वैक्रान्तं वज्रवच्छोध्यमिति कथितम् ॥ ८६ ॥ ८७ ॥

गू०—अथ वैक्रान्तमारणं । वैक्रान्तं विकृतिमापन्नं हीरकं हीरकजातिविशेषः । कफ इति रत्नपरीक्षकाः प्राहुः । मेषदुग्धी प्रसिद्धा ॥ ८६ ॥ ८७ ॥

१–नास्ति खपुस्तके ।

**इदानीं शेषरत्नशोधनमारणमप्याह—**

**स्वेदयेद्दोलिकायन्त्रे जयन्त्याः स्वरसेन च ॥ ८८ ॥**
**मणिमुक्ताप्रवालानि यामैकं शोधनं भवेत् ।**
**कुमार्यास्तण्डुलीयेन स्तन्येन च निषेचयेत् ॥८९॥**
**प्रत्येकं सप्तवेलं च तप्ततप्तानि कृत्स्नशः ।**
**मौक्तिकानि प्रवालानि तथा रत्नान्यशेषतः ॥ ९० ॥**
**क्षणाद्विविधवर्णानि म्रियन्ते नात्र संशयः ।**
**उक्तमाक्षिकवन्मुक्ताः प्रवालानि च मारयेत् ॥९१॥**
**वज्रवत्सर्वरत्नानि शोधयेन्मारयेत्तथा ।**

**दी०**—स्वेदयेदिति । जयन्ती शाकभेदः । मणिमुक्ताप्रवालानीति । मणयो नानाविधास्ते माणिक्यपुष्परागनीलमणिवैदूर्यगारुत्मतप्रभृतयः । मुक्ता मौक्तिकं । तेऽपि बहुधा भवन्ति । प्रवालं विद्रुमं तदपि बहुविधम्, कुमारी नारीशब्दवाच्या, तण्डुलीयो मेघनादः, स्तन्यं क्षीरं, तेन किमुक्तम् । रत्नादीनि पूर्वं दोलायन्त्रे जयन्त्याः स्वरसेन संस्वेद्य यामैकं यावत् पश्चात् तदग्नौ संतप्तं कृत्वा कुमार्यादीनामेकतमरसेन निषिंचयेत् । एवं सप्तधा कृत्वा मृतानि भवन्तीत्यर्थः । मौक्तानीति बहुवचनत्वेनाष्टप्रकाराणि तेषामुच्यन्ते । तद्यथा—'मेघानामथ शङ्खानां वराहस्य च दन्तिनः । मीनजं वंशजं चैव फणिजं शुक्तिजं तथा । अष्टौ मुक्ताफलान्येव सदा जारणकर्मणि । गुणयुक्तानि गृह्यन्ते दोषयुक्तानि वर्जयेत्' । यतः—'स्थूलं वृत्तं गुरु स्निग्धं रश्मितारजलान्वितम् । श्वेतमाह्लादकं स्वच्छं मुक्तायाश्च गुणा दश' इति । प्रवालानीति बहुवचनेनाऽत्रापि जातिगुणदोषादिकं सूचयति । तथाहि 'अतिरिक्तं च दीप्तं च विद्रुमं परिमण्डलम् । स्निग्धं च स्वच्छरूपं च बद्धं शुद्धं समं गुरु ॥ अङ्गारसदृशं पिण्डं प्रवालेऽमी गुणा दश । गौरं रङ्गजलाकान्तं सूक्ष्मं वक्रं सकोटरं ॥ रूक्षं कृष्णं लघु श्वेतं प्रवालमशुभं त्यजेत् । तथा रत्नान्यशेषत' इति । अशेषतोऽपि तज्ज्ञसकाशादवगन्तव्यानि । तेषां च लक्षणानि लिख्यन्ते यथा—'पद्मरागं कुरुविन्दं सुगन्धं नीलगन्धकम् । माणिक्यं चैव विज्ञेयं ब्राह्मणादिक्रमेण तु ॥ निर्धूमं ज्वलदङ्गारमिन्द्रगोपसमप्रभम् । गुञ्जारागप्रतीकाशं माणिक्यं रसकर्मणि ॥ चाम्पेयकसमो वर्णैर्हेमवर्णः सुनिर्मलः । अतिदीप्तो भवेद्यस्तु पद्मरागः स उच्यते । स्थूलवृद्धमधुच्छायं भ्राजिष्णु श्वेतमुज्ज्वलम् ॥ गुरु स्निग्धं तथा प्रोक्तं रसराजस्य कर्मणि । इन्द्रनीलो महानीलो नीलश्च कृष्णनीलकः । एते नीलास्तु चत्वारो ब्राह्मणादिक्रमेण तु । अतसीपुष्पसङ्काशं नीलजीमूतसन्निभम्॥ यःकरोति पयोनीलं महानीलं तदुच्यते । विडालनेत्रसंकाशं नीलपीतं सुनिर्मलम् ॥ चलं लसुनमध्यस्थं वैदूर्यं रसकर्मणि । विज्ञेयो गरुडोद्गारः कीरपक्षो द्वितीयकः ॥ तृतीयो वंशपत्रश्च चतुर्थो धूलिधूसरः । खद्योतद्युतिसंकाशो मयूरकंठसन्निभः ॥ कोमलत्वं चतुर्णां सुप्रशस्तं रसकर्मणि' इति । किमुक्तं बहुना 'पञ्चदोषा गुणाः पञ्च च्छाया चैव चतुर्विधा । श्वेता पीता तथा रक्ता कृष्णा चैव निगृह्यते ॥ सर्वे भानुनिभा दीप्ता दोषाः पटलवर्जिताः । निजैर्वर्णैः समायुक्ता उत्कृष्टा रसकर्मणि' इति । अथ प्रयोगान्तरमाह—उक्तमाक्षिकवदित्यादि । पूर्वोक्तस्वर्णमाक्षिकशोधनविधानवत् मुक्ताप्रवालानि शोधयेत् सर्वरत्नानि च वज्रशोधनमारणविधिवत् सम्प्रसाधयेदित्यभिप्रायः ॥ ८८–९१ ॥

**गू०**—अथ शेषरत्नशोधनमारणं । जयन्तीस्वरसेन दोलायन्त्रे मणिकादीनि स्वेदयेत् । मणिः सूर्यचन्द्रकान्तादिमणिः । यद्वा मणिः । तथा च 'भ्रमरशिखिकण्ठवर्णशिखा समप्रभो भुजङ्गानां भवति मणिः किल मूर्धप्रियोऽनर्घ्यगुणः स विज्ञेय' इति । प्रवालं विद्रुमं । अथ मारणं तन्दुलीयकः मेघनादः शाकः, स्तन्येन स्त्रीदुग्धेन उक्तमाक्षिकवत् स्वर्णमाक्षिकवत् मारणं जम्बीररसादौ ॥ ८८–९१ ॥

**अथेदानीं शिलाजतुशोधनप्रकारं दर्शयन्नाह—**

**शिलाजतु समानीय ग्रीष्मतप्तशिलाच्युतम् ॥९२॥**
**गोदुग्धैस्त्रिफलाक्वाथैर्भृङ्गद्रावैश्च मर्दयेत् ।**
**आतपे दिनमेकैकं तच्छुद्धं शुद्धतां व्रजेत् ॥ ९३ ॥**

**दी०**—शिलाजत्वित्यादि । जतुर्लाक्षा तत्प्रकाशवत् शिलाभ्यः प्रस्रुतं द्रवविशेषं तत् शिलाजतुशब्दवाच्यम् । तन्त्रान्तरेऽपि 'मासि शुक्रे शुचौ चैव शिलाः सूर्यांशुतापिताः । चतुःप्रकारं स्वरसं शिलाभ्यः प्रस्रवन्ति हि । शिलाजत्विति विख्यातं सर्वव्याधिविनाशनम्' इति । ननु रूक्षकठिनानां शिलानां कथं स्निग्धद्रवः स्वरसः संभवति ? । सत्यम् । अत्र शिलोपलक्षितत्वात् तत्तद्धातव एव प्रस्रवन्ति । तथाचोक्तम् 'शैलस्य धातोः स्वरसं शिलाभ्यः सूर्यप्रतापाज्जतुसंप्रकाशम् । कृष्णं भवे-

१–चौराईशब्दवाच्यः ।

न्मूत्रसमानगन्धि तदेव रम्यं तु शिलाजतु स्यात्' इति। मतान्तरेऽपि 'हेमाद्याः सूर्यसंतप्ताः स्रवन्ति गिरिधातवः। जत्वाभं मृदु मृत्स्नाच्छं यन्मलं तच्छिलाजतु'इति । इति तन्त्रान्तरेऽपि प्रसिद्धमेतत्। तद्यथा 'तप्तादीनां तु लोहानां षण्णामन्यतमान्वयम् । ज्ञेयं स्वगन्धतश्चापि षड्योनिप्रथितं क्षितौ' इति । यतः 'लोहाद्भवति तद्यस्माच्छिलाजतु जतुप्रभं । तस्य लोहस्य यद्वीर्यं रसं चापि बिभर्ति तत्' इति । प्रसङ्गतोऽपि चतुष्टयं यथा—'हेम्नो वै रजतात् ताम्रात् तथा स्वादयसादपि । गोमूत्रगन्धि सर्वेषां यथापूर्वमनुत्तमम्' इति । अन्यत्राप्युक्तम् 'त्रपुसीसायसादीनि प्रधानान्युत्तरोत्तरम् । यथा तथा प्रयोगेऽपि श्रेष्ठाः श्रेष्ठगुणाः स्मृताः' इति । चतुर्णामपि मुख्यानां प्रस्रवं शिलाजतु चतुष्टयमत्र गुणख्यापनाय चान्ययोनिवारणाय च भवतीति।समानीयेति अत्र सम्यग् ग्रहणं श्रेष्ठग्रहणनिमित्तमवगन्तव्यम् । कथमस्य श्रेष्ठत्वमित्यत्राह कश्चित्—'तेषु कृष्णं मलं स्निग्धं लघु निःशर्करं भवेत्। गोमूत्रगन्धवच्चापि तत् प्रधानं प्रचक्षते' इति । ग्रीष्मतः प्रशिलाच्युतमिति यद्यप्यन्यस्मिन् काले शिलाजतुप्रस्रवं दृश्यते तथापि ग्रीष्मे खरतरकिरणतापिताभ्यः शिलाभ्यो गुणवत्तरं भवति । गोदुग्धैरित्यादिबहुवचनान्तैः कृत्वा बहुवारं भावयेदित्यभिप्रायः। भृङ्गो मार्कवः 'भमरा' इति लोके। अत्र भाव्यसमानक्वथनीयं द्रव्यं ग्राह्यम्। क्वथनीयद्रव्यमष्टगुणे जले निष्क्वाथ्य चतुर्भागावशिष्टे कषाये भावयेत् । तच्छुद्धं शुद्धतां व्रजेदिति । ननु पूर्वं यच्छुद्धं स्यात् तत् कथं पश्चाच्छुद्धतां व्रजेदित्यत्र शुद्धशब्दद्वयं च किमर्थम्? उच्यते, पूर्वं शिलाजतुपिण्डं धूपादिना संशोध्य पश्चादनेन विधिना शोधयेदित्यदोषः । तथाहि—'दुष्टौषधिकीटपतङ्गदंशसंतालिकादोषनिवारणार्थम् । लोहाढकी निम्बगुडूचिसर्पिर्यैर्वैर्यथावत् परिधूपयेच्च' इति । पूर्वशोधितमेवेति सर्वसंमतम् ॥ ९२ ॥ ९३ ॥

**गू०**—अथ शिलाजतुशोधनं । ग्रीष्मे ग्रीष्मकाले तप्तशिलाच्युतं शिलाजतु समानीय यथा भूमौ न पतति गोदुग्धादिभिर्मर्दयेत् शुद्ध्यतीति । अथ भूमिपतितस्य शोधनं मुख्यं । उत्तमशिलाजतुपाषाणं सूक्ष्मखण्डप्रकल्पितं कृतं अत्युष्णपानीये निक्षिप्य यामैकं स्थापयेत् । मर्दयित्वा तन्नीरं वस्त्रगालितं गृह्णीयात्, मृत्पात्रे स्थापयित्वा आतपे धारयेत् । ग्रन्थान्तरे लोहपात्रे निष्कासनमुक्तं । चत्वारि पात्राण्यसितायसानीत्युक्तत्वात् । उपरिस्थे यत् घनं तत् अन्यपात्रे क्षिपेत् । तत्र जलं दत्वा तस्मादन्यस्मिन् एवं द्विमासाभ्यां ज्येष्ठाषाढाभ्यां निःसारयेत् ततो वह्निक्षिप्तौ लिङ्गोपमं लिङ्गाकारं भवेत् तदा कार्यक्षमं कार्यसाधकं भूयादिति परीक्षा । स्पष्टमन्यत् ॥ ९२ ॥ ९३ ॥

अथान्यकरणप्रकारमाह—

**मुख्यां शिलाजतुशिलां सूक्ष्मखण्डप्रकल्पिताम् ।**
**निक्षिप्यात्युष्णपानीये यामैकं स्थापयेत्सुधीः ॥९४॥**
**मर्दयित्वा ततो नीरं गृह्णीयाद्वस्त्रगालितम् ।**
**स्थापयित्वा च मृत्पात्रे धारयेदातपे बुधः ॥ ९५ ॥**
**उपरिस्थं घनं यत्स्यात्तत्क्षिपेदन्यपात्रके ।**
**धारयेदातपे तस्मादुपरिस्थं घनं नयेत् ॥ ९६ ॥**
**एवं पुनः पुनर्नीत्वा द्विमासाभ्यां शिलाजतु ।**
**भूयात्कार्यक्षमं वह्नौ क्षिप्तं लिङ्गोपमं भवेत् ॥ ९७ ॥**
**निर्धूमं च ततः शुद्धं सर्वकर्मसु योजयेत् ।**
**अधःस्थितं च यच्छेषं तस्मिन्नीरं विनिक्षिपेत् ॥ ९८ ॥**
**विमर्द्य धारयेद्घर्मे पूर्ववच्चैव तन्नयेत् ।**

**दी०**—मुख्यां शिलाजतुशिलामिति । मुख्या पूर्वं दर्शिता तज्जातिषु श्रेष्ठा । शिलाजतुशिलामिति शिलाजतोः शिलावत् सघनपिण्डं संगृह्य पश्चात् पूर्वोक्तविधिना संशोध्य तदनु सूक्ष्मखण्डं यथा स्यात् प्रकल्प्यात्युष्णपानीयं प्रक्षिप्य यामैकं यावत् स्थापयेत् । ततस्त्यक्ते सुधीरिति सद्वैद्यः । सुधीरिति ग्रहणमत्र सुकरणविधानार्थं । यतोऽस्य करणं कालादिकमपेक्षते । यथोक्तम् 'अथोष्णकाले रवितापयुक्ते व्यभ्रे विवाते समभूमिभागे । पात्रेषु कृष्णायसनिर्मितेषु विधानवद्द्रावयितुं पचेत्तु' । कथम् ? यथा 'शिलाजतुश्रेष्ठमवाप्य पात्रे प्रक्षिप्य तस्माद्विगुणं च तोयं । उष्णं तदर्धं भृशमत्र दत्त्वा विशोषयेत् तन्मृदितं यथावत् ॥ ततस्तु यत्कृष्णमुपैति चोर्ध्वं विलीयमानं रविरश्मितप्तम् । तत् काचपात्रेऽन्यतमे विधाय तत्रापरं कोष्णजलं क्षिपेत्तु ॥ पुनश्च तस्मादपरन्तु पात्रादस्माच्च पात्रादपरन्तु भूयः । पुनस्ततोऽर्ध्वं तु निधाय कृष्णं यदुद्धृतं तत् पुनराहरेच्च ॥ यदा विशुद्धं जलमच्छमर्द्य प्रच्छन्नभावान् मलयेत्तु तस्मात् । तदा त्यजेत् तच्छिन्नमलं शिलाजतु स्याज्जलमशुद्धमेवमिति भूयात् । कार्यक्षममिति अनेन प्रकारेण यच्छिलाजतु स्नेहं शुद्धं (कृतं तत् सर्वकार्येषु योजयेदित्यभिप्रायः । तथाहि—

१—नास्ति खपुस्तके ।

'शुद्धं भावितयुक्तं तु विधिनानेन मानवः । शिलाजतु प्रयुञ्जानः सर्वरोगैः प्रमुच्यते' इति । वह्नौ क्षिप्तमिति एवं संस्कारितस्याऽस्य श्रेष्ठत्वं तदा स्याद् यदाऽग्नौ क्षिप्ते सति निर्धूमं भवति । लिङ्गोपमं च भवति । तथाहि—'वह्नौ क्षिप्तं तु निर्धूमं यच्च लिङ्गोपमं भवेत् । शुद्धं योज्यं समुद्दिष्टं हारीताद्यैर्महर्षिभिः' ॥ ९४-९८ ॥

**अथ मण्डूरकरणम्—**

**अक्षाङ्गारैर्धमेत्किट्टं लोहजं तद्गवां जलैः ॥ ९९ ॥**
**सेचयेत्तप्ततप्तं च सप्तवारं पुनः पुनः ।**
**चूर्णयित्वा ततः क्वाथैर्द्विगुणैस्त्रिफलाभवैः ॥ १०० ॥**
**आलोड्य भर्जयेद्वह्नौ मण्डूरं जायते वरम् ।**

दी०—अथ मण्डूरकरणविधानमाह—अक्षेति । अक्षाङ्गारैरिति बहुवचनत्वेनान्यकाष्ठोद्भवैरपि धमेदिति न दोषः । किट्टं लोहमलं तद्बहुवार्षिकं ग्राह्यं श्रेष्ठत्वात् । तथाहि—'शतोर्ध्वमुत्तमं किट्टं मध्यं चाशीतिवार्षिकं । अधमं षष्टिवर्षीयं ततो हीनं विषोपमम्' इति । लोहजमिति सामान्यलोहग्रहणेन मुण्डादिसमस्तलोहसंभवं तद्गुणमपि च ज्ञातव्यं । यतः—'यानि लोहानि तत् संज्ञालक्षणानि गुणानि च । मण्डूरं तद्गुणं दृष्टं यल्लोहमपि यद्गुणम् । अतएव 'किट्टाद्दशगुणं मुण्डं मुण्डात् तीक्ष्णं शतोन्मितम्' इत्यादि । अन्यच्च—'ये गुणा मारिते मुण्डे ते गुणा मुण्डकिट्टके । तस्मात् सर्वत्र मण्डूरं रोगशान्तौ नियोजयेत्' इति । गवांजलैर्गोमूत्रैः । तथा च निर्वाप्य बहुमूत्रे सेचयेदिति । एवं सप्तवारं कुर्यात् । पुनः पुनरिति ग्रहणेनाऽत्र सप्तवारं नियतं, किंतु यावत् शीर्यते तावन्निर्वापयेदित्यभिप्रायः । तथाचोक्तं 'लोहकिट्टं सुसंतप्तं यावत् तत् शीर्यते स्वयं । तच्छीर्णं ग्राहयेत् तेषां मण्डूरं तु प्रयोजयेत्' इति । एवं सप्तवारं कुर्यात् त्रिफलाक्वाथस्य द्विगुणिताऽत्र । मण्डूरं चूर्णयेत् वरमिति श्रेष्ठं । श्रेष्ठताऽस्याञ्जनसादृश्यात् भवति ॥९९॥१००॥

गू०—अङ्गारैर्बिभीतकाङ्गारैस्त्रिफलाक्वाथैर्मण्डूरद्विगुणः ॥ ९९ ॥ १०० ॥

**अथ क्षारकल्पनां दर्शयितुमाह—**

**क्षीरवृक्षस्य काष्ठानि शुष्काण्यग्नौ प्रदीपयेत् ॥ १०१ ॥**
**नीत्वा तद्भस्म मृत्पात्रे क्षिप्त्वा नीरे चतुर्गुणे ।**
**विमर्द्य धारयेद्रात्रौ प्रातरच्छं जलं नयेत् ॥ १०२ ॥**
**तन्नीरं क्वाथयेद्वह्नौ यावत्सर्वं विशुष्यति ।**
**ततः पात्रात्समुल्लिख्य क्षारो ग्राह्यः सितप्रभः ॥ १०३ ॥**
**चूर्णाभः प्रतिसार्यः स्यात्पेयः स्यात्क्वाथवत्स्थितः ।**
**इति क्षारद्वयं धीमान्युक्तकार्येषु योजयेत् ॥ १०४ ॥**

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यमखण्डे धातुशोधनमारणं नामैकादशोऽध्यायः ॥

---

दी०—क्षीरवृक्षस्येति । क्षीरवृक्षोऽत्र मुष्ककः कथितः; स च पर्वतजः मोरव इति लोके । केचित् सामान्यग्रहणेनैवान्ये क्षीरवृक्षा अपि गृह्यन्ते इत्याहुः । तद्यथा—'कुटजपलाशाश्वकर्णपारिभद्रबिभीतकारग्वधबिल्वकाऽर्कस्नुह्यपामार्गपाटलानक्तमालवृक्षकदलीचित्रकपूतीकेन्द्रवृक्षास्फोताश्वमारकसप्तच्छदाग्निमन्थगुञ्जाश्वतस्रः कोशातकी समूलफलपत्रशाखा दहेत्' इति । काष्ठानीति बहुवचनेनात्र क्षीरवृक्षस्य काष्ठानां बहून् खण्डान् कृत्वा पाच्य दहेदित्यभिप्रायः । तथा तन्त्रान्तरे 'तं चिकीर्षुः शरदि गिरिसानुजं शुचिरुपोष्य प्रशस्तेऽहनि प्रशस्तदेशजातमनुपहतमध्यमवयसं महान्तमसितमुष्ककमधिवास्यापरेद्युः पाटयित्वा खण्डशः प्रकल्प्यावपाव्य निवातदेशे निचितं कृत्वा तिलनालैरादीपयेत् । अथोपशान्तेऽग्नौ तद्भस्म पृथग् गृह्णीयात्' इति । चूर्णाभः प्रतिसार्य इति प्रतिसार्यः प्रतिसारणीयः । यः क्वाथवत् स्थितः पेयः स पानीय इति संज्ञः । एवं क्षारस्य द्वैविध्यं भवति । इति युक्तकार्येषु युक्तव्याधिषु यथायोग्यं योजयेदित्यर्थः । युक्तव्याधिषु यथा तत्र प्रतिसारणीयः । कुष्ठकिटिभदद्रुमण्डलकिलासभगन्दरार्बुदार्शोदुष्टव्रणनाडीचर्मकीलतिलकालकन्यच्छव्यङ्गमशकबाह्यविद्रधिकृमिविषादिषूच्यते । सप्तसु च मुखरोगेषूपजिह्वाऽधिजिह्वोपकुशदन्तवैदर्भेषु तिसृषु च रोहिणीष्वेतेष्वनुशस्त्रविधानमुक्तम् । पानीयस्तु गुल्मोदरगराग्निशूलाजीर्णानाह शर्कराश्मर्याभ्यन्तरविद्रधिः कृमिविषार्शःसूपयुज्यते इति । पानीयः पानार्हः क्षारोदकमित्यर्थः । ये चान्येऽपि पाक्यस्वर्जिकायवक्षारा यथायोग्यं वक्तव्यास्तेषां चूर्णवटकावलेहादिषु प्रयोगः कर्तव्यः । धीमानिति ग्रहणं क्षारकर्मणि चतुरो भिषक् तथा प्रयतेत न यथा क्षारोऽगुणो भवति । तद्यथा 'नैवातितीक्ष्णो न मृदुः शुक्लः श्लक्ष्णोऽथ पिच्छिलः । अभिष्यन्दी शिवः शीघ्रः क्षारो ह्यष्टगुणः स्मृतः' इति । दोषाश्चास्य यथा—'अत्यौष्ण्यमतिपैच्छिल्यमतितीक्ष्णविसर्पिता । अत्यर्थं मार्दवं शैत्यम-

त्वर्थं सान्द्रमेव च । न्यूनौषधविपक्वत्वं क्षारदोषा नव स्मृताः' इति ॥ १०१–१०४ ॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेना- ढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यमखण्डे शोधनमारणकल्पनैकादशोऽध्यायः ॥ ११ ॥

गू०—अथ क्षारकल्पना । क्षीरवृक्षस्य काष्ठानि अपामार्गचिंचाकदलीपर्लाशसेहुण्डचित्रकशिग्रुकण्टकारी- प्रभृतीनि । प्रदीपयेत् ज्वालयेत्, अच्छे निर्मले जलं लोहपात्रे क्वाथयेत् । यस्तु चूर्णाभः क्षारः स प्रतिसार्यः, मसकादौ प्रयोज्यः, यस्तु क्वाथवत् द्रवरूपः स्थितः, स गुल्मादौ पेयः इत्युक्तं क्षारद्वयं । चूर्णलक्षणं युक्तका- र्येषु गुल्मादौ चारयेत् । तथाच वाग्भटः—'पेयो क्षारा- ग्निसादाश्मगुल्मोदरजरादिषु । योज्यः साक्षो मसश्वित्र- बाह्यार्शःकुष्ठसुप्तिषु' ॥ १०१–१०४ ॥

इति श्रीकाशिराममिश्रकृतायां गूढार्थदीपिकायां चिकित्सास्थाने धातुशोधनमारण- कल्पनाध्यायः ॥ ११ ॥

---

## द्वादशोऽध्यायः ।

**अथेदानीं रसप्रशंसापूर्वकं तच्छोधन- मारणादिकमाह—**

**पारदः सर्वरोगाणां जेता पुष्टिकरः स्मृतः ।**
**सुदिने[१] साधितः कुर्यात्संसिद्धिं देहलोहयोः ॥ १ ॥**

दी०—पारद इति । भवसिन्धोः पारं ददातीति पारदः । अतएव रसप्रशंसायामुक्तम् 'तेजो मृगाङ्कमौलेः सोढं स्वेनैव तेजसां पुञ्जैः । अजरामरत्ववितरणकल्प- तरुं तं रसेश्वरं वन्दे' । अपरमपि—'अणिमाद्यष्टगुणैर्विभू- तिदोषं न संसारमपारपारदः । मुक्त्वैकं रसराजं कोन्योऽस्ति जरापहो ह्यपरः' इति । ईदृक् पारदः सुदिने साधितः । सच देहलोहयोः सिद्धिं कुर्यादिति तात्पर्यार्थः । देहसिद्धिर्व्याधिहरत्वेन । शरीरारोग्यता लोहसिद्धिश्च स्वर्णरजतशोधनकरणादिकः । पुनः कीदृशो रसः । सर्वरोगाणां जेता । सर्वे च ते रोगाः शरीरमनोऽभिपन्ना ज्वरमदमूर्च्छादयः, तेषां जेता विनाशकर इत्यर्थः । पुनः किंभूतो रसः ? पुष्टिकर इति । पुष्टिर्धातुपोषणं तां करोति इति पुष्टिकरः । अतएव पोषणाद्वाजीकरणशक्त्यायमपि विख्यातः । सुदिने इति । शोभनदिवसे ज्योतिःशास्त्रोक्तसौम्यति- थिनक्षत्रादियुक्ते दिने इत्यर्थः । तथाचोक्तम्—'नत्वा गुरुं भैरवकन्यकाबद्धं द्वीपाननं सिद्धममुष्य रक्षितम् । अन्तः सुनीलं बहिरुज्वलं रसं निवेशयेत् खल्वतले शुभे दिने' । अन्यत्राप्युक्तम्—'विजने पवनादिवर्जिते वा देशे सौम्यदिने दिनादिकाले । बलिमत्र विधाय पूजनं च तदनुविधिः प्रतिमन्त्रितं विधिज्ञैः' इति । साधित इति परिमाणादिकेन संस्कारितः । तद्यथा— 'रसो ग्राह्यः सुनक्षत्रे पलानां शतमात्रकं । पञ्चाशत्प- ञ्चविंशद्वा दशपञ्चैकमेव वा । पलाद्यूनं न कर्तव्यं रससंस्कारमुत्तमम् । तस्मात् सूतविशुद्ध्यर्थं सहायैर्नि- पुणैर्युतः । सर्वोपस्करमादाय रसकर्म समारभेत्' इत्यादि । संसिद्धिमिति । ऐहिकीमामुष्मिकीं च । उक्तञ्च यतः—'बद्धः खेचरतां पदं नयेद्धरते व्याधि- समूहं मूर्च्छितः । जारितो जन्मजराविनाशनः कामितो रञ्जितो भक्तिमुक्तिदः ॥ यदि पञ्चत्वगतं हि सूतकं भक्षितं स्यादमरत्वकारकम् । जलौकारनि- बद्धः सर्वजो ग्रथितो मन्मथरसदायकः । भस्माका- रगतं गिरीशजं अशितं भूचरभूतिसिद्धिदं । पारापार- मपारपारदं तस्मात् कः करुणाकरोऽपरः' इति । देह- लोहयोरिति । देहं शरीरं तस्य सिद्धिर्जराव्याधिराहित्यं लोहं सुवर्णादि तस्य सिद्धिः संस्कारस्त्वमत्र विस्तरभयान्न लिखितम् ॥ १ ॥

गू०—अथ रसकल्पना । पारदः सर्वरोगाणां ज्व- रादीनां जेता । तथा पुष्टिकरः स्मृतः । सुज्ञेन तत्साध- केन साधितः तदा देहलोहयोः सिद्धं कुर्यात् ॥ १ ॥

**इदानीं रसराजस्य पर्यायनामान्याह—**

**रसेन्द्रः पारदः सूतो हरजः सूतको रसः ।**
**बुधैस्तस्येति[१] नामानि ज्ञेयानि रसकर्मसु ॥ २ ॥**

दी०—रसेन्द्रेति । रसेन्द्रेत्यादिरसान्तानि पारदस्य नामानि रसकर्मसु ज्ञेयानि । कैः बुधैः । तस्येति रसस्य, इति ग्रहणेन संक्षेपनामान्यभिहितानि । अन्यान्यपि सन्ति विस्तरेण । तथाहि—'रसो महारसः सूतस्त्रिने- त्रश्च त्रिलोचनः । हरबीजश्चलश्चैव बीजेन्द्रोऽथ रसा- यनः । पारदश्च सुवर्णाख्यो महावह्निस्तथैव च ॥ लोकेशः खेचरो दिव्यः सौभाग्यः परमाऽमृतः । शशिहेमनिधि- श्चैव अनन्तो ज्ञानमेव च ॥ सूक्ष्मः शान्तः प्रभुश्चैव कलिकान्तकरः स्मृतः । एतानि रसनामानि तथा- न्यानि शिवे यथा' इति ॥ २ ॥

१—'सुज्ञेन' गू० दी० सम्मतः ।

१—'मुकुन्दश्चे'ति गू० दी० सम्मतः ।

गू०—अथ पारदनामान्याह–रसेन्द्रः रसानामिन्द्र अध्यक्षः, रसेन्द्रः पारदः । रोगादिसमुद्रात्पारदानात्पारदः सूतः । स्वर्णादिसिद्धिप्रसवात् सूतः । हरजः हरात् जात इति हरजः । सूतकः सूत एव सूतकः स्वार्थे कः । रस्यत आस्वाद्यते षड्रसत्वाद्रसः । मुकुन्दः मुकुन्मोक्षं ददातीति मुकुन्दः । औणादिकत्वादः ॥ २ ॥

**दी०—पूर्वं देहलोहयोरिति यल्लोहग्रहणं, तेषां लोहानां नवग्रहनामाङ्कितत्वेन नवसंख्याकथनमाह—**

**ताम्रतारारनागाश्च हेमवङ्गौ च तीक्ष्णकम् ।**
**कांस्यकं कान्तलोहं च धातवो नव ये स्मृताः ॥३॥**
**सूर्यादीनां ग्रहाणां ते कथिता नामभिः क्रमात् ।**

दी०—ताम्रेति । ताम्रादयो नवसंख्या धातवो मतास्ते सूर्यादीनां नवग्रहाणां नामभिः कृत्वा क्रमात् कथिताः । एतेन किं उक्तम्—ताम्रमादित्यसंज्ञं, तारं रौप्यं सोमसंज्ञं, आरं पीतलोहं तन्मङ्गलसंज्ञं, नागं सीसकं तद्बुधसंज्ञं, हेमं सुवर्णं तद्बृहस्पतिसंज्ञं, वङ्गं शुक्रसंज्ञं, तीक्ष्णकमयस्तच्छनिसंज्ञं, कांस्यं राहुसंज्ञं, वृत्तलोहं केतुसंज्ञमिति क्रमः । एते धातवो नवग्रहनामभिर्बोद्धव्याः ॥ ३ ॥

गू०—अथ ताम्रादिधातूनां सूर्यादीनामधिष्ठानमाह—सुगमं । आरः पित्तलिः, नागः सीसकः, हेम स्वर्णं, वङ्गं रङ्गं, तीक्ष्णं तीक्ष्णलोहं, कान्तलोहं वृत्तलोहं ॥ ३ ॥

**इदानीं रसशोधनकर्माह—**

**राजीरसोनमूषायां रसं क्षिप्त्वा विबन्धयेत् ॥ ४ ॥**
**वस्त्रेण दोलिकायन्त्रे स्वेदयेत्काञ्जिकैस्त्र्यहम् ।**
**दिनैकं मर्दयेत्सूतं कुमारीसंभवैर्द्रवैः ॥ ५ ॥**
**तथा चित्रकजैः क्वाथैर्मर्दयेदेकवासरम् ।**
**काकमाचीरसैस्तद्वद्दिनमेकं च मर्दयेत् ॥ ६ ॥**
**त्रिफलायास्तथा क्वाथे रसो मर्द्यः प्रयत्नतः ।**
**ततस्तेभ्यः पृथक्कुर्यात्सूतं प्रक्षाल्य काञ्जिकैः ॥ ७ ॥**
**ततः क्षिप्त्वा रसं खल्वे रसादर्धं च सैन्धवम् ।**
**मर्दयेन्निम्बुकरसैर्दिनमेकमनारतम् ॥ ८ ॥**
**ततो राजी रसोनश्च मुख्यश्च नवसादरः ।**
**एतैः रससमैस्तद्वत्सूतो मर्द्यस्तुषाम्बुना ॥ ९ ॥**
**ततः संशोध्य चक्राभं कृत्वा लिप्त्वा च हिङ्गुना ।**
**द्विस्थालीसंपुटे धृत्वा पूरयेल्लवणेन च ॥ १० ॥**
**अधः स्थालीं ततो मुद्रां दद्याद्दृढतरां बुधः ।**
**विशोष्याग्निं विधायाधो निषिञ्चेदम्बुनोपरि ॥ ११ ॥**
**ततस्तु कुर्यात्तीव्राग्निं तदधः प्रहरत्रयम् ।**
**एवं निपातयेदूर्ध्वं रसो दोषविवर्जितः ॥ १२ ॥**
**अधोर्ध्वपिठरीमध्ये लग्नो ग्राह्यो रसोत्तमः ।**

दी०—राजीति । राजीरसोनेत्यादिना प्रथमतः स्वेदनसंस्कारविधिरारभ्यते । यतो सन्ति भूयांसः संस्काराः, ते के इत्यत्राह—'संस्वेदनं मर्दनमूर्च्छने च उत्थापनं पातनबोधने च । नियामनं दीपनमेव चाष्टौ पूर्वं कृताः कर्मणि सूतकस्य' इति । अन्यत्राप्युक्तम्—'अष्टौ च रससंस्कारा द्रव्ये रासायने समाः । एते प्रथमं कार्याः स्युः पश्चात् सर्वत्र योजयेत्' । रसादिति रसशोधनकर्म यत्पूर्वमुक्तं तत्कर्मशब्दः उपस्कारादीन् प्रशंसयति । यतः—'सर्वोपस्करमादाय रसकर्म समारभेत्' इत्यादिवचनम् । तथाहि–'उपस्करं न यो वेत्ति तस्य सिद्धिः कथं भवेत्' इत्यपि । तस्मादुपस्कराणि कतिपयानि लिख्यन्ते । तद्यथा—तुलाभाजनं तच्च द्विविधं तुला घण्टकं चेति; खल्वभाजनं तच्च त्रिविधं पाषाणखल्वं, लोहखल्वं, ताम्रखल्वं च; कण्डनी सा च द्विविधा शिलाकण्डनी, पाषाणकण्डनी च; विचित्रखर्पराणि ताम्रादीनां भाजनानि मृण्मयानि च; कोष्ठिका सा च त्रिविधा जालकोष्ठिका खर्परकोष्ठिका भूमिकोष्ठिका चेति; भस्त्रिका सा च त्रिविधा चर्मभस्त्रिका, कर्परभस्त्रिका, मुखभस्त्रिका चेति, नलिका सा च द्विविधा नलिका, वक्रनलिका चेति। नलिका लोहमयी वक्रनलिका मृण्मयी, मूषा सा च द्विविधा पक्का अपक्का च, अपक्काया भेदो वज्रमूषायाः कुम्भकारेण सुमृत्तिकया कृता सा पक्वमूषा; तयोर्भेदा यथा मूषा, गोस्तना, अन्धमूषा, नलिकामूषा, सम्पुटीमूषा, द्रोणीमूषा, इष्टिकामूषा, क्षारमूषा, सैन्धवादिलवणमूषा, खर्परमूषा, कोकिलास्यमूषा, हेमतारताम्रलोहसीसकमूषादयः । सण्डिशश्च नद्विविधः पत्रसण्डिशः, काकमुखसण्डिशश्चेति । हस्तकुक्कनिर्घातादयः सर्वाणि सुवर्णकारोपस्कराणि च । पुटं तच्चतुर्विधं तुषपुटं, करीषपुटं, उपलपुटं, खदिरादिकाष्ठपुटं चेति । यन्त्राणि च तद्यथा—शिलायन्त्रं, पाषाणयन्त्रं, भूधरयन्त्रं, वंशनलिकायन्त्रं, गजदन्तभाजनयन्त्रं, दोलायन्त्रं, अधःपातनयन्त्र, ऊर्ध्वपातनयन्त्रं, नियामकयन्त्रं, डमरुकयन्त्रं, कटाहयन्त्रं, कांस्यभाजनयन्त्रं, पातालयन्त्रं, तुलायन्त्रं, कच्छपयन्त्रं, चक्रयन्त्रं, चाकीयन्त्रं, वालुकायन्त्रं,

अग्निसोमयन्त्रं, गन्धकटहिकायन्त्रं, मूषायन्त्रं, बाणयन्त्रं, गरुडयन्त्रं, सारणयन्त्रं, जालिकायन्त्रं, चारणयन्त्रादीनि अन्यान्यपि यथायोग्यं भवन्ति । तत्रतत्र एव ज्ञातव्यानि। तत्र तेष्वादौ **स्वेदनविधि**माह—'राजीरसोनमूषायां रसं क्षिप्त्वा विबन्धयेत्' इत्यादिव्याख्यानं सम्प्रदायतो लिख्यते । यथा राजीकादिकल्केन मूषां कृत्वा तत्र रसं मेलयित्वा उपरि कदलीदलैर्वेष्टयित्वा तदुपरि चतुर्गुणेन वस्त्रेण पोट्टलिकां बद्ध्वा काञ्जिकादिपूरिते भाण्डे दोलायन्त्रविधानेन स्वेदयेत् । यावद्दिनत्रयं भवति। दिनग्रहणेन रात्रिरपि गृह्यते तेनाहोरात्रं स्वेदयेदित्यभिप्रायः, एतदपि विधानं तन्त्रान्तरे चोक्तं तद्यथा—'राजिका लवणं हिङ्गु चित्रकं व्योषसंयुतम् । सूतपादमितं सर्वं स्वर्जिकाक्षारसंयुतम् ॥ शिग्रुपत्ररसेनैव पिष्ट्वा कुण्डलिकाकृतम् । कुर्याद्भूर्जदले सम्यगथवा कदलीदले ॥ सुपक्के च दृढे वाऽपि वस्त्रखण्डे चतुर्गुणे । रसं मध्ये विनिक्षिप्य बध्नीयात्तु सुपोट्टलीम् ॥ क्षाराम्लमूत्रवर्गेण स्वेदयेच्च दिनत्रयम् । तथा स्वेदः प्रकर्तव्यो मज्जिता पोट्टली यथा ॥ भवेन्न च तलस्पर्शो भाण्डस्याऽपि कदाचन' इति । दोलायन्त्रप्रमाणम् । 'द्रवद्रव्येण भाण्डस्य पूरितोऽर्धस्य तस्य च । मुखे तिर्यक्कृते दण्डे रसं सूत्रेण लम्बितम् । तं स्वेदयेन्मध्यगतं दोलायन्त्रमिति स्मृतम् ।' अथ प्रत्येकसंस्कारान्ते मर्दनमुक्तं तत्कर्म दर्शयन्नाह—दिनैकं मर्दयेत् सूतं कुमारीसम्भवैर्द्रवैरित्यादि । एतेषां वक्ष्यमाणद्रव्याणां द्रवैः कृत्वा खल्वे सूतं मर्दयेत्, तेन प्रत्येकरसेन कृत्वा दिनैकं मर्दयेदित्यर्थः । कुमारी प्रसिद्धा, चित्रकं चित्रकजटा, काकमाची लोके 'कामैया' शब्दवाच्या, त्रिफला हरीतक्यादिकं एभिर्यन्त्रपूर्वकं संमर्द्य पश्चात् काञ्जिकैः प्रक्षाल्य शोधयेदित्यर्थः । काञ्जिकैरिति बहुवचनत्वेन जलेन तक्रेण वा क्षालनीयम् । तथाच—तन्त्रान्तरे—'भवेदेकैकसंस्कारप्रान्तेषु दृढमर्दनम् । मर्दितं स्थापयेद्धर्मे यावच्छुष्कतरो भवेत् । तक्रेण काञ्जिकेनाथ शुक्तेनोष्णोदकेन वा । ततः सर्वं समानीय क्षालयेदिति बुद्धिमान् ॥' तथा यन्त्रं प्रकुर्वीत यथा न क्षीयते रसः' इति । अथ स्वेदनसंस्कारमभिधाय सम्प्रति **मर्दनसंस्कारं** दर्शयन्नाह—ततः क्षिप्त्वा रसं खल्वे रसार्द्धं च सैन्धवमित्यादि । तत इति । स्वेदनपूर्वकमर्दनानन्तरं तद्रसं खल्वे क्षिप्त्वा मर्दयेदिति । कैः कृत्वा ? वक्ष्यमाणसैन्धवप्रमुखद्रव्यैः, एतन्मर्दनं तप्तखल्वेऽभिहितमिति सम्प्रदायः । तथाहि 'युक्तं सूतस्य सर्वस्य तप्तखल्वे विमर्दनम् । अजाशकृत्तुषाग्निं तु भूगर्भे त्रितयं क्षिपेत् ॥ तस्योपरि स्थितं खल्वं तप्तखल्वमिदं भवेत्' इति । 'अथवा तीव्रघर्मे च कारयेच्च प्रमर्दनम्' इति सम्प्रदायः । अनारतमिति अनालस्यं यथा भवति तथा मर्दयेदिति भावः । अनारतग्रहणेनापि अन्यविहितद्रव्यैरपि मर्दनीयं न दोषो ग्रन्थान्तरे दर्शनात् । तथाहि 'क्षाराम्लैर्लवणैर्मूत्रैर्विषैरुपविषैस्तथा । दिव्यौषधिसमूहेन मर्दयेद्दिवसत्रयम्' । अनुक्तमानानां मर्दनार्थद्रव्याणां च परिमाणं ग्रन्थान्तरादवगन्तव्यम् । तद्यथा—'पारदस्य कलांशेन भेषजेन प्रमर्दयेत् । द्रव्येण यावता सर्वं द्रुतं भवति मर्दने' इति । इदानीं मर्दनसंस्कारादनन्तरं **मूर्च्छनसंस्कार**विधिमाह—ततो राजी रसोनश्चेत्यादि । तत इति मर्दनसंस्कारादनन्तरम् । राजी राजिका, रसोनः लशुन इति प्रसिद्धः, मुख्यश्च नवसादर इति नवसादरश्चुलिकालवणः मुख्यः श्रेष्ठो ग्राह्य इत्यर्थः । तस्य श्रेष्ठता पैगामीशब्दवाच्या प्रसिद्धा । तद्वदिति । मर्दनोक्तप्रकारेण मर्द्यं तुषाम्बुनेति । काञ्जिकेन कृत्वा क्षालनं स्वेदनं च पूर्ववत् कार्यं, रसस्योत्थापनार्थं यतो मूर्च्छनानन्तरमुत्थापनमपि कार्यमिति सर्वत्र । तथाहि—'उत्थितः काञ्जिकस्वेदात् पातयेत् खल्वसंयुतम्' इति संप्रदायः । यथा—'दोलास्वेदं प्रकुर्वीत मधुक्षाराम्लमूत्रकैः । उत्थाप्य मूर्च्छयेत् पश्चात् त्रिवारं च पुनः पुनः' इति । अथवा 'ततः खल्वेन तप्तेन अम्लेनोत्थापयेद्रसम् । क्षारा मुखकराः सर्वे सर्वे ह्यम्लाः प्रबोधकाः' इति ॥ मूर्च्छनोत्थापनविधिमभिधाय सम्प्रति **पातनान्याह**—ततः संशोष्य चक्राभमित्यादि । तत इति मूर्च्छनोत्थापनानन्तरम् । संशोष्येति । एके संशोष्येत्यनेन मूर्च्छितमेव रसं चक्राभं कृत्वा पातयेदिति व्याख्यानयन्ति तन्न संमतं बहुसम्प्रदायेषु, मूर्च्छितस्योत्थापनं कृत्वा पश्चादुक्तद्रव्यैः सह पिष्टिकां कृत्वा चक्रिकां कुर्यादित्यभिप्रायः । अन्यत्राप्युक्तम् । 'भागास्त्रयो रसस्यार्कचूर्णपादांशसंयुतम् । दत्वाऽम्लं मर्दयेत् तावद्यावत् पिष्टिः प्रजायते । यदा न जायते पिष्टिः किञ्चित्तुत्थं तदा क्षिपेत्' इति सर्वत्र । पिष्टिकृतरसचक्री हिङ्गुना लिप्त्वा धार्या। हिङ्गुमानमपि षोडशांशं पारदपरिमाणात्, द्विस्थालीसम्पुट इति । विख्यातं लवणपूरणं सम्प्रदायदर्शनाद्बोद्धव्यम् । दृढतरां मुद्रामिति मुद्राऽत्र साम्प्रदायिकी कार्या यथा गुरुसकाशाद्वा दृष्टा । तथा अथवा सद्बुद्धीनां ज्ञापनार्थं सदाभ्यस्ता मुद्राऽत्र लिख्यन्ते तथाच 'वल्मीकमृत्तिकागारपूरणं लोहकिट्टकम् । श्वेत-

पाषाणकं चैव तत्सर्वं चूर्णयेत् समम् ॥ सर्वतुल्यं विषं दग्धं सर्वं तोयैर्विमर्दयेत् । मूषादिसम्पुटं कुर्यात् सर्वसन्धिप्रलेपने' । अथवा 'तुषं भागद्वयं ग्राह्यं, भागैकं वस्त्रखण्डकं । मृदश्चतुर्गुणो भागो जलं दत्वा प्रमर्दयेत् ॥ नरकेशं शणं किञ्चित् दत्वा तावत् प्रकुट्टयेत् । यावत् सिक्थसमाभासं मृत्पिण्डं जायते तदा ॥ यथा न शुष्कतां याति तथा यन्त्रं समाचरेत् । एवं सप्तदिनादूर्ध्वं मृदं योगे प्रयोजयेत् ॥ कूपिकादिविलेपार्थं यन्त्रार्थं च भिषक् क्रमात्' । अपरमपि । 'हरीतकीटङ्कणपर्णचूर्णं खरी गुडं पांशु पटुं समांशम् । वल्मीकमृत् सर्वसमा तदर्धं वस्त्रं तथा गोमयकं च सर्वम् ॥ जलेन मर्द्यं मदनोपमं तद् यन्त्रादिसन्धौ विनिवेशनीयम्' इति । अपराण्यपि—'लोहकिट्टं तुषं दग्धं शुक्तिचूर्णं च कर्करा । एतानि समभागानि तावद्भागेन मृत्तिका ॥ कर्पटेन समायुक्ता सा हि वज्रोपमा भवेत् । दग्धतुषस्यैकभागो मृद्भागत्रयमेव च । कर्पटं शणसंयुक्तं वज्रमृत्स्नेति योजयेत् । इष्टकाचूर्णभागैकं समभागा तु मृत्तिका ॥ मूषाबन्धः प्रकर्तव्यो धमनाद्वज्रतां व्रजेत् । भागैकं लोहकिट्टस्य तुषदग्धद्वयं तथा ॥ मृद्भागत्रयसंयुक्तं किञ्चित् कूप्यं प्रदापयेत् । एकत्र कुट्टयेत् सर्वं मृत्तिकावज्रवद्भवेत् ॥ निषिञ्चेदम्बुनोपरि' इति । उपरि अम्बुना निषिञ्चेदिति कोऽर्थः ? तत्स्थालीसम्पुटयन्त्रं चुल्ल्यां निधायाग्निं प्रज्वाल्य तदुपरि शीतं जलं पुनः पुनः क्षिपेदित्यभिप्रायः । सजलवस्त्रखण्डमपि तदुपरिं धार्यमिति सम्प्रदायः । अन्यत्राप्युक्तम्—'संरुध्य भाण्डद्वयगर्भमध्ये पिष्टिं ततः सम्पुटमव्रणं तम् । निवेश्य चुल्ल्यां तु शनैः प्रदीपप्रमाणमस्याधतले विदध्यात् ॥ अग्निं शिरस्यस्य जलार्द्रमेकं वस्त्रं क्षिपेदल्पमनुष्णमेव' इति । दोषविवर्जित इति यद्ग्रहणं कृतं तत्सर्वं दोषरहितः पारदः एभिः पञ्चभिः संस्कारोपायैरेव भवतीत्यस्याभिप्रायः । तस्मात् पञ्चैव संस्कारा अनेनाऽत्र स्वीकृताः । के ते दोषाः ? तथाहि—'मलं विषं वह्निगुरुत्वचापलं नैसर्गिकं दोषमुशन्ति तज्ज्ञाः । उपाधिकौ द्वौ त्रपुनागसम्भवौ रसेन्द्रराजे कथयन्ति वैद्याः' । ननु पातनत्रयेणैव नागवङ्गकृतदोषो विनष्टो भवति नान्यैः, तथाहि—'मिश्रितौ चेद्रसे नागवङ्गौ विक्रयहेतुना । स्यात् ताभ्यां कृत्रिमो दोषस्तन्मुक्तिः पातनत्रयात्' इति । तत्कथमत्र पञ्चभिरेव सर्वदोषविवर्जितो भवति ? सत्यं, ऊर्ध्वपातनान्तर्गतमधस्तिर्यक्पातनमस्तीति तस्याभिप्रायः, तत्पातनद्वयं तन्त्रान्तरादवगन्तव्यम् । अथवा 'अथोर्ध्वपिठरीमध्ये लग्नो ग्राह्यो रसोत्तमः' इत्यत्राऽथग्रहणेनावशिष्टसंस्काराणि सूच्यन्ते तानि च पातनबोधननियामकानीत्यदोषः ॥ अथ केषांचिज्ज्ञापनार्थं प्रसङ्गतः पातनत्रयमाह—**ऊर्ध्वपातनमत्रैव** कथितम् । **अधःपातनं तिर्यक्पातनं** च दर्शयन्नाह—तथाच तन्त्रान्तरे—'कटाहं नूतनं कृत्वा तस्याधो लेपयेद्रसम् । द्विगुणेन च गन्धेन जारयेदभ्रकादयः ॥ वस्त्रान्तानि मृदा लिप्त्वा जलं स्थाल्युपरि न्यसेत् । स्थालीकटाहयोः सन्धिं लेपयेत् सुदृढं मृदा ॥ कटाहोपरि कर्तव्यमुपलाग्निप्रदीपनम् । जलमध्ये रसो याति शुद्धं तिष्ठति चाभ्रके ॥ शुल्बाद्रसो रसात् ताम्रं पातनीयं पृथक् कृतम् । ससूतभाण्डवदनेप्यन्यन्मिलति भाण्डकम् । तथा सन्धिर्द्वयोः कार्या पातनत्रययन्त्रके । जलस्थाने काञ्जिकं च दापयेन्नात्र संशयः' इति । **तिर्यक्पातनमप्याह**—तथाहि 'घटे रसं विनिक्षिप्य सजलं घटमन्यकम् । तिर्यङ्मुखं द्वयोः कुर्यात् तन्मुखं रोधयेत् सुधीः ॥ रसाधो ज्वालयेदग्निं यावत् सूतो जलं विशेत् । तिर्यक्पातनमित्युक्तं सिद्धैर्नागार्जुनादिभिः' इति । **अथापराण्यपि प्रसङ्गतो लिख्यन्ते** तथाहि—'स्थूलसैन्धवपोट्टल्यां कार्यं मूषापुटद्वयम् । स्थापयित्वा रसं तत्र नवसारं कलांशकम् । सन्धिं निरुध्य यत्नेन वेष्टयेत् कर्पटं मृदा । स्थापयेद्भूधरे यन्त्रे वह्निं कुर्याद्दिनत्रयम् । यन्त्रादुद्धृत्य सूतोऽसौ स्वेदयेत् तदनन्तरम् । बीजपूरफलं वाथ वृन्तं सन्त्यज्य कारयेत् ॥ सैन्धवेन समं सूतं तस्य मध्यं विनिक्षिपेत् । स्वेदयेद्दोलिकायन्त्रे ह्यम्लवर्गे दिनत्रयम् ॥ एवं ह्यग्निसहो जातो रसेन्द्रः सर्वकर्मसु' **इति नियामकम् । अथ बोधनमाह**—'अथ सूतं समुद्धृत्य काचकूप्यां विनिक्षिपेत् । शुक्ताम्लेनाथ सम्पूर्य द्वारे मुद्रां प्रदापयेत् ॥ स्थापयेद्भूधरे यन्त्रे स्वेदयेद्दिनसप्तकम् । स्वाङ्गशीतं समुद्धृत्य कषायैः स्वेदयेत् पुनः ॥ कर्कोटीकञ्चुकीवह्निसर्पाक्ष्यम्बुजमाद्रवैः । दिनत्रयं सारनालैः स्वेद्यश्चाञ्चल्यशान्तये' **इति बोधनम् । अथ दीपनमाह**—'लवणं राजिकाहिङ्गुकन्याक्षारचतुष्टयम् । त्र्यूषणं लसुनं चैव मातुलुङ्गरसप्लुतम् ॥ पिण्डमध्ये रसं कृत्वा स्वेदयेत् सप्तधा पुनः । अनुद्वारी भवेत्तेन ग्रासाजीर्णेऽपि जीर्यति ॥ अनेनैव भवेच्छुद्धः सर्वदोषविवर्जितः ।' अथवा—'कीरतुण्डगरुडी कृष्णच्छटा कन्यका कुमारिका च वायसी ।

आसुरी च विजया जया तथा वह्निदीपनकराश्च सूतके' इत्यष्टौ संस्काराः संक्षेपेणोक्ताः ॥ ४-१२ ॥

गू०—अथ रसशोधनं । राजिका, रसोनो लसुनः, एतयोर्मूषायां रसं पारदं विबन्धयेत् । इति स्वेदनं । अथ मर्दनं । दिनैकं मर्दयेत् खल्वे इति । काकमाची प्रसिद्धा । अथान्यैर्मर्दनं मूर्च्छनं वा इत्यूर्ध्वपातनम् ॥ ॥ ४-१२ ॥

**अथ गन्धकशोधनम्—**

**लोहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत् ॥ १३ ॥**
**तप्ते घृते तत्समानं क्षिपेद्गन्धकजं रजः ।**
**विद्रुतं गन्धकं ज्ञात्वा दुग्धमध्ये विनिःक्षिपेत्॥१४॥**
**एवं गन्धकशुद्धिः स्यात्सर्वकार्येषु योजयेत् ।**

दी०—इदानीं गन्धकशोधनं दर्शयन्नाह—लोहपात्रे इति । गन्धकजं रज इति । गन्धाजातो गन्धकः।तद्यथा 'श्वेतद्वीपे पुरा देव्याः क्रीडन्त्याः प्रसृतं रजः । क्षीरार्णवे तु स्नाताया दुकूलं रजसाऽन्वितम् ॥ धौतं यन्मथितं वस्त्रं गन्धवद्गन्धकं स्मृतम् । चतुर्धा गन्धकः प्रोक्तो रक्तः पीतोऽसितः सितः ॥ रक्तो हेमक्रियासूक्तः पीतश्चैव रसायने । व्रणादिलेपने श्वेतः श्रेष्ठः कृष्णः सुदुर्लभः । एवं गन्धकशुद्धिः स्यात् सर्वकर्मसु योजयेत्' इति । एवमिति ग्रहणेन शोधनान्तरमपि दर्शितं तद्ग्रन्थान्तरादवगन्तव्यम् । यथा 'क्षीरेण भाण्डमापूर्य वस्त्रेणावेष्ट्य तन्मुखम् । वस्त्रमध्ये क्षिपेद्गन्धं मुखं यत्नात् पिधापयेत् ॥ शरावेण ततो वह्निं प्रज्वाल्योर्ध्वमवस्थितम् । भाण्डके निपतेद्यावत् गन्धस्तावत् समिन्धयेत् ॥ कृशानौ तु स्वयं नीते गन्धकं तु समुद्धरेत्' इति ॥ १३ ॥ १४ ॥

**इदानीं दरदशोधनमप्याह—**

**मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम् ॥ १५ ॥**
**सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितम् ।**

दी०—मेषीक्षीरेणेति । मेषी अविः । अम्लवर्गैश्चेति । 'जम्बीरमातुलुङ्गाद्यैरम्लवर्गगणो मतः' इति । अम्लवर्गैश्चेत्यत्र चकारग्रहणेनान्यच्छोधनमनुमीयते । तथाच—'शुद्धः स्याद्दरदः सप्तकृत्वो लाक्षाम्बुभावितः । मलदोषादिकं नास्ति सर्वकार्येषु योजयेत्' इति । अस्य ज्वालादिकं च लिख्यते केषाञ्चित् सुबोधार्थम् । यथा 'रसगन्धकसम्भूतं हिङ्गुलं प्रोच्यते बुधैः । तस्मात्सूतं च यन्त्राद्यं सर्वदोषविवर्जितम् ॥ दरदस्त्रिविधो ज्ञेयश्चर्मारः शुकतुण्डकः । हंसपादस्तृतीयः स्यात् गुणवानुत्तरोत्तरम् ॥ हंसपादं च तत्राद्यं तारकर्मणि योजयेत् । तद्वेमकिट्टसदृशं तदन्यस्तीक्ष्णमारणे ॥ चर्मारः कृष्णवर्णः स्यात् सपीतः शुकतुण्डकः । सत्वपाते च तत्प्रोक्तं शोध्यमौरभ्रदुग्धके' ॥ तथाच—'जपाकुसुमसंकाशो हंसपादो महोत्तमः । रसायने सर्वलोहमारणे रसरञ्जने' इति ॥ १५ ॥

**अथ दरदाद्रसाकृष्टिर्भवति तामपि दर्शयन्नाह—**

**निम्बूरसैर्निम्बपत्ररसैर्वा याममात्रकम् ॥ १६ ॥**
**पिष्ट्वा दरदमूर्ध्वं च पातयेत्सूतयुक्तिवत् ।**
**ततः शुद्धरसं तस्मान्नीत्वा कार्येषु योजयेत् ॥१७॥**

दी०—निम्बूरसैरिति । निम्बूरसनिम्बपत्ररसमानं भावनायुक्तिवद्बोद्धव्यम् । केचित्तु निम्बूरसैः निम्बपत्ररसैरित्यस्य स्थाने जम्बीरैः पारिभद्ररसैरिति पठन्ति व्याख्यानयन्ति च ग्रन्थान्तरदर्शनात् । तथाहि—'पारिभद्ररसैः पेष्यं हिङ्गुलं याममात्रकम् । जम्बीराणां द्रवैर्वाऽथ पाल्यं पातनयन्त्रके' इति । अत्र पारिभद्रः 'फलहदा' शब्दवाच्यो ननु निम्बकण्टकपालाश इत्यपरे । पातयेत् सूतयुक्तिवदिति सूतयुक्तिः पूर्वं कथिता सातु पातनयन्त्राधिकृता भवति ॥ १६ ॥ १७ ॥

गू०—अथ दरदात् पारदाविष्कासनं । दरदं हिङ्गुलः, दरदं ऊर्ध्वं पातयेत् डमरुयन्त्रे सूतवत् । स्पष्टमन्यत् ॥ १६ ॥ १७ ॥

**अथोद्धृतस्य मुखकरणम्—**

**कालकूटो वत्सनाभः शृङ्गकश्च प्रदीपकः ।**
**हालाहलो ब्रह्मपुत्रो हारिद्रः सक्तुकस्तथा ॥१८॥**
**सौराष्ट्रिक इति प्रोक्ता विषभेदा अमी नव ।**
**अर्कसेहुण्डधत्तूरलाङ्गलीकरवीरकम् ॥ १९ ॥**
**गुञ्जाहिफेनावित्येताः सप्तोपविषजातयः ।**
**एतैर्विमर्दितः सूतश्छिन्नपक्षः प्रजायते ॥ २० ॥**
**मुखं च जायते तस्य धातूंश्च ग्रसते क्षणात् ।**

दी०—अथ रसमुखकरणमाह—कालकूट इति । कालकूटप्रभृतिकं विषभेदं तत्परीक्षकसकाशादवगन्त-

१—चतुःप्रस्थे पारदे गन्धकनवसादरयोर्द्विनिवाराक्रष्टमतितीक्ष्णं तेजापसंज्ञं पञ्चपञ्च तोलकं दत्त्वा दर्व्या चालयेदूर्ध्वगतं मलं भूयोभूयस्त्यजेदेवं विनैव संस्कारैर्लघुनोपायेन शुध्यति ।

१—डमरुयन्त्रेत्युपलक्षणम्, तेन दरदाद्द्विगुणवस्त्रखण्डैः गोलकं कृत्वा प्रज्वाल्य वस्त्रनिर्धूमं हण्डिकया पिधाय स्थाल्यां रक्षेत् । ततः शीतीभूतायां हंडिकायामुद्घाट्य पारदं गृह्णीयादिति सुगमः प्रकारः ।

व्यम्। किञ्चिल्लक्षणमपि लिख्यते यथा—'घनं रूक्षं च कठिनं भिन्नाञ्जनसमप्रभम्। कन्दाकारं समाख्यातं कालकूटं महाविषं॥ वत्सनाभं पाण्डुरं च किञ्चिद्रूक्षं घनं तथा। घनं गुरु च निबिडं शृङ्गाकारं च शृङ्गिकं॥ प्रदीपनं शिखिशिखाकारं च गुरुचिक्कणम्। चक्राकारं भवेद्रक्तं नीलं हालाहलं मतं॥ ब्रह्मपुत्रः पाण्डुरः स्यात् हरिद्राभं हरिद्रकम्। चित्रमुत्पलकन्दाभं सक्तुकं सक्तुवद्भवेत्॥ सौराष्ट्रिकं शङ्खवर्णं विज्ञेयं विषलक्षणम्' इति। एतेषां मध्ये एकद्वित्रिसकलानि यथालाभं संगृह्य रसस्य षोडशांशेन कृत्वा मर्दनीयानि। षोडशांशताऽत्र एकस्यैवेत्यर्थः। उपविषेषु लाङ्गलीककरवीरकमहिफेनमिति। अहिफेनं विषमत्स्यसमुद्भवमिति ज्ञेयम्। तथाहि—'समुद्रे चैव जायन्ते विषमत्स्याश्चतुर्विधाः। तेभ्यः फेनं समुत्पन्नमहिफेनं चतुर्विधम्॥ केचिद्वदन्ति सर्पाणां फेनं स्यादहिफेनकम्।' यथा—'धारणं श्वेतवर्णं च रक्तवर्णं च जारकम्। सारणं पीतवर्णं च कृष्णवर्णं च मारणम्॥ विषवद्भ्युत्तमं फेनं युज्यते रसकर्मणि' इति। केचित्तु खाखसजं क्षीरविशेषमिति मन्यन्ते तदभावात्। एवं सर्वत्र शेषं सुगमम्। मानमप्येतेषां पूर्ववत्॥ १८–२०॥

गू०—अमी कालकूटादयो नव विषभेदाः प्रकीर्तिताः कथिताः। एषां लक्षणं विषपरीक्षकेभ्यो ज्ञेयं। अथ उपविषाण्याह—लाङ्गली कलिहारी, करवीरकः अश्वमारजटारसः, अहिफेनं आफूकम्, एताः सप्त उपविषजातयः। एतैर्मर्दितः सूतः छिन्नपक्षः जायते मुखं धातुग्रसनशीलं अतो धातून् त्वरया ग्रसते॥ कालकूटादीनां द्रवैः सप्त सप्त दिनं मर्दनं प्रक्षालनं च॥ ॥ १८–२०॥

### अन्यदपि मुखकरणमाह—

**अथवा कटुकक्षारौ राजी लवणपञ्चकम्॥ २१॥**
**रसोनो नवसारश्च शिग्रुश्चैकत्र चूर्णितैः।**
**समांशैः पारदादेतैर्जम्बीरेण द्रवेण वा॥ २२॥**
**निम्बुतोयैः काञ्जिकैर्वा सोष्णखल्वे विमर्दयेत्।**
**अहोरात्रत्रयेण स्याद्रसे धातुचरं मुखम्॥ २३॥**

दी०—अथवा कटुकक्षाराविति। कटुकं त्रिकटुकं, क्षारो यवक्षारप्रभृतिकः, लवणपञ्चकं प्रसिद्धम्। रसोन इति लशुनः, नवसारश्चूलिकालवणः, शिग्रुः शोभाञ्जनम्, एतत्सकलं समभात्रेण कृत्वा पारदसाम्यं ग्राह्यम्। शेषं सुगमम्। धातुचरमिति कोऽर्थः धातुग्रसनार्थमिति भावः॥ २१–२३॥

गू०—अन्यदपि मुखकरणं। क्षारौ स्वर्जीयवक्षारौ, राजी राजिका, रसोनं लशुनं, नवसारो नवसागरः, शिग्रुः शोभाञ्जनं। धातुचरं धातुग्रसनशालि॥२१–२३॥

### अपरमपि मुखकरं दर्शयितुमाह—

**अथवा बिन्दुलीकीटै रसो मर्द्यस्त्रिवासरम्।**
**लवणाम्लैर्मुखं तस्य जायते धातुहृत्त्वरा[1]॥ २४॥**

दी०—अथवेति। एभिर्वक्ष्यमाणद्रव्यैस्त्रिदिनं मर्द्यम्। रसो यदा भवति तदा तस्य त्वरा शीघ्रं धातुहृत् सुवर्णादिधातुग्रहणसमर्थं मुखं भवति। बिन्दुलीति कीटविशेषः सच षड्बिन्दुरिति प्रसिद्धः। तथाहि—'षड्बिन्दुकस्य कीटस्य श्वेताः स्युः पञ्च बिन्दवः। भिन्नवर्णस्तथा चैकः सुस्निग्धश्चातिवर्णतः' इति। लवणाम्लैरिति। लवणं पञ्चलवणं, अम्लोऽम्लवर्गः सच जम्बीरमातुलुङ्गप्रभृतिकः॥ २४॥

गू०—अन्यच्च। बिन्दुलीकीटैः कीटविशेषैः, लवणं सैन्धवं, अम्लैर्निम्बुकाद्यैः धातुघस्सरं धातुभक्षकं मुखं जायते॥ २४॥

### इदानीं गन्धकजारणनिमित्तं कर्म दर्शयन्नाह—

**अथ कच्छपयन्त्रेण गन्धजारणमुच्यते।**
**मृत्कुण्डे निक्षिपेत्तोयं तन्मध्ये च शरावकम्॥२५॥**
**महत्कुण्डपिधानाभं मध्ये मेखलया युतम्।**
**लिप्त्वा च मेखलामध्यं चूर्णेनात्र रसं क्षिपेत्॥२६॥**
**रसस्योपरि गन्धस्य रजो दद्यात्समांशकम्।**
**दत्त्वोपरि शरावं च भस्ममुद्रां प्रदापयेत्॥ २७॥**
**तस्योपरि पुटं दद्याच्चतुर्भिर्गोमयोपलैः।**
**एवं पुनः पुनर्गन्धं षड्गुणं जारयेद्बुधः॥ २८॥**
**गन्धे जीर्णे भवेत्सूतस्तीक्ष्णाग्निः सर्वकर्मसु।**

दी०—अथेति। अथशब्दोऽत्र मुखकरणानन्तर्ये। कच्छपयन्त्रं प्रसिद्धम्। तत्स्वरूपं दर्शितमेव। तत्परिमाणं यथा 'प्रसूतगोपलोन्मानं सूतकोत्पलकः स्मृतः। लावकः पुटको ज्ञेयः प्रदत्तः सप्तधाढकैः। कच्छपस्त्रिगुणैस्तैस्तु कौकुटः कच्छपैस्त्रिभिः। कौकुटैः पञ्चभिः सिंहो मेघनादोऽस्य सुम्भकैः। दुर्गे गजपुटः ख्यातो देयः षष्टिकपालकैः। तैस्तु त्रिगुणितैर्ज्ञेयो दृढाग्निश्च महापुटः' इति। चूर्णेनेति शुक्तिकाचूर्णेन समांशक-

[1] –'धातुघसरं' गू० दी० सम्मतः।

मिति रससाम्यं गन्धकं योज्यम् । साम्यताऽत्र प्रत्येकपुटमित्यर्थः । तेन षड्गुणगन्धकं षट्पुटैः कृत्वा भवति पारदपरिमाणात् । भस्ममुद्रामिति । विभूतिपांशुलवणाभ्यां कृतामिति सम्प्रदायः । शरावोऽत्र लोहमयः । मन्यंते केचित् तथाह्युक्तम् 'जलपूर्णं दृढं पात्रं सुविशालं समाहरेत् । तदन्तः खर्परं दद्यात् सुविस्तीर्णं दृढं नवम् ॥ बिन्दुं दत्वा तदुपरि बीजपूररसं क्षिपेत् । उपरिष्टाद्विडं दद्यात् ततो लोहकटोरिकां ॥ अयस्कान्तमयीं वापि पैत्तलीं भूतविग्रहम् । उपरिष्टादधोवक्रां दत्वा सम्यग् विलेपयेत् ॥ खटीपुटं शिवीभक्तं सम्यङ्निक्षिप्य मुद्रयेत् । ऊर्ध्वं देयं पुटं तस्य यन्त्रं कच्छपसंज्ञकम् ॥ जारणार्थं रसस्योक्तं गन्धादीनामशेषतः' इति । अत्र गन्धकविधानं तु अस्यैव सम्प्रदायतो व्याख्यातम् । अन्यत्र रसस्योपरि चाधश्चेति । तीक्ष्णाग्निरिति अत्यर्थं बुभुक्षितो भवति राक्षससंज्ञक इत्यपरे सर्वकर्मस्विति योज्य इत्यभिप्रायः ॥ २५–२८ ॥

**गू०**—अथ कच्छपयन्त्रेण गन्धकजारणमुच्यते । तत्रादौ कच्छपयन्त्रमाह—अथेति, मृत्कुण्डे नीरं निक्षिपेत् तन्मध्ये मृत्कुण्डपिधानं शरावकं स्थापयेत् । किंभूतं ? मध्यं मेखलया युतं त्र्यङ्गुलोन्नता मृद्रचिता मेखला मध्यं चूर्णेन लेपयेत् । तन्मध्ये पारदं दत्वा तुल्यगन्धकचूर्णं दत्वा उपरि शरावं दत्वा भस्मलवणमुद्राः कार्याश्चतुर्भिरुत्पलैः पुटेत् । एवं षड्गुणं गन्धं जीर्यते । गन्धकसंगे विषं च देयं । अत्र स्वर्णजारणं नोक्तं ग्रन्थान्तराल्लिख्यते अबीजजीर्णस्य मारितस्य दोषरूपत्वात् । तथाच 'अजीर्णं शम्भुबीजं तु सूतकं यस्तु जारयेत् । ब्रह्महा स दुराचारी मम द्रोही महेश्वरि ॥' अथ जारणं—'चतुःषष्ठ्यांशं हेमपत्रं मायूरमायुना । विलिप्तं तप्तखल्वस्थं रसं दत्वा विमर्दयेत् । पुनर्जम्बीरतोयेन ग्रासे ग्रासे त्वयं विधिः । शनैः संस्वेदयेद्भूयो बद्ध्वा सम्पुटकांजिके । भाण्डिके त्रिदिनं स्थाप्य सूतं जीर्णं समुद्धरेत् । अधिकं तोलितं चेत्स्यात्पुनः स्वेद्यं समावधि । द्वात्रिंशत् षोडशाष्टांशं क्रमेण वसुजारणं । रूप्यादिषु च सत्वेषु विधिरेवं परं स्मृतः' । मायूरमायुना मायूरपित्तेन च हेमपत्रं सुस्वर्णं ॥ २५–२८ ॥

**अथ पारदमारणम्—**

**धूमसारं रसं तोरीं गन्धकं नवसादरम् ॥ २९ ॥**
**यामैकं मर्दयेदम्लैर्भागं कृत्वा समांशकम् ।**
**काचकूप्यां विनिक्षिप्य तां च मृद्वस्त्रमुद्रया ॥३०॥**
**विलिप्य परितो वक्त्रे मुद्रां दत्वा च शोषयेत् ।**
**अधःसच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ॥ ३१ ॥**
**पिठरीं वालुकापूरैर्भृत्वा चाकूपिकागलम् ।**
**निवेश्य चुल्ह्यां तदधः कुर्याद्वह्निं शनैः शनैः ॥३२॥**
**तस्मादप्यधिकं किंचित्पावकं ज्वालयेत्क्रमात् ।**
**एवं द्वादशभिर्यामैर्म्रियते सूतकोत्तमः ॥ ३३ ॥**
**स्फोटयेत्स्वाङ्गशीतं तमूर्ध्वगं गन्धकं त्यजेत् ।**
**अधःस्थं मृतसूतं च सर्वकर्मसु योजयेत् ॥ ३४ ॥**

**दी०**—संप्रति रसमारणविधिमाह—धूमसारमिति । धूमसारं गृहधूमं, रसं पारदम्, तोरी स्फटिका नवसादरं प्रसिद्धम् । अम्लैरिति । जम्बीरनिम्बूकरसैरित्यर्थः । समांशकं भागमिति । एतेन किमुक्तं ? पूर्वोक्तं सकलद्रव्यं प्रत्येकं रसमानं मेलयेदिति क्रम इति भावः । तथाह्युक्तं 'पृथक् समं समं कृत्वा पारदं गन्धकं तथा । नवसारं धूमसारं स्फटिकं याममात्रकम् ॥ निम्बूनीरेण संमर्द्य काचकूप्यां विपाचयेत् । मुखे पाषाणखटिकां दत्वा मुद्रां प्रदापयेत् ॥ सप्तभिर्मृत्तिकावस्त्रैः पृथक् संशोष्य वेष्टयेत् । सच्छिद्रायां मृदः स्थाल्यां कूपिकां सन्निवेशयेत् । पूरयेत् सिकतापूरैरागलं मतिमान् भिषक् । निवेश्य चुल्ल्यां दहनं मन्दमध्यखरक्रमात् ॥ प्रज्वाल्य द्वादशयामं स्वाङ्गशीतं समुद्धरेत् । विस्फोटयित्वाऽथ युक्त्या च ऊर्ध्वलग्नं बलिं त्यजेत्' ॥ 'अधःस्थं रससिन्दूरं सर्वकर्मसु योजयेत्' इति । केचित्तु धूमसारस्थाने सीसकं पठन्ति तच्च सङ्गतं तन्त्रान्तरदर्शनात् 'पृथक् पृथक् समं कृत्वा पारदं गन्धकं तथा । नवसारं च स्फटिकं सनागं याममात्रकं ॥ निम्बूनीरेण संमर्द्य काचकूप्यां विनिक्षिपेत् । बुधश्च वालुकायन्त्रे यामद्वादशकं पचेत् ॥ स्वाङ्गशीतं स्फोटयित्वा ऊर्ध्वलग्नं बलिं त्यजेत् । अधःस्थं रससिन्दूरं योजयेद्रसकर्मणि' इति । शेषं सुबोधम् ॥ २९–३४ ॥

**गू०**—धूमसारं अङ्गारधूमं शुद्धं पारदं तोरी गुर्जरदेशोद्भवा स्फटिका या रक्तवर्णा भवति । गन्धकं शुद्धं, नवसादरं नवसागरं । एतत्सर्वं समं । स्पष्टमन्यत् ॥ २९–३४ ॥

**अन्यदपि रसमारणमाह—**

**अपामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत् ।**
**तत्संपुटे न्यसेत्सूतं मलयूदुग्धमिश्रितम् ॥ ३५ ॥**

१–अधःस्थं गन्धकनलिकाधःस्थं ननु कुप्यधःस्थम् ।

**द्रोणपुष्पीप्रसूनानि विडङ्गमिरिमेदकः ।**
**एतच्चूर्णमधोर्ध्वं च दत्त्वा मुद्रां प्रदीयते ॥ ३६ ॥**
**तं गोलं सन्धयेत्सम्यग्मृन्मूषासंपुटे सुधीः ।**
**मुद्रां दत्त्वा शोषयित्वा ततो गजपुटे पचेत् ॥३७॥**
**एकमेकपुटेनैव जायते भस्म सूतकम् ।**

**दी०**—अपामार्गेति । अपामार्गः प्रसिद्धः तस्य बीजानि जलेन पिष्ट्वा सम्पुटाकारा मूषा कार्या तत्सम्पुटमध्ये सूतं पारदं मलयूदुग्धमर्दनं कृत्वा न्यसेत् धारयेदित्यर्थः । मलयू काष्ठोदुम्बरिका पश्चादुक्तद्रव्यचूर्णं तदुपरि अधश्च दत्वा संमर्द्य मृण्मूषायां मुद्रयेत् । द्रोणपुष्पी नहुल इति प्रसिद्धा । लोके 'गूमा' शब्दवाच्या । तस्याः प्रसूनानि पुष्पाणि विडङ्गं प्रसिद्धम् । इति । इरिमेदको विट्खदिरः तस्य त्वक् ग्राह्या तद्गोलं मर्दयेदिति । तं रसादिजनितगोलकं सम्यगवरोधयेत् मूषायामिति शेषः ॥ ३५-३७ ॥

**गू०**—तथापरं च । अपामार्ग ऊर्ध्वकण्टकः, मलयूदुग्धं काष्ठोदुम्बरिकादुग्धं, द्रोणपुष्पी प्रसिद्धा तत्पुष्पाणि, विडङ्गं, इरिमेदो विट्खदिरः चूर्णं एतच्चूर्णमूर्ध्वाधोर्ध्वं दीयते स्पष्टमन्यत् ॥ ३५-३७ ॥

**अन्यदपि रसमारणं प्रकटयन्नाह—**

**काष्ठोदुम्बरिकादुग्धे रसं किंचिद्विनर्दयेत् ॥ ३८ ॥**
**तद्दुग्धघृष्टहिङ्गोश्च मूषायुग्मं प्रकल्पयेत् ।**
**क्षिप्त्वा तत्संपुटे सूतं तत्र मुद्रां प्रदापयेत् ॥ ३९ ॥**
**धृत्वा तं गोलकं प्राज्ञो मृन्मूषासंपुटेऽधिके ।**
**पचेन्मृदुपुटेनैव सूतको याति भस्मताम् ॥ ४० ॥**

**दी०**—काष्ठोदुम्बरिकादुग्धैरिति । काष्ठोदुम्बरिका कुडुम्बरी शब्दवाच्या । तद्दुग्धघृष्टहिङ्गोश्चेति काष्ठोदुम्बरिकादुग्धेनैव हिङ्गुं प्लाव्य तेन मूषां कृत्वा तन्मध्ये रसं मेलयित्वा सर्वं गोलकं कृत्वा पश्चात् मृण्मयमूषायां अन्धयेत् अवरोधयेदित्यर्थः । मृदुपुटेनैवेति लघुगजपुटेनैवेत्यर्थः । लघुगजपुटलक्षणं तन्त्रान्तरेऽभिहितम् । तद्यथा—'निपुणविहितगर्तः षोडशैरङ्गुलैर्यो मितसकलविभागस्तस्य मध्ये निधाय । ज्वलनमतिविशुष्कैर्गोमयैः पारदस्य लघुगजपुटमेतत् प्रोक्तमेवं मुनीन्द्रैः' ॥ ३८-४० ॥

**गू०**—अन्यच्च । काष्ठोदुम्बरिका प्रसिद्धा ॥३८-४०

**अपरमपि पारदमारणं दर्शयन्नाह—**

**नागवल्लीरसैर्घृष्टः कर्कोटीकन्दगर्भितः ।**
**मृण्मूषासंपुटे पक्त्वा सूतो यात्येव भस्मताम् ॥४१॥**

**दी०**—नागवल्लीति । नागवल्ली ताम्बूलवल्ली तस्याः पत्ररसेन घृष्टो मर्दितः पारदः कर्कोटीकन्दगर्भितः सन् मृण्मूषासम्पुटे निरुध्य मुद्रयित्वा गजपुटे पचेत् । कर्कोटी वन्ध्याकर्कोटकीवल्ली तस्याः कन्दम् । शेषं सुबोधम् ॥ ४१ ॥

**गू०**—अन्यच्च । नागवल्लीति स्पष्टम् ॥ ४१ ॥

## अथ ज्वरादौ रसाः प्रोच्यन्ते—

### ज्वराङ्कुशः ।

**खण्डितं मृगश्रृङ्गं च ज्वालामुख्या रसैः समम् ।**
**रुद्ध्वा भाण्डे पचेच्चुल्यां यामयुग्मं ततो नयेत् ४२**
**अष्टांशं त्रिकटुं दद्यान्निष्कमात्रं च भक्षयेत् ।**
**नागवल्लीरसैः सार्धं वातपित्तज्वरापहम् ॥ ४३ ॥**
**अयं ज्वरांकुशो नाम रसः सर्वज्वरापहः ।**
**ऐकाहिकं द्व्याहिकं च त्र्याहिकं वा न संशयः ॥४४॥**

**दी०**—इदानीं संसिद्धरसानामध्यायं प्रकटयन्नाह—तत्रादौ ज्वराङ्कुशनामरसं व्याचष्टे—खण्डितमिति । हरिणस्येदं हारिणं श्रृङ्गं विषाणं तच्च खण्डितं शकलीकृतं, संक्षुण्णमित्यर्थः । ज्वालामुख्या रसैरिति ज्वालामुखी जयन्ती तस्याः पत्राणां स्वरसः । सा ज्वालामुखी चतुर्धा भवति । तथाहि—'शुक्ला पीता तथा रक्ता कृष्णा ज्वालामुखी भवेत्' इति । लोके 'खसिनी' शब्दवाच्या । केचित्तु ज्वालामुखीत्यनेन भल्लातकमिति व्याख्यानयन्ति तन्न सर्वसंमतम् । सममित्यत्र समशब्दो मिलितार्थे वर्तत इति केचित् । ननु सममत्र साम्यं, यतः सम्प्रदायेष्वपि ज्वालामुख्या रसैः कृत्वा मृगश्रृङ्गं बहुशो भावयित्वा जारयेदित्यभिप्रायः । यदुक्तम्—'असकृद्भावितं श्रृङ्गं हारिणं कुट्टितं रसैः । ज्वालामुख्याः पचेद्भाण्डगतं तद्भस्म चूर्णयेत्' इत्यादि । अष्टांशं त्रिकटुं दद्यादिति श्रृङ्गभागान्मिलितकटुत्रयस्य सर्वज्वरापह इत्यनेनान्वयः । तेन सन्निपातजनितमपि नाशयेदित्यर्थः ॥ ४२-४४ ॥

**गू**—ज्वालामुखी[1] प्रसिद्धा ॥ ४२-४४ ॥

### अथ ज्वरारिरसः—

**पारदं रसकं तालं तुत्थं टङ्कणगन्धके ।**
**सर्वमेतत्समं शुद्धं कारवेल्लीरसैर्दिनम् ॥ ४५ ॥**
**मर्दयेल्लेपयेत्तेन ताम्रपात्रोदरं भिषक् ।**
**अङ्गुल्यर्धप्रमाणेन ततो रुद्ध्वा च तन्मुखम् ॥ ४६ ॥**
**पचेत्तं वालुकायन्त्रे क्षिप्त्वा धान्यानि तन्मुखे ॥४७॥**
**यदा स्फुटन्ति धान्यानि तदा सिद्धं विनिर्दिशेत् ।**

१-अगीया ।

**ततो नयेत्स्वाङ्गशीतं ताम्रपात्रोदराद्भिषक् ॥ ४८ ॥**
**रसं ज्वरारिनामानं विचूर्ण्य मरिचैः समम् ।**
**माषैकं पर्णखण्डेन भक्षयेन्नाशयेज्ज्वरम् ॥ ४९ ॥**
**त्रिदिनैर्विषमं तीव्रमेकद्वित्रिचतुर्थकम् ।**

**दी०**—अथ ज्वराररिसविवरणमाह—पारदमिति। अत्र रसकं खर्परकं, तालं हरितालं, तुत्थं प्रसिद्धम्, टङ्कणं सौभाग्यक्षारं। एके 'तुत्थकं कणा गन्धम्' इति पठन्ति। तत्र कणा मनःशिला। एतद्बहुस्थानेषु न प्रचरति, अन्यतो दर्शनात्। 'रसं च रसकं तालं शिखितुण्डं च टङ्कणं। गन्धकं च समं पिष्ट्वा कारवेल्ल्या रसैर्दिनम्' इत्यादि। कारवेल्ली लोके 'करेला' शब्दवाच्या। हस्तपरिपाट्यां च पूर्वोक्तं सकलद्रव्यं समभागं संगृह्य कारवेल्लीपत्ररसेन त्रिवारं रसं संमर्द्य तत्कल्केन ताम्रपात्रोदरमङ्गुलार्धप्रमाणं प्रलिप्य हण्डिकामध्येऽधोमुखं संस्थाप्य मुद्रां कृत्वा तदनु वालुकायन्त्रे पचेद्यावत्तदुपरि व्रीहयः स्फुटन्ति, अङ्गुलमङ्गुष्ठोदरमध्यम्। मासमानमत्र विषमतीव्रज्वरनिमित्तमन्यत्राल्पमिति। तथाहि—'रसो ज्वरारिसिद्धोऽयं द्विगुञ्जो वातजे ज्वरे। दातव्यः पर्णखण्डेन तत्क्षणान्नाशयेज्ज्वरम्' इति॥ ॥ ४५-४९ ॥

**गू०**—पारदं शुद्धं, रसकं खर्परं, तालं, तुत्थं शुद्धं, टङ्कणं सौभाग्यक्षारं, कारवेल्ली शाकविशेषः। ताम्रपात्रं, गोमूत्रपञ्चामृतादौ शुद्धं। स्पष्टमन्यत्। पथ्यं दुग्धौदनं मुद्गं वा ॥ ४५-४९ ॥

### अथ शीतज्वरारिरसः।

**तालकं तुत्थकं ताम्रं रसं गन्धं मनःशिलाम् ॥५०॥**
**कर्षं कर्षं प्रयोक्तव्यं मर्दयेत्त्रिफलाम्बुभिः ।**
**गोलं न्यसेत्संपुटके पुटं दद्यात्प्रयत्नतः ॥ ५१ ॥**
**ततो नीत्वार्कदुग्धेन वज्रीदुग्धेन सप्तधा ।**
**क्वाथेन दन्त्याः श्यामाया भावयेत्सप्तधा पुनः ॥५२॥**
**माषमात्रं रसं दिव्यं पञ्चाशन्मरिचैर्युतम् ।**
**गुडं गद्याणकं चैव तुलसीदलयुग्मकम् ॥ ५३ ॥**
**भक्षयेत्त्रिदिनं भक्त्या शीतारिर्दुर्लभः परः ।**
**पथ्यं दुग्धौदनं देयं विषमं शीतपूर्वकम् ॥ ५४ ॥**
**दाहपूर्वं हरत्याशु तृतीयकचतुर्थकौ ।**
**आह्निकं सततं चैव वैवर्ण्यं च नियच्छति ॥ ५५ ॥**

**दी०**—इदानीं शीतज्वरारिं प्रकटयन्नाह—तालकमिति। तालकं हरितालं, ताम्रमिति शुद्धताम्रभस्म, रसं पारदम्, गन्धं गन्धकं। कर्षमिति द्विरुक्तेन प्रत्येकं कर्षप्रमाणमित्यर्थः। त्रिफलाम्बुभिरिति त्रिफला हरीतक्यादिकं तस्या क्वाथेनेत्यर्थः। पुटं दद्यादिति। सकलद्रव्यचूर्णं त्रिफलाक्वाथेन संमर्द्य गोलकं कृत्वा तदनु शरावसम्पुटे धृत्वा तदुपरि मृत्तिकां लिप्त्वा गजपुटे पचेदित्यर्थः। प्रयत्नत इति। गुरुसकाशात्कर्मनैपुण्यात्। पश्चात् तद्रसं शरावाभ्यन्तरात् संगृह्य अर्कदुग्धेन दन्तीमूलस्वरसेन श्यामारसेन च सप्तधा भाव्यं सप्तधा भावना प्रत्येकेनेत्यर्थः। वज्री सेहुण्डभेदः, दन्तीमूलस्वरसभावे क्वाथो ग्राह्यः, श्यामा निशोथः, तस्या मूलस्वरसभावे क्वाथं वा, एवं सिद्धो भवति। असत्सम्प्रदायेऽपि द्रव्यचतुष्टयेन भावनां दत्त्वा पश्चात् पूर्वोक्तविधानेन गजपुटे पक्त्वा सिद्धो भवतीति। अन्यत्रापि दृश्यते तथाहि—'पश्चाद्वज्रीरविक्षीरैर्दन्तीश्यामारसेन च। संमर्द्य सप्तधा घर्मे शरावपुटकं पचेत्' इत्यादि। एतन्माषपरिमितं पञ्चाशन्मरिचैः सह गुडगद्याणकयुतं च तुलसीपत्रद्वयं च संवेष्ट्य भक्षयेदित्यर्थः। दिव्यमिति श्रेष्ठं ऋषिप्रणीतत्वात्। पञ्चाशन्मरिचैरिति गणनामात्रम्। गद्याणकमिति षण्मासकसंज्ञम्। एके गुडतुलसीपत्रयोरनुपानमाहुः। भक्त्येति पूर्वं द्विजगुरुपूजनं सम्भाव्य पश्चादास्तिक्यपूर्वकं भक्षयेदिति भावः। वैवर्ण्यमत्र ज्वरजनितं अन्यरोगजनितं वा ॥ ५०-५५ ॥

**गू०**—ताम्रं मृतं, वज्री सेहुण्डभेदः, दन्ती जयपालमूलं, त्रिवृन्निशोथः, माषमात्रं सिद्धं रसं पञ्चाशन्मरिचं गुडं गद्याणकं षण्माषकं तुलसीदलपलं द्वयं द्विगद्याणकं एतत्प्रमाणं त्रिदिनं कृत्वा भक्षयेत्। यद्वा सप्तदिनमौषधबाहुल्यात् ॥ ५०-५५ ॥

### ज्वरघ्नी गुटिका।

**भागैकः स्याद्रसाच्छुद्धाद्द्वैलेयः पिप्पली शिवा ।**
**आकारकरभो गन्धः कटुतैलेन शोधितः ॥ ५६ ॥**
**फलानि चेन्द्रवारुण्याश्चतुर्भागमिता अमी ।**
**एकत्र मर्दयेच्चूर्णमिन्द्रवारुणिकारसैः ॥ ५७ ॥**
**माषोन्मितां गुटीं कृत्वा दद्यात्सर्वज्वरे बुधः ।**
**छिन्नारसानुपानेन ज्वरघ्नी गुटिका मता ॥ ५८ ॥**

**दी०**—अथ ज्वरघ्नीं गुटिकामाह—भागैकः स्याद्रसाच्छुद्धादिति। शुद्धिश्चास्य पूर्वं कथिता। रसं पारदं तस्यैको भागः। एलीयः कुमारीरसजनितनिर्यासद्रव्यविशेषः 'एलुवा' इति प्रसिद्धः। तदभावे कुमारीपत्र-

रस्यैव प्रायमिलपरे, केचिदेलीयशब्देन एलवालुकं वदन्ति । तच्च कुष्ठगन्धिकफलसदृशं भवति लोके प्रसिद्धं च । एतच्च सर्वंमतम् । शिवा हरीतकी आकारकरभ इति आकल्लकः प्रसिद्धः । कटुतैलेन शोधितगन्धक इति शेषः । कटुतैलं सार्षपम् । फलानि चेन्द्रवारुण्या इति । इन्द्रवारुणी चिर्भटी, तस्याः फलानि । एके मूलानि चेन्द्रवारुण्या वदन्ति तद्बहुपुस्तकेषु न दृश्यते । तस्मादसङ्गतोऽयं पाठः । चतुर्भागमिता अमी इति । अमी एलीयप्रमुखपञ्चद्रव्यविशेषाश्चतुर्भागमिता भवन्ति भागोऽत्र पारदपरिमाणात् । एतत्सकलं चूर्णीभूतं कृत्वा इन्द्रवारुणिकामूलरसेन मर्दयेदित्यर्थः । स्वरसपरिमाणमत्र द्रव्यभावनायोग्यं देयम् । तच्च यावच्चूर्णं प्लावितं भवति तावद्देयमिति भावः । छिन्नारसानुपानेनेति । छिन्ना गुडूची तस्याः स्वरसेनानुपानम् । अनुपानमात्राऽत्र तन्त्रान्तरादवगन्तव्या । तद्यथा 'रसानामनुपानं स्याद्विपलं पलमर्धकम् । वातपित्तकफप्राये यथायोग्यमनुक्रमात्' इति । ज्वरघ्नीति सामान्येन सर्वज्वरहरेत्यर्थः ॥ ५६–५८ ॥

मू०—रसात् पारदात् शुद्धात् भागैकः, एलीयः एलवालुकं, पिप्पली, शिवा हरीतकी, आकारकरभः आकल्लकः, गन्धो गन्धकः कटुतैलेन द्रावयित्वा शोधितः, इन्द्रवारुण्याः फलानि, अमी एलीयादयः चतुर्भागाः प्रत्येकं पुनः इन्द्रवारुणिकारसैः मर्दयेत्, माषमात्रां वटीं खादेत् । इन्द्रवारुणिकाफलं शुष्कं चूर्णं कार्यम् ॥ ५६–५८ ॥

**अथ लोकनाथरसः क्षयादौ—**

शुद्धो बुभुक्षितः सूतो भागद्वयमितो भवेत् ।
तथा गन्धस्य भागौ द्वौ कुर्यात्कज्जलिकां तयोः ५९
सूताच्चतुर्गुणेष्वेव कपर्देषु विनिक्षिपेत् ।
भागैकं टङ्कणं दत्त्वा गोक्षीरेण विमर्दयेत् ॥ ६० ॥
तथा शङ्खस्य खण्डानां भागानष्टौ प्रकल्पयेत् ।
क्षिपेत्सर्वं पुटस्यान्तश्चूर्णलिप्तशरावयोः ॥ ६१ ॥
गर्ते हस्तोन्मिते धृत्वा पुटेद्गजपुटेन च ।
स्वाङ्गशीतं समुद्धृत्य पिष्ट्वा तत्सर्वमेकतः ॥ ६२ ॥
पञ्चगुञ्जासंमितं चूर्णमेकोनत्रिंशदूषणैः ।
घृतेन वातजे दद्यान्नवनीतेन पित्तजे ॥ ६३ ॥
क्षौद्रेण श्लेष्मजे दद्याद्तीसारे क्षये तथा ।
अरुचौ ग्रहणीरोगे कार्श्ये मन्दानले तथा ॥ ६४ ॥
कासश्वासेषु गुल्मेषु लोकनाथरसो हितः ।
तस्योपरि घृतान्नं च भुञ्जीत कवलत्रयम् ॥ ६५ ॥
मञ्चे क्षणैकमुत्तानः शयीतानुपधानके ।
अनम्लमन्नं सघृतं भुञ्जीत मधुरं दधि ॥ ६६ ॥
प्रायेण जाङ्गलं मांसं प्रदेयं घृतपाचितम् ।
सुदुग्धभक्तं दद्याच्च जातेऽग्नौ सांध्यभोजने ॥६७॥
सघृतान्मुद्गवटकान्व्यञ्जनेष्ववचारयेत् ।
तिलामलककल्केन स्नापयेत्सर्पिषाऽथवा ॥ ६८ ॥
अभ्यञ्जयेत्सर्पिषा च स्नानं कोष्णोदकेन च ।
क्वचित्तैलं न गृह्णीयान्न बिल्वं कारवेल्लकम् ॥६९॥
वार्ताकं शफरीं चिञ्चां त्यजेद्व्यायाममैथुने ।
मद्यं संधानकं हिङ्गु शुण्ठीं माषान्मसूरकान् ॥७०॥
कूष्माण्डं राजिकां [1]कोपं काञ्जिकं चैव वर्जयेत् ।
त्यजेदयुक्तनिद्रां च कांस्यपात्रे च भोजनम् ॥७१॥
ककारादियुतं सर्वं त्यजेच्छाकफलादिकम् ।
पैथ्योऽयं लोकनाथस्तु शुभनक्षत्रवासरे ॥ ७२ ॥
पूर्णातिथौ सिते पक्षे जाते चन्द्रबले तथा ।
पूजयित्वा लोकनाथं कुमारीं भोजयेत्ततः ॥ ७३ ॥
दानं दत्त्वा द्विघटिकामध्ये [2]ग्राह्यो रसोत्तमः ।
रसाच्चेज्जायते तापस्तदा शर्करया युतम् ॥ ७४ ॥
सत्त्वं गुडूच्या गृह्णीयाद्वंशरोचनया युतम् ।
खर्जूरं दाडिमं द्राक्षामिक्षुखण्डानि [3]चारयेत् ॥७५॥
अरुचौ निस्तुषं धान्यं घृतभृष्टं सशर्करम् ।
दद्यात्तथा ज्वरे धान्यगुडूचीक्वाथमाहरेत् ॥ ७६ ॥
उशीरवासकक्वाथं दद्यात्समधुशर्करम् ।
रक्तपित्ते कफे श्वासे कासे च स्वरसंक्षये ॥ ७७ ॥
अग्निभृष्टजयाचूर्णं मधुना निशि दीयते ।
निद्रानाशेऽतिसारे च ग्रहण्यां मन्दपावके ॥७८॥
सौवर्चलाभयाकृष्णाचूर्णमुष्णोदकैः पिबेत् ।
शूलेऽजीर्णे तथा कृष्णा मधुयुक्ता ज्वरे हिता ॥७९॥
प्लीहोदरे वातरक्ते छर्द्यां चैव गुदाङ्कुरे ।
नासिकादिषु रक्तेषु रसं दाडिमपुष्पजम् ॥ ८० ॥
दूर्वायाः स्वरसं नस्ये प्रदद्याच्छर्करायुतम् ।
कोलमज्जा कणा बर्हिपक्षभस्म सशर्करम् ॥ ८१ ॥
मधुना लेहयेच्छर्दिहिक्काकोपोपशान्तये ।
विधिरेष प्रयोज्यस्तु सर्वस्मिन्पोट्टलीरसे ॥ ८२ ॥
मृगाङ्के हेमगर्भे च मौक्तिकाख्येऽपरेषु च ।
इत्ययं लोकनाथाख्यो रसः सर्वरुजो जयेत् ॥८३॥

१–'कोलं' पा. । २–'ग्राह्यो' पा. । ३–'श्च दापयेत्' पा. ।

(वैराटभस्म मण्डूरं चूर्णयित्वा घृते पचेत् ।
तत्समं मरिचं चूर्णं नागवल्ल्या विभावितम् ॥ ८४ ॥
तच्चूर्णं मधुना लेह्यमथवा नवनीतकैः ।
माषमात्रं क्षयं हन्ति यामे यामे च भक्षितम् ॥८५॥
लोकनाथरसो ह्येष मण्डलाद्राजयक्ष्मनुत् । )

**दी०**—इदानीं लोकनाथरसं प्रकटयन्नाह—शुद्ध इति । सूतः पारदः शुद्धः संस्कारितः, संस्कारा ह्यस्य पूर्वं कथिताः, बुभुक्षितः क्षुधितः, कारितः द्रव्यैरिति शेषः, सच भागद्वयपरिमितः, तथा गन्धस्य द्वौ भागौ तथेति ग्रहणेन गन्धकस्यापि शोधनं दर्शितम् । तयोरिति गन्धकपारदयोः, सूताच्चतुर्गुणेष्वित्यादि सूतात् सूतपरिमाणात् । कपर्दकेषु वराटकेषु कपर्दकलक्षणं च तन्त्रान्तरादवगन्तव्यम् । तद्यथा-'तुलनायां गुरुतरान् पञ्च गुल्मान् दश द्विजान् । वराटान् स्थूलपीतांश्च रसकर्मणि योजयेत्' इति । भागैकं टङ्कणं दद्यादिति कोऽर्थः पारदपरिमाणादर्धभागं सौभाग्यक्षारं संगृह्य गोक्षीरेण सह कल्कीकृत्यानेनैव कल्केन तान् रसगर्भितवराटान् विमुद्रयेदित्यभिप्रायः । तथा शङ्खस्य खण्डानामिति शोधितशङ्खस्य खण्डानां शकलानां भागा अष्टौ ग्राह्याः । पारदस्यैकभागापेक्षयेत्यर्थः । संप्रदायस्तु शङ्खशकलानि क्षीरे संशोध्य पश्चात्तेनैव क्षीरेण सह श्लक्ष्णानि सम्पिष्य पश्चादनेनैव कल्केन तान् वराटान् लेपयेदित्यभिप्रायः । अन्ये तु शङ्खशकलानि वराटिकाभिः सह पुटेत् । चूर्णलिप्तशरावयोरिति । चूर्णं शुक्तिकादिसंभवं तच्च कलिशब्दवाच्यं तेनालिप्तशरावकौ कृत्वा ताभ्यां सम्पुटं कारयेदित्यर्थः । शरावसम्पुटसन्धिषु साम्प्रदायिकी मुद्रा कार्येति व्यवहारः । तदुपरि च मृल्लेपः[१]कार्य इत्यपि व्यवहारः । गजपुटेनेति । यथा गजपुटविधानं तथैवाऽत्र पुटेदित्यर्थः । तच्च गोमयादिना गर्ते कृतम् । एकोनत्रिंशद्दूषणैरिति एकेन यदूनं मरिचानां त्रिंशत्तेन सह षड्रक्तिकप्रमाणं भक्षयेत् । घृतेन वातजे दद्यादित्यादि । अत्र वातजे पित्तजे कफजे च अतीसारादावग्रे वक्ष्यमाणा नियमा बोद्धव्याः । तस्योपरि घृतान्नमिति पूर्वं रसं भक्षयित्वा पश्चात्तदुपरि कवलत्रयं घृतान्नं भुञ्जीत घृतेन युक्तमन्नं घृतान्नम् । अन्नमत्रौदनम् । मञ्चे खट्वायाम् । अनुपधानके उपधानं गेन्दुकं तेन रहिते मञ्चे इति शेषः । एतेन सम्यगुत्तानं यथा स्यात्तथा संविशेदित्यर्थः ।

पश्चात् पथ्यापथ्यमाह—अनम्लमित्यादि । अनम्लं अम्लरसरहितं अम्लश्च मातुलुङ्गप्रभृतिकं । अन्नं संस्कृतमन्नं तेन भक्तादिकं । घृतमिति घृतयुक्तं । मधुरं दधीति । मधुरं कोमलजीवितं यद्वा मधुरयुक्तं तत्तु रसालादि । प्रायेण जाङ्गलं मांसमिति मांसभक्षणं चात्र विहितं बाहुल्येन जाङ्गलं प्रधानतमं तदपि घृतपाचितं कार्यं । यद्यपि जाङ्गलवर्गोऽष्टविधः । तद्यथा—जाङ्गला विष्कराः प्रतुदा गुहेशयाः प्रसहा पर्णमृगा बिलेशयाः ग्राम्याश्चेति । तथाप्येते तु रोगापेक्षया देयाः, घृतपाचितमिति तैलनिषेधात् गुणाधिक्याच्च । तथाहि—'मांसं यत्तैलसिद्धं तु वीर्योष्णं पित्तकृद्गुरु । लघ्वग्निदीपनं ग्राह्यं रुचिं दृष्टिप्रसादनं । अनुष्णवीर्यं पित्तघ्नं मनोज्ञं घृतसाधितम्' इति । घृतानिति घृतसाधितान् अथवा सर्पिषा घृतेन स्नानं कुर्यात्, कोष्णोदकेन स्नानं तु अधःकायस्येति । यतः 'उष्णाम्बुनाधःकायस्य परिषेको बलावहः । तेनैव तूत्तमाङ्गस्य बलहृत् केशचक्षुषाम्' इति । क्वचित् तैलं न गृह्णीयादिति क्वचित् कुत्रापि तैलग्रहणं न कार्यं तेन दीपादिष्वपि तैलं निषिद्धं स्यात् । **अथ त्याज्यमाह**—बिल्वमिति । बिल्वफलं, कारवेल्लकं लोके 'करेला'शब्दवाच्यं । फलमिति । वार्ताकं वृन्ताकं, शफरीं क्षुद्रमत्स्यान्, चिञ्चा प्रसिद्धा, व्यायामं शरीरायासजननं कर्म, मैथुनं स्त्रीसेवा, मद्यादिकमिति सुगमम् । त्यजेद्युक्तनिद्रां चेति अयुक्तनिद्रा दिवानिद्रादिकं । ककारादियुतं सर्वमिति सर्वमाहारनिमित्तं ककारपूर्वकं शाकफलादिकं त्यजेत् । सिते पक्षे शुक्ले पक्षे अग्निभृष्टं । जयाचूर्णमिति जया भङ्गा, बर्हिपक्षभस्मेति बर्ही मयूरः । मृगाङ्के मृगाङ्कपोट्टलिके, हेमगर्भे हेमगर्भपोट्टलिके, मौक्तिकाख्ये मौक्तिकाख्यपोट्टलिके अपरेष्वपि पञ्चरत्नपोट्टलिकप्रभृतिषु एष विधिः प्रयोज्य इति ॥ ५९–८५ ॥

**गू०**—शुद्धो सूतः पारदः भागद्वयमिति टंकद्वयं कर्षद्वयं तथा गन्धकस्य शुद्धस्य द्वौ भागौ तयोः पारदगन्धकयोः कज्जलिकां कुर्यात् । सूतात् चतुर्गुणेषु अष्टभागेषु कपर्देषु[१] क्षिपेत् भागैकं टङ्कणं सौभाग्यं दत्वा गोक्षीरेण मर्दयित्वा वराटानां मुखं मुद्रयेत्, शंखस्य शंखानां अष्टौ भागान् शरावमध्ये वराटकानां अध ऊर्ध्वं दत्वा मुद्रां विधाय गजपुटे पचेत् कपर्दो वराटकः

१–प्रक्षिप्तम् ।

१–कौडीति लोके ।

पुटस्यान्तः संपुटस्यान्तः सर्वं क्षिपेत् चूर्णं कज्जलीचूर्णं तल्लिप्तशरावयोः संपुटस्यान्तः मध्ये षड्गुञ्जासम्मिते रसं सिद्धं एकोनत्रिंशत् ऊषणैर्मरिचैर्देयं वातरोगे घृतेन दद्यात् । शफरी क्षुद्रमत्स्यः । पथ्यवर्गे हि तस्य गृहीतत्वात् । 'वरो मत्स्येषु रोहित' इति सुश्रुतोक्तेः । अयुक्तनिद्रां दिवाजन्यां जया विजया तच्चूर्णं कोलमज्जां बदरमज्जां कणा पिप्पली बर्हिमयूरस्तत्पक्षभस्म । ॥ ५९–८५ ॥

## अथ मृगाङ्कपोट्टलीरसः क्षयादौ—

**भूर्जवत्तनुपत्राणि हेम्नः सूक्ष्माणि कारयेत् ॥ ८६ ॥**
**तुल्यानि तानि सूतेन खल्वे क्षिप्त्वा विमर्दयेत् ।**
**काञ्चनाररसेनैव ज्वालामुख्या रसेन वा ॥ ८७ ॥**
**लाङ्गल्या वा रसैस्तावद्यावद्भवति पिष्टिका ।**
**ततो हेम्नश्चतुर्थांशं टङ्कणं तत्र निक्षिपेत् ॥ ८८ ॥**
**पिष्टमौक्तिकचूर्णं च हेमद्विगुणमावपेत् ।**
**तेषु सर्वसमं गन्धं क्षिप्त्वा चैकत्र मर्दयेत् ॥ ८९ ॥**
**तेषां कृत्वा ततो गोलं वासोभिः परिवेष्टयेत् ।**
**पश्चान्मृदा वेष्टयित्वा शोषयित्वा च धारयेत्॥९०॥**
**शरावसंपुटस्यान्तस्तत्र मुद्रां प्रदापयेत् ।**
**लवणापूरिते भाण्डे धारयेत्तं च संपुटम् ॥ ९१ ॥**
**मुद्रां दत्त्वा शोषयित्वा बहुभिर्गोमयैः पुटेत् ।**
**ततः शीते समाहृत्य गन्धं सूतसमं क्षिपेत् ॥९२॥**
**घृष्ट्वा च पूर्ववत्खल्वे पुटेद्गजपुटेन च ।**
**स्वाङ्गशीतं ततो नीत्वा गुञ्जायुग्मं प्रयोजयेत् ॥९३**
**अष्टभिर्मरिचैर्युक्तः कृष्णात्रययुतोऽथवा ।**
**विलोक्य देयो दोषादीनेकैका रसरक्तिका ॥ ९४ ॥**
**सर्पिषा मधुना वापि दद्याद्दोषाद्यपेक्षया ।**
**लोकनाथसमं पथ्यं कुर्यात्स्वस्थमनाः शुचिः ॥९५॥**
**श्लेष्माणं ग्रहणीं कासं श्वासं क्षयमरोचकम् ।**
**मृगाङ्कोऽयं रसो हन्यात्कृशत्वं बलहीनताम् ॥९६॥**

**टी०**—अथ मृगाङ्कपोट्टलीरसं व्याचष्टे—भूर्जवदिति । भूर्जो वृक्षविशेषः तस्य त्वक् तदाकाराणि तनुपत्राणि । तनुग्रहणेन यथा अङ्गादीनां मनोहरार्थं स्वर्णकाराः कुर्वन्ति तद्वदत्रापि कार्याणीत्यर्थः । सूक्ष्माणीति तानि तनुपत्राणि तिलवत् खण्डितानि कृत्वेत्यर्थः । सूतेन पारदेन समं संगृह्य खल्वे क्षिप्त्वा मर्दनीयम् । कथं यथा काञ्चनाररसेनेत्यादि । काञ्चनारो वृक्षविशेषः प्रसिद्ध एव, ज्वालामुखी जयन्ती सा चतुर्विधा भवति । तथाहि—'श्वेता रक्ता तथा पीता कृष्णा ज्वालामुखी भवेत्' इति । लाङ्गली कलिहारिका, यावद्भवति पिष्टिकेति कोऽर्थः ? तत्सुवर्णरसद्रव्यं यावद्द्रवत्वं प्राप्य पिष्टिका स्यात् तावद्रसैर्मर्दनीयम् । अस्मत्सम्प्रदाये तु पूर्वोक्तशोधितरसे सुवर्णपत्राणि दत्त्वा तदनु ईषद्गन्धरजो दत्वा उपरि पात्रं संस्थाप्य गाढं मर्दयेत्, यावद्घनभस्मवद्भवति पश्चादुक्तरसैः सह संमर्द्य गोलकार्थं पिष्टिकां कारयेदित्यर्थः । ततो हेम्नश्चतुर्थांशं टङ्कणं तत्र निक्षिपेत् इति । ततः पिष्टीकरणानन्तरं तत्र पिष्टीकृतद्रव्ये टङ्कणं सौभाग्यक्षारं हेम्नः सुवर्णस्य चतुर्थांशं क्षिपेत्, तेन यदा सुवर्णं चतुःशाणं भवति तदा टङ्कणं शाणमेकमित्यर्थः । पिष्टमौक्तिकचूर्णमिति । शोधितमौक्तिकचूर्णं सुवर्णपरिमाणाद्द्विगुणं संगृह्य मेलयेदिति भावः । तेषु पूर्वोक्तद्रव्येषु सर्वसमं समस्तद्रव्यसाम्यं गन्धकं क्षिप्त्वा सर्वमेकत्र मर्दयेदित्यभिप्रायः । मर्दनमत्र पूर्वोक्तरसैरिति व्यवहारः । सर्वसममिति सर्वं पारदसुवर्णटङ्कणमौक्तिकमित्यर्थः । तेषां कृत्वा ततो गोलं वासोभिः परिवेष्टयेदिति इत्यापाठ्यां तु तद्गोलकरूपं द्रव्यं पूर्वं शरावसम्पुटे कृत्वा तत्सन्धौ साम्प्रदायिकीं मुद्रां च दत्वा तद्भाण्डं गजपुटविधानेन पुटेत् । पश्चात् स्वाङ्गशीतत्वं द्रव्यं संगृह्य यावत् परिमाणं पारदं पूर्वं तावत् परिमाणमन्यद्गन्धकं च दत्वा संमर्द्य च पूर्ववत् पुटेत् मर्दनमत्र पूर्वोक्तरसैः एवं सिद्धो भवति । शेषं सुबोधनम् ॥ ८६–९६

**गू०**—भूर्जपत्रवत्तनु सूक्ष्मं यथा स्यात्तथा हेम्नः सुवर्णस्य पत्राणि कारयेत् । तानि सूतेन शुद्धपारदेन तुल्यानि खल्वे कृत्वा मर्दयेत् । काञ्चनारस्तद्रसेन ज्वालामुखी जयन्ती तद्रसेन वा लांगल्या कलिहार्या वा रसेन यावत् पिष्टिका भवति ततो हेम्नश्चतुर्थांशं टङ्कणं सौभाग्यपिष्टमौक्तिकाचूर्णं हेम द्विगुणं आवपेत् मेलयेत् तेषु सर्वसमं स्वर्णादिसमं गन्धं गन्धकं क्षिपेत् शुद्धं तेषां सर्वेषां गोलं वासोभिर्वेष्टयित्वा शोषयित्वा च धारयेत् । कुत्र ? शरावसंपुटस्य अन्ते मध्ये तत्र मुद्रां प्रदापयेत् लवणपूरिते भाण्डे तं संपुटं धारयेत् । मुद्रां दत्वा शोषयित्वा बहुभिर्गोमयैः पुटेत् चुल्ल्यां वा अग्निं दापयेत् ततः शीते समाकृष्य गन्धसूतं समं गोलकं समं क्षिपेत् पूर्ववत् खल्वे पिष्ट्वा गजपुटे पचेत् स्वाङ्गशीतं गुञ्जायुग्मं अत्र योजयेत् । अष्टाभिः मरिचैर्वा त्रिभिः सर्पिषा घृतेन मधुना वा दोषाद्यपेक्षया

देया । पथ्यं लोकनाथसमं । स्वच्छमनाः पुनः शुचिः पवित्रो रोगी अयं मृगाङ्कः श्लेष्मादीन् हन्यात् मृगाङ्कश्चन्द्रस्तन्नामा मृतामयत्वाद्रोगनाशकः । यद्वा पूर्वं मृगाङ्के च क्षयरोगत्वात् पूर्वं दत्तस्तस्मादयं मृगाङ्कः । केचित् मृतस्वर्णेन मृतपारदेन गंधकं टङ्कणं मुक्ताचूर्णेन मृगाङ्कसाधनमाहुः । तच्च यथा "भस्मीकृतस्वर्णसमं रसस्य भस्मासुरेणापि रसेन तुल्यं । दिनौक्तिकं पादिकटङ्कणं च जम्बीरनीरे वटकीकृतं तत् । मृतकर्पटैरावृतवज्रयन्त्रे पक्वोदितं स्यात् क्षयजिन्मृगाङ्कः" । रसराजस्य असुरेशो गंधकः । ग्रन्थांतरे कुमुदेश्वरत्वेन कथितः । तथाच 'हेमभस्म रसभस्म मौक्तिकं पारदं कणकगन्धकं च कुरु सर्वतुल्यकं । काञ्जिकेन परिमर्द्य गोलकं मूषया च परिवेष्ट्य पाचयेत् । उद्धरेत्तमथ सम्पुटात्ततः सिद्धिमेति **कुमुदेश्वरो रसः** । पीतमस्य तु कणैर्मधुप्लुतै राजदुग्धमथ योजयेत्तथा । पथ्यमत्र घृतपाचितोपरि क्षारहिंगुरहिते हिमं मतं' । भस्मीकृतस्वर्णं तोलकं, मृतपारदं तोलकं, मृतमौक्तिकं तोलकं, काञ्जिकेन निम्बूकेन वा गोलं कृत्वा मूषाभ्यन्तरे निरुध्य लवणेन पूर्णं हण्डिकायां मध्ये स्थापयित्वा वह्निं ज्वालयेत् । शीते रक्तिकैकां मधुना खादेत् । छागदुग्धं पिबेत् पथ्यं यथोक्तं कुमुदेश्वर एव मृगाङ्कः ॥ ८६-९६ ॥

## क्षयश्वासादौ हेमगर्भपोट्टलीरसः ।

**सूतात्पादप्रमाणेन हेम्नः पिष्टं प्रकल्पयेत् ।**
**तयोः स्याद्द्विगुणो गन्धो मर्दयेत्काञ्चनारकैः ॥९७॥**
**कृत्वा गोलं क्षिपेन्मूषासंपुटे मुद्रयेत्ततः ।**
**पचेद्भूधरयन्त्रेण वासरत्रितयं बुधः ॥ ९८ ॥**
**तत उद्धृत्य तत्सर्वं दद्याद्गन्धं च तत्समम् ।**
**मर्दयेदार्द्रकरसैश्चित्रकस्वरसेन च ॥ ९९ ॥**
**स्थूलपीतवराटांश्च पूरयेत्तेन युक्तितः ।**
**एतस्मादौषधात्कुर्यादष्टमांशेन टङ्कणम् ॥ १०० ॥**
**टङ्कणार्धं विषं दत्त्वा पिष्ट्वा सेहुण्डदुग्धकैः ।**
**मुद्रयेत्तेन कल्केन वराटानां मुखानि च ॥ १०१ ॥**
**भाण्डे चूर्णप्रलिप्ते च धृत्वा मुद्रां प्रदापयेत् ।**
**गर्ते हस्तोन्मिते धृत्वा पुटेद्गजपुटेन च ॥ १०२ ॥**
**स्वाङ्गशीतं रसं ज्ञात्वा प्रदद्याल्लोकनाथवत् ।**
**पथ्यं मृगाङ्कवज्ज्ञेयं त्रिदिनं लवणं त्यजेत् ॥ १०३ ॥**
**यदा छर्दिर्भवेत्तस्य दद्याच्छिन्नाम्रतं तदा ।**
**मधुयुक्तं तथा श्लेष्मकोपे दद्याद्गुडार्द्रकम् ॥ १०४ ॥**
**विरेके भर्जिता भङ्गा प्रदेया दधिसंयुता ।**
**जयेत्कासं क्षयं श्वासं ग्रहणीमरुचिं तथा ॥ १०५ ॥**
**अग्निं च कुरुते दीप्तं कफवातं नियच्छति ।**
**हेमगर्भः परो ज्ञेयो रसः पोट्टलिकाभिधः ॥ १०६ ॥**

दी०—अथ हेमगर्भपोट्टलीनामकरसं प्रकटयन्नाह—सूतात् पादप्रमाणेनेत्यादि । सूतः पारदः स च शोधितो ग्राह्यस्तस्य पादश्चतुर्थांशस्तेन समं हेम ग्राह्यम् । हेम्न इति ग्रहणेनास्य पत्राणि कार्याणीत्यर्थः । तानि पूर्वोक्तानीति सम्बन्धः । पिष्टीविधानं तु पूर्ववद्बोद्धव्यम् । तयोः स्यात् द्विगुणो गन्ध इति । तयोः पारदसुवर्णयोर्द्विगुणः परिमाणात् तेन पारदसुवर्णयोरेको भागः, गन्धकस्य द्वौ भागौ, काञ्चनारो वृक्षविशेषः, तस्य पत्राणां स्वरसेन मर्दयेत् यावत् पिष्टिकाकारं भवति, मूषासम्पुटे शरावसम्पुटे सन्धौ च मुद्रां कारयेत्, मुद्रा साम्प्रदायिकी कार्या । तत इति ग्रहणेन तत्सम्पुटं मृत्कर्पटैश्च लेपयेदिति भावः । पचेद्भूधरयन्त्रेण वासरत्रितयं बुध इति । वासरत्रयं यावद्भूधरयन्त्रेण कृत्वा पचेत् । अस्मत्सम्प्रदायेऽपि गोमयैः कृत्वा पुनः पुनरग्निं प्रज्वालयेत् यावद्दिनत्रयं भवति इत्यभिप्रायः । ततस्तु पुटषट्कं दद्यादित्यर्थः । पुटषट्कं च गोमयाग्निना नतु शरावसम्पुटं षड्वारं कार्यं तदेकवारमेव । पश्चात्कार्यमाह—तत उद्धृत्येत्यादि तत्सर्वं द्रव्यं गन्धकेन समं कृत्वा पश्चादार्द्रकरसेन चित्रकजटास्वरसेन च संमर्द्य तेन पिष्टद्रव्येण वराटकान् पूरयेत्, पश्चात्तन्मुखानि टङ्कणविषं सेहुण्डदुग्धेन पिष्ट्वा तेन मुद्रयेत् टङ्कणमानं पूर्वद्रव्यसम्भारादष्टमांशं ग्राह्यं विषं तु टङ्कणार्धमित्यर्थः । शेषं सुबोधम् ॥ ९७-१०६ ॥

## अथ द्वितीयो हेमगर्भपोट्टलीरसः—

**रसस्य भागाश्चत्वारस्तावन्तः कनकस्य च ।**
**तयोश्च पिष्टिकां कृत्वा गन्धो द्वादशभागिकः १०७**
**कुर्यात्कज्जलिकां तेषां मुक्ताभागाश्च षोडश ।**
**चतुर्विंशच शङ्खस्य भागैकं टङ्कणस्य च ॥ १०८ ॥**
**एकत्र मर्दयेत्सर्वं पक्वनिम्बूकजै रसैः ।**
**कृत्वा तेषां ततो गोलं मूषासंपुटके न्यसेत् ॥१०९॥**
**मुद्रां दत्त्वा ततो हस्तमात्रे गर्ते च गोमयैः ।**
**पुटेद्गजपुटेनैव स्वाङ्गशीतं समुद्धरेत् ॥ ११० ॥**
**पिष्ट्वा गुञ्जाचतुर्मानं दद्याद्व्याज्यसंयुतम् ।**
**एकोनत्रिंशदुन्मानमरिचैः सह दीयते ॥ १११ ॥**

१-'रसं' पा. ।

राजते मृन्मये पात्रे काचजे वाऽवलेहयेत्।
लोकनाथसमं पथ्यं कुर्याच्च स्वस्थमानसः ॥ ११२॥
कासे श्वासे क्षये वाते कफे ग्रहणिकागदे।
अतीसारे प्रयोक्तव्या पोट्टली हेमगर्भिका॥ ११३॥

दी०—अथ द्वितीया हेमगर्भपोट्टली तामपि दर्शयन्नाह—रसस्येति । व्याख्यायामस्याभिप्रायः सकलं स्वस्वपरिमितं रससुवर्णादिकमेकत्र संमर्द्य पचेदिति तात्पर्यार्थः । केषाञ्चिद्व्याख्यामेव यथा शुद्धपारदं प्रथमतो मूर्च्छितं कृत्वा पश्चात्तदुक्तद्रव्यैः गोलकं कारयेत्। अस्मत्सम्प्रदाये तु लोकनाथपोट्टलीवत् कर्तव्या, साच पूर्वं कथितैव मुक्ताश्चात्र शङ्खवत् प्रक्षिप्ता ज्ञेयाः। शेषं सुगमम् ॥ १०७–११३ ॥

गू०—रसस्य शुद्धपारदस्य चत्वारो भागाः कनकस्य स्वर्णस्य तावन्तः, स्पष्टमन्यत् ॥ १०७–११६ ॥

## अथ महाज्वराङ्कुशः विषमज्वरादौ—

शुद्धसूतो विषं गन्धः प्रत्येकं शाणसंमितम्।
धूर्तबीजं त्रिशाणं स्यात्सर्वेभ्यो द्विगुणा भवेत् ॥ ११४
हेमाह्वा कारयेदेषां सूक्ष्मं चूर्णं प्रयत्नतः।
देयं जम्बीरमज्जाभिश्चूर्णं गुञ्जाद्वयोन्मितम् ॥ ११५॥
आर्द्रकस्वरसैर्वापि ज्वरं हन्ति त्रिदोषजम्।
ऐकाहिकं द्व्याहिकं वा त्र्याहिकं वा चतुर्थकम् ११६
विषमं च ज्वरं हन्याद्विख्यातोऽयं ज्वराङ्कुशः।

दी०—अथ द्वितीयज्वराङ्कुशरसमाह—शुद्धसूत इति । शुद्धः संस्कारितः । संस्कारा ह्यस्य पूर्वं कथिताः, विषमपि शुद्धं तच्चापि पूर्वं विहितमेव, गन्धो-गन्धकस्तमपि शुद्धं कृत्वा ग्राह्यम्, शाणं टङ्कं प्रत्येकमित्यर्थः। धूर्तबीजमिति धत्तूरबीजानि तानि त्रिटङ्कमितानि, हेमाह्वा स्वर्णक्षीरी साच चोकशब्दवाच्या। एषा तु सर्वेभ्यश्चतुर्द्रव्येभ्यो द्विगुणा ग्राह्या तेन षट्शाणद्विगुणितेत्यर्थः। जम्बीरफलमज्जार्द्रकरसोऽपि दोषापेक्षया बोद्धव्यः । परस्पराभावेऽपि त्रिदोषजमिति व्यस्तं समस्तं, विषमज्वरमिति पुनर्ग्रहणेन प्रायशो विषमज्वरनाशनार्थमस्य प्रभावो न दोषः; कुतः ? विख्यातत्वात् ॥ ११४–११६ ॥

गू०—शाणसंमितः टंकणप्रमाणः शुद्धं सूतं विषं गन्धं चेति, धत्तूरबीजं त्रिशाणं सर्वेभ्यो द्विगुणा द्वादशमाषा हेमक्षीरी तस्य स्थाने व्योषं त्रिकटुरि-' ॥ ११४–११६ ॥

त' पा.।

गू०—अथानन्दभैरवः अतीसारादौ—

दरदं वत्सनाभं च मरिचं टङ्कणं कणाम् ॥ ११७ ॥
चूर्णयेत्समभागेन रसो ह्यानन्दभैरवः।
गुञ्जैकं वा द्विगुञ्जं वा बलं ज्ञात्वा प्रयोजयेत् ११८
मधुना लेहयेच्चानु कुटजस्य फलं त्वचम्।
चूर्णितं कर्षमात्रं तु त्रिदोषोत्थातिसारजित् ॥ ११९॥
दध्यन्नं दापयेत्पथ्यं गव्याज्यं तक्रमेव च।
पिपासायां जलं शीतं विजया च हिता निशि १२०

दी०—अथानन्दभैरवरसस्य व्याख्यानं दर्शयितुमाह—दरदमिति । दरदं हिङ्गुलं, वत्सनाभं विषं, टङ्कणं सौभाग्यक्षारं, कुटजस्य फलमिन्द्रयवं त्वक् छल्ली कुटजस्यैव मिलित्वा कर्षमित्यर्थः। एतदनुपानं पथ्यं च प्रायशोऽतीसारे प्रशस्तम्। गव्याज्यं गोसम्भवं अजासम्भवं च तक्रं तत्तु त्रिभागभिन्नम् । तथाहि—'उदश्वित्वर्धवारिकम् । तक्रं त्रिभागभिन्नं तु केवलं मथितं स्मृतम्' इति । केवलोऽयं कफाग्निमध्ये योज्यः इति व्यवहारो वृद्धवैद्यानां दृश्यते। पिपासायां सत्यां शीतलं जलं देयं, नतूष्णं रसनिमित्तत्वात् । निशि रात्रौ विजया भङ्गा हिता पथ्या अत्रैव प्रयोगे तेन प्रातरेवायं रसः शीलनीय इति भावः ॥ ११७–१२० ॥

गू०—दरदं हिंगुलं, वत्सनाभं विषं, मरिचं, टङ्कणं सौभाग्यं समभागं चूर्णं गुञ्जैकं देयं, अनुपानं कुटजस्य फलं इन्द्रयवं तथा कुटजत्वचं कर्षमात्रं मधुना देयं गव्यं आज्यं वा तक्रम् । सुगममन्यत् ॥ ११७–१२० ॥

## अथ लघुसूचिकाभरणो रसस्त्रिदोषे—

विषं पलमितं सूतः शाणिकश्चूर्णयेद्द्वयम्।
तच्चूर्णं संपुटे क्षिप्त्वा काचलिप्तशरावयोः ॥ १२१ ॥
मुद्रां दत्त्वा च संशोष्य ततश्चुल्ल्यां निवेशयेत्।
वह्निं शनैः शनैः कुर्यात्प्रहरद्वयसंख्यया ॥ १२२ ॥
तत उद्घाटयेन्मुद्रामुपरिस्थां शरावकात्।
संलग्नो यो भवेत्सूतस्तं गृह्णीयाच्छनैः शनैः॥ १२३॥
वायुस्पर्शो यथा न स्यात्तथा कुप्यां निवेशयेत्।
यावत्सूच्या मुखे लग्नं कुप्या निर्याति भेषजम् १२४
तावन्मात्रो रसो देयो मूर्च्छिते संनिपातिनि।
क्षुरेण प्रच्छिते मूर्ध्नि तत्राङ्गुल्या च घर्षयेत् ॥ १२५॥
रक्तभेषजसंपर्कान्मूर्च्छितोऽपि हि जीवति।
तथैव सर्पदष्टस्तु मृतावस्थोऽपि जीवति ॥ १२६ ॥

**यदा तापो भवेत्तस्य मधुरं तत्र दीयते ।**

**दी०**—अथ लघुसूचिकाभरणरसं व्याख्यास्यामः । विषमिति । विषं प्रसिद्धं पलमितं षोडशशाणमितं, सूतः पारदः शाणिकष्टङ्कैकः, प्रथमतोऽभ्यन्तरे काचलिप्तं कृत्वा तयोः सम्पुटे चूर्णं मेलयित्वा साम्प्रदायिकी मुद्रा तत्सन्धौ कार्या ततश्चुल्ल्यां निवेशयेत् । इति कोऽर्थः ? तद्रसगर्भसम्पुटं वालुकायन्त्रे निधायाधः शरावलग्नं यथा स्यात्तिपचेदित्यभिप्रायोऽस्मत्साम्प्रदायिकः । यथा कर्पूरपाकार्थं यन्त्रविधिस्तद्वदत्रापि उपरिस्थसरावकलग्नो धूमसदृशः कज्जलवद्रसः, सूची तु रसग्रहणार्थं शलाका कथ्यते सा तु मसूरदलसंस्था मुखी भवति तन्मुखे यावल्लग्नो रसो भवति तावद्देयो रस इति रसवादिनां व्यवहारः मूर्च्छिते मृतप्राये सन्निपातिनि पुरुषे तथैव सर्पदष्टेऽपीति । यथा सन्निपाते भक्षणं मूर्ध्नि मर्दनं चाभिहितं तथैव सर्पदष्टे इत्यर्थः । तापः सन्तापो रसजनित इत्यादि । मधुरमिक्षुविकारं द्राक्षा दाडिमखर्जूरादिकमपि सम्प्रदायतः ॥ १२१–१२६ ॥

**गू०**—सुगमम् ॥ १२१–१२६ ॥

### अथ जलबन्धुरसः सन्निपाले—

**सूतभस्मसमं गन्धं धात्र्या दद्यान्मनःशिला ॥१२७॥**
**माक्षिकं पिप्पली व्योषं प्रत्येकं शिलया समम् ।**
**चूर्णयेद्भावयेत्पित्तैर्मत्स्यमायूरसंभवैः ॥ १२८ ॥**
**सप्तधा भावयेच्छुष्कं देयं गुञ्जाद्वयं हितम् ।**
**तालपर्णीरसश्चानु पञ्चकोलशृतोऽथवा ॥ १२९ ॥**
**जलबन्धुरसो नाम संनिपातं नियच्छति ।**
**जलयोगश्च कर्तव्यस्तेन वीर्यं भवेद्रसे ॥ १३० ॥**

**दी०**—इदानीं जलबन्धुसंज्ञको नाम रसस्तमाह—भस्मसूतसमं गन्धमिति । सूतस्य पारदस्य भस्म तत्समानं गन्धकमित्यर्थः । धात्र्या दन्त्याः फलान्यत्र योज्यानि एतन्मनोहरम् । अत्र गन्धात्पादं मनःशिला इति पाठः सङ्गतः । तेन गन्धकपरिमाणस्य चतुर्थांशसमाना मनःशिला ग्राह्या, अतएव 'प्रत्येकं शिलया समं' इति वचनम् । माक्षिकं स्वर्णमाक्षिकं, व्योषं शुण्ठीमरिचपिप्पलीसंज्ञकम् । पिप्पली द्विरुक्तत्वया द्विगुणा ग्राह्या । एकद्रव्यपरिमाणात्, एके जलपिप्पलीत्यत्र व्याख्यानयन्ति तन्न सर्वमतम् । मत्स्यो मीनः सामान्यत्वेन परिज्ञातमत्स्यो ग्राह्यः, स च रोहितः, तादृशश्चान्योऽपि । मयूरो नीलकण्ठः । 'सप्तधा भावयेत्' इति प्रत्येकं सप्तवारमित्यर्थः । हितमिति दोषानुपाने योज्यम् । पञ्चकोलं यथा—'पिप्पली पिप्पलीमूलं चव्यचित्रकनागरैः । पञ्चकोलमिति ख्यातं' इत्यादि । जलयोगश्च कर्तव्य इति । एतेन शीतलजलपानं तज्जलेनाऽपि हृदयनेत्रप्रोञ्छनमिति सम्प्रदायः ॥ ॥ १२७–१३० ॥

**गू०**—तालपर्णी मुसलीरसो देयः । पञ्चकोलशृतो वा क्वाथो देयः । कफाधिकाः सन्निपाताः ॥ ॥ १२७–१३० ॥

### पञ्चवक्त्ररसः ।

**शुद्धं सूतं विषं गन्धं मरिचं टङ्कणं कणाम् ।**
**मर्दयेद्धूर्तजद्रावैर्दिनमेकं च शोषयेत् ॥ १३१ ॥**
**पञ्चवक्त्रो रसो नाम द्विगुञ्जः संनिपातजित् ।**
**अर्कमूलकषायं तु सत्र्यूषमनुपाययेत् ॥ १३२ ॥**
**युक्तं दध्योदनं पथ्यं जलयोगं च कारयेत् ।**
**रसेनानेन शाम्यन्ति सक्षौद्रेण कफोद्भवाः ॥१३३॥**
**मध्वार्द्रकरसं चानु पिबेदग्निविवृद्धये ।**
**यथेष्टं घृतमांसाशी शक्तो भवति पावकः ॥ १३४ ॥**

**दी०**—अधुना पञ्चवक्त्ररसं दर्शयन्नाह—शुद्धमित्यादि । सूतं पारदं, विषं प्रसिद्धम्, गन्धं गन्धकं एतत्त्रयं शुद्धमपि बोद्धव्यम् । शुद्धिरेषां पूर्वकथितैव । टङ्कणं सौभाग्यक्षारं एतस्यापि शोधनं विहितं तद्वर्जितमेके भाषन्ते । धूर्तो धत्तूरस्तस्य पत्राणां स्वरसैरित्यर्थः । धत्तूरफलरसैर्वा वदन्ति । परतो वक्ष्यमाणोन्मत्तरसे धत्तूरफलरसैरिति वचनात् । दिनमेकं च शोषयेदिति । तत्सकलं द्रव्यं वस्त्रगालितं कृत्वा पश्चाद्धत्तूररसेन सप्तवारं भावयेदित्यभिप्रायः । प्रत्येकभावनायां मर्दनं च कार्यम् । त्र्यूषमिति । त्र्यूषणं त्रिकटुकं तच्च शुण्ठीमरिचपिप्पलीसंज्ञम् । एतेषां चूर्णेन संयुक्तमर्कमूलकषायं त्वनुपानमाहुः । युक्तं दध्योदनं पथ्यमिति दोषाग्निबलादिकानुरूपम् । जलयोगश्चात्र जलबन्धुरसवत्कार्यः । तत्पूर्वं प्रतिपादितमेव । सक्षौद्रेणेति । क्षौद्रं मधु तेन सहावलेहितः । कफोद्भवाः शोफक्षयादय इति । अग्निवृद्धये तु मध्वार्द्रकरसमनु पिबेत् । रसपरिमाणं तु पूर्वोक्तमेव । अनेन पावकोऽग्निः शक्तः समर्थो भवति पाकार्थमिति यावत् ॥ १३१–१३४ ॥

**अथोन्मत्तो रसः सन्निपाते—**

**रसं गन्धकतुल्यांशं धत्तूरफलजद्रवैः ।**
**मर्दयेद्दिनमेकं तु तत्तुल्यं त्रिकटु क्षिपेत् ॥ १३५ ॥**
**उन्मत्ताख्यो रसो नाम्ना नस्ये स्यात्संनिपातजित् ।**

दी०—अथोन्मत्तरसस्तमपि दर्शयन्नाह—रसगन्धकतुल्यांशमिति । अयं रसो नावने योज्यः । स तु प्रधमनरूपो ज्ञेयः । उत्कटसन्निपाते रक्तिकाद्वयपरिमितं च, भक्षणेऽपि देयमित्यस्मत्संप्रदायेऽनुभूतम् । तत्तुल्यं त्रिकटु क्षिपेदिति तत्तुल्यं रसगन्धकसमम् । त्रिकटु शुण्ठीमरिचपिप्पलीकं । शेषं सुबोधम् ॥१३५॥

गू०—सुगमम् ॥ १३५ ॥

**अथ सन्निपातेऽञ्जनं रसः—**

**निस्त्वग्जैपालबीजं च दशनिष्कं विचूर्णयेत् ॥१३६॥**
**मरिचं पिप्पलीं सूतं प्रतिनिष्कं विमिश्रयेत् ।**
**भाव्यो जम्बीरजैर्द्रावैः सप्ताहं संप्रयत्नतः ॥ १३७॥**
**रसोऽयमञ्जने दत्तः संनिपातं विनाशयेत् ।**

गू०—अथ सन्निपाताञ्जनं व्याचष्टे—निस्त्वग्जैपालबीजमिति। जैपालबीजं तन्निस्त्वक् निस्तुषं कृत्वेत्यर्थः। एतादृशं दशटङ्कमितं ग्राह्यम् । मरिचपिप्पलीसूतं च प्रत्येकं टङ्कैकं सूतं पारदं तच्चात्र मूर्च्छितं ग्राह्यम् । जम्बीरजैरिति । जम्बीरफलरसैः सन्निपातमिति सामान्येन सर्वं सन्निपातं विशेषेण तान्द्रिके योज्योऽयमित्यभिप्रायः ॥ १३६ ॥ १३७ ॥

गू०—निस्त्वक् त्वचारहितं जैपालं दशनिष्कं दशटङ्कं मरिचं पिप्पलीमूलं पारदं गन्धमूर्च्छितं प्रतिनिष्कं प्रत्येकं टङ्कं । सप्ताहं सप्तदिनं जम्बीरजैर्द्रावैर्भाव्यं । तदा वटी कार्या सा अञ्जनेन सन्निपातं हन्ति ॥ ॥ १३६ ॥ १३७ ॥

**अथ महानाराचरसः शूलादौ—**

**सूतं टङ्कणकं तुल्यं मरिचं सूततुल्यकम् ॥ १३८ ॥**
**गन्धकं पिप्पलीं शुण्ठीं द्वौ द्वौ भागौ विचूर्णयेत् ।**
**सर्वतुल्यं क्षिपेद्दन्तीबीजं निस्तुषितं भिषक् ॥१३९॥**
**द्विगुञ्जं रेचनं सिद्धं नाराचोऽयं महारसः ।**
**आध्मानं मलविष्टम्भानुदावर्तं च नाशयेत् ॥१४०॥**

दी०—अथ महानाराचोऽयं रसः । सूतमिति । सूतं पारदं, टङ्कणं सौभाग्यक्षारं तुल्यं समं मरिचमपि पारदसममिति, गन्धकः, पिप्पली, शुण्ठी च द्विभागा ज्ञेया । तेनैकद्रव्यभागापेक्षया प्रत्येकं द्वौ भागौ सर्वतुल्यं दन्तीबीजमिति पूर्वोक्तषड्द्रव्यसाम्यं दन्तीबीजं ग्राह्यमित्यर्थः । निस्तुषितं तुषरहितं जैपालमिति यावत् । रेचनमिति भेदनपर्यायम् । ननु रेचनभेदनयोः को भेदः ? उच्यते, तत्रैव दीपनपाचनाध्याये यदपक्वं चेत्यादि बोद्धव्यम् ॥ १३८–१४० ॥

गू०—टङ्कणं सौभाग्यं भर्जितं च । सुगममन्यत् ॥ ॥ १३८–१४० ॥

**अथ इच्छाभेदी रसः शूलादौ—**

**दरदं टङ्कणं शुण्ठी पिप्पली चैककार्षिका ।**
**हेमाह्वा पलमात्रा स्याद्दन्तीबीजं च तत्समम् १४१**
**विचूर्ण्यैकत्र सर्वाणि गोदुग्धेनैव साधयेत् ।**
**त्रिगुञ्जं रेचनं दद्याद्विष्टम्भाध्मानरोगिषु ॥ १४२ ॥**

गू०—अथेच्छाभेदीनामरसस्तमाह—दरदमिति । टङ्कणं सौभाग्यक्षारं, हेमाह्वा स्वर्णक्षीरी लोके चोक इति प्रसिद्धा । दन्तीबीजं च तत्सममिति । स्वर्णक्षीरीपरिमाणसमं एतत्सर्वं संचूर्ण्य गोदुग्धेन कृत्वा साधयेत् । साधनं तु वह्नौ तावदुक्तं यावत्क्षीररहितं भवति । क्षीरपरिमाणं तु द्रव्यसम्भाराच्चतुर्गुणं ग्राह्यमिति सम्प्रदायः ॥ १४१ ॥ १४२ ॥

गू०—दरदं हिङ्गुलं, हेमाह्वा चोकपत्रमात्रं, हिङ्गुलायाः कर्षमात्रं, दन्तीबीजं तत्समं गोदुग्धेन त्रिगुञ्जं पिबेत् । स्पष्टमन्यत् ॥ १४० ॥ १४१ ॥

**वसन्तकुसुमाकररसः ।**

**द्वौ भागौ हेमभूतेश्च गगनं चापि तत्समम् ।**
**लोहभस्म त्रयोभागाश्चत्वारो रसभस्मनः ॥ १४३ ॥**
**वङ्गभस्म त्रिभागं स्यात्सर्वमेकत्र मर्दयेत् ।**
**प्रवालं मौक्तिकं चैव रससाम्येन दापयेत् ॥१४४॥**
**भावनां गव्यदुग्धेन रसैर्भृङ्गाटरूपकैः ।**
**हरिद्रावारिणा चैव मोचकन्दरसेन च ॥ १४५ ॥**
**शतपत्ररसेनापि मालत्याः स्वरसेन च ।**
**पश्चान्मृगमदश्चन्द्रतुलसीरसभावितः ॥ १४६ ॥**

१–प्रक्षिप्तमिदं । हेमभूतिः स्वर्णभस्म, गगनं अभ्रकभस्म, प्रवालं विद्रुमभस्म, मौक्तिकं मुक्ताफलभस्म, आटरूपकः सहचरः । हरिद्रावारिणा हरिद्रास्वरसेनेत्यर्थः । तदभावे हरिद्राक्वाथेन कार्या । मोचकन्दः शाल्मलीनिर्यासः, शतपत्रः सेवंतीकुसुमः 'गुलाब' इति प्रसिद्धः । चन्द्रः कर्पूरः भीमसेनी ग्राह्यः ॥

कुसुमाकर इत्येष वसन्तपदपूर्वकः ।
गुञ्जाद्वयं ददीतास्य मधुना सर्वमेहनुत् ॥ १४७ ॥
सिताचन्दनसंयुक्तश्चाम्लपित्तादिरोगजित् ।

### क्षयादौ राजमृगाङ्करसः ।

सूतभस्म त्रयो भागा भागैकं हेमभस्मकम् ॥ १४८
मृतताम्रस्य भागैकं शिलागन्धकतालकम् ।
प्रतिभागद्वयं शुद्धमेकीकृत्य विचूर्णयेत् ॥ १४९ ॥
वराटान्पूरयेत्तेन छागीक्षीरेण टङ्कणम् ।
पिष्ट्वा तेन मुखं रुद्ध्वा मृद्भाण्डे तन्निरोधयेत्॥ १५०
शुष्कं गजपुटं पक्त्वा चूर्णयेत्स्वाङ्गशीतलम् ।
रसो राजमृगाङ्कोऽयं चतुर्गुञ्जः क्षयापहः ॥ १५१ ॥
दशपिप्पलिकाक्षौद्रैरेकोनत्रिंशदूषणैः ।
[1]सघृतं दापयेत्पथ्यं स्त्रीकोपाग्निश्रमांस्त्यजेत् ॥ १५२
पथ्यं वा लघुमांसानि राजरोगप्रशान्तये ।

दी०—अथ राजमृगाङ्करसमाह—सूतभस्मेति । अत्र मृतपारदस्य त्रयो भागाः, मृतस्वर्णस्य भागैकं, मृतताम्रस्य च भागैकं । एके मृताभ्रकस्य भागैकमिति पठन्ति । तन्न सर्वसंमतम् । शिलागन्धकं तालकमिति शिला मनःशिला, गन्धकं प्रतीतं, तालकं हरितालं, शुद्धानामेतेषां च भागद्वयं प्रत्येकं । वराटीलक्षणं च पूर्वोक्तलोकनाथरसे द्रष्टव्यम् । तेन पूर्वोक्तसकलद्रव्यचूर्णेन टङ्कणं सौभाग्यक्षारं मृद्भाण्डे मृत्कर्पटनिर्मिते पात्रे गजपुटोपलक्षणत्वात् षोडशाङ्गुलगर्ते पचेदिति सम्प्रदायः । अन्यथा बहुतरज्वलनसम्पर्कोद्दग्धेन त्वनर्थकरो भवति अनुपानं दोषापेक्षया पृथगेव; तेन दशपिप्पलिकाक्षौद्रैः सहावलेहो रसस्य ज्ञातव्यः । एकोनत्रिंशदूषणैरिति, अथवा एकहीनत्रिंशत्संख्याकमरिचैः सक्षौद्रैश्चावलेहो बोद्धव्यः। एके 'साज्येन त्रिंशदूषणै'रिति पठन्ति, तत्र घृतमरिचैः सह प्रचारः साधुः । केवलक्षौद्रेणापीति केचित् । तथाच भिन्नं मृगाङ्कं तन्त्रान्तरे दृष्ट्वा प्रतिपादितम् । यतः 'अष्टभिर्मरिचैर्युक्ता कृष्णात्रययुताऽथवा । विलोक्य देया दोषादि ह्येकैकरसरक्तिका । सर्पिषा मधुना वाऽपि दद्याद्दोषाद्यपेक्षया' इत्यादि ॥ १४८–१५२ ॥

गू०—अथ राजमृगाङ्को रसः क्षयादौ । शिला मनःशिला, तालकं हरितालं, वराटीः कपर्दिकास्तेन पूरयेत् । छागीक्षीरेण टङ्कणं पिष्ट्वा मुखं रुन्धयेत् । पुनः मृद्भाण्डे रुद्ध्वा गजपुटे पचेत्, स्पष्टमन्यत् ॥ ॥ १४८–१५२ ॥

1—केषुचिन्नास्ति ।



अथाग्निनामा रस क्षयश्वासादौ—

शुद्धं सूतं द्विधा गन्धं कुर्यात्खल्वेन कज्जलीम् १५३
तयोः समं तीक्ष्णचूर्णं मर्दयेत्कन्यकाद्रवैः ।
द्वियामान्ते कृतं गोलं ताम्रपात्रे विनिक्षिपेत् १५४
आच्छाद्यैरण्डपत्रेण यामार्धेऽत्युष्णता भवेत् ।
धान्यराशौ न्यसेत्पश्चादहोरात्रात्समुद्धरेत् ॥ १५५॥
संचूर्ण्य गालयेद्वस्त्रे सत्यं वारितरं भवेत् ।
[1](भावयेत्कन्यकाद्रावैः सप्तधा भृङ्गजैस्तथा ॥ १५६॥
काकमाचीकुरण्टोत्थद्रवैर्मुण्ड्यापुनर्नवैः ।
सहदेव्यमृतानीलीनिर्गुण्डीचित्रजैस्तथा ॥ १५७ ॥
सप्तधा तु पृथग्द्रावैर्भाव्यं शोष्यं तथातपे ।
सिद्धयोगो ह्ययं ख्यातः सिद्धानां च मुखागतः १५८
अनुभूतो मया सत्यं सर्वरोगगणापहः ।
स्वर्णादीन्मारयेदेवं चूर्णीकृत्य तु लोहवत् ॥ १५९॥)
त्रिफलामधुसंयुक्तः सर्वरोगेषु योजयेत् ।
त्रिकटुत्रिफलैलाभिर्जातीफललवङ्गकैः ॥ १६० ॥
नवभागोन्मितैरेतैः समः पूर्वरसो भवेत् ।
संचूर्ण्य लोडयेत्क्षौद्रैर्भक्ष्यं निष्कद्वयं द्वयम् ॥ १६१॥
स्वयमग्निरसो नाम्ना क्षयकासनिकृन्तनः ।

दी०—अथ अग्निरसविवरणमाह—शुद्धं सूतमिति । द्विधा गन्धमिति । शुद्धपारदपरिमाणात् । गन्धकमप्यत्र शोधितं ग्राह्यं, तयोः समं तीक्ष्णचूर्णमिति तीक्ष्णचूर्णं पाषाणादिघर्षणान्निष्पन्नं मृतलोहचूर्णं चेति; तयोः सममिति गन्धकपारदसाम्यं भवति । कन्यका कुमारी, मर्दनस्य यावत् श्लक्ष्णत्वं स्यात् बहुतरायासेनेत्यर्थः । हस्तपाट्यां तु पूर्वोक्तद्रव्यपिण्डं संगृह्य एरण्डपत्रैरावेष्ट्य पश्चात्ताम्रसम्पुटके धृत्वा तदनु सम्पुटमपि पत्रैराच्छाद्य घर्मे धारयेद्यावदुष्णं भवति पश्चात् तत्सम्पुटं यथोक्तमेव धान्यराशौ संस्थापयेत् । अहोरात्रं यावत् सम्प्रदाये तु त्रिदिनपर्यन्तं धारयेत् । वक्ष्यमाणलोहरसायने विहितत्वात् । एवं सिद्धो रसोऽपरद्रव्यैः सह साम्यो भक्ष्यः । तद्यथा—'त्रिकटुकं प्रसिद्धम्, त्रिफला हरीतक्यादिकं, एला बृहदेला, जातीफलं प्रतीतम्, लवङ्गमपि विख्यातं, एतच्च नवद्रव्यं पूर्वरससाम्यं संचूर्ण्य निष्कद्वयं टङ्कद्वयं क्षौद्रैः सहावलेह्यमित्यर्थः ॥ १५३–१६१ ॥

गू०—शुद्धं सूतं पारदं भागैकं, द्विधा द्विभागं गन्धकं, तीक्ष्णचूर्णं द्वयोः समं त्रिभागं, भृङ्गजो भृङ्गराजः, काकमाची प्रसिद्धा, कुरण्टः पीतवासा । मुण्डी

1—दीपिकाऽसम्मतः पाठः ।

पुनर्नवा, सहदेवी, अमृता गुडूची, नीलपुष्पी पराजिता, निर्गुण्डी, चित्रं चित्रकं, तेषां द्रवैः सप्त सप्त भावना देया । एला बृहदेला निष्कद्वयं टङ्कद्वयं भक्ष्यम् ॥ ॥ १५३-१६१ ॥

### अमृतार्णवरसः ।

पारदं गन्धकं शुद्धं मृतलोहं च टङ्कणम् ॥ १६२ ॥
रास्नाविडङ्गत्रिफला देवदारु कटुत्रयम् ।
अमृता पद्मकं क्षौद्रं विषं तुल्यांशचूर्णितम् ॥ १६३ ॥
त्रिगुञ्जं सर्वकासार्तः सेवयेदमृतार्णवम् ।

### अथ सूर्यावर्तो रसः श्वासे—

सूतार्धो गन्धको मर्द्यो यामैकं कन्यकाद्रवैः ॥ १६४
द्वयोस्तुल्यं ताम्रपत्रं पूर्वकल्केन लेपयेत् ।
दिनैकं स्थालिकायन्त्रे पक्वमादाय चूर्णयेत् ॥ १६५ ॥
सूर्यावर्तो रसो ह्येष द्विगुञ्जः श्वासजिद्भवेत् ।

दी०—अथ सूर्यावर्तरसमाह—सूतार्धो गन्धको मर्द्य इति । सूतः पारदः स च गन्धकपरिमाणाद्विगुणो ग्राह्य इत्यभिप्रायः । तथाच तन्त्रान्तरे—'सूतमेकं द्विधा गन्धं यामं कन्याविमर्दितम् । द्वयोस्तुल्ये ताम्रपात्रे स्थाल्यां गर्भे निरोधयेत् । सम्यङ्मृल्लवणैः सार्धं चतुर्यामं पचेत् सुधीः' इत्यादि । शेषं सुबोधम् । अनुपानमप्यत्र दोषविशेषेण देयं न दोषः ॥ १६४ ॥ १६५ ॥

गू०—स्थालिकायन्त्रे द्विहण्डिकासम्पुटे कचचीयन्त्रे ॥ १६४ ॥ १६५ ॥

### अथ स्वच्छन्दभैरवरसो वातरोगे—

शुद्धं सूतं मृतं लोहं ताप्यं गन्धकतालके ॥ १६६ ॥
पथ्याग्निमन्थं निर्गुण्डी त्र्यूषणं टङ्कणं विषम् ।
तुल्यांशं मर्दयेत्खल्वे दिनं निर्गुण्डिकाद्रवैः ॥ १६७ ॥
मुण्डीद्रावैर्दिनैकं तु द्विगुञ्जं वटकीकृतम् ।
भक्षयेद्वातरोगार्तो नाम्ना स्वच्छन्दभैरवः ॥ १६८ ॥
रास्नामृतादेवदारुशुण्ठीवातारिजं शृतम् ।
सगुग्गुलुं पिबेत्कोष्णमनुपानं सुखावहम् ॥ १६९ ॥

दी०—अथ स्वच्छन्दभैरवरसमाह—शुद्धं सूतमिति । संस्कारितं रसं मूर्च्छितमित्यर्थः । ताप्यं स्वर्णमाक्षिकम्, एतदपि शोधितं ग्राह्यम् । गन्धकतालकमपि शुद्धमत्र देयम् । तालकं हरितालं, पथ्या हरीतकी, अग्निमन्थोऽरणिभेदः, त्र्यूषणं त्रिकटुकं, टङ्कणं सौभाग्यक्षारं, तच्चात्र भर्जितं ग्राह्यं, विषमपि एकद्व्यभागसाम्यं सकलद्रव्यमपि सममात्रम् । निर्गुण्डिकाद्रवैरिति निर्गुण्डीपत्रस्वरसैः, मुण्डी केदारमुण्डी विख्याता, अस्याः स्वरसैरपि दिनैकं मर्दनीयम् । अनुपानमाह—रास्ना सुरभी, अमृता गुडूची, वातारिजमेरण्डमूलं, देवदारु, शुण्ठी च प्रसिद्धा एतेषां समानां शृतं क्वथितमित्यर्थः । गुग्गुलुमत्र प्रक्षेपमाहुः ॥ १६६-१६९ ॥

गू०—ताप्यं स्वर्णमाक्षिकं शुद्धं, पथ्या हरीतकी, अग्निमन्थः अरणी, निर्गुण्डी प्रसिद्धा, टङ्कणं सौभाग्यं तच्च भर्जितं, विषं शुद्धं द्विगुञ्जं भक्षयेत्, रास्नादिकाथानुपानं वा । वातारिः एरण्डमूलम् ॥ १६६-१६९ ॥

### अथ हंसपोट्टलीरसः ग्रहणीरोगे—

दग्ध्वा कपर्दकं पिष्ट्वा त्र्यूषणं टङ्कणं विषम् ।
गन्धकं शुद्धसूतं च तुल्यं जम्बीरजैर्द्रवैः ॥ १७० ॥
मर्दयेद्भक्षयेन्माषं मरिचाज्यं लिहेदनु ।
निहन्ति ग्रहणीरोगं पथ्यं तक्रौदनं हितम् ॥ १७१ ॥

दी०—अथ हंसपोट्टलीरसः । दग्ध्वा कपर्दकमिति । कपर्दकं वराटकं तदभावे शङ्खोऽप्यत्र ग्राह्यः । मर्दनमत्र यामचतुष्टयं यावदिति सम्प्रदायः । मरिचाज्यप्रमाणं तु दोषापेक्षयाऽवगन्तव्यम् । अत्राज्यं घृतम् । तक्रौदनमिति तक्रं त्रिभागभिन्नम् । तथाहि—'त्रिपादाम्बूद्धृतस्नेहं तक्रं ग्राहि लघु स्मृतम्' इति । निहन्ति रोगमिति रोगमतीसारप्रभृतिकम् ॥ १७० ॥ १७१ ॥

गू०—सुगमम् ॥ १७० ॥ १७१ ॥

### अथ त्रिविक्रमरसः अश्मर्याम्—

मृतं ताम्रमजाक्षीरैः पाच्यं तुल्यैर्गतद्रवम् ।
तत्ताम्रं शुद्धसूतं च गन्धकं च समं समम् ॥ १७२ ॥
निर्गुण्डीस्वरसैर्मर्द्य तद्गोलं सन्धयेद्दिनम् ।
यामैकं वालुकायन्त्रे पाच्यं भोज्यं द्विगुञ्जकम् १७३
बीजपूरकमूलं तु सजलं चानुपाययेत् ।
रसस्त्रिविक्रमो नाम्ना मासैकेनाश्मरीप्रणुत् ॥ १७४ ॥

दी०—अथ त्रिविक्रमरसमाह—मृतं ताम्रमजाक्षीरैरिति । मृतं ताम्रं ताम्रभस्म, छागीक्षीरेण साम्यं कृत्वा लोहपात्रे मृण्मयपात्रे वा सम्पाचयेत् । यावद्गतद्रवं भवति इत्यनेन मृतताम्रशुद्धिः कथितेत्यभिप्रायः । तद्गोलं सन्धयेदिति तद्द्रव्यगोलकं मूषासम्पुटे मेलयित्वा तन्मुखं संमुद्र्य वालुकायन्त्रे संपाच्य सिद्धो भवति । वालुकायन्त्रं रसमारणाध्याये प्रोक्तम् । भोज्यं द्विगुञ्ज-

१-प्रक्षिप्तम् ।

कमिति भोज्यं भक्ष्यं द्विगुञ्जमित्यर्थः । बीजपूरजटाकल्कानुपानमत्र दोषाद्यपेक्षया ॥ १७२-१७४ ॥

**गू०**—मृतं ताम्रं अजाक्षीरं तुल्यं पाच्यं तोलकमितं दुग्धं तुल्यादष्टगुणं अधिकं देयं अन्यथा पाकः सम्यग्भवति। गतद्रवैस्तु ताम्रं शुद्धसूतं गन्धकं च समं तोलकं वालुकायन्त्रे पाच्यं । हण्डिकायां गोलकं स्थाप्य उपरि शरावकं दत्वा लवमुद्रा देया उपरिवालुकां दत्वा मुद्रां दापयेत् । इदं वालुकायन्त्रम् । शेषं सुगमम् ॥ १७२-१७४ ॥

## सर्वकुष्ठादौ महातालेश्वररसः—

**तालं[1] ताप्यं शिला सूतं शुद्धं सैन्धवटङ्कणे ।**
**समांशं चूर्णयेत्खल्वे सूताद्विगुणगन्धकम् ॥१७५॥**
**गन्धतुल्यं मृतं ताम्रं जम्बीरैर्दिनपञ्चकम् ।**
**मर्द्यं षड्भिः पुटैः पाच्यं भूधरे संपुटोदरे ॥१७६॥**
**पुटे पुटे द्रवैर्मर्द्यं सर्वमेतत्तु षट्पलम् ।**
**द्विपलं मारितं ताम्रं लोहभस्म चतुष्पलम् ॥१७७॥**
**जम्बीराम्लेन तत्सर्वं दिनं मर्द्यं पुटेल्लघु ।**
**त्रिंशदंशं विषं चास्य क्षिप्त्वा सर्वं विचूर्णयेत् १७८**
**माहिषाज्येन संमिश्रं निष्कार्धं भक्षयेत्सदा ।**
**मध्वाज्यैर्बाकुचीचूर्णं कर्षमात्रं लिहेदनु ॥ १७९ ॥**
**सर्वकुष्ठानि हन्त्याशु महातालेश्वरो रसः ।**

**दी०**—अथ महातालेश्वररसमाह—तारमिति । तारं रौप्यं, ताप्यं स्वर्णमाक्षिकं, शिला मनःशिला, सूतं पारदं, शुद्धशब्दः तारादिभिः प्रत्येकमभिसंबध्यते; टङ्कणं सौभाग्यक्षारं, एतेषां साम्यमानमित्यर्थः । शोधितं गन्धकम् । मृतताम्रं च द्विगुणं ग्राह्यं परिमाणात् । जम्बीरैरिति जम्बीरफलरसैर्दिनपञ्चकं यावत् । पुनःपुनर्जम्बीररसं दत्वा मर्दनीयं घर्मे इति शेषः । पश्चाद्भूधरयन्त्रे मृण्मयमूषासम्पुटोदरे क्षिप्तं मुद्रितं च सकलं द्रव्यं पाचितमित्यर्थः । एवं षड्वारं यावत् पुटं देयं प्रतिपुटे तु जम्बीररसैः कृत्वा मर्दनीयम् । एतन्मर्दनं यथाकालं नात्र पञ्चदिनमर्दनं नियतमिति सम्प्रदायः । अथवा वक्ष्यमाणमर्दनाभिप्रायेण दिनमेकं यावत् । भूधरयन्त्रं तु पूर्वोक्तहेमगर्भरसे द्रष्टव्यम् । एवं संसिद्धमिदं षट्पलप्रमितं संगृह्य वक्ष्यमाणद्रव्यैः सह पुनर्मर्दयेत् । दिनमेकं तु जम्बीररसेनेत्यर्थः । तदनु लघुपुटं पूर्वोक्तेन विधानेन देयम् । कुक्कुटपुटमित्यन्ये । पुनरपि एवं सिद्धस्यास्य यत्त्रिंशद्भागं तेन समं विषं योज्यमित्यर्थः । माहिषं घृतं चात्र चूर्णत्वाल्लेह्यपरिमाणं देयम् । टङ्कार्धं माषकद्वयम् । सदा शब्दोऽत्र रससंसेव्यविषयं सूचयति तेन सेव्योऽयं रस इति तात्पर्यार्थः । अनुपाने तु बाकुची सोमराजीफलानि आज्यमत्रापि माहिषम् ॥ १७५-१७९ ॥

**गू०**—अथ महातालेश्वरो रसः कुष्ठादौ । तालं हरितालं शुद्धं, ताप्यं स्वर्णमाक्षिकं शुद्धम् । शिला मनःशिला, सूतं पारदं, सैन्धवं, टङ्कणं सौभाग्यं भूधरे कच्छपयन्त्रे संपुटे संपुटोदरे शरावसंपुटमध्ये एतत्सिद्धं रसं षट्पलं गृहीत्वा तत्पश्चादमौ मेलयेत् । द्विपलं ताम्रं चतुःपलं लोहभस्म जम्बीराम्लेन मर्द्यं लघुपुटेन वह्नौ संयोज्य त्रिंशदंशं विषं मेलयेत् । माहिषाज्येन महिषीघृतेन निष्कार्धं टङ्कार्धं भक्षयेत् । बाकुचीचूर्णं कर्षमात्रं अनुलिहेत् ॥ १७५-१७९ ॥

## अथ कुष्ठकुठारो रसः—

**भस्मसूतसमो गन्धो मृतायस्ताम्रगुग्गुलून् ॥१८०॥**
**त्रिफला च महानिम्बश्चित्रकश्च शिलाजतु ।**
**इत्येतच्चूर्णितं कुर्यात्प्रत्येकं शाणषोडश ॥ १८१ ॥**
**चतुःषष्टिः करञ्जस्य बीजचूर्णं प्रकल्पयेत् ।**
**चतुःषष्टिर्मृतं चाभ्रं मध्वाज्याभ्यां विलोडयेत् १८२**
**स्निग्धभाण्डे धृतं खादेद्विनिष्कं सर्वकुष्ठनुत् ।**
**रसः कुष्ठकुठारोऽयं गलत्कुष्ठनिवारणः ॥ १८३ ॥**

**दी०**—अथ कुष्ठकुठाररसमाह—भस्मसूतसम इति । भस्मसूतसमो गन्ध इत्यनेन रसादिशिलाजतुपर्यन्तं द्रव्यं पृथक्षोडशशाणमितं ग्राह्यं तत्र मृतायो मारितलोहचूर्णं मृतताम्रचूर्णं च त्रिफलाहरीतक्यादिकं महानिम्बो लोके 'वकाइन' शब्दवाच्यः । करञ्जो बृहत्करञ्जः अस्य बीजं फलं चतुःषष्टिशाणमित्यर्थः । मधुघृतपरिमाणं तु यावत् सकलं द्रव्यं आलोडितं स्यात् । तावन्मानं योज्यमिति । द्विनिष्कं टङ्कद्वयं द्विनिष्कादधिकमानमपि देयं न दोषः । उक्तमन्यत्रापि 'रसो बलिस्ताम्रमयः पुराग्नी शिलाजतुः स्याद्विषतिन्दुकश्च । वरा च तुल्यं गगनं करञ्जं पृथक् पृथक् शाणचतुष्टयं च ॥ संमर्द्य सर्वं मधुना घृतेन घृतस्य पात्रे निहितं प्रयत्नात् । कथं भजेत् प्रत्यहमस्य यस्य शाल्योदनं दुग्धमधुत्रयं च । विशीर्णकर्णाङ्गुलिनासिकोऽपि भवेदनेन स्मरतुल्यमूर्तिः । दारापरित्याग इह प्रविष्टो जलोदरे वायुनिबद्धमूले' ॥ इति ॥ १८०-१८३ ॥

१—'तारं' । २—'मरिचं' पा० ।

गू०—भस्मसूतं मृतं पारदं तत्समो गन्धः गन्धकं, मृतायः मृतलोहं, मृतताम्रं, गुग्गुलुः, महानिम्ब इति, चित्रकः प्रसिद्धः, शिलाजतुसत्वं एतत्प्रत्येकं षोडशशाणं चतुःषष्टिशाणं मृतं अभ्रं सर्वं मध्वाज्याभ्यां विलोडयेत्। स्निग्धभाण्डे घृतिक्कणभाण्डे घृतं सारितं खादेत्। द्विनिष्कं टङ्कम्॥१८०–१८३॥

## अथोदयादिरसः श्वेतकुष्ठादौ—

**शुद्धं सूतं द्विधा गन्धं मर्द्यं कन्याद्रवैर्दिनम्।**
**तद्गोलं पिठरीमध्ये ताम्रपात्रेण रोधयेत्॥ १८४॥**
**सूतकात्त्रिगुणेनैव शुद्धेनाधोमुखेन च।**
**पार्श्वे भस्म निधायाथ पात्रोर्ध्वं गोमयं जलम् १८५**
**किंचित्किंचित्प्रदातव्यं चुल्ल्यां यामद्वयं पचेत्।**
**चण्डाग्निना तदुद्धृत्य स्वाङ्गशीतं विचूर्णयेत्॥१८६॥**
**काष्ठोदुम्बरिकावह्निस्त्रिफलाराजवृक्षकम्।**
**विडङ्गं बाकुचीबीजं क्राथयेत्तेन भावयेत्॥ १८७॥**
**दिनैकमुदयादित्यो रसो देयो द्विगुञ्जकः।**
**विचर्चिकां दद्रुकुष्ठं वातरक्तं च नाशयेत्॥ १८८॥**
**अनुपानं च कर्तव्यं बाकुचीफलचूर्णकम्।**
**खदिरस्य कषायेण समेन परिपाचितम्॥ १८९॥**
**त्रिशाणं तद्गवां क्षीरैः क्राथैर्वा त्रैफलैः पिबेत्।**
**त्रिदिनान्ते भवेत्स्फोटः सप्ताहाद्वा किलासके १९०**
**नीलीं गुञ्जां च कासीसं धत्तूरं हंसपादिकाम्।**
**सूर्यभक्तां च चाङ्गेरीं पिष्ट्वा मूलात्प्रलेपयेत्॥१९१॥**
**स्फोटस्थानप्रशान्त्यर्थं सप्तरात्रं पुनः पुनः।**
**श्वेतकुष्ठं निहन्त्याशु साध्यासाध्यं न संशयः॥१९२॥**
**अपरः श्वित्रलेपोऽपि कथ्यतेऽत्र भिषग्वरैः।**
**गुञ्जाफलाग्निचूर्णं च लेपितं श्वेतकुष्ठनुत्॥१९३॥**
**शिलापामार्गभस्मापि लिप्तं श्वित्रं विनाशयेत्।**

टी०—अथोदयादिरसमाह—शुद्धं सूतमिति। द्विधा गन्धं द्विगुणितं गन्धकं पारदभागादिति शेषः। कन्या कुमारी, दिनं दिनमेकं यावत् पिठरी मृदानिर्मितपात्रविशेषः। सूतकात्त्रिगुणेनेति। एतेन ताम्रशरावकं पारदपरिमाणात्। त्रिगुणितमानेन घटितं विद्यात् शुद्धेनेति। शुद्धताम्रनिर्मितेन अथवाऽम्लद्रव्यादिना शोधितशरावकेणेत्यर्थः। शुद्धं ताम्रं स्वस्वजात्युत्कृष्टम्। यतः तत्ताम्रं द्विविधं एकं म्लेच्छसंज्ञम्। अपरं नैपालमिति। तथाहि—'म्लेच्छं नैपालकं ताम्रं तयोर्नैपालमुत्तमम्' इति। कर्तव्यविधिरप्यस्य यथा तद्गोलकाकारं द्रव्यं दृढतलहण्डिकान्ते निवेश्य तदुपरि ताम्रपिधानकं दत्वा पश्चात्सन्धिं मुद्रयित्वा विशोष्य तदनु मुद्रोपरि अङ्गुलद्वयोत्सेधं सर्वतो भस्मावकीर्य पश्चात् ताम्रशरावोपर्येव सजलगोमयं किञ्चित् किञ्चिदिति वारंवारं दापयेत्। यावद् यामद्वयं भवति तावत् खराग्निना पचेदित्यभिप्रायः। अथ पश्चात्कार्यमाह—एवं निष्पन्नोऽयं रसः संचूर्ण्य पश्चात् काष्ठोदुम्बरिकादीनां क्वाथेन भावयेत् तेन सिद्धो भवति दिनैकमिति प्रत्येकं द्रव्यमेकैकं दिनं भावयेत्। काष्ठोदुम्बरिका लोके 'कट्गुलरि' शब्दवाच्या। राजवृक्षकः कृतमालकः तस्य पत्राणि। अस्यानुपानमाह—खदिरस्य खदिरसारस्य कषायेण क्वथितरूपेण समेन बाकुचीफलचूर्णसमानमानेन सह परिपाचितं तदिति बाकुचीचूर्णं तच्च त्रिशाणं टङ्कत्रयं संगृह्य गवां क्षीरैः त्रैफलैः क्वाथैर्वा पिबेत्। रसमिति किलासके कुष्ठविशेषे। श्वित्रभेदो वा किलास इति वाच्यः। एके किलास इत्यस्य स्थाने न संशयमिति पठन्ति तथा व्याख्यानयन्ति च। पश्चात् ते स्फोटा वक्ष्यमाणप्रलेपात् आमूलं यथा स्यात् तथा प्रलेपिताः कार्याः। तेन सकलस्फोटाः सघनं प्रलेपिताः कार्या इति भावः। केचित् 'पिष्ट्वा मूलात् प्रलेपयेत्' इत्यस्य स्थाने 'तुल्यं पिष्ट्वा प्रलेपयेत्' इति पठन्ति। लेपार्थं द्रव्याण्याह—नीलीमित्यादि। नीलीस्थाने तिलं इति। केचित् 'अथापरौ वक्ष्यमाणप्रलेपौ क्षेपकौ' इति मन्यमानाः पठन्ति॥ १८४–१९३॥

गू०—पिठरीमध्ये हण्डिकामध्ये ताम्रपात्रेण सूतकात्त्रिगुणेन पुनः अधोमुखेन पार्श्वे तत्पार्श्वे भस्म उत्पलादिजा जारितं स्थापयेत्। उपरि पात्रं दत्वा मुद्रयित्वा तदुपरि गोमयं जलं किञ्चित् प्रदातव्यं यामद्वयं चुल्ल्यां पचेत्। स्पष्टमन्यत्। अथ चित्रलेपः गुञ्जाफलं अग्निश्चित्रकस्तच्चूर्णं लेपितं श्वेतकुष्ठनुद्भवति। शिला मनःशिला अपामार्गस्तद्भस्मापि लिप्तः श्वित्रं विनाशयेत्॥ १८४–१९३॥

## अथ कुष्ठादौ सर्वेश्वरो रसः—

**शुद्धं सूतं चतुर्गन्धं पलं यामं विचूर्णयेत्॥१९४॥**
**मृतताम्राभ्रलोहानां दरदस्य पलं पलम्।**
**सुवर्णं रजतं चैव प्रत्येकं दशनिष्ककम्॥ १९५॥**
**माषैकं सूतवज्रं च तालं शुद्धं पलद्वयम्।**
**जम्बीरोन्मत्तवासाभिः स्नुह्यर्कविषमुष्टिभिः॥१९६॥**

मर्द्यं हयारिजैर्द्रावैः प्रत्येकेन दिनंदिनम् ।
एवं सप्तदिनं मर्द्यं तद्गोलं वस्त्रवेष्टितम् ॥ १९७ ॥
वालुकायन्त्रगं स्वेद्यं त्रिदिनं लघुवह्निना ।
आदाय चूर्णयेच्छ्लक्ष्णं पलैकं योजयेद्विषम् ॥१९८॥
द्विपलं पिप्पलीचूर्णं मिश्रं सर्वेश्वरो रसः ।
द्विगुञ्जो लिह्यते क्षौद्रैः सुप्तिमण्डलकुष्ठनुत् ॥१९९॥
बाकुची देवकाष्ठं च कर्षमात्रं सुचूर्णयेत् ।
लिहेदैरण्डतैलाक्तमनुपानं सुखावहम् ॥ २०० ॥

दी०—अथ सर्वेश्वररसमाह—शुद्धं सूतमित्यादि । शोधितं पारदं पलप्रमाणं ग्राह्यम् । गन्धं गन्धकं चतुरिति चतुष्पलं वक्ष्यमाणपलग्रहणात् । तेन रसोऽपि पलप्रमाण इति भावः । यामं विचूर्णयेदिति तयोः शुद्धरसगन्धकयोः कज्जलीं कुर्यादित्यभिप्रायः । मृतताम्राभ्रलोहानामिति मृतताम्रं मृतमभ्रकं मृतलोहमिति मृतग्रहणेन दरदं हिङ्गुलमपि शोधितं ग्राह्यम् । सुवर्णं रजतं चैवेति चकारग्रहणात् सुवर्णरौप्यमपि मृतं देयम् । मृतवज्रं मृतहीरकं तालसत्वं हरितालसत्वम् । अथ भावनार्थं द्रव्यमाह—जम्बीरेत्यादि । उन्मत्तो धत्तूरकः स्नुह्यर्कयोः पत्ररसः स्नुही सेहुण्डा, विषमुष्टिः कुचलभेदशब्दवाच्यः । एके विषमुष्टिशब्देन महानिम्ब इति मन्यंते तन्न सर्वमतम् । हयारिः करवीरः वालुकायन्त्रगं स्वेद्यमिति । वालुकायन्त्रं प्रसिद्धम् । अस्मत्संप्रदाये तु तत् पोट्टलीकं उक्तद्रव्यकल्केन प्रलेपितं कृत्वा पश्चाद्वालुकायां भूमिगतायां मध्ये क्षिप्त्वा तदुपरि सप्ताष्टभिर्गोमयैरादीपयेत् । तेन सिद्धो भवति । एवं त्रिदिनमित्यनेन त्रिवेलमिति व्याख्यातम् । शेषं सुगमम् ॥ १९४–२०० ॥

गू०—उन्मत्तो धत्तूरः, स्नुही सेहुण्डभेदः, अर्कः रविः, विषमुष्टिर्महानिम्बम् । हयारिः करवीरः । प्रत्येकेन औषधरसेन दिनं दिनं मर्द्यं एवं सप्तदिनं मर्द्यं वस्त्रवेष्टितं तद्गोलं वालुकायन्त्रगं च स्वेद्यं पाच्यमित्यर्थः । देवकाष्ठं देवदारु, स्पष्टमन्यत् ॥ १९४–२०० ॥

### अथ सुप्त्यादौ स्वर्णक्षीरीरसः—

हेमाह्वां पञ्चपलिकां क्षिप्त्वा तक्रघटे पचेत् ।
तक्रे जीर्णे समुद्धृत्य पुनः क्षीरघटे पचेत् ॥२०१॥
क्षीरे जीर्णे समुद्धृत्य क्षालयित्वा विशोधयेत् ।
तच्चूर्णं पञ्चपलिकं मरिचानां पलद्वयम् ॥ २०२ ॥
पलैकं मूर्च्छितं सूतमेकीकृत्य तु भक्षयेत् ।
निष्कैकं सुप्तिकुष्ठार्तः स्वर्णक्षीरीरसो ह्ययम् ॥२०३॥

दी०—अथ स्वर्णक्षीरीरसविवरणमाह—हेमाह्वा स्वर्णक्षीरी 'चोक' इति प्रसिद्धः । तक्रघटादिविधानञ्चास्य शुद्धौ कथितम् । मूर्च्छितं सूतमिति रुजाहरत्वात् । तथाहि 'मृतो हन्ति जरामृत्युं मूर्च्छितो व्याधिघातकः । बद्धं खेचरतां दद्यात् कोऽन्यः सूतात् कृपाकरः' इति । क्षालयित्वा विशोधयेदित्यस्य स्थाने जलैः प्रक्षाल्य विशोषयेदिति पाठः ॥ २०१–२०३ ॥

गू०—हेमाह्वा स्वर्णक्षीरी मूर्च्छितं सूतं । स्पष्टमन्यत् ॥ २०१–२०३ ॥

### अथ मेहबद्धो रसः प्रमेहे—

भस्मसूतं मृतं कान्तं मुण्डभस्म शिलाजतु ।
शुद्धं ताप्यं शिला व्योम त्रिफला कोलबीजकम् २०४
कपित्थं रजनीचूर्णं भृङ्गराजेन भावयेत् ।
त्रिंशद्वारं विशोष्याथ मधुयुक्तं लिहेत्सदा ॥२०५॥
निष्कमात्रो हरेन्मेहान्मेहबद्धो रसो महान् ।
महानिम्बस्य बीजानि पिष्ट्वा षट्संमितानि च २०६
पलतण्डुलतोयेन घृतनिष्कद्वयेन च ।
एकीकृत्य पिबेच्चानु हन्ति मेहं चिरंतनम् ॥२०७॥

दी०—इदानीं मेहबद्धरसमाह—भस्मसूतमिति । भस्मसूतं पारदभस्म, मृतं कान्तमिति मृतकान्तलोहचूर्णं कान्तलोहं लोहमारणे पूर्वं दर्शितम् । मुण्डभस्मेति मुण्डमपि लोहविशेषः । एतदपि पूर्वं कथितमेव एके मुण्डमिति किट्टविशेषं मन्यन्ते तन्न सर्वमतम् । केचिन्मुण्डस्थाने उरगभस्मेति पठन्ति । तत्र उरगभस्म नागभस्मेति कस्यचिन्मतम् । शुद्धं ताप्यमिति । ताप्यं सुवर्णमाक्षिकं, शिला मनःशिला, व्योम अभ्रकं एके व्योमस्थाने व्योषमिति पठन्ति, व्याख्यानयन्ति च तथा । तत्र व्योषं त्रिकटुकम्, त्रिफला हरीतक्यादिकं, कङ्कोलबीजं प्रसिद्धं, कपित्थं कपित्थफलं, रजनी हरिद्रा, भृङ्गराजो मार्कवशब्दवाच्यः एतत् सकलं द्रव्यं सममात्रं ग्राह्यमिति सम्प्रदायः । एके भृङ्गराजेन भावयेदित्यस्य स्थाने 'समं भाव्यं च भृङ्गिना'मिति पठन्ति । निष्कमात्र इति । चतुर्माषकः अनुपाने तु महानिम्बो 'बकाइन' संज्ञकः । तस्य बीजानि फलानि तानि च षट्संख्यानि ग्राह्याणि तण्डुलतोयं पलप्रमाणम् । शेषं सुगमम् ॥ २०४–२०७ ॥

१–रससिन्दूर इति यावत् ।

गू०—भस्मसूतं, मृतं कान्तलोहं, मुण्डोऽपि लोहविशेषः । तार्प्यं, शिला मनःशिला, व्योषं त्रिकटु, त्रिफला, कोलबीजं, कपित्थम् । एतत्सर्वं तुल्यं भृङ्गराजेन एकविंशतिर्भावयेत्, निष्कं टङ्कमात्रं मधुयुक्तं लिहेत् । स्पष्टमन्यत् ॥ २०४–२०७ ॥

### अथ महावह्निरसमाह—

चतुःसूतस्य गन्धाष्टौ रजनी त्रिफला शिवा ।
प्रत्येकं च द्विभागं स्यात्त्रिवृज्जैपालचित्रकम् ॥२०८॥
प्रत्येकं च त्रिभागं स्यात्र्यूषं दन्ती च जीरकम् ।
प्रत्येकमष्टभागं स्यादेकीकृत्य विचूर्णयेत् ॥२०९॥
जयन्तीस्नुक्पयोभृङ्गवह्निवातारितैलकैः ।
प्रत्येकेन क्रमाद्भाव्यं सप्तवारं पृथक्पृथक् ॥ २१० ॥
महावह्निरसो नाम निष्कमुष्णजलैः पिबेत् ।
विरेचनं भवेत्तेन तक्रभक्तं ससैन्धवम् ॥ २११ ॥
दिनान्ते दापयेत्पथ्यं वर्जयेच्छीतलं जलम् ।
सर्वोदरहरः प्रोक्तो मूढवातहरः परः ॥ २१२ ॥

दी०—चतुःसूतस्येति । सूतस्य पारदस्य चत्वारो भागाः, गन्धकस्य चाष्टौ भागाः । रजनीप्रभृतिपञ्चद्रव्याणि पृथग् द्विभागयुतानि भवन्ति । रजनी हरिद्रा, त्रिफला हरितक्यादिकं, शिवा हरीतकी. अनेन हरीतकीद्विरुक्तेन भागात् सैव द्विगुणा कार्या । केचिच्छिवास्थाने शिला इति पठन्ति व्याख्यानयन्ति च । तत्र शिला मनःशिला, त्रिवृज्जैपालचित्रकं प्रत्येकं त्रिभागयुतं ग्राह्यम् । त्रिवृत्त्रिशोथः । जैपालं दन्तिबीजं, चित्रकं चित्रकजटात्वक्, त्र्यूषणं दन्ती च जीरकमपि प्रत्येकमष्टभागं ज्ञेयम् । त्र्यूषं त्र्यूषणं तच्च शुण्ठीमरिचपिप्पलीसंज्ञम् । दन्ती प्रसिद्धा, जीरकं श्वेतम् । अथ भावनार्थं द्रव्याण्याह—जयन्तीत्यादि । जयन्ती शाकभेदः जीवन्तीत्यपरे, स्नुक्पयः सेहुण्डक्षीरं, भृङ्गं मार्कवं तच्च भमराशब्दवाच्यम्, नतु भृङ्गमत्र गुडत्वक्, वह्निश्चित्रकः, वातारितैलमेरण्डतैलम् । शेषं सुबोधम् ॥ २०८–२१२ ॥

गू०—अथ वह्निरसो जलोदरादौ—शिवा हरीतकी द्विगुणा पुनरुक्तत्वात् । त्रिवृत् निसोतः, दन्ती- [illegible] जैपालं, चित्रकं प्रसिद्धं एतत्त्रिभागं प्रत्येकं । त्र्यू- [illegible] दन्तीजटा, जीरकं प्रत्येकमष्टभागं, [illegible]ः, स्नुक् सेहुण्डदुग्धं, भृङ्गं मार्कवः, [illegible] तैलं एरण्डतैलं, प्रत्येकेन रसेन सप्तसप्तवार भाव्यम् ॥ २०८–२१२ ॥

### अथ विद्याधरो रसः गुल्मप्लीहादौ—

गन्धकं तालकं तार्प्यं मृतताम्रं मनःशिलाम् ।
शुद्धं सूतं च तुल्यांशं मर्दयेद्भावयेद्दिनम् ॥२१३॥
पिप्पल्यास्तु कषायेण वज्रीक्षीरेण भावयेत् ।
निष्कार्धं भक्षयेत्क्षौद्रैर्गुल्मं प्लीहादिकं जयेत्॥२१४॥
रसो विद्याधरो नाम गोमूत्रं च पिबेदनु ।

दी०—अथ विद्याधररसमाह—गन्धकमिति । तार्प्यमत्र सुवर्णमाक्षिकं । शुद्धसूतमिति । संस्कारितसूतं एतत्सकलं सममात्रं मर्दयेत् । भावयेद्दिनमिति पूर्वं द्रव्यं सकलं संमर्द्य पश्चादुक्तद्रवेण भावयेत् । दिनमिति प्रत्येकं शेषं सुगमम् ॥ २१३ ॥ २१४ ॥

गू०—वज्री सेहुण्डः । शेषं सुगमम्॥२१३॥२१४॥

### अथ त्रिनेत्रो रसः पक्तिशूलादौ—

टङ्कणं हारिणं शृङ्गं स्वर्णं शुल्बं मृतं रसम् ॥२१५॥
दिनैकमार्द्रकद्रावैर्मर्द्यं रुद्ध्वा पुटे पचेत् ।
त्रिनेत्राख्यरसस्यैकं माषं मध्वाज्यकैर्लिहेत् ॥२१६॥
सैन्धवं जीरकं हिङ्गु मध्वाज्याभ्यां लिहेदनु ।
पक्तिशूलहरः ख्यातो मासमात्रान्न संशयः ॥२१७॥

दी०—सौभाग्यक्षारं तच्चात्र भर्जितं देयं, स्वर्णं शुल्बमपि मृतमत्र देयं । रोधनमत्र शरावसम्पुटविधानं पुटमत्र गजपुटम् । शेषं सुगमम् ॥ २१५–२१७ ॥

गू०—टङ्कणं सौभाग्यं, हारिणं शृङ्गं, स्वर्णं मृतं, शुद्धं ताम्रं मृतं, रुद्ध्वा शरावसंपुटे वनोपलैः पचेत् । स्पष्टमन्यत् ॥ २१५–२१७ ॥

### अथ शूलगजकेसरीरसः शूले—

शुद्धं सूतं द्विधा गन्धं यामैकं मर्दयेद्दृढम् ।
द्वयोस्तुल्यं शुद्धताम्रं संपुटे तन्निरोधयेत् ॥२१८॥
ऊर्ध्वाधो लवणं दत्त्वा मृद्भाण्डे धारयेद्भिषक् ।
ततो गजपुटे पक्त्वा स्वाङ्गशीतं समुद्धरेत् ॥२१९॥
संपुटं चूर्णयेत्सूक्ष्मं पर्णखण्डे द्विगुञ्जकम् ।
भक्षयेत्सर्वशूलार्तो हिङ्गु शुण्ठी च जीरकम् ॥२२०॥
वचामरिचजं चूर्णं कर्षमुष्णजलैः पिबेत् ।
असाध्यं नाशयेच्छूलं रसोऽयं गजकेसरी ॥२२१॥

दी०—अथ गजकेसरीरसमाह—शुद्धं सूतमिति । दृढमर्दनेनात्र रसगन्धकयोः कज्जलीं कुर्यादित्यभिप्रायः । सम्प्रदायस्तु अम्लरसैः सह दृढमर्दनं कार्यं न दोषः । द्वयोस्तुल्यं शुद्धताम्रमिति । द्वयोः पारदग-

न्धकयोः शुद्धताम्रं मृतताम्रम् । एके द्वयोस्तुल्ये शुद्धताम्रसम्पुटे इति पठन्ति व्याख्यानयन्ति च। सम्पुटं चूर्णयेदिति वचनादयमेव पक्षः समीचीनः । तेन ताम्रसम्पुटे एव रसगन्धकभस्म रोधयेदित्यर्थ इति । अनुपानं हिंग्वादिचूर्णं वक्ष्यमाणं कर्षमानं संगृह्य चतुर्गुणेनोष्णोदकेन सह पिबेत् ॥ २१८-२२१ ॥

गू०—सुगमम् ॥ २१८-२२१ ॥

**अथाग्नितुण्डवटीरसः अग्निमान्द्यादौ—**

**शुद्धं सूतं विषं गन्धमजमोदां फलत्रयम् ।**
**स्वर्जिक्षारं यवक्षारं वह्निसैन्धवजीरकम् ॥ २२२ ॥**
**सौवर्चलं विडङ्गानि सामुद्रं त्र्यूषणं समम् ।**
**विषमुष्टिं सर्वतुल्यं जम्बीराम्लेन मर्दयेत् ॥ २२३ ॥**
**मरिचाभां वटीं खादेद्वह्निमान्द्यप्रशान्तये ।**

दी०—अथाग्नितुण्डवटीरसमाह—शुद्धसूतमित्यादि। एके शुद्धसूतसमं गन्धमिति पठन्ति विषं न पठन्ति तदसङ्गतं । बहुस्थानेषु दृष्टत्वात् । विषमुष्टिः कुचेलाशब्दवाच्यः सच सकलद्रव्यपरिमाणेन साम्यो योज्यः। एके वह्निमान्द्यप्रशान्तये इत्यस्यान्ते तदनुपानश्लोकमेकं पठन्ति मानयन्ति च 'पथ्या शुण्ठी गुडं चानु पलार्धं भक्षयेत् सदा । अग्नितुण्डा वटी ख्याता सर्वरोगकुलान्तका' ॥ २२२ ॥ २२३ ॥

गू०—वह्निश्चित्रकः, विषमुष्टिः महानिम्बफलं कुचेलं वा द्वयोरभावे समुद्रफलं वा देयम् ॥ २२२ ॥ ॥ २२३ ॥

**अथाजीर्णकण्टको रसः—**

**शुद्धं सूतं विषं गन्धं समं सर्वं विचूर्णयेत् ॥ २२४ ॥**
**मरिचं सर्वतुल्यांशं कण्टकार्याः फलद्रवैः ।**
**मर्दयेद्भावयेत्सर्वमेकविंशतिवारकम् ॥ २२५ ॥**
**वटीं गुञ्जात्रयं खादेत्सर्वाजीर्णप्रशान्तये ।**
**अजीर्णकण्टकः सोऽयं रसो हन्ति विषूचिकाम् २२६**

दी०—अथाजीर्णकण्टकरसमाह—शुद्धसूतमित्यादि । शुद्धरसं शुद्धविषं शुद्धगन्धकं च एतत्त्रिकं च सममात्रं संगृह्य तदनु एभिस्त्रिभिः साम्यं च मरिचचूर्णं कृत्वा खल्वे तच्चतुष्कं संचूर्ण्य पश्चादुक्तद्रवेण भावयेत्। यावदेकविंशतिसंख्यकं भवति तावद्भावयेदित्यर्थः । कण्टकार्या इति लघुकण्टकारिफलानि । केचिदनुपानार्थं श्लोकमेकं पठन्ति । 'अनु स्यादीश्वरीमूलं तोयपिष्टं च पाययेत् । शङ्खं चाश्वत्थमूलं वा वारिणाऽजीर्णजिद्भवेत्' एतन्न प्रचरति ॥ २२४-२२६ ॥

गू०—सुगमम् ॥ २२४-२२६ ॥

**कफादौ मन्थानभैरवरसः ।**

**मृतं सूतं मृतं ताम्रं हिङ्गु पुष्करमूलकम् ।**
**सैन्धवं गन्धकं तालं कटुकीं चूर्णयेत्समम् ॥ २२७ ॥**
**पुनर्नवादेवदालीनिर्गुण्डीतण्डुलीयकैः ।**
**तिक्तकोशातकीद्रावैर्दिनैकं मर्दयेद्दृढम् ॥ २२८ ॥**
**माषमात्रं लिहेत्क्षौद्रैः रसं मन्थानभैरवम् ।**
**कफरोगप्रशान्त्यर्थं निम्बक्वाथं पिबेदनु ॥ २२९ ॥**

दी०—अथ मन्थानभैरवरसमाह—मृतं सूतमित्यादि । अत्र पुष्करमूलाभावे कुष्ठं ग्राह्यम् । गन्धकं तालमपि शोधितं ग्राह्यम् । तालं हरितालं तण्डुलीयो मेघनादः ॥ २२७-२२९ ॥

गू०—तालं हरितालं कटुकी एतत्समं मृतसूताद्यष्टौषधं चूर्णितं एभिः पुनर्नवादिभिर्भावयेत् । पुनर्नवा वर्षाभूः देवदाली निर्गुण्डी तण्डुलीयकं मेघनादः तिक्तकोशातकी जालिनी एषां द्रावैर्दिनैकं मर्दयेत् । पुनर्दुग्धेन मर्दयेत् । माषमात्रं क्षौद्रैर्लिहेत् उपरि निम्बपत्रक्वाथं पिबेत् । एरण्डनालेन वान्तिं कारयेत् । कफक्षयकासादयो यान्ति ॥ २२७-२२९ ॥

**अथ वातनाशनो रसः—**

**सूतहाटकवज्राणि ताम्रं लोहं च माक्षिकम् ।**
**तालं नीलाञ्जनं तुत्थमहिफेनं समांशकम् ॥ २३० ॥**
**पञ्चानां लवणानां च भागमेकं विमर्दयेत् ।**
**वज्रीक्षीरैर्दिनैकं तु रुद्ध्वाधो भूधरे पचेत् ॥ २३१ ॥**
**माषैकमार्द्रकद्रावैर्लेहयेद्वातनाशनम् ।**
**पिप्पलीमूलजक्वाथं सकृष्णमनुपाययेत् ॥ २३२ ॥**
**सर्वान्वातविकारांस्तु निहन्त्याक्षेपकादिकान् ।**

दी०—अथ वातनाशनरसमाह—सूतहाटकवज्राणीति । सूतं पारदं, हाटकं सुवर्णं, वज्रं हीरकं । एके माक्षिकस्थाने गन्धकमिति पठन्ति एतन्मनोहरम् । तालं हरितालं, नीलाञ्जनं प्रसिद्धं तदभावे सीसकं ग्राह्यम् । तत्सम्भवत्वात् अहिफेनं समुद्रफेनम् । एतत्सकलं सममात्रम् । पञ्चानां लवणानां पञ्चभागा इत्यर्थः । 'सिन्धुसौवर्चलोपेतं बिडं सामुद्रजं गडम्' इति पञ्चलवणम् । रुद्ध्वाधो भूधरे पचेदिति । तत्सकलं दिनैकं एकदिनं संमर्द्य पश्चाद्भूधरयन्त्रे पचेदित्यभि-

प्रायः । भूधरयन्त्रं तु पूर्वं दर्शितमेव । अनुपाने सङ्क्रमणमिति पिप्पलीचूर्णं, प्रक्षेपणं कुर्यात् । अयमेव रसो ग्रन्थान्तरे भूतोन्मादार्थं पठितः । अत्र क्वचिद्विपरीतता दृश्यते तथाहि—सूतायस्ताम्रमभ्रं च मृतं स्वर्णं समं समम् । सूतपादं मृतं वज्रं तालं गन्धं मनःशिलाम् ॥ तुत्थं नीलाञ्जनं शुद्धमहिफेनं समं रसात् । पञ्चानां लवणानां च प्रतिभागं रसोन्मितम् ॥ चित्रकैर्भृङ्गराजैश्च वज्रीदुग्धैश्च मर्दयेत् । दिनान्ते गोलकं कृत्वा रुद्ध्वा गजपुटे पचेत् ॥ महाभूताङ्कुशो नाम रसो गुञ्जाद्वयं लिहेत् । आर्द्रकस्य रसैरेव भूतोन्मादप्रशान्तये ॥ पिप्पल्याऽऽक्तं पिबेच्चानु दशमूलं कषायकम्' (इति) ॥ २३०-२३२ ॥

**गू०**—सूतं मृतं पारदं, हाटकं स्वर्णं, वज्रं हीरकं, मृतमभ्रकं वा, लोहं, माक्षिकं स्वर्णमाक्षिकं, तालं हरितालं, नीलाञ्जनं, तुत्थं शुद्धं मारितं, तदभावे ताम्रं वा देयं वमनभयात् । अहिफेनं अफूकं एतत्समं मञ्जक्षारैः विमर्दयेत् ॥ २३०-२३२ ॥

### अथ कनकसुन्दरः सन्निपातादौ—

**कनकस्याष्टशाणाः स्युः सूतो द्वादशभिर्मतः ॥२३३**
**गन्धोऽपि द्वादश प्रोक्तस्ताम्रं शाणद्वयोन्मितम् ।**
**अभ्रकं स्याच्चतुःशाणं माक्षिकं च द्विशाणिकम्२३४**
**वङ्गो द्विशाणः सौवीरं त्रिशाणं लोहमष्टकम् ।**
**विषं त्रिशाणिकं कृत्वा लाङ्गली पलसंमिता॥२३५॥**
**मर्दयेद्दिनमेकं तु रसैरम्लफलोद्भवैः ।**
**दद्यान्मृदुपुटं वह्नौ ततः सूक्ष्मं विचूर्णयेत् ॥ २३६॥**
**माषमात्रो रसो देयः संनिपाते सुदारुणे ।**
**आर्द्रकस्वरसेनैव रसोनस्य रसेन वा ॥ २३७ ॥**
**किलासं सर्वकुष्ठानि विसर्पं च भगन्दरम् ।**
**ज्वरं गरमजीर्णं च जयेद्रोगहरो रसः ॥ २३८ ॥**

**दी०**—अथ कनकसुन्दररसमाह—कनकस्येत्यादि । कनकादीन्यत्र मृतानि ग्राह्याणि शाणोपलक्षितत्वादत्र भाग एव बोद्धव्यः यथासम्भवत्वात् । कनकमत्र सुवर्णं, सूतः पारदः, गन्धो गन्धकः, सौवीरं सौवीराञ्जनं, लोहं सारसंज्ञम्, लाङ्गली कलिहारिका, अम्लफलानि बीजपूरजम्बीरप्रभृतीनि । मृदुपुटमत्र गजपुटविशेषम् । शेषं सुगमम् ॥ २३३-२३८ ॥

**गू०**—कनकस्य धत्तूरबीजस्य अष्ट शाणाः अष्ट टङ्काः, सूतः शुद्धः द्वादश टङ्कः, ताम्रं मृतं द्विशाणं, अभ्रकं चतुःशाणं, माक्षिकं मृतं द्विशाणं, वङ्गो मृतः द्विशाणः, सौवीरः अञ्जनं त्रिशाणं, लोहं मृतं अष्टशाणम् । विषं त्रिशाणं, लाङ्गली कलिहारी पलप्रमाणा, अम्लवेतसाद्यैः मृदुपुटं दद्यात् । पुनः माषमात्रो देयः । आर्द्रकरसेन रसोनरसेन वा किलासं चित्रकुष्ठानि विसर्पभगंदरं ज्वरं विषं अजीर्णं जयेत् एतद्रोगहरो रसः कनकसुन्दरः ॥ २३३-२३८ ॥

### अथ सन्निपातभैरवो रसः—

**रसो गन्धस्त्रिकर्षः स्यात् कुर्यात्कज्जलिकां तयोः ।**
**ताम्रताराखङ्गाहिसाराश्चैकैककार्षिकाः ॥ २३९ ॥**
**शिग्रुज्वालामुखीशुण्ठीबिल्वेभ्यस्तण्डुलीयकान् ।**
**प्रत्येकं स्वरसैः कुर्याद्यामैकैकं विमर्दनम् ॥ २४० ॥**
**कृत्वा गोलं मृतं वस्त्रे लवणापूरिते न्यसेत् ।**
**काचभाण्डे ततः स्थाल्यां काचकूपीं निवेशयेत् ॥**
**वालुकाभिः प्रपूर्याथ वह्निर्यामद्वयं भवेत् ।**
**तत उद्धृत्य तं गोलं चूर्णयित्वा विमिश्रयेत् ॥२४२॥**
**प्रवाणचूर्णकर्षेण शाणमात्रविषेण च ।**
**कृष्णसर्पस्य गरलैर्द्विवेलं भावयेत्तथा ॥ २४३ ॥**
**तगरं मुशली मांसी हेमाह्वा चेतसः कणा ।**
**नीलिनी पत्रकं चैला चित्रकश्च कुठेरकः ॥ २४४ ॥**
**शतपुष्पा देवदाली धत्तूरागस्त्यमुण्डिकाः ।**
**मधूकजातीमदनरसैरेषां विमर्दयेत् ॥ २४५ ॥**
**प्रत्येकमेकवेलं च ततः संशोष्य धारयेत् ।**
**बीजपूरार्द्रकद्रावैर्मरिचैः षोडशोन्मितैः ॥ २४६ ॥**
**रसो द्विगुञ्जाप्रमितः संनिपातेषु दीयते ।**
**प्रसिद्धोऽयं रसो नाम्ना संनिपातस्य भैरवः ॥२४७॥**

**दी०**—अथ सन्निपातभैरवरसमाह—रसो गन्धस्त्रिकर्षः स्यादित्यादि । रसः पारदः, गन्धो गन्धकः एतद्द्वयं मिलितं त्रिकर्षं स्यादित्यर्थः । ताम्रताराखङ्गाहिसाराश्चैकैककार्षिका इति । ताम्रं प्रसिद्धम् । तारं रौप्यं, आरं पीतलोहं, वङ्गं रङ्गवाच्यं, अहिः सीसकं । सारो लोहः एतत्ताम्रादिकं सर्वं मृतं ग्राह्यमिति सम्प्रदायः । एकैककार्षिका इति । प्रत्येकं कर्षसंमिता इत्यभिप्रायः । अपरमपि शिग्रु शोभाञ्जनं ज्वालामुखी जयन्ती बिल्वेभ्य इति । बिल्वमूलादर्सैरिति शेषः । तण्डुलीयः मेघनादशब्दवाच्यः । स्वरसमत्र सद्यस्कं क्वथितरसं वा । अथ प्रक्षेपार्थं द्रव्याण्याह—तत्र सिद्धरसे प्रवाणचूर्णकर्षेणेति । प्रवाणचूर्णं विषचूर्णं च मि-

श्चयेत् । प्रवाणचूर्णं कर्षप्रमाणं, विषचूर्णं शाणमात्रमिति । प्रवाणमिति प्रकर्षेण वाणं सुधाचूर्णमित्यर्थः । एके प्रवालचूर्णं पठन्ति तत्र प्रवालचूर्णं विद्रुमचूर्णं । शुक्तिकाचूर्णमित्यपरे तदभावे शङ्खचूर्णमित्यस्मदीयः सम्प्रदायः । भावनार्थं द्रव्याण्याह—कृष्णसर्पस्य गरलैः कृत्वा तत्पूर्वोक्तं द्रव्यं द्विवेलं यावद्भावयेत् । गरलं तद्विषं विशेषम् । तगरादिभिश्च तद्वारमेकं भावयेत् । प्रत्येकमिति पृथक् पृथक् । तगरं प्रसिद्धम् । मांसी जटाख्या, हेमाह्वा स्वर्णक्षीरी, वेतसो जलवेतसः, कणा पिप्पली, नीलिनीपत्रकमिति नीलिकापत्रम्, एके नीलिनी पत्रकं च द्रव्यद्वयं व्याख्यानयन्ति तच्च न सर्वमतं, कुठेरकः प्रसिद्धः, देवदाली वल्लीविशेषः, मुण्डिका केदारमुण्डी, मधूकं मधूकवृक्षः, जाती मालतीरसोऽत्र समस्कः कथितो वा यथालाभात् । अयं सिद्धरसो द्विगुञ्जाप्रमितः षोडशमरिचान्वितो बीजपूरार्द्रकरसेन सह भक्षयेत् ॥ २३९ ॥ २४७ ॥

**गू०**—पारदः, गन्धकः त्रिकर्षौ एतौ, मृतं तारं मृतं रूप्यम् । अभ्रं अभ्रकं, वङ्गं, अहिः नागं, सारं लोहं एते एकैककर्षकाः । शिग्रु शोभाञ्जनम्, ज्वालामुखी जयन्ती, तण्डुलीयकः, एभिर्गोलकं कृत्वा पुनर्वस्त्रैर्वृतं काचपात्रस्थं लवणपूरिते भाण्डे न्यसेत् । वह्निं दद्यात् । यामद्वयम् । ततः पुनः प्रवालचूर्णकर्षेण शाणमात्रविषेण मेलयित्वा कृष्णसर्पस्य गरलैर्भावयेत् दिवसमेकं दिनं पश्चात्स्थालिकायां हण्डिकायां च कुप्यां निवेशयेत् । हेमाह्वा स्वर्णक्षीरी, नीलिनी अपराजिता, कुठेरकः श्वेततुलसी, देवदाली । मधूकं गुडपुष्पं, जाती मालती, मदनफलं, स्पष्टमन्यत् ॥ २३९–२४७ ॥

### अतीसारादौ ग्रहणीकपाटः—

**तारमौक्तिकहेमानि सारश्चैकैकभागिकाः ।**
**द्विभागो गन्धकः सूतस्त्रिभागो मर्दयेदिमान् ॥२४८**
**कपित्थस्वरसैर्गाढं मृगशृङ्गे ततः क्षिपेत् ।**
**पुटेन्मध्यपुटेनैव ततं उद्धृत्य मर्दयेत् ॥ २४९ ॥**
**बलारसैः सप्तवेलमपामार्गरसैस्त्रिधा ।**
**लोध्रप्रतिविषामुस्तधातकीन्द्रयवामृताः ॥ २५० ॥**
**प्रत्येकमेषां स्वरसैर्भावना स्यात्त्रिधा त्रिधा ।**
**माषमात्रो रसो देयो मधुना मरिचैस्तथा ॥ २५१ ॥**
**हन्यात्सर्वानतीसारान्ग्रहणीं सर्वजामपि ।**
**कपाटो ग्रहणीरोगे रसोऽयं वह्निदीपनः ॥ २५२ ॥**

**दी०**—अथ ग्रहणीकपाटरसमाह—तारमौक्तिकहेमानीत्यादि सुगमम् । मध्यपुटं तु लघुपुटसंज्ञं तच्च षोडशाङ्गुलगर्ते प्रतिपादितम् । तथाहि—'निपुणविहितगर्तैः षोडशैरङ्गुलैर्वा मितसकलविभागस्तस्य मध्ये निधाय । ज्वलनमतिविशुष्कैर्गोमयैः सूतसिद्ध्यै लघुगजपुटमेवं पूर्वमुक्तं मुनीन्द्रैः' इति । मरिचमानमप्यत्र माषमात्रम् । अथवा दोषापेक्षया देयम् ॥ २४८–२५२ ॥

**गू०**—तारं रौप्यं, मृतं मौक्तिकं, मुक्ताफलं, हेम स्वर्णं मृतं, सारो मृतलोहः, एते प्रत्येकभागिकाः । द्विभागो गन्धः, सूतः पारदः शुद्धत्रिभागः । एतान् कज्जलीकृत्य कपित्थफलस्वरसैर्मर्द्य मृगशृङ्गे स्थापयेत् । मृत्कर्पटं दत्वा मध्यपुटे पुटेत् । बला प्रसिद्धा तद्रसैः सप्तवेलं सप्तवारं भावयेत् । अपामार्ग ऊर्ध्वकण्टकः तद्रसैस्त्रिधा भावयेत् । लोध्रं प्रसिद्धं, प्रतिविषा अतिविषा, मुस्तं नागरं, धातकीपुष्पाणि, इन्द्रयवः, अमृता गुडूची एषां स्वरसैः प्रत्येकं त्रिधा भावना स्यात् । तदादिसिद्धो माषमात्रो देयः । मधुना तथा मरिचैरपि माषमात्रैः सर्वानतीसारान् तथा सर्वजां ग्रहणीं हन्यात् ॥ २४८–२५२ ॥

### अथ ग्रहणीवज्रकपाटः—

**मृतसूताभ्रकं गन्धं यवक्षारं सटङ्कणम् ।**
**अग्निमन्थं वच कुर्यात्सूततुल्यानिमान्सुधीः ॥२५३॥**
**ततो जयन्तीजम्बीरभृङ्गद्रावैर्विमर्दयेत् ।**
**त्रिवासरं ततो गोलं कृत्वा संशोष्य धारयेत् २५४**
**लोहपात्रे शरावं च दत्वोपरि विमुद्रयेत् ।**
**अधो वह्निं शनैः कुर्याद्यामार्धं तत उद्धरेत् ॥२५५॥**
**रसतुल्यां प्रतिविषां दद्यान्मोचरसं तथा ।**
**कपित्थविजयाद्रावैर्भावयेत्सप्तधा पृथक् ॥ २५६ ॥**
**धातकीन्द्रयवा मुस्ता लोध्रं बिल्वं गुडूचिका ।**
**एतद्रसैर्भावयित्वा वेलैकैकं च शोषयेत् ॥ २५७ ॥**
**रसं वज्रकपाटाख्यं शाणैकं मधुना लिहेत् ।**
**वह्निं शुण्ठीं बिडं बिल्वं लवणं चूर्णयेत्समम् ॥२५८॥**
**पिबेदुष्णाम्बुना चानु सर्वजां ग्रहणीं जयेत् ।**

**दी०**—अथ ग्रहणीवज्रकपाटरसमाह—मृतसूताभ्रकमिति । मृतसूतं पारदं भवति तावत् परिमाणं पृथक् षड्द्रव्याणि ग्राह्याणि । एके षड्द्रव्यं तु पारदसाम्यं देयमिति मन्यंते तच्च सर्वमतम् । किंतु मृतपारदस्यैको भागः । अभ्रकादीनां षड्भागा इति सर्वमतम् । ततस्तस्मात् । जयन्ती शाकभेदः । जम्बीरं जम्बीरफलरसः । भृङ्गो मार्कवः । त्रिवासरमिलनेनैकद्रव्यस्यैकाह-

१ 'राज्ञा' पा० ।

मेव भावना देयेत्यभिप्रायः । लोहपात्र इत्यादिना पिठरीयं वालुकाभिः प्रपूर्येत्यस्मदीयसम्प्रदायात् कार्यो न दोषः । यामार्धमित्यनेन घटिकाचतुष्टयं यावत् एतत्सिद्धं भवति तदा प्रतिविषां मोचरसं च पृथक्सिद्धं रसतुल्यं मेलयित्वा पश्चादुक्तद्रव्यस्य रसैः कृत्वा भावयेत् । प्रतिविषा अतिविषाशब्दवाच्या । मोचरसं शाल्मलीनिर्यासम् । एके प्रतिविषामोचरसयोरपि भावनामाहुः । विजयाऽत्र भङ्गा, सप्तधा भावना एकद्रव्येण कार्या, अन्येषां वक्ष्यमाणानां पृथगेकवारं तत्र धातकी धातकीकुसुमानि, इन्द्रयवं कुटजबीजं, रास्ना सुरभी, मध्वत्र लेहने यावत्तावन्मानं देयम् । अनुपानार्थद्रव्येषु वह्निश्चित्रकजटा, बिडं बिडलवणं, लवणं सैन्धवम् ॥ २५३-२५८ ॥

गू०—मृतसूतं मृतपारदं, अभ्रकं, गन्धकं, यवक्षारं, सौभाग्यं, अग्निमन्थो, वचा एतानि सूततुल्यानि कुर्यात् । यावत् सूतं प्रत्येकभागं मतः । ततो जयन्त्यादिभिर्विमर्दयेत् । त्रिवासरं त्रिदिनं ततो गोलं कृत्वा संशोष्य लोहपात्रे कटाहिकादौ धृत्वा उपरि शरावं दत्वा मुद्रयेत् । शनैर्यामार्धं वह्निं कुर्यात् । गोलकतुल्यां प्रतिविषां तथा मोचरसं दत्वा कपित्थादिभिः सप्तसप्त भावयेत् । विजया भङ्गा, कपित्थं प्रसिद्धं, तैर्धातक्यादिभिर्वारैकं भावयेत् । धातकीपुष्पाणि, इन्द्रयवः, मुस्तं, लोध्रं, बिल्वं, गुडूची एतैः शाणं टङ्कं मधुना लिहेत् । वह्निश्चित्रकं, शुण्ठी, बिडं बिडलवणं, सैन्धवं एतदनुपानं पिबेत् ॥ २५३-२५८ ॥

**अथ मदनकामदेवो वाजीकरणे—**

**तारं वज्रं सुवर्णं च ताम्रं सूतकगन्धकम् ॥ २५९ ॥**
**लोहं क्रमविवृद्धानि कुर्यादेतानि मात्रया ।**
**विमर्द्य कन्यकाद्रावैर्न्यसेत्काचमये घटे ॥ २६० ॥**
**विमुद्रां पिठरीमध्ये धारयेत्सैन्धवावृते ।**
**पिठरीं मुद्रयेत्सम्यक् ततश्चुल्ल्यां निवेशयेत् ॥ २६१ ॥**
**वह्निं शनैः शनैः कुर्याद्दिनैकं तत उद्धरेत् ।**
**स्वाङ्गशीतं च संचूर्ण्य भावयेदर्कदुग्धकैः ॥ २६२ ॥**
**अश्वगन्धा च काकोली वानरी मुशलीक्षुरा ।**
**त्रित्रिवेलं रसैरासां शतावर्याश्च भावयेत् ॥ २६३ ॥**
**पद्मकन्दकसेरूणां रसैः काशस्य भावयेत् ।**
**कस्तूरी व्योषकर्पूरकङ्कोलैलालवङ्गकम् ॥ २६४ ॥**
**पूर्वचूर्णादष्टमांशमेतच्चूर्णं विमिश्रयेत् ।**
**सर्वैः समां शर्करां च दत्त्वा शाणोन्मितां पिबेत् २६५**
**गोदुग्धद्विपलेनैव मधुराहारसेवकः ।**
**अस्य प्रभावात्सौन्दर्यं बलं तेजोऽभिवर्धते ॥ २६६ ॥**
**तरुणी रमयेद्बह्वीः शुक्रहानिर्न जायते ।**

टी०—अथ मदनकामदेवरसमाह—तारमित्यादि । तारं रौप्यं, वज्रं हीरकं, तदभावे वैक्रान्तं ग्राह्यमिति व्यवहारात् । सूतकः पारदः लोहं सारसंज्ञम् । अत्र क्रमवृद्धिस्तु पूर्वद्रव्यादुत्तरवृद्धिर्बोद्धव्या, अस्मत्सम्प्रदाये तु रजतादीनि द्रव्याणि अत्र मृतानि देयानीति व्यवहारोऽपि दृश्यते । कन्यका कौमारी । विमुद्रामिति काचकुपीमिति शेषः । सैन्धवचूर्णं च काचकुपीमुभयतो देयम् । सिद्धरसस्य भावनार्थं द्रव्याण्याह—अर्कदुग्धमर्कभवं क्षीरं, कालोली प्रसिद्धा, वानरी कपिकच्छूः, मुशली कन्दविशेषः, इक्षुकः कोकिलाक्षः तालमूली, पद्मकन्दः कमलकन्दः, कसेरुकोऽपि विख्यातः काशतृणसंज्ञः प्रसिद्धः । पश्चाच्चूर्णार्थं द्रव्याण्याह—कस्तूरीत्यादि । कस्तूरी मृगनाभिजा, व्योषं त्रिकटुकं, पूर्वचूर्णाद्भावनाभिः प्रतिपादितद्रव्यादष्टमांशं दद्यात् । तेन पूर्वचूर्णं सप्तभागं कस्तूरीप्रमुखं चैकभागमिति ॥ २५९-२६६ ॥

गू०—तारं रौप्यं, मृतं वज्रं हीरकं अभ्रकं वा, सुवर्णं मृतं, गन्धकं, सूतकं शुद्धं, तीक्ष्णं एतानि क्रमवृद्धानि तारं भागैकं, वज्रं द्विभागं, सुवर्णं त्रिभागं, ताम्रं चतुर्भागं, सूतं सप्तभागं, लोहमष्टभागं एवं अर्कदुग्धैर्मर्द्य काचकुप्यां वालुकायन्त्रे पाचयेत् । ततोऽश्वगन्धादिभिर्मर्द्य भक्षयेत् । अर्कदुग्धं यद्यपि भावनाद्रव्ये लिखितं तथापि कुमार्या सहैव देयं अर्कदुग्धस्य भक्षणानुचितत्वात् । वानरी कपिकच्छूः, मुशली, इक्षुरा तालमूली, स्पष्टमन्यत् ॥ २५९-२६६ ॥

**वाजीकरणे कन्दर्पसुन्दररसमाह—**

**सूतो वज्रमहिर्मुक्ता तारं हेमासिताभ्रकम् ॥ २६७ ॥**
**रसैः कर्षांशकानेतान्मर्दयेदिरिमेदजैः ।**
**प्रवालचूर्णं गन्धं च द्विद्विकर्षं विमिश्रयेत् ॥ २६८ ॥**
**ततोऽश्वगन्धास्वरसैर्विमर्द्य मृगशृङ्गके ।**
**क्षिप्त्वा मृदुपुटे पक्त्वा भावयेद्धातकीरसैः ॥ २६९ ॥**
**काकोली मधुकं मांसी बलात्रयबिसेक्षुदे ।**
**द्राक्षापिप्पलवन्दाकं वरी पर्णीचतुष्टयम् ॥ २७० ॥**
**परूषकं कसेरुश्च मधूकं वानरी तथा ।**
**भावयित्वा रसैरेषां शोषयित्वा विचूर्णयेत् ॥ २७१ ॥**
**एलात्वक्पत्रकं वांशी लवङ्गागरुकेशरम् ।**
**मुस्तं मृगमदः कृष्णा जलं चन्द्रश्च मिश्रयेत् २७२ ॥**

१ 'क्षुकः' पा० ।

**एतच्चूर्णैः शाणमितै रसं कन्दर्पसुन्दरम् ।**
**खादेच्छाणमितं रात्रौ सिता धात्री विदारिका२७३**
**एतासां कर्षचूर्णेन सर्पिष्कर्षेण संयुतम् ।**
**तस्यानु द्विपलं क्षीरं पिबेत्सुस्थितमानसः ॥२७४॥**
**रमणीं रमयेद्बह्वीर्न हानिं क्वापि गच्छति ।**

दी०—सूत इत्यादि । सूतः पारदः, वज्रं हीरकं, अहिः सीसकं, मुक्ता प्रसिद्धा, तारं रौप्यं, हेम सुवर्णं, असिताभ्रकं कृष्णाभ्रकं एतत्सर्वमपि मारितं ग्राह्यमित्यत्र व्यवहारः । एतेषां मानमपि कर्षप्रमाणं प्रत्येकम् । इरिमेदो विट्खदिरः, सच लोके 'रेओज' शब्दवाच्यः तस्य त्वक् ग्राह्या । अपरद्रव्यद्वयमपि मेलनार्थं द्विद्विकर्षं प्रत्येकं देयम् । तच्च प्रवालचूर्णं विद्रुमचूर्णं, गन्धं गन्धकं, मृगश्रृङ्गके मृगश्रृङ्गसम्पुटे तदौषधं धार्यमित्यभिप्रायः । मृदुसम्पुटं च लघुगजपुटमित्यर्थः । पश्चाद्भावनार्थं द्रव्याण्याह—धातकी धातकीकुसुमानि, काकोली स्वनामख्याता, मधुकं मधुकयष्टी, मांसी जटाख्यं सुगन्धद्रव्यम् । बलात्रयं प्रसिद्धम् तच्च बला अतिबला नागबलेति, बिसं मृणालं, भसीण्डशब्दवाच्यं लोके, इङ्गुदं वृक्षेङ्गुदं, द्राक्षा प्रसिद्धा, पिप्पलवन्दाकमिति पिप्पलवृक्षस्य वन्दा, वन्दा च विटपलग्नो गुल्मविशेषः, एके पिप्पलवन्दाकं द्रव्यद्वयं वर्णयन्ति तत्र पिप्पलः पिप्पलत्वक् वन्दावृक्षः वन्दा प्रसिद्धा अपरे पिप्पलीवन्दाकमिति व्याख्यानयन्ति, वाणः सहचरः एके वाणस्थाने वरीति पठन्ति, पर्णीचतुष्टयमिति । माषपर्णी मुद्गपर्णी, शालपर्णी, पृश्निपर्णी, चेति, परूषकं फालसाशब्दवाच्यं कसेरुकं प्रसिद्धम् । मधूकं मधूकवृक्षपुष्पाणि, वानरी कपिकच्छूः, एतेषां स्वरसेन प्रत्येकं भावयेदित्यर्थः । अथ चूर्णार्थं द्रव्याण्याह—एलात्वक्पत्रकमित्यादि । वांशी त्वक्क्षीरी वंशरोचना इति प्रसिद्धा, अगरु प्रसिद्धम्, केशरं नागकेशरं, मुस्तं प्रसिद्धम्, मृगमदः कस्तूरी, कृष्णा पिप्पली, जलं वालकं, चन्द्रः कर्पूरः एतत्सकलं शाणमितं टङ्कप्रमाणं भक्षणार्थं रात्रौ निशामुखे । अनुपानमाह—द्विपलं क्षीरं पिबेत्, कथम्भूतम् ? सितादीनां द्रव्यत्रयाणां चूर्णं मेलयित्वा कर्षमात्रं संगृह्य कर्षमानेन च घृतेन सह संमर्द्य तन्मिश्रितम् । सिता मत्स्यण्डी, धात्री आमलकी, विदारी विदारीकन्दः, सुस्थितमानसः स्वस्थः, ननु आतुरः, तस्य विहितत्वात् न हानिं क्वापि गच्छतीति स पुरुषः । वीर्यहानिं न प्राप्नोति इत्यर्थः ॥ २६७-२७४ ॥

गू०—अथ कन्दर्पसुन्दरो रसः । सूतः पारदः, वज्रं हीरकं वा अभ्रकं, अहिः सीसकः, मुक्ता प्रसिद्धा, तारं रौप्यं, मृतं हेम स्वर्णं मृतं, सिताभ्रकं, श्वेताभ्रकं मारितम्, एतान् कर्षांशिकान् प्रत्येकान् इरिमेदो विट्खदिरः तेन मर्दयेत् । प्रवालो विद्रुमः द्विकर्षौ गन्धको द्विकर्षः । अश्वगन्धास्वरसैर्मर्दः, मृगश्रृङ्गके कृत्वा मृदुपुटे पचेत् । ततो धातकीरसैर्भावयेत् । परूषकफलविशेषः कसेरुः प्रसिद्धः, मधूकं गुडपुष्पः, वानरी कपिकच्छूः एषां रसैर्भावयित्वा शोषयित्वा विचूर्णयेत् । एलादिकैः प्रत्येकं शाणमितैर्मिश्रयेत् । पुनः कन्दर्पसुन्दरं शाणमितं रात्रौ, सिता धात्री विदारिका एतेषां कर्षचूर्णेन युतं सर्पिः कर्षेण संयुतं खादेत् । तस्यानु द्विपलं क्षीरं पिबेत् । सुस्थिरमानसः रमणीं रमयेत् । एला क्षुद्रैला, पत्रं पत्रजं, वांशी रोचना, लवङ्गं, अगरु, केसरं मुस्तं, मृगमदं कस्तूरी, कृष्णा पिप्पली, जलं वालकं, चन्द्रः कर्पूरः, सिता प्रसिद्धा, धात्री आमलकी, विदारीकन्दं, सर्पिर्घृतं, स्पष्टमन्यत् ॥ २६७-२७४ ॥

## अथ लोहरसायनम्—

**शुद्धं रसेन्द्रं भागैकं द्विभागं शुद्धगन्धकम् ॥२७५॥**
**क्षिपेत्कज्जलिकां कुर्यात्तत्र तीक्ष्णभवं रजः ।**
**क्षिप्त्वा कज्जलिकातुल्यं प्रहरैकं विमर्दयेत् ॥२७६॥**
**ततः कन्याद्रवैर्घर्मे त्रिदिनं परिमर्दयेत् ।**
**ततः संजायते तस्य सोष्णो धूमोद्गमो महान् २७७**
**अत्यन्तं पिण्डितं कृत्वा ताम्रपात्रे निधापयेत् ।**
**मध्ये धान्यकुशूलस्य त्रिदिनं धारयेद्बुधः ॥ २७८ ॥**
**उद्धृत्य तस्मात्खल्वे च क्षिप्त्वा घर्मे निधाय च ।**
**रसैः कुठारच्छिन्नायास्त्रिवेलं परिभावयेत् ॥ २७९ ॥**
**संशोष्य घर्मे क्वाथैश्च भावयेत्त्रिकटोस्त्रिधा ।**
**वासामृताचित्रकाणारसैर्भाव्यं क्रमात्त्रिधा ॥२८०॥**
**लोहपात्रे ततः क्षिप्त्वा भावयेत्त्रिफलाजलैः ।**
**निर्गुण्डीदाडिमत्वग्भिर्बिसभृङ्गकुरण्टकैः ॥ २८१ ॥**
**पलाशकदलीद्रावैर्बीजकस्य श्रृतेन च ।**
**नीलिकालम्बुषाद्रावैर्बब्बूलफलिकारसैः ॥ २८२ ॥**
**भावयेत्त्रिस्त्रिवेलं च ततो नागबलारसैः ।**
**शतावरीगोक्षुरभिः पातालगरुडीद्रवैः ॥ २८३ ॥**
**त्रिस्त्रिवेलं यथालाभं भावयेदेभिरौषधैः ।**
**ततः प्रातर्लिहेत्क्षौद्रघृताभ्यां कोलमात्रकम् ॥२८४॥**
**पलमात्रं वराक्वाथं पिबेदस्यानुपानकम् ।**
**मासत्रयं शीलितं स्याद्बलीपलितनाशनम् ॥२८५॥**

मन्दाग्निं श्वासकासौ च पाण्डुतां कफमारुतौ ।
पिप्पलीमधुसंयुक्तं हन्यादेतन्न संशयः ॥ २८६ ॥
वातास्रं मूत्रदोषांश्च ग्रहणीं गुदजां रुजम् ।
अण्डवृद्धिं जयेदेतच्छिन्नासत्त्वमधुप्लुतम् ॥ २८७ ॥
बलवर्णकरं वृष्यमायुष्यं परमं स्मृतम् ।
जयेत्सर्वामयान्कालादिदं लोहरसायनम् ॥ २८८ ॥
कूष्माण्डं तिलतैलं च माषान्नं राजिकां तथा ।
मद्यमम्लरसं चैव त्यजेल्लोहस्य सेवकः ॥ २८९ ॥

टी०—अथ लोहरसायनमाह—शुद्धं रसेन्द्रभागैकं इत्यादि । शुद्धं संस्कारितं, रसेन्द्रः पारदः तस्यैको भागः, शुद्धगन्धकस्य द्वौ भागौ, गन्धकशुद्धिश्च पूर्वं कथितैव । तत्र कज्जलिकायां तीक्ष्णभवं रज इति । लोहचूर्णं शुद्धं मृतसारचूर्णं इत्येके । तच्च पूर्वकज्जलिकासाम्यं ग्राह्यम् । प्रहरैकं मर्दनं केवलं कज्जलिका लोहचूर्णयोरेव कथितं नतु रसादिना, वक्ष्यमाणरसैरेव त्रिदिनं यावदित्यभिप्रायः । घर्म इति खरतरसूर्यांशुतापिते अतएव तस्य सोष्णो महान् धूमोद्गमो भवति इति । तेनैवं लोहमृतिः स्यादित्येके । स्वमते तु धान्यकुशूलोपितं त्रिरात्रं यावद्भवति पश्चाद् यदुद्धरेत् तत्कालमेव घर्मे धारणेन मृतिः स्यात् । अत्यन्तपिण्डितमित्यनेन एरण्डपत्रवेष्टनादिकमभिप्रेतम् । पश्चात्कार्यमाह—रसैरित्यादि । कुठारच्छिन्ना लोके तिपानीशब्दवाच्या । कुरेजा इत्यपरे । त्रिवेलमित्यनेनापरद्रव्याणामपि संबन्धः । तेनैकैकरसेन त्रिवेलं भावयेदित्यर्थः । घर्मे च प्रत्येकं शोषणमपि विहितम् । त्रिकटोः त्र्यूषणस्य 'शुण्ठीमरिचपिप्पल्यस्त्रिकटुस्त्र्यूषणं स्मृतम्' इति । वासा आटरूषकः, अमृता गुडूची । लोहपात्रे तत् क्षिप्त्वेति पूर्वं मृत्पात्रे धार्यमिति प्राप्तम् । पाषाणखल्वे वा त्रिफलाजलैः त्रिफलाक्काथैः त्रिफलाहरीतक्यादि दाडिमत्वक् वल्कलं, वासा आटरूषकः, भृङ्गो मार्कवः, कुरण्टकः सहचरः, पलाशकदलीद्रावैरिति पलाशः प्रसिद्धः, तस्य द्रावः स्वनिर्यासः, कदलीद्रावः कदलीकन्दनिर्यासः, वीजको विजयसारो वृक्षविशेषस्तस्य श्र्तेन क्काथेन, नीलिका नीली, अलम्बुषा मुण्डी, बब्बूलफलिका बब्बूलवृक्षस्य फलानीत्यर्थः, नागबला गाङ्गेरुकी, शतावरी, गोक्षुरकौ प्रसिद्धौ, पातालगरुडी छिरहण्टिशब्दवाच्या । अनुपाने वराक्काथं त्रिफलाक्काथम्, छिन्नासत्वं गुडूचीसत्वं । शेषं सुबोधम् ॥२७५–२८९॥

गू०—शुद्धं रसेन्द्रं भागैकं, द्विभागं गन्धकं शुद्धं तयोः कज्जलिकां कृत्वा तत्र तीक्ष्णभवं चूर्णं सर्वतुल्यं कन्याद्रावैर्मर्दयेत्, ततो गोलकं कृत्वा एरण्डपत्रैर्वेष्टयित्वा ताम्रसम्पुटे धान्यराशौ स्थापयेत् ततः कुठारछिन्नाद्यैर्भावयेत् । कुठारछिन्ना, बिसं मृणालं, भृङ्गो भृङ्गराजः, कुरण्टकः पीतवासा, नीलिका अपराजिता, अलम्बुषा मुण्डी, वरी शतावरी ॥ २७५–२८९ ॥

## जैपालशोधनम्—

( जैपालं रहितं त्वगङ्कुररसज्ञाभिर्मलं माहिषे
निक्षिप्तं त्र्यहमुष्णतोयविमलं खल्वे सतासोऽर्दितम्
लिप्तं नूतनखर्परेषु विगतस्नेहं रजःसंनिभं
निम्बूकाम्बुविभावितं च बहुशः शुद्धं गुणाढ्यं भवेत्

## विषशोधनम् ।

विषं तु खण्डशः कृत्वा वस्त्रखण्डेन बन्धयेत् ।
गोमूत्रमध्ये निक्षिप्य स्थापयेदातपे त्र्यहम्॥२९१॥
गोमूत्रं च प्रदातव्यं नूतनं प्रत्यहं बुधैः ।
त्र्यहेऽतीते समुद्धृत्य शोषयेन्मृदु पेषयेत् ॥२९२॥
शुद्धमेवं विषं तच्च योग्यं भवति वार्तिजित् ।
खण्डीकृत्य विषं वस्त्रपरिबद्धं तु दोलया ॥ २९३ ॥
अजापयसि संस्विन्नं यामतः शुद्धिमाप्नुयात् ।
अजादुग्धाभावतस्तु गव्यक्षीरेण शोधयेत्॥२९४॥)

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यमखण्डे रसकल्पना नाम द्वादशोऽध्यायः ।

---

विविधमुनिनिबन्धा ये महत्सु प्रसिद्धाः
सुमतिदुरवबोधास्ते मया नैव दृष्टाः ।
तदपि गुरुसकाशाद्यच्छ्रुतं तल्लेखि
हृदमलभिषजाऽस्यां भावसिंहात्मजेन ॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यमखण्डे संसिद्धरसाध्यायो द्वादशः ॥ १२ ॥

---

इति श्रीकाशीरामवैद्यविरचितायां शार्ङ्गधरगूढार्थदीपिकायां चिकित्सास्थाने रसकर्म नाम द्वादशोऽध्यायः ॥ १२ ॥

---

१. प्रक्षिप्तम् ।

समाप्तोऽयं मध्यमखण्डः ॥

ॐ

# अथ शार्ङ्गधरसंहितायाम्—

## उत्तरखण्डः ।

### अथ स्नेहाध्यायः ।

दी०—अथ उत्तरखण्डं व्याख्यातुं प्रतिजानीते । तत्राऽयं सम्बन्धः मध्यमखण्डान्ते रसायनवाजीकरणार्थं रसा उक्ताः, ते चाविशुद्धशरीरे न स्वकार्यकरणक्षमाः; उक्तं च वाग्भटे—'अविशुद्धे शरीरे हि युक्तो रासायनो विधिः । वाजीकरो वा मलिने वस्त्रे रङ्ग इवाफलः' ( वा. उ. ३९-४ ) इति । 'तस्माच्छरीरशुद्ध्यर्थं पञ्चकर्माणि योजयेत्' । तानि च स्नेहस्वेदाभ्यां विना न संभवन्ति, उक्तं च—'स्नेहस्वेदावनभ्यस्य कुर्यात् संशोधनं तु यः । दारुशुष्कमिवायामे शरीरं तस्य दीर्यते' ( वा. सू. १८-५९ ) इति तस्मात् स्नेहाऽध्यायमेव प्रथमं व्याख्यास्यामः—

#### अथ स्नेहपानविधिः ।

दी०—स्नेहस्य घृतादेः पानस्य विधिर्विधानं, स च विधिश्चरके यथा सप्रश्न उक्तस्तमाह—"सांख्यैः संख्यातसंख्येयैः सहासीनं पुनर्वसुम् । जगद्धितार्थं पप्रच्छ वह्निवेशः स्वसंशयम् ॥ किंयोनयः कति स्नेहाः के च स्नेहगुणाः पृथक् । कालोनुपाने कः कस्य कतिधा च विचारणाः ॥ कति मात्राः कथंमानाः का च केपूपदिश्यते । कश्च केभ्यो हितः स्नेहः प्रकर्षः स्नेहने च कः ॥ स्नेह्याः के केच न स्नेह्याः, स्निग्धाऽतिस्निग्धलक्षणम् । किं पानात्प्रथमं पीते जीर्णे किं च हिताहितम् ॥ के मृदुक्रूरकोष्ठाः का व्यापदः सिद्धयश्च काः । शोधने शमने चैव स्नेहे का वृत्तिरिष्यते ॥ नरेषु केषु विधिना केन योज्या विचारणाः । स्नेहस्याप्यमितज्ञान ! ज्ञानमिच्छामि वेदितुम्" ( च. सू. १३,१-६ ) इति । 'तत्र संख्यानमधीयन्ते विन्दते वा ते सांख्याः, तैः; किंविशिष्टैः ? संख्यातसंख्येयैः, संख्याता संख्या यैस्ते संख्यातसंख्येयाः । ज्ञातज्ञेया इत्यर्थः । तैः सह आसीनं, उत चासंख्यातसंख्येयं सहासीनं पुनर्वसुं इति पाठः । एतदुक्तं भवति—सांख्यैः सहासीनं पुनर्वसुं संख्याविकारकायां कथायां वर्तमानं तत्कालानुरूपं अग्निवेशोऽपि स्वसंशयं पृष्टवान् । द्विकर्मकोऽयम् । तत्र 'कति स्नेहाः ?' एतस्योत्तरमाह—

**स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं तथा वसा ।**
**मज्जा च—**

दी०—स स्नेहः चतुःप्रकारः, घृतादिभेदात् । तत्र घृतं गव्यं श्रेष्ठत्वात्; तैलं तिलस्नेहः; वसा—'शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्तिता' इति । मज्जा इति मज्जा मस्तकमज्जा अस्थिमज्जा वा । तथाच—'स्थूलाऽस्थिषु विशेषेण मज्जा त्वभ्यन्तराश्रिता । अथेतरेषु सर्वेषु सरक्तं मेद उच्यते' इति । तदुक्तं चरके—'तिलाः पियालाभिषुकौ बिभीतकश्चित्राभयैरण्डमधूकसर्षपाः । कुसुम्भबिल्वारुकमूलकातसी निकोचकाक्षोटकरञ्जशिग्रुजाः ॥ स्नेहाशयाः स्थावरजङ्गमास्तथा स्युर्जङ्गमा मत्स्यमृगाः सपक्षिणः । तेषां दधि क्षीरघृतामिषं वसा स्नेहेषु मज्जा च तथोपदिश्यते' इति । अभया हरीतकी, चित्रा दन्ती इति ॥ ( च. सू. १३,८ )

गू०—अथोत्तरखण्डः प्रोच्यते । अथ पञ्चकर्मादौ स्नेहपानं घृतं, तैलं, वसा, मज्जा, इति चतुर्विधः स्नेहः प्रोक्तः कथितः । चतुर्विधस्नेहेषु घृतस्य मुख्यत्वादादावभिधानं, ततस्तैलं तिलसंभूतं, ततो वसा मांसस्नेहः, (ततो) मज्जा, अस्थिमध्यस्नेहः । ननु पञ्चकर्मादौ वमनं तद्यथा—'वमनं रेचनं नस्यं निरूहमनुवासनम् । ज्ञेयं पञ्चविधं कर्म विधानं तस्य कथ्यते' इति । तत्कथं

स्नेहपानमादौ उच्यते ? (सत्यम्, स्नेहपानं विना वमनादिसंशोधनानां हानिकरत्वात् ) पञ्चकर्मादौ स्नेहपानं, ततः स्वेदः, ततो वमनं, ततो रेचनं; अयं विधिः ॥

'कः काल' एतस्य उत्तरमाह—

**तं पिबेन्मर्त्यः किंचिदभ्युदिते रवौ ॥ १ ॥**

दी०—'शीतकाले दिवा स्नेहमुष्णकाले पिबेन्निशि' इति ॥ १ ॥

गू०—तं चतुर्विधं स्नेहं किंचिदभ्युदिते रवौ पिबेत् ॥ १ ॥

'किंयोनयः' एतस्योत्तरमाह—

**स्थावरो जंगमश्चैव द्वियोनिः स्नेह उच्यते ।**

दी०—तत्र स्थावराश्चतुर्विधाः, वनस्पतयः, वृक्षाः, वीरुधः, ओषधय इति । जंगमाः खल्वपि चतुर्विधाः —जरायुजा-ण्डज-स्वेदजो-द्भिज्जाः एतेषां स्वरूपमन्यतो ज्ञातव्यम् । तथाच चरके—'स्नेहानां द्विविधा सौम्य योनिः स्थावरजङ्गमा' ( च. सू. १३,७ ) इति ।

गू०—स्थावरजङ्गमभेदेन स्नेहस्य द्विविधत्वमाह । सुगमम् ॥

वरावरत्वमाह—

**तिलतैलं स्थावरेषु जङ्गमेषु घृतं वरम् ॥ २ ॥**

दी०—तैलघृतयोर्वरत्वं च संस्कारस्यानुवर्तनादिति । उक्तंच—'तैलं संयोगसंस्कारात्सर्वरोगापहं मतं' इति । अत्रैवोदाहरणं चन्दनाद्यं तैलम् । तत् घृतमपि शास्त्रे व्यवहारार्थम् ॥ २ ॥

मिलितस्नेहनामान्याह—

**द्वाभ्यां त्रिभिश्चतुर्भिस्तैर्यमकस्त्रिवृतो महान् ।**

दी०—यो द्वाभ्यां स्नेहाभ्यां मिलितो योगः स यमकः कथितः । यस्त्रिभिः स्नेहैर्मिलितः स त्रिवृतः । यश्चतुर्भिः स्नेहैः संयुतः स महान्कथित इत्यभिप्रायः ।

गू०—यमकादिस्नेहभेदानाह—द्वाभ्यां घृततैलाभ्यां यमकः । त्रिभिर्घृततैलवसाभिस्त्रिवृतः । चतुर्भिर्घृततैलवसामज्जाभिर्महानित्यर्थः ॥

स्नेहसात्म्ये कालावधिमाह—

**पिबेत्त्र्यहं चतुरहं पञ्चाहं षडहं तथा ॥ ३ ॥**

**सप्तरात्रात्परं स्नेहः सात्म्यीभवति सेवितः ।**

दी०—कुत्रचित्स्नेहः सेवितः सन् त्र्यहात्परं सात्म्यीभवति । क्वचित् चतुरहं, पञ्चाहं, षडहं च । साहारपरमिति सप्तदिनं यावत् । इयं अहरादिमर्यादा कोष्ठस्य मृदुमध्यक्रूरता ज्ञेया, परं सप्तरात्रादूर्ध्वं सेवितः सात्मीभवति । सात्मीभूतस्य स्नेहस्य गुणाः वाग्भटे—'सात्मीभूतो हि कुरुते न मलानामुदीरणं' इति । चरके तु—'स्नेहनस्य प्रकर्षौ तु सप्तरात्रत्रिरात्रकौ' ( च. सू. १३,४९ ) इति । वाग्भटे तु—'त्र्यहमच्छं मृदुकोष्ठे क्रूरे सप्तदिनं पिबेत्' इति ( वा. सू. १६,२९ ) इहत्यविरोधः ? मैवं—सर्वेषां विषयभेदात्, मृदु-मृदुतर-मध्य-मध्यतर-क्रूर-क्रूरतरकोष्ठविषयाणि वचनानि ज्ञातव्यानि ॥ ३ ॥

गू०—पिबेत् घृतं त्र्यहं, तैलं चतुरहं, वसा पञ्चाहं, मज्जा षडहं एवं क्रमेण स्नेहः कदा सात्मीभवतीत्याह—स्नेहो घृतादिः सेवितः सप्तरात्रात्परं सात्मीभवति ॥ ३ ॥

अथ स्नेहपानमात्राविषयमाह—

**दोषकालाग्निवयसां बलं दृष्ट्वा प्रयोजयेत् ॥ ४ ॥**

**हीनां च मध्यमां ज्येष्ठां मात्रां स्नेहस्य बुद्धिमान् ।**

दी०—मात्रालक्षणमग्रे वक्ष्यमाणम् । **दोषा**स्त्रिविधाश्चतुर्विधा वा तेषां बलं उत्कृष्ट-मध्या-ल्पादिभेदेन ज्ञेयम् । **कालाः** शीतोष्णवर्षालक्षणास्त्रिविधाः एषां बलं हीनमध्यातिमात्रस्वरूपं, भेषजग्रहणकालं वा । **अग्नि**रपि सम-विषम-मन्द-तीक्ष्णभेदेन चतुर्विधः अस्य बलं पाचकापाचकरूपं । **वयो**ऽपि बाल-मध्यो-त्तरभेदेन त्रिविधं तस्यापि बलं स्वशक्तिसामर्थ्यं । **बुद्धि**मानिति सद्वैद्य इति शेषः । तथाहि—'यथादोषं यथाकालं यथाव्याधि यथाबलं । स्नेहपक्वमपक्वं वा पाकं युञ्ज्याच्चिकित्सकः' इति । दोषादीनपेक्ष्य स्नेहस्य हीनादिमात्रां प्रयोजयेत्, हीनतरामपि प्रयोजयेत् । उक्तञ्च —'हीनमध्योत्तमा मात्रा तास्ताभ्यश्च ह्रसीयसीम् । कल्पयेद्वीक्ष्य दोषादीन् प्रागेव तु कनीयसीम् ॥ ( वा. सू. १६।१७ ) 'अज्ञातकोष्ठे हि बहु कुर्याज्जीवितसंशयं' इति ॥ ४ ॥

गू०—तं दोषादीनां बलं सामर्थ्यं दृष्ट्वा बुद्धिमान्पण्डितः स्नेहस्य हीनां मध्यमां ज्येष्ठां मात्रां प्रयोजयेत् । यस्मिन्दोषे, यस्मिन्काले, यस्मिन्नग्नौ यस्मिन्वयसि यदुचितं तत् देयम् ॥ ४ ॥

अमात्रादिसेवितस्य स्नेहस्य दोषमाह—

**अमात्रया तथाऽकाले मिथ्याहारविहारतः ॥ ५ ॥**

**स्नेहः करोति शोफार्शस्तन्द्रानिद्राविसंज्ञताः ।**

**दी०**—स्नेहोऽमात्रया ( मात्रा ह्रस्वादिपरिमाणास्ताभ्योऽन्यथा ) विषमप्रमाणेन । अकाले असमये । तथा मिथ्याऽहारविहारतो वा सेवितः शोफादीन् करोति । मिथ्याऽहारो यथा—'अकाले चातिसात्म्यं वा असात्म्यं यच्च भोजनम् । विषमाशनं च यद्धुक्तं मिथ्याहारः स कथ्यते' इति । मिथ्याविहारो मलपरित्यागस्त्रीसेवादिषु अन्यथा विहरणम् । विसंज्ञता मूर्च्छाभेदः । ( अस्याग्रे—

**प्रकुर्याल्लङ्घनं तत्र स्वेदं ज्ञात्वा विरेचनम् ॥ ६ ॥**

इति केचित्पठन्ति व्याख्यानयन्ति च ) ॥ ५ ॥ ६ ॥

**गू०**—अमात्रया ग्रहणे दोषमाह—अमात्रया तथाऽकाले तथा मिथ्याऽऽहारतः स्नेहः शोफादीन् करोति ॥ ५ ॥ ६ ॥

**इदानीं स्नेहपानमात्रामाह—**

**देया दीप्ताग्नये मात्रा स्नेहस्य पलसंमिता ।**
**मध्यमाय त्रिकर्षा स्याज्जघन्याय द्विकार्षिकी ॥ ७ ॥**

**दी०**—दीप्ताग्नये इति प्रदीप्तकोष्ठपुरुषायेत्यर्थः । जघन्यसंज्ञादोषविशेषेषु मन्यन्ते तदपि संगतं तन्त्रान्तरदर्शनात् । मात्रा एवं मध्यमाय त्रिकार्षिकी स्यात्, जघन्याय हीनबलानलाय द्विकार्षिकी । एके प्रबलमध्यजघन्यसंज्ञा दोषविषेषु मन्यन्ते तदपि संगतं तन्त्रान्तरदर्शनात् । उक्तं च—'उत्तमस्य पलं मात्रा त्रिभिश्चाक्षैश्च मध्यमा । जघन्यस्य पलार्धेन स्नेहक्वाथौषधेषु च' इति ॥ ७ ॥

**अथ विकल्पान्तरविहितां मात्रां दर्शयन्नाह—**

**अथवा स्नेहमात्राः स्युस्तिस्रोऽन्याः सर्वसंमताः ।**
**अहोरात्रेण महती जीर्यत्यह्नि तु मध्यमा ॥ ८ ॥**
**जीर्यत्यल्पा दिनार्धेन सा विज्ञेया सुखावहा ।**

**गू०**—दीप्ताग्न्यादिषु कीदृशी मात्रा देया तामाह । मध्यमाय मध्यमाग्नये, जघन्याय अल्पाग्नये ॥ ७ ॥

**दी०**—अथवेति प्रकारेण कालभेदेन इत्यर्थः । अन्याः पलादिभ्योऽन्याः विलक्षणाः, वैलक्षण्यत्वादसंमतत्वमित्यत आह—सर्वसंमता इति । चरकवाग्भटादिसंमता । उक्तंच चरके—'अहोरात्रमहः कृत्स्नमर्धाहं च प्रतीक्ष्यते । प्रधाना मध्यमा ह्रस्वा स्नेहमात्रा जरां प्रति । इति तिस्रः समुद्दिष्टाः मात्राः स्नेहस्य मानतः' ( च. सू. १३, २७।२८ ) इति । वाग्भटेऽपि—'द्वाभ्यां चतुर्भिरष्टाभिर्यामैर्जीर्यन्ति याः क्रमात् । ह्रस्वमध्योत्तमा मात्रा' (वा. सू. १६, १७) इति । अहोरात्रेण महती जीर्यतीति । नन्वहोरात्रग्रहणं सहृदयहृदयाह्लादकरं न भवति, कुतः ? अहनि द्वयोर्नाडिकयोरनन्तरं पीतस्य स्नेहस्य परेऽह्नि घटिकाद्वयानन्तरं पाकः सचाहोरात्रग्रहणेनैव गृह्यते । अहोरात्रग्रहणं अष्टौ प्रहरप्रमाणकालपरं ज्ञेयम् । एवं परमचतुरेण वाग्भटेनाष्टौ प्रहरादिप्रमाणमेवोक्तं तद्वदत्राप्यहोरात्रमष्टौ प्रहरपरं ज्ञेयम् । एवमुत्तरत्राऽपि व्याख्येयम् । सेति । सा अल्पा ह्रस्वा सुखावहा ज्ञातव्या । सुखकारिणीत्यर्थः । शीघ्रपाकत्वात् ॥ ८ ॥

**गू०**—अल्पां मात्रामाह—अथवा पक्षान्तरे । अन्यास्तिस्रः स्नेहमात्रा आह—महती अहोरात्रेण पच्यते सा पलप्रमाणा, मध्यमा त्रिकर्षा या सा अह्नि यामचतुष्टयेन जीर्यति, अल्पा द्विकार्षिकी दिनार्धेन यामद्वयेन जीर्यति सा सुखावहा विज्ञेया ॥ ८ ॥

**अल्पादीनां गुणानाह—**

**अल्पा स्याद्दीपनी वृष्या स्वल्पदोषेषु पूजिता ॥ ९ ॥**
**मध्यमा स्नेहनी ज्ञेया बृंहणी भ्रमहारिणी ।**
**ज्येष्ठा कुष्ठविषोन्मादग्रहापस्मारनाशिनी ॥ १० ॥**

**दी०**—अथ तासां विषयमाह—अल्पा मात्रा स्नेहस्य दीपनी भवति अग्निदीप्तिकरीत्यर्थः । वृष्या शुक्रवृद्धिकरी, स्वल्पदोषेषु हीनबलेषु दोषेषु वा पूजिता । कारणे कार्योपचारात् । स्वल्पदोषे स्वल्परोगेषु वा इति स्वल्पनिदानेनाल्पसंचिते । मध्यमा चतुःप्रहरैर्या पाकं प्राप्नोति सा मध्यमा । सा स्नेहनी रूक्षाणां । बृंहणी सर्वधातूनाम् । भ्रमश्चक्रारूढस्येवार्थसंवित्तिः । वस्तुदर्शनम् । ज्येष्ठेति । ज्येष्ठा उत्तमा कुष्ठादिहारिणी भवति । चरके तु ह्रस्वादिमात्राणां विषयगुणाश्चोक्ता यथा—'ये तु वृद्धाश्च बालाश्च सुकुमाराः सुखोचिताः । रिक्तकोष्ठत्वमहितं येषां मन्दाग्नयश्च ये ॥ ज्वरातीसारकासाश्च येषां चिरसमुत्थिताः । स्नेहमात्रां पिबेयुस्ते ह्रस्वां ये चावरा बले ॥ परिहारे सुखा चैषा मात्रा स्नेहनबृंहणी । वृष्या बल्या निराबाधा चिरं चाप्यनुवर्तते ॥' (च. सू. १३,३६–३८) अत्र वृद्धादयः क्लेशासहिष्णुत्वात् ह्रस्वस्नेहमात्रार्हाः । सुखोचिता इति न कुमारविशेषणं किंतु पृथगेव सुखसात्म्या अभिमताः । रिक्तकोष्ठत्वमहितमिति । वातप्रकृतिविकाराणां अहितं

ये चावरा बले अल्पबला इत्यर्थः । परिहारसुखेति व्यायाममुच्चैर्वचनमित्यादिके परिहारे सति सुखमियमा-पद्यते अतो ह्रस्वाऽपि मात्रा परिहारे सति सुखमाद-ध्यात् । तत्र मध्यमोत्तमयोर्नितरां परिहारः कर्तव्यः । इत्येवं 'यतो' निर्देश इति कश्चित् । अन्यस्तु व्याचष्टे —परिहारविषये सुखेयमक्रियमाणापि परिहारे न दोषावहेत्यर्थः । 'प्रभूतस्नेहसात्म्या ये क्षुत्पिपासासहा नराः । पावकश्चोत्तमबलो येषां ये चोत्तमा बले ॥ गुल्मिनः सर्पदष्टाश्च विसर्पोपहताश्च ये । उन्मत्ताः कृच्छ्रमूत्राश्च गाढवर्चस एव च ॥ पिबेयुरुत्तमां मात्रां तस्याः पाने गुणान् शृणु । विकारान् शमयत्येषा शीघ्रं सम्यक् प्रयोजिता । दोषानुकर्षिणी मात्रा सर्वमार्गा-नुसारिणी । बल्या पुनर्नवकरी शरीरेन्द्रियचेतसाम् ॥ इत्युत्तमा। **मध्यमामाह**—'अरुष्कस्फोटपिटिकाकण्डू-पामाभिरर्दिताः । कुष्ठिनश्च प्रमीढाश्च वातशोणितिकाश्च ये । नातिबह्वाशिनश्चैव मृदुकोष्ठास्तथैव च । पिबेयुर्मध्यमां मात्रां मध्यमाश्चापि ये बले ॥ मात्रैषा मन्दविभ्रंशा न चातिबलदायिनी । सुखेन च स्नेहयति शोधनार्थे च युज्यते ॥' इति (च.सू. १३।२९-३५) । अरुंष्येवारुष्या । अरुंषिका शिरोरोगविशेषः । अर्दिताः पीडिताः । प्रमीढा अत्यर्थं प्रमेहपीडिताः । तस्या गुणानाह—मात्रैषा मन्द-विभ्रंशेति । मन्दा अल्पा विभ्रंशाः बलहान्यादयो यस्यां सा । यदा आतुरादिदोषाभावात् विभ्रंशो नोत्पद्यते तदा सुखेन स्नेहयति । शोधनार्थे युज्यते इत्यनेनैतत्क-थयति उत्तमा मात्रा शमनाय । तथाच चरके— 'विकारान् शमयत्येषा शीघ्रं सम्यक् प्रयोजिता' इति । ह्रस्वात् बृंहणार्था । उक्तंच 'मात्रा स्नेहन बृंहणी' इति । (च. सू. १३।३८) । अस्यार्थः—स्नेहनबृंहणकर्मकारिणी इयं भुवनकामानां विरेचनकामानां च प्रयुज्यते । इति मात्राविवरणम् ॥ ९ ॥ १० ॥

**गू०**—सुगमम् ॥ ९ ॥ १० ॥

### अथ दोषविशेषेण स्नेहविषयमाह-

**केवलं पैत्तिके सर्पिर्वातिके लवणान्वितम् ।**
**देयं बहुकफे चापि व्योषक्षारसमन्वितम् ॥ ११ ॥**

**दी०**—केवलं प्रक्षेपरहितं पैत्तिके व्याधौ लवणमत्र सैन्धवं, व्याधिविहितं चान्यदपि लवणं ग्राह्यम् । बहुकफे कफप्राये व्याधौ व्योषादियुतं हितं, व्योषं त्रिकटु, क्षारं यवक्षारादि ॥ ११ ॥

**गू०**—दोषे अनुपानविशेषमाह—केवलमिति । पैत्तिके केवलमनुपानेन रहितम् । वातिके लवणान्वि-तम् । बहुकफे व्योषं त्रिकटु, क्षारो यवक्षारः, तद्यु-तम् । वातं विहाय पित्ताभिधानं घृतस्यादौ गृहीतत्वा-त्पित्तशमकत्वाच्च लवणादयो माषमिता देयाः ॥ ११ ॥

### येषां सर्पिर्दीयते तानाह—

**रूक्षक्षतविषार्तानां वातपित्तविकारिणाम् ।**
**हीनमेधास्मृतीनां च सर्पिष्पानं प्रशस्यते ॥ १२ ॥**

**दी०**—हितं । रूक्षादिभिस्त्रिभिरार्ताः रूक्षं रूक्ष-गुणं धान्यं रूक्षगुणो वायुश्च वातप्रकृतीनामित्येके । क्षतं उरःक्षतं, तेन आर्तः । विषं स्थावरं जङ्गमं च तेन आर्तः पीडितः वातपित्तविकारिणामिति । वात-पित्ते अत्र पृथक् मिलिते वा । तथा हीनमेधास्मृतीना-मिति । मेधा ग्रन्थाकर्षणसामर्थ्यं, स्मृतिः पूर्वानुभूतस्म-रणम् । अनुबन्धात्मिका बुद्धिरिति यावत् । चरके तु— 'वातपित्तप्रकृतयो वातपित्तविकारिणः । चक्षुःकामाः क्षतक्षीणा वृद्धा बालास्तथाऽबलाः ॥ आयुःप्रकर्ष-कामाश्च बलवर्णस्वरार्थिनः । पुष्टिकामाः प्रजाकामाः सौकुमार्यार्थिनश्च ये ॥ दीप्त्योजःस्मृतिमेधाऽग्निबुद्धी-न्द्रियबलार्थिनः । पिबेयुः सर्पिरार्ताश्च दाहशस्त्रविषा-ग्निभिः ॥' (च. सू. १३।३९-४१) इति । दीप्तिः प्रभा । ओजस्तु हृदि तिष्ठति यत् शुद्धं ईषत् लोलितपीतकम् । वाग्भटेऽपि—'तत्र धीस्मृतिमेधाग्निकाङ्क्षिणां शस्यते घृतं' इति (वा.सू. १६।८) । 'मेधाऽग्निरित्यत्र' 'मेधादि-काङ्क्षिणां' इति सम्यक्पाठः । आदिग्रहणात्—'शस्तं धीस्मृतिमेधाग्निबलायुःशुक्रचक्षुषाम् । बालवृद्धप्रजा-कान्तिसौकुमार्यस्वरार्थिनाम् ॥ क्षतक्षीणपरीसर्पशस्त्रा-ग्निग्लपितात्मनाम् । वातपित्तविषोन्मादशोषालक्ष्मीज्व-रापहम् ॥ स्नेहानामुत्तमं शीतं वयसः स्थापनं परम् । सहस्रवीर्यं विधिभिर्घृतं कर्मसहस्रकृत्' इति ॥ १२ ॥

**गू०**—सुगमम् ॥ १२ ॥

### तैलयोग्यानाह—

**कृमिकोष्ठानिलाविद्धाः प्रवृद्धकफमेदसः ।**
**पिबेयुस्तैलसात्म्या ये तैलं दार्ढ्यार्थिनस्तु ये ॥ १३ ॥**

**दी०**—तैलस्य विषयमाह—कृमिकोष्ठानिलाविद्धा-दयस्तैलं पिबेयुः । कृमिकोष्ठाः कोष्ठान्तःकृमयः । अनलाविद्धाः वातव्याधिभिर्व्याप्तशरीराः । दार्ढ्यार्थिनः दृढशरीराकाङ्क्षिणः । तैलं तिलस्नेहः । चरके तु—प्रवृ-

द्धश्लेष्ममेदस्काश्चलस्थूलगलोदराः॥वातव्याधिभिराविष्ठा वातप्रकृतयश्च ये ॥ बलं तनुत्वं लघुतां स्थिरतां दृढगात्रताम् । स्निग्धश्लक्ष्णतनुत्वक्त्वं ये च काङ्क्षन्ति देहिनः ॥ कृमिकोष्ठाः क्रूरकोष्ठास्तथा नाडीभिरर्दिताः । पिबेयुः शीतले काले तैलं तैलोचिताश्च ये' इति (च. सू. १३।४२-४४)। तनुत्वं-कृशत्वं, लघुता-लाघवं, स्थिरता-निश्चलता, दार्ढ्यं-काठिन्यं इति ॥ १३ ॥

**गू०**—कृमयः कोष्ठे येषां ते कृमिकोष्ठाः । अनिलाविष्ठा वायुयुक्ताः प्रवृद्धकफमेदसो दीप्ताग्नयः ये तैलसात्म्यास्ते तैलं पिबेयुः ॥ १३ ॥

### वसायोग्यानाह—

**व्यायामकर्षिताः शुष्करेतोरक्ता महारुजः ।**
**महाग्निमारुतप्राणा वसायोग्या नराः स्मृताः॥१४॥**

**दी०**—अथ वसाविषयमाह—व्यायामेति । एवंविधा नराः पुरुषाः वसायोग्याः । व्यायामेन दुर्बलशरीराः, शुष्कं रेतः शुक्रं, रक्तं रुधिरं च येषां ते तथा। अतएव चरके—'संशुष्करेतोरुधिरा' (च. सू. १३।४५ इत्युक्तम् । महाग्निमारुतप्राणा इति महाग्निस्तीक्ष्णाग्निर्भस्मको वा । महामारुतः बलवान् मारुतः । स चान्योऽन्यसंचारलक्षणैर्ज्ञेयः । उक्तंच चरके—'बलवान् मारुतो येषां खानि चावृत्य तिष्ठति' इति (च. सू. १३।४६) । वाग्भटेऽपि—'वातातपसहेषु च' इति । महाप्राणा महाबलाः । उक्तंच चरके—'महच्चाग्निबलं येषां' इति (च. सू. १३।४७) । अथवा प्राणो वायुः । सुश्रुते च—'अग्निः सोमो वायुः सत्त्वरजस्तमः पञ्चेन्द्रियाणि भूतात्मेति प्राणाः' । क्लेशक्षमत्वं च महाबलेन । अतएवोक्तं वाग्भटे—'रूक्षक्लेशक्षमात्यग्निवातातपसहेषु च' इति ( वा. सू. १६।१० )॥ १४ ॥

**गू०**—एवंभूता नरा वसायोग्या भवन्ति इति योज्यं । किंभूताः ? व्यायामकर्षिताः, व्यायामो मल्लादियुद्धधनुराकर्षणादिः, तत्कर्षिताः । क्षीणाः, शुष्कं क्षीणं रेतो वीर्यं रक्तं च येषां ते शुष्करेतोरक्ताः । पुनः महारुजः व्यथावन्तः । पुनः किंभूताः ? महानग्निर्मारुतो वायुः प्राणाः बलं च येषां ते महाग्निमारुतप्राणाः ॥ १४ ॥

### मज्जायोग्यानाह—

**क्रूराशयाः क्लेशसहा वातार्ता दीप्तवह्नयः ।**
**मज्जानं च पिबेयुस्ते सर्पिर्वा सर्वतो हितम् ॥ १५॥**



**दी०**—मज्जाविषयमाह—क्रूरेति । क्रूराशयाः क्रूरकोष्ठाः, क्लेशसहाः घस्मराः, वातार्ताः वातरोगिणः, दीप्तवह्नयस्तीक्ष्णाग्नयः । मज्जाया अलाभे सर्पिःप्रयोगमाह—सर्पिर्वा सर्वतो हितमिति । सर्वतः सर्वस्नेहविषये सर्वव्याधौ च, सर्पिर्घृतं हितं पथ्यम् । एतच्च मज्जालाभे ज्ञेयम् ॥ १५ ॥

**गू०**—क्रूराशयादिनरा मज्जानं पिबेयुः । क्रूर आशयः कोष्ठो येषां ते क्रूराशयाः । पुनः क्लेशसहाः दुःखसहाः । पुनः वातार्ताः । पुनः दीप्तवह्नयः ॥१५॥

### स्नेहपानकालः ।

**शीतकाले दिवा स्नेहमुष्णकाले पिबेन्निशि ।**
**वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा ॥१६॥**

**दी०**—आत्ययिके व्याधौ स्नेहस्य कालमाह—शीतेति । वातपित्ताधिके इति । अत्र वातस्य योगवाहित्वात् पित्ताधिकश्च गृह्यते । एवं वातश्लेष्माधिक इत्यत्रापि व्याख्येयम् । पित्तश्लेष्माधिकस्तु नोक्तोऽप्यत्र साधारणः शीत एव काले पिबेदिति द्रष्टव्यम् । रात्राविति सायम् ॥ १६ ॥

**गू०**—शीतकालादौ स्नेहः कदा पेय इत्याह—शीतकाले इति । सुगमम् ॥ १६ ॥

### अथ तैलघृतयोर्विशिष्टकर्म दर्शयन्नाह—

**नस्याभ्यञ्जनगण्डूषमूर्धकर्णाक्षितर्पणैः ।**
**तैलं घृतं वा युञ्जीत दृष्ट्वा दोषबलाबलम् ॥ १७ ॥**

**दी०**—दोषशब्दोऽत्र शरीरदूषणाद्दोषाः वातादयः, धातवो रसाद्याः, मलाश्च माह्याः । तेषां बलाबलं दृष्ट्वा सम्यग्विचार्य तैलं घृतं वा यत्र तैलसात्म्यं दोषबलं तत्र तैलमेव युञ्ज्यात् । यत्र घृतसात्म्यं तत्र घृतमेवेति तत्तत्सात्म्यानां तत्तद्युञ्जीत ॥ १७ ॥

**गू०**—नस्यादौ घृतं तैलं वा योज्यं तदाह—नस्येति । नसा पेयं नस्यं, अभ्यञ्जनं मर्दनं, गण्डूषः कवलः, मूर्धा मस्तकं, कर्णं श्रोत्रं, अक्षि नेत्रम् । तत्तर्पणे आप्यायने घृतं वा तैलं वा योज्यम् ॥ १७ ॥

### इदानीं स्नेहानामनुपानान्याह—

**घृते कोष्णं जलं पेयं तैले यूषः प्रशस्यते ।**
**वसामज्ज्ञोः पिबेन्मण्डमनुपानं सुखावहम् ॥ १८॥**

दी०—घृते इति । अनु पश्चात् नियतं पानं अनुपानं घृते कोष्णं जलं पेयम् । तैले यूषमनुपानम् । वसामज्ज्ञोः मण्डमनुपानम् । केचिन्मण्डशब्देनात्र स्रोतोविशोधनत्वात् दधिमण्डमाहुः, तन्न—यतो भक्तमण्डोऽपि मृदूकरोति स्रोतांसि । उक्तंच—'मण्डो वातानुलोमनः, तृड्ग्लानिमेदोदोषघ्नः, पाचनो, धातुसाम्यकृत्' इति । सुखावहमिति । सुखं आवहति करोति तत्सुखावहम्, सम्यक् पाकादिकरणात् । उक्तंच वाग्भटे—'अनुपानं करोत्यूर्जां तृप्तिं व्याप्तिं दृढाङ्गताम् । अन्नसंघातशैथिल्यविक्लित्तिजरणानि च' इति । अन्यच्च—'जीर्णाजीर्णविशङ्कायां पुनरुष्णोदकं पिबेत् । तेनोद्गारे विशुद्धिः स्यात्ततश्च लघुता रुचिः ॥' ( वा. सू. १६।२३ ) इति । एतदुष्णोदकं सामान्येन सर्वस्नेहेऽपि हितम् । उक्तंच—'उष्णोदकानुपानं च स्नेहानामथ शस्यते । ऋते भल्लातकस्नेहात्तत्र तोयं तु शीतलम्' इति ॥ १८ ॥

गू०—घृतपानादौ अनुपानमाह—घृते इति । घृते कोष्णं जलं पेयम् । तैले यूषः । वसामज्जादिषु मण्डं भक्तादिभूतं तदनुपानं, अनुपाने सुखावहम् ॥ १८ ॥

**दी०—साम्नस्नेहस्य विषयमाह—**

**स्नेहद्विषः शिशून्वृद्धान्सुकुमारान् कृशानपि ।**
**उष्णकामानुष्णकाले सह भक्तेन पाययेत् ॥ १९ ॥**

दी०—स्नेहेति । स्नेहद्विषः स्नेहारुचयः 'उष्णकामान्' इत्यत्र 'तृष्णालुकान्' इति पठन्ति केचित् । सहभक्तेनेति । भक्तमोदनः चकारोऽत्र लुप्तोदयः तेन चरकोक्ताश्चतुर्विंशतिस्नेहविचारणा ग्राह्याः, ता यथा—'ओदनश्च विलेपी च रसो मांसं पयो दधि । यवागूः सूपशाके च यूषः काम्बलिकं खडः ॥ शक्तवस्तिलपिष्टं च मद्यं लेहास्तथैव च । भक्ष्यमभ्यञ्जनं बस्तिस्तथैवोत्तरवस्तयः ॥ गण्डूषः कर्णतैलं च नस्यं मूर्धाक्षितर्पणम् । चतुर्विंशतिरित्येताः स्नेहस्य प्रविचारणाः ॥' इति ( च. सू. १३।२१-२३ ) वाग्भटोक्ताश्चतुःषष्टिविचारणाश्चात्रैव ग्राह्याः, ता यथा—'रसभेदैककत्वाभ्यां चतुःषष्टिर्विचारणा' इति । (वा. सू. १६।१५ ) ननु—'अच्छपेयस्तु यः स्नेहो न तामाहुर्विचारणां' (च. सू. ॥ १३।२४ ) इति चरकवचनात्कथं चतुःषष्टिधा इति विरोधः ? मैवं नाद्यः, पेयो विचारणा इत्यस्यायमर्थः—अच्छपेयस्नेहः सा न विचारणा, सात्म्यर्तुव्याध्यादिषु विचारणास्त्येव । उक्तंच चरके—'रसैश्चोपहितः स्नेहः समासव्यासयोगिभिः । षड्भिस्त्रिषष्टिधा संख्या प्राप्नोत्येकश्च केवलः ॥ एवमेताश्चतुःषष्टिस्नेहानां प्रविचारणाः । सात्म्यर्तुव्याधिपुरुषान्प्रयोज्या जानता भवेत्' इति । ( च. सू. १३।२३-२६ ) पुरुषग्रहणेन देशसात्म्यमवरुद्धं, यतो देशमपेक्ष्य पुरुषस्य तत्सात्म्यं, तथा पुरुषग्रहणेन प्रकृतिबलवयःशरीरप्रभृतयोऽवरुद्धा इति ॥ १९ ॥

गू०—येषां स्नेहं पाययेत्तानाह—स्नेह इति । उष्णकाले ग्रीष्मादौ एतान् भक्तेन सह स्नेहं पाययेत् । स्नेहं द्विषन्तीति स्नेहद्विषः तान् अतिप्रीतौ शिशून्, बालान्, वृद्धान्, सुकुमारान्, कृशादीन्, तृष्णातुरांश्चापि ॥ १९ ॥

**गू०—इदानीं स्नेहं विनापि यवाग्वा स्नेहनमाह—**

**सर्पिष्मती बहुतिला यवागूः स्वल्पतण्डुला ।**
**सुखोष्णा सेव्यमाना तु सद्यः स्नेहनकारिणी ॥२०॥**
**शर्कराचूर्णसंसृष्टे दोहनस्थे घृते तु गाम् ।**
**दुग्ध्वा क्षीरं पिबेदुष्णं सद्यःस्नेहनमुच्यते ॥ २१ ॥**

दी०—रूक्षाणां सद्यःस्नेहनयोगद्वयमाह—सर्पिष्मतीति । सर्पिष्मती बहुघृता । सद्य इति तस्मिन्नेव दिवसे त्वरया स्नेहनं करोति । सद्योग्रहणं स्तुतिपरमित्यन्ये त्र्यहेण स्नेहयतीत्यर्थः । अतएवोक्तं सेव्यमानेनेति । अपरमपि–शर्कराचूर्णसंघृष्टे इति । दोहनस्थे दोहनभाण्डे स्थिते घृते । किंभूते ? शर्कराचूर्णसंघृष्टे शर्करामिश्रिते । तद्भाण्डे गां दुग्ध्वा रूक्षः पुरुषः तदुष्णं सद्यः स्वल्पकालेन स्नेहमुच्यते इति ॥ २० ॥ २१ ॥

गू०—सर्पिष्मतीति । एवंभूता यवागूः सद्यः स्नेहनकारिणी भवति । किंभूता ? सर्पिष्मती, पुनः बहुतिला स्वल्पतण्डुला, पुनः सुखोष्णा । क्षीरमपि सद्यः स्नेहनं भवति । तदाह शर्कराचूर्णसंभृष्टे भर्जिते दोहनस्थे गां दुग्ध्वा क्षीरमुष्णं पिबेत् सद्यः स्नेहनं भवति ॥ २० ॥ २१ ॥

**दी०—अथ स्नेहाजीर्णे चिकित्सामाह—**

**मिथ्याचाराद्बहुत्वाद्वा यस्य स्नेहो न जीर्यति ।**
**विष्टभ्य वापि जीर्येत वारिणोष्णेन वामयेत् ॥२२॥**

## स्नेहस्य चतुःषष्टिविचारणाः ।

तदुक्तं चरके—'रसैश्चोपहतः स्नेहः समासव्यासयोगिभिः ।
षड्भिस्त्रिषष्टिधा संख्यां प्राप्नोत्येकश्च केवलः ॥ २५ ॥ (च. सू. १३)

| रसभेदाः । | | |
|---|---|---|
| १ मधुरेण (१) | रसेनोपहतः | स्नेहः । |
| २ अम्लेन (२) | ,, | ,, |
| ३ लवणेन (३) | ,, | ,, |
| ४ तिक्तेन (४) | ,, | ,, |
| ५ कटुकेन (५) | ,, | ,, |
| ६ कषायेण (६) | ,, | ,, |
| द्विरससंयोगेन पञ्चदशभेदा यथा— | | |
| ७ मधुराम्लेन (१) | रसेनोपहतः | स्नेहः |
| ८ मधुरलवणेन (२) | ,, | ,, |
| ९ मधुरतिक्तेन (३) | ,, | ,, |
| १० मधुरकटुकेन (४) | ,, | ,, |
| ११ मधुरकषायेण (५) | ,, | ,, |
| १२ अम्ललवणेन (६) | ,, | ,, |
| १३ अम्लतिक्तेन (७) | ,, | ,, |
| १४ अम्लकटुकेन (८) | ,, | ,, |
| १५ अम्लकषायेण (९) | ,, | ,, |
| १६ लवणतिक्तेन (१०) | ,, | ,, |
| १७ लवणकटुकेन (११) | ,, | ,, |
| १८ लवणकषायेण (१२) | ,, | ,, |
| १९ तिक्तकटुकेन (१३) | ,, | ,, |
| २० तिक्तकषायेण (१४) | ,, | ,, |
| २१ कटुकषायेण (१५) | ,, | ,, |
| त्रिरससंयोगे विंशतिभेदा यथा— | | |
| २२ मधुराम्ललवणेन (१) | रसेनोपहतः | स्नेहः |
| २३ मधुराम्लतिक्तेन (२) | ,, | ,, |
| २४ मधुराम्लकटुना (३) | ,, | ,, |
| २५ मधुराम्लकषायेण (४) | ,, | ,, |
| २६ मधुरलवणतिक्तेन (५) | ,, | ,, |
| २७ मधुरलवणकटुना (६) | ,, | ,, |
| २८ मधुरलवणकषायेण (७) | ,, | ,, |
| २९ मधुरतिक्तकटुकेन (८) | ,, | ,, |
| ३० मधुरकटुकषायेण (९) | ,, | ,, |
| ३१ मधुरतिक्तकषायेण (१०) | ,, | ,, |

| रसभेदाः । | | |
|---|---|---|
| ३२ अम्ललवणतिक्तेन (११) | रसेनोपहतः | स्नेहः |
| ३३ अम्ललवणकटुना (१२) | ,, | ,, |
| ३४ अम्ललवणकषायेण (१३) | ,, | ,, |
| ३५ अम्लतिक्तकटुना (१४) | ,, | ,, |
| ३६ अम्लतिक्तकषायेण (१५) | ,, | ,, |
| ३७ अम्लकटुकषायेण (१६) | ,, | ,, |
| ३८ लवणतिक्तकटुना (१७) | ,, | ,, |
| ३९ लवणतिक्तकषायेण (१८) | ,, | ,, |
| ४० लवणकटुकषायेण (१९) | ,, | ,, |
| ४१ तिक्तकटुकषायेण (२०) | ,, | ,, |
| चतुःसंयोगेन पञ्चदशभेदा यथा— | | |
| ४२ मधुराम्ललवणतिक्तेन (१) | रसेनोपहतः | स्नेहः |
| ४३ मधुराम्ललवणकटुना (२) | ,, | ,, |
| ४४ मधुराम्ललवणकषायेण (३) | ,, | ,, |
| ४५ मधुराम्लतिक्तकटुना (४) | ,, | ,, |
| ४६ मधुराम्लतिक्तकषायेण (५) | ,, | ,, |
| ४७ मधुराम्लकटुकषायेण (६) | ,, | ,, |
| ४८ मधुरलवणतिक्तकटुना (७) | ,, | ,, |
| ४९ मधुरलवणतिक्तकषायेण (८) | ,, | ,, |
| ५० मधुरलवणकटुकषायेण (९) | ,, | ,, |
| ५१ मधुरतिक्तकटुकषायेण (१०) | ,, | ,, |
| ५२ अम्ललवणतिक्तकटुना (११) | ,, | ,, |
| ५३ अम्ललवणतिक्तकषायेण (१२) | ,, | ,, |
| ५४ अम्ललवणकटुकषायेण (१३) | ,, | ,, |
| ५५ अम्लतिक्तकटुकषायेण (१४) | ,, | ,, |
| ५६ लवणतिक्तकटुकषायेण (१५) | ,, | ,, |
| पञ्चरससंयोगे षड्भेदा यथा— | | |
| ५७ मधुराम्ललवणतिक्तकटुना (१) | रसेनोपहतः | स्नेहः |
| ५८ मधुराम्ललवणतिक्तकषायेण (२) | ,, | ,, |
| ५९ मधुराम्ललवणकटुकषायेण (३) | ,, | ,, |
| ६० मधुराम्लतिक्तकटुकषायेण (४) | ,, | ,, |
| ६१ मधुरलवणतिक्तकटुकषायेण (५) | ,, | ,, |
| ६२ अम्ललवणतिक्तकटुकषायेण (६) | ,, | ,, |

दी०—मिथ्येति। मिथ्याचरणादुष्णोदकादीनाम्। अमिथ्याचारस्तु वाग्भटेनोक्तः—'उष्णोदकोपचारी स्याद्ब्रह्मचारी क्षपाशयः। न वेगरोधव्यायामक्रोधशोकहिमातपान्॥ प्रवातयानयानाध्वभाष्याभ्यासनसंस्थितीः। नीचात्युच्चोपधानाहः स्वप्नधूमरजांसि च॥ यान्यहानि पिबेत्तानि तावन्त्यन्यान्यपि त्यजेत्।' इति। (वा. सू. १६।२५–२७) बहुत्वात्समानाधिक्याद्वा। अथवा विष्टभ्य विष्टम्भं कृत्वा जीर्यति तमपि वामयेदित्यर्थः। अस्याग्रे केचित्पठन्ति—'ततः स्नेहं पुनर्दद्यात् लघुकोष्ठाय देहिनः'। अयं पाठो बहुषु पुस्तकेषु न दृश्यते वैद्यसंप्रदाये तु—'ततः स्नेहं पुनर्दद्यात्' इति दिनान्तरे जातबले देयमिति॥ २२॥

गू०—मिथ्याचारादेर्यस्य स्नेहो न जीर्यति तत्प्रतीकारमाह—मिथ्येति। मिथ्याचारान्मिथ्याचरणात्, बहुत्वात्स्नेहाधिक्याद्वा यस्य स्नेहो न जीर्यति विष्टभ्य विष्टम्भं कृत्वा वा जीर्यति तं उष्णवारिणा वामयेत्॥ २२॥

**स्नेहाजीर्णे अन्यदपि प्रतीकारमाह—**

**स्नेहस्याजीर्णशङ्कायां पिबेदुष्णोदकं नरः।**

**तेनोद्गारे भवेच्छुद्धो भक्तं प्रति रुचिस्तथा॥२३॥**

दी०—स्नेहेति। 'स्नेहस्याजीर्णशङ्कायामपि उष्णोदकं पिबेत् किमुत जीर्णे इत्यनेन सर्वास्वप्यवस्थासु उष्णोदकमनुपाने प्रशस्तमित्यभिप्रायः। फलमाह—तेनेति। तेन उष्णोदकेन उद्गारशुद्धिः रुचिश्च भक्तं प्रति जायते, भोजने रुचिर्जायते इत्यपि। तन्त्रान्तरे तु—'स्युः पच्यमाने तृड्दाहभ्रमसादारुचिक्लमाः। परिषिच्याद्भिरुष्णाभिर्जीर्णे स्नेहे ततो नरम्' इति॥ २३॥

गू०—स्नेहेति। सुगमम्॥ २३॥

**स्नेहोपद्रवभूतायास्तृष्णायाश्चिकित्सामाह—**

**स्नेहेन पैत्तिकस्याग्निर्यदा तीक्ष्णतरीकृतः।**
**तदास्योदीरयेत्तृष्णां विषमां तस्य वामयेत्॥ २४॥**
**शीतं जलं पाययेच्च पिपासा तेन शाम्यति।**

दी०—स्नेहेनेति। पैत्तिकस्य पित्तप्रकृतेः पुरुषस्य तीक्ष्णतरीकृत इति अत्यर्थं तीक्ष्णत्वं प्राप्तः। तदा तस्मिन् काले अस्य पुरुषस्य तृष्णां विषमां कठिनां उदीरयेत् उत्पादयेत् तदा वामयेत् उष्णाम्बु पीत्वा स्नेहमिति शेषः। उक्तंच—'स्नेहपीतस्य चेत्तृष्णा पिबेदुष्णोदकं नरः। एवं चानुपशाम्यन्त्यां स्नेहमुष्णाम्बुना वमेत्' (सुश्रु. चि. ३१।२४) इति। उद्धरेत् वामयेदित्यर्थः। 'च' शब्दः प्रकारान्तरे। शीतं जलं पाययेत् तेन हेतुना पिपासा शाम्यति॥ २४॥

गू०—स्नेहं पित्तप्रकोपात् प्रतीकारमाह—स्नेहेनेति। पैत्तिकस्य पित्तप्रधानपुंसः॥ २४॥

**अथ स्नेहाऽयोग्यानाह—**

**अजीर्णी वर्जयेत्स्नेहमुदरी तरुणज्वरी॥ २५॥**
**दुर्बलोऽरोचकी स्थूलो मूर्च्छार्तो मदपीडितः।**
**दत्तबस्तिर्विरक्तश्च वान्तस्तृष्णाश्रमान्वितः॥ २६॥**
**अकालप्रसवा नारी दुर्दिने च विवर्जयेत्।**

दी०—अजीर्णीति। अजीर्णी स्नेहं वर्जयेत् न पिबेत्। तथा जीर्णज्वरी आमज्वरी। दुर्बलो बलहीनः। अरोचकी अरोचकार्तः। स्थूलो मेदुरः। मदपीडितः मदात्ययी। दत्तबस्तिः यस्य बस्तिकर्म कृतम्। विरिक्तः कृतविरेकः कृतवान्तिश्च। तृष्णायुक्तः श्रमयुक्तश्च।

---

एवं षड्रससंयोगे एकः—

६३ मधुराम्ललवणतिक्तकटुकषायेण (१)—
—रसेनोपहतः स्नेहः।
६४ ० ० केवलशुद्धः स्नेहः।

रसाधारपदार्थाश्च—

'क्षीरं सुरा विडं निम्बश्चव्या पथ्या रसाश्रयम्॥ २५॥
द्रव्यं स्वादुरसादीनां षण्णां विद्धि यथाक्रमम्।
द्रव्यं द्रव्यान्तरेणैव योजयेद्धि रसादिषु॥ २६॥
धात्रीफलं शर्करया लवणेनार्द्रकं तथा।
एवमादीनि द्रव्याणि योजयेद्भिषगुत्तमः॥ २७॥
कानिचिद्द्विरसादीनि द्रव्याणि स्युः स्वभावतः।
यथैणः षड्रसः कृष्णो यथा पञ्चरसाऽभया॥ २८॥
मद्यं पञ्चरसो यद्वत्तिलस्तद्वच्चतूरसः।
एरण्डतैलं त्रिरसं माक्षिकं द्विरसं यथा॥ २९॥
घृतमेकं स्वादुरसं मधुरादिविभागतः।
दिङ्मात्रमुदितादेवं शेषमूह्यं मनीषिणा॥ ३०॥''

इत्यरुणदत्तेन वाग्भटे (सू० १०) प्रतिपादिताः। विशेषतश्च सुश्रुतेऽपि।

अकालप्रसवा नारीति । गर्भपातस्रावाभ्यां युक्ता स्त्री । षोडशवर्षादर्वागपि प्रसवोऽकालप्रसव इत्येके । दुर्दिनं मेघच्छन्नेऽह्नि दुर्दिनम् । चकाराद्वाग्भटोक्ताः—'स्नेह्या नत्वतिमन्दाग्नितीक्ष्णाग्निस्थूलदुर्बलाः । ऊरुस्तम्भातिसारामगलरोगगरोदरैः ॥ मूर्च्छाछर्द्यरुचिश्लेष्मतृष्णामद्यैश्च पीडिताः । अपप्रसूता युक्ते च नस्ये बस्तौ विरेचने' इति ( वा. सू. १६।६,७ ) ॥ २५ ॥ २६ ॥

गू०—येषां स्नेहपानं निषिद्धं तानाह—अजीर्णीति । अजीर्णी अजीर्णवान् स्नेहं वर्जयेत्, तथा उदरी उदररोगवान् तरुणज्वरी अरोचकरोगयुक्तः । दुर्दिनं 'मेघच्छन्नेऽह्नि दुर्दिनम् ।' स्पष्टमन्यत् ॥ २५ ॥ ॥ २६ ॥

**येषां स्नेहपानं प्रशस्तं तानाह—**

**स्वेद्यसंशोध्यमद्यस्त्रीव्यायामासक्तमानसाः ॥ २७॥**
**वृद्धा बालाः कृशा रूक्षाः क्षीणास्राः क्षीणरेतसः ।**
**वातार्तास्तिमिरार्ता ये तेषां स्नेहनमुत्तमम् ॥ २८॥**

दी०—स्नेह्यानाह—स्वेद्येति । स्वेद्यादीनां स्नेहनं उत्तमम् । एते स्नेहार्हाः, स्वेद्याः स्वेदार्हाः, संशोध्याः वमनविरेचनार्हाः । मद्यादिषु आसक्तं मानसं चित्तं येषां ते तथा । तथा क्षीणास्राः क्षीणरक्ताः, क्षीणरेतसः क्षीणशुक्राः, वातार्ता इति वातेनार्ताः पीडिताः, तिमिरार्ताः तैमिरिकाः इति ॥ २७ ॥ २८ ॥

गू०—स्वेद्येति । एवंभूता ये तेषां स्नेहपानं उत्तमम् । किंभूताः ? स्वेद्याः स्वेदनार्हाः, शोध्या वमनादिशोधनोचिताः । मद्यस्त्रीव्यायामसक्ताः अनुरक्ताः चिन्तकास्तु चिन्तनपराश्च । क्षीणास्राः क्षीणरक्ताः क्षीणवीर्याः ॥ २७ ॥ २८ ॥

**सम्यक् स्निग्धस्य लक्षणमाह—**

**वातानुलोम्यं दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम् ।**
**मृदुस्निग्धाङ्गता ग्लानिः स्नेहोद्वेगोऽथ लाघवम् २९**
**विमलेन्द्रियता सम्यक् स्निग्धे**

दी०—वातानुलोम्यमिति । सम्यक्स्निग्धे एतानि लक्षणानि भवन्ति । वातानुलोम्यं वातस्य अनुलोमता, अग्निर्जठराग्निर्दीप्तः । वर्चः पुरीषं स्निग्धं चिक्कणं असंहतं शिथिलं मृदुस्निग्धाङ्गता च भवति । ग्लानिरोजःक्षयः स्नेहोद्वेगः स्नेहपाने द्वेषः, लाघवं शरीरलघुता । विमलेन्द्रियतेति—चक्षुरादीन्द्रियाणां विमलत्वं स्वस्वविषयग्रहणसामर्थ्यम् । एतैर्लक्षणैः सम्यक्स्निग्धो ज्ञेयः ॥ २९ ॥

गू०—स्नेहे पीते सम्यक्स्निग्धलक्षणमाह—वातानुलोम्यमिति । सम्यक्स्निग्धे वातानुलोम्यादिलक्षणं भवति । वातानुलोम्यं वातस्य सम्यक्प्रवृत्तिः, अग्निर्दीप्तः, वर्चः पुरीषं, स्निग्धः सचिक्कणं, असंहतं अमिलितम् । मृद्वङ्गता कोमलाङ्गता, स्निग्धाङ्गता सचिक्कणाङ्गता, अग्लानिः अक्लमः, स्नेहावेगः स्नेहोपद्रवाभावः । लाघवं देहस्य, विमलेन्द्रियता निर्मलेन्द्रियता ॥ २९ ॥

**रूक्षे लक्षणमाह—**

**—रूक्षे विपर्ययः ।**

दी०—रूक्षे विपर्ययश्च भवति । स चास्निग्धलक्षणस्य । उक्तंच चरके—'पुरीषं ग्रथितं रूक्षं वायुरप्रगुणो मृदुः । पक्ता खरत्वं रौक्ष्यं च गात्रस्यास्निग्धलक्षणम्' इति । (च. सू. १३।५५) वायुरत्र गुणः मृदुः पक्ता अग्निमान्द्यम् । अन्यत्राप्युक्तं—'रूक्षे पुरीषं ग्रथितं पक्वान्नं न विपच्यते । उरो विदह्यते वायुः कोष्ठादुपरि धावति ॥ निर्बलो दुर्बलश्चापि रूक्षो भवति मानवः' इति ॥

गू०—रूक्षे तु एतद्विपर्ययः ॥

**अतिस्निग्धलक्षणमाह—**

**भक्तद्वेषो मुखस्रावो गुदे दाहः प्रवाहिका ॥३०॥**
**तन्द्रातीसारपाण्डुत्वं भृशं स्निग्धस्य लक्षणम् ।**

दी०—भक्तद्वेष इति । भृशस्निग्धस्यातिस्निग्धस्य भक्तद्वेषादिलक्षणम् । तत्र भक्तद्वेषो भोजनानाकाङ्क्षा । मुखस्रावः हृल्लासः, गुदे दाहः । 'गुदे पाकः' इति पाठः । प्रवाहिका अतीसारभेदः । तन्द्रा प्राग् व्याख्याता । अतीसरणमतीसारः । पाण्डुत्वं शरीरस्य । चरके तु—'पाण्डुता गौरवं जाड्यं पुरीषस्याविपक्वता । अत्युत्क्लेशोऽरुचिस्तन्द्री स्यादतिस्निग्धलक्षणम्' इति । (च. सू. १३।५७) सदनं अङ्गानां जाड्यं जडीभावः कायस्य, पुरीषस्याविपाकताऽसमता, अत्युत्क्लेशो हृल्लासः, निद्रार्तस्य विषयाग्रहणं तन्द्रीति ॥ ३० ॥

गू०—अतिस्निग्धपाने लक्षणमाह—भक्तेति । भृशं स्निग्धस्य अतिस्नेहपीतस्य, इदं भक्तद्वेषादिलक्षणं भवतीति योज्यम् । भक्ते द्वेषः भक्तारुचिः, मुखस्रावः

मुखस्यासमन्तात् स्रावः लालास्रवणं, गुदे दाहः। प्रवाहिका अतीसारभेदः, तन्द्रा ईषन्मुद्रितनेत्रत्वं, अतीसरणं, पाण्डुत्वं पीतवर्णता ॥ ३० ॥

**दी०—अथ हीनातिस्निग्धस्योपक्रममाह—**

**रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य रूक्षणम् ॥ ३१ ॥**

**दी०**—रूक्षस्येति। रूक्षस्य पुरुषस्य स्नेहैः सद्यःस्नेहनकारिभिस्तैलघृतादिभिः स्नेहनं कार्यं, अतिस्निग्धस्य रूक्षणं कार्यम् ॥ ३१ ॥

**गू०**—रूक्षस्य स्निग्धरूक्षणमिति। प्रतीकारमाह—रूक्षस्य स्नेहनैः स्नेहनम्। अतिस्निग्धस्य रूक्षणै रूक्षणम् ॥ ३१ ॥

**दी०—रूक्षयोगमाह—**

**श्यामाकचणकाद्यैश्च तक्रपिण्याकसक्तुभिः।**

**दी०**—श्यामकेति। श्यामाकादिभी रूक्षणं कार्यम्। आदिग्रहणात् वाग्भटोक्तं सर्वं ग्राह्यम्। यथा—'क्षुत्तृष्णोल्लेखनस्वेदरूक्षपानान्नभेषजम्। तक्रारिष्टखलोद्दालयवश्यामाककोद्रवम् ॥ पिप्पली त्रिफला क्षौद्रं पथ्या गोमूत्रगुग्गुलुः। यथास्वं प्रतिरोगं च स्नेहव्यापदि साधनम्' इति ॥ केचित् 'श्यामाकचणकाद्यैः' इत्यत्र 'श्यामाककोरदूषाद्यैः' इति पठन्ति। पिण्याकं निःस्नेहतिलकल्कम् ॥

**गू०**—कैः? तक्रपिण्याकाद्यैः स्नेहनम्। श्यामाकचणकाद्यै रूक्षै रूक्षणम्। श्यामाकः धान्यविशेषः। (साव) पिण्याकस्तिलकल्कः ॥

**दी०—अथ स्नेहसेविनो लक्षणमाह—**

**दीप्ताग्निः शुद्धकोष्ठश्च पुष्टधातुर्दृढेन्द्रियः ॥ ३२ ॥**
**निर्जरो बलवर्णाढ्यः स्नेहसेवी भवेन्नरः।**

**दी०**—दीप्तेति। स्नेहसेवी नरः दीप्ताग्निः स्यात्। अग्निरत्र जठराग्निः। शुद्धकोष्ठ इति मध्यकोष्ठक्रूरकोष्ठादिरहितः। पुष्टधातुः रसादिपुष्टधातुः। दृढेन्द्रियः चक्षुरादीन्द्रियबलयुक्तः। निर्जरः, बलवर्णाढ्यः, वर्णाढ्यश्च, सुरूपश्च। वाग्भटे तु—'दीप्तान्तराग्निः परिशुद्धकोष्ठः प्रत्यग्रधातुर्बलवर्णयुक्तः। दृढेन्द्रियो मन्दजरः शतायुः स्नेहोपसेवी पुरुषः प्रदिष्टः' इति (वा. सू. १६।४६) ॥ ३२ ॥

**गू०**—स्नेहसेवी यादृशो भवति तादृशमाह—दीप्तेति। निर्जरः जरारहितः। बलवर्णयुक्तः। स्पष्टमन्यत् ॥ ३२ ॥

**दी०—स्नेहसेवायां वर्ज्यान्याह—**

**स्नेहे व्यायामसंशीतवेगाघातप्रजागरान् ॥ ३३ ॥**
**दिवास्वप्नमभिष्यन्दि रूक्षान्नं च विवर्जयेत्।**

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण प्रणीतायां शार्ङ्गधरसंहितायामुत्तरखण्डे स्नेहविधिर्नाम प्रथमोऽध्यायः ॥ १ ॥

---

**दी०**—स्नेहे स्नेहपाने। व्यायामं शरीरायासजननकर्म। संशीतमिति अत्यर्थशीतवातादिकं। वेगाघातमिति वेगानां मूत्रपुरीषोत्सर्गेच्छानां आघातं अवरोधं वेगधारणमित्यर्थः। प्रजागरमिति रात्रिजागरणं। अभिष्यन्दि श्लेष्मप्रकोपि दध्यादिकमित्यर्थः। रूक्षान्नमिति श्यामाकचणकादिकम्। एतच्च सामान्यस्नेहपानविषये यत्र च अतिस्निग्धता भवति तत्र रूक्षान्नं विहितमेव। तत्पूर्वमेव ॥ ३३ ॥

इति श्रीवास्तव्यान्वयभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायामुत्तरखण्डे स्नेहपानाध्यायः प्रथमः ॥ १ ॥

---

**गू०**—स्नेहपाने यन्निषिद्धं तदाह—स्नेहे इति। स्नेहे स्नेहपाने, व्यायामादीन् विवर्जयेत्। संशीतं अतिशीतलं, वेगाघातं वातमूत्रपुरीषादिरोधम्। दिवास्वप्नमभिष्यन्दिविरोधि। रूक्षान्नं चणकादि। स्पष्टमन्यत् ॥ ३३ ॥

इति श्रीकाशिरामवैद्यविरचितायां गूढार्थदीपिकायामुत्तरखण्डे पञ्चकर्मणि स्नेहपानं प्रथमोऽध्यायः ॥ १ ॥

---

## द्वितीयोऽध्यायः।

**दी०**—अथ स्नेहाध्यायानन्तरं स्वेदविधिं व्याख्यातुं प्रतिजानीते—

### अथ स्वेदविधिः।

**दी०**—अथशब्द आनन्तर्ये। स्नेहविधिकथनानन्तरं स्वेदविधिः। स्वेदस्य विधिर्विधानम्। उक्तंच प्राक्—'स्नेहस्वेदावनभ्यस्य कुर्यात् संशोधनं तु यः। दारुशुष्कमिवानामे शरीरं तस्य दीर्यते' इति। चरके-

ऽपि 'स्नेहपूर्वप्रयुक्तेन स्वेदमावर्जितेऽनिले । पुरीषमूत्ररेतांसि न सज्जन्ति कदाचन' इति । वाग्भटेऽपि—'शुष्काण्यपि हि काष्ठानि स्नेहस्वेदोपपादनैः । शक्यं कर्मण्यतां नेतुं किमु गात्राणि जीवताम्' इति । तेन युक्तं स्नेहानन्तरं स्वेदाऽभिधानम् ।

गू०—स्नेहपानानन्तरं स्वेदस्य विहितत्वात् ॥

**दी०—तत्र तावत्पूर्वं स्वेदसंख्यामाह—**

**स्वेदश्चतुर्विधः प्रोक्तस्तापोष्मस्वेदसंज्ञकौ ।**
**उपनाहो द्रवः स्वेदः सर्वे वातार्तिहारिणः ॥ १ ॥**
**स्वेदौ तापोष्मजौ प्रायः श्लेष्मघ्नौ समुदीरितौ ।**
**उपनाहस्तु वातघ्नः पित्तसङ्गे द्रवो हितः ॥ २ ॥**

दी०—स्वेद इति । स्विद्यतेऽनेनेति व्युत्पत्त्या स्वेदोऽग्निः, तस्य विधिः कर्मचातुरी । चतुर्विधत्वमाह—एकस्तापसंज्ञः स्वेदः। द्वितीयस्तूष्मासंज्ञः। तृतीय उपनाहः उपनाहो निबन्धनमिति प्रलेपेन । अस्य भेदः साल्वण इति । चतुर्थो द्रवस्वेद इति । एतेषां लक्षणं बोद्धव्यं अन्यत्राप्युक्तं च 'क्षामःसैकतपार्ष्णिकास्त्रवसनैः स्वेदोऽथवांगारकैर्लैप्यैर्वातहरैः सहाम्ललवणैः स्नेहैः सुखोष्मैर्भवेत् । एवं तप्तपयोम्बुवातशमनक्वाथादिसेकादिभिस्तप्तैस्तोयनिषेचनाहतमहाबाष्पैः सिताद्यैः क्रमा'दिति । एष्वेव चतुर्षु यथाक्रमं चरकोक्तसंकरस्वेदाद्यवरोधः। शंकरादिस्वेदा यथा 'शंकरः प्रस्तरो नाडी परिषेकोऽवगाहनं । जेन्ताकोऽश्मघनः कर्षूः कुटी भूः कुम्भिरेव च । कूपो होलक इत्येते स्वेदयन्ति त्रयोदश इति[१]' । पित्तसंगे द्रवो हित इति । पित्तयुक्ते वाते द्रवस्वेदो हितः पित्तसंगेऽत्र स्वेदसंघातो विहितः । वातकफयोरेवं स्वेदसंकरः । यदुक्तं चरके—'वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यत' इति । अन्ये पित्तसंसर्गे वाते द्रवस्वेदः ।

---

१–शंकरः सुखकरः । तस्याभिधानमग्रे प्रशस्तत्वात् । एतेषां स्वेदानां वैद्यानां विज्ञानार्थं स्वरूपमुक्तं चरके—'तत्र वस्त्रान्तरितैः पिण्डैर्यथोक्तैरुपस्वेदनं शङ्करस्वेद' इति । तस्योष्मस्वेदेऽन्तर्भावः । वस्त्रान्तरितत्वमवस्त्रान्तरितत्वञ्च सुकुमारासुकुमारविषयं ज्ञेयम् ॥ प्रस्तरमाह—'शूक-शिम्बि-धान्य-पुलाकानां, वेशवार-पायस-कृशरो-त्करिकादीनां वा प्रस्तरे कौशेया-ऽविकोत्तरप्रच्छदे वा, पञ्चाङ्गुलोरुबुकादीनां वा, कौशेयाविकोत्तराकपत्रप्रच्छदे वा स्वभ्यक्तगात्रस्य शयानस्योपस्वेदनं प्रस्तरस्वेदनं इति विद्यात्' । अयं चोष्मस्वेद एव । शूक-शिम्बि-धान्य-पुलाकानामिति भावः । अन्यत्राऽप्युक्तं—'पुलाकमत्रमेतावद्द्रव्याणामिह पट्शतम् । स्वबुध्यैव सहस्राणि कोटीर्वा संप्रकल्पयेत्' इति । अथवा 'पुलाक-' शब्दः स्विन्नवचनः, शूकशिम्बिधान्यानां स्विन्नानां प्रस्तरे इत्यर्थः । अन्ये तु पुलाका गवेधुकाकारा देशान्तरे प्रसिद्धाः । इति व्याख्यानयन्ति । तदयुक्तं शूकशिम्बिधान्येष्वेवान्तर्भावात् । तासां च न स्वेदयत्तायोग्यता प्रतिपत्तुं शक्या, दोषविशेषाहरणात् । कौशेयाविकोत्तरप्रच्छन्नदेशे-कौशेयाविकाभ्यां वा उपरि प्रच्छन्ने प्रस्तरे इत्यर्थः । उत्तरच्छदग्रहणादधस्तादपि प्रच्छदोऽस्तीति गम्यते । इति प्रस्तरस्वेदः ॥ २ ॥

नाडीस्वेदमाह—'स्वेदनद्रव्याणां पूर्वोक्तानां मूलपत्रफलभङ्गादीनां मृगशकुनिपिशितशिरसादीनां उष्णस्वभावानां यथाऽम्ललवणं स्नेहोपहितानां मूत्रादीनां कुम्भ्यां वोष्ममनुधमन्त्यामुत्क्वथितानां नाड्या वंशदलकरआर्कपत्राणामन्यतमकृतया गजाग्रहस्तसंस्थानया व्यायामदीर्घया व्यायामार्धदीर्घया वा व्यायामचतुर्भागाष्टभागमूलाग्रपरिणाहस्रोतसा सर्वतो वातहरपत्रसंवृतच्छिद्रया द्विस्त्रिर्वा विनमितया वातहरस्नेहाभ्यक्तगात्रस्य वोष्ममुपाहरेत्, बाष्पोऽह्यनृजुगामी विहितचण्डवेगस्त्वचमविदहन् सुखं स्वेदयतीति नाडीस्वेदः' ॥ भङ्गाः पल्लवाः । व्यायामचतुर्भागाष्टभागमूलाग्रपरिणाहस्रोतसेति । व्यायामदीर्घया व्यायामार्धदीर्घया चेति । प्रमाणनियमे को हेतुः ? ब्रूमः—व्याध्यातुरबलापेक्षया, उत्तमबलव्याधावातुरे च व्यायामदीर्घा कर्तव्या, मध्यबलं हि व्याधिमातुरं चावेक्ष्यमाणेन व्यायामार्धदीर्घया दूरगत्वेन विहितचण्डवेगता भावयेत् इति । इति नाडीस्वेदः बाष्पस्वेदेऽन्तर्भूतः ॥ ३ ॥

परिषेकस्वेदमाह—'वातिकोत्तरवातिकानां पुनर्मूलफलादीनामुत्क्वाथैः सुखोष्णैः कुम्भीर्वर्षणिकाः प्रणाडीर्वा पूरयित्वा यथार्थस्विन्नस्नेहाभ्यक्तगात्रवस्त्रावच्छन्नं परिषेचयेत् इति परिषेकस्वेदः' द्रवस्वेदेऽन्तर्भूतः । इति परिषेकस्वेदः ॥ ४ ॥

अवगाहस्वेदमाह—'वातहरोत्क्वाथक्षीरघृतपिशितरसोनसलिलकोष्ठकावगाहस्तु यथोक्त एवावगाहो ज्ञेयः' । उत्क्वाथैरिति उत्कृष्टक्वाथैरित्यर्थः । द्रव्याच्चतुर्गुणं जलं दत्वा चतुर्भागावशिष्टः कृत उत्कृष्टः क्वाथो भवति अयं द्रवस्वेदः । इत्यवगाहस्वेदः ॥ ५ ॥

जेन्ताकस्वेदमाह—अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत—

तत्र पूर्वस्यां दिशि उत्तरस्यां वा गुणवति प्रशस्तभूमिभागे देशे कृष्णमृत्तिके सुवर्णवर्णमृत्तिके वा नदीपरिवापः वापीपुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा सुतीर्थे समविभक्तभूमिभागदेशे सप्ताष्टौ वाऽरत्नीः परिक्रमोदकान् प्राङ्मुखोदङ्मुखं वाऽभिमुखतीर्थं वा कूटाऽगारं कारयेत् । उत्सेधविस्तारसम्पन्नं अनेकवातायनमस्य कूटागारस्यान्तः समन्ततोऽभिविस्तारोत्सेधां पिण्डिकां कारयेत् आकपाटात् । मध्ये चास्य कूटागारस्य चतुःकिष्कुमात्रं द्विपुरुषप्रमाणं मृण्मयं कन्दुकसंस्थानं बहुसूक्ष्मछिद्रमङ्गारकोष्टकस्तम्भं सपिधानं कारयेत् । तं च खादिराणामाश्वकर्णिकानां वा काष्ठानां पूरयित्वा दीपयेत् । स यदा जानीयात् दग्धानि काष्ठानि विगतधूमानि अवतप्तं केवलमग्निना तदग्निगृहं स्वेदयोग्येन चोष्मणा युक्तमिति । तत्र चैनं वातहराभ्यङ्गाभ्यक्तगात्रं वस्त्राच्छन्नं प्रवेशयेत् । प्रवेशयंश्चानुशिष्येत्—'सौम्य ! प्रविशारोग्यकल्याणाय वा' इति । प्रविश्य चैनां पिण्डिकामधिरुह्य पार्श्वाभ्यां यथासुखं शयीथाः । नच ते स्वेदमूर्च्छापरीतेनाऽपि सता पिण्डिकैषा प्रयोक्तव्या आप्राणोच्छ्वासात् । भ्रश्यमानो हि यतः पिण्डिकावकाशात् द्वारमवाधिं गच्छन् स्वेदमूर्च्छापरीततया सद्यः प्राणान् जह्यात्, तस्मात् पिण्डिकां न कथंचन मुञ्चेथाः । स यदा जानीयाद्विगताभिष्यन्दमात्मानं सम्यक् प्रस्रुतस्वेदपिच्छं सर्वस्रोतोविनिर्मुक्तं लघुभूतमपगतं विबन्धस्तम्भगौरवसुप्तिवेदनमिति । ततस्तां पिटिकामनुसरन् द्वारं प्रपद्येत निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीतोदकमनुप्रविशेत् । व्यपगतसंतापक्लमः सुमुहूर्तात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽश्नीयात्' इति जेन्ताकः । अयं चागारकोष्ठकस्तम्भो जेन्ताक उच्यते 'भूगृहेषु स जेन्ताकेषु' इति वचनात् । तं खादिराणामाश्वकर्णिकानां वा काष्ठानां पूरयित्वा दीपयेत् । इति जेन्ताकस्वेदः स ऊष्मस्वेदान्तर्भूतः । इति जेन्ताकस्वेदः ॥ ६ ॥

अथाश्मघनस्वेदमाह—'शयनस्य प्रमाणेनाऽश्ममयीं शिलां तापयित्वाऽनिलघ्नैस्तु दारुभिः सम्प्रदीपितैः व्यपोह्य सर्वानङ्गारान् प्रोक्ष्य चोष्णवारिणा शिलामथ कुर्वीत कौशेयाऽविकसंस्तराम्, कौशेयप्रावाराद्यैः सुसंवृतः इत्युक्तोऽश्मघनस्वेदः' इति ॥

घनां स्थूलां । ननु शिला या साऽश्ममय्येव पुनरश्ममयीमिति विशेषणमनर्थकम् ? उच्यते—सन्त्यर्थान्तराणि काठिन्ये वर्तते इति । कौचवो मृगरोममयीरल्लिका, अजिनं कृष्णमृगचर्म, कौशेयं त्रशरं प्रावारः पट्टिका आदिग्रहणात्कम्बलोर्णादीनां ग्रहणम् । इति अश्मघनस्वेदः, तापस्वेदेऽन्तर्भूतः । इत्यश्मघनस्वेदः ॥ ७ ॥

अथ कर्षूस्वेदः प्रचक्ष्यते—'खानयेच्छयनस्याधः कर्षूं स्थानविभागवित् । दीप्तैर्विधूमैरङ्गारैस्तां कर्षूं पूरयेन्नरः ॥ तत्रोपरिष्टाच्छयने स्वपन् स्विद्यति ना सुखम्' इति कर्षूस्वेद ऊष्मस्वेदभेदः । इति कर्षूस्वेदः ॥ ८ ॥

अथ कुटीस्वेदमाह—'अनत्युत्सेधविस्तारां वृत्ताकारामलोचनाम् । घनभित्तिं कुटिं कृत्वा कुष्ठाद्यैः संप्रलेपयेत् । कुटीमध्ये भिषक् शय्यां स्वास्तीर्णां चोपकल्पयेत् । प्रावाराजिनकौशेयकुथकम्बलगौणकैः ॥ हसन्तिकाभिरङ्गारपूर्णाभिस्तां च सर्वतः । आरोहेत परीवार्याभ्यक्तः स्विद्यति ना सुखम्' इति ॥ परिवार्य परिवेष्ट्य । इति कुटीस्वेदे स्वेदभेदः । इति कुटीस्वेदः ॥ ९ ॥

भूस्वेदमाह—'य एवाश्मघनस्वेदे विधिर्भूमौ स एव तु । प्रशस्तायां निवातायां समायामुपदिश्यते' इति । अयमप्युष्णस्वेदभेदः । इति भूस्वेदः ॥ १० ॥

अथ कुम्भीस्वेदमाह—कुम्भीं वातहरकाथपूर्णां भूमौ निखानयेत् । अर्धमात्रं त्रिभागं वा शयनं तत्र चोपरि ॥ स्थापयेदासनं वाऽपि नातिसान्द्रपरिच्छदम् । अथ कुंभ्यां भिषक् दद्यात्सुतप्तानायसो गुडान् ॥ पाषाणान् वोष्मणा तेन तत्स्थः स्विद्यति ना सुखम् । सुवृत्ताङ्गः स्वभ्यक्तः स्नेहैरनिलनाशनैः ॥ अथवाप्यूष्मणा तेन तत्स्थः स्विद्यति पूर्ववत्' इति । अयमप्यूष्मस्वेदान्तर्भूतः । इति कुम्भीस्वेदः ॥ ११ ॥

कूपस्वेदमाह—'कूपं शयनविस्तारं द्विगुणं चापि वेधतः । देशे निवाते शस्ते च सुमृष्टं कारयेत्ततः ॥ हस्त्यश्वगोखरोष्ट्राणां करीषैर्दग्धपूरितम्' इति कूपस्वेदः । अयं चोष्मस्वेदभेद एव कूपस्वेदः ॥ १२ ॥

अथ होलाकस्वेदमाह—'धीतिकां तु करीषाणां यथोक्तानां प्रदीपयेत् । शयनान्तः प्रमाणेन शय्यामुपरि तत्र च ॥ सुदग्धायां विधूमायां यथोक्तामुपकल्पयेत् । स्ववच्छन्नां स्वयं तस्यां स्वोक्तः स्विद्यति मानवः ॥ होलाकस्वेद इत्येष सुखः प्रोक्तो महर्षिणा' इति । धीतिका कुमारिका होलासंज्ञितः स्वेदः होलास्वेदः । इति होलाकस्वेदः । इति चरकोक्तास्त्रयोदशस्वेदास्ते चतुर्षु स्वेदादिष्वन्तर्भूताः ।' रु०

सद्योष्णत्वात् प्रबलौ वातकफौ हन्ति । हीनपित्तं तु द्रवत्वेन सौक्ष्म्यत्वात्। वाग्भटेऽपि—'स्वेदस्तापोपनाहोष्मद्रवभेदाश्चतुर्विधाः' इति ॥ १ ॥ २ ॥

गू०—स्वेदश्चतुर्विधः प्रोक्तः कथितः। चतुर्विधत्वमाह—तापोष्मौ एतौ द्वौ स्वेदसंज्ञितौ भवतः। उपनाहो द्रवश्च एतौ द्वौ, एवं चत्वारः सर्वतो वातहराः वातहारिणो भवन्ति। चतुर्विधस्वेदस्य वातनाशकत्वेऽपि विशेषमाह—स्वेदाविति । तापोष्मजौ स्वेदौ श्लेष्मघ्नौ समुदीरितौ कथितौ । उपनाहः स्वेदः वातघ्नः पित्तसंयोगे द्रवो द्रवः स्वेदमतिपित्तसङ्गे वा तौ। तथाच सुश्रुतः—'तत्र तापोष्मस्वेदौ विशेषतः श्लेष्मघ्नौ, उपनाहस्वेदो वातघ्नः । अन्यतरस्मिन् पित्तसंसृष्टे द्रवस्वेदः' इति । अन्यतरसंसृष्टे वातमिश्रिते पित्ते द्रवः स्वेदोऽभिहितः इति सुश्रुताऽभिप्रायः। केवलपित्ते तु सर्व एव स्वेदा निषिद्धाः। किंतु शीतलजलावगाह एव प्रशस्तः। तथा चोक्तं—'परिषेकावगाहेषु व्यञ्जनानां च सेवनम्। शस्यते शिशिरं तोयं तृष्णापित्तोष्मशान्तये' इति ॥ १ ॥ २ ॥

### अथ त्रिविधस्वेदस्य विशेषमाह—

**महाबले महाव्याधौ शीते स्वेदो महान्स्मृतः ।**
**दुर्बले दुर्बलः स्वेदो मध्ये मध्यतमो मतः ॥ ३ ॥**

दी०—महाबलपुरुषे महाव्याधौ च कफोल्बणवातविकारादौ। शीते शीतले शीतार्दितपुरुषे वा महान् स्वेदो विहितः । दुर्बले पुरुषे पित्तप्राये वा दुर्बलः स्वेदो द्रवप्रायो विहितः । मध्ये मध्यमबलपुरुषे वातप्राये वा मध्यः मध्यमः स्वेद उपनाहप्रायो विहितः। तथाचोक्तं-'तापोपनाहद्रवबाष्पपूर्वाः स्वेदास्ततोऽन्त्यः प्रथमौ कफे स्तः। वायौ द्वितीयः पवनं कफे च पित्तोपसृष्टे विहितस्तृतीयः' इति ॥ ३ ॥

### अथ दोषविशेषेण स्वेदविशेषमाह—

**बलासे रूक्षणस्वेदो रूक्षस्निग्धं कफानिले ।**
**कफमेदोवृते वाते कोष्णं गेहं रवेः करान् ॥ ४ ॥**
**नियुद्धं मार्गगमनं गुरुप्रावरणं क्षुधः ।**
**चिन्ताव्यायामभारांश्च सेवेतामयमुक्तये ॥ ५ ॥**

दी०—बलासे कफे। रूक्षस्वेदं वालुकावस्त्रकपालांगारादिनिमित्तं। कफानिले इति कफानिलसंसर्गे रूक्षस्निग्धमिति। तच्च शाल्वणप्रभृतिकं। कफमेदोवृते वाते इति। मेदो हि सर्वशरीराणामुदरस्थं अण्वस्थिषु च। तथाहि 'स्थूलास्थिषु विशेषेण मज्जात्वभ्यन्तरस्थिता। अथेतरेषु सर्वेषु सरक्तं मेद उच्यते' इति । अनेन सकफेनावृते वायौ कोष्णगेहादिकं कुर्यादित्यभिप्रायः। कोष्णगेहमङ्गारादिभिः संतप्तमित्यर्थः। रवेः करान् सूर्यकिरणान्। नियुद्धं बाहुयुद्धं। गुरुप्रावरणमिति प्रवराजिनकौशेयप्रवेणीकुथकप्रभृतिकं। क्रुद्धं कोपं पित्तजनकं चिन्ताचित्तभ्रांतिकरं विधानं मेदोनाशकरत्वात्। व्यायाममिति शरीरायासजननं। नियुद्धादिव्यतिरिक्तं कर्म एतान् आमयमुक्तये कफमेदोवृतवातजनितरोगशान्त्यै सेवेत आतुर इति शेषः । चिन्तास्थाने भयमिति केचित्। तेनापि मनःसंतापत्वात् क्रोधवत्। तथाहि 'व्यायामोष्णगृहक्षुद्गुरुबलक्रोधमानभयसमराः । उपनाहसूर्यतापौ दशाग्निगुणवर्जिताः स्वेदाः'। भयं तु यथा उन्मादकारणमपि तन्मायकं स्यात्। यथा दृश्यते यत्स्वेदनं चलितस्य सन्धेः पुनर्घट्टनेन तेन सम्यगवस्थानं तद्वदिहापि ज्ञेयम् ॥ ४ ॥ ५ ॥

गू०—यादृशे वायौ यादृशः स्वेदो विहितः तत्प्रकारमाह—बलासे इति। बलासे कफे। रूक्षणः स्वेदो वालुकादिभिर्हितः । कफानिले रूक्षस्निग्धं । कफानिले कफवाते । कफमेदोवृते वाते कोष्णं गेहं संसेवेत। रवेः करान् किरणान् सेवेत । नियुद्धं बाहुयुद्धम्। मार्गगमनं गुरुप्रावरणम्। कोपं बलादिवारणं शीतादीनां शमनं, चिन्ताव्यायामभारांश्च सेवेत । आमयमुक्तये रोगनाशाय ॥ ४ ॥ ५ ॥

### प्राक्स्वेद्याः—

**येषां नस्यं विधातव्यं बस्तिश्चापि हि देहिनाम् ।**
**शोधनीयाश्च ये केचित्पूर्वं स्वेद्याश्च ते मताः ॥६॥**

दी०—अथ क्रमेण ये पूर्वं स्वेद्यास्तानाह—येषां पुरुषाणां नस्यं विधातव्यमिति नस्यं दातव्यं ते नस्यात्मकस्वेद्या इत्यर्थः। नतु नस्यं विधाय पश्चात् स्वेद्या इति भावः । येषां देहिनां बस्तिरनुवासननिरूहाख्या दातव्या तेषामपि पूर्वं स्वेदकर्म कार्यं, ये किंचिच्छोधनीयाः वमनविरेकादियोग्यास्तेऽपि पूर्वं स्वेद्या इत्यर्थः। परमार्थतस्तु विरेचने विधातव्ये सति त्र्यहं स्नेहपानं परमम्। वमने पुनरेकाहोपरमे स्वेदः। यदाह कश्चित्सुदान्तसेनः—एकाहं दिनमन्यच्च कफनुत् क्लेश्यतक्षरैरिति (?) ॥ ६ ॥

गू०—पूर्वं ये स्वेद्यास्तानाह—येषामिति । भगन्दरी अश्मर्यातुरश्च एते त्रयः पूर्वं स्वेद्याः ॥ ६ ॥

### पश्चात्स्वेद्याः—

**पश्चात्स्वेद्या गते शल्ये मूढगर्भगदे तथा।**
**काले प्रजाताऽकाले वा पश्चात्स्वेद्या नितम्बिनी॥७॥**

दी०—इदानीं ये पश्चात् स्वेद्यास्तानाह—मूढगर्भाद्युपद्रव इत्येके। मूढगर्भगते तथैत्यपीति पाठः कश्चित्। अर्थाद्रक्तस्रावाद्युपद्रवरहिताः पश्चात् स्वेद्या इत्यर्थः। काले प्रसवसमये प्रजातकाले सम्यग्जातसमये। नितम्बिनी स्त्री। तन्त्रान्तरेऽपि 'पश्चात्स्वेद्या हृते शल्ये मूढगर्भाऽऽनुपद्रवा। सम्यक्प्रजातकाले च पश्चात् स्वेद्या विजानतेति'। (चक्रदत्ते)॥ ७॥

गू०—ये पश्चात्स्वेद्यास्तानाह—पश्चादिति। गते शल्ये तथा मूढगर्भगदे पश्चात्स्वेद्याः। काले प्रजाता नवममासादग्रे प्रसूता। अकाले नवममासादधः प्रसूता वा नितम्बिनी स्त्री पश्चात्प्रसवात् स्वेद्या॥७॥

### कालद्वयस्वेद्यानाह—

**स्वेद्याः पूर्वं त्रयः[1] प्लीहभगन्दर्यर्शसस्तथा।**
**अश्मर्यश्चातुरो जन्तुः समये शस्त्रकर्मणः॥ ८॥**

दी०—अथोभयतः शोध्यास्तानाह। प्लीहभगन्दरार्शसां त्रय एव दोषाः। त्रय एवोपद्रवा वाते चापि वातादिदोषजनिता इत्यर्थः। तथेतिग्रहणाच्चैते पूर्वं स्वेद्याः किंतु पश्चात् स्वेद्या इति तात्पर्यार्थः। तथाचोक्तं—'स्वेद्याः पुनरयथादाहनान्तरमुष्णाम्बुतप्तकटाहोपवेशनरूपम्'। एवमन्यदपि यथायोग्यं बोद्धव्यं। जन्तुरातुरः शस्त्रकर्मणः शस्त्रविधानस्य समये काले प्लीहभगन्दरादीनित्यर्थः। शस्त्रकर्मणः पश्चात्पूर्वं चैते स्वेद्या इत्यभिप्रायः॥ ८॥

### स्वेदकालः—

**सर्वान्स्वेदान् निवाते च जीर्णाहारे च कारयेत्।**

दी०—अथ स्वेदकालावस्थां दर्शयितुमाह। सर्वानिति तापोष्णोपनाहद्रवसंज्ञान् निवाते वातरहितस्थाने जीर्णाहारे सति च। जीर्णाहारलक्षणं चोक्तम्। तथाहि—'उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथेरिता। लघुता क्षुत्पिपासा च जीर्णाहारस्य लक्षण'मिति। प्रायेण तु विष्टब्धेऽजीर्णेऽपि स्वेदो विहितः। उक्तं हि—'विष्टब्धे स्वेदनं कार्य'मिति वचनात्॥

१–'त्रय' इति पदं प्लीहादीनां लब्धे त्रित्वे त्रिदोषजन्यत्वपरं ज्ञेयम्। अर्शस इति अर्शोरोगी 'अर्श आदिभ्योऽच्'।

गू०—स्वेदान् कारयेदित्याह—सर्वानिति। निवाते निर्वातस्थाने। तथाऽऽहारे जीर्णे परिपक्के सति सर्वान् चतुर्विधान् स्वेदान्कारयेत्॥

### स्वेदफलम्—

**स्वेदाद्धातुस्थिता दोषाः स्नेहक्लिन्नस्य देहिनः॥९॥**
**द्रवत्वं प्राप्य कोष्ठान्तर्गत्वा यान्ति विरेकताम्।**

दी०—अथ स्वेदाद्दोषस्य येन विध्यपगमस्तमाह—दोषा वातादयः। धातुस्थिता इति। रसादिधातुगताः स्नेहक्लिन्नस्य देहिन इति। स्नेहस्वेदाभ्यक्तशरीरस्य पुरुषस्य। यतः स्नेहस्वेदपूर्वकमेव शोधनं। द्रवत्वं प्राप्येति दोष एव यतः। ये मार्गेषु लीना स्वस्थानस्था वा धातुसंस्था अपि वा ते सम्यक्स्वेदैर्योजिताः संतः द्रवत्वं प्राप्य कोष्ठान्तर्गताः पश्चाच्छोधनैः कृत्वा शान्तिं यान्तीत्यभिप्रायः। तथाचोक्तं 'स्नेहात् क्लिन्ना धातुसंस्थाश्च दोषाः स्वस्थानस्था ये च मार्गेषु लीनाः। सम्यक्स्वेदैर्योजितास्ते द्रवत्वं नीताः कोष्ठं शोधने यान्ति शान्तिम्' इति॥ ९॥

गू०—स्वेदाद्दोषः कथं यातीत्याह—स्वेदादिति। स्वेदाद्वालुकादिस्वेदात्। तथा स्नेहस्विन्नस्य तैलावगाहनाद्यैः स्विन्नस्य देहिनः पुरुषस्य धातुस्थिता दोषाः कोष्ठान्तर्गत्वा द्रवत्वं प्राप्य विरेकतां यान्तीति योजना॥ ९॥

### स्वेदितस्य रक्षा।

**स्विद्यमानशरीरस्य हृदयं शीतलैः स्पृशेत्॥ १०॥**
**स्नेहाभ्यक्तशरीरस्य शीतैराच्छाद्य चक्षुषी[1]।**

दी०—अथ स्वेदितस्याश्वासनार्थं विषयमाह—स्विद्यमानशरीरस्य स्नेहाभ्यक्तशरीरस्येति पादद्वयस्येत्ययमभिप्रायः-अनेन पूर्वं स्नेहाभ्यक्तशरीरस्य पश्चात् स्वेदितस्य पुरुषस्येत्यर्थः। यतः सर्वस्वेदेष्वपि स्नेहाभ्यङ्गो विहित इति प्रसिद्धः। तथाचोक्तं दृष्टान्तेन। नानाभ्यक्तेनापि च स्निग्धदेहे स्वेदो योज्यः स्वेदविद्भिः कथंचित्। दृष्टं लोके काष्ठमस्निग्धमाशु तापाद्भङ्गं स्वेद-

१ ननु हृदयदृष्ट्योः प्राक् रक्षणमुक्तं, इह तु मृदुस्वेदोऽभिहित इति विरुद्धम्? मैवम्, चरके तूत्तरतन्त्रे शूलादौ स्वेदो विहितः स तु संमिलिताक्षैर्बाह्ये क्रियते, न दृष्टौ। चरकेऽप्ययमेव पाठो लिखितः। तदग्रे च मध्यमं अक्ष्णौ शेषमङ्गावयवमिष्टतः स्वेदयेत्। रु०

योगेगृहीतमिति । शीतैराच्छाद्य चक्षुर्षी इति । सर्वाङ्गेषु स्वेदे क्रियमाणे चक्षूरक्षणार्थमुक्तं शीतैरिति पद्मपत्रादिभिः । अस्याग्रे 'हृदयं वृषणौ दृष्टि स्वेदयेन्मृदु नैव वे'ति केचित्पठन्ति व्याख्यानयन्ति च । अत्र चक्षुर्षी इत्युपलक्षणत्वात् हृदयादिरक्षणमेव कार्यमित्यनेनैव गृहीतार्थत्वात् ॥ १० ॥

**गू०**—दोषविरेके जाते तत्स्थापनार्थं चिकित्सितमाह—स्विद्यमानशरीरस्येति । वालुकादेः स्विन्नस्य विरेके सति हृदयं शीतलैः चन्दनादिभिः स्पृशेत् । स्नेहाभ्यक्तशरीरस्य स्नेहस्विन्नस्य शीतैः कमलकदलीपत्राद्यैः चक्षुषी आच्छाद्य विरेकात् उपाचरेत् इत्युत्तरक्रियासंबन्धः ॥ १० ॥

## अस्वेदार्हाः—

**अजीर्णी दुर्बलो मेही क्षतक्षीणः पिपासितः ॥११॥**
**अतिसारी रक्तपित्ती पाण्डुरोगी तथोदरी ।**
**मदार्तो गर्भिणी चैव नहि स्वेद्या विजानता ॥१२॥**
**एतानपि मृदुस्वेदैः स्वेदसाध्यानुपाचरेत् ।**

**दी०**—अथ येऽपि रोगिणोऽस्वेद्यास्तानाह—अजीर्णीत्यादि । एते रोगिणो न स्वेद्याः । यतः स्वेदादपि तेषां देहनाशो भवति, कदाचिन्न भवति तदा एतेषां विकारा अपि साध्यत्वं यान्तीति भावः । अतएव विजानता पुरुषेणेति ग्रहणं । तथाहि—'स्वेदाद्दोषा यान्ति देहाविनाशं संसाध्यत्वं यांति चैषां विकाराः' इति भावः । अजीर्णीति अजीर्णे भक्त इति सामान्यः । विशेषेण विष्टब्धाजीर्णी स्वेदो विहितः विष्टब्धे स्वेदनं कार्यमिति वचनात् । यदुक्तमन्यत्रापि—'स्वेदैः साध्यो दुर्बलोऽजीर्णभक्तः स्यातां चेद्वौ स्वेदनीयौ ततस्ता'विति । शेषं सुबोधं ॥ ११ ॥ १२ ॥

केचिदत्रार्धं पठन्ति—
**'मृदुस्वेदं प्रयुञ्जीत तथा हृन्मुष्कदृष्टिषु' ॥ १३ ॥**
इति ॥ १३ ॥

**गू०**—येषां स्वेदो नोचितस्तानाह—अजीर्णीति । एतानपि मृदुस्वेदैः स्वेदसाध्यानुपाचरेत् । अजीर्णी अजीर्णवान्, दुर्बलः, मेही प्रमेहवान्, क्षतक्षीणः उरःक्षतक्षीणः, मदी मद्यजनितरोगी । एतानपि स्वेदसाध्यानुपाचरेत् । केषु ? मृदुस्वेदं प्रयुञ्जीत इत्याह । हृत् हृदयम्, मुष्कोऽण्डकोषः । दृष्टिर्नेत्रम् ॥ १३ ॥

## स्वेदातियोगजा रोगाः—

**अतिस्वेदात्सन्धिपीडा दाहतृष्णा क्लमो भ्रमः ।**
**पित्तासृक्पिडकाकोपस्तत्र शीतैरुपाचरेत् ॥ १४ ॥**

**दी०**—अथ स्वेदस्यातियोगस्तेन दोषमाह—पिडकाकोप इति स्फोटादीनाम् । अथवा पिडकाकोठ इति पाठः । कोठो वरटीदष्टसंकाशः तत्र शीतैरुपाचरेदिति । पानाभ्यञ्जने चात्र शीताः क्रियाः कार्या विधिज्ञेन इति शेषः । यदुक्तं 'अतिस्विन्नमथाश्वास्य शीताम्बुवमनं हित'मिति । चरके तु उक्तः—'उष्णस्यातिशये ग्रैष्मिकः सर्वशो विधिः । सोतिस्विन्नस्य कर्तव्यो मधुरस्निग्धशीतलम्' इति ॥ १४ ॥

**गू०**—अतिस्वेदात् किं भवतीत्याह—अतिस्वेदादिति । अतिस्वेदात्संधिपीडादयो भवन्ति । क्लमः ग्लानिः, भ्रमश्चक्रारूढस्येव । पित्तासृक् पित्तरक्तम् । पिडका स्फोटिका । तत्र शीतैरुपाचरेदित्यन्वयः । तथाचोक्तं—'स्विन्नेऽत्यर्थं संधिपीडाविदाहः स्फोटोत्पत्तिः पित्तरक्तप्रकोपः । मूर्च्छा भ्रांतिर्दाहतृष्णे क्लमश्च कुर्यात्तूर्णं तत्र शीतं विधानम्' इति ॥ १४ ॥

## तापस्वेदः—

**तेषु तापाभिधः स्वेदो वालुकावस्त्रपाणिभिः ।**
**कपालकन्दुकाङ्गारैर्यथायोग्यः प्रयुज्यते ॥ १५ ॥**

---

१—चरके तु—'कषायमद्यनित्यानां गर्भिण्या रक्तपित्तिनाम् । पित्तिनां सातिसाराणां रूक्षाणां मधुमेहिनां । विदग्धभ्रष्टब्रध्नानां विषमद्यविकारिणाम् । सन्तापान्नष्टसंज्ञानां स्थूलानां पित्तमेहिनाम् । तृष्यतां क्षुधितानां च क्रुद्धानां शोचतामपि । कामल्युदरिणां चैव क्षतानामाढ्यरोगिणां । दुर्बलातिविशुष्काणामुपक्षीणौजसां तथा । भिषक्तैमिरिकाणां च न स्वेदमवतारयेत्' इति । अत्र 'कषाय'शब्देन कषायमद्यं कषायद्रव्यकृतमथवा कषायं मधु ग्राह्यम् । तस्य च कषायवर्गे मधुरवर्गे च पाठात् । तस्य च स्वेदायोग्यत्वात् । उक्तंच वाग्भटे—'पीतदुग्धदधिस्नेहमधूनी'त्यादि । एतानित्यादि एतानजीर्णादीन् स्वेदसाध्यान् आत्ययिके रोगोत्पत्तौ मृदु स्वेदयेत् । उक्तञ्च वाग्भटे—'मृदु वात्यायिके गदे' इति ।

**टी०**—इदानीं यत्पूर्वं चातुर्विध्यमुक्तं तद्योगद्वारेण प्रकटयन्नाह—तेषु पूर्वोक्तापादिस्वेदेषु । तापाभिधस्तापस्वेदः । कपालः खर्परः वालुकादयोऽत्र वह्निसंतप्ता ज्ञेयाः । यथायोग्य इति । यथादोषापेक्षया यथास्थानस्थितव्याध्यनुरूप इत्यर्थः । अयं तापस्वेदोऽभिहितः ॥ १५ ॥

**गू०**—अथ तापादिस्वेदानां लक्षणमाह—तेष्विति । तेषु चतुर्विधस्वेदेषु तापादयः स्वेदा वालुकादिभिर्यथायोग्यं प्रजायन्ते उत्पद्यन्ते । वालुका सिकता, वस्त्रं चीरम्, पाणिभिर्हस्तैः, कपालः खर्परः, कन्दुकः वस्त्रकन्दुकः, यद्वा बहुच्छिद्रो गृहमध्ये रचितः कन्दुसंज्ञः । तदुक्तं वाग्भटे—'बहुच्छिद्रो गृहान्तस्थः कन्दुर्जेताक उच्यते' इति । तस्य निर्माणं चरके लिखितं—'अङ्गारैः खदिराद्यैश्च निर्धूमैर्वालुकातप्तं कृत्वा एवं पात्रान्तरितैः स्वेदः अङ्गारस्य मृत्पात्रे स्थापयित्वा स्वेदः कर्तव्यः' इति ॥ १५ ॥

### ऊष्मस्वेदः—

**ऊष्मस्वेदः प्रयोक्तव्यो लोहपिण्डेष्टकाश्मभिः ।**
**अतप्तैरम्लसिक्तैश्च काये नक्तकवेष्टिते ॥ १६ ॥**
**अथवा वातनिर्नाशिद्रव्यक्वाथरसादिभिः ।**
**उष्णैर्घटं पूरयित्वा पार्श्वे छिद्रं विधाय च ॥ १७ ॥**
**विमुद्यास्यं त्रिखण्डां च धातुजां काष्ठवंशजाम् ।**
**षडङ्गुलास्यां गोपुच्छां नलीं युञ्ज्याद्द्विहस्तिकाम् १८**
**सुखोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतम् ।**
**हस्तिशुण्डिकया नाड्यां स्वेदयेद्वातरोगिणम् ॥ १९॥**
**पुरुषायाममात्रां वा भूमिमुत्कीर्य खादिरैः ।**
**काष्ठैर्दग्ध्वा तथाभ्युक्ष्य क्षीरधान्याम्लवारिभिः २०**
**वातघ्नपत्रैराच्छाद्य शयानं स्वेदयेन्नरम् ।**
**एवं माषादिभिः स्विन्नैः शयानं स्वेदमाचरेत्॥ २१॥**

**टी०**—अथोष्मस्वेदविवक्षायां योगद्वारेण तत्स्वरूपमाह—काये नक्तकवेष्टिते इति । नक्तकाः वातहरवटपल्लवादयः । तैर्वेष्टितं शरीरं कृत्वा पश्चाद्विहितस्वेदद्रव्येण स्वेदयेदिति भावः । अन्यदप्याह—अथवेति । वातनिर्नाशद्रव्याणि दशमूलप्रभृतीनि । तेषां क्वाथं स्वरसं च यथासंभवं च ग्राह्यं पार्श्वे छिद्रं विधायेति घटपार्श्वे नाडिकामुखप्रमाणं रन्ध्रं कारयेत् । विमुद्यास्यमिति । घटमुखं मुद्रयेदित्यर्थः । नाडिकाघटसंधिमपि मुद्रयेदिति संप्रदायः । नाडीस्वरूपमाह—त्रिखण्डामित्यादि । त्रिखण्डां मृदुमध्यप्रबलस्वेदविषयत्वात्खण्डत्रययुक्तामित्यर्थः । धातुजामिति सुवर्णादिधातुनिर्मितम् । अथवाप्यभावे काष्ठजामिति वंशादिकाष्ठघटिताम् । षडङ्गुलास्यामिति षडङ्गुलैः कुण्डलाकृतिमुत्तरलग्नं नाडिकामुखमिति भावः । किंचिद्विमग्नघटलग्नमुखं भवतीति गोपुच्छाकारानुकाराभिधानत्वात् संप्रदायविषयः । तेन लघुमुखं घटलग्नं कारयेत् । बृहन्मुखमातुरलग्नमिति भावः । द्विहस्तकामिति द्विहस्तपरिमाणं त्रिखण्डानामित्यर्थः । गुरुप्रावरणं तूलीप्रभृतिकम् । हस्तिशुण्डिकयेत्युक्तमपि नाड्याकारं द्रढयति न दोषः पौनरुक्त्या । अथवा हस्तिशुण्डिकेति नाम्नाऽस्य स्वेदस्य संज्ञा विहिता । हस्तिशुण्डिकोऽयं स्वेद इति तात्पर्यार्थः । अन्योष्मस्वेदविधानमाह—पुरुषायाममात्रामिति । पुरुषप्रमाणं यथा स्यात् । आयामश्च दीर्घविस्तारयोः खादिरैः काष्ठैरिति । खदिरो रक्तसारः । दग्ध्वेति भूगर्तस्थानमिति शेषः । तत्र काष्ठज्वलनं कुर्यादित्यर्थः । तथेति पश्चात् क्षीरादिभिः कृत्वाभ्युक्ष्येति । ननु काष्ठाङ्गाराणि तत्रत्योपनीय क्षीरधान्याम्लप्रभृतीनामेकतमेन कृत्वा तदेव सेवयेदिति भावः । धान्याम्लं काञ्जिकविशेषम् । तदभावे तक्रं ग्राह्यमिति व्यवहारात् । पश्चात्कार्यमाह—वातघ्नपत्रैरित्यादि । तत्र वातघ्नपत्रैरेरण्डप्रभृतिकैः । तच्छयनं भूगर्तनिर्मितरूपम् । तत्पत्रैराच्छाद्य तत्र वातार्तपुरुषं संविश्य स्वेदयेदित्यभिप्रायः । एवमित्यनेनैव प्रकारेण स्विन्नैर्माषादिभिरपि शयनस्वेदमाचरणीयम् । एतदुक्तं भवति । माषक्वाथजलेनापि भूगर्तस्थेति सिंचनम् । अथवा स्विन्नबाष्पैः बाष्पपरिस्विन्नं वातार्तमधःस्थं स्वेदयेदित्येके ॥ १६–२१ ॥

**गू०**—अथोष्णस्वेदः—लोहपिण्डिकेष्टकादिभिः तप्तैः अम्लसंसिक्तैः, पुनः काये देहे, रल्लकवेष्टितैर्यः स्वेदः स उष्णस्वेदः । अथवा पक्षान्तरे । वातनिर्नाशिद्रव्यक्वाथरसादिभिः घटं पूरयित्वा पार्श्वे तिर्यक् छिद्रं कृत्वा आस्यं मुखं विमुद्य तस्मिन्पार्श्वे छिद्रे द्विहस्तिकां नाडीं युञ्ज्यात् । किंभूतां नाडीं ? त्रिखण्डां त्रिग्रन्थिवंशजाम् । काष्ठजां, धातुजां द्विहस्तिकां नाडीं युञ्ज्यात् । षडङ्गुलास्यां गोपुच्छां चेति विकल्पः । सुखोपविष्टं

सुखेन स्थितम् । स्वभ्यक्तं कृततैलाभ्यङ्गम् । पुनः गुरुप्रावरणं तूलथैराव्रतम् । अनया हस्तिशुण्डिकाधारया नाड्या वातरोगिणं स्वेदयेत् । अपर उष्णस्वेदप्रकारः—पुरुषायाममात्रां पुरुषप्रमाणमात्रां भूमिमुत्कीर्य खनयित्वा खादिरैः काष्ठैर्दग्ध्वा तथाऽम्लमूत्रादिभिरभ्युक्ष्याभिषिच्य वातघ्नपत्रैराच्छाद्य शयानं स्वेदयेत् ॥ १६-२१ ॥

### उपनाहस्वेदमाह—

**अथोपनाहस्वेदं च कुर्याद्वातहरौषधैः ।**
**प्रदिह्य देहं वातार्तं क्षीरमांसरसान्वितैः ॥ २२ ॥**
**अम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः ।**
**उपग्राम्यानूपमांसैर्जीवनीयगणेन च ॥ २३ ॥**
**दधि-सौवीरक-क्षीरैर्वीरतर्वादिना तथा ।**
**कुलत्थ-माष-गोधूमैरतसी-तिल-सर्षपैः ॥ २४ ॥**
**शतपुष्पा-देवदारु-शेफाली-स्थूलजीरकैः ।**
**एरण्डमूलं बीजैश्च रास्ना-मूलक-शिग्रुभिः ॥ २५ ॥**
**मिशि-कृष्णा-कुठेरैश्च लवणैरम्लसंयुतैः ।**
**प्रसारिण्यश्वगन्धाभ्यां बलाभिर्दशमूलकैः ॥ २६ ॥**
**गुडूची-वानरीबीजैर्यथालाभं समाहृतैः ।**
**क्षुण्णैः स्विन्नैश्च वस्त्रेण बद्धैः संस्वेदयेन्नरम् ॥२७॥**
**महाशाल्वणसंज्ञोऽयं योगः सर्वानिलार्तिहृत् ।**

**दी०**—अथोपनाहस्वेदविधानमाह । उपनाहः कोष्णबहलालेपः बन्धनमित्येके । वातहरौषधैरिति काकोल्यादिगणाद्यथालाभं ग्राह्यमिति व्यवहारः । क्षीरमांसरसान्वितैरिति क्षीरं गव्यं तदभावे आजं सामान्यत्वाच्च यथायोग्यं देयमिति । मांसमत्र ग्राम्यानूपसंभवं वक्ष्यमाणत्वात् । तस्य रसं मांसरसमित्यर्थः । अम्लपिष्टैरिति अम्लैः काञ्जिकादिभिः । सलवणैरिति लवणोऽत्र सैन्धवं । स्नेहसंयुतैरिति स्नेहोऽत्र चतुर्विधो देयो यथायोग्यसंभवात् । अयमपि शाल्वणसंज्ञः । अपरमप्युपनाहविधानमाह । ग्राम्यानूपमांसादिवानरीबीजपर्यन्तद्रव्ये यथालाभप्राप्तैः क्षुण्णैः सूक्ष्मकुट्टितैः स्विन्नैः क्वथितैः तदनु वस्त्रेण बद्ध्वा पोट्टलिकाकारैः संस्वेदयेत् । नरमिति वातार्तं पुरुषं । अयं महाशाल्वणसंज्ञयोगः प्रसिद्ध एव । यदुक्तं—'आनूपग्राम्यमांसाद्यैः स्वेदः शाल्वणको मत' इति । ग्राम्याः अश्वाश्वतरगोखरोष्ट्रमेदःपुच्छकप्रभृतयः । आनूपवर्गस्तु पञ्चविधः । तद्यथा कूलचराः, प्लवाः, कोशस्थाः, पादिनः, मत्स्याश्चेति । तत्र कूले चरन्ति, ते यथा—'तत्रेभ-महिष-न्यङ्कु-रुरु-रोहित-शूकराः । खङ्गि-गोकर्ण-चमराः-सृमराः कालपुच्छकः । कोद्रकारमलेयाश्च पशवः कूलचारिणः' । प्लवा यथा—'हंस-सारस-कादम्ब-क्रौञ्च-कारण्डव-प्लवाः । बलाका-बक-चक्राह्वजीवञ्जीवाम्बु-कुक्कुटाः । उत्क्रोश-पुण्डरीकाक्ष-शशरीमणितुण्डिकाः । काकतुण्डवनानावमद्गुपुष्करशायिकाः । कावाक्षिमल्लिकाश्वेतवराह्वाद्याः प्लवा स्मृताः' । कोशस्था यथा—'शङ्खः शङ्खणकः शुक्तिर्भल्लूकशम्बुकादयः । कोशस्थाश्च—उद्रकुम्भीरशिशुमारकुम्भीरकाः । नक्रकूर्म-भल्लूकाद्याः पादिनः परिकीर्तिताः' । मत्स्या यथा—'गोमत्स्यो मरुलः कृष्णमत्स्यको बहुलो रसः । राजी चिलिचिमाद्याश्च मत्स्याः प्रोक्ताः समासतः' इति । इत्यानूपमांसवर्गः । एतेषां स्वरूपमत्र विस्तरभयान्न लिखितं । जीवनीयगणेनचेति । तदुक्तं सुश्रुते—काकोलीक्षीरकाकोलीजीवकर्षभकौ । मुद्गपर्णीमाषपर्णीमेदामहामेदाच्छिन्नरुहाकर्कटश्रृङ्गीतुगाक्षीरीऋद्धिवृद्धिमृद्वीकाजीवन्त्यो मधुकं चेति जीवनीयो गणः । दधिसौवीरकक्षीरैरिति । सौवीरकः काञ्जिकभेदः । वीरतर्वादिना तथेति । वीरतर्वादिगणः सुश्रुतेऽवगन्तव्यः । वीरतरुसहचरदर्भवृक्षादनीगुण्डानलकुशकाशाश्मभेदकाग्निमन्थमोरटवसुकवसिरभल्लूककुन्दुरुकेन्दीवरकपोतवङ्काश्वदंष्ट्रा चेति । शेफालीस्थूलजीरकैरिति । शेफाली निर्गुण्डी 'संभालू' इति लोके । स्थूलजीरकः कृष्णजीरकः । एरण्डस्य मूलं बीजं, च ग्राह्यं । मिशिः शतपुष्पा । कुठेरकः स्वनामप्रसिद्धः । लवणैरिति बहुवचनेनात्र पञ्चलवणानि यथायोग्यं देयानि । अपराण्यपि पांशुक्षारप्रभृतीनि ग्राह्याणि न दोषः । अम्लसंयुतैरिति अम्लोष्णवर्गो हितो ग्राह्यः । बलाभिरिति बहुवचनाद्बलाचतुष्टयेषु यथालाभमिति योज्यम् । दशमूलः प्रसिद्धः सच दशद्रव्यैर्मिलितः । तद्यथा—'शालिपर्णी पृष्ठिपर्णी बृहती कण्टकारिका । तथा गोक्षुरकश्चैव लघुमूलमिति स्मृतम् । बिल्वोऽग्निमन्थः स्योनाकः काश्मर्यः पाटलास्तथा । ज्ञेयं महत्वं मूलं च दशमूलमुभे स्मृत'मिति । वानरीबीजैरिति कपिकच्छूबीजैः । एतैर्द्रव्यैर्य्यस्तैर्वा योगा बोद्धव्याः भिन्नतृतीयान्तपदत्वात् । शेषं सुबोधम् ॥ २२-२७ ॥

**गू०**—अथोपनाहस्वेदः—वातहरौषधैर्दशमूलादिभिरुपनाहं स्वेदं कुर्यात् । किं कृत्वा ? वातार्तदेहं

क्षीरमांसरसान्वितैः प्रदिह्य प्रलेपं कृत्वा । उत अम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैश्च प्रदिह्य ।

अथ महाशाल्वणस्वेदविधानमाह—ग्राम्याः छागोरभ्रादयः, अनूपा मत्स्यचक्रवाकादयः । जीवनीयगणश्चूर्णोक्तः । सौवीरं काञ्जिकम् । क्षारैर्यवक्षारस्वर्जीटङ्कणैः । वीरतर्वादिश्च पूर्वोक्तः । अतसी प्रसिद्धा, शेफाली निर्गुण्डी, मिशिः शतपुष्पा, कुठेरः वावरी । लवणैः सैन्धवाद्यैः । पञ्चभिरम्लैर्दाडिमाद्यैः । वानरी कपिकच्छूः । एतैर्यथालाभं समाहृतैरानीतैः, क्षुण्णैः कुट्टितैः, स्विन्नैः स्वेदितैः, पुनर्वस्त्रेण बद्धैः स्वेदयेत् ॥ ॥ २२–२७ ॥

## द्रवस्वेदविधिः ।

**द्रवस्वेदस्तु वातघ्नो द्रव्यक्काथेन पूरितम् ॥ २८ ॥**
**कटाहं कोष्ठकं वाऽपि सूपविष्टोऽवगाहयेत् ।**

**दी०**—इदानीं द्रवस्वेदविधिमाह—द्रवस्वेद इति । पित्तसंगे द्रवो हित इति पूर्वोक्तत्वात् । वातघ्नद्रव्यक्काथेनेति वातघ्नद्रव्यं काकोल्यादिगणप्रमुखं तच्च पूर्वं व्याख्यातं । कटाहं कोष्ठकं च । द्विविधमिति द्रवस्वेदं । वा ग्रहणात् चर्मद्रोणीप्रभृतिकमपि यथालाभं द्रवस्वेदविधौ ग्राह्यम् ॥ २८ ॥

**गू०**—वातघ्नं दशमूलाद्यं द्रव्यम् । तत्क्काथेन पूरिते कटाहे ताम्रादिकोष्ठके वा सूपविष्टः सुखेन स्थितः अवगाहयेत् ॥ २८ ॥

**इदानीं द्रवस्य परिमाणमाह—**

**नाभेः षडङ्गुलं यावन्मग्नः क्काथस्य धारया ॥ २९ ॥**
**कोष्णया स्कन्धयोः सिक्तस्तिष्ठेत् स्निग्धतनुर्नरः ।**
**एवं तैलेन, दुग्धेन, सर्पिषा स्वेदयेन्नरम् ॥ ३० ॥**

**दी०**—नाभेरित्यादि । यावन्नाभेरूर्ध्वं सूपविष्टः पुरुषो मग्नो भवति तावत् क्काथादिकं धारयेत् योजयेदित्यर्थः । इत्येवं कटाहावगाह इव परिमाणम् । कोष्ठे तूत्थितः पुरुषो यावत् स्कन्धयोरुपरि सिक्तो मग्नः तावत्तिष्ठेदित्यभिप्रायः । स्निग्धतनुता सर्वस्वेदेपि बोद्धव्या एवमुक्तप्रकारेणैव तैलादिनापि यथायोग्यं स्वेदयेदित्यर्थः ॥ २९ ॥ ३० ॥

**गू०**—तस्य विधानमाह—स्निग्धतनुः कृततैलाभ्यङ्गः । कोष्णया धारया स्थितः स्कन्धयोः सिक्तः । क्काथेन धारया नाभेः षडङ्गुलं यावन्मग्नस्तावत्तिष्ठेत् । एवं तैलेन दुग्धेन सर्पिषा घृतेन वा स्वेदयेत् । अयं द्रवस्वेदः ॥ २९ ॥ ३० ॥

## अवगाहनकालनियमः ।

**एकान्तरो द्व्यन्तरो वा स्नेहयुक्तोऽवगाहने ।**

**दी०**—अथावगाहनकालनियममाह—अथावगाहने यथादौ स्नेहयुक्तः स्नेहावगाहस्तदा एकान्तर एकद्व्यन्तरः द्व्यन्तरो द्विदिनान्तरो वा कर्तव्य इति व्यवस्थाविषयः । ननु सर्वावगाहने नियमनमिदं । नन्वत्र कालनियमः कृतः, तन्त्रान्तरे तु न कृतः, तथा पूर्वमुक्तं—नाभेरूर्ध्वं षडङ्गुलप्रमाणं क्काथतैलादिधारणम् । तन्त्रान्तरे तु अन्यथा । **वैद्यालंकारे**—'कटाहे मृण्मये पात्रे किंवा पाषाणसंभवे । आकण्ठमग्नो निवसेत् प्रहरं प्रातरेव वा ॥ रोमान्तेष्वनुकूपेषु स्थित्वा मात्रा शतत्रयम् । ततः प्रविशति स्नेहैश्चतुर्भिर्गच्छति त्वचम् । पञ्चभिश्च भजेद्रक्तं षड्भिर्मांसं प्रपद्यते । मेदःस्थानं सप्तशतैरष्टभिश्चास्थिषु व्रजेत् ॥ नवभिर्याति मज्जानं ततो मात्रां न कारयेत् । ततस्तु रोगान्संगृह्य वातपित्तकफोद्भवान् ॥ स्रोतसां मार्दवकरः कफवातविनाशनः । धातूनां पुष्टिजननो बलवर्णकरः परः ॥ वातरोगानशेषांश्च जयेदेष विशेषतः' इति । अन्यत्रापि कण्ठपर्यन्तधारणमुक्तं यथा—द्रोणीकाष्ठस्य तैलेन सुखोष्णेन प्रपूरयेत् । तत्र स्थित्वा यथा मात्रा कण्ठपर्यन्तमाहतुम् ॥ सुस्निग्धः सुकुमारस्य सुखार्थी श्रमपीडितः । गाहयेत् घटिकासार्धं तैलद्रोण्यां च यत्नतः ॥ ततो निःसृत्य हस्ताभ्यां खट्वायां चर्मके पुनः । सुखेन मर्दनं कृत्वा यावत्तैलं विशुध्यति ॥ उद्वर्तनं ततः कुर्यात्स्नानं च विधिपूर्वकम् ॥ त्वचि कान्तिकरं सद्यः पारुष्यं न विनश्यति ॥ बलपुष्टिकरं सद्यो वातरोगं च नाशयेत् । अन्ये च त्वग्भवा रोगा मन्दानलसमुद्भवाः ॥ यस्य शुष्यति सर्वाङ्गं गतिर्यस्य तु विह्वला । तस्य द्रोण्यां च तैलेषु गाहयेद्धटिकात्रयम् ॥ क्षीणेन्द्रियाः क्षीणशुक्रा ज्वरक्षीणाश्च ये नराः । वातार्तौ वृषणौ येषामन्त्रवृद्धिश्च दारुणा ॥ पङ्गुलः पीठसर्पी च गृध्रसी वातशूलवान् । कलायखञ्जकं तूनीं प्रतूनीं च विशेषतः ॥ एतत्सर्वान् निहन्त्याशु छन्ना-

१–ननु स्निग्धस्यैव स्वेदाधिकारात्पुनः स्निग्धग्रहणं किमर्थम् ? उच्यते–पुनर्ग्रहणं तत्समयस्निग्धताद्योतनार्थम् । स०

श्रमिव मारुतम्' इति । तेनात्र शार्ङ्गधरोक्तं कालनियमवचनं सुकुमारादिविषयम् । तथा नाभेरूर्ध्वं षडङ्गुलग्रहणं हृदयरक्षार्थं, तन्त्रान्तरोक्तं दारुणवातरोगग्रस्तविषयं । कण्ठपर्यन्तावगाहनं तु सुकुमारादिविषयम् । अतएवोक्तं चरके—'पद्मोत्पलपलाशैर्वा स्वेद्यः संवृत्य चक्षुषी । मुक्तावलीभिः शुद्धाभिः शीतलैर्भोजनैरपि ॥ जलार्द्रैः सजलैर्हस्तैः स्विद्यतो हृदयं स्पृशेत्' इति । नेत्रहृदयरक्षार्थविषयमिदं शार्ङ्गधरवचनं ज्ञेयम् ॥

**गू०**—यथायोग्यं एकान्तरे ब्यन्तरे वाऽवगाहो युक्तः ॥

### अवगाहनफलम्—

**सिरामुखै रोमकूपैर्धमनीभिश्च तर्पयेत् ॥ ३१ ॥**
**शरीरे बलमाधत्ते युक्तः स्नेहोऽवगाहने ।**

**दी०**—अथ सम्यक्स्नेहावगाहने फलमाह—अवगाहने युक्तः स्नेह एकान्तरादिविधिना सम्यक् प्रयुक्तशीलः । तादृश एव शिरादिस्तर्पयन् सन् शरीरे बलमाधत्ते तर्पयन् धातूनिति शेषः । यदुक्तं–'मात्राभिस्त्रिश्चतुःपञ्चषट्सप्ताष्टभिराव्रजेत् । रसासृङ्मांसमेदोस्थिमज्जाधातून् यथाक्रम'मिति । मात्राश्च प्रसंगतो लक्षणं संख्या च लिख्यते । यथा—स्फजाऊनःकरावर्तं कुर्यात्तां स्फोटिकायुतां । एषा मात्रा भवेदेका सर्वत्रैवैष निश्चयः । संख्या यथा—'वेदनोपशमः पञ्चशतसप्तशतानि वा । सहस्रं वापि मात्राणां कुर्याद्दोषबलाबल'मित्यादि । शिरामुखै रोमकूपैरिति । शिराणां मुखानि रोमकूपप्रतिबद्धानीति भावः । सिराश्च दोषादिवहा इति **ग्रन्थकारः** सन्धिबन्धनकारिण्यो दोषाधातुवहाः शिरा इति । ताश्च स्थूलसूक्ष्मभेदेनापि द्विधा भवन्ति तासां नाभिमूलत्वादधस्तिर्यक् च प्रसरः । तथाह्युक्तम्–'यावन्त्यस्तु सिराः काये संभवन्ति शरीरिणाम् । नाभिप्रबृद्धाः सर्वास्ताः प्रतन्वन्ति समन्तत' इति । धमनीभिश्चेति । ध्मानादनिलपूरणाद्धमन्यो रसवहाश्चतुर्विंशतिसंख्याकाः । एताश्चापि नाभिप्रभवा अभिहिताः । चकारात्तासामपि मुखानि रोमकूपप्रतिबद्धानि ज्ञातव्यानि । यतः ये स्वेदमभिवहन्ति रसं चाभितर्पयन्त्यन्तर्बहिश्च । तैरेव चाभ्यङ्गपरिषेकावगाहालेपनवीर्याण्यन्तः शरीरमभिप्रतिपद्यन्त इति ॥३१॥

**गू०**—तस्य फलमाह—सिरामुखैर्लोमकूपैर्लोमविवरैर्धमनीभिर्नाडीभिश्च तर्पयेत् । तदा शरीरे बलं आधत्ते ॥ ३१ ॥

### धातुवर्धनमाह—

**जलसिक्तस्य वर्धन्ते यथामूलेऽङ्कुरास्तरोः ॥ ३२ ॥**
**तथा धातुविवृद्धिर्हि स्नेहसिक्तस्य जायते ।**
**नातः परतरः कश्चिदुपायो वातनाशनः ॥ ३३ ॥**
**शीतशूलाद्युपरमे स्तम्भगौरवनिग्रहे ।**
**दीप्ताग्नौ मार्दवे जाते स्वेदनाद्विरतिर्मता ॥ ३४ ॥**

**दी०**—अथ स्नेहावगाहनाद्वायुवृद्धौ सत्यां तद्दृष्टान्तेनास्य प्राधान्यमाह । मूले पानीयसिक्तस्य वृक्षस्य यथाङ्कुराः पल्लवादिरूपा वर्धन्ते तद्वदत्रापि धातुवृद्धौ बोद्धव्यं । नातः पर इति । अस्मात् स्नेहावगाहनात् अपरो वातनाशको योगो न प्रधान इति भावः । अथ स्वेदकर्मणो विरतिविषयमाह—शीतशीलाद्युपरमे इति । शूलशान्तौ सत्यां शूलशब्देन वातादिजनितो वेदनासमूहो बोद्धव्यः । स्तम्भो गौरवं चाङ्गानां तयोर्निग्रहो नाशः । तस्मिञ्जाते सति दीप्ताग्नौ सति । मार्दवमपि अङ्गानां मृदुता तस्मिन्नपि जाते सति विरतिर्विश्रामः, तेन एभिः कारणैः स्वेदगुणोऽवगन्तव्यः । तथा ह्युक्तम्–'अग्नौ दीप्ते मार्दवं त्वक्प्रसादं भक्तश्रद्धां स्रोतसां निर्मलत्वम् । कुर्यात्स्वेदस्तन्द्रनिद्रे च हन्यात् सन्धीन्बन्धांश्चेष्टयेदाशु युक्त' इति । सौषधस्वेदातियोगलक्षणमुक्तं वाग्भटे—'पित्तास्रकोपतृण्मूर्च्छास्वराङ्गसदनभ्रमाः । सन्धिपीडाज्वरः श्यावरक्तमण्डलदर्शनम् । स्वेदातियोगाच्छर्दिश्च तत्र स्तम्भनमौषधम्' इति ॥ ३२–३४ ॥

**गू०**—स्वेदनात्कदा निवृत्तिर्भवति ? इत्यत्राह—शीत इति । शीतशूलादीनामुपरमे निवृत्ते सति स्तम्भगौरवयोर्निग्रहे सति, मार्दवे मृदुत्वे सति देहस्यैव तदा स्वेदनाद्विरतिर्निवृत्तिर्मता ॥ ३२–३४ ॥

### सुस्विन्नस्य पश्चात् कर्म दर्शयति—

**सम्यक् स्विन्नं विमृदितं स्नानमुष्णाम्बुभिः शनैः ।**
**भोजयेच्चानभिष्यन्दि व्यायामं न च कारयेत् ३५**

इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां
शार्ङ्गधरसंहितायामुत्तरखण्डे स्वेदविधिर्नाम
द्वितीयोऽध्यायः ॥ २ ॥

---

**दी०**—विमृदितमिति । स्नेहावगाहानन्तरं सुखमर्दनं, उष्णाम्बुभिरुष्णोदकैः स्नानं, अनभिष्यन्दि भोजयेत् । जाठराग्नेः संदीपनार्थं व्यायामं शरीराया-

सजनकं कर्म । केचित्—'व्यायामं नच कारयेत्' इत्यत्र—'सर्वत्राचारमाचरेत्' इति पाठं पठन्ति । तत्र आचारः स्नेहाचरणं, तच्च वाग्भटेऽप्युक्तम्—'उष्णोदकोपचारी स्याद्ब्रह्मचारी क्षपाशयः । न वेगरोधी व्यायामक्रोधशोकहिमातपान् । प्रवातयानयानाध्वभाष्याभ्यासनसंस्थितीः । नीचात्युच्चोपधानाहःस्वप्नधूमरजांसि च' इति ॥ ३५ ॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायामुत्तरखण्डे स्वेदाध्यायो द्वितीयः ॥ २ ॥

गू०—स्वेदानन्तरं किं कुर्यादित्याह—सम्यक् स्विन्नं सम्यक् स्वेदितम् । पुनः विमृदितं कृताभ्यङ्गम् । पश्चाच्छनैरुष्णाम्बुना कुर्यादिति पूर्वक्रियासम्बन्धः । अनभिष्यन्दि स्रोतो रोधि भोजयेत् । व्यायामं श्रमाद्यं न कारयेत् । सुश्रुते चतुर्विधः नवस्वेदः कथितः । चकाराद्वाग्भटादौ त्रयोदशविधः । ग्रन्थज्ञापनार्थं तदपि लिख्यते । तदुक्तं वाग्भटे—'शङ्करः प्रस्तरो नाडी परिषेकोऽवगाहनम् । जेताकोऽश्मघनः कर्पूः कुटी, कुम्भी तथाच भूः ॥ कूपो लोहाकरश्चैते स्वेदाश्चैव त्रयोदश' इति । एषां लक्षणं वाग्भटे दर्शितम् ॥ ३५ ॥

इति श्रीकाशीरामवैद्यविरचितायां शार्ङ्गधरगूढार्थदीपिकायामुत्तरखण्डे स्वेदाध्यायः॥ २ ॥

## अथ तृतीयोऽध्यायः ।

अथेदानीं कृतस्नेहस्वेदस्य शोधनाधिकारः । उक्तंच वाग्भटे—'स्नेहक्लिन्नाः कोष्ठगा धातुगा वा स्रोतोलीना ये च शाखाऽस्थिसंस्थाः । दोषाः स्वेदैस्ते द्रवीकृत्य कोष्ठं नीताः सम्यक् शुद्धिभिर्निर्ह्रियन्ते' इति । अत्र शुद्धिभिरिति बहुवचनग्रहणात्पञ्चकर्मणां ग्रहणम् । तेनाऽत्रादौ स्थानानुरोधात्प्राक् वचनं पश्चाद्विरेचनादीति । अतएवाह—

### अथ वमनविधिः ।

**वमनप्रधानो विधिः वमनविधिः शोधनप्रकारः । अत एवाह—**

**शरत्काले वसन्ते च प्रावृट्काले च देहिनाम् ।**
**वमनं रेचनं चैव कारयेत्कुशलो भिषक् ॥ १ ॥**

दी०—ऊर्ध्वभागदोषनिर्हरणं वमनं, अधोभागदोषनिर्हरणं विरेचनम् । चकाराद्वस्तिनस्यादयः । वमनादीनां कालमाह—शरत्काले इत्यादि । शरत्कालादिशब्दैस्तत्समीपसाधारणकाल उपलक्ष्यते । उक्तंच—'श्रावणे कार्तिके चैव मासि साधारणे क्रमात् । ग्रीष्मवर्षाहिमचितान् वाय्वादीनाशु निर्हरेत्' इति । कुशलो भिषगिति । दोषदेशकालसात्म्यप्रकृतिवयोवह्निधातुमलविशेषज्ञाने शोधने च कुशलः इति ॥ १ ॥

गू०—स्वेदानन्तरं वमनस्योक्तत्वाद्वमनमाह—तत्रादौ वमनकालमाह—शरदिति । शरत्काले वसन्ते प्रावृट्काले एषु त्रिष्वेव च देहिनां मनुष्याणां वमनं रेचनं च कारयेत् । यः कुशलो भिषक् प्रवीणवैद्यः सञ्चयं ज्ञात्वा वमनोन्मुखं दोषं ज्ञात्वा, अन्यथा स्वस्थविषये दोषदर्शनात् । तथाचोक्तं ग्रन्थान्तरे—'भिषजः शोधनं प्राहुर्वर्ज्यः स्वस्थेन सर्वदा । पन्नगस्य वधो वंक्षणे दोषस्य समुदीरणम्' इति । ननु शरत्काले पित्तस्याऽपि वमनं युक्तं वसन्ते कफस्याऽपि वमनं रेचनं युक्तम् । द्वयोः प्रावृट्काले वा हेतुत्वात्कथं वमनं रेचनं दीयते तत्र वाताधिक्यं कथं स्यात्? उच्यते—वर्षाकाले निषेधो, न प्रावृट्काले । तथाचोक्तं अग्निवेशेन—'अतिविष्टेनातिघर्मे प्रावृडित्यभिधीयते । तत्रैव शोधनं पथ्यं न वर्षासु कदाचन' इति । शोधनेन सर्वदोषनाशो भवतीत्येके । तथाचोक्तं तीसटे—'प्रावृड्घनात्ययवसन्तदिनेषु यस्मात् प्रादुर्भवन्ति पवनादिरुजस्ततश्च । वातादिदोषविगमाच्च शरीरशुद्धिः' इति । अम्बुदागमशरन्मधुवासरेषु अग्निवेशेन त्रिष्वेव च शोधनं नान्येषु । तथाचोक्तं—'त्रिषु त्वनुशीतत्वात्प्रोष्ठं शेषेषु शोधनम् । हितं भवति यस्माच्च तत्र हेतुं निबोध मे' इति ॥ १ ॥

**वाम्याः—**

**बलवन्तं कफव्याप्तं हृल्लासादिनिपीडितम् ।**
**तथा वमनसात्म्यं च धीरचित्तं च वामयेत् ॥२॥**

दी०—संप्रतिवमनार्हत्वमाह—बलवन्तमिति वमनसामर्थ्ययुक्तं । कफव्याप्तमिति कफोल्बणगदाव्याप्तं हृल्लासः उपरिस्थितिवमनता तदादिरोगपीडितमित्यर्थः । आदिशब्दात् कासश्वासात्मपित्तप्रभृतयः । वमनसा-

१ ते च वाग्भटोक्ताः—'विशेषेण तु वामयेत् । नवज्वरातिसाराधःपित्तासृग्राजयक्ष्मिणः । कुष्ठमेहापचीग्रन्थिश्लीपदोन्मादकासिनः । श्वासहृल्लासवीसर्पस्तन्यदोषोर्ध्वरोगिणः' इति ।

त्म्यमिति । वमनं सात्म्यं यस्य तत्तथा ते । पुरुषमिति शेषः । धीरचित्तं न कातरमित्यर्थः ॥ २ ॥

गू०—येषु वमनं देयं तानाह—हृल्लासो हृदयनिर्गमः । उपस्थितवमनमित्यन्ये । वमनसात्म्यं वमनसहजम् ॥ २ ॥

### वमनार्हा रोगाः—

**विषदोषे स्तन्यदोषे मन्देऽग्नौ श्लीपदेऽर्बुदे ।**
**हृद्रोग-कुष्ठ-वीसर्प-मेहा-जीर्ण-भ्रमेषु च ॥ ३ ॥**
**विदारिका-पची-कास-श्वास-पीनस-वृद्धिषु ।**
**अपस्मारे ज्वरो-न्मादे-तथा रक्तातिसारिषु ॥ ४ ॥**
**नासा-ताल्वोष्ठ-पाकेषु कर्णस्रावे द्विजिह्वके ।**
**गलशुण्ड्यामतीसारे पित्तश्लेष्मगदे तथा ॥ ५ ॥**
**मेदोगदेऽरुचौ चैव वमनं कारयेत् भिषक् ।**

दी०—अथ ये रोगा वाम्यास्तानाह—विष इति । ननु अपस्मारादीनामनिलप्रधानत्वात्कथमत्र वमनं युक्तं ? उच्यते, पाण्डुरोगी क्रमिव्याप्त इति वक्ष्यमाणव्याप्तशब्देन प्रवृद्धपाण्डुरोगे निषिद्धोपक्रमे कफावस्थायां च मृदु ज्ञेयं । यदुक्तं 'पाण्डुरोगे भिषक् कुर्यादूर्ध्वाधःशोधनं सदा' इति । अत्र ऊर्ध्वशोधनं वमनादिकं । अधःशोधनं विरेचनं । विरेचनं चात्र तीक्ष्णमेव, 'वातस्य तीक्ष्णान्यनुलोमनानी'ति वचनात् ॥ ३-५ ॥

गू०—स्तन्यदोषे मातृदुग्धोद्भवे । विदारी रोगविशेषः । स्पष्टमन्यत् ॥ ३-५ ॥

### अथावाम्यानाह—

**न वामनीयस्तिमिरी न गुल्मी नोदरी कृशः ॥ ६ ॥**
**नातिवृद्धो गर्भिणी च न स्थूलो न क्षुधातुरः ।**
**मदार्तो बालको रूक्षः क्षुधितश्च निरूहितः ॥ ७ ॥**
**उदावर्त्यूर्ध्वरक्ती च दुश्छर्दी केवलानिली ।**
**पाण्डुरोगी क्रमिव्याप्तः पठनात्स्वरघातकः ॥ ८ ॥**

दी०—तिमिरप्रभृतिभिर्व्याधिभिर्व्याप्ताः पुरुषा न वामनीया इत्यभिप्रायः । यतः—'अवम्यवमनाद्रोगाः कृच्छ्रतां यान्ति देहिनः । असाध्यतां वा गच्छन्ति नैते वाम्या ह्यतिश्रुता' इति । दुश्छर्दिरित्यनेन यत्सामान्यं तथापि बहुदोषान्वितश्छर्द्यां वमनं कार्यं न दोषः । यदुक्तं सुश्रुते—'छर्दिषु बहुदोषासु वमनं हितमुच्यते' इति ॥ ६-८ ॥

गू०—येषां वमनं न देयं तानाह—एते तिमिर्यादयः न वामनीयाः ॥ ६-८ ॥



**अथ यद्यप्येतेऽप्यजीर्णादिव्यापितास्त वामनीया इति विचार्याह—**

**एतेऽप्यजीर्णव्यथिता वाम्या ये विषपीडिताः ।**
**कफव्याप्ताश्च ते वाम्या मधुकाथस्य पानतः ॥ ९**
**सुकुमारं कृशं बालं वृद्धं भीरुं च वामयेत् ।**
**पीत्वा यवागूमाकण्ठं क्षीरतक्रदधीनि वा ॥ १०**
**असात्म्यैः श्लेष्मलैर्भोज्यैर्दोषानुत्क्लिश्य देहिनः ।**
**स्निग्धस्विन्नाय वमनं दत्तं सम्यक् प्रवर्तते ॥ ११**

दी०—एते पूर्वोक्तास्तिमिर्यादयः ते यदा जीर्णव्यथिता उपविषपीडिताः कफव्याप्ता वा वन्ति तदा वाम्या इत्यभिप्रायः । कफव्याप्ता इ नियतम् । तथाहि-'कफजे वमनं शस्तं रेचनं 'पित्त गदे । बस्तिर्वातगते काये आमये त्वामपाचन'मिति केन वाम्यास्तमाह—मधुकाथस्य पानत इति । म काथो मधुयष्टीकाथः । यद्वा मधु क्षौद्रं । क्वाथं क्वथि जलं । अन्यद्विहितद्रव्यशृतं वा प्रकरणत्वात् । कषा श्चात्र सर्वः कोष्णः कार्य इति चरकवचनात् । उष्णं रोधित्वेन मधूष्णं निषिद्धमिति विवक्षायां न चा मधूष्णं विरुद्धं ।—यदुक्तं-'प्रच्छर्दने निरूहे च मधू न निवारयेत् । अलब्धपाकमाश्वेव तयोस्तस्मान्निवर्ते इति । अतएव यात्यधोदोषमादाय पच्यमानं वि चनं । गुणोत्कर्षणादूर्ध्वमपकं वमनं पुनरिति । यद ऽजीर्णादिपीडिततिमिरादयोऽपि सुकुमारादिषु भव तदा वक्ष्यमाणप्रयोगेनैव वाम्या इत्यत आह—वम साध्यविकारपीडिताः सुकुमारादयोऽपि यवाग्वादीना न्यतमेनाकण्ठं पाययित्वा वामयेदित्यर्थः । यवाग्वप्यने कफकरत्वात् कफोत्क्लेशनार्थमित्यभिप्रायः । यदु 'पांशुधान्ये यथा वृष्टिः क्लेदयत्यतिकर्दमम् । तथा ष्मणि संवृद्धे यवागू श्लेष्मवर्धनी'ति । इत्यभिप्रायविष वक्ष्यमाणेनैव चरितार्थत्वात् । क्षीरतक्रदधि यथादोष पेक्षया व्यस्तं देयं । पूर्वमुक्तं वक्ष्यमाणेनैव चरिता त्वात्तानाह—'असात्म्यैः श्लेष्मलैर्भोज्यैर्दोषानुत्क्लेश्य हिनः । स्निग्धस्विन्नाय वमनं दत्तं सम्यक् प्रवर्तते' स्निग्धस्विन्नायेति स्नेहपानपूर्वकाय स्वेदपूर्वकाय पु पायेत्यर्थः । ननु स्नेहस्वेदायेति, यतः स्नेहपानादेका मुपरतमपरादिना एतत्स्विन्नमिति प्रसिद्धिः । भाह किना स्नेहपानात् त्र्यहेन वमनं दर्शितं । तथ 'स्निग्धस्विन्नशरीरस्य दद्यात्प्रच्छर्दनं त्र्यहात् । दशरा गते वान्ते भूयो दद्याद्विरेचन' मिति ॥ ९-११ ॥

**गू०**—एतेष्वपि अजीर्णव्यथिता वाम्याः, कफव्याप्ताश्च वाम्याः। मधूको गुडपुष्पः तत्क्वाथपानतः। कृशबालवृद्धानामपि पुनरुक्तिविशेषनिषेधार्थः। वमनादौ यद्विहितं तदाह—'नरः श्वो वमनं पाता भुञ्जीत कफवर्धनम्। सुजरं द्रवभूयिष्ठं लघु शीतं विरेचनम्॥' इति। यवागूं आकण्ठं पीत्वा असात्म्यैः अरुच्यैः श्लेष्मवर्धकैः भोज्यैर्वा दोषानुत्क्लेश्य देहिनः पुरुषस्य स्निग्धस्विन्नाय वमनं दत्तं सम्यक् प्रवर्तते। स्निग्धाय कृतघृतपानाय स्वेदिताय। ननु स्नेहपानात्स्वेदात्कदा वमनं देयम्? तदाह ग्रन्थान्तरात्—अत्र नास्ति। तथाच **भेडः** 'एकाहं परतः स्नेहात् स्थित्वा प्रच्छर्दनं पिबेत्। भुक्त्वा ग्राम्योदकैर्मांसैरनूपैश्च सुसंस्कृतैः।' 'त्रिरात्रात् परतस्त्वद्वत् स्वेदात्प्रच्छर्दनं पिबेत्' इति॥ ९–११॥

## मधुसैन्धवयोः प्राधान्यम्—

**वमनेषु च सर्वेषु सैन्धवं मधु वा हितम्।**

**दी०**—अथ वमनद्रव्येषु मधुसैन्धवयोर्विशेषेणैवोपादेयत्वमाह। मधुसैन्धवयोरभिमन्त्रणं च सर्वत्रैव ज्ञेयं। यदुक्तं 'यथाव्याधि च विहितं मधुसैन्धवसंयुतं। कोष्ठं विभज्य भैषज्यमात्रां मन्त्राभिमन्त्रिता' मित्यादि। अत्रोष्णेऽपि कषाये मधुसैन्धवे न विरुद्धे। नमनस्यापक्वस्यैवोर्ध्वगमनत्वात्। वैद्यास्त्वत्र योगे पाकसंभवं मन्यमाना मधु न प्रक्षिपन्ते इति केचित्। मन्त्रश्च 'ब्रह्मदक्षाश्विरुद्रेन्द्रे'त्यादिश्लोको ज्ञेयः।

**गू०**—चरकात् वमनेषु यद्धितं तदाह—वमनेषु वमनद्रव्येषु सर्वेषु वक्ष्यमाणेषु सैन्धवं मधु वा हितम्॥

## वमनार्हं द्रव्यम्—

**बीभत्सं वमनं दद्यात् विपरीतं विरेचनम्॥ १२॥**

**दी०**—कीदृशं वमनार्हं द्रव्यं देयं तदाह—बीभत्सविकृतरसवर्णप्रायं वमनं वमनद्रव्यमित्यर्थः। तेन लालाद्युल्लासकरद्रव्यमित्यभिप्रायः। विपरीतं विरेचनमिति विपरीतं बीभत्सद्रव्यात्। तेन भक्षणे मनोज्ञमित्यर्थः॥ १२॥

**गू०**—वमनं बीभत्सं सघृणं, विरेचनं घृणादिरहितम्॥ १२॥

## क्वाथ्यक्वाथयोर्मानम्—

**क्वाथ्यद्रव्यस्य कुडवं श्रपयित्वा जलाढके।**

**अर्धभागावशिष्टं च वमनेष्ववचारयेत्॥ १३॥**

**दी०**—इदानीं क्वाथ्यक्वाथयोर्मानमाह—क्वाथ्यद्रव्यं पटोलवासानिम्बप्रभृतिकं, तेषु कुडवमितं चतुःपलप्रमाणं। जलाढक इति चतुःषष्टिपलमिते पात्रे अर्धभागावशिष्टमिति प्रस्थद्वयमितं ग्राह्यमित्यर्थः। अत्र परिमाणोऽप्येकदैव पानाशक्तत्वाद्विभज्य देयः। क्वाथबहुत्वे तु सजलगुणो यद्ययोगः स्यात्तदा स एव पुनः पेय इति व्यवहारादयमेवावगन्तव्यः। कषायमपि प्रस्थशरावं पाययेदित्युक्तं तथेहाऽपि कषायपानव्यवस्थेति केचित्॥ १३॥

**गू०**—वमने क्वाथ्यद्रव्यपरिमाणमाह—कुडवं चतुःपलम्। क्वाथ्यद्रव्यस्य जलाढके चतुःप्रस्थके श्रपयित्वा अर्धं श्रितं वमनेष्ववचारयेत्॥ १३॥

## भेडमतेन वमने क्वाथपानमात्रा—

**क्वाथपाने नवप्रस्था ज्येष्ठा मात्रा प्रकीर्तिता।**

**मध्यमा षण्मिता प्रोक्ता त्रिप्रस्था च कनीयसी॥ १४॥**

**दी०**—अथ क्वाथ्यक्वाथादीनां पानेऽत्र मानमाह षण्मितेति। षट्प्रस्था कनीयसी स्मृता। पूर्वापरिमाणे पश्चाज्जलपानस्याहुः। अन्यथा पूर्वापरयोरव्यवस्था स्यात्। यद्वा पूर्वपरिमाणं तु यवाग्वादीनां पानमात्रेमभिहितं। पश्चात् क्वाथपानस्येत्यर्थः। तत्र यवाग्वाद्युपकल्पयेदिति पाठान्तरे **वृन्दोक्तमात्रया** व्यवहारः इति **चक्रः**। **चरके** तु 'मदनफलकषायमात्राणां प्रमाणं तु खलु सर्वसंशोधनमात्राप्रमाणानि प्रतिपुरुषमपेक्षितव्यानि भवन्ति। यावद्धि यस्य संशोधनं पीतं वैकारिकदोषहरणायोपपद्यते। न चातियोगाय तावदस्य मात्राप्रमाणं वेदितव्यम्' इति (च.सू.१५।१२)। तत्र वाग्भटेन कोष्ठं विभज्य भैषज्यमात्रामित्यादिवचनेनैव दर्शितं कोष्ठश्च प्रतिपुरुषं भिन्न एव। **दृढबलेन** शरावमात्रं प्रोक्तम्। एकवारं पानार्थं जलाढकावशिष्टं प्रशस्तं च। क्वाथसार

१–'वा' शब्दोऽत्र न भिन्नक्रमे, अपिशब्दार्थे द्वयोरप्येकत्र योगात्। उक्तंच वाग्भटे—'यथाविकारविहितां मधुसैन्धवसंयुताम्। कोष्ठं विभज्य भैषज्यमात्रां मन्त्राभिमन्त्रिताम्। ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलाऽनलाः। ऋषयः सौषधिग्रामा भूतसंघाश्च पांतु वः। रसायनमिवर्षीणाममराणामिवाऽमृतम्। सुधेवोत्तमनागानां भैषज्यमिदमस्तु ते॥ ॐ नमो भगवते भैषज्यगुरवे वैडूर्यप्रभराजाय तथागतायार्हते सम्यक्संबुद्धाय। तद्यथा—'ॐ भैषज्ये भैषज्ये महाभैषज्ये समुद्गते स्वाहा। प्राङ्मुखं पालयेत्पीते मुहूर्तमनुपाययेत्' इत्यादि। रु.

पानमित्येके । शरावस्य पूर्णत्वाभिधानं मङ्गलमिति जैजटचक्रौ इति ॥ १४ ॥

गू०—क्वाथपाने नवप्रस्था ज्येष्ठा मात्रा मध्यमा षट्प्रस्था त्रिप्रस्था कनीयसी इदं क्वाथपानप्रमाणम् । ननु शार्ङ्गधरेण कुडवद्रव्ये आढकं जलं दत्वा अर्धावशिष्टं क्वाथं वमने देयमित्युक्तं पुनः क्वाथस्य नवप्रस्थप्रमाणा ज्येष्ठा मात्रा लिखिता तत्कथं न विरोधः ? उच्यते, एतत्प्रमाणे शार्ङ्गधरेण भेडमतं लिखितं तदाकण्ठपानार्थं विषादौ ज्ञेयम् । महाकायविषयं वा । तथाच भेडः 'नवप्रस्था तु ज्येष्ठा स्यान्मध्यमा षट्प्रकीर्तिता । निःक्वाथस्य त्रयः प्रस्था मागधी तु कनीयसी' । चरके त्वेवं लिखितं 'मधुमधुकसैन्धवफाणितोपहितां मदनकल्ककषायमात्रां पाययेत् । मदनफलकषायमात्राप्रमाणं तु सर्वसंशोधनमात्राप्रमाणानि च प्रतिपुरुषापेक्षितव्यानि भवन्ति यावद्धिषस्य शोधनं पीतं वैकारिकदोषहरणायोपपद्यते भवति नचातियोगाय तावदस्य मात्रा प्रमाणं वेदितव्यम्' ॥ १४ ॥

### कल्कादिमानम्—

**कल्कचूर्णावलेहानां त्रिपलं श्रेष्ठमात्रया ।**
**मध्यमां द्विपलं विद्यात्कनीया पलसंमिता ॥१५॥**

दी०—अपरमपि द्रव्यविशेषेषु मानविशेषमाह—इयं तु दोषव्याधीनवेक्ष्य प्रयोक्तव्या । कल्कं दृषदि पेषितम् । चूर्णं वस्त्रगालितम् । अवलेहो लेह्यद्रव्यम् ॥१५॥

गू०—वमने क्वाथपरिमाणमुक्त्वा कल्कादीनां परिमाणमाह—स्पष्टम् ॥ १५ ॥

### वमनवेगाः—

**वमने चाऽपि वेगाः स्युरष्टौ पित्तान्तमुत्तमाः ।**
**षड्वेगा मध्यमा वेगाश्चत्वारस्त्ववरे स्मृताः ॥१६॥**

दी०—अथ वमनसंख्यामाह—वमने तु मध्यमोत्तमावरवेगानां षडष्टौ चत्वारो विहिताः । इयमेव दोषादिव्यवस्था कल्पिता । अष्टौ वेगा इति अष्टवारं यद्वामयेदित्यभिप्रायः । एवं षट्चत्वारोऽवगन्तव्याः । पित्तान्ते इति कफे । अथवा पित्तान्तं यावत् इत्यनेन सुवान्तलक्षणं प्रतिपादितमेव । यदुक्तं—'पित्ते कफस्यानुमुखं प्रवृत्ते शुद्धेषु हृत्कण्ठशिरःसु चापि । लघौ च देहे कफसंस्रवे च स्थिते सुवान्तं पुरुषं व्यवस्ये'दिति ॥ १६ ॥

गू०—वमने उत्तममध्यमकनिष्ठवेगपरिमाणमाह—वमन इति । अन्यत् सुगमम् ॥ १६ ॥

### प्रस्थमानम् ।

**वमने च विरेके च तथा शोणितमोक्षणे ।**
**सार्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः ॥ १७ ॥**

दी०—अथेदानीं वेगानां परिमाणमाह—अर्धमित्यनेन द्विगुणितं ज्ञेयोऽयमिति द्विगुणितं तथाहि—'जघन्यमध्यप्रवलेषु वेगाश्चत्वार इष्टा वमने षडष्टौ । दशैव ते द्वित्रिगुणा विरेके प्रस्थस्तथा शोणितमोक्षणे चे'ति ॥ १७ ॥

गू०—अर्धेनाधिकेन वर्तमानं त्रयोदशपलमित्युच्यते ॥ १७ ॥

### अथ दोषविशेषेण द्रव्यविशेषमाह—

**कफं कटुकतीक्ष्णोष्णैः पित्तं स्वादुहिमैर्जयेत् ।**
**सुस्वादुलवणाम्लोष्णैः संसृष्टं वायुना कफम् ॥१८॥**
**कृष्णा राठफलं सिन्धु कर्षं कोष्णजलैः पिबेत् ।**
**पटोलवासानिम्बैश्च पित्ते शीतजलं पिबेत् ॥ १९ ॥**
**सश्लेष्मवातपीडायां सक्षीरं मदनं पिबेत् ।**
**अजीर्णे कोष्णपानीयैः सिन्धु पीत्वा वमेत्सुधीः २०**

दी०—कटुकं मरिचादि । तीक्ष्णं राजिकादि । उष्णमग्निसंतप्तमित्यर्थः । उष्णवीर्यप्रायं द्रव्यं वा । स्वादुहिमैरिति । स्वादु मधुररसाधिकं द्रव्यं, हिमं शीतस्पर्शं शीतवीर्यं वा । सुस्वादुलवणाम्लोष्णैरिति । मधुररससहिताभ्यामम्ललवणरसाभ्यामित्यर्थः । उष्णमप्यत्र स्पर्शात् । संसृष्टं वायुना कफमिति । अतएव केवलानिलं वमने निषिद्धं इति पूर्वं दर्शितमेव । वाग्भटे तु—'कफे तीक्ष्णोष्णकटुकैः पित्ते स्वादुहिमैरपि । वमेत्स्निग्धाम्ललवणैः संसृष्टं मारुता कफे' इति ॥ यदेतद्दोषविशेषेण द्रव्यविषयमुक्तं तदर्थं योगसंधानमाह—कृष्णा, राठफलं मदनफलं, सिंधु सैन्धवं, एतच्च कल्कीकृतं उष्णपानीयेनालोड्य पीत्वा वमेदित्यर्थः । कृष्णादीनां मिलित्वा कर्ष इति केचित् । व्यवहाराच्च कृष्णादीनां पृथक्कर्षमात्रं देयमिति संप्रदायः । पटोलवासानिम्बै-

---

१-यद्यप्ययं पाठः 'अजीर्णे शीतपानीय'मित्यन्तिमश्लोकेऽध्यायसमाप्तौ मातृकासु दृश्यते परमस्माभिः योग्यत्वाद्यथास्थाने निवेशित इति बोध्यम् ॥

श्चेति । पटोलादिभिः कृत्वा शृतः शीतः कार्यः । पटोलादीनां मिलित्वा पलं, पाकार्थं जलादकं पादशेषं कषायं सक्षीरमदनं पिबेदिति । क्षीरेण मदनफलं कल्कीकृत्य तेनैव सहालोड्य पिबेत् इत्यभिप्रायः । मदनफलकल्कस्य कर्षः प्रक्षेपेण प्रचारः । अजीर्णेत्यादि । अत्र सैन्धवप्रक्षेपमाहुः ॥ १८–२० ॥

**गू०**—वमनादौ नाधिककटुकादिभिर्द्रव्यैः कफादिकं जयेदित्याह—कटुतीक्ष्णेन वमनद्रव्येण कफं जयेत् । स्वादुर्मधुरः । हिमं शीतलम् । तथा मधुरैः पित्तं जयेत् । सुस्वादुलवणाम्लोष्णैः संसृष्टं मिलितं वायुना कफं जयेत् । वमनायाह—कृष्णा-पिप्पली, राठफलैर्मदनफलैः, सिन्धु सैन्धवम् । कफवमनाय एतान् कोष्णजलैः पिबेत् । पटोलं पटोलपत्रम्, वासानिम्बौ प्रसिद्धौ । एतान् पित्ते शीतजलैः पिबेत् । सश्लेष्मवातपीडायां सक्षीरं सदुग्धं मदनफलं पिबेत् । क्वाथकल्कादीनां प्रमाणं पूर्वोक्तमेव ॥ १८–२० ॥

उत्तमशुद्धिपर्यन्तं वमनसूचनार्थं **वमनविधिमाह**—

**वमनं पाययित्वा च जानुमात्रासने स्थितम् ।**
**कण्ठमेरण्डनालेन स्पृशन्तं वामयेद्भिषक् ॥ २१ ॥**
**ललाटं वमतः पुंसः पार्श्वे द्वे च प्रदापयेत् ।**

**दी०**—वमनं वमनक्वाथं पाययित्वा भिषक् वामयेत् । कं। जानुमात्रे आसने स्थितं रोगिणम् । किंभूतं एरण्डनालेन कण्ठं स्पृशन्तं, तस्य वमतः ललाटं द्वे पार्श्वे धारयेत् । उक्तं च **वाग्भटे**—'पीते मुहूर्तमनुपालयेत् । तन्मना जातहृल्लासप्रसेकः छर्दयेत्ततः । अङ्गुलिभ्यामनायस्तो नालेन मृदुनाऽथवा । गलतालव्रुजत्वेन नाप्रवृत्तान् प्रवर्तयन् । प्रवर्तयन् प्रवृत्तांश्च जानुभ्यामासने स्थितः । उभे पार्श्वे ललाटं च वमतश्चास्य धारयेत्' इति ॥ २१ ॥

**गू०**—वमनकरणे विधानमाह—स्पष्टम् ॥ २१ ॥

## दुर्वान्तलक्षणमाह—

**प्रसेको हृद्ग्रहः कोठः कण्डूर्दुश्छर्दिते भवेत् ॥२२॥**

**दी०**—अथ दुर्वान्ते लक्षणमाह—दुश्छर्दिते दुर्वान्ते पुरुषे किंचिद्वान्ते इत्यभिप्रायः । प्रसेको मुखस्य कफस्राव इत्यर्थः । हृद्ग्रहो हृदयाविशुद्धिः । हृद्रोग इत्यपरे । कोठः क्षुद्ररोगे पठितः स यथा 'वरटीदष्टसंकाशः कण्डूमान् लोहिताम्रकफपित्तान् । क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञै'रिति । दुश्छर्दिता च वान्तिविधारणादेव प्रोक्ता । तस्मादपि कोठादयः संभवन्ति । तथाहि—'विसर्पकोठकुष्ठाक्षिकण्डूपाण्ड्वामयज्वराः । सकासश्वासहृल्लासव्यङ्गश्च श्वयथुर्वमे'रिति । वमेरिति वान्तिविधारणादित्यर्थः । अस्यान्ते तच्चिकित्सार्थं सार्धं श्लोकं केचित्पठन्ति । तद्यथा–'गण्डूषधूमानाहारान् रूक्षं भुक्त्वा तदुद्वमः । व्यायामं सुतिरस्रस्य शस्तं चात्र विरेचनं । सक्षारलवणं तैलमभ्यङ्गार्थे च शस्यत' इति प्रक्षेपकमन्यमानैरस्माभिरपि न लिखितं, यतो बहुपुस्तकेषु न दृश्यते ॥ २२ ॥

**गू०**—विक्रियाप्राप्तछर्दिलक्षणमाह—प्रसेको मुखक्षरणम् । हृद्ग्रहः पीडा, कोठो वरटीदष्टवन्मण्डलोत्पत्तिः, कण्डूः कण्डूतिः, दुश्छर्दित एतल्लक्षणम् ॥२२॥

## अतिवान्तेर्लक्षणमाह—

**अतिवान्ते भवेत् तृष्णा हिक्कोद्गारौ विसंज्ञिता ।**
**जिह्वानिःसर्पणं चाक्ष्णोर्व्यावृत्तिर्हनुसंहतिः ॥ २३ ॥**
**रक्तच्छर्दिः ष्ठीवनं च कण्ठपीडा च जायते ।**

**दी०**—इदानीं अतिवान्तेर्लक्षणान्याह—विसंज्ञिता मूर्च्छाभेदः, जिह्वानिःसर्पणं च भवति । जिह्वायाः निःसर्पणमत्र द्विविधं एकमन्तःप्रविष्टरूपं अपरं बहिर्निर्गमनविषयं अक्ष्णोर्व्यावृत्तिर्नेत्रयोः परिवर्तनं । अथवा व्यावृत्तिरित्याकुञ्चनं । हनुसंहतिरिति चिबुकचलनादिराहित्यं । ष्ठीवन्तं रक्तस्येत्यसकृच्च ॥ २३ ॥

**गू०**—अतिवान्तेः किं लक्षणं भवतीत्याह—विसंज्ञिता संज्ञानाशः, जिह्वानिःसरणं, अक्ष्णोर्व्यावृत्तिः, निःसरणमेव भ्रान्तिर्वा, हनुसंहतिः स्तब्धता पीडा वा, रक्तच्छर्दिः रक्तोद्गिरणम् । कफेन निःसरणम् । कण्ठे च पीडा व्यथा ॥ २३ ॥

## वमनोत्पन्नरोगचिकित्सामाह—

**वमनस्यातियोगे तु मृदु कुर्याद्विरेचनम् ॥ २४ ॥**
**वमनान्तः प्रविष्टायां जिह्वायां कवलग्रहः ।**
**स्निग्धाम्ललवणैर्हृद्यैर्घृतक्षीररसैर्हितः ॥ २५ ॥**
**फलान्यम्लानि खादेयुस्तस्य चान्येऽग्रतो नराः ।**
**निःसृतां तु तिलद्राक्षाकल्कं लिप्त्वा प्रवेशयेत् २६**
**व्यावृत्तेऽक्षिणि घृताभ्यक्ते पीडयेच्च शनैः शनैः ।**
**हनुमोक्षे स्मृतः स्वेदो नस्यं च श्लेष्मवातहृत्॥२७॥**
**रक्तपित्तविधानेन रक्तच्छर्दिमुपाचरेत् ।**

**धात्रीरसाञ्जनोशीरलाजाचन्दनवारिभिः ॥ २८ ॥**
**मन्थं कृत्वा पाययेच्च सघृतक्षौद्रशर्करम् ।**
**शाम्यन्त्यनेन तृष्णाद्या पीडाश्छर्दिसमुद्भवाः ॥२९॥**

दी०—अथ वमनातिशयोत्पन्नानां रोगाणां चिकित्सामाह—स्निग्धाम्ललवणैर्हृद्यैर्घृतमनतिशीलनेन प्रभवा तृष्णादिरोगा एभिर्विहितप्रयोगैः शाम्यन्तीत्यभिप्रायः । कथं यथेत्याह—यदा वमनातियोगो भवति तदा मृदुविरेचनं दद्यात् । मृदुविरेचनं मस्तुक्षीरादिना । अपरमपि द्विविधप्रकारनिःसर्पितजिह्वाया योगचतुष्टयमुक्तं तद्व्याख्यानमाह—वमनान्तःप्रविष्टायामित्यादि । अन्तःप्रविष्टायामिति संकुचितायां, अत्र कवलग्रहाः स्निग्धाद्यैः कल्पिताः हिताः पथ्या इत्यर्थः । स्निग्धं तैलादि, अम्लो अम्लिका मातुलुङ्गादिः, लवणः सैन्धवादिः । एतेषां मध्ये हृद्यैर्मनोह्लादकरैरित्यर्थः । घृतक्षीररसमैरिति । घृतक्षीरमिलितैरित्यर्थः । ननु स्नेहग्रहणेनैव घृतग्रहणप्राप्तिरेव तत्कथं पुनर्घृतग्रहणं ? उच्यते, स्निग्धशब्देनत्युक्ते पुनर्घृतोपादानं स्नेहक्रियातिशयद्योतनार्थं । अपरमप्युपायमाह-फलानीत्यादि । अम्लानीति जम्बीरनिम्बुकप्रभृतीनि तस्याग्रत इति । तस्य जिह्वार्तस्य पुरुषस्येत्यर्थः । पुरतोऽग्रतः स्थित्वेति शेषः । अन्यनरा इति अन्यपुरुषाः । अनेन जिह्वा चलिता भवतीत्यभिप्रायः । एतच्चान्तःप्रविष्टायां बहिर्निःसृतायां च जिह्वायां बोद्धव्यम् । अथ निःसृतायाः पृथग्योगद्वयमाह—निःसृतामित्यादि । निःसृतां बहिर्निर्गतां जिह्वामिति शेषः । तिलद्राक्षाकल्कमत्र साम्येन केवलमाहुः । अपरमपि व्यावृत्तेऽक्षिण योगमाह—घृताभ्यक्त इति । व्यावृदित्यपि पाठान्तरं । व्यावृदिति जिह्वा पूर्वकल्कादिना चलितेत्यर्थः । यदि चलिता जाता द्राक्षाक्षीरघृताभ्यक्ते सति जिह्वां शनैः शनैः कृत्वा पीडयेत् । अन्तर्नयेदिति भावः । हनुमोक्षार्थमप्याह हनुमोक्षे स्मृतः स्वेद इत्यादि । स्वेदोऽत्र चतुर्णां मध्ये विहितस्वेद एव कार्यः । नस्यमपि तद्विहितम् । तच्च श्लेष्मवातघ्नद्रव्यरहितमित्यर्थः । तेन श्लेष्मवातघ्नं यन्नस्यं तद्देयं; अपरे योगमेनं श्लेष्मवातघ्नं भवतीति व्याख्यानयन्ति । यतः कफवातनिर्हरणत्वेन हनुमोक्षः स्यात् तन्मूलत्वात् । अन्ये श्लेष्मवातघ्नं भवतीति व्याख्यानयन्ति । यतः कफवातनिर्हरणत्वेन हनुमोक्षः स्यात्, तन्मूलत्वात् अन्ये श्लेष्मवातह्वदित्यनेनापरमप्युपायं कथयन्ति । तद्विचार्य योज्यानीति । रक्तच्छर्द्यामपि योगमाह—रक्तपित्तविधानेनेत्यादि । रक्तपित्तविधानं रक्तपित्तचिकित्सायामन्यतमेन ज्ञातव्यं । अन्योपद्रवाणां चिकित्सितमाह—धात्रीरसाञ्जनोशीरेत्यादि । धात्री आमलकीफलं, रसाञ्जनं दार्वीक्वाथसमुद्भवं, उशीरं मृणालं, लाजा भृष्टधान्यप्रभवाः । चन्दनं रक्तं । वारिभिरिति । एतेषां वारि तोयं ग्राह्यं । श्लक्ष्णत्वात् कल्कत्वाच्च ॥ २४–२९ ॥

गू०—वमनातिव्याप्तौ तद्रोगशान्त्यर्थं चिकित्सितमाह—वमनस्यातियोगश्चेत्तदा रेचनं कुर्यात् । वमनतियोगे जिह्वाप्रतीकारमाह—वमने अन्तःप्रविष्टायां जिह्वायां स्निग्धाम्ललवणैर्घृतक्षीररसैः कवलग्रहो हितः । तस्याग्रतोऽनेके नराः अम्लनिम्बुकादीनि फलानि खादेयुः । सुगमम् । व्यावृत्तेऽक्षिण चिकित्सितमाह—व्यावृत्तेक्षिण प्रसारितेऽक्षिण घृताभ्यक्ते शनैः पीडयेत् । हनुमोक्षे क्रियामाह—स्तम्भाद्धनुमोक्षकरणे स्वेदः स्मृतः । श्लेष्मवातहरं नस्यम् । अथ रक्तच्छर्दिप्रतीकारमाह—रक्तपित्तविधानेन रक्तपित्तचिकित्सितेन रक्तच्छर्दिमुपाचरेत् चिकित्सेत् । अतिच्छर्दिजनिततृष्णाचिकित्सितमाह—धात्री आमलकी, रसाञ्जनं दार्वीक्वाथोद्भूतं, उशीरं प्रसिद्धं लाजा धान्यजाः, चन्दनं शीतं, वारि नेत्रवालकम् । एभिर्मन्थं कृत्वा पाययेत् । किंभूतं मन्थं ? सघृतं क्षौद्रशर्करं, घृतं गव्यं, क्षौद्रं मधु, शर्करा सिता एतैः सहितम् । अनेन मन्थेन या तृष्णास्ताः शाम्यन्ति । तथा छर्दिसमुद्भवाः पीडाः शाम्यन्ति ॥ २४–२९ ॥

**अथ सम्यग्वान्तलक्षणमाह—**

**हृत्कण्ठशिरसां शुद्धिर्दीप्ताग्नित्वं च लाघवम् ।**
**कफपित्तविनाशश्च सम्यग्वांतस्य लक्षणम् ॥ ३० ॥**

दी०—हृच्छुद्धिः हृदयलघुतारूपा, कण्ठशुद्धिः कण्ठे पाटवं कण्ठस्थश्लेष्मापगमात् । शिरःशुद्धिः शिरोलघुत्वं तत्स्थपीडादिविनाशात् । दीप्ताग्नित्वमिति । ननु वान्तस्य सहसा मन्दोऽग्निर्भवति । उक्तंच—'संशोधनास्रविस्रावस्नेहयोजनलङ्घनैः । यात्यग्निर्मन्दतां तस्मात् क्रमं पेयादिकं भजेत्' इति । तत्कथमत्र दीप्ताग्नित्वम् ? इति । उच्यते—अत्र शोधनेनाग्निरुपघातो भवति नाग्नेर्हानिः, तस्योपघातस्य पेयादिपथ्यदानेन पुनर्दीप्तत्वात् दीप्तत्वम् । उक्तंच दृढबलेन—'पेयां विलेपीमकृतं कृतञ्च यूषं रसं त्रीनुभयं तथैकम् ।

क्रमेण सेवेत नरोऽन्नकालं प्रधानमध्यावरशुद्धिशुद्धः' इति। तथाऽणुरग्निस्तृणगोमयाद्यैः संधुक्षमाणो भवति क्रमेण। महान् स्थिरः सर्वसमं तथैव शुद्धस्य पेयादिभिरन्तराग्निरिति। तस्माद्दीप्ताग्नित्वं युक्तं, तथा लाघवं शरीरस्य, अतएव कफपित्तविनाशश्च इति। इत्यनेन शरीरपाटवमप्युक्तम्। अथवा वान्तिसमये तद्दिन एवाग्निहानिर्दुर्वान्ते च। सम्यग्वान्ते अपरदिने च दीप्तोऽग्निरित्यदोषः। अतएव वक्ष्यमाणश्लोके 'अजीर्णादिकं वर्जयेत्' सुधीरिति ग्रहणात्॥ ३०॥

**गू०**—अथानन्तरं सम्यग्वान्तस्य पुरुषस्य इदं लक्षणं भवति तदाह—हृत्कण्ठशिरसां शुद्धिः कफादिरहितत्वम्। अग्निर्दीप्तः, लाघवं देहस्य कफपित्तविनाशश्च इति॥ ३०॥

### अथ वान्तस्य पथ्यमाह—

**ततोऽपराह्णे दीप्ताऽग्निं मुद्गषष्टिकशालिभिः।**
**हृद्यैश्च जाङ्गलरसैः कृत्वा यूषं च भोजयेत्॥ ३१॥**

**दी०**—ततोऽनन्तरं शुद्धेरनन्तरमित्यर्थः। दीप्ताग्निं, अपराह्णे अपरदिने तृतीययामावसाने वा। अतएव दीप्ताग्नित्वमिति भावः। मुद्गषष्टिकशालिभिर्भोजयेत्। मुद्गादयोऽत्र पेयादिकरणोपयोगित्वेन मुद्गादीनां यूषपेयाविलेप्यः कार्याः। अदीप्ताग्निश्चेति द्वितीये दिवसे। उक्तं च—'ततः सायं प्रभाते वा स्नातः शुद्धान् सुखाम्बुना। पुराणरक्तशालीनामस्नेहलवणौषणम्। भुञ्जानो रक्तशाल्यन्नं भोजेत्पेयादिकं क्रमम्' इति। तथा यूषं च परं जाङ्गलरसैः हृद्यैः कृत्वा भोजयेत्। तेनाऽयमर्थः—यूषरसादीनामकृतकृतत्वेन हृद्यत्वं ज्ञेयम्। उक्तंच—'पेयां विलेपीमकृतं कृतञ्च यूषं रसं त्रीनुभयं तथैकम्। क्रमेण सेवेत नरोऽन्नकालं प्रधानमध्यावरशुद्धिशुद्धः' इति। 'ज्ञेयाः कृताकृतास्ते च स्नेहादियुतवर्जिता' इति। षष्टिकोऽत्र गौरषष्टिकः 'गौरश्चासितगौरत' इति वचनात्। शालिरत्र रक्तशालिः एवंविधा महाशाल्यादयः॥ ३१॥

**गू०**—पथ्यविधानमाह—जाङ्गलरसैर्मांसरसैर्लावैः॥ ३१॥

### सुवान्तस्यैते पीडायथँ न भवन्ति इत्याह—

**तन्द्रा निद्रास्यदौर्गन्ध्यं कण्डूश्च ग्रहणी विषम्।**
**सुवान्तस्य न पीडायै भवन्त्येते कदाचन॥ ३२॥**

**दी०**—तन्द्रा अर्धोन्मीलननेत्रत्वम्, निद्रा प्रसिद्धा, कण्डूः प्रख्याता, आस्यदौर्गन्ध्यं मुखदुर्गन्धता, विषं विषजनितोपसर्गाः। यदुक्तं—'कफप्रसेकं स्वरभेदनिद्रातन्द्रास्यदौर्गन्ध्यविषोपसर्गाः। गुरुत्वकण्डूग्रहणीविकारा न सन्ति जन्तोर्वमतः कदाचित्' इति। कदाचन इति न कस्मिंश्चित्काले भवन्तीत्यर्थः। यथा—'छिन्ने तरौ पुष्पफलप्ररोहा यथा विनाशं सहसा व्रजन्ति। तथा हृतश्लेष्मणि छर्दने च तज्जा विकाराः प्रलयं प्रयन्ति' इति॥ ३२॥

**गू०**—सुवान्तस्य तन्द्राद्या न भवन्तीत्याह—तन्द्रा तथा निद्रा, आस्यदौर्गन्ध्यं मुखदुर्गन्धता। कण्डूः खर्जूः ग्रहणी संग्रहणी विषं स्थावरं कृत्रिमं च सुवान्तस्यैते पीडायै न भवन्ति॥ ३२॥

### वमने यन्निषिद्धं तदाह—

**अजीर्णं शीतपानीयं व्यायामं मैथुनं तथा।**
**स्नेहाभ्यङ्गं प्रकोपं च दिनैकं वर्जयेत्सुधीः॥ ३३॥**

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण प्रणीतायां शार्ङ्गधरसंहितायामुत्तरखण्डे वमनविधिर्नाम तृतीयोऽध्यायः॥ ३॥

---

**दी०**—कृतवमनस्य पथ्यमाह—अजीर्णमिति। पेयाद्यन्नस्याजीर्णमतिमात्रपानात्, तत्राग्नेर्मन्दत्वात्। शीतपानीयं शीतजलस्य स्रोतःशुद्धेरकरणात्। अत एवोक्तं—'उष्णोदकोपचारी स्याद्ब्रह्मचारी क्षपाशयः। अवेगरोधी व्यायामक्रोधशोकहिमातपान्॥ प्रवातयानयानाध्वभाष्यात्यासनसंस्थितिः। निद्रात्युच्चोपधानाहःस्वप्नधूमरजांसि च' इति। अन्यत्रोक्तं—'तृष्णायामल्पमुष्णाम्बु पिबेद्वातकफज्वरे। तत्कफं विलयं नीत्वा तृष्णामाशु निवर्तयेत्॥ उदीर्य चाग्निं स्रोतांसि मृदुकृत्य विशोधयेत्। लीनपित्तानिलस्वेदशकृन्मूत्रानुलोमनम्॥ निद्राजाड्यारुचिहरं प्राणानामवलम्बनम्। विपरीतमतः शीतं दोषसंघातवर्धनम्' इति। व्यायामं शरीरायासजनकं कर्म दिनैकमित्युपलक्षणं तेनाऽन्यदपि कालं बोद्धव्यम्। यदुक्तं—'वमनादिषु धानेषु यावत्कालं तु गच्छति। तावत् परिहर्तव्यं शीततोयादिमैथुनम्' इति॥ ३३॥

इति श्रीवात्स्यान्वयभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायामुत्तरखण्डे वमनाध्यायः॥ ३॥

गू०—अजीर्णे च शीतपानीयं वर्जयेत् । उष्णमेव प्रशस्तम् । व्यायामं श्रमादिकम् । मैथुनं स्त्रीसेवनम्, स्नेहाभ्यङ्गं तैलमर्दनम्, विसूच्यादौ प्रशस्तं न कृत्रिमं वमने प्रकोपं क्रोधं सुधीः पण्डितः एतत्सर्वं दिनैकं वर्जयेत् ॥ ३३ ॥

इति श्रीकाशिरामवैद्यविरचितायां गूढार्थदीपिकायामुत्तरखण्डे पञ्चकर्मणि वमनप्रकरणं समाप्तम् ॥

## चतुर्थोऽध्यायः ।

अथ विरेचनाध्यायं व्याख्यास्यामः—

### अथ विरेचनविधिः ।

दी०—सम्बन्धस्तु प्रागुक्त एव ।

**विरेचनविषयमाह—**

**स्निग्धस्विन्नस्य वान्तस्य दद्यात्सम्यग् विरेचनम् ।**

दी०—पूर्वस्नेहपानयुक्तस्य स्वेदयुक्तस्य चेत्यर्थः । वान्तस्येति वमनं कृत्वा । एतेन स्नेहपानादीनामनन्तरेण विरेचनं न कार्यमित्यभिप्रायः । तथाहि—'पित्तमत्युल्बणीकृत्य स्नेहस्वेदे कृते सति । वमने च कृते पूर्वमतः सम्यग्विरेचयेत्' इति । वमनान्तरमपि स्निग्धस्विन्नस्येति । यदुक्तं—'कर्मणां वमनादीनामन्तरं त्वन्तरे पुनः । स्नेहस्वेदौ प्रयुञ्जीत संशोधनमनन्तरम्' इति । स्निग्धस्विन्नमत्र किमर्थं तत् दृष्टान्तेन द्रढयति । यथा 'स्नेहस्वेदावकृत्वाऽग्रे यस्तु संशोधनं पिबेत् । दारुशुष्कमिवानामं देहस्तस्य विशीर्यत' इति ॥

गू०—वमनानन्तरं विरेचनस्य विहितत्वाद्विरेचनमाह—स्निग्धस्य पीतस्नेहस्य, स्विन्नस्य कृतस्वेदस्य ॥

**वमनेऽप्यकृते सति दोषमाह—**

**अवान्तस्य त्वधः स्रस्तो ग्रहणीं छादयेत्कफः ॥ १ ॥**
**मन्दाग्निं गौरवं कुर्याज्जनयेद्वा प्रवाहिकाम् ।**
**अथवा पाचनैरामं बलासं च विपाचयेत् ॥ २ ॥**
**स्निग्धस्य स्नेहनैः कार्यं स्वेदैः स्विन्नस्य रेचनम् ।**

दी०—अवान्तस्येत्यादि । अधःस्रस्तोधः प्राप्तः रेचनद्रव्यप्रभाववशात् । एतादृशः कफस्तदा ग्रहणीमाच्छादयेत् । ग्रहणीमग्निस्थिताश्रस्थानं । यदुक्तं—'अग्न्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मते'ति । अतएवादौ वमनेनात्र कफनिग्रहो विधेयः । सोऽप्याश्रयसमाश्रयणात्स्रोतोऽवरोधहेतुः न केवलं ग्रहणीच्छादनं करोति । मन्दाग्निमिलादि । अत्र गौरवं शरीरस्येति । प्रवाहिकातीसारभेदः । अथ कार्यान्तरमाह—पाचनैरिति । पाचनद्रव्यैः साममित्यपरिपक्वरसं ॥ तथाहि—'जठरानलदौर्बल्यादविपक्वस्तु यो रसः । स आमसंज्ञको देहे सर्वदोषप्रकोपक' इति । न केवलमामं श्लेष्माणं च विपाचयेत् । एतेन कृतवमनस्यापि पूर्वं पाचनं दत्त्वा पश्चाद्विरेचयेदित्यभिप्रायः । अथवेति ग्रहणात्तेन वमनं विना पाचनं देयमित्यर्थः । संशोधनक्रमेऽपि पाचनस्य प्राधान्यमुक्तं । तथा तीसटे चोक्तं—'प्राक् पाचनं स्नेहविधिर्विधेयः स्वेदस्ततः स्याद्वमनं विरेकः । निरूहणं स्नेहनबस्तिकर्म नस्यं क्रमश्चेति भिषग्वराणाम्' इति । एषां क्रमाभिप्रायेण विनापि विरेचनस्य पूर्वं पाचनं कर्तव्यमेवेति व्यवहारः सङ्गत एव । अथ पाचनमभिधाय विरेचनमपि कस्य कथं दातव्यमित्याह—स्निग्धस्येति । पूर्वकृतस्निग्धपाचनस्य, कैः स्नेहनैर्घृतादिभिः । न केवलं स्निग्धस्य रेचनं किंतु स्वेदैरपि स्विन्नस्य स्वेदितस्य विरेचनं प्रशस्तं । यद्वा स्नेहनैः स्वेदैरिति संबन्धः । स्नेहस्वेदैरित्यनेन दोषाणां सुखमुत्पाटनं सूचितं । यतः 'स्नेहस्वेदैः प्रचलिता रसैः स्निग्धैरुदीरिताः । दोषाः कोष्ठगता जन्तोः सुखं हंति विरेचनै'रिति । पूर्वमुक्तमप्यदः पुनरेव द्रढयति न दोषः पौनरुक्त्येन । केचिद्वक्ष्यमाणेन शरदृताविति श्लोकेन मिलित्वा व्याख्यानयन्ति । तत्र शरदृतौ स्निग्धस्य स्नेहनैः कृत्वा विरेचनं कार्यं । वसन्ते च स्वेदैः स्विन्नमेव रेचनं देयं । ननु स्निग्धस्य इति न सर्वमतम् ॥ १ ॥ २ ॥

गू०—अधःस्रस्तः पतितः, ग्रहणीं पित्तधारिणीं कृत्वा कफ आच्छादयेत् । यदा कफः ग्रहणीमाच्छादयेत् तदा किं कुर्यात् इत्याह—मन्दाग्निं गौरवं च कुर्यात् । प्रवाहिकातीसारभेदस्तां जनयेत् । अधस्रस्तस्य कफस्य प्रतीकारमाह—अथवा पक्षान्तरे । आमं बलासं कफं च पाचनैः शुण्ठ्यैरण्डादिभिः पाचयेत् । यद्वा स्नेहनैर्घृतदुग्धादिभिः स्निग्धस्य स्वेदितस्य रेचनं कार्यमिति विधिः तत्रोच्यते । वमनाद्विरेचनं कदा देयमित्यपेक्षायामत्रानुक्तमिति लिख्यते । तत्र भेदः । सम्यक्प्रवृत्ते वमने सप्तरात्रे गते सति । सुसंस्कृतशरीरस्य प्रदातव्यं विरेचनं' । चरके च 'वातं षडह-

संसृष्टं पुनः संस्नेहितं तथा । उष्णं लघु त्र्यहं भुक्तैः षोडशेऽह्नि विरेचयेत्' । षोडशदिने यद्वा पक्षान्तरे पक्षाद्विरेको वान्तस्येति सुश्रुतवचनं । अस्यार्थः वातं-कृतं सम्यग्वमनं षडहसंसृष्टं षडहेत्युक्तवमनं पुनस्त्र्यहं संस्नेहितं पुनस्त्र्यहमुष्णकृतस्वेदं पुनस्त्र्यहं लघुभुक्तं अथैनं वांतितं भूयः स्नेहस्वेदोपपादितं । श्लेष्मकाले गते ज्ञात्वा कोष्ठं सम्यग्विरेचयेत्' । वाग्भटे एवं लिखितं । अस्यार्थः अथैनं पुरुषं वामितं कृतवमनं षडहानन्तरं स्नेहस्वेदोपपादितं भूयः पुनः श्लेष्मकाले द्वादशदिवसे गते सति पुनस्त्र्यहं लघु भक्तं षोडशे ह्येव कोष्ठं सम्यग्विरेचयेदिति वाग्भटार्थः ॥ १ ॥ २ ॥

**दी०**—क्षमते तु—

## विरेचनकालमाह—

**शरदृतौ वसन्ते च देयं शुद्धौ विरेचनम् ॥ ३ ॥**
**अन्यदात्ययिके कार्यें स्वेदनं शीलयेद्बुधः ।**

**दी०**—अत्र शुद्धौ चास्वस्थस्य शोधनाय शरदृतौ वसन्ते च विरेचनं देयं । चकाराद्वर्षास्वपि । तदुक्तम्—'शीतोद्भवं दोषचयं वसन्ते विशोधयन् ग्रीष्मजमभ्रकाले। घनात्यये वार्षिकमाशु सम्यक् प्राप्नोति रोगानृतुजान्न जातु' इति । विरेचनमित्यनेन विशेषेण रेचनं शरदादि-त्रिष्वेव। अन्यदा हिमशिशिरग्रीष्मे काले अकार्यें तस्मिन् विरेचनं कृते सति पूर्वं पश्चाद्विहितशोधनं शीलयेदित्य-भिप्रायः । अतएव बुध इति कालविशेषज्ञो दोषविशे-षज्ञश्च ॥ ३ ॥

**गू०**—इदानीं विरेचनयोग्ये विरेचनकालमाह—शरदृतौ आश्विनकार्तिके तथा वसन्ते चैत्रवैशाखे देहशुद्धौ भिषग्विरेचयेत् । अन्यदा अन्यस्मिन्काले वा सत्यपि रोगोत्पत्तौ बुधः शोधनं शीलयेत् ॥ ३ ॥

**दी०—शरीरशुद्धौ शोधनमुक्तं तस्य फल-माह—**

**दोषाः कदाचित्कुप्यन्ति जिता लङ्घनपाचनैः ॥४॥**
**ये तु संशोधनैः शुद्धा न तेषां पुनरुद्भवः ।**

**दी०**—लंघनमत्रोपवासः, पाचनस्य पृथगुपादा-नात् । सप्तसु शमनेषु द्वयोर्ग्रहणं प्रधानत्वात्। ये तु संशोधनैः शुद्धा दोषास्तेषां न पुनरुद्भवः । अयमर्थः लङ्घनादयः शमनत्वात् संचितान् दोषान् मूलान् नोन्मूलयंति किंतु शमयन्ति ते कदाचित्स्वल्पहेतुनाऽपि कुप्यन्ति । ये शोधनैः शुद्धाः तेषां पुनरुद्भवो न भवति छिन्नसंचयत्वात् । उक्तं च सुश्रुते—'सञ्चयोपहता दोषा लभन्ते नोत्तरा गतीः' इति । बहुपुस्तकेषु 'दोषाः कदाचित्कुप्यन्ति' अमुं श्लोकं 'पित्तं विरेचनं युञ्ज्यात्' अस्याग्रे पठन्ति तदसङ्गतमेव शोधनपरतैवास्य श्लो-कस्य पूर्वश्लोकः । 'शरत्काले वसन्ते च' इत्ययं शोध-नपर एव तेन शोधनफलार्थी एवायं श्लोकः । तेन—'शरत्काले वसन्ते च' अस्य श्लोकस्याग्रे 'दोषाः कदा-चित्कुप्यन्ति' अयं श्लोकः पठनीयः । विरेचनस्याऽपि शोधनत्वाद्यथाकथञ्चित्समाधेयं वा ॥ ४ ॥

**गू०**—दोषनाशे शोधनोत्कृष्टमाह—सुगमम् ॥४॥

## अथ पित्तादौ विरेचनम् ।

**पित्ते विरेचनं युञ्ज्यादामोद्भूते गदे तथा ॥ ५ ॥**
**उदरे च[1] तथाऽध्माने कोष्ठशुद्ध्यै विशेषतः ॥**

**दी०**—अथ विरेचनं केषां नियतं तानाह—'पित्त-विरेचनमिति । पित्तजनितानामुपद्रवाणां पित्तात्म-कानां नियतो विनाश इति केवलपित्तेऽपि विरेचनम-भिहितम् । तथाच तन्त्रान्तरेऽपि—'शरीरजातानां दोषाणां क्रमेण परमौषधं । बस्तिर्विरेको वमनं तथा तैलघृतं मध्विति' । आमोद्भूते गदे तथेति । आमजनि-तव्याधौ । आमवातविकारादावित्यर्थः । उदर इति उदररोगरूढिः । आध्मानोदरापूरः । कोष्ठाशुद्धाविति । कोष्ठस्य अशुद्धिः बद्धकोष्ठ इति प्रसिद्धिः । विशेषत इत्यनेनैवमादीनामपरेषामपि विरेचनं विशेषेण कुर्या-दित्यर्थः । अथ शोधनस्य प्राधान्यविषयत्वेन विरेच-नमुख्यत्वमाह—अयं श्लोकः शोधनपदग्रहणेनान्य-च्छोधनपरोऽपि भवति । अत्राचार्येण लङ्घनपाचनै-रित्युक्तेन वमनविषयस्य निषेधपरत्वाद्विरेचनाध्याये स्वीकृतः । ननु येऽपि लङ्घनपाचनैर्जितास्ते पुनः कथं संभवन्ति ? उच्यते । कदाचिदतिस्वल्पहेतुलाभेन जिता अप्यजिताः दोषमूलानुच्छेदात् मूलभूताशय-गतदोषदूष्यसमुद्भवात् सम्यग्जिताः अल्पमपि हेतुं प्राप्य पुनः कुप्यन्तीति भावः । तेन तेषां पुनरुद्भव इति । संशोधनेन मूलदोषजन्यादल्पहेतुना न कदापि प्रकोपः बलवत्तरहेतुना भवत्येव ॥ ५ ॥

---

१—चकारात् पित्तसंयोगेऽपि पित्तोल्बणे योज्यं—उक्तंच वाग्भटे—'कफे विदध्याद्वमनं संयोगे वा कफो-ल्बणे । तद्वद्विरेचनं पित्ते' इति ।

गू०—येषु रोगेषु विरेचनं दीयते तानाह—पित्ते पित्तविकारे, आमोद्भूते आमवातादौ । उदरे उदररोगे । आध्माने कोष्ठाशुद्धौ बद्धकोष्ठादौ ॥ ५ ॥

इदानीं ये विरेचने निषिद्धास्तानाह—

**बालवृद्धावतिस्निग्धः क्षतक्षीणो भयान्वितः ॥ ६ ॥**
**श्रान्तस्तृषार्तः स्थूलश्च गर्भिणी च नवज्वरी ।**
**नवप्रसूता नारी च मन्दाग्निश्च मदात्ययी ॥ ७ ॥**
**शल्यार्दितश्च रूक्षश्च न विरेच्या विजानता ।**

दी०—विरेच्या इति । विशेषेण रेच्या न भवन्तीत्यभिप्रायेणाल्परेचनस्या प्राप्तिरेव । अतएव बालवृद्धयोरप्ययं निषेधः सामान्यः । विशेषेण तु विरेकसाध्यव्याध्युपग्रस्तयोः किंचिद्देयमित्युक्तं । तथाच—'अग्निक्षारविरेकैस्तु बालवृद्धौ विवर्जयेत् । तत्साध्येषु विकारेषु मृद्वीं कुर्यात् लघुक्रियाम्' इति । निषिद्धाचरणमन्यत्राप्युक्तं-'अत्यन्तपित्ताद्विपरीतदेहान् विरेचयेत्तानपि मन्दमन्दम्' इति । तानपि निषिद्धबालवृद्धादीन् । अतिस्निग्ध इत्यतिस्नेहपानादियुक्तः । तथाहि 'नवाऽतिस्निग्धकायस्य दद्यात्स्नेहविरेचनं । दोषाः प्रभाविता भूयो लीयन्ते तेन वर्त्मसु' इति । क्षतक्षीणा इति । धातुशोषणत्वेन शोषी कथितः । सच राजयक्ष्मभेदः । भयान्वितो भययुक्तः । भयग्रहणत्वेन शोकाभितप्तस्य दीनस्य वा निषेधो दर्शितः । यदुक्तं 'क्षीणस्तथा रूक्षितबालवृद्धदीनोऽथ शोषी भयशोकतप्तः' इत्यादि । स्थूलो बहुमेदोन्वितः । मन्दाग्निरपि कफोल्बणत्वात् । रूक्षो वातोल्बण इति । अथवा रूक्ष इत्यस्निग्धः । तथाह्युक्तं 'विरूक्षं स्नेहसात्म्यं तु भूयः संस्निह्य रेचयेदि'ति । विजानतेत्यनेन विरेचनविषयविकल्पविशेषज्ञेन वैद्येनेत्यर्थः । यतः 'विरेचनैर्यान्ति नरा विनाशमज्ञप्रयुक्तैरविरेचनीया' इति ॥ ६ ॥ ७ ॥

गू०—अविरेचनयोग्यानाह—एते बालादयो विजानता विशेषज्ञपुरुषेण न विरेच्याः ॥ ६ ॥ ७ ॥

विरेचनयोग्यानाह—

**जीर्णज्वरी गरव्याप्तो वातरक्ती भगन्दरी ॥ ८ ॥**
**अर्शःपाण्डूदरग्रन्थिहृद्रोगारुचिपीडिताः ।**
**योनिरोगप्रमेहार्ता गुल्मप्लीहव्रणार्दिताः ॥ ९ ॥**
**विद्रधिच्छर्दिविस्फोटविसूचीकुष्ठसंयुताः ।**
**कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः ॥ १० ॥**



**प्लीहशोथाक्षिरोगार्ताः क्रिमिक्षीणानिलार्दिताः ।**
**शूलिनो मूत्रघातार्ता विरेकार्हा नरा मताः ॥ ११ ॥**

दी०—विरेकसाध्यान् रोगानाह—जीर्णज्वरादयो विरेकार्हाः नरा मताः । आचार्याणामिति शेषः । जीर्णज्वरीति पुराणज्वरी तस्य विरेकसाध्यत्वात् । गरव्याप्त इति गरं कृत्रिमं विषं तेन व्याप्तः दुःखितः । तथाऽर्शादिपीडिताः । तथा योनिरोगादिभिरर्दिताः । तथा विद्रध्यादियुताः । तथा कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विता इति । कर्णादिजनितामयान्विता इत्यर्थः । तेनामयशब्दो कर्णादिभिः सह संबध्यते । प्लीहशोथाक्षिरोगार्ता इति प्लीहादिरोगव्याप्ता इत्यर्थः । क्रिमिक्षीणानिलार्दिता इति । कृम्यादिभिरर्दिताः पीडिताः । विरेकार्हा इति विरेचनयोग्या इत्यर्थः ॥ ८–११ ॥

गू०—जीर्णज्वरी चिरज्वरी, गरव्याप्तो विषयुक्तः, उदरं उदररोगिणं, ग्रन्थिरोगः । ननूदरं पूर्वमुक्तमत्राप्युच्यते तत्कथं न पुनरुक्तिः ? उच्यते—उदरे पुनरुक्तिर्विरेचनार्थं । यद्वा उदरग्रन्थिर्भिन्नरोगः । स्पष्टमन्यत् ॥ ८–११ ॥

अथ विरेचनज्ञानार्थं कोष्ठभेदानाह—

**बहुपित्तो मृदुः कोष्ठो बहुश्लेष्मा च मध्यमः ।**
**बहुवातः क्रूरकोष्ठो दुर्विरेच्यः स कथ्यते ॥ १२ ॥**

दी०—बहुपित्तः कोष्ठः मृदुः, बहुकफो मध्यः, बहुवातः क्रूरः । मध्यमेन शोधनेन हीनयोगी क्रूरः । अतियोगी मृदुः, सम्यग्योगी मध्यः । संसर्गसन्निपातजकोष्ठे योगवाहित्वं कफस्य ज्ञेयं वचनबलात् । यदाह खारणादिः—'वातोल्बणा स्याद्ग्रहणी क्रूरकोष्ठस्य देहिनः । पित्तला मृदुकोष्ठस्य योगवाही तयोः कफः' इति । तेन वातकफाभ्यां क्रूरः, मध्यो वातपित्ताभ्यां, सन्निपाताच्च मृदुः । ननु बहुवातश्लेष्मभ्यां क्रूरः, इति सुश्रुतेन बहुकफस्य क्रूरत्वमुक्तम् । इह तु मध्यमत्वमिति विरोधः ? नैवं—सुश्रुतवाक्यस्य संसर्गपरत्वादिति बोपदेवपण्डिताः । दुर्विरेच्य इति कृच्छ्रात्साध्यादिकोऽप्यविरेच्यः ॥ १२ ॥

कोष्ठानुरूपां मात्रामाह—

**मृद्वी मात्रा मृदुकोष्ठे मध्यकोष्ठे च मध्यमा ।**
**क्रूरे तीक्ष्णा मता द्रव्यैर्मृदुमध्यमतीक्ष्णकैः ॥ १३ ॥**

दी०—मृद्वादिद्रव्यैः मृद्वादिकोष्ठकेषु मृद्वादिमात्रा मता, आचार्याणामिति शेषः । ननु मृदुद्रव्यैर्मृद्वाद्या मात्रा भवति किमर्थं मृद्वादिमात्रेतीत्यादि ? उच्यते—हीनयोगातियोगसम्यग्योगाय, ते च वैद्याधीनाः । उक्तंच—'अल्पस्यापि महार्थत्वं प्रभूतस्याल्पकर्मतां । कुर्यात् संश्लेषविश्लेषकालसंस्कारयुक्तितः' इत्यादि मात्राज्ञानार्थमुक्तम् ॥ १३ ॥

गू०—विरेचने मृदुमध्यक्रूरकोष्ठमाह—मृद्विति । मृदुमध्यमतीक्ष्णकैर्द्रव्यैर्मृद्वीमात्रादयो मताः। सुगमम् १३

**मृद्वादिद्रव्याणि कानि तानि इत्यत आह—**

**मृदुर्द्राक्षापयश्चाम्बुतैलैरपि विरिच्यते ।**
**मध्यमस्त्रिवृतातिक्ताराजवृक्षैर्विरिच्यते ॥ १४ ॥**
**क्रूरः स्नुक्पयसाहेमक्षीरीदन्तीफलादिभिः ।**

दी०—मृदुरिति । मृदुः कोष्ठः द्राक्षादिभिः सम्यक् विरिच्यते । तत्र द्राक्षा गोस्तनी, पयः गोदुग्धं, उष्णाम्बु उष्णोदकम्, पानीयत्वेन मध्यमेऽपि ग्रहणं । अथवाम्बुशब्दः सारकमस्त्वादिद्रवोपलक्षणः, तैलमैरण्डतैलम् । मध्यस्तु मध्यकोष्ठः न क्रूरो न मृदुरिति मध्यपदाभिधानात् । स च त्रिवृतादिभिः सम्यक् विरिच्यते । त्रिवृता श्यामा, तिक्ता कटुकी, राजवृक्षो गिरिमालकः । क्रूर इति । क्रूरकोष्ठः स्नुक्पयोहेमक्षीर्यादिभिर्विरिच्यते । स्नुक् सेहुण्डः, हेमक्षीरी स्वर्णक्षीरी, दन्तीफलं जयपालः । आदिग्रहणात् कुम्भातिल्वकादयः ॥ १४ ॥

गू०—तानि द्रव्याण्येवाह—पयो दुग्धम्, तैलैः एरण्डादितैलैः, त्रिवृता निःसृता, तिक्ता कटुकी, राजवृक्षो गिरिमालकः, स्नुक् सेहुण्डः तस्य दुग्धम्, हेमक्षीरी स्वर्णक्षीरी, दन्ती जयपालः । आदिशब्दात् इन्द्रवारुणीब्रह्मलवण्यादयः ॥ १४ ॥

**विरेकस्योत्तमादिमात्रार्थं वाङ्कैलिङ्कपरिमाणमाह—**

**मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफान्तगा ॥१५॥**
**वेगैर्विंशतिभिर्मध्या हीनोक्ता दशवेगकैः ।**

दी०—मात्रोत्तमेति । प्रवरा वेगमात्रा त्रिंशद्वेगैर्ज्ञेया, तथा कफान्तगेति कैलिङ्गकं मानम् । तथा विंशतिभिर्वेगैर्मध्या, तथा दशभिर्वेगैर्हीना । उक्तंच-वाग्भटे—'जघन्यमध्यप्रवरे तु वेगाश्चत्वार इष्टा वमने षडष्टौ । दशैव ते द्वित्रिगुणा विरेके प्रस्थस्तथा शोणितमोक्षणे च' इति । तुलामानमप्युक्तं तेनैव—'प्रस्थस्तथा स्याद्द्विचतुर्गुणश्च। द्वित्रान्सविड्कानपनीय वेगान्मेयं विरेके वमने तु पीतम्' इति । केचिदुत्तमस्य वायोः क्रूरकोष्ठस्य च उत्तमा मात्रा तीक्ष्णाऽभिमता, अतएव कफान्तगान्मेयं विरेके वमने तु पीतमिति, मध्यमाऽपि तस्य मृदुकोष्ठस्य हीना इति व्याख्यानयन्ति ॥ १५ ॥

गू०—उत्तमादिभेदेन विरेकप्रमाणमाह—मात्रोत्तमेति । सुगमम् ॥ १५ ॥

**इदानीं कषायगुटिकाचूर्णात्मकानां विरेचनद्रव्याणां परिमाणमाह—**

**द्विपलं श्रेष्ठमाख्यातं मध्यमं च पलं भवेत् ॥१६॥**
**पलार्धं च कषायाणां कनीयस्तु विरेचनम् ।**
**कल्कमोदकचूर्णानां कर्षं मध्वाज्यलेहतः ॥ १७ ॥**
**कर्षद्वयं पलं वाऽपि वयोरोगाद्यपेक्षया ।**

दी०—कषायाणामिति । कषायशब्देन रसः श्रृतःशीतफाण्टानां चतुर्णां ग्रहणं कल्कस्य पृथगुपादानात् । द्विपलं श्रेष्ठमित्यनेन वातजनितकोष्ठस्येत्यर्थः । विरेचनं श्रेष्ठं मानं कषायाणामुत्तमा मात्रेत्यर्थः । पलं मध्यमं मध्यमा मात्रा पित्तजनितमृदुकोष्ठस्येत्यर्थः । अर्धपलं कनीयो मात्रा हीना मात्रेत्यर्थः । कफेन मध्यमकोष्ठः कथितः । कल्कमोदकचूर्णानामिति । कल्कादीनां कर्षं मध्वाज्ययोगतः विरेचनम् । वा अथवा वयोरोगाद्यपेक्षया कर्षद्वयं पलं वा विरेचनम् । मधुघृतमानं विषमतया योज्यम् । उक्तंच—'भजतो विषरूपत्वं तुल्यांशौ मधुसर्पिषी' इति । आदिग्रहणात्कोष्ठादि ज्ञात्वा विरेचनं देयम् ॥ १६ ॥ १७ ॥

गू०—विरेके कषायादीनां मात्राकथनम्—विरेचनं द्विपलं श्रेष्ठम्, पलं मध्यमं, पलार्धं कनीयः स्वल्पम् । कषायानन्तरं विरेचने कल्कादीनां प्रमाणमाह—मध्वाज्यलेहतः कर्षद्वयं त्र्यं वाऽपि देयम् । वयोरोगाद्यपेक्षा विचारणीयम् ॥ १६ ॥ १७ ॥

## त्रिवृताचूर्णम् ।

**अथ वातादीनां कोष्ठमात्रादिभेदेन कतिपययोगान् दर्शयन्नाह—**

**पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभिः पिबेत्॥१८॥**
**त्रिफलाक्वाथगोमूत्रैः पिबेद्व्योषं कफार्दितः ।**

**त्रिवृत्सैन्धवशुण्ठीनां चूर्णमम्लैः पिबेन्नरः ॥ १९ ॥**
**वातार्दितो विरेकाय जाङ्गलानां रसेन वा ।**

दी०—पित्ते विरेचनस्य प्राधान्यख्यापनार्थं प्राक् पित्तोत्तरग्रहणम् । पित्तोत्तरे कोष्ठे द्राक्षाक्काथादिभिः त्रिवृच्चूर्णं पिबेत् । आदिग्रहणात् क्षीरेक्षुकाश्मर्यखादुस्कन्दवरारसादिभिः । कफार्दितः त्रिफलाक्काथगोमूत्रैः व्योषं त्रिकटुकं त्रिवृच्चूर्णं च पिबेत् । अत्रापि विरेकायेति संबन्धः । वातार्दितः त्रिवृत् शुण्ठीसैन्धवानां चूर्णमम्लैर्मद्यकाञ्जिकबीजपूररसादिभिः अथवा जाङ्गलानां रसैर्हरिणैणतित्तिरलावादीनां रसैर्मांसरसैर्विरेचनं पिबेत् । वाग्भटे तु—'अथ काले तु तच्चूर्णं किंचिन्नागरसैन्धवम् । वातामये पिबेदम्लैः पित्ते साज्यसितामधु । क्षीरद्राक्षेक्षुकाश्मर्यखादुस्कन्धवरारसैः । कफामये पीलुरसमूत्रमद्याम्लकाञ्जिकैः । पञ्चकोलादिचूर्णैश्च युक्त्या युक्तं कफापहैः । त्रिवृत्कल्ककषायेण साधितः ससितो हिमः । मधु त्रिजातसंयुक्तो लेह्यो हृद्यं विरेचनम् । अजगन्धा तवक्षीरी विदारी शर्करा त्रिवृत् । चूर्णितं मधुसर्पिर्भ्यां लीढ्वा साधु विरिच्यते । सन्निपातज्वरस्तम्भपिपासादाहपीडितः । त्वगेलाभ्यां समा नीली तैस्त्रिवृत्तैश्च शर्करा । चूर्णं फलरसक्षौद्रसक्तुभिस्तर्पणं पिबेत् । वातपित्तकफोत्थेषु रोगेष्वल्पानलेष्वपि । नरेषु सुकुमारेषु निरपायं विरेचनम्' ॥ इति । चक्रदत्ते तु—'भित्त्वा द्विधेक्षु परिलिप्य कल्कैस्त्रिभण्डिजातैः परिवेष्ट्य रज्ज्वा । पक्वं तु सम्यक् पुटपाकयुक्त्या खादेत्तु तं पित्तगदी सुशीतं' इति ॥ १८ ॥ १९ ॥

गू०—त्रिवृतादिविरेचनं कथं पिबेत् ? इत्याह—पित्तोत्तरे पित्ताधिक्ये त्रिवृच्चूर्णं द्राक्षाक्काथादिभिः पिबेत् । कफार्दितः त्रिफलाक्काथं गोमूत्रैः पीत्वा त्रिकटुकं पिबेत् । वातार्दितः वातपीडितः त्रिवृत्सैन्धवशुण्ठीनां चूर्णमम्लैर्निम्बादिभिः पिबेत् । जाङ्गलानां जाङ्गलमांसानां वा रसेन इति पक्षान्तरे ॥ १८ ॥ १९ ॥

## एरण्डतैलप्रयोगः ।

**एरण्डतैलं त्रिफलाक्काथेन द्विगुणेन च ॥ २० ॥**
**युक्तं पीतं पयोभिर्वा नचिरेण विरिच्यते ।**

दी०—अथ क्रूरकोष्ठादीनामपि तत्क्षणमेव विरेकार्थं प्रकारमाह—एरण्डतैलेति । अयं योगस्त्रिकोष्ठविषये योज्यः । तत्र पयोभिर्वेति । 'वा' शब्दो विकल्पार्थे । तेन त्रिफलाक्काथदुग्धाभ्यां मिलित्वैव तैलं पेयमित्येके । व्यासेन वा पयसैव केवलेन द्विगुणेनेत्यन्ये ॥ २० ॥

गू०—अन्यदपि औषधयोगे विरेचनविधानमाह—एरण्डतैले । द्विगुणेन त्रिफलाक्काथेन युक्तं पीत्वा, पयोभिर्दुग्धैर्वा पीत्वा पुमान् नचिरेण शीघ्रेण विरिच्यते ॥ २० ॥

## षडृतुविरेचनम् ।

**त्रिवृता कौटजं बीजं पिप्पली विश्वभेषजम् ॥ २१ ॥**
**समृद्वीकारसक्षौद्रं वर्षाकाले विरेचनम् ।**
**त्रिवृद्दुरालभा मुस्ता शर्करोदीच्यचन्दनम् ॥ २२ ॥**
**द्राक्षाम्बुना सयष्ट्याह्वं शीतलं च घनात्यये ।**
**पिप्पली नागरं सिन्धु श्यामा च त्रिवृता सह ॥ २३ ॥**
**लिहेत्क्षौद्रेण शिशिरे वसन्ते च विरेचनम् ।**
**त्रिवृता शर्करा तुल्या ग्रीष्मकाले विरेचनम् ॥ २४ ॥**

दी०—इदानीं षडृतुविरेकविषयत्वेन तद्योगानुरूपान्योगानाह—त्रिवृतेति । त्रिवृतादिभिर्वर्षाकाले प्रावृषि विरेचनं तत्र दोषसञ्चयात् । त्रिवृत् श्यामा; कौटजं बीजं इन्द्रयवाः, पिप्पली मागधी, विश्वभेषजं शुण्ठी, द्राक्षा गोस्तनी, तस्या रसः, क्षौद्रं मधु इति । वर्षाग्रहणेन प्रावृड्ग्रहणं दोषोपचयप्रकोपनिमित्तात् । घनात्यये शरत्काले योगमाह—त्रिवृद्दुरालभेत्यादि । त्रिवृत् श्यामा, दुरालभा समुद्रान्ता तस्या अलाभे यवासकः; मुस्ता भद्रमुस्ता, शर्करा सितोपला, उदीच्यं वालकं; चन्दनं श्वेतचन्दनं चूर्णयोग्यत्वात् । द्राक्षाम्बुना गोस्तनीक्काथेन रसेन वा । सयष्ट्याह्वं यष्टीमधुसहितं, शीतलं शीतगुणं शीतस्पर्शं च तेन पित्तघ्नत्वमस्य योगस्य कथितम् । अतएव शरत्काले योग्यताऽस्य योगस्य इति । शिशिरे वसन्ते च विरेचनमाह—पिप्पली नागरमिति । पिप्पली कणा, नागरं शुण्ठी, सैन्धवम्, श्यामा श्याममूला, त्रिवृत् मालविकाख्या अरुणमूला च । उक्तं च—'विद्याद्द्विधा च तन्मूलं श्यामं श्यामारुणं त्रिवृत्' इति । शिशिरग्रहणेन हेमन्तस्याऽपि ग्रहणम् । वाग्भटे तु—'त्रिवृतां चित्रकं पाठां अजाजीसरलं वचाम् । स्वर्णक्षीरीं च हेमन्ते चूर्णमुष्णाम्बुना पिबेत्' इति । ग्रीष्मे विरे-

१–बहुषु पुस्तकेषु मूलपाठेनायं श्लोकः पठितः ।

चनमाह—तुल्या शर्करा ग्रीष्मकाले ग्रीष्माख्ये काले विरेचनं देयम् । अन्यत् सुगमम् । अत्र केचित्सर्वर्तुकं योगं पठन्ति ॥ २१–२४ ॥

**तद्यथा—**

**त्रिवृतां हपुषां दन्तीं सप्तलां कटुरोहिणीम् ।**
**स्वर्णक्षीरीं च संचूर्ण्य गोमूत्रे भावयेत्त्र्यहम् ॥२५॥**
**एष सर्वर्तुको योगः स्निग्धानां मलदोषहा ।**

अस्य श्लोकस्य दन्तीस्थाने वाग्भटे त्रायन्ती पठिता । त्रिवृत् त्रायन्ती, हपुषा सातला, कटुरोहिणी समानं ज्ञेयं । अयं पाठो बहुपुस्तकेषु न दृश्यते क्षेपकोऽयमिति मन्यमानैरस्माभिरपि न व्याख्यातः ॥ २५ ॥

गू०—वर्षाकाले विरेचनविधानमाह—त्रिवृता निःसृता, कौटजं बीजं इन्द्रयवाः, विश्वभेषजं शुण्ठी, मृद्वीका द्राक्षा तद्रसं, क्षौद्रं मधु, वर्षाकाले इदं विरेचनम् । शरद्विरेचनमाह—त्रिवृत् निःसृता, दुरालभा यवासा, शर्करा सिता, चन्दनं श्वेतं, उदीच्यं वालकम्, यष्ट्याह्वं मधुयष्टी । एतद्द्राक्षाम्बुना द्राक्षाजलेन घनात्यये शरद्विरेचनम् । अथ हेमन्तविरेचनम्—सिन्धु सैन्धवम्, श्यामा वृद्धदारकः त्रिवृत् निःसृता । ग्रीष्मे विरेचनम्—सुगममन्यत् ॥ २५ ॥

## अभयादिमोदकाः ।

**अभया मरिचं शुण्ठीविडङ्गामलकानि च ॥ २६ ॥**
**पिप्पली पिप्पलीमूलं त्वक्पत्रं मुस्तमेव च ।**
**एतानि समभागानि दन्ती च द्विगुणा भवेत् ॥२७॥**
**त्रिवृदष्टगुणा ज्ञेया षड्गुणा चात्र शर्करा ।**
**मधुना मोदकान्कृत्वा कर्षमात्रप्रमाणतः ॥ २८ ॥**
**एकैकं भक्षयेत्प्रातः शीतं चानु पिबेज्जलम् ।**
**तावद्विरिच्यते जन्तुर्यावदुष्णं न सेवते ॥ २९ ॥**
**पानाहारविहारेषु भवेन्निर्यन्त्रणः सदा ।**
**विषमज्वरमन्दाग्निपाण्डुकासभगन्दरान् ॥ ३० ॥**
**दुर्नामकुष्ठगुल्मार्शोगलगण्डभ्रमोदरान् ।**
**(विदाहप्लीहमेहांश्च यक्ष्माणं नयनामयान् ॥ ३१ ॥**
**वातरोगांस्तथाध्मानं मूत्रकृच्छ्राणि चाश्मरीम् ।)**
**पृष्ठपार्श्वोरुजघनजङ्घोदररुजो जयेत् ॥ ३२ ॥**
**सततं शीलनादेषां पलितानि प्रणाशयेत् ।**
**अभयामोदका ह्येते रसायनवराः स्मृताः ॥ ३३ ॥**

दी०—अथ सर्वकालीनशीलनार्थं अभयामोदकानाह—अभयेति । एते अभयामोदकाः सर्वर्तुषु प्रसिद्धाः । क्वापि शीतविरेचनसंज्ञः । त्वक् गुडत्वक्, दन्ती त्रिगुणा पृथग्भागापेक्षया, एवं त्रिवृदपि चाष्टगुणा, शर्कराप्येवं षड्गुणा । केचित्सकलद्रव्येभ्यः पड्गुणत्वम-ष्टगुणत्वं व्याख्यानयन्ति, तच्च तन्त्रान्तरसंवादात्, उक्तंच—

'अभया, पिप्पलीमूलं, मरिचं, नागरं, तथा ।
त्वक्, पत्रं, पिप्पली मुस्तं विडङ्गामलकानि च ॥
कर्षैः प्रत्येकमेषां तु दन्त्याः कर्षत्रयं तथा ।
षट्कर्षास्तु सिता देया द्विपलं त्रिवृता भवेत् ॥
सर्वं संचूर्णितं कृत्वा मधुना मोदकं तथा ।
खादेत्प्रतिदिनं चैकं शीतं चानु पिबेज्जलम् ॥
तावद्विरिच्यते जन्तुर्यावदुष्णं न सेवते ।
पाण्डुरोगं विषं कासं जङ्घापार्श्वरुजस्तथा ॥
पृष्ठार्तिंमूत्रकृच्छ्रं च दुर्नाम भगन्दरम् ।
अश्मरीं मेहकुष्ठं च दाहशोथोदराणि च ॥
यक्ष्माणं चक्षुरोगं च कर्म चैतेन जायते ।

योजितोऽयं निहन्त्याशु अभयानाम मोदकः' इति । दृढबलेन एलाचाधिकाऽस्ति—'व्योषत्वक् पत्रमुस्तैलां विडङ्गामलकाभयाः । समभागा भिषक् दद्यात् त्रिगुणं च मुकूलकम् । त्रिवृताऽष्टगुणं भागं शर्करायाश्च षड्गुणं' इत्यादि । मुकूलं दन्ती, मधुनेति मोदककारणोचितमानेन । शीताम्बुना पिबेज्जलमिति योगभावनाोऽयम् । अन्यत्र 'शीताम्भसा साम्भः स्यात् रसायनम्' इति । रसादिकरणाद्रसायनम् । पुंध्वजस्थंगृत् । अथवा रसायनाङ्गमिदं विरेचनं रसायनांगमिति प्रागदा मोदकाः ॥ २६–३३ ॥

गू०—अथ सुखविरेचनमाह—अभया हरीतकी, आमलकं, त्वक् गुडत्वक्, पत्रं पत्रकं, मुस्तं भद्रमुस्तकं, एतानि समभागानि, दन्ती जयपालमूलं त्रिगुणा त्रिभागा, तृवृत् श्यामा अष्टभागा, शर्करा षड्गुणा षड्भागा । केचिद्दन्त्यादीन् चूर्णानभागाद्भागानाहुः । स्पष्टमन्यत् ॥ २६–३३ ॥

## विरेचनं पीत्वा किं कुर्यात्तदाह—

**पीत्वा विरेचनं शीतजलैः संसिच्य चक्षुषी ।**
**सुगन्धि किञ्चिदाघ्राय ताम्बूलं शीलयेन्नरम् ॥३४॥**
**निवातस्थो न वेगांश्च धारयेन्न स्वपेत्तथा ।**
**शीताम्बु न स्पृशेत् क्वापि कोष्णनीरं पिबेन्मुहुः ३५**

दी०—शीतजलैरिति । विरेकौषधक्रमनाशार्थं शी-

१–दीपिकाऽसंमतः ।

तलजलेन नेत्रसेचनम् । तथा सुगन्धं मृगमदसुरभि उत्तमचन्दनादीन्याघ्राय पश्चाद्वरं श्रेष्ठजीर्णताम्बूलीपत्रकृतं शीलयेत्। निवातस्थ इति वेगप्रवृत्त्यर्थं वेगांश्च न धारयेत्, ऊर्ध्ववातादिरोगोत्पादकत्वात् । स्वापेन विरेकौषधशक्तिहानिः स्यात् । शीताम्बु इत्यादि । शीतलोदकं क्वापि पानादौ न स्पृशेत् । रेकस्तम्भकत्वात्। अत एवाह—कोष्णनीरं पिबेन्मुहुरिति । वारं वारं कोष्णं जलं पेयं रेकैककरणार्थमित्यर्थः॥३४॥३५॥

गू०—विरेचनान्ते यत्कर्तव्यं तदाह—सुगन्धं द्रव्यम्। विरेके जाते कथं तिष्ठेदित्याह—वेगान् वातादीन् न धारयेत्, न स्वपेत् निद्रां न कुर्यात्, कोष्णनीरं मुहुः पिबेत् । क्वापि कदापि उष्णत्वे शीताम्बुना स्पृशेत् न सर्वदा ॥ ३४ ॥ ३५ ॥

**सम्यग्वान्तलक्षणेन सम्यग्विरेकलक्षणमाह—**

**बलासौषधपित्तानि वायुर्वान्ते यथा व्रजेत् ।**
**रेकात्तथा मलं पित्तं भेषजं च कफो व्रजेत् ॥३६॥**

दी०—यथा वमने प्रथमं बलासः कफः प्रवर्तते। पश्चाद्वमनद्रव्यं निर्गच्छेत्। तदनु पित्तानि । बहुवचनत्वेन हरितपीतानि कटुतिक्तप्रायाणीति । तत्पश्चाद्वायुरिति । तथा एवमपि विरेकात्प्रथमं मलं पुरीषं तदनु पित्तं तत्पश्चाद्विरेचनं द्रव्यं । तदनु कफः प्रवर्तत इति । तेन कफान्ते च विरेचनमिति वचनात्। एतेन सम्यग्वाऽसम्यग्विरिक्तश्च कथित इत्यभिप्रायः । अन्यथा दुर्वान्तो दुर्विरिक्त इति । तेन दुर्वान्तलक्षणमनाध्यायेऽभिहितं दुर्विरिक्तलक्षणमत्रैवाग्रे वक्ष्यति। नाभेरिति षष्ठं वदन्ति केचित्। तत्र नाभेरेव स्रस्तत्वम् ॥३६॥

गू०—विरेकात् किं निःसरतीत्याह—वान्ते सति यथा बलासौषधपित्तानि वायुः व्रजेत् तथा रेकात्कफः मलं पित्तं भेषजं च गमयेत् बलासः कफं, औषधं भक्षितं मलं पुरीषम् ॥ ३६ ॥

**अथ दुर्विरिक्तलक्षणमाह—**

**दुर्विरिक्तस्य नाभेस्तु स्तब्धत्वं कुक्षिशूलता ।**
**पुरीषवातसंगश्च कण्डूमण्डलगौरवः ॥ ३७ ॥**
**विदाहोऽरुचिराध्मानं भ्रमश्छर्दिश्च जायते ।**

दी०—दुर्विरिक्तस्य न सम्यग्विरिक्तस्य नरस्य नाभेः स्तब्धत्वादयो जायन्ते । नाभेरिति । नाभेः नाभ्युपलक्षितस्य प्रदेशस्य पक्वाशयाख्यस्य स्तब्धत्वं स्तब्धता, तथा कुक्षिशूलता कुक्ष्योः शूलं । पुरीषवातसङ्गश्चेति मलवातयोः सङ्गो रोधः । तथा कण्डूमण्डलगौरवमिति कण्डूः शरीरे, मण्डलशब्देनात्र वरटीदंशसदृशं गौरवं शरीरोदरयोः । विदाहः पित्तवदाहः। अरुचिररोचकः। आध्मानमुदरापूरः। भ्रमश्चक्रारूढस्येव वस्तुदर्शनम्। वान्तिः छर्दिश्चेति । इति दुर्विरिक्तस्य लक्षणम् ॥ ३७ ॥

गू०—विरेके दुर्विरिक्तलक्षणमाह—दुर्विरिक्तस्य असम्यग्विरिक्तस्य नाभेः स्तम्भत्वं स्तब्धता, तु पुनः कुक्षिशूलता, पुरीषवातयोः संगः अप्रवृत्तिः । स्पष्टमन्यत् ॥ ३७ ॥

**अथास्य दुर्विरिक्तस्य पुनः चिकित्सामाह—**

**तं पुनः पाचनैः स्नेहैः पक्त्वा संस्नेह्य रेचयेत् ॥३८॥**
**तेनाऽस्योपद्रवा यान्ति दीप्ताग्निर्लघुता भवेत् ।**

दी०—तमिति । दुर्विरिक्तं पुरुषं पाचनैः पाचनौषधैः पक्त्वा अर्थादामं दोषं च स्नेहैः संस्नेह्य रेचयेत् । तेनेति । तेन स्वेदनस्नेहनेनास्य दुर्विरिक्तस्योपद्रवा यान्ति नश्यन्तीत्यर्थः । ततः दीप्ताग्निर्भवेत् । लघुता च शरीरस्य भवति ॥ ३८ ॥

गू०—इदानीं दुर्विरेचितचिकित्सामाह—आरग्वधादिभिस्तथा स्नेहैर्घृतपाचनाद्यैरामं पक्त्वा संस्नेह्य स्नेहनं कृत्वा विरेचयेत् ॥ ३८ ॥

**इदानीं विरेकातिशयस्य लक्षणमाह—**

**विरेकस्यातियोगेन मूर्च्छा भ्रंशो गुदस्य च ॥३९॥**
**शूलं कफातियोगः स्यान्मांसधावनसंनिभम् ।**
**मेदोनिभं जलाभासं रक्तं वाऽपि विरिच्यते ॥४०॥**

दी०—विरेकस्यातियोगेन मूर्च्छादयो भवन्ति । गुदस्य भ्रंश इति । गुदस्य बहिर्निर्गमनं, तच्चातिसंप्रवाहणाद्भवति । उक्तंच—'प्रवाहिकाऽतिसाराभ्यां निर्गच्छति गुदो बहिः' इति । शूलं नानाप्रकारकमत्र ज्ञेयम्। तेन परिकर्तिकाऽप्यत्र भवति। कफातियोगः स्यात् कफस्य अतिसरणं भवति । तथा मांसधावनसंनिभादिकं विरिच्यते मांसधावनोदकतुल्यं, मेदोनिभं मेदःसदृशम् । जलाभासमिति। जलसदृशं स्वच्छमित्यर्थः। रक्तं वाऽपि विरिच्यत इति रक्तमेव वा विरि-

च्यते । अन्ये मांसधावनादीनि चास्य विशेषणानि मन्यन्ते निष्पुरीषत्वात् । इति विरेकातियोगलक्षणम् ॥ ३९ ॥ ४० ॥

**गू०**—विरेकस्यातियोगेनाधिक्येन मूर्च्छादयो भवन्ति । मांसधावनादिनिभं विरिच्यते चेति ॥३९॥४०॥

## अथ विरेकातियोगचिकित्सामाह—

**तस्य शीताम्बुभिः सिक्त्वा शरीरं तण्डुलाम्बुभिः ।**
**मधुमिश्रैस्तथा शीतैः कारयेद्वमनं मृदु ॥ ४१ ॥**
**सहकारत्वचः कल्को दध्ना सौवीरकेण वा ।**
**पिष्ट्वा नाभिप्रलेपेन हन्त्यतीसारमुल्बणम् ॥ ४२ ॥**
**अजाक्षीरं रसं वाऽपि वैष्किरं हारिणं तथा ।**
**शालिभिः षष्टिकैः स्वल्पं मसूरैर्वापि भोजयेत् ४३**
**शीतैः संग्राहिभिर्द्रव्यैः कुर्यात् संग्रहणं भिषक् ।**

**दी०**—तस्य वमनं मृदु कारयेत् । तस्य विरेकादितस्य वमनं मृदु कारयेत् । किं कृत्वा ? शीताम्बुभिः शीतजलैः शरीरं सिक्त्वा सिञ्चयित्वा । तण्डुलाम्बुभिरिति । तण्डुलधावनोदकैः । मधुमिश्रैरिति । तण्डुलधावनैर्मधुमिश्रैरित्यर्थः । शीतैरिति । शीतवीर्यद्रव्यैर्लेपमाह—सहकारत्वच इत्यादि । सहकार आम्रः तस्य त्वचः कल्कः दध्ना सौवीरकेण काञ्जिकभेदेन पेषयित्वा नाभिप्रलेपेन उल्बणमतीसारं हन्यात् । भोजनमाह—अजाक्षीरमित्यादि । क्षीरादिकं रक्तशालिभिः षष्टिकैर्वा सह भोजयेत् । क्षीरस्य केवलस्याऽपि पानमाहुरेके संग्राहकत्वात् । रसं मांसरसं, वैष्किरं हारिणं वा । विष्किरा लावतित्तिरादयः । शालिभिरिति रक्तशाल्यादिभिः । षष्टिकैरिति प्रसिद्धैः । स्वल्पमित्यनेन भृष्टतण्डुलभवं शाकुकमपि देयं । मसूरैरपि स्वल्पं भोजनं देयम् । स्वल्पमजीर्णभयात् । अथवा शीतैः शीतवीर्यैर्द्रव्यैः संग्रहणं कुर्यात् इति ॥ ४१–४३ ॥

**गू०**—अतिविरिक्तोपद्रवे प्रतीकारमाह—तस्य शीताम्बुभिः शीतजलैः शरीरं सिक्तं सेवितं कुर्यात् । तथा मधुमिश्रैस्तण्डुलाम्बुभिर्मृदु वमनं कारयेत् । प्रतीकारान्तरमाह—सहकारः आम्रः तस्य त्वचः दध्ना सौवीरं काञ्जिकं तेन पिष्ट्वा लेपयेत् । स लेपः उल्बणमतीसारं हन्ति । अतिरेकग्रहणार्थं पथ्यमाह—शीतैः संग्राहिभिर्द्रव्यैः संग्रहणं भिषक् कुर्यात्, अजाक्षीरं पाययेत् तथा हारिणं हरिणमांसजं रसं वैष्किरं कुक्कुटाण्डं मांसरसं वा षष्टिकैः शालिभिर्मसूरैर्वा भोजयेत् । स्वल्पं तुच्छम् । तथा शुण्ठ्यादिभिः शीतैर्द्रव्यैर्दाडिमाद्यैर्भिषक् संग्रहणं कुर्यात् ॥ ४१–४३ ॥

## सम्यग्विरिक्तस्य पाचनादिप्रकारमाह—

**लाघवं मनसस्तुष्टिरनुलोमं गतेऽनिले ॥ ४४ ॥**
**सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेन्निशि ।**

**दी०**—लाघवं शरीरस्येति । मनसस्तुष्टिरिति । चित्तसंतोषः । अनिले वायौ अनुलोमं अधोभागं गते सति एतादृशलक्षणेन सुविरिक्तं नरं जानीयात् । एवं ज्ञात्वा तस्याऽपि पाचनं निशि दद्यात् । पाचनमशेषस्यात्र बोद्धव्यं । तच्च मुद्गयूषादिकमित्येके । यदुक्तं 'विरेचनानां सर्वेषां दध्यन्नं स्तम्भने हितं । आमान्ते च प्रदातव्यमन्यथा मुद्गमूषक' मिति । केचित्तु पाचनं पाययेन्निशीतिपदं विना पठन्ति ननु सम्यग्विरिक्तस्यायमेव क्रमः । यथाप्राप्तिश्च विट्पित्तकफानिला न सम्यग्विरिक्तस्य भवेयुः क्रमेणेति । नचैवं कफान्तपदव्याघातः । तेन पाचनपादः केषांचिन्मनोहरं । यतो वायुर्हि निःशेषं कफे कृते आमाशये शून्यतया केवलः सरतीति । यद्वा आचार्येण पदपूरणार्थं लिखितं । तेनास्याऽन्योऽभिप्रायः । पाचनं रात्रावेवेत्यर्थः ॥ ४४ ॥

**गू०**—इदानीं सुविरिक्तलक्षणमाह—देहस्य लाघवे सति मनःसंतुष्ट्यां सत्यां अनिले वायौ अनुलोमं गते स्वमार्गे प्राप्ते सति लक्षणैर्नरं सुविरिक्तं ज्ञात्वा निशि पाचनं एरण्डशुण्ठीधान्यजं पाययेत् ॥ ४४ ॥

## विरेचनस्य फलमाह—

**इन्द्रियाणां बलं बुद्धेः प्रसादं वह्निदीपनम् ॥४५॥**
**धातुस्थैर्यं वयःस्थैर्यं भवेद्रेचनसेवनात् ।**

**दी०**—इन्द्रियाणामिति । चक्षुरादीनां बलं स्वस्वविषयग्राहकताशक्त्यतिशयः । बुद्धेः प्रसादः प्रसन्नता, वह्नेः कायाग्नेः दीपनं भवति । धातूनां रसादीनां स्थैर्यं मार्गस्य शुद्धत्वात् । तेनैव हेतुना वयसः स्थैर्यं करोति । उक्तंच वाग्भटे—'बुद्धेः प्रसादं बलमिन्द्रियाणां धातुस्थिरत्वं ज्वलनस्य दीप्तिः । चिराच्च पाकं, वयसः करोति संशोधनं सम्यगुपास्यमानं' इति ॥४५॥

**गू०**—रेचनसेवनात्किं भवति ? इत्याह—इन्द्रियाणां नेत्रादीनां बलं स्थैर्यं बुद्धेः प्रसादम् ॥ ४५ ॥

**कृतविरेचनस्य प्रवातादीन् निषेधयति—**

**प्रवातसेवाशीताम्बुस्नेहाभ्यङ्गमजीर्णताम् ॥ ४६ ॥**
**व्यायामं मैथुनं चैव न सेवेत विरेचितः ।**

दी०—विरेचितः कृतविरेचनः प्रवातसेवादीन् न सेवेत, प्रकृष्टवातसेवनं तस्य च दोषकरत्वात् । शीताम्बुसेवनं स्रोतोरोधादिकारणात् । स्नेहाभ्यङ्गस्याग्निमान्द्यकरत्वात् । उक्तंच—'वर्ज्योऽभ्यङ्गः कफग्रस्तस्तथा-संशुध्यजीर्णिभिः' इति । चकारात् क्षणजागरणवेगानां च रोधनं क्रोधशोकहिमातपातिभाष्यत्यासनसंस्थितिनीचात्युच्चोपविधानाहःस्वप्नानि ॥ ४६ ॥

गू०—विरेचननिषेधवर्गमाह—विरेकतः प्रवातसेवाद्यं न सेवेत इत्यन्वयः ॥ ४६ ॥

**अथ विरिक्तस्य पथ्यार्थे पेयादि द्रव्याण्याह—**

**शालिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत्कृताम् ॥ ४७ ॥**
**जङ्गालविष्किराणां वा रसैः शाल्योदनं हितम् ।**

इति श्रीदामोदरसूनुना शार्ङ्गधरप्रणीतायां शार्ङ्गधरसंहितायामुत्तरखण्डे विरेचनविधिर्नाम चतुर्थोऽध्यायः ॥ ४ ॥

---

दी०—यवागूशब्दः पेयाद्युपलक्षणार्थः । तेन शाल्यादिभिः कृताः पेयादयो सेव्याः । सा यवागूः नानाविधं पूर्वं व्याख्याता । तथा जङ्गालविष्किराणां रसैः शाल्योदनं हितम् । उक्तंच—'क्रमेणानेन भुञ्जानो भजेत्प्रकृतिभोजनम्'इति। संशोधने पेयादिक्रम एव हितः। उक्तंच वाग्भटे—'शोधनास्रवविस्रावस्नेहयोजनलङ्घनैः । यात्यग्निर्मन्दतां तस्मात्क्रमं पेयादिकं भजेत्' । सच यथा—'पेयां विलेपीमकृतं कृतं च यूषं रसं त्रीनुभयं तथैकम् । क्रमेण सेवेत नरोऽन्नकालान्प्रधानमध्यावरशुद्धिशुद्धः' इति । तत्र जङ्गाला हरिणैणादयः । विष्किरा लावतित्तिरादयः । प्रधानशुद्ध्या शुद्धः पुरुषः त्रीन्, अन्नकालान् पेयादीन् सेवेत । मध्यशुद्ध्या शुद्धः द्वौ द्वौ अन्नकालौ । अवरशुद्धया शुद्धः एकैकमन्नकालं पेयादिकं सेवेत इति ॥ ४७ ॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायामुत्तरखण्डे विरेचनाध्यायः ॥

---

गू०—विरेके पथ्यवर्गमाह—विरेकानन्तरं शाल्यादिभिः कृतां यवागूं भोजयेत् जाङ्गलैर्जाङ्गलमांसरसैर्विष्किराणां विष्किरसंज्ञानां वा मांसरसैः शाल्योदनं हितं भवति । विरेकौषधिपीते असम्यग्विरेके पुनः क्रियामाह विरेको निक्षेपकः ॥ ४७ ॥

इति श्रीकाशिरामवैद्यविरचितायां शार्ङ्गधरगूढार्थदीपिकायामुत्तरखण्डे पञ्चकर्मणि विरेचनाध्यायः ॥ ४ ॥

---

## पञ्चमोऽध्यायः ॥

अथ बस्तिविधिं व्याख्यातुं प्रतिजानीते—

### अथ बस्तिविधिः ।

**तत्रायं सम्बन्धः—'पञ्चकर्म वमी, रेको, निरूहोऽन्वास-नावनम्' इति । वमनविरेकयोरुक्तत्वात्पारिशेष्याद्बस्तिविधिमाह—**

**बस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परम् ।**
**बस्तिभिर्दीयते यस्मात्तस्माद्बस्तिरिति स्मृतः ॥ १ ॥**

दी०—बस्तिर्द्विधा द्विप्रकारः, एकोऽनुवासनाख्यः, द्वितीयो निरूहसंज्ञः । बस्तिनिरुक्तिमाह—यस्माद्बस्तिभिश्चर्मपुटकैर्दीयते तस्माद्बस्तिः ॥ १ ॥

गू०—विरेकानन्तरं बस्तिविधानाद्बस्तिविधानमाह—बस्तिर्यस्माद्बस्तिभिर्दीयते गुददेशे तस्माद्बस्तिरिति स्मृतः । बस्तिभिरेरण्डकोशाद्यैः तद्वक्ष्यति । स बस्तिर्द्विधा एकोऽनुवासाख्यः अपरो निरूहाख्यः ॥ १ ॥

**तयोर्लक्षणमाह—**

**यः स्नेहैर्दीयते स स्यादनुवासननामकः ।**
**कषाय-क्षीर-तैलैर्यो निरूहः स निगद्यते ॥ २ ॥**

दी०—अथानुवासननिरूहयोः संप्राप्तिमाह—स्नेहैः पक्वस्नेहैः यः दीयते सोऽनुवासाख्यः । यः कषायादिभिः स निरूहो निगद्यते । निरूहः बस्तेर्भेद एवास्थापनक्षीरकषायादिभिरेवायं दीयते ॥ २ ॥

गू०—यः स्नेहैस्तैलाद्यैः दीयते सोऽनुवासनाख्यः, अपरो यः कषायाद्यैर्दीयते स निरूहः । अनुवासनं केवलतैलेन दीयते, निरूहे कषायक्षीरमिश्रितं तैलं अतः पूर्वस्माद्भिन्नः ॥ २ ॥

**अथानुवासनादीनामनुक्रमविधानमाह—**

**तत्रानुवासनाख्यो हि बस्तिर्यः सोऽत्र कथ्यते।**
**पूर्वमेव ततो बस्तिर्निरूहाख्यो भविष्यति॥ ३॥**
**निरूहादुत्तरं चैव बस्तिः स्यादुत्तराभिधः।**

**दी०**—तत्र तेषु बस्तिषु मध्ये यः अनुवासननामा बस्तिः स पूर्वमेवाऽत्राऽध्याये कथ्यते। पूर्वमेवेति सम्बन्धः। तत इति। अनुवासनानन्तरं निरूहाख्यः बस्तिर्भविष्यति। कथयिष्यत इत्यभिप्रायः। निरूहादुत्तरं निरूहबस्तेरनन्तरं उत्तराभिधः उत्तरनामा बस्तिः कथयिष्यत इति सम्बन्धः तेन त्रय एवाध्यायाः पृथक् ज्ञातव्याः। यद्वा पूर्वमेवानुवासनबस्तिः कार्यः। तत्पश्चान्निरूहबस्तिः कार्यः। तदनु उत्तरबस्तिरिति। इति क्रमविषयानुक्रमः। तथाहि—'बस्तेः स्निग्धतनुं ज्ञात्वा ततः पश्चान्निरूहयेत्' इत्यादिवचनात्॥३॥

**गू०**—तयोः कथनप्रतिज्ञामाह—पूर्वं प्रथमतः अनुवासनाख्यो यो बस्तिः सोऽत्र कथ्यते तस्मादनन्तरं निरूहाख्यो बस्तिर्भविष्यति निरूहाग्रे उत्तराभिधः उत्तराख्यबस्तिर्भविष्यति॥ ३॥

**अथवा कथनक्रमेणैव बस्तिरनुवासनभेद एव इत्यत आह—**

**अनुवासनभेदश्च मात्रा बस्तिरुदीरितः॥ ४॥**

**दी०**—मात्राकृतभेदत्वान्मात्राबस्तिः॥ ४॥

**गू०**—अनुवासनभेद एव मात्राबस्तिरुदीरितः कथितः। एते चत्वारो बस्तिभेदभेदाः॥ ४॥

**तस्य मात्रामाह—**

**पलद्वयं तस्य मात्रा तस्मादर्धोऽपि वा भवेत्।**

**दी०**—तस्येति मात्रा बस्तेः पलद्वयं द्विपलप्रमाणं। तस्मादिति द्विपलार्धपलप्रमाणमात्रा भवेत्। एतेनायमर्थः संपन्नः यस्योत्तमा पलादिमात्रार्हति तस्य द्विपलं प्रथमं। ततः पलार्धेन वृद्धिः एवं नवभिर्दिनैः षट्पली मात्रा पूर्णा भवति। तथा यस्य त्रिपली मात्रार्हति तस्य पलं प्रथमं देयं ततश्च कर्षेण वृद्धिः एवं नवभिर्दिनैः त्रिपली मात्रा भवति। एवं कनीयसी मात्राऽपि ज्ञेया सापि वाग्रहणाद्बोद्धव्या। ता मात्रा

**गू०**—तेषां मात्रामाह—तस्य बस्तेः स्नेहादीनां मात्रा पलद्वयं तस्मादर्धं वा पलं भवेत्॥

**अनुवासनयोग्याः।**

**अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिली॥५**

**दी०**—अथानुवासनयोगमाह रूक्षः पुरुषोऽनुवासन अनुवासनयोग्य इत्यर्थः। तीक्ष्णाग्निरिति भस्मकाख्यवह्नियुतः। केवलानिलीति। ननु 'बस्तिर्वाते च पित्ते च कफे चैव हि शस्यते। संसर्गे सन्निपाते च बस्तिरेव हितः सदे'त्यादिवचनात्कथं केवलानिली अनुवास्य इति। उच्यते। त्रीनपि दोषान् पक्वाशयगतान् बस्तिर्जयति। आमाशयगतबस्तिः पच्यमाना संयोगं तं पित्तविरेकः। इति परमं मत्पूर्वपक्वसिद्धान्तः। अन्यत्राप्युक्तं—'पित्तं वा कफपित्तं वा पित्ताशयगतं हरेत्। अस्रनं त्रीन् मलान् बस्तिर्जयेत् पक्वाशयस्थितान्' इति। एवं रक्तमपि दुष्टरक्तप्रसादनिवृत्तो बस्तिः प्रसादयति। स्वमते तु केवलानिलीत्यस्य समाधानमेतत्। तद्यथा आस्थापनानुवासनं खलु सर्वोपक्रमेभ्यो वाते प्रधानतमं। रोगविशेषविषयं बोद्धव्यमित्यदोषः। अन्यदपि समाधानं सविस्तरं तदत्र विस्तरभयान्न लिखितं॥ ५॥

---

१–तथाहि रुद्रभटे न विस्तरतो लिखितं—केवलानिलीति केवलानिली चानुवास्यः। इति विरुद्धमिवाभाति तन्त्रान्तरसंवादात्। उक्तं च वाग्भटे—'वातोल्बणेषु दोषेषु वाते वा बस्तिरिष्यते' इति। सुश्रुतेऽपि—'बस्तिर्वाते पित्ते च कफे रक्ते च शस्यते। संसर्गे सन्निपाते च बस्तिरेव सदा हितः' इति। अत्रोच्यते बस्तिर्हि पक्वाशयगतं कफपित्तवातं निर्हरति। उक्तं च चरके—'पित्तं वा कफपित्तं वा पित्ताशयगतं हरेत्। स्रंसनं त्रीन् मलान् बस्तिः पक्वाशयगतं हरेद्' इति। संसर्गादौ च वाताधिक एव बस्तिः। अनेनैवाभिसंधिना प्राह वाग्भटः–'वातोल्बणेषु' इति। रक्तप्रसादनद्रव्येण दत्तो बस्तिः रक्तं प्रसादयति तत्स्थानगतं च पक्वाशयस्य विशेषतो वा तत्स्थानत्वाच्च केवलानीत्युक्तम्। उक्तं च—'पक्वाशयकटिसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियं स्थानं वातस्य तत्राऽपि पक्वाधानं विशेषत' इति। अतएवोक्तं—'शरीरजानां दोषाणां क्रमेण परमौषधम्। बस्तिर्विरेको वमनं तथा तैलं घृतं मधु' इति। अथवा वातरोगविषयं ज्ञातव्यम्। उक्तं च—'दारुणांश्चानिलामयान्' इति सर्वमवदातम्।

गू०—अनुवासनयोग्यमाह—रूक्षः स्नेहपानरहितः पुमान् अनुवास्यः स्यात् । तथा तीक्ष्णाग्निर्दीप्ताग्निः । तथा केवलानिलीति केवलवातरोगवान् । एवंभूत अनुवास्यः अनुवासनयोग्यः स्यात् ॥ ५ ॥

**अथानुवासने ये त्याज्यास्तानाह—**

**नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी ।**
**नास्थाप्या नानुवास्याश्चाजीर्णोन्मादतृडर्दिताः ॥६॥**
**शोकमूर्च्छारुचिभयश्वासकासक्षयातुराः ।**

दी०—कुष्ठी तथा प्रमेही स्थूलो मेदस्वी तथा उदरी च एतेऽनुवास्या न भवन्तीत्यर्थः । तु पुनरिति ग्रहणात् एते तु आस्थापनीया इत्यभिप्रायः । यदुक्तमन्यत्रापि—'उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः । अवश्यं स्थापनीयास्ते नानुवास्याः कथंचने'ति । अथ ये तूभयकर्मरहितास्तानाह—जीर्णेति । अनिर्वोढक्षमत्वाद्व्याप्तशरीराः । 'नास्थाप्या नानुवास्यास्तेऽजीर्णोन्मादतृडर्दिताः' इति वा पाठः । अत्र अजीर्णार्दित इत्यर्थः । अजीर्णमत्रामं विदिग्धं वा नतु विष्टब्धाजीर्णं । तत्र तु विहितमेवेत्येके । शेषं सुगमम् ॥ ६ ॥

गू०—अनुवासनायोग्यानाह—कुष्ठी मेही स्थूलस्तथा उदरी न अनुवास्यः न अनुवासनयोग्यः । अन्ये ये नानुवास्यास्तानाह—एतेऽपि अजीर्णादयोऽनुवास्या न स्युः यथास्थितस्थापनीयाः । तथाच सुश्रुते—'उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः । अवश्यं स्थापनीयाश्च नानुऽवास्याः कथंचन' इति ॥६॥

**बस्तिकरणद्रव्याणि—**

**नेत्रं कार्यं सुवर्णादिधातुभिर्वृक्षवेणुभिः ॥ ७ ॥**
**नलैर्दन्तैर्विषाणाग्रैर्मणिभिर्वा विधीयते ।**
**एकवर्षात्तु षड्वर्षं यावन्मानं षडङ्गुलम् ॥ ८ ॥**
**ततो द्वादशकं यावन्मानं स्यादष्टसंमितम् ।**
**ततः परं द्वादशभिरङ्गुलैर्नेत्रदीर्घता ॥ ९ ॥**
**मुद्गच्छिद्रं कलायामं छिद्रं कोलास्थिसंनिभम् ।**
**यथासंख्यं भवेन्नेत्रं श्लक्ष्णं गोपुच्छसंनिभम् ॥१०॥**
**आतुराङ्गुष्ठमानेन मूले स्थूलं विधीयते ।**
**कनिष्ठिकापरीणाहमग्रे च गुटिकामुखम् ॥ ११ ॥**
**तन्मूले कर्णिके द्वे च कार्ये भागाच्चतुर्थकात् ।**
**योजयेत्तत्र बस्तिं च बन्धद्वयविधानतः ॥ १२ ॥**
**मृगाजशूकरगवां महिषस्यापि वा भवेत् ।**
**मूत्रकोषस्य बस्तिस्तु तदलाभेन चर्मजः ॥ १३ ॥**
**कषायरक्तः सुमृदुर्बस्तिः स्निग्धो दृढो हितः ।**
**व्रणबस्तेस्तु नेत्रं स्याच्छ्लक्ष्णमष्टाङ्गुलोन्मितम् ॥१४॥**
**मुद्गच्छिद्रं गृध्रपक्षनलिकापरिणाहि च ।**



दी०—नेत्रमित्यादि । नेत्रं यन्त्रं बस्तिगतस्नेहकषायादिद्रव्यं नयनं चास्त्वान्नेत्रमिति संज्ञा । किमर्थं बस्तिविधानार्थं बस्तिदार्ढ्यार्थं । तच्च सुवर्णादिधातुभिर्विधीयते क्रियते । आदिग्रहणाद्रौप्यताम्रत्रपुलोहादीनां ग्रहणम् । तथा वेण्वादिभिर्वेणुवंशः । नलैर्नलिकादिभिः तृणविशेषजातैः । दन्तैर्हस्तिदन्तैः । विषाणाग्रैरिति शृङ्गाग्रैः । उपरितनसूक्ष्मभागैः । मणिभिर्मरकतपुष्परागवैडूर्यादिभिः । एतेन शुद्धपाषाणैरपि विधीयत इति सम्प्रदायः । उक्तंच दृढबलेन—'सुवर्णरूप्यत्रपुताम्ररीतिकांस्यायसास्थिद्रुमवेणुदन्तैः । नलैर्विषाणैर्मणिभिश्च तैस्तैः कार्याणि नेत्राणि त्रिकर्णिकानि । षड्द्वादशाष्टाङ्गुलसंमितानि षड्विंशतिद्वादशवर्षजानाम् । स्युर्मुद्गकर्कन्धुसतीनवाहि छिद्राणि वर्त्या पिहितानि चापि । यथावयोऽङ्गुष्ठकनिष्ठिकाभ्यां मूलाग्रयोः स्युः परिणाहवन्ति । ऋजूनि गोपुच्छसमाकृतीनि श्लक्ष्णानि वा स्युर्गुटिकामुखानि । स्यात्कर्णिकैकाग्रचतुर्थभागे मूलाश्रिते बन्धनिबन्धने द्वे । जरद्गवो माहिषहारिणो वा स्याच्छौकरो बस्तिरजस्य वाऽपि' इति ( च. सं. ३ )। स्फिगस्थि । अथ नेत्रपरिमाणमाह—एकवर्षादिति । एकवर्षात्प्रथमवर्षात्षड्वर्षं यावत् तावन्मानं नेत्रस्य षडङ्गुलं यावन्मानं षड्वर्षं, एतत्परिमाणमायामेन कथितं । षड्वर्षादूर्ध्वं यावत् द्वादशवर्षाणि तावन्नेत्रायामपरिमाणं दशाङ्गुलं । एके—'मानं स्यादष्टसंमितम्' इति पठन्ति व्याख्यानयन्ति च । ततः परमिति द्वादशवर्षादारभ्य यावद्विंशतिवर्षाणि तावद्द्वादशाङ्गुलं नेत्रायामम्, अतः परं नेत्रायामता नास्तीत्युक्तत्वात् । वाग्भटे तु—'ऊनेऽब्दे पञ्चपूर्णेऽस्मिन्ना सप्तभ्योऽङ्गुलानि षट् । सप्तमे सप्त तान्यष्टौ द्वादशे षोडशे नव । द्वादशैव परं विंशाद्वीक्ष्य वर्षान्तरेषु च । वयो बलशरीराणि प्रमाणमभिवर्धयेत्' इति । अथ नेत्राग्ररन्ध्रपरिमाणमाह—मुद्गेत्यादि । षडङ्गुलनेत्रस्य मुद्गप्रमाणं आकारेण वर्तुलत्वात् । तच्च खिन्नं, एवं माषादिरपि खिन्नमेव । उक्तंच वाग्भटे—'मुद्गं माषं कलायाच्चं खिन्नं कर्कन्धुकं क्रमात्' इति । कषायोऽत्र वर्तुलकलायः सतीनसंज्ञः । यथासंख्यमिति क्रमेण इत्यर्थः । तच्च नेत्रं श्लक्ष्णं कोमलं । गोपुच्छाकारमिति । आकारेण आतुराङ्गुष्ठमानेन मूलस्थूलम् । मूलमत्र चर्मबन्धनमुखम् ।

---

१–'स्थि शब्द' इति चरके पाठः ।

अग्रे च नेत्राग्रे कनिष्ठिकापरिणाहता ज्ञेया । अग्रे इति गुदासन्निहितमुखे । गुटिकामुखमिति । तदग्रमुखे च गुटिका कार्या वर्तुला इत्यर्थः । तन्मूले इति । नेत्रस्य मूले चर्मलग्नमुखे द्वे कर्णिके कार्ये । कर्णिका मेखलाशब्दवाच्या ययोश्चर्मपुटकाग्रं संनह्यते । अत-एवाह—'योजयेत्तत्र बस्तिं च बन्धद्वयविधानत' इति । द्वाभ्यां बन्धनाभ्यां नेत्रे बस्तिं बध्वा गुदादौ योज-येत्प्रवेशयेदित्यर्थः । चतुर्थभागादित्यादि । एतेन उत्त-रमुखे चतुर्थभागपर्यन्तं एका कर्णिका कार्या इति वैद्य-सम्प्रदायः । ततस्तां मर्यादीकृत्य गुदमध्ये प्रवेशये-दित्यर्थः । उक्तंच चक्रदत्ते—'स्यात्कर्णे चाग्रचतुर्थभागे मूलाश्रिते बस्तिनिबन्धने द्वे' इत्यादि । बस्तिनेत्रकर-णद्रव्यप्रसंगाद्व्रणबस्तिमाह—तु पुनः व्रणबस्तेः, व्रणो नाडीव्रणः तन्निमित्तं यन्नेत्रं यन्त्रं श्लक्ष्णं कोमलं तथा-ऽष्टाङ्गुलोन्मितं परिमाणं नेत्रं कार्यम् । एतच्च पूर्वोक्त-बस्तिद्रव्यस्य मुद्गच्छिद्रं नलिकायन्त्रं सच्छिद्रं बही-रन्ध्रं कार्यम् । तथा गृध्रपक्षनलिकापरिणाहि, तेन नलिकापरिणाहमानमुक्तम् ॥ ७–१४ ॥

**गू०**—बस्तिमुखस्थापनार्थं सुवर्णादीनां नेत्रमाह—नेत्रं गुदप्रवेशनलिकारूपं सुवर्णादिधातुभिः कार्यं तथा वृक्षवेणुभिः वेणुर्वंशः तथानलैर्दन्तैः हस्तिदन्तैः वि-षाणः श्लक्ष्णस्तदग्रभूतैर्मणिभिः सूर्यकान्तादिभिर्वा विधीयते । वयःप्रमाणे नेत्रप्रमाणमाह—एकवर्षा-दारभ्य यावत् षड्वर्षं तावत् षडङ्गुलमात्रं भवति । ततः षड्वर्षाद्यावत् द्वादशवर्षं स्यात्तावदष्टसंमितं अ-ष्टाङ्गुलप्रमाणं नेत्रं स्यात् । ततः परं द्वादशवर्षानन्तरं द्वादशभिरङ्गुलैर्नेत्रं ईर्यतां प्राप्यतां तस्य यादृशं छिद्रं भवति तादृशमाह मृदुच्छिद्रं नेत्रं कलापो वर्तुलकः तत्सदृशं पुनः कोलास्थिसन्निभं कोलं बदरं तदस्थिस-दृशं यथासंख्यं चतुरङ्गुलादिप्रमाणं भवेत् । पुनः श्लक्ष्णं चिक्कणं पुनर्गोपुच्छसन्निभं गोपुच्छाकारं मूले स्थूलं अग्रे सूक्ष्मं मूले स्थूलं तु मानेन अङ्गुष्ठाकारं विधीयते क्रियते अग्रे कनिष्ठिकापरिणाहम्—अग्रभागे कनिष्ठि-काङ्गुलिस्थूलं तथा गुटिकामुखं वर्तुलं तन्मूले चतुर्थकान् भागान् द्वे कर्णिके कार्ये कर्णिके कमलपत्राकारे । बन्ध-द्वयविधानतः बन्धद्वययोगतः तत्र बस्तिं योजयेत् । बस्तिः कस्य मूत्रकोशस्य भवतीत्याह—मूत्रकोशोऽण्ड-स्तस्य बस्तिः । स मूत्रकोशो मृगादीनां भवति तद-लाभेन चाण्डलाभो चर्मजोऽपि भवति । किंभूतो बस्तिः कषायरक्तः कषायेण बदर्यादिचूर्णकषायेण रक्तः र-ञ्जितः मृदुः कोमलः स्निग्धः सचिक्कणः दृढो नवः एवंभूतः । व्रणबस्तेश्च प्रमाणमाह–व्रणस्य शरीरादेर्व्रणस्य यो बस्तिस्तस्य एवंभूतं नेत्रं स्यात् । श्लक्ष्णं चिक्कणं अष्टाङ्गुलं तथा मुद्गच्छिद्रं तथा गृध्रपक्षनलिकाच्छिद्र-दीर्घं ॥ ७–१४ ॥

## बस्तिसेवागुणानाह—

**शरीरोपचयं वर्णं बलमारोग्यमायुषः ॥ १५ ॥**
**कुरुते परिवृद्धिं च बस्तिः सम्यगुपासितः ।**

**दी०**—सम्यक्तया यथोक्ततया उपासितः सेवितो बस्तिः शरीरोपचयादीन् कुरुते । उक्तंच—'बस्ति-र्वयः स्थापयिता सुखायुर्वर्णाग्निमेधास्वरवर्णकृच्च । सर्वार्थकारी शिशुवृद्धयूनां निरत्ययः सर्वगदापहश्च' इति । सुश्रुतेऽपि—'वीर्येण बस्तिरादत्ते दोषानापादम-स्तकात् । पक्वाशयस्थः खस्थोऽर्कश्चापो यद्वन्महीतलात्' इति । अथ बस्तेः सेवाफलमाह । विधिक्रमं तु तन्त्रा-न्तरेऽप्युक्तम् । यथा 'दत्तस्तु प्रथमो बस्तिः स्नेहयेद्बस्ति-वंक्षणौ । सम्यग्दत्तो द्वितीयस्तु कोष्ठस्थमनिलं जयेत् । बलवर्णौ च जनयेत् तृतीयस्तु प्रयोजितः । रक्तं चतुर्थः पंचमः स्नेहयेन्मांसमेदसः । षष्ठः स्निह्यति सर्वत्र सप्त-मोपि तथा मतः । अष्टमो नवमश्चैव वसामज्जानमेव च । एवमुक्तं तान् दोषाद्विगुणं साधयेदिति ॥ १५ ॥

**गू०**—सम्यगुपासितो बस्तिः किं कुर्यादित्याह—शरीरोपचयं, स्थौल्यं, बलं, वर्णं, आरोग्यं, आयुषः वृद्धिं च कुरुते ॥ १५ ॥

## अथ बस्तेः कालनियममाह—

**दिवा शीते वसन्ते च स्नेहबस्तिः प्रदीयते ॥ १६ ॥**
**ग्रीष्मवर्षाशरत्काले रात्रौ स्यादनुवासनम् ।**
**न चातिस्निग्धमशनं भोजयित्वाऽनुवासयेत् ॥ १७ ॥**
**मदं मूर्च्छां च जनयेद्द्विधिस्नेहः प्रयोजितः ।**
**रूक्षं भुक्तवतोऽत्यन्नं बलं वर्णं च हीयते ॥ १८ ॥**

**दी०**—शीते हेमन्तशिशिराख्ये वसन्ते च । स्नेह-बस्तिर्दिवा दिवसे प्रदीयते न तु रात्रौ अतिशीतार्दित-त्वात् । यदुक्तं—'उष्णाभिभूतेषु तथातिशीतान् शी-ताभिभूतेषु तथा सुखोष्णान् । तत्प्रत्यनीकेषु समं प्रयु-क्तान् सर्वत्र बस्तीन्प्रविभज्य दद्या'दिति । रात्रौ स्याद-नुवासनमिति । कस्मिन् समये ग्रीष्मवर्षाशरत्काले

इति । अनुवासनो निरूहांगत्वेन यस्य च विरेचनं नोचितं सश्चितं च मलं, बस्तिं तस्य च तन्मलापगमार्थं क्षीरवैतरणं वा बस्तिं दत्वानुवासनं देयं । त्रिशुद्धस्य स्नेहबस्त्युपदेशात् । तदुक्तं—'स्नेहबस्तिर्विधेयस्तु नाविशुद्धस्य देहिन' इति । कृताहारायानुवासनं देयमित्युक्तेऽतिस्निग्धभोजनेऽनुवासनं निषिद्धम् । तदाह—'द्विधा प्रयोजितः स्नेह इति' सुगमः ॥ १६–१८ ॥

**गू०**—बस्तिः कदा शस्यते ? इत्याह—स्नेहबस्तिः वसन्ते दिवसान्ते दीयते ग्रीष्मादौ अनुवासनं रात्रौ स्यात् । अतिस्निग्धं असमं भोजयित्वा न अनुवासयेत् । द्विधा प्रयोजितः स्नेहः मदं मूर्च्छां च जनयेत् ॥ १६–१८ ॥

### अथ बस्तेर्हीनातिमात्रयोर्निषेधमाह—

**हीनमात्रावुभौ बस्ती नातिकार्यकरौ स्मृतौ ।**
**अतिमात्रौ तथाऽनाहक्लमातीसारकारकौ ॥ १९ ॥**

**दी०**—उभौ बस्तीति । अनुवासननिरूहाख्यौ आस्थापनानुवासनाविलेके ॥ १९ ॥

**गू०**—हीनमात्रौ अतिमात्रौ बस्ती कार्यकरौ न इत्याह—हीनेति । उभौ अनुवासननिरूहाख्यौ हीनमात्रौ मात्राऽल्पौ अतिकार्यकरौ न । अतिमात्रौ तौ क्लमातीसारकारकौ भवतः मात्राया बस्तेर्बहुफलत्वात् ॥ १९ ॥

### बस्तिमात्रा

**उत्तमस्य पलैः षड्भिर्मध्यमस्य पलैस्त्रिभिः ।**
**पलस्यार्धेन हीनस्य युक्ता मात्राऽनुवासने ॥ २० ॥**

**दी०**—अथ च मात्राविधानमाह—उत्तमस्येति । बलानलादिभिरुत्तमस्य पुरुषस्य । एवं मध्यमहीनयोर्बोद्धव्यं । अस्याभिप्रायमाह–यस्योत्तमा षट्पला मात्रार्हेति तस्य द्विपलं प्रथमं देयं । ततश्च कर्षेण वृद्धिः एवं नवभिर्दिनैस्त्रिपला मात्रा स्यात् । कनीयसी यस्य मात्रा सार्धा पलमात्रान्विता तस्य प्रथममर्धपलोचितं । ततो वृद्धिरष्टमाषकैरेव नवभिर्दिनैः सार्धपलं स्यात् । नवदिनदानमुक्तं तेनातोऽर्वागपि स्नेहलक्षणोदयेऽनुवासननिवृत्तिः कार्या । यदुक्तं—'प्रसृतस्य पलार्धेन पलस्यापि पुनस्तथा । पलार्धं सार्धकर्षेण वृद्धिः कार्या यथाक्रमं' । क्रमो यथा तदुक्तं–'प्राग्दानमाद्ये द्विपलं पलार्धं वृद्धिर्द्वितीये पलमस्य वृद्धिः । कर्षद्वयेनैव समाषवृद्धिर्बस्तौ तृतीये क्रम एष उक्त' इति । इयं मात्रा द्रवविषये ॥ २० ॥

**गू०**—उत्तमादिमात्रामाह—अनुवासने इयं मात्रा युक्ता । उत्तमस्य उत्तमबलपुरुषस्य षड्भिः पलैः, मध्यमस्य मध्यबलस्य त्रिभिः पलैः सार्धपलेन हीनस्य हीनबलस्य मात्रा अनुवासने युक्ता । अर्धापि वा भवेदिति यदुक्तं 'पलद्वयं तस्य मात्रा तस्मादर्धाऽपि वा भवेत्' इति युक्तं तन्मात्राबस्तिविषयं नत्वनुवासनविषयम् ॥ २० ॥

### स च स्नेहः केनोपहितो देयः ? इत्याह—

**शताह्वा सैन्धवाभ्यां च देयं स्नेहे च चूर्णकम् ।**
**तन्मात्रोत्तममध्यान्ता षट्चतुर्द्वयमाषकैः ॥ २१ ॥**

**दी०**—शताह्वासैन्धवचूर्णस्य माषपरिमाणेन प्रचारः । तत्र स्नेहस्य पलमानं इति पक्षान्तरमिलेके । यतः चूर्णं माषः पले स्नेहे सिन्धु जन्मशताह्वयोरित्यादिवचनात् । एतेन किमुक्तं यस्यैव अनुवासनो देयस्तस्य कदाचित् अन्तःक्षयं व्रजेदित्यभिप्रायः । तथाहि यस्यैवं वानुवासः स्यात् सकृदन्तःक्षयं व्रजेदिति परमार्थतस्तु उत्तममध्यमाधमेषु षट्चत्वारः द्वौ च माषका यथाक्रमं ज्ञेयाः । यदुक्तं—'देवदारुवचारास्नाशताह्वाकुष्ठसैन्धवैः । अतश्चूर्णं प्रदातव्यं षट्चतुर्द्वयमाषकै'रिति ॥ २१ ॥

**गू०**—स्नेहे सैन्धवशताह्वाप्रमाणमाह—स्नेहे तैले शताह्वासैन्धवचूर्णं किंप्रमाणं देयं तदाह तन्मात्रा षट्चतुर्द्वयमाषकैः क्रमेण उत्तममध्यान्त्या उत्तमा षण्माषा, मध्यमा चतुर्माषा, अन्त्या कनिष्ठा द्विमाषा एतत्प्रमाणम् ॥ २१ ॥

### अनुवासनविषयमाह—

**विरेचनात्सप्तरात्रे गते जातबलाय च ।**
**भुक्तान्नायानुवास्याय बस्तिर्देयोऽनुवासनः ॥ २२ ॥**
**अथानुवास्यं स्वभ्यक्तमुष्णाम्बुस्वेदितं शनैः ।**
**भोजयित्वा यथाशास्त्रं कृतचङ्क्रमणं ततः ॥ २३ ॥**
**उत्सृष्टानिलविण्मूत्रं योजयेत्स्नेहबस्तिना ।**
**सुप्तस्य वामपार्श्वेन वामजङ्घाप्रसारिणः ॥ २४ ॥**

---

१ तदुक्तं दृढबलेऽपि—'जीर्णे तु सायं लघु चाल्पमात्रं भुक्तोऽनुवास्यः परिबृंहणार्थम्' इति ।

कुञ्चितापरजङ्घस्य नेत्रं स्निग्धगुदे न्यसेत्।
बद्ध्वा बस्तिमुखं सूत्रैर्वामहस्तेन धारयेत् ॥ २५ ॥
पीडयेद्दक्षिणेनैव मध्यवेगेन धीरधीः।
जृम्भाकासक्षवादींश्च बस्तिकाले न कारयेत् ॥२६॥
त्रिंशन्मात्रामितः कालः प्रोक्तो बस्तेस्तु पीडने।
ततः प्रणिहितः स्नेह उत्तानो वाक्शतं भवेत्॥२७॥
जानुमण्डलमावेष्ट्य कुर्याच्छोटिकया युतम्।
एका मात्रा भवेदेषा सर्वत्रैष विनिश्चयः ॥ २८ ॥
प्रसारितैः सर्वगात्रैर्यथावीर्यं विसर्पति।
ताडयेत्तलयोरेनं त्रीन्वारांश्च शनैः शनैः ॥ २९ ॥
स्फिजोश्चैवं ततः श्रोणीं शय्यां चैवोत्क्षिपेत्ततः।
जाते विधाने तु ततः कुर्यान्निद्रां यथासुखम्॥३०॥

**टी०**—विरेचनादिति। विरेचनात् सप्तरात्रे गते सति विरेचनदिवसात्प्रभृति सप्तरात्रं यावद्भवति तदुपरि अनुवासनं देयमित्यर्थः। अतएव जातबलाय प्राप्तबलाय बलवते इत्यभिप्रायः। भुक्तान्नायेति कृतभोजनाय। अनुवास्यायेति अनुवासनयोग्याय। एके भुक्तान्नायानुवास्यायेत्यस्य स्थाने कृताहाराय सायमह्नि इति पठन्ति व्याख्यानयन्ति च। अथानुवासनस्य विधिं वक्तुमाह—अनुवास्यमिति। अनुवासनयोग्यं अनुवास्यं पुरुषमिति शेषः। एके निरूहविषयमेनमामनन्ति। तत्तु अनुवास्यमित्यनेन पूर्वं अनुवासनं पुरुषं कृत्वेत्यभिप्रायः। यदुक्तं अनुवासितमभ्यक्तं स्विन्नदेहं निरूहयेदित्यादि। भोजयित्वा यथाशास्त्रमित्यनेनातिभोजननिषेधोऽवगन्तव्यः। उत्सृष्टानिलविण्मूत्रे दापयेत्। विण्मूत्रमिति परित्यक्तविण्मूत्रादिकं अन्यथा बस्तेरंतःप्रवेशो न भवति। तथाहि—'उत्सृष्टानिलविण्मूत्रे नरे बस्तिं निधापयेत्। अन्यथा निहितो बस्तिर्नैवान्तः संप्रपद्यत' इति। योजयेत् स्नेहबस्तिनेति वैद्य इति शेषः। केचिन्निरूहबस्तिविषयमेवेति वदन्ति तत्तु न सम्यक्। कृतानुवासनस्य निरूहस्योक्तत्वात्। उक्तंच—'अनुवासितमभ्यक्तं स्विन्नं देहं निरूहयेत्' इति। अथ बस्तिं कथं योजयेदित्याह-सुप्तस्य वामपार्श्वेनेति। सुप्तस्य शयानस्य। भाविनि भूतवदुपचारः। तेन प्रथमं जाग्रतस्तस्य पश्चात् सुप्तस्येत्यर्थः। शयने इत्यध्याहार्यम्। उक्तंच वाग्भटे—'कृतचङ्क्रमणं मुक्तविण्मूत्रं शयने सुखे। नात्युच्छ्रिते न चोच्छ्रिष्टे संविष्टे वामपार्श्वतः॥ संकोच्य दक्षिणं सक्थि प्रसार्य च ततोऽपरम्। अथास्य नेत्रं प्रणयेत्स्निग्धस्निग्धगुदे मुखे' इति। वामपार्श्वेनेति बस्तिदानं प्रशस्तं भवति। यदुक्तं 'वामाश्रयोग्निर्ग्रहणीगुदं च तत्पार्श्वसंस्थस्य सुखोपलब्धिः। लीयन्त एवं वलयश्च तस्मात् सव्यं शयानोऽर्हति बस्तिदान'मिति। अतएव वामजङ्घाप्रसारिणः पुरुषस्य कुञ्चितापरजङ्घस्य। वामजङ्घायां प्रसारितायां तदुपरि दक्षिणजङ्घा आकुञ्चिता कार्या इत्यभिप्रायः। नेत्रमिति वामे पुटकसहितं नलिकाकारं स्निग्धे गुदे इति स्निग्धस्विन्ने गुदे गुदमुखे। अथ पश्चात्कर्माह इति बस्तिविधानादनन्तरं स्नेहे स्नेहबस्तौ प्रणिहिते स्थापिते। अन्तःप्रविष्टे इति भावः। उत्तानः पुरुषः वाक्शतं यावत्तिष्ठेत्। ते च बस्तिदानार्थं पूर्वं वामपार्श्वे भूत्वा पश्चाद्बस्तिदाने कृते सति भूत्वा वांछितं यावत्तिष्ठेदित्यभिप्रायः। वाक्शतमिति छोटिकाशतं। 'ततः प्रणिहिते स्नेहे उत्ताने वांछितं भवे'दित्यपि पाठः। तत्रापि स एवार्थः। प्रसारितैः सर्वगात्रैः कृत्वा यथा पुरुषो भवति तथा बस्तिवीर्यं प्रसर्पतीति भावः। अस्याग्रे 'आकुञ्चयेच्छनैस्त्रिस्त्रिःसक्थिबाहू ततः पर'मिति पदद्वयं पठन्ति केचित्। तन्मते तु जङ्घाबाहुलतयोर्गृहीत्वा त्रिरुत्क्षिप्य संकोचयेत् सक्थिबाह्वाकुञ्चनं च स्नेहवीर्यविसर्पणार्थं। एवं हि शिरोमुखानां स्फुटत्वं भवति। ताडयेत्तलयोरेनमित्यादि। तलयोरिति हस्तपादतलयोः स्फिजोश्च ताडनं। बस्तेः शीघ्रगमनधारणार्थम्। यदुक्तं—दृढबले 'दत्वा स्फिजौ पाणितलेन हन्यात् स्नेहस्य शीघ्रागमरक्षणार्थ'मिति। तत इत्यनेनात्र त्रिवारग्रहणं बोद्धव्यं। तेन शय्यां त्रिरुत्क्षिपेदिति। शय्यां प्रति श्रोणीस्त्रिरुक्षिपेत् इत्यर्थः। अनेनैव **चर**-कोक्तगात्रमर्दनादिकमपि यथेच्छस्थितिहेतुः संगृह्यते। यदुक्तं—'स्नेहेन पार्ष्ण्यङ्गुलिपिण्डिकाश्च ये वास्य गात्रावयवा रुजार्ताः। तांश्चावमृद्यात् ससुखं ततश्च निद्रामुपासीत कृतोपधान' इति। अस्याग्रे तु 'एवं प्रणिहिते बस्तौ मन्दायासोऽथ मन्दवाक्। उत्तानाङ्गो भवेत्तावद्यावन्मात्रा शतं भवेदिति पठन्ति व्याख्यानयन्ति। 'कूर्परे जानुनी चैव कुर्यात् त्रीणि गतागतं। त्रिकसर्वेलनां वापि कुर्याद्वारं च तन्त्रित' इत्यपि श्लोकं पठन्ति केचित्। वाग्भटेऽपि—'दत्ते चोत्तानदेहस्य पाणिना ताडयेत्स्फिजौ। तत्पार्ष्णिभ्यां तथा शय्यां पादतश्च त्रिरुत्क्षिपेत्॥ ततः प्रसारितांगस्य सोपधानस्य पार्ष्णिके। आहन्यान्मुष्टिनांगं च स्नेहेनाभ्यज्य मर्दयेत्' इति॥ ततः किं कुर्यात्? इत्यत आह—

जाते इति। यथासुखमित्यनेनाचारकक्रमं स्मरन् निद्रां कुर्यादित्यर्थः। उक्तंच—'स्वास्तीर्णे शयनं कामं शयीताचारके रतः' इति ॥ २२–३० ॥

**गू०**—विरेचनादनुवासनः कदा दीयते इत्याह—विरेचनात् सप्तरात्रे गते सति जातबलाय पुरुषाय भुक्तान्नाय अनुवास्याय अनुवासनयोग्याय अनुवासनो बस्तिर्देयः। तथा चोक्तं वाग्भटे—'पक्षाद्विरेको वमिते ततः पक्षान्निरूहणं। सद्यो निरूढश्चान्वास्यः सप्तरात्राद्विरेचित' इति। स्नेहबस्तिना येन प्रकारेण योजयेत् तत्प्रकारमाह—अथानन्तरं अनुवास्यं अनुवासनयोग्यं पुरुषं स्वभ्यक्तं कृतस्नेहाभ्यङ्गं पुनः उष्णाम्बुस्वेदितं स्नापितं भोजयित्वा चंक्रमणं इतस्ततश्चलितं पुनः उत्सृष्टानिलविण्मूत्रं निःसृतवाताद्यं पुरुषं स्नेहबस्तिना योजयेत्। योजनप्रकारमाह—सुप्तस्येत्यादि। वामपार्श्वेन सुप्तस्य वामजङ्घाप्रसारिणः कुञ्चितापरजङ्घस्य संकोचितापरजङ्घस्य स्निग्धे गुदे नेत्रं वामहस्तेन धारयेत्। दक्षिणेन दक्षिणहस्तेन पीडयेत् मध्यस्थवेगेन मध्यवेगेनेत्यर्थः। धीरः धैर्यवान् पुनर्बस्तिदानकाले जृम्भादीन्न कारयेत्। कियत्पर्यन्तं बस्तिर्धार्या इति मात्रामाह—बस्तिपीडिते त्रिंशन्मात्रामितः कालः प्रोक्तः ततः प्रणिहितः स्नेहशः प्राप्तस्नेह उत्तानः वाक्शतं वचनशतं तिष्ठेत्। मात्रालक्षणं तु जान्विति ज्ञेयं प्रसारितैरित्यादि। प्रसारितैः सर्वगात्रैर्हस्तपादादिकैर्यथा। वीर्यं विसर्पति तथा एवं त्रींस्तलयोस्ताडयेत्। स्फिक्प्रदेशे ताडयेत्। तथा श्रोणीर्नितम्बं ताडयेत्ततः शय्यां क्षिपेत् स्थापयेत्। ततः विधाने जाते निद्रां कारयेत् ॥ २२–३० ॥

### सम्यगनुवासितलक्षणमाह—

**सानिलः सपुरीषश्च स्नेहं प्रत्येति यस्य वै।**
**उपद्रवं विना शीघ्रं स सम्यगनुवासितः ॥ ३१ ॥**

**दी०**—यस्य स्नेहः सानिलः सवातः सपुरीषः विष्ठासहितः प्रत्येति निःसरति। कथं? उपद्रवं विना उपद्रवोऽत्र ऊषचोषादिः। अतएव केचिदेवं पठन्ति—'ऊषचोषौ विना शीघ्रं स सम्यगनुवासित' इति। ऊषः प्रादेशिको दाहः, चोषो वेदनाविशेषः पिपासेत्यपरे। सुश्रुतेऽप्ययमेव पाठः इति **भानुमती**। शीघ्रमिति यामादूर्ध्वम् ॥ ३१ ॥

**गू०**—सम्यगनुवासितस्य लक्षणमाह—सानिल इत्यादि। सानिलः सवातः सपुरीषश्च यस्य स्नेहः प्रत्येति गच्छति उपद्रवं विना सम्यगनुवासितो भवतीत्यर्थः ॥ ३१ ॥

### स्नेहागते विधिमाह—

**जीर्णान्नस्त्वथ सायाह्ने स्नेहे प्रत्यागते पुनः।**
**लघ्वन्नं भोजयेत् कामं दीप्ताग्निस्तु नरो यदि ॥३२॥**

**दी०**—स्नेहे प्रत्यागते सति सद्य इति ज्ञेयं, दीप्ताग्निः स नरः यदि तथा कामं भोजयेत्। सायाह्ने प्रत्यागते लघ्वन्नं भोजयेत् इति विषमविभागः। केचिदपरेऽह्नि भोजयेदित्याहुः ॥ ३२ ॥

### अनुवासनव्यापत्तौ प्रतीकारमाह—

**अनुवासिताय दातव्यमितरेऽह्नि सुखोदकम्।**
**धान्यशुण्ठीकषायं वा स्नेहव्यापत्तिनाशनम् ॥३३॥**

**दी०**—इतरेऽहि अपरदिने सुखोदकं उष्णोदकम्। अथवा धान्यशुण्ठीकषायं वा तदपि कोष्णं दद्यात्। उक्तंच वाग्भटे—'प्रातर्नागरधान्याम्भः कोष्णं केवलमेव च' इति। अस्याग्रे केचित्पठन्ति—

'एकान्तरोपयोगेन धान्यशुण्ठीजलं पिबेत्।
तेनाऽस्य दीप्यते वह्निर्भक्ताकांक्षा च जायते' इति।

तन्मते तु एकान्तरानुवासनं, धान्यशुण्ठीक्वाथः परदिने प्रातः देय इति। धान्यनागरसिद्धं च तोयं षडङ्गविधिना इति चक्रः। कोष्णोदकं च पित्तोत्तरे देयम्। उक्तञ्च चक्रे—'क्वाथार्धमात्रया प्रातर्धान्यशुण्ठीजलं पिबेत्। पित्तोत्तरे कदुष्णाम्बु तावन्मात्रं पिबेदथ। तेनास्य दीप्यते वह्निर्भक्ताकांक्षा च जायते' इति ॥ ३३ ॥

**गू०**—स्नेहानुवासनानन्तरं स्नेहव्यापत्तिहरणविधानमाह—अनुवासिताय कृतानुवासनाय। इतरेऽह्नि तदग्रिमदिने सुखोदकं देयं। तत्स्नेहव्यापत्तिनाशनं भवति। स्नेहस्य वा काचिद्व्यापत्तिर्विक्रियारूपा ॥ ३३ ॥

### अथोक्तप्रकारमुपसंहरन् बस्तिदानसंख्यामाह—

**अनेन विधिना सप्त चाष्टौ वाथ नवाऽपि वा।**
**विधेया बस्तयस्तेषामन्तरा तु निरूहणम् ॥ ३४ ॥**
**(दत्तस्तु[1] प्रथमो बस्तिः स्नेहयेत् बस्तिवंक्षणैः।**

१–प्रक्षिप्तमिदम्।

**सम्यग्दत्तो द्वितीयस्तु मूर्धस्थमनिलं जयेत् ॥३५॥**
**बलं वर्णं च जनयेत्तृतीयस्तु प्रयोजितः।**
**चतुर्थपञ्चमौ दत्तौ स्नेहयेतां रसासृजी ॥ ३६ ॥**
**षष्ठो मांसं स्नेहयति सप्तमो मेद एव च।**
**अष्टमो नवमश्चापि मज्जानं च यथाक्रमम् ॥ ३७ ॥**
**एवं शुक्रगतान्दोषान्द्विगुणः साधु साधयेत्।**
**अष्टादशाष्टादशकान्बस्तीनां यो निषेवते ॥ ३८ ॥**
**स कुञ्जरबलोऽश्वश्च जयेत्तुल्योऽमरप्रभः।**
**रूक्षाय बहुवाताय स्नेहबस्तिं दिने दिने ॥ ३९ ॥**
**दद्याद्वैद्यस्तथान्येषामन्यां बाधामपाहरेत्।**
**स्नेहोऽल्पमात्रो रूक्षाणां दीर्घकालमनत्ययः ॥४०॥**
**तथा निरूहः स्निग्धानामल्पमात्रः प्रशस्यते।)**

**टी०**—अनेन पूर्वोक्तविधिनेति। पूर्वोक्तप्रकारेण षट्, सप्त, अष्टौ, नव बस्तयः क्रमेण विधेयाः योज्याः। क्रमो यथा कफजे विकारे षट्, वाग्रहणात् एकः त्रयो वा प्राप्ताः। पित्तात्मके च सप्त अष्टौ वा। चकारात्पञ्चग्रहणप्राप्तिः। वाते नव इति वाग्रहणादेकादशप्राप्तिः। ननु तन्त्रान्तरे—'रूक्षस्य बहुवातस्य द्वौ त्रीन् वाप्यनुवासनम्। दत्वा स्निग्धतनुं ज्ञात्वा ततः पश्चान्निरूहयेत्' इत्यनेन विरोधः तत्कथमत्र षट्सप्तादिसंख्या? सत्यम्, रूक्षस्य बहुवातस्य यदि मृदुकोष्ठत्वं तदा द्वौ वा त्रयो वा स्नेहबस्तयः। अतएव 'स्निग्धतनुं ज्ञात्वा' इति कृतवान्। ननु स्निग्धतनुता द्वित्रिस्नेहबस्तिदानस्य चरके विहितत्वात्। यथा—'एकं तथा त्रीन् कफजे विकारे पित्तात्मके पञ्च च सप्त वाऽपि। वातेऽपि चैकादशधा पुनर्वा बस्तीनयुग्मान् कुशलो विदध्यात्' इति। उच्यते—अयुग्मदानं स्वतन्त्रानुवासनविषयम् नतु निरूहाङ्गानुवासनविषयं। निरूहाङ्गानुवासने चरकेणाऽपि युग्मदानं दर्शितम्। यथा—'त्रीन् पञ्च वा चतुरो वा बस्तीन् दत्वोत्तरनिरूहणं विना पुनः स्नेहदानेन युग्मान् तथा कुर्यादिति दर्शयति निरूहान्तरितं कुर्यादित्यभिप्रायः। विषयसंख्योपादानं द्विचतुरादिबस्तेरपि मध्यविषयं परिग्रहार्थं' इति। रूक्षस्येत्यादिविधानं तु क्षीणविषयभेदादविरोधः। तेषामन्तरा तु निरूहणमिति तेषां स्नेहनबस्तीनां अन्तरा निरूहणं कार्यमित्यर्थः। यदुक्तं—'स्नेहबस्तिं निरूहं वा नैकमेवात्र शीलयेत्। स्नेहात् पित्तकफोत्क्लेशौ स्यातां न पवनाद्भयम्। तस्मान्निरूढोऽनुवास्यो निरूह्यश्चानुवासितः। नैवं पित्तकफोत्क्लेशौ स्यातां च पवनाद्भयम्' ॥३४–४०॥

**गू०**—वातादौ कियन्तो बस्तयो देयास्तत्प्रमाणमाह—अनेन विधिना पूर्वोक्तविधिना षड्वा सप्त वा अष्ट वा नव वा एतत्प्रमाणा बस्तयो देयाः। तेषां बस्तीनामन्तरा निरूहणं विधेयम्। वाग्भटे त्रिंशद्बस्तयः कथिताः। तथाच—'प्राक् स्नेह एकः पश्चान्ते द्वादशास्थापनानि तु। सान्वासकानि कर्मैव बस्तयस्त्रिंशदीरिताः' इति ॥ ३४–४० ॥

**निवृत्तेऽनुवासने स्नेहे पुनरपि अनुवासनमाह—**

**अथवा यस्य तत्कालं स्नेहो निर्याति केवलः ॥४१॥**
**तस्यान्योऽल्पतरो देयो न हि स्निह्यत्यतिष्ठति।**
**अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः॥४२॥**
**तदा शैथिल्यमाध्मानं शूलं श्वासश्च जायते।**
**पक्वाशये गुरुत्वं च तत्र दद्यान्निरूहणम् ॥ ४३ ॥**
**तीक्ष्णं तीक्ष्णौषधैर्युक्तां फलवर्तिर्हिता तथा।**
**यथानुलोमनं वायुर्मलं स्नेहश्च जायते ॥ ४४ ॥**
**यथा विरेचनं दद्यात्तीक्ष्णं नस्यं च शस्यते।**
**यस्य नोपद्रवं कुर्यात्स्नेहबस्तिरनिःसृतः ॥ ४५ ॥**
**सर्वोऽल्पो वा वृते रौक्ष्यादुपेक्ष्यः स विजानता।**

**टी०**—अथवा अनुवासनस्नेहः यस्य पुरुषस्य तत्कालं शीघ्रमेव निर्याति तस्य पुरुषस्यान्योऽल्पतरोऽनुवासनस्नेहो देयः। कुत इत्यत आह—अतिष्ठति इत्यादि। अतिष्ठति स्नेहेन हि स्निह्यति। अल्पतर इति पूर्वदत्तात्। तन्त्रान्तरे तु—'यस्यानुवासनो दत्तः सकृदन्तःक्षयं व्रजेत्। अत्युष्णो वाऽतितीक्ष्णो वा वायुना वा प्रपीडितः॥ सवाते चैकमात्रो वा गुरुत्वाद्वा सुभेषजः। तस्यान्योऽल्पतरो देयो नहि स्निह्यत्यतिष्ठति' इति। अत्र वायुना इति कोष्ठस्थेन वातेन इत्यर्थः। सवात इति। अनुच्छ्वास्य विहितबन्धादिना बस्तिपुटकस्थितवायुसहिते तु स्नेहे सुखकषायता जृम्भा धातरुजस्तास्ता वेपथुर्विषमज्वर इति। अथ च स्नेहानिर्गमेऽपि विधानमाह—अशुद्धस्येति। अकृतशोधनस्य पुरुषस्येत्यर्थः। अतएव मलोन्मिश्रः स्नेह इति। तथाहि 'स्नेहबस्तिर्विधेयस्तु नाविशुद्धस्य देहिनः। स्नेहवीर्यं तथा दत्ते देहेनानुविसर्पती'ति। यदा नैति न प्रत्यागच्छति स्नेह इति सम्बन्धः न तदा शिथिलाङ्गादयो भवन्ति। शिथिलस्थाने सदनमिति पाठान्तरं। तत्र

दद्याच्चिरूहणमिति । तीक्ष्णमिति निरूहमित्यस्य विशेषणं अथवा तीक्ष्णौषधैरेवं सद्युक्त्या फलवर्तिरप्यत्र विहिता। पाठान्तरोऽपि 'तीक्ष्णं तीक्ष्णौषधैर्युक्ता फलवर्तिर्हिता-ऽथवेति' फलवर्तिस्तु वक्ष्यमाणोत्तरबस्तौ द्रष्टव्या । एके 'तीक्ष्णं तीक्ष्णौषधैरेवं सिद्धं वाप्यनुवासनमि'ति पठन्ति व्याख्यानयन्ति च । 'यद्यनुलोमनवायुः मलं स्नेहश्च जायते । तदा विरेचनं दद्यात्तीक्ष्णं नस्यं च शस्यते ।' तीक्ष्णं विरेचनं नस्यं च तीक्ष्णमित्यर्थः । अथानिःसृतोऽपि बस्तिर्न विकाराय भवतीत्यत आह—नोपद्रवामिति उपद्रवोऽत्र रोगः स च मुखकषायत्वादिकः । यदुक्तं 'उपद्रवाभिभूतेषु स्नेहे बस्तिकषायता । जृम्भावातरुजस्तास्ता वेपथुर्विषमज्वर' इति । रौक्ष्यादिति । शरीररौक्ष्यादस्निग्धः यतो रूक्षं शरीरं भावयेत्तेनोपक्षीणः स खलु स्नेहः तत्तेनोपद्रवं करोति । अतएवोपेक्षित इत्युक्तं । उपेक्ष्य इति । तन्निःसरणाय प्रतिक्रियां कुर्यादित्यर्थः । 'अनायातं त्वहोरात्रात् स्नेहं संशोधनैर्हरेत् । स्नेहबस्तावनायाते नान्यः स्नेहो विधीयते' ॥४१–४५॥

**गू०**—अथवा यस्य पुरुषस्य स्नेहस्तत्कालं निर्याति न तिष्ठति तस्य अन्योऽन्यतरस्तस्मादन्यो बस्तिर्देयः । स्नेहो वा बस्त्यन्तरे । यदा स्नेहो नैति तदा किं कर्तव्यमित्याह—अशुद्धस्य वमनादिशुद्धिरहितस्य मलोन्मिश्रः स्नेहः यदा न याति तथा शैथिल्यं आध्मानं शूलं श्वासश्च जायते उत्पद्यते तत्र किं कुर्यादित्याह । तत्र निरूहणं दद्यात् । अन्यदपि तत्र दीयते तदाह । तीक्ष्णं तीक्ष्णौषधयुक्तफलवर्तिर्हिता यथा वायुः अनुलोमनं अनुलोमनत्वं वायुर्याति मलं स्नेहश्च जायते तथा कार्यमिति तथा विरेचनं दद्यात् । तीक्ष्णं नस्यं च तत्र शस्यते । स्नेहबस्तिर्यत्र उपद्रवं न कुर्यात्तत्र किं विधातव्यमित्याह—अनिःसृतः अनिष्कासितः । स्नेहबस्तिर्यस्य उपद्रवं श्वासशूलादिकं न कुर्यात् सर्वः अल्पः व्यावृत्तः रौक्ष्याद्विजानता स उपेक्ष्यः चिरं स्थाप्यः ॥ ४१–४५ ॥

### अहोरात्रादनिःसृते प्रतीकारमाह—

**अनायातं त्वहोरात्रे स्नेहं संशोधनैर्हरेत् ।**
**स्नेहबस्तावनायाते नान्यः स्नेहो विधीयते ॥ ४६ ॥**

**दी०**—अनायातं अनिःसृतं स्नेहं संशोधनैः शोधनबस्तिभिर्हरेत् । केचित् शोधनैरित्यत्र सोपद्रवमिति पठन्ति । तत्रोपद्रवाः पूर्वोक्ताः । अन्यः स्नेहः स्नेहबस्तिर्न विधीयते । स्नेहाभिभवात् शोधनबस्तिस्तु देयः । अनायातमित्यस्य श्लोकस्याग्रे अधिकं पठन्ति यथा—

'कुष्ठक्रमुककल्कं तु पाययेच्चाम्लसंयुतम् ।
औष्ण्यात्तैक्ष्ण्यात् सरत्वाच्च बस्तिः सोऽस्यानुलोमयेत्
गोमूत्रेण त्रिवृत्पथ्याकल्कं वात्रानुलोमनम् ।'

इत्यादि पाठो बहुपुस्तकेष्वदृष्टः, तस्मादस्माभिरपि न व्याख्यातः । 'नान्यः स्नेहो विधीयत' इत्यत्र 'ताभ्यां सेकः प्रशस्यत' इति केचित्पाठं पठन्ति ॥ ४६ ॥

**गू०**—अहोरात्रे यदा स्नेहं न याति तदा किं कुर्यात् ? इत्याह—अहोरात्रेऽनायातं स्नेहं संशोधनैर्हरेत् । अस्नेहबस्तौ स्नेहे अनायाते तदा ताभ्यां स्नेहो विधीयते विशेषेण स्थाप्यते ॥ ४६ ॥

### अथानुवासनार्थं गुडूच्यादितैलमाह—

**गुडूच्येरण्डपूतीकभार्ङ्गीवृषकरोहिषम् ॥ ४७ ॥**
**शतावरीं सहचरं काकनासां पलोन्मिताम् ।**
**यवमाषातसीकोलकुलत्थान्प्रसृतोन्मितान् ॥ ४८ ॥**
**चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणशेषेण तेन च ।**
**पचेत्तैलाढकं पेष्यैर्जीवनीयैः पलोन्मितैः ॥ ४९ ॥**
**अनुवासनमेतद्धि सर्ववातविकारनुत् ।**

**दी०**—गुडूच्यादीनि काकनासान्तानि प्रत्येकं पलोन्मितानि ग्राह्याणि । तत्र गुडूची छिन्नरुहा, एरण्डः पञ्चाङ्गुलः, पूतीकः पूतिकरञ्जः, भार्ङ्गी द्विजा, वृषो वासकः, रोहिषः सुगन्धितृणं, शतावरी नारायणी, सहचरः कुरण्टकः, काकनासा प्रसिद्धा इति । यवादीनि प्रसिद्धानि प्रसृतोन्मितानि पलद्वयमितानि प्रत्येकं ग्राह्याणि । तैलाढकं कृष्णतिलस्नेहः आढकमितः पेष्यैः जीवनीयैः पूर्वोक्तकल्कीकृतैः प्रत्येकं पलोन्मितैः इति । जीवनीयगणो यथा—'जीवन्ती सूर्यपर्णीयुक् काकोल्यौ जीवकर्षभौ । मेदे यष्टीति मधुरो जीवनीयो गणो मतः' ॥ इति ॥ ४७–४९ ॥

**गू०**—अथानुवासनतैलमाह—पूतीकः करञ्जः, वृषकः आटरूषकः, रोहिषः प्रसिद्धः, सहचरः पीतवासा, काकनासा काकजङ्घा, एताः पलमिताः प्रत्येकं । यवादीन् प्रसृतोन्मितान् पलद्वयोन्मितान् । कोलं बदरं, जीवनीयैर्जीवनीयगणद्रव्यैः पलोन्मितैः कल्कीकृतैः पचेत् । एतदनुवासनतैलम् ॥ ४७–४९ ॥

**इदानीं स्नेहव्यापत्चिकित्सामाह**

**षट्सप्ततिर्व्यापदस्तु जायन्ते बस्तिकर्मणा ।**
**दूषिताद् समुदायेन ताश्चिकित्स्यास्तु सुश्रुतात् ५०**

**टी०**—बस्तिव्यापदश्च सुश्रुताच्चिकित्स्या इत्यत आह—अस्याग्रे केचिदधिकं पाठं पठन्ति तद्यथा—

स्नेहपीतस्य वातस्य विरिक्तस्य सुतासृजः ।
निरूढस्य च कायाग्निर्मन्दो भवति देहिनः ॥
स चाल्पैर्लघुभिश्चान्नैरुपयुक्तैर्विवर्धते ।
काष्ठैरणुभिरल्पैश्च संधुक्षित इवानलः ॥
युक्तेऽग्नौ जीवति चिरं रोगी स्याद्विकृतिं गते ।
शान्ते पञ्चत्वमायाति देही तस्माद्बलोऽनलः' ॥ इति ।

एतदर्थं चिकित्सापि—

'प्रातरुष्णोदकं देयं धान्यनागरसाधितम् ।
तेनाऽस्य दीप्यते वह्निर्भक्ताकांक्षा च जायते' इति ।

स्नेहपीतस्य इत्यादिपाठः क्षेपक इति कृत्वा अस्माभिरपि नात्र व्याख्यातः ॥ ५० ॥

---

१–'अत ऊर्ध्वं व्यापदो वक्ष्यामः—तत्र नेत्रचलितं (१) विवर्तितं (२) पार्श्वावपीडितं (३) अत्युत्क्षिप्तं (४) अवसन्नं (५) तिर्यक्क्षिप्तं (६) इति षट् प्रणिधानदोषाः, अतिस्थूलं (७) कर्कशं (८) अवनतं (९) अणु (१०) भिन्नं (११) सन्निकृष्ट–(१२) विप्रकृष्टकर्णिकं (१३) सूक्ष्मा-(१४) तिच्छिद्रं (१५) अतिदीर्घं (१६) अतिह्रस्वं (१७) इत्येकादश नेत्रदोषाः । बहलता (१८) अल्पता (१९) सच्छिद्रता (२०) प्रस्तीर्णता (२१) दुर्बद्धता (२२) इति पञ्च बस्तिदोषाः । अतिपीडितता (२३) शिथिलपीडितता (२४) भूयोभूयोऽवपीडनं (२५) कालातिक्रमः (२६) इति चत्वारः पीडनदोषाः । आमता (२७) हीनता (२८) अतिमात्रता (२९) अतिशीतता (३०) अत्युष्णता (३१) अतितीक्ष्णता (३२) अतिमृदुता (३३) अतिस्निग्धता (३४) अतिरूक्षता (३५) अतिसान्द्रता (३६) अतिद्रवता (३७) इत्येकादश द्रव्यदोषाः । (३८) अवाक्-(३९) शीर्षो–(४०)च्छीर्ष-न्युब्जो-(४१)त्तान-(४२)सङ्कुचित (४३) देहस्थितता–दक्षिणा(४४)पार्श्वशायिनः प्रदानम्, इति सप्त शय्यादोषाः । एवमेताश्चतुश्चत्वारिंशत् (४४) व्यापदो वैद्यनिमित्ताः । आतुरनिमित्ताः पञ्चदश(१५) आतुरोपद्रवचिकित्सिते वक्ष्यन्ते (५९) । स्नेहस्त्वष्टाभिः कारणैः प्रतिहतो न प्रत्यागच्छति, त्रिभिर्दोषैः (१) अशनाभिभूतो, (२) मलव्यामिश्रो, (३) दूरानुप्रविष्टो, (४) अस्विन्नस्य, (५) अनुष्णो, (६) अल्पं भुक्तवतो, (७) अल्पश्चेति (८) वैद्यातुरनिमित्ता भवन्ति (६८) । १ अयोगस्तूभयो–२ राध्मानं, ३ परिकर्तिका, ४ परिस्रावः, ५ प्रवाहिका, ६ हृदयोपसरणं, ७ अङ्गग्रहो, ८ अतियोगो जीवादानं इति नव व्यापदो वैद्यनिमित्ता भवन्ति । (७६) ॥ सुश्रु० चि० अ० ३६

---

२–एषां चिकित्सा चोक्ता सुश्रुते—

अथ नेत्रे विचलिते तथा चैव विवर्तिते ।
गुदे क्षतं रुजा वा स्यात्तत्र सद्यः क्षतक्रियाः ॥
अत्युत्क्षिप्तेऽवसन्ने च नेत्रे पायौ भवेद्रुजा ।
विधिरत्राऽपि पित्तघ्नः कार्यः स्नेहैश्च सेचनम् ॥
तिर्यक्प्रणिहिते नेत्रे तथा पार्श्वावपीडिते ।
मुखस्यावरणाद्बस्तिर्न सम्यक्प्रतिपद्यते ॥
ऋजु नेत्रं विधेयं स्यात्तत्र सम्यग्विजानता ।
अतिस्थूले कर्कशे च नेत्रे चावनते तथा ॥
गुदे भवेत् क्षतं रुक् साधनं पूर्ववत्स्मृतम् ।
आसन्नकर्णिके नेत्रे भिन्नेऽणौ चाप्यपार्थकः ॥
अवसेको भवेद्बस्तेस्तस्माद्दोषान् विवर्जयेत् ।
प्रकृष्टकर्णिके रक्तं गुदमर्मप्रपीडनात् ॥
क्षरत्यत्राऽपि पित्तघ्नो विधिर्बस्तिश्च पिच्छिलः ।
प्रत्यागच्छंस्ततः कुर्याद्रोगान् धार्यविघातजान् ॥
दीर्घे महास्रोतसि च ज्ञेयमत्यवपीडवत् ।
प्रस्तीर्णे बहले चापि चर्मो दुर्बद्धदोषवत् ॥
यस्तावल्पेऽल्पता वाऽपि द्रव्यस्याऽल्पगुणा मताः ।
दुर्बद्धे चाणुभिन्ने च विज्ञेयं भिन्ननेत्रवत् ॥
अतिप्रपीडितो बस्तिः प्रयात्यामाशयं ततः ।
वातेरितो नासिकाभ्यां मुखतो वा प्रपद्यते ॥
तत्र तूर्णं गलापीडं कुर्याच्चाप्यवधूननम् ।
शिरःकायविरेकौ च तीक्ष्णौ सेकांश्च शीतलान् ॥
शनैः प्रपीडितो बस्तिः पक्वाशयं न गच्छति ।
न च सम्पादयत्यर्थांस्तस्माद्युक्तं प्रपीडयेत् ॥
भूयो भूयोऽवपीडन वायुरन्तः प्रपीड्यते ।
तेनाध्मानं रुजश्चोग्रा यथास्वं तत्र बस्तयः ॥
कालातिक्रमणात्क्लेशो व्याधिश्चाभिप्रवर्धते ।
तत्र व्याधिबलघ्नं तु भूयो बस्तिं निधापयेत् ॥
गुदोपदेहशोफौ तु स्नेहोऽपक्वः करोति हि ।
तत्र संशोधनो बस्तिर्हितं चापि विरेचनम् ॥

गू०—बस्तिकर्मणः षट्सप्ततिः व्यापदः रोगा जायन्ते उत्पद्यन्ते । ताः व्यापदः सुश्रुतात् चिकित्स्याः । किंभूताद्बस्तिकर्मणः । दूषितात् तद्दोषैर्दुष्टा बस्तिक्रियायाः ॥ ५० ॥

**अनुवासने पानादिपथ्यमाह—**

**पानाहारविहारश्च परिहारश्च कृत्स्नशः ।**

**स्नेहपानसमाः कार्या नात्र कार्या विचारणा ॥ ५१ ॥**

इति श्रीदामोदरसूनुशार्ङ्गधराचार्यप्रणीतशार्ङ्गधरसंहितायामुत्तरखण्डे स्नेहबस्तिविधिर्नाम पञ्चमोऽध्यायः ॥

दी०—स्नेहपानसमा इति । ये पानाऽऽहारविहा-

हीनमात्रावुभौ बस्ती नातिकार्यकरौ मतौ ।
अतिमात्रौ तथाऽऽनाहक्लमातीसारकारकौ ॥
मूर्च्छां दाहमतीसारं पित्तं चात्युष्णतीक्ष्णकौ ।
मृदुशीतावुभौ वातविबन्धाध्मानकारकौ ॥
तत्र हीनादिषु हितः प्रत्यनीकः क्रियाविधिः ।
तत्र सान्द्रे तनुं बस्तिं तनौ सान्द्रं च दापयेत् ॥
स्निग्धोऽतिजाड्यकृद्रूक्षस्तम्भाध्मानकृदुच्यते ।
बस्तिं रूक्षमतिस्निग्धे स्निग्धं रूक्षे च दापयेत् ॥
अतिपीडितवद्दोषान् विधिं चाप्यवशीर्षके ।
उच्छीर्षके समुत्थाहं बस्तिः कुर्याच्च मेहनम् ॥
तत्रोत्तरो हितो बस्तिः सुस्विन्नस्य सुखावहः ।
न्युब्जस्य बस्तिर्नाप्नोति पक्वाधानं विमार्गगः ॥
हृद्गुदं बाधते चात्र वायुः कोष्ठमथापि च ।
उत्तानस्यावृते मार्गे बस्तिर्नान्तः प्रपद्यते ॥
नेत्रसंवेजनभ्रान्तो वायुश्चान्तः प्रकुप्यति ।
देहे सङ्कुचिते दत्तः सक्थ्नोरप्युभयस्तथा ॥
न सम्यगनिलाविष्टो बस्तिः प्रत्येति देहिनः ।
स्थितस्य बस्तिर्दत्तस्तु क्षिप्रमायात्यवाङ्मुखः ॥
न चाशयं तर्पयति तस्मान्नार्थकरो हि सः ।
नाप्नोति बस्तिर्दत्तस्तु कृत्स्नं पक्वाशयं पुनः ॥
दक्षिणाश्रितपार्श्वस्य वामपार्श्वानुगो यतः ।
न्युब्जादीनां प्रदानं च बस्तेर्नैव प्रशस्यते ॥
पश्चादनिलकोपोऽत्र यथास्वं तत्र कारयेत् ।
व्यापदः स्नेहबस्तेस्तु वक्ष्यन्ते तच्चिकित्सिते ॥
अयोगाद्यास्तु वक्ष्यामि व्यापदः सचिकित्सिताः ।
अनुष्णोऽल्पौषधो हीनो बस्तिर्नैति प्रयोजितः ॥
विष्टम्भाध्मानशूलैश्च तमयोगं प्रचक्षते ।
तत्र तीक्ष्णो हितो बस्तिस्तीक्ष्णं चापि विरेचनम् ॥
सशेषान्नेऽथवा भुक्ते बहुदोषे च योजितः ।
अत्याशितस्यातिबहुर्बस्तिर्मन्दोष्ण एव च ॥
अनुष्णलवणस्नेहो ह्यतिमात्रोऽथवा पुनः ।
तथा बहुपुरीषश्च क्षिप्रमाध्मापयेन्नरम् ॥
हृत्कटीपार्श्वपृष्ठेषु शूलं तत्रातिदारुणम् ।
तत्र तीक्ष्णतरो बस्तिर्हितं चाप्यनुवासनम् ॥
अतितीक्ष्णोष्णलवणो रूक्षो बस्तिः प्रयोजितः ।
सपित्तं कोपयेद्वायुं कुर्याच्च परिकर्तिकाम् ॥
नाभिबस्तिगुदं तत्र छिनत्तीवातिदेहिनः ।
पिच्छाबस्तिर्हितस्तस्य स्नेहश्च मधुरैः शृतः ॥
अत्यम्ललवणस्तीक्ष्णः परिस्रावाय कल्पते ।
दौर्बल्यमङ्गसादश्च जायते तत्र देहिनः ॥
परिस्रवेत्ततः पित्तं दाहं सञ्जनयेद्गुदे ।
पिच्छाबस्तिर्हितस्तत्र बस्तिः क्षीरघृतेन च ॥
प्रवाहिका भवेत्तीक्ष्णान्निरूहात् सानुवासनम् ।
सदाहशूलं कृच्छ्रेण कफासृगुपवेश्यते ॥
पिच्छाबस्तिर्हितस्तत्र पयसा चैव भोजनम् ।
सर्पिर्मधुरकैः सिद्धं तैलं चाप्यनुवासनम् ॥
अतितीक्ष्णो निरूहो वा सवाते चानुवासनः ।
हृदयस्योपसरणं कुरुते चाङ्गपीडनम् ॥
दोषैस्तत्र रुजास्तास्ता मदो मूर्च्छाङ्गगौरवम् ।
सर्वदोषहरं बस्तिं शोधनं तत्र दापयेत् ॥
रूक्षस्य बहुवातस्य तथा दुःशयितस्य च ।
बस्तिरङ्गग्रहं कुर्याद्रूक्षो मृद्वल्पभेषजः ॥
तत्राङ्गसादः प्रस्तम्भो जृम्भोद्वेष्टनवेपकाः ।
पर्वभेदश्च तत्रेष्टाः स्वेदाभ्यञ्जनबस्तयः ॥
अत्युष्णतीक्ष्णोऽतिबहुर्दत्तोऽतिस्वेदितस्य च ।
अल्पदोषस्य वा बस्तिरतियोगाय कल्पते ॥
विरेचनातियोगेन समानं तस्य लक्षणम् ।
पिच्छाबस्तिप्रयोगश्च तत्र शीतः सुखावहः ॥
अतियोगात्परं यत्र जीवादानं विरिक्तवत् ।
देयस्तत्र हितश्चापि पिच्छाबस्तिः सशोणितः ॥
नवैता व्यापदो यास्तु निरूहं प्रत्युदाहृताः ।
स्नेहबस्तिष्वपि हिता विज्ञेयाः कुशलैरिह ॥
इत्युक्ता व्यापदः सर्वाः सलक्षणचिकित्सिताः ।
भिषजा च तथा कार्यं यथैता न भवन्ति हि ॥ इति सुश्रु. चि. ३६ ॥

रादयः स्नेहपानविषये पूर्वं दर्शिताः, तेऽप्यत्र क्रमशः कार्याः। तेनाऽत्र विचारणा न कार्या। आगमोक्तत्वात्। पानादयोऽप्यत्र तत्रत्या अवगन्तव्याः। अस्याग्रे पठन्ति, केचित्—

'अष्टादशाष्टादशकं बस्तीनां यो निषेवते।
यथोक्तेन विधानेन परिहारक्रमेण च॥
स कुञ्जरबलोऽश्वस्य जवतुल्योऽमरप्रभः।
नीतिवाक्यश्रुतिधरः सहस्रायुर्नरो भवेत्' इति।

अन्यदपि—'मूलसेकाद्यथा वृक्षः स्निग्धश्च नवपल्लवः। तथा बस्तिप्रदानात्स्यान्नरः कान्तिबलादिमान्' इति॥ ५१॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायामुत्तरे खण्डे बस्तिविधिरध्यायः॥

---

गू०—पथ्यसंग्रहमाह—पानाहारेति। सुगमम्॥ अनुवासननिरुक्तिमाह सुश्रुतात्—'अनुवसन्नपि न दूष्यते, अनुदिवसं नापि न दूष्यते, अनुदिवसं वा दीयते इत्यनुवासनम्'॥ ५१॥

इति श्रीकाशिरामवैद्यकृतायां शार्ङ्गधरगूढार्थदीपिकायां पञ्चकर्मणि अनुवासनबस्त्यधिकारः॥ ५॥

---

## अथ षष्ठोऽध्यायः।

### अथ (पारिशेष्यात्) निरूहबस्तिविधिमाह—तत्र तद्भेदानाह—

**निरूहबस्तिर्बहुधा भिद्यते कारणान्तरैः।**
**तैरेव तस्य नामानि कृतानि मुनिपुङ्गवैः॥ १॥**
**निरूहस्यापरं नाम प्रोक्तमास्थापनं बुधैः।**
**स्वस्थानस्थापनाद्दोषधातूनां स्थापनं मतम्॥ २॥**

दी०—यो निरूहबस्तिः पूर्वं संगृहीतः सोऽप्यत्र कारणान्तरैः कृत्वा बहुधा भिद्यते कथ्यत इत्यर्थः। कारणान्तराणि वक्ष्यमाणदोषहर-संशमन-शोधन-लेखन-बृंहणानि पिच्छिल-यापन-वैतरणबस्तिप्रभृतीनि बोद्धव्यानि। तैरेव कारणान्तरैरेव तस्य निरूहबस्तेः नामानि मुनिपुङ्गवैः ऋषिश्रेष्ठैः कृतानि कथितानि इत्यभिप्रायः, दोषहरबस्तिरित्यादीनि तस्य विशेषनामान्याह—निरूहस्येति। बुधैः पण्डितैः निरूहस्य नाम आस्थानं प्रोक्तं, आस्थापयति वयः इति आस्थापनं परमुत्कृष्टं उत्कृष्टत्वं च वयःस्थापनेनैव। अथवा दोषधातूनां स्वस्थाने स्थापनादास्थापनं, तच्च क्षीरेण क्वाथैश्च क्रियते। उक्तं च—'स्नेहो दीयते स स्यादनुवासननामकः। पयःकषायैः सोऽपि निरूहास्थापनो मतः' इति। एके 'स्वस्थापनं स्थापनाद्दोषधातूनां स्थापनं मतम्' इति नाम पठन्ति व्याख्यानयन्ति च। **सुश्रुते**ऽपि—'सदोषनिर्हरणाच्छरीररोहणाद्वा निरूहः' इति सोऽस्थापन इति नाम। अस्यामपि निरुक्तौ स एव। यथा वयःस्थापनाद्वाऽयुःस्थापनाद्वाऽऽस्थापनं, ततश्च सर्वदोषनिर्हरणान्निरूह इति वमनादिकम्॥ १॥ २॥

गू०—अथ निरूहणबस्तिविधिः। निरूहस्य नामान्तरमाह—स दोषनिर्हरणाद्वा निरूहः, तस्य निरूहस्य अपरं आस्थापितं नाम बुधैः दोषधातूनां स्वस्थाने स्थापनाद्वा नाम मतम्॥ १॥ २॥

### अथ दोषाद्यपेक्षया मात्रामाह—

**निरूहस्य प्रमाणं च प्रस्थं पादोत्तरं परम्।**
**मध्यमं प्रस्थमुद्दिष्टं हीनं च कुडवास्त्रयः॥ ३॥**

दी०—निरूहस्य निरूहसंज्ञस्यास्थापनस्य परमुत्कृष्टं मानं पादोत्तरं प्रस्थं मध्यमं प्रस्थं उद्दिष्टम्। त्रयः कुडवाः हीनं मानम्। उक्तं च पराशरे—'निरूहस्य प्रमाणं तु प्रस्थः पादोत्तरः परः। मध्यः प्रस्थस्तु निर्दिष्टो हीनाः कुडवास्त्रयः' इति। उत्तमादिमानं च दोषबलापेक्षयाऽवगन्तव्यम्। ननु चरकादावन्यथा पठितं तद्यथा—'अत ऊर्ध्वं प्रवक्ष्यामि निरूहस्योपकल्पनम्। आदशप्रसृतम्यादौ ततोऽन्यानुपकल्पयेत्' इति। तत्कथमत्र विंशतिपलान्युत्तममात्रायां प्रतिपादितानि? सत्यम्, द्वादशप्रसृतमानो निरूहः पञ्चाशमानो युक्त्या दर्शितः। तथाहि—'मधुस्नेहनकल्काख्यकषायावापतः क्रमात्। त्रीणि, षट्, द्वे, दश, त्रीणि पलान्यनिलरोगिणाम्॥ पित्ते चत्वारि चत्वारि त्रि पञ्च च चतुष्टयम्। षट्, त्रीणि, द्वे, दश, त्रीणि कफे चापि निरूहणम्' इति। अन्यच्च—'दत्वाक्षं सैन्धवस्यादौ मधुनः प्रसृतिद्वयम्। विनि-

मेथ्य ततो दद्यात्स्नेहस्य प्रसृतित्रयम् ॥ एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत्। संमूर्च्छिते कषायं तु चतुःप्रसृतसंमितम् ॥ वितरेच्च तथाऽवापमन्ते द्विप्रसृतोन्मितम् । वस्त्रपूतं तथोष्णाम्बुकुम्भीबाष्पेन तापितः । एवं प्रकल्पितो बस्तिर्द्वादशप्रसृतो भवेत् ॥ न धावत्यौषधं पाणेर्न तिष्ठत्यवलिप्य च । न करोति च सीमान्तं स निरूहः सुयोजित' इति । एतेनोत्कृष्टदोषबले द्वादशप्रसृतमानः मध्यबले विंशतिपलानीत्यदोषः । सामान्यविशेषकथनाददोषः । स्वकीयमते सामान्यः परमते विशेष इत्यदोषः । यद्वा शोधनसंशमनलेखनप्रभृतीनां बस्तीनां विषयत्वेन विंशतिप्रभृतिकं चतुर्विंशतिप्रभृतिकं मानमुपदिशन्ति तदनुमानतो ज्ञातव्यं ग्रन्थगौरवभयान्न लिखितमित्यदोषः॥३॥

**गू०**—निरूहप्रमाणमाह—निरूहस्य प्रमाणं पादोत्तरं वंक्षणाधिकं प्रस्थं मतं, प्रस्थं मध्यमं मतं, त्रयः कुडवा हीनं मतम् ॥ ३ ॥

**अथानास्थापनीयानाह—**

**अतिस्निग्धोत्क्लिष्टदोषौ क्षतोरस्कः कृशस्तथा ।**
**आध्मानच्छर्दिहिक्कार्शःकासश्वासप्रपीडितः ॥ ४ ॥**
**गुदशोफातिसारार्तो विषूचीकुष्ठसंयुतः ।**
**गर्भिणी मधुमेही च नास्थाप्यश्च जलोदरी ॥ ५ ॥**

**गू०**—एते नास्थाप्याः, चकारादनुवास्याश्च न । उक्तंच—'भयोन्मादस्तथा शोषाजीर्णारुचिप्रमेहिनः । मूर्च्छाकुष्ठोदरस्थौल्यश्वासकासक्षयातुराः ॥ शोथभ्रमभदच्छर्दियुता बस्त्यमलाचलाः । नास्थाप्या नानुवास्याश्च वातरोगादृते नराः' इति । कुष्ठशब्देनात्र महाकुष्ठं ग्राह्यं न क्षुद्रकुष्ठं तस्य विहितत्वात् । प्रमेहग्रहणात् सर्वप्रमेहेषु हितम् । एवं जलोदरग्रहणेन अन्योदरेषु हितम् । उक्तंच—'उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः । अवश्यं स्थापनीयास्ते नानुवास्यास्त एव च' इति ॥ ४ ॥ ५ ॥

**गू०**—येषां न विहितं तानाह—वयःस्थापनादायुःस्थापनाद्वा स्थापनम् । आस्थापनशब्देन निरूहणमुच्यते तन्निरूहणकर्म अतिस्निग्धादीनां न विधीयते । उत्क्लिष्टदोषो वमनोन्मुखदोषः, क्षतमुरो यस्यासौ क्षतोरस्कः, कृशो दुर्बलः, स्पष्टमन्यत् ॥ ४ ॥ ५ ॥

**अथ निरूह्यानाह—**

**वातव्याधावुदावर्ते वातासृग्विषमज्वरे ।**
**मूर्च्छातृष्णोदरानाहमूत्रकृच्छ्राश्मरीषु च ॥ ६ ॥**
**वृद्धासृग्दरमन्दाग्निप्रमेहेषु निरूहणम् ।**
**शूलेऽम्लपित्ते हृद्रोगे योजयेद्विधिवद्बुधः ॥ ७ ॥**

**दी०**—वातव्याधाविति । वातव्याध्यादिषु निरूहणं आस्थापनसंज्ञं योजयेत् । वातव्याधिः आक्षेपकादिः, उदावर्त उदरापूरः, वातासृक् वातरक्तं, विषमज्वरः एकाहिकादिः, उदरमत्र जलोदरव्यतिरिक्तं सर्वोदरं ग्राह्यम् । एके—'मूत्रकृच्छ्रोदरानाहमूत्रदोषाश्मरीषु च' इति पठन्ति । तत्र मूत्रदोषं मूत्राघातमपि ज्ञेयम् । अथवा मूत्रग्रहणेन स्त्रीणामपि मूत्ररेतोरजोदोषा अपि गृह्यन्ते । यदुक्तं—'मूत्ररेतोरजोदोषान् स्त्रीणां हन्ति निरूहणम्' इति । अतएवाग्रे असृग्दरग्रहणं प्रमेहेषु इत्यत्रापि मधुमेहव्यतिरेकेणान्ये प्रमेहा ग्राह्याः । तस्य निषिद्धत्वात् । विधिवदित्यनेन तन्त्रान्तरोक्तविधानं बोद्धव्यम् । तद्यथा—'नात्युच्छ्रितं नाप्यतिनीचपादं सपादपीठं शयनं प्रशस्तम् । प्रधानमृद्वास्तरणोपपन्नं प्राक्शीर्षकं शुक्लपटोत्तरीयम् ॥ प्रक्षिप्य बस्तौ मथितं खजेन सुबद्धपुच्छास्य च निर्वलीकम् । आङ्गुष्ठमध्येन मुखं पिधाय नेत्राग्रसंस्थामपनीय वर्तिम् । तैलाक्तगात्रं कृतमूत्रविट्कं नातिक्षुधार्तं शयने मनुष्यम् ॥ समेथवेषन्नतशैरसे वा नात्युच्छ्रिते स्वास्तरणोपपन्ने । सव्येन पार्श्वेन सुखं शयानं कृत्वा जयेदस्य भुजोपनाहम् ॥ निष्कुञ्च्य सव्येतरदस्य सक्थि वामं प्रसार्य प्रणयेच्च बस्तिम् । स्निग्धे गुदे नेत्रचतुर्थभागं स्निग्धैर्जनैर्जानु च पृष्ठवंशम् ॥ अकम्पनाऽवेपनलाघवादीन् पाण्यङ्गुलीश्चापि निदर्शयन्ति । प्रपीड्य चैकग्रहणेन दत्ते नेत्रं शनैरेव ततोऽपकर्षयेत् ॥ तिर्यक्प्रणीतेन तु याति धारा गुदे व्रणः स्याच्चलिते च नेत्रे । दत्तः शनैर्नाशयमेति बस्तिः कण्ठं प्रधावत्यतिपीडितस्तु' इत्यादि ॥ ॥ ६ ॥ ७ ॥

**गू०**—येषां निरूहणं विहितं तानाह—वातव्याधौ वातरोगे, उदावर्ते उदावर्तरोगे तथासृग्दररोगादौ निरूहणं योजयेत् । जलोदरे निषेधः नान्यस्मिन् उदरे ॥ ६ ॥ ७ ॥

१—'कथंचन' पा० ।

### येन प्रकारेण निरूहणं कर्तव्यं तदाह—

उत्सृष्टानिलविण्मूत्रं स्निग्धस्विन्नमभोजितम् ।
मध्याह्ने गृहमध्ये च यथायोग्यं निरूहयेत् ॥ ८ ॥
स्नेहबस्तिविधानेन बुधः कुर्यान्निरूहणम् ।
जाते निरूहे च ततो भवेदुत्कटकासनः ॥ ९ ॥
तिष्ठेन्मुहूर्तमात्रं तु निरूहागमनेच्छया ।
अनायातं मुहूर्तं तु निरूहं शोधनैर्हरेत् ॥ १० ॥
निरूहैरेव मतिमान्क्षारमूत्राम्लसैन्धवैः ।

**दी०**—एवंविधं निरूहयेत् । उत्सृष्टेत्यादि । उत्सृष्टं परित्यक्तं वातमूत्रपुरीषं येन । स्निग्धं कृतस्नेहनं । स्विन्नं स्वेदितम् । अभोजितमकृतभोजनं । मध्याह्नेति तस्योचितकालत्वख्यापनार्थम् । गृहमध्ये इति । वातातपरजोदोषादिनिरासार्थम् । स्नेहबस्तिविधानं पूर्वमेवानुवासनाध्याये उक्तम् । बुधग्रहणं निरूहदानेऽतिकुशलत्वख्यापनार्थम् । निरूहदानानन्तरं किं कर्तव्यं ? इत्यत आह—जाते इति । अनायते निरूहं शोधनैर्निरूहैर्हरेत् । शोधननिरूहाः क्षारादिभिः कर्तव्याः । उत्कटकासनः ऊर्ध्वजानुस्थितः मुहूर्तं घटिकाद्वयपर्यन्तम् । यदा मुहूर्तादुपरि अनायातं निरूहं स्यात्, तदा शोधनैर्निरूहैः कृत्वा आहरेत्क्षारमूत्राम्लसैन्धवैर्निरूहणैरिति संबन्धः ॥ अनायातस्य व्यापत्तिरुक्ता चक्रदत्ते—'अशुद्धश्च मलोन्मिश्रः स्नेहो नैति यदा पुनः । तदाङ्गे सदनाध्मानशूलाः श्वासश्च जायते ॥ पक्वाशयगुरुत्वं च तत्र दद्यान्निरूहणम् । तीक्ष्णं तीक्ष्णौषधैरेवं सिद्धं चाप्यनुवासनम्' इति ॥ ८-१० ॥

**गू०**—एवं उत्सृष्टानिलमूत्रादिलक्षणं निरूहयेत् । यथायोग्यं यथाविहितं उत्सृष्टः निःसृतः अनिलो वायुर्विट् पुरीषं, मूत्रं च यस्य तम् । स्निग्धं स्नेहितं, स्विन्नं स्वेदितं, अभोजितम् अकृताहारं, मध्याह्ने मध्याह्नकाले गृहमध्ये गृहाभ्यन्तरे । निरूहणं केन विधिना कुर्यादित्याह—पूर्वोक्तो यः स्नेहबस्तिस्तद्विधानेन बुधः निरूहणं कुर्यात् । निरूहे जाते उत्कटकासनः उत्कटं भवेत् । पुनः निरूहागमनेच्छया मुहूर्तमात्रं तिष्ठेत् । मुहूर्तात् अनायान्तं निरूहं ततः शोधनैर्निरूहैः क्षारमूत्राम्लसैन्धवैरेव शोधयेत् ॥ ८-१० ॥

### अथ सुनिरूढलक्षणमाह—

यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः ।
लाघवं चोपजायेत सुनिरूढं तमादिशेत् ॥ ११ ॥

**दी०**—यस्य क्रमेण तन्त्रान्तरोक्तेऽग्निमूत्रपित्तकफवायवः गच्छन्ति लाघवं चोपजायते सुनिरूढं तमादिशेत् । उक्तंच दृढबलेन—'प्रसृष्टविण्मूत्रसमीरणत्वं रुच्यग्निवृध्याशयलाघवानि । रोगोपशांतिः प्रकृतिस्थता च बलं च तत्स्यात्सुनिरूढलिङ्गम्' इति । सुनिरूढमित्यादिना चैकद्वित्रिप्रभृतिनिरूहदानविषयमुक्तम् । उक्तंच—'एकोऽपकर्षत्यनिलं स्वमार्गात्पित्तं द्वितीयस्तु कफं तृतीय' इत्यादि ॥ ११ ॥

### अथ दुर्निरूहलक्षणमाह—

यस्य स्याद्बस्तिरल्पाल्पवेगो हीनमलानिलः ।
मूर्च्छार्तिजाड्यारुजिमान् दुर्निरूढं तमादिशेत् १२

**दी०**—अल्पाल्पवेग इति । बस्तिदानेन स्वल्पद्रवाणामन्तः प्रवेशननिषयः । उक्तंच—'दत्तः शनैर्नाशयमेति बस्तिः कण्ठं प्रधावत्यतिपीडितस्तु' इति । एतेन तूर्णमवलम्बितमिति । हीनमल इति हीनमलो बस्तिरित्यर्थः । न पुरीषादिनिर्गमः । यतः—'अल्पाल्पवेगो विड्वातहीनो हीननिरूहणः । मूर्च्छाच्छर्दिकफप्रायो महावेगोऽतिशब्दितः' इति । मूर्च्छार्तिजाड्यारुचिमान् इति । मूर्च्छास्थाने मूत्रार्तिरिति पाठान्तरम् । जाड्यं जडता कफप्रायेत्यभिप्रायः । केचिदत्रास्थापनस्नेहबस्त्योः सम्यग्दानलक्षणं पठन्ति । तद्यथा—

'विविक्तता मनस्तुष्टिः स्निग्धता व्याधिनिग्रहः ।
आस्थापनस्नेहबस्त्योः सम्यग्दाने तु लक्षणम्' इति ॥
विविक्तता मनस्तुष्टिः । सुगममन्यत् ॥ १२ ॥

**गू०**—दुर्निरूहलक्षणमाह—आस्थापनस्नेहबस्त्योः सम्यग्दाने लक्षणमाह—विविक्तता एकान्तता, मनस्तुष्टिः मनसः संतोषः, स्निग्धता सचिक्कणता, व्याधिनिग्रहः रोगनाशः । आस्थापितं निरूहणं । स्नेहबस्तिः पूर्वोक्तः, तयोः सम्यग्दाने इदं लक्षणम् ॥ १२ ॥

### निरूहस्य बस्तिदानवद्देयतामाह—

अनेन विधिना युञ्ज्यान्निरूहं बस्तिदानवत् ।
द्वितीयं वा तृतीयं वा चतुर्थं वा यथोचितम् ॥ १३ ॥

**दी०**—अनेन पूर्वोक्तेन विधिना निरूहं बस्तिदानवत् बस्तिदानतुल्यं, वाग्रहणात् प्रथमं एकं, पश्चाद्द्वितीयं, तदनन्तरं तृतीयं चतुर्थं च । एतेन बस्तिपु-

दकं कथितमिति भावः । चतुर्थं वा यथोचितमिति । यथार्हमिति । ननु तृतीयाधिकपुटमनिषिद्धम् । यथा —'स्निग्धोष्ण एकः पवने निरूहो द्वौ स्वादुशीतौ पयसा च पित्ते । त्रयः समूत्राः कटुकोष्णतीक्ष्णाः कफे निरूहा न परं विधेयाः' इति । नैवं, निषेधो बहुपुरुषविषयतया प्रायिकः, चतुर्थपुटदानं तु कस्मिन्नपि क्रूरकोष्ठे बलीयसि बहुदोषे पुरुषे, ततः कुतो विरोधः। केचिदत्रामुं श्लोकं पठन्ति—

सस्नेह एकः पवने, पित्ते द्वौ पयसा सह ।
कषायकटुमूत्राढ्याः कफे कोष्णास्त्रयो हिताः ॥

अस्यार्थः पूर्वमेव प्रतिपक्षे दर्शितः तेनात्र कैरपि पठितः ॥ १३ ॥

गू०—अनेन विधिना बस्तिदानवित् निरूहं युञ्ज्यात् । निरूहस्य द्वितीयादियोजनविधिमाह—एकं निरूहं द्वितीयं वा चतुर्थं निरूहं वा यथोचितं यथादोषं युञ्ज्यात् । तत्र निरूहयोजने दोषक्रममाह—पवने वाते एकः निरूहः सस्नेह एव । द्वौ निरूहौ पित्ते पयसा दुग्धेन सह । कषायकटुरूक्षाद्याः कफे त्रयः कोष्णाः ॥ १३ ॥

### अथ भोजनक्रममाह—

**पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात् ।
निरूहं भोजयित्वा च ततस्तमनुवासयेत् ॥ १४ ॥**

दी०—पित्तादीनामत्र क्षीरयूषरसैः सह भोजनं कार्यम् । क्रमादिति अनुक्रमेणैव । अनुक्रमो यथा—पित्ताविष्टं निरूहं क्षीरोदनं भोजयित्वा पश्चादनुवासयेत्, बृंहणार्थमिति भावः । श्लेष्माविष्टं यूषोदनं भोजयित्वा पश्चादनुवासनं देयम् । अनिलाविष्टं मांसरसौदनं भोजयित्वा अनुवासयेदिति पदार्थः । उक्तंच—'प्रत्यागते कोष्णजलावसिक्तः शाल्यन्नमद्यात्तनुना रसेन । जीर्णे च सायं लघु चाल्पमात्रं भुक्तोऽनुवास्यः परिबृंहणार्थम्' इति ॥ १४ ॥

गू०—पित्तश्लेष्मानिलाविष्टं निरूहं योजयेत् क्रमात् क्षीरयूषरसैः । पित्ताविष्टं क्षीरैः, श्लेष्माविष्टं यूषैः, अनिलाविष्टं रसैः । एवं निरूहं योजयित्वा पश्चादनुवासनं कारयेत् ॥ १४ ॥

१–'रूक्षाद्या' पा.

### इदानीं बालवृद्धयोर्मृदुबस्तिमाह—

**सुकुमारस्य वृद्धस्य बालस्य च मृदुर्हितः ।
बस्तिस्तीक्ष्णः प्रयुक्तस्तु तेषां हन्याद्बलायुषी ॥१५॥**

दी०—सुकुमारादीनां मृदुर्बस्तिर्हितः । 'तु' पुनः तीक्ष्णः बस्तिः प्रयुक्तः तेषां बलायुषी हन्यात् । तन्त्रान्तरे विशेषः । 'विशेषात्सुकुमाराणां हीन एव क्रमो हितः । मृदुर्बस्तिः प्रयोक्तव्यो विशेषाद्बालवृद्धयोः' इति ॥ १५ ॥

गू०—कीदृशं निरूहं युञ्ज्यात्? तदाह—सुकुमारादेर्मृदुर्बस्तिर्हितः । तीक्ष्णबस्तिस्तेषां बलायुषी हन्यात्, बलं च आयुश्च ते बलायुषी ॥ १५ ॥

### इदानीं बस्तीनां दानक्रममाह—

**दद्यादुत्क्लेशनं पूर्वं मध्ये दोषहरं ततः ।
पश्चात् संशमनीयं च दद्याद्बस्तिं विचक्षणः ॥ १६ ॥**

दी०—उत्क्लेशनं दोषाणां, दोषहरं त्रिदोषघ्नं, संशमनं दोषाणां समीकरणाच्छमनम् । शेषं सुगमम् ॥१६॥

गू०—आदौ मध्ये अन्ते च कीदृशं बस्तिं युञ्ज्यात्? तदाह—उत्क्लेशनं दद्यात् उत्क्लेशनं दोषोत्क्लेशकरं, मध्ये दोषहरं वातादिदोषशमनं, पश्चात् संशमनीयं समस्थापकं उपशमकरमित्यर्थः ॥ १६ ॥

### अथ तेषां स्वरूपाण्याह—

#### उत्क्लेशनबस्तिः ।

**एरण्डबीजं मधुकं पिप्पली सैन्धवं वचा ।
हपुषा फलकल्कं च बस्तिरुत्क्लेशनः स्मृतः ॥१७॥**

दी०—अयमुत्क्लेशनसंज्ञो बस्तिः शेषं सुगमम् १७

गू०—मधुकं गुडपुष्पं, हपुषा प्रसिद्धा ॥ १७ ॥

### अथ दोषहरबस्तिमाह—

**शताह्वा मधुकं बिल्वं कौटजं फलमेव च ।
सकाञ्जिकः सगोमूत्रो बस्तिर्दोषहरो मतः ॥ १८ ॥**

गू०—मधुकं गुडपुष्पं, कौटजं फलं इन्द्रयवः ॥१८॥

### अथ तेषां दोषहरमाह—

**प्रियङ्गु मधुकं मुस्तं तथैव च रसाञ्जनम् ।
सक्षीरः शस्यते बस्तिर्दोषाणां शमनः स्मृतः ॥१९॥**

दी०—अयं दोषसंशमनो बस्तिः । प्रियङ्गुः

कान्ता, रसाञ्जनमत्र कृष्णपाषाणसदृशं द्रव्यविशेषः । तदभावे दार्वीक्वाथसमुद्भवं योज्यम् ॥ १९ ॥

**गू०**—अथ दोषहरबस्तिः । रसाञ्जनं कृष्णाञ्जनम् ॥ १९ ॥

### शोधनबस्तिमाह—

**शोधनद्रव्यनिःक्वाथैस्तत्कल्कैः स्नेहसैन्धवैः ।**
**युक्त्या खजेन मथिता बस्तयः शोधनाः स्मृताः॥२०**

**दी०**—शोधनद्रव्याणि निकुम्भादीनि प्रसिद्धानि । तानि निकुम्भ-त्रिफला-गवक्षीर-स्नुक्-शंखिनी-नीलिनी-तिल्वकानि, शम्याक-कम्पिल्लक-हेमदुग्धा-दुग्धं च विरेचनानि इत्यादीनि । 'खजेन' इत्यत्र 'क्षणेन' इति पाठः साधुः ॥ २० ॥

### लेखनबस्तिमाह—

**त्रिफलाक्वाथगोमूत्रक्षौद्रक्षारसमायुताः ।**
**उषकादिप्रतीवापा बस्तयो लेखनाः स्मृताः ॥२१॥**

**दी०**—उषकादिः प्रागुक्तः । यथा—ओषकादि-सैन्धवशिलाजतुकासीसद्वयहिंगूनि त्रुटकश्चेति । शेषं सुगमम् ॥ २१ ॥

**गू०**—अथ लेखनबस्तयः—क्षारो यवक्षारः । उषकादिर्गणः सुश्रुते । लेखना मेदोरोगादिकृशीकरणात् ॥ २१ ॥

### अथ बृंहणबस्तीनाह—

**बृंहणद्रव्यनिष्क्वाथाः कल्कैर्मधुरकैर्युताः ।**
**सर्पिर्मांसरसोपेता बस्तयो बृंहणाः स्मृताः ॥ २२ ॥**

**दी०**—बृंहणानि काकोली-क्षीरकाकोली-जीवकर्षभक-मेदा-महामेदाप्रभृतीनि मधुरकैरिति । द्राक्षा-खर्जूर-वातामादीनि ॥ शेषं सुबोधम् ॥ २२ ॥

**गू०**—बृंहणा बस्तयः मताः कथिताः ॥ २२ ॥

### पिच्छिलबस्तिमाह—

**बदर्यै-रावती-शेलु-शाल्मली-धन्वनागराः ।**
**क्षीरसिद्धाः क्षौद्रयुक्ता नाम्ना पिच्छिलसंज्ञिताः ।**
**अजोरभ्रैणरुधिरैर्युक्ता देया विचक्षणैः ॥ २३ ॥**
**मात्रा पिच्छिलबस्तीनां पलैर्द्वादशभिर्मता ।**

**दी०**—बदरी प्रसिद्धा (कोलं), ऐरावती नागबला
नी, शेलुः श्लेष्मातकः, शाल्मली प्र-
न्वदेशजो नागरमुस्तम् । धन्व-
कुराः' इति पाठः, धन्वयासकां-
कुराः ॥ अजः छागः, उरभ्रो मेषः, एणः कृष्णमृगः । एके सुश्रुताध्यायिनोऽत्र पठन्ति—'वराहमहिषोरभ्रवैडालैणेयकौक्कुटम् । सद्यस्कमसृगाजं वा देयं पिच्छिलबस्तिषु' इति । तथा व्याख्यानयन्ति च । क्षेपकोऽयमिति मन्यमानत्वात् न सम्यक् लिखितः । मात्रापिच्छिलबस्तीनामिति । द्वादशपलैरेवात्र पूर्वोक्ता हीनमात्रा नियता विशेषग्रहणात् ॥ २३ ॥

**गू०**—अथ पिच्छिलबस्तयः—बदरी कोलं, ऐरावती नागरङ्गफलं, शेलु गुन्द्रिणी, शाल्मली प्रसिद्धा, धन्वो यवासकः, नागरं शुण्ठी । अजा बर्करी, उरभ्र ऊर्णमेषः, एणो मृगः तद्रुधिरेण देयः । तत्प्रमाणं द्वादशपलम् ॥ २३ ॥

### अथ निरूहार्थं द्रव्याणां परिमाणपूर्वकं विधानमाह—

**दत्त्वादौ सैन्धवस्याक्षं मधुनः प्रसृतिद्वयम् ॥ २४ ॥**
**विनिर्मथ्य ततो दद्यात्स्नेहस्य प्रसृतित्रयम् ।**
**एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत् ॥२५॥**
**संमूर्च्छिते कषायं तु चतुःप्रसृतिसंमितम् ।**
**क्षिप्त्वा विमथ्य दद्याच्च निरूहं कुशलो भिषक् २६**
**वाते चतुष्पलं क्षौद्रं दद्यात्स्नेहस्य षट्पलम् ।**
**पित्ते चतुष्पलं क्षौद्रं स्नेहं दद्यात्पलत्रयम् ॥ २७ ॥**
**कफे च षट्पलं क्षौद्रं क्षिपेत्स्नेहं चतुष्पलम् ।**

**दी०**—अत्र सैन्धवपरिमाणं तूत्तममात्रायां न गणितं अतएव 'आदौ' इति ग्रहणं कृतम् । उत्तममात्रा विंशतिपलैरेव । पूर्वमुक्तं यथा—'निरूहस्य प्रमाणं तु प्रस्थं पादोत्तरं परम् । मध्यमं प्रस्थमुद्दिष्टं हीनं तु कुडवास्त्रय' इति । चक्रदत्ते तु—'दत्त्वाक्षं सैन्धवस्यादौ मधुनः प्रसृतद्वयम् । विनिर्मथ्य ततो दद्यात्स्नेहस्य प्रसृतित्रयम् ॥ एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत् । संमूर्च्छितैः कषायं तु चतुःप्रसृतिसंमितम् ॥ क्षिप्त्वा विमथ्य दद्याच्च निरूहं कुशलो भिषक् । वाते चतुःपलं क्षौद्रं दद्यात्स्नेहस्य षट्पलम् ॥ पित्ते चतुष्पलं क्षौद्रं स्नेहं दद्यात्पलत्रयम् । कफे च षट्पलं क्षौद्रं क्षिपेत् स्नेहं चतुःपलम् ॥ वितरेच्च यथावापमन्ते द्विप्रसृतोन्मितम् । एवं प्रकल्पितो बस्तिर्द्वादशप्रसृतो भवेत्' इति । एतदपि पञ्चाङ्गमानयुक्त्या समीचीनं दर्शितम् । तथाहि—'मधुस्नेहनकल्काख्यकषायावापतः क्रमात् । त्रीणि षट् द्वे दश-

त्रीणि पलान्यनिलरोगिणाम् । पित्ते चत्वारि चत्वारि त्रिपञ्च च चतुष्टयम् ॥ षट् त्रीणि द्वे दश त्रीणि कफे चापि निरूहणम्' इति । वातादीनां केवलमधुस्नेहयोर्विशेषमानमाह—वाते चतुःपलं क्षौद्रं इत्यादि । शेषं सुगमम् ॥ २४–२७ ॥

**गू०**—अथ निरूहः । सैन्धवस्य अक्षं दद्यात् । मधुना प्रसृतिद्वयं चतुःपलं स्नेहस्य तैलादेः प्रसृतित्रयं षट्पलं कल्कस्य द्रव्यस्य प्रसृतिः द्विपलम् । संमूर्च्छिते परिपक्वे कषाये चतुःप्रसृतिसंमितं अष्टपलं क्षिप्त्वा विमथ्य निरूहं दद्यात्, वाते क्षौद्रं चतुःपलं दद्यात्स्नेहं षट्पलं पित्ते क्षौद्रं चतुःपलं स्नेहं पलत्रयं कफे षट्पलं क्षौद्रं स्नेहं चतुःपलं एवं विभज्य देयं । इति निरूहणमात्राविधिः ॥ २४–२७ ॥

## मधुतैलिकसंज्ञं बस्तिविधानमाह—

**एरण्डक्वाथतुल्यांशं मधुतैलं पलांशकम् ॥ २८ ॥**
**शतपुष्पापलार्धेन सैन्धवार्धेन संयुतम् ।**
**मधुतैलकसंज्ञोऽयं बस्तिः खजविलोडितः ॥ २९ ॥**
**मेदोगुल्मकृमिप्लीहमलोदावर्तनाशनः ।**
**बलवर्णकरश्चैव वृष्यो दीपनबृंहणः ॥ ३० ॥**

**दी०**—मधुतैलं पलांशकमित्यस्य स्थाने मधुतैलपलाष्टकमित्येके पठन्ति । तन्न, उक्तं च तन्त्रान्तरे—'मधुतैले समे स्यातां क्वाथश्चैरण्डमूलजः । पलार्धं शतपुष्पायास्ततोऽर्धं सैन्धवस्य च । पलेनैकेन संयुक्तं खजेन तु विलोडितः । देयः सुखोष्णो भिषजा मधुतैलिकसंज्ञकः' इति । मलोदावर्तनाशने इत्यत्र उदरोदावर्तनाशन इति पाठः । अयमेव तन्त्रान्तरे अर्धमात्रिकनिरूहः कथितः स तु तत्रैव ज्ञातव्यः ॥२८–३०॥

**गू०**—शतपुष्पा पलार्धेन योज्या सैन्धवार्धेन च संयुतं । मधुतैलकसंज्ञोऽयं बस्तिर्मेदोगुल्मादिहरः । खजविलोडित इति खजो मन्थानविशेषः, तेन विलोडितः मथितः ॥ २८–३० ॥

## अथ यापनबस्तिमाह—

**क्षौद्राज्य-क्षीर-तैलानां प्रसृतं प्रसृतं भवेत् ।**
**हपुषासैन्धवाक्षांशो बस्तिः स्याद्दीपनः परः॥ ३१ ॥**

**दी०**—हपुषा विपुषा ॥ ३१ ॥

**गू०**—अथ यापनबस्तिमाह—क्षौद्रादीनां प्रसृतिर्द्विपलं, हपुषा प्रसिद्धा, सैन्धवं च एतयोरक्षांशौ द्वौ द्वौ अक्षौ कर्षौ ॥ ३१ ॥

## अथ युक्तरथबस्तिमाह—

**एरण्डमूलनिष्क्वाथो मधुतैलं ससैन्धवम् ।**
**एष युक्तरथो बस्तिः सवचापिप्पलीफलः ॥ ३२ ॥**

**दी०**—क्वाथादीनां परिमाणं तु मधुतैलिकबस्तिवज्ज्ञेयम् । तस्यान्तःपातित्वात् । 'यदुक्तं मधुतैलं च क्वाथं सरससैन्धवम् । फलपिप्पलीसंयुक्तो बस्तिर्युक्तरथः स्मृतः' इति । अत्राऽपि पूर्वोक्तमेव । फलमत्र मदनफलम् । इति युक्तरथः ॥ ३२ ॥

**गू०**—अथ युक्तरथबस्तिः—फलो मदनफलः, एष युक्तरथो नाम बस्तिः ॥ ३२ ॥

## अथ सिद्धबस्तिमाह—

**पञ्चमूलस्य निष्क्वाथस्तैलं मागधिका मधु ।**
**ससैन्धवः समधुकः सिद्धबस्तिरिति स्मृतः ॥ ३३ ॥**

**दी०**—सुगमम् ॥ इति सिद्धबस्तिनिरूहः ॥ ३३ ॥

**गू०**—पञ्चमूलं बृहद्बिल्वादिः, तस्य निष्क्वाथः, तैलं तिलतैलं, मागधिका पिप्पली, मधु क्षौद्रं, सैन्धवं लवणं, मधुको मधुकसार इति नाम्ना प्रसिद्धः ॥ ३३ ॥

## पथ्यापथ्यमाह—

**स्नानमुष्णोदकैः कुर्यात् दिवा स्वप्नमजीर्णताम् ।**
**वर्जयेदपरं सर्वं, आचरेत्स्नेहबस्तिवत् ॥ ३४ ॥**

इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायामुत्तरखण्डे निरूहबस्तिविधिरध्यायः समाप्तः ॥ ६ ॥

---

**दी०**—अथ त्याज्यान्याह—स्नेहबस्तिवदिति । स्नेहबस्तिविधौ यदाचरितं तत्सर्वं आचरेत् । तत्तत्रैव ज्ञातव्यम् ॥ ३४ ॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरसंहिताटीकायां दीपिकायामुत्तरखण्डे बस्तिनिरूहकल्पनाध्यायः समाप्तः ॥

---

**गू०**—बस्तौ सेव्यं निषेधं च—उष्णोदकेन स्नानं कुर्यात् इति विहितम् । तथा स्नेहबस्तौ यद्विहितं तदाचरेत् । दिवा स्वापं अजीर्णतां च वर्जयेत् ॥ ३४ ॥

इति श्रीकाशिरामवैद्यकृतायां शार्ङ्गधरसंहिताटीकायां गूढार्थदीपिकायामुत्तरखण्डे पञ्चकर्मणिनिरूहबस्तिविधिरध्यायः षष्ठः ॥ ६ ॥

---

# अथ सप्तमोऽध्यायः ।

## पारिशेष्यादुत्तरबस्तिमाह—

**अतः परं प्रवक्ष्यामि बस्तिमुत्तरसंज्ञितम् ।**
**द्वादशाङ्गुलकं नेत्रं मध्ये च कृतकर्णिकम् ॥ १ ॥**
**मालतीपुष्पवृन्ताभं छिद्रं सर्षपसन्निभम् ।**

**दी०**—अतः परं बस्तिनिरूहयोरनन्तरं उत्तरसंज्ञितं बस्तिं प्रवक्ष्यामि इति । उत्तरबस्तिनेत्रस्वरूपमाह—मध्ये च कृतकर्णिकमिति । मध्ये षडङ्गुलोपरि कर्णिका मेखलाकारा मुद्रिका । अतएव सूत्रमार्गे षडङ्गुलं नेत्रं प्रवेशयेदित्युक्तमग्रे । यन्त्रच्छिद्रं तु मालतीपुष्पवृन्ताभं कार्यं सर्षपाकारम् । यन्त्रे छिद्रमाह—छिद्रं सर्षपसन्निभं निर्गमच्छिद्रमित्यर्थः । केचित् 'सर्षपनिर्गमम्' इति पाठं पठन्ति । सिद्धार्थकप्रवेशाग्रमिति तन्त्रान्तरे । ननु क्वचिदपि चतुर्दशांगुलमपि पठितं तद्यथा—'चतुर्दशाङ्गुलं नेत्रं तत्र कार्यं विजानता । मालतीपुष्पवृन्ताभं कर्तव्यं छिद्रमेव च' इति । तत्कथमत्र द्वादशांगुलम् ? उच्यते, कर्णिकार्थं तु नेत्रं षडङ्गुलमेव सर्वसंमतम् । शेषं तु चर्मपुटकस्य समीचीनग्रथनार्थं कथितमित्यदोषः । चरकादौ तु द्वादशांगुलमेवोक्तत्वात्, अथवा—'मेढ्रायामसमं केचिदिच्छन्ति खलु तद्विद' इत्यादि मतमालोच्य चरकमतमेव शार्ङ्गधरेण स्वीकृतमित्यलं विस्तरेण ॥ १ ॥

**गू०**—अतः परं उत्तरसंज्ञितं बस्तिं प्रवक्ष्यामि पूर्वं विधानमाह—द्वादशांगुलिकं नेत्रं नालिका लक्षणं मध्ये कृतकर्णिकं कमलपत्रकर्णिकावन्मध्यभागं मालतीपुष्पवृन्ताभं स्थूलं पुनः छिद्रे सर्षपनिर्गमं यथा भवति तथा छिद्रम् ॥ १ ॥

## स्नेहमात्रामाह—

**पञ्चविंशतिवर्षाणामधो मात्रा द्विकार्षिका ॥ २ ॥**
**तदूर्ध्वं पलमात्रा च स्नेहस्योक्ता भिषग्वरैः ।**

**दी०**—पञ्चविंशतिवर्षाणामधः पञ्चविंशतिवर्षादधोऽर्वाक् चतुर्विंशतिपर्यन्तं मात्रा स्नेहस्य द्विकार्षिकी । तदूर्ध्वं पञ्चविंशादूर्ध्वं पलमात्रा । भिषग्वरैरिति ग्रहणेन दोषदेशदेहकालानलाद्यपेक्ष्य न्यूनाधिकाऽपि मात्रा योज्या सम्प्रदायदर्शनात् । अत एवोक्तं—'पञ्चविंशतिवर्षैनमधो मात्रा द्विकार्षिकी' इति क्वचित्पाठोऽपि ॥ २ ॥

**गू०**—वयोऽनुमानेन प्रमाणमाह—पञ्चविंशतिवर्षाणां अधोवयसां स्नेहस्य तैलादेर्द्विकार्षिकी पलार्धमानमात्रा, तदूर्ध्वं पञ्चविंशतेरूर्ध्वं स्नेहस्य पलमाना मात्रा ॥ २ ॥

## अथोत्तरबस्तेर्विधानमाह—

**अथास्थापनशुद्धस्य तृप्तस्य स्नानभोजनैः ॥ ३ ॥**
**स्थितस्य जानुमात्रे च पीठेऽन्विष्य शलाकया ।**
**स्निग्धया मेढ्रमार्गे च ततो नेत्रं नियोजयेत् ॥ ४ ॥**
**शनैः शनैर्घृताभ्यक्तं मेढ्ररन्ध्रेऽङ्गुलानि षट् ।**
**ततोऽवपीडयेद्बस्तिं शनैर्नेत्रं च निर्हरेत् ॥ ५ ॥**
**ततः प्रत्यागते स्नेहे स्नेहबस्तिक्रमो हितः ।**

**दी०**—अथशब्द आनन्तर्ये । आस्थापनं कषायबस्तिः, कषायैर्दीयमानत्वात् । निरूहमेवास्थापनकमित्येके । कस्य ? स्नानभोजनैः तृप्तस्य, भोजनग्रहणेन घृतक्षीरमांसादीनां ग्रहणम् । उक्तं च—'अथान्तरमुपस्निग्धं स्विन्नं प्रशिथिलाशयम् । यवाग्नं सघृतं क्षीरं पीतवन्तं यथाबलम्' इत्यादि । जानुमात्रे पीठे इति जानुपरिमाणे आसने । उच्चतया बोद्धव्यम् । उक्तं च—'निषण्णमाजानुसमे पीठे' इत्यादि । अन्विष्य शलाकया इति मेढ्रमार्गं शलाकया अन्विष्य अन्वेषणं कृत्वा । किंविशिष्टया शलाकया स्निग्धया श्लक्ष्णया । अथवा घृताभ्यञ्जनेन वा । ततो नेत्रं नियोजयेत् इति । नेत्रं नलिका उत्तरबस्तिसंज्ञस्य । 'अथास्थापनशुद्धस्य तृप्तस्य स्नानभोजनैः' अस्याग्रे—'स्वभ्यक्तबस्तिशीर्षस्य तैलेनोष्णेन युक्तितः । ततः समं स्थापयित्वा नालमस्य प्रहर्षितम्' इत्येके पठन्ति व्याख्यानयन्ति च, प्राचीनपुस्तके न दृष्टः ।

अथ यन्त्रपीडनमाह—नेत्रं यन्त्रं घृताभ्यक्तं षडङ्गुलं मेढ्ररन्ध्रे मेढ्रमार्गे प्रवेशयेदेव इति शेषः । अतएवोक्तं प्राक् 'मध्ये च कृतकर्णिकम्' इति । तेन कर्णिकापर्यन्तं सस्निग्धं मेढ्रमार्गे प्रवेशयेदित्यर्थः । ततोऽनन्तरं प्रवेशानन्तरं बस्तिं स्नेहादिसंभृतं चर्मपुटकं शनैर्यथास्यादवपीड्यते यथाऽन्तः स्नेहोऽन्तः प्रविष्टो भवति । नेत्रं च हरेदिति । पुनः शनैर्यथा स्यात्तथा नेत्रं हरेत् मूत्रमार्गादित्यर्थः । स्नेहे प्रत्यागते स्नेहबस्तिक्रमः हितः । 'स्नेहबस्तिक्रमो हित' इत्यस्य स्थाने—'अपराह्णे विचक्षणः । पयसा भोजयेदेनं यूषैर्मांसरसेन वा' इति केचित्, तदपि युक्तं तन्त्रान्तर-

संवादात् । 'स्नेहक्रमो हित' इति तत्र ग्रन्थकर्तुरयमाशयः—तत्र सम्यग्दत्तस्य लिङ्गानि भवन्ति, व्यापदश्च ताः । तत्रत्योपक्रमश्च कर्तव्यः । उक्तंच—'सम्यग्दत्तस्य लिङ्गानि व्यापदः क्रम एव च । बस्तेरुत्तरसंज्ञस्य समानः स्नेहबस्तिना' इति ॥३–५ ॥

गू०—अथोत्तरबस्तिदाने योग्यमाह—अथानन्तरं आस्थापने तु निरूहणेन शुद्धस्य पुनः स्नानभोजनैस्तृप्तस्य पुनः जानुमात्रे पीठे स्थितस्य इष्टशलाकया स्निग्धया कृतं नेत्रमार्गं । ततः नेत्रं उत्तरबस्तिनलिकां योजयेत् । शनैः शनैर्घृताभ्यक्तं घृतव्याप्तं नेत्रं मेढ्ररन्ध्रे षड् अङ्गुलानि योज्यं, बस्तिना पीडयेत् । पुनः शनैर्नेत्रं निर्हरेत्, निष्कासयेत् । ततः स्नेहे प्रत्यागते अयं स्नेहबस्तिक्रमः हितः कथितः ॥ ३–५ ॥

**पुंसामुत्तरबस्तिनेत्रमुक्त्वा स्त्रीणामुत्तरबस्तिमाह—**

**स्त्रीणां कनिष्ठिकास्थूलनेत्रं कुर्याद्दशांगुलम् ॥ ६ ॥**
**मुद्गप्रवेशयोग्यं च योन्यन्तश्चतुरङ्गुलम् ।**
**द्व्यङ्गुलं मूत्रमार्गे च सूक्ष्मं नेत्रं नियोजयेत् ॥ ७ ॥**

दी०—कनिष्ठिका स्त्रिय एव । दशाङ्गुलमिति । दैर्घ्येण मुद्गप्रवेशं रन्ध्रमिति शेषः । तेन मुद्गवाहिनलिकाच्छिद्रमित्यर्थः । योन्यन्तश्चतुरङ्गुलमिति । तच्च नेत्रमपत्यमार्गे चतुरङ्गुलप्रमाणमन्तः प्रवेशयेदित्यर्थः । उक्तंच—मूत्रस्रोतःपरीणाहमुद्गवाहिदशाङ्गुलम् । तासामपत्यमार्गे तु निदध्याच्चतुरङ्गुलम्' इति । द्व्यङ्गुलं मूत्रमार्गे च इति । स्त्रीणामत्र मूत्रमार्गे ज्ञेयम् । तत्र द्व्यङ्गुलनेत्रं प्रवेशयेदिति भावः । तच्च सूक्ष्मनेत्रं कार्यं यथा पुरुषमेढ्रमार्गार्थं मालतीपुष्पवृन्ताभं कथितं तद्वदत्राऽपि ज्ञेयम् ॥ ६ ॥ ७ ॥

गू०—अथ स्त्रीणां बस्तिदाने विधिमाह—स्त्रीणामिति सुगमम् ॥ ६ ॥ ७ ॥

**बालानामपि नेत्रपरिमाणमाह—**

**मूत्रकृच्छ्रविकारेषु बालानां त्वेकमङ्गुलम् ।**
**शनैर्निष्कम्पमाधेयं सूक्ष्मनेत्रं विचक्षणः ॥ ८ ॥**

दी०—मूत्रकृच्छ्रविकारेषु इति पदं पूर्वेण संबन्धनीयम् । बालानामपि वा मूत्रकृच्छ्रविकारेपि बालः 'षोडशवर्षपर्यन्तो बालः' एकमङ्गुलं नेत्रेण संबन्धनीयम् । सूक्ष्मनेत्रमित्यनेन मालतीपुष्पवृन्ताकारत्वात् सूक्ष्मत्वं ज्ञेयम् ॥ ८ ॥



गू०—अथ बालानां बस्तिदानप्रमाणमाह—मूत्रकृच्छ्रेति सुगमम् ॥ ८ ॥

**अथापत्यमूत्रमार्गयोर्विषयत्वात् स्नेहपरिमाणमाह—**

**योनिमार्गेषु नारीणां स्नेहमात्रा द्विपालिकी ।**
**मूत्रमार्गे पलोन्माना बालानां च द्विकार्षिकी ॥९॥**

दी०—योन्यादिमार्गत्रयं स्त्रीणामेव । किं तु पुनर्बालानां द्विकर्षप्रमाणा इति ॥ ९ ॥

गू०—स्त्रीणां बालानां च स्नेहमात्राप्रमाणमाह—द्विपालिकी द्विपलप्रमाणा । बालानां द्विकार्षिकी द्विकर्षमाना ॥ ९ ॥

**अथ स्त्रीणामुत्तरबस्तिः कथं योज्यः ? इत्याह—**

**उत्तानायै स्त्रियै दद्यादूर्ध्वजान्वै विचक्षणः ।**
**अप्रत्यागच्छति भिषग्बस्तावुत्तरसंज्ञिते ॥ १० ॥**
**भूयो बस्तिं निदध्याच्च संयुक्तैः शोधनैर्गणैः ।**
**फलवर्तिं निदध्याद्वा योनिमार्गे दृढां भिषक् ॥११॥**
**सूत्रैर्विनिर्मितां स्निग्धां शोधनद्रव्यसंयुताम् ।**
**दह्यमाने तथा बस्तौ दद्याद्बस्तिं विशारदः ॥ १२ ॥**
**क्षीरवृक्षकषायेण पयसा शीतलेन वा ।**
**बस्तिः शुक्ररुजः पुंसां स्त्रीणामार्तवजां रुजम् ॥१३॥**
**हन्यादुत्तरबस्तिस्तु नोचितो मेहिनां क्वचित् ।**

दी०—विचक्षणस्थाने समाहित इति वा पाठे स एवार्थः । अस्याग्रे—'अनेन विधिना दद्यात् बस्तीन् त्रीन् चतुरोऽपि वा' इति पठन्ति व्याख्यानयन्ति च । अनिर्गमे पुनर्बस्तिर्देय इत्यत आह—उत्तरसंज्ञिते बस्तौ प्रत्यागच्छति सति भूयः पुनरपि बस्तिमुत्तरसंज्ञं निदध्यात् । किंभूतं ? शोधनैर्गणैः संयुक्तम् । शोधनगणो विरेचनगणः । वा अथवा फलवर्तिं निदध्यात् । क्व ? योनिमार्गे अपत्यमार्गे । किंभूतां ? दृढां अशिथिलाम् । अतएव सूत्रैर्विनिर्मिताम् । तथा स्निग्धां तथा शोधनद्रव्यसंयुताम् । शोधनद्रव्यकृतामित्यर्थः । वर्तिस्तु अग्रे वक्ष्यमाणा ज्ञातव्या । अस्याग्रे केचिदधिकं पाठं पठन्ति तद्यथा—

'पयोबस्तिं निदध्यात्तु ओर्क्तं गुल्मचिकित्सितम् ।
प्रवेशयेद्वा मतिमान् बस्तिद्वारे च पेषणी ॥
पीडयेद्वाप्यधो·नाभेर्बस्तिना परिवेष्टितः ।
आरग्वधस्य पत्रेषु निर्गुण्ड्याः स्वरसस्य च ॥

कुर्याद्गोमूत्रपिष्टेषु वर्तिं चाऽपि ससैन्धवाम्।
मुद्गैलासर्षपसमां प्रविभज्य पयांसि च॥
बस्तेरागमनार्थाय तन्निदध्याच्छलाकया।'

इत्यादिपाठो बहुपुस्तकेष्वदर्शनान्न व्याख्यातः। अथ बस्तिदाहचिकित्सामाह—द्रव्यस्यानिर्गमाद्बस्तौ मूत्राशये दह्यमाने सति विशारदो वैद्यकशास्त्रक्रियाकुशलः क्षीरवृक्षकषायेण बस्तिं दद्यात्। वा अथवा शीतलेन पयसा बस्तिं दद्यात्। क्षीरवृक्षा वटोदुम्बरादयः। एके क्षीरवृक्षं राजादनमाहुः। रायणीति लोके। पयोऽत्र पानीयमाहुः। शीतलेति। शीतलद्रव्यमधुकादियुक्तत्वेन शीतलेन इत्यर्थः। यदुक्तं तन्त्रान्तरे—'शर्करामधुमिश्रेण शीतेन मधुकाम्बुना। दह्यमाने भिषक् बस्तौ पायौ बस्तिं प्रदापयेत्' इति। अथानन्तरं बस्तेः प्रभावपूर्वकं निषेधमाह—पुंसां पुरुषाणां वसाद्याश्रिता रुजः रोगान् स्त्रीणामार्तवजा रुजः असृग्दरादयः हन्यात्। मेहिनां प्रमेहिणां नोचितः न युक्तः। प्रमेहस्य बस्तिगतत्वेऽपि नोचितत्वम्। यथानुवासनं कुष्ठप्रमेहिनां निषिद्धम्। केचिन्मेहशब्देन मधुमेहमाहुः॥ १०–१३॥

गू०—उत्तानायै भिषक् दद्यादिति संबन्धः। तथा दद्यात् यथा स्नेहः प्रत्यागच्छति। भूयः पुनः कृच्छ्रे विशेषव्याधौ शोधनैर्गणैः एरण्डतैलादिभिर्बस्तिं निदध्यात्। योनिमार्गे वस्त्यभावे फलवर्तिकां निदध्यात्। फलानां एरण्डबीजादीनां वर्तिर्यद्वा फलसदृशी वर्तिः फलनाम्नी वासोघनद्रव्यसंयुतस्य सूत्रेण विनिर्मितां पुनः स्निग्धां एवंभूतां वर्तिं दद्यात्। वर्त्या दह्यमाने बस्तौ मूत्राकाशे क्षीरवृक्षकषायेण उदुम्बरादि पुनः पयसा शीतलेन बस्तिः पुंसां शुक्रदोषजा रुजः स्त्रीणां आर्तवजा रुजः उत्तरबस्तिर्हन्यात्। मेहिनः क्वचित् न उचितः॥ १०–१३॥

**उत्तरबस्तेः स्नेहबस्तिसमानायाः गुणदोषानाह—**

**सम्यग्दत्तस्य लिङ्गानि व्यापदः क्रम एव च॥ १४॥**
**बस्तेरुत्तरसंज्ञस्य समानं स्नेहबस्तिना।**

दी०—उत्तरसंज्ञस्य उत्तरबस्तेः स्नेहबस्तिनाऽनुवासनेन समानि लिङ्गानि लक्षणानि तथा व्यापदः हीनातिमिथ्यायोगजः क्रमश्च उपक्रमश्च समानः स्नेहबस्तिना तुल्य इत्यर्थः। तन्त्रान्तरे तु—'दुष्टं शुक्रं शोणितं चाङ्गनानामसृग्दरं तस्य नाशं च पुष्पम्। मूत्राघातं मूत्रदोषान् प्रवृद्धान् योनेर्दोषान् तत्परायाश्च संगम्। शुक्राघातं शर्करामश्मरीं च शूलं बस्तौ वंक्षणे मेहने च। घोरानन्यान्बस्तिजांश्चापि रोगान् मोहादृते उत्तरो हन्ति बस्तिः' इति॥ १४॥

गू०—सम्यग्दत्तलक्षणमाह—शमनं शुक्रत्वशमनं भवति। प्रमेहलक्षणं शमनं भवति॥ १४॥

**अथ पूर्वोद्दिष्टां फलवर्तिमाह—**

**घृताभ्यक्ते गुदे क्षेप्या श्लक्ष्णा स्वाङ्गुष्ठसन्निभा॥१५॥**
**मलप्रवर्तनी वर्तिः फलवर्तिश्च सा स्मृता।**

इति श्रीदामोदरसूनुशार्ङ्गधराचार्यप्रणीतशार्ङ्गधरसंहितायामुत्तरखण्डे उत्तरबस्तिविधिर्नाम सप्तमोऽध्यायः॥ ७॥

---

दी०—श्लक्ष्णा कोमला, स्वांगुष्ठसन्निभा आतुरांगुष्ठतुल्या स्थूलतया। मलं मूत्रपुरीषादिकम्। मलशब्देन स्त्रीणामपि रजोदोषादिकम्। अपत्यमार्गे देया ईदृशी फलवर्तिः स्मृता कथिता॥ १५॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां चोत्तरखण्डे उत्तरबस्तिविधिरध्यायः॥

---

गू०—फलवर्तिमाह—तत्प्रमाणा सा फलवर्तिः, मलप्रवर्तनी भवति। फलानां वा निर्मिता॥ १५॥

इति श्रीकाशिरामवैद्यविरचितायां गूढार्थदीपिकायां पञ्चकर्मणि उत्तरबस्तिविधिरध्यायः सप्तमः॥

---

## अष्टमोऽध्यायः।

### अथ नस्यविधिः।

**नस्यस्य निरुक्तिमाह—**

**नस्यं तत्कथ्यते धीरैर्नासाग्राह्यं यदौषधम्।**
**नावनं नस्यकर्मेति तस्य नामद्वयं मतम्॥ १॥**

दी०—अथ पञ्चकर्मपारिशेष्यान्नस्यविधिमध्यायं व्याख्यातुं प्रतिजानीते—नस्येति। औषधं क्वाथस्वरसस्नेहादि, नस्यमिति नासया दीयते इति नस्यम्।

नस्यस्य नामद्वयं चोक्तम्, नावनमेकं द्वितीयं ाति ॥ १ ॥

०—अथ नस्यविधिः । तत्र नस्यलक्षणं धीरैर्यत् ग्राह्यमौषधं तत् नस्यं कथ्यते । नावनं नस्यकर्म तस्य नामद्वयम् ॥ १ ॥

**स्यभेदानाह—**

**भेदो द्विधा प्रोक्तो रेचनः स्नेहनस्तथा ।**
**ां कर्षणं प्रोक्तं स्नेहनं बृंहणं मतम् ॥ २ ॥**

'०—नासिकया दीयते यत्तत् नस्यं तस्य भेदो ारः, एको रेचनः द्वितीयः स्नेहनः, रेचनं कर्षणं बृंहणं, उपक्रम्यस्य द्वित्वात् । उक्तं च वाग्भटे—म्यस्य हि द्वित्वाद्द्विविधोपक्रमो मतः । एकः संतत्र द्वितीयश्चापतर्पणः' इति । ननु वाग्भटेन ां नस्यं सविषयमुक्तं तद्यथा—'विरेचनं शिरः-गाड्यं स्पन्दगलामये । शोफगण्डकृमिग्रन्थिकु-ारपीनसे ॥ बृंहणं वातजे शूले सूर्यावर्ते स्वर-नासाऽऽस्यशोषे वाक्संगे कृच्छ्रबोधेऽवबाहुके । नीलिकाव्यङ्गकेशदोषाक्षिराजिषु ॥ यथास्वं ैः स्नेहैर्यथास्वं च प्रसाधितैः । कल्कक्वाथादि-र्वं मधुपट्वासवैरपि ॥ बृंहणं धन्वमांसोत्थरसा-ापुरैरपि । शमनं योजयेत्पूर्वैः क्षीरेण सलिलेन ति, तत्कथमत्र द्विविधं चोक्तं? उच्यते—शम-बृंहणेऽन्तर्भावात् । उक्तंच—'शमनं योजयेत्पूर्वैः । सलिलेन च' इति । अतएव **रविगुप्तादौ** दास्ते यथा—'नस्यं शिरोविरेकश्च प्रतिमर्शोऽव-म् । ज्ञेयं प्रधमनं चैतन्नस्यकर्म तु पञ्चधा' इति । े तु धूमोऽधिकोऽस्ति नच शिरोविरेक इति । ।—'नावनं चावपीडश्च ध्मापनं धूम एव च । र्शश्च विज्ञेयो नस्तकर्म तु पञ्चधा' इति । **का-**ास्तु षट्प्रकारं पठन्ति यथा—'अवपीडं प्रध-स्यं रेचनतर्पणम् । प्रतिमर्शश्च धूमश्च नस्य-ा षड्विधम्' इति । तेऽप्यत्रैवान्तर्भावनीयाः । ग्रन्थकृता एवाग्रे स्पष्टतयोक्ताः । यथा—शि-ने प्रधमनावपीडनसंज्ञावन्तर्भूतौ, ते तु कर्षण-र्षणेऽन्तर्भूतौ, प्रतिमर्षमर्षौ तु बृंहणेऽन्तर्भूतौ, एवं ापि शोधनशमनत्वात् यथा स्वान्तर्भावनीय इति तमेतत् ॥ २ ॥

**गू०**—रेचनस्नेहननस्यभेदद्वयमाह—रेचनस्तथा स्नेहन इति द्विधा नस्यभेदः प्रोक्तः कथितः । तत्र थद्विरेचनं वातकफादीनां छेदनं यत् स्नेहनं तत् बृंहणं धातुवृद्धिकरम् ॥ २ ॥

**नस्यकर्मकालमाह—**

**कफपित्तानिलध्वंसे पूर्वमध्यापराह्णके ।**
**दिने तु गृह्यते नस्यं रात्रावप्युत्कटे गदे ॥ ३ ॥**

**दी०**—कफपित्तानिलानां ध्वंसे वृद्धिलक्षणे कोपे, 'संसुध्वंसु अधःपतने' इत्यस्य रूपं । कुत्र कोप इत्यत आह—दिनस्य पूर्वमध्याह्नेऽपराह्णके, तेनाऽयमर्थः सिद्धः—दिनस्य पूर्वाह्णे कफकोपे, दिनस्य मध्याह्ने पित्तकोपे, दिनस्यापराह्णे वातकोपे इति । अथवा उत्कटे गदे रात्रावपि नस्यं देयमिति । उक्तंच—'यथा दोषोदये काले रोगिणे नावनं भिषग्' । इति अतएव स्वस्थास्वस्थविषयसम्बन्धेन काला दर्शितास्तन्त्रान्तरे तद्यथा—'शरद्धेमन्तयोः स्वस्थे पूर्वाह्णे संप्रयोजयेत् । वर्षासु शीतजे ग्रीष्मे सायं मध्यंदिने तथा' इति ॥३॥

**गू०**—नस्यदाने नस्यकालमाह—कफपित्तवातध्वंसे कफपित्तवातनाशौ क्रमेण दिनस्य पूर्वमध्यपराह्णके नस्यं गृह्यते । कफनाशार्थं दिनस्य पूर्वभागे, पित्तनाशार्थं दिनस्य मध्यभागे, वातनाशार्थं दिनस्यापरभागे । उत्कटे गदे रात्रावपि नस्यं गृह्यते ॥ ३ ॥

**नस्यं यस्मिन्काले त्याज्यं यैश्च त्याज्यं तानाह—**

**नस्यं त्यजेद्भोजनान्ते दुर्दिने चापतर्पिते ।**
**तथा नवप्रतिश्यायी गर्भिणी गरदूषितः ॥ ४ ॥**
**अजीर्णी दत्तबस्तिश्च पीतस्नेहोदकासवः ।**
**क्रुद्धः शोकाभिभूतश्च तृषार्तो वृद्धबालकौ ॥ ५ ॥**
**वेगावरोधी स्नातश्च स्नातुकामश्च वर्जयेत् ।**

**दी०**—दुर्दिने मेघच्छन्नेऽह्नि, अपतर्पिते असन्तर्पिते पुरुषे । संतर्पणं धातुवृद्धिकरणार्थं तेन धातुबलो नस्येन विधेयमिति तात्पर्यार्थः । चकाराद्वाग्भटोक्तास्ते यथा—'योजयेन्नतु नावनम् । तोयमद्यगरस्नेहपीतानां पातुमिच्छताम् ॥ भुक्तभक्तशिरःस्नातस्नातुकामस्रुतासृजाम् । नवपीनसवेगार्तसूतिकाश्वासकासिनाम् ॥ शुद्धानां दत्तबस्तीनां तथाऽनार्तवदुर्दिने । अन्यत्रात्ययिकाद्व्याधेः' इति । नवप्रतिश्यायीति नवत्वं द्विविधनिदानभेदेन । एकं सद्योजनकं द्वितीयं दोषचयपूर्वकम् । तत्राद्यो यथा—'नारीप्रसङ्गः शिरसोऽभि-

तापो धूमो रजः शीतमतिप्रतापः । संधारणं मूत्रपुरीषयोश्च सद्यः प्रतिश्यायनिदानमुक्तम्' इति । द्वितीयो यथा—'चयं गता मूर्धनि मारुतादयः पृथक् समस्ताश्च तथैव शोणितम् । प्रकुप्यमाना विविधैः प्रकोपणैस्ततः प्रतिश्यायकरा भवन्ति हि' इति । तेन सद्योनिदानजनकः प्रतिश्यायः सोऽपि नवः प्रतिश्याय इति केचित् । अन्ये त्वेवमाहुः—'आमपक्वभेदेन प्रतिश्यायस्य नवपुराणत्वे कथिते । तेनापि यः आमसंज्ञकः प्रतिश्यायः सोऽपि तरुणत्वेन नस्यविषये त्याज्यः न तु पक्व इति भावः । गरं कृत्रिमं विषं तेन व्याप्तः । केवलविषप्राप्तेऽवपीडस्योक्तत्वात् । उक्तंच—'चेतोविकारविषाभिपन्नानां चूर्णं षडङ्गुलद्विमुखया नाड्या देयम्' । अन्यच्च—'विषाभिघातसंन्यासमूर्च्छामोहापतन्त्रके । महापस्मारशोकार्तिचिन्ताक्रोधामयादिषु ॥ मानसेषु च रोगेषु मूढव्याकुलचेतसः । संज्ञाप्रबोधहेत्वर्थमवपीडं प्रदापयेत्' इति । बालवृद्धयोरपि उत्कटदोषेषु नस्यं देयम्, 'भीरुस्त्रीकृशबालानां' इत्यादिवक्ष्यमाणत्वात् । स्नातः शिरस्नातः, स्नातुकामश्च इत्यनेन पूर्वं विधाय पश्चात्स्नानं कुर्यादित्येके व्याख्यानयन्ति ॥ ४ ॥ ५ ॥

**गू०**—यस्मिन्काले नस्यं त्याज्यं तदाह—दुर्दिने मेघच्छन्नेऽह्नि दुर्दिनम् । अपतर्पणे लङ्घने, नवप्रतिश्यायी नवप्रतिश्यायवान् । गरदूषितः विषदूषितः । पीतस्नेहोदकासवः पीतं स्नेहं उदकं आसवं मद्यं येन सः । वेगावरोधी मूत्रपुरीषकावरोधी । स्पष्टमन्यत् ॥ ४ ॥ ५ ॥

### नस्यार्हानर्हानाह—

**अष्टवर्षस्य बालस्य नस्यकर्म समाचरेत् ॥ ६ ॥**
**अशीतिवर्षादूर्ध्वं च नावनं नैव दीयते ।**

**दी०**—अथ बालवृद्धयोर्नस्यग्रहणाग्रहणविषयं दर्शयन्नाह—अष्टवर्षादूर्ध्वं नस्यं देयम् । अष्टवर्षादुपरि नस्यकर्म कुर्यात् । उक्तंच वाग्भटे—'न नस्यमूनसप्ताब्दे नातीताशीतिवत्सरे' इति । अष्टवर्षादर्वागपि दोषोद्रेकादात्ययिके व्याधौ बृंहणं नस्यं देयम् । उक्तंच—'भीरुस्त्रीकृशबालानां नस्यत' इति । एवं वृद्धस्याऽशीतिवर्षस्यापि ज्ञेयम् ॥ ६ ॥

**गू०**—यस्य नस्यं देयं तदप्याह—नावनं नस्यं । सुगमम् ॥ ६ ॥

### अथ वैरेचनं नस्यमाह—

**अथ वैरेचनं नस्यं ग्राह्यं तैलैः सुतीक्ष्णकैः ॥ ७ ॥**
**तीक्ष्णभेषजसिद्धैर्वा स्नेहैः क्वाथै रसैस्तथा ।**

**दी०**—तैलैः सुतीक्ष्णकैः सर्षपादिजैः तीक्ष्णभेषजसिद्धैः स्नेहैर्वा । तीक्ष्णद्रव्याणि मरिचपिप्पलीशृङ्गवेरशोभाञ्जनादीनि, तैः ये सिद्धा ये स्नेहाः क्वाथाश्च इति ॥ ७ ॥

**गू०**—अथ विरेचनस्य विधानमाह–सुगमम् ॥७॥

### विरेचनस्य मात्रामाह—

**नासिकारन्ध्रयोरष्टौ षट् चत्वारश्च बिन्दवः ॥ ८ ॥**
**प्रत्येकं रेचने योज्या मुख्यमध्यान्त्यमात्रया ।**

**दी०**—नासिकारन्ध्रयोरिति । द्वयोरपि नासापुटयोर्नस्यं योजनीयम् । अष्टावित्यादि । मुख्यमध्यान्त्यमात्रया इति । अष्टौ बिन्दवः मुख्यमात्रा । रेचनस्य षड्बिन्दवः मध्यमा । चत्वारः अन्त्या मात्रा हीनमात्रा इति । उक्तं च—'चत्वारो बिन्दवः षट् वा तथाष्टौ वा यथाबलम् । शिरोविरेचने योज्या ऊर्ध्वजत्रुविकारिणां' इति । बिन्दुलक्षणं वाग्भटे—'प्रदेशिन्यङ्गुलीपर्वद्वयान्मग्नसमुद्धृतात् । यावत्पतत्यसौ बिन्दुर्दशाष्टौ षट् क्रमेण ते ॥ मर्शस्योत्कृष्टमध्योना मात्रास्ता एव च क्रमात् । बिन्दुद्वयोनाः कल्कादेः' इति ॥ ८ ॥

**गू०**—विरेचनस्य प्रमाणमाह—नासिकारन्ध्रयोः छिद्रयोः द्वयोः अष्टौ षट् चत्वारश्च बिन्दवः मुख्यमध्यान्त्यात्ममात्रया रेचने योज्याः । अष्टौ बिन्दवः मुख्या मात्रा । षट् मध्या मात्रा । चत्वारो बिन्दवः अन्त्या कनिष्ठा मात्रा ॥ ८ ॥

### नस्यार्थं द्रव्याणां परिमाणमाह—

**नस्यकर्मणि दातव्यं शाणिकं तीक्ष्णमौषधम् ॥ ९ ॥**
**हिङ्गु स्याद्यवमात्रं तु माषिकं सैन्धवं मतम् ।**
**क्षीरं चैवाष्टशाणं स्यात्पानीयं च त्रिकार्षिकम् १०**
**कार्षिकं मधुरं द्रव्यं नस्यकर्मणि योजयेत् ।**

**दी०**—तीक्ष्णमिति । मरिचपिप्पलीहिंगुशृङ्गवेरशोभाञ्जनतृत्रतादिकम् । मधुरं द्रव्यं सिताप्रभृतिकम् । शेषं सुगमम् ॥ ९ ॥ १० ॥

**गू०**—नस्यकर्मणि औषधप्रमाणमाह—नस्यकर्मणीति स्पष्टम् ॥ ९ ॥ १० ॥

### अथ शिरोविरेचनभेदानाह—

**अवपीडप्रधमनौ द्वौ भेदावपरौ स्मृतौ ॥ ११ ॥**
**शिरोविरेचनस्यात्र तौ तु देयं यथायथम्।**

दी०—अथ शिरोविरेचनस्य यौ द्वौ अवपीडप्रधमनसंज्ञौ तावाह—यथायथं यथादोषं यथामात्रं वा देयौ। तयोर्विधानं चाग्रे वक्ष्यमाणं ज्ञेयम् ॥ ११ ॥

गू०—विरेचनस्य द्वौ भेदावपरावप्याह—अवपीडः, प्रधमनं, एतौ द्वौ विरेचनस्य भेदौ तौ शिरोविरेचनस्थाने देयौ ॥ ११ ॥

### अथावपीडप्रधमनयोः स्वरूपमाह—

**कल्कीकृतादौषधाद्यः पीडितो निःसृतो रसः ॥१२॥**
**सोऽवपीडः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः।**
**षडङ्गुला द्विवक्त्रा या नाडी चूर्णं तया धमेत् ॥१३॥**
**तीक्ष्णं कोलमितं वक्त्रवातैः प्रधमनं हि तत्।**

दी०—कल्कीकृतादौषधाद्यः रसो निःसृतः सोऽवपीडः, किंविशिष्टः ? पीडितः आतुरनासापुटे इति शेषः। प्रधमनं तत्, यत् द्विवक्त्रा नाडी षडङ्गुलप्रमाणा तया चूर्णं प्रधमेत्। किंभूतम् ? तीक्ष्णं तीक्ष्णद्रव्यकृतम्। कोलं कोलमात्रम्। वक्त्रवातैरिति वैद्यमुखोत्थैः कृत्वा प्रधमेदित्यर्थः ॥ १२ ॥ १३ ॥

गू०—अवपीडलक्षणमाह—कल्कीकृतादिति सुगमम् ॥ १२ ॥ १३ ॥

**ऊर्ध्वजत्रुगते रोगे कफजे स्वरसंक्षये ॥ १४ ॥**
**अरोचके प्रतिश्याये शिरःशूले च पीनसे।**
**शोफाऽपस्मारकुष्ठेषु नस्यं वैरेचनं हितम् ॥ १५ ॥**

दी०—ऊर्ध्वजत्रुगते विरेचनं हितमिति। ते च ग्रीवागलादिरोगा दृढबलेऽपि—'स्तम्भान्ताः सुप्तिरुद्राद्याः श्लेष्मिका ये शिरोगदाः। शिरोविरेचनं तेषु नस्यकर्म प्रशस्यते' इति। कफरोगे इति। कासश्वासाद्याः। प्रतिश्याये नासास्रावे पीनसे पुराणे इति **रत्नप्रभाकारः। चक्रदत्तेऽपि**—'शिरोविरेचनं दद्यात् रोगेष्वेतेषु बुद्धिमान्। गौरवे शिरसः शूले जाड्ये स्पन्दे गलामये ॥ शोफगण्डकृमिग्रन्थिकुष्ठापस्मारपीनसे' इति। अन्यत्राऽप्युक्तं—'शिरोविरेचनमपि श्लेष्मणाऽभिव्याप्तताल्वगलशिरसां तथाऽरोचकशिरोगौरवशूलपीनसार्धावभेदककृमिप्रतिश्यायापस्माराघ्राणाज्ञानेषु चोर्ध्वजत्रुगदेषु शिरोविरेचनद्रव्यसिद्धेन स्नेहेन' इति ॥ १४ ॥ १५ ॥

### अथ बृंहणनस्यविषयमाह—

**भीरुस्त्रीकृशबालानां नस्यं स्नेहेन शस्यते।**

दी०—स्नेहेन नस्यमिति। बृंहणाख्यम्। यदा रेचननस्यदाने प्रतिपादितरोगैरभिभूतानां भीरुप्रभृतीनां रेचनं दातव्यं तदा स्नेहकृतशिरोविरेचनं देयमित्यपि द्वितीयोऽर्थः साम्प्रदायिकः ॥

### येषु अवपीडनं युज्यते तानाह—

**गलरोगे सन्निपाते निद्रायां विषमज्वरे ॥ १६ ॥**
**मनोविकारे कृमिषु युज्यते चावपीडनम्।**

दी०—अवपीडननस्यस्य विषयमाह—मनोविकारे इति। मदमूर्च्छाऽपस्मारसंन्यासोन्मादभूतोन्मादादिषु। कृमिशब्देनात्र कृमिजा रोगा अपि ग्राह्याः ॥ १६ ॥

गू०—सुगमम् ॥ १६ ॥

### येषु प्रधमनं युज्यते तानाह—

**अत्यन्तोत्कटदोषेषु विसंज्ञेषु च दीयते ॥ १७ ॥**
**चूर्णं प्रधमनं धीरैस्तद्धि तीक्ष्णतरं यतः।**

दी०—प्रधमननस्यविषयमाह—अत्यन्तोत्कटदोषेषु चेतोविकारविषाभिपन्नेष्वित्यर्थः। एवंविधेष्वन्येष्वपि विसंज्ञेषु मदापस्मारादिषु। यतस्तीक्ष्णतरं अत्यन्ततीक्ष्णद्रव्यकृतं। धीरैरिति वैद्यैः। धीरत्वं दृढशास्त्राभ्यासकर्मत्वेन ज्ञेयम्। तीक्ष्णद्रव्यतो यथा—'पिप्पल्यः शिग्रुबीजानि विडङ्गमरिचानि च। अवपीडः प्रशस्तोऽयं गरचेतोविकारिणाम्' इति ॥ १७ ॥

गू०—अत्यन्तोत्कटदोषेषु मूर्च्छापस्मारादिविसंज्ञेषु संन्यासादिषु ॥ १७ ॥

### इदानीमवपीडनप्रधमनयोः कतिपययोगानाह—

#### गुडादिनस्यम्।

**नस्यं स्याद्गुडशुण्ठीभ्यां—**

दी०—गुडशुण्ठीभ्यामेको योगः।

#### पिप्पल्यादिनस्यम्।

**पिप्पल्याः सैन्धवेन वा ॥ १८ ॥**
**जलपिष्टेन तेनाक्षिकर्णनासाशिरोगदाः।**
**मन्याहनुगलोद्भूता नश्यन्ति भुजपृष्ठजाः ॥ १९ ॥**

दी०—पिप्पलीसैन्धवाभ्यां द्वितीयः। तेन नस्येनाक्षिकर्णनासाशिरोगदाः नश्यन्ति। गदशब्दोऽत्र प्र-

श्लोकमभिसम्बध्यते । तथा मन्याहनुगलोद्भूता रोगा इति शेषः । भुजपृष्ठजा इति । भुजजाश्च बाहुकासशोषादयः, पृष्ठजाः कुब्जबहिरामादयः । केचिद्विरेचनभेदमेव योगद्वयमिच्छन्ति तद्भेदादवपीडप्रधमनयोरुक्तत्वात् ॥ १८ ॥ १९ ॥

**गू०**—अतितीक्ष्णतरं विरेचनमाह—नस्यमिति सुगमम् ॥ १८ ॥ १९ ॥

### मधूकसारादिनस्यम्—

**मधूकसारकृष्णाभ्यां वचामरिचसैन्धवैः ।**
**नस्यं कोष्णजले पिष्टं दद्यात्संज्ञाप्रबोधनम् ॥२०॥**
**अपस्मारे तथोन्मादे संनिपातेऽपतन्त्रके ।**

**दी०**—मधूकसारकृष्णाभ्यामेको योगः । मधूको वृक्षविशेषः, तस्य सारं मध्यस्थितकाष्ठविशेषं । वचामरिचसैन्धवैः कृत्वा परः सकलद्रव्यकृतो वा एक एव योगो व्यवहारात् । शेषं सुगमम् ॥ २० ॥

**गू०**—मधूकसारः गुडपुष्पः ॥ २० ॥

### तन्द्रायां सैन्धवादिनस्यम्—

**सैन्धवं श्वेतमरिचं सर्षपाः कुष्ठमेव च ॥ २१ ॥**
**बस्तमूत्रेण पिष्टानि नस्यं तन्द्रानिवारणम् ।**

**दी०**—तन्द्रायां नस्यमाह—श्वेतमरिचमत्र शिग्रुबीजं तत्संज्ञत्वात् । बस्तः छागः । पिष्टानीति पूर्वोक्तद्रव्याणि इति शेषः । तेषां तन्द्रानिवारणं भवति ॥२१॥

**गू०**—अथ तन्द्रायां नस्यम्—श्वेतमरिचं प्रसिद्धम्, यद्वा शिग्रुबीजम् । बस्तमूत्रेण ॥ २१ ॥

### मरिचादिनस्यम्—

**रोहितमत्स्यपित्तेन भावितं सैन्धवं वचा ॥ २२ ॥**
**मरिचं पिप्पली शुण्ठी कङ्कोलं लशुनं पुरम् ।**
**कट्फलं चेति तच्चूर्णं देयं प्रधमनं बुधैः ॥ २३ ॥**

**दी०**—प्रधमनमाह—कट्फलं वचा च समत्वेन पूर्वं मरिचचूर्णं कृत्वा पश्चाद्रोहितमत्स्यपित्तेन भावना देया, पश्चाच्चूर्णं कार्यं तच्चूर्णं प्रधमनं देयम् । बुधैरित्यनेन परिभाषोक्तरीत्या प्रचारयेदित्यभिप्रायः ॥ २२ ॥ २३ ॥

**गू०**—प्रधमननस्यमाह—कङ्कोलं, मरिचं, पुरो गुग्गुलुः, कट्फलं एतत्प्रधमनचूर्णं तन्द्रादौ देयमिति पूर्वेण संबन्धः ॥ २२ ॥ २३ ॥

इति विरेचननस्यकल्पना ।

### अथ बृंहणनस्यकल्पनामाह—

**अथ बृंहणनस्यस्य कल्पना कथ्यतेऽधुना ।**
**मर्शश्च प्रतिमर्शश्च द्वौ भेदौ स्नेहनौ मतौ ॥ २४ ॥**
**मर्शस्य तर्पणी मात्रा मुख्या शाणैः स्मृताऽष्टभिः ।**
**मध्यमा च चतुःशाणैर्हीना शाणमिता स्मृता॥२५॥**
**एकैकस्मिंस्तु मात्रेयं देया नासापुटे बुधैः ।**
**मर्शस्य द्वित्रिवेलं वा वीक्ष्य दोषबलाबलम् ॥ २६ ॥**
**एकान्तरं द्व्यन्तरं वा नस्यं दद्याद्विचक्षणः ।**
**त्र्यहं पञ्चाहमथवा सप्ताहं वा सुयन्त्रितम् ॥ २७ ॥**
**मर्शे शिरोविरेके च व्यापदो विविधाः स्मृताः ।**
**दोषोत्क्लेशात्क्षयाच्चैव विज्ञेयास्ता यथाक्रमम् ॥२८॥**
**दोषोत्क्लेशनिमित्तासु युञ्ज्याद्वमनशोधनम् ।**
**अथ क्षयनिमित्तासु यथास्वं बृंहणं हितम् ॥ २९ ॥**
**शिरोनासाक्षिरोगेषु सूर्यावर्तार्धभेदके ।**
**दन्तरोगे बले हीने मन्याबाहंसजे गदे ॥ ३० ॥**
**मुखशोषे कर्णनादे वातपित्तगदे तथा ।**
**अकालपलिते चैव केशश्मश्रुप्रपातने ॥ ३१ ॥**
**युज्यते बृंहणं नस्यं स्नेहैर्वा मधुरद्रवैः ।**

**दी०**—अथ विरेचननस्यस्य विधानादिकमभिधाय संप्रति बृंहणनस्यस्य भेदप्रभृतिकं दर्शयन्नाह—सुगमम् । तस्य भेदानाह—मर्शश्चेति । स्नेहने बृंहणाख्ये नस्ये द्वौ भेदाविति । एकः मर्शः, द्वितीयः प्रतिमर्शः । अथ मर्शस्य भेदमात्रादिकमाह—मर्शस्य तर्पणस्नेहस्य या मात्रा सा अष्टभिः शाणैर्मुख्या स्मृता । मध्यमा चतुर्भिः शाणैर्हीना शाणप्रमाणा । **चक्रदत्ते**—'नस्यस्य स्नैहिकस्याथ देयास्त्वष्टौ तु बिन्दवः । प्रत्येकशो नस्तकयोर्नृणामिति विनिश्चयः ॥ शुक्तिश्च पाणिशुक्तिश्च देयाऽत्र कुशलैर्नरैः' इति । बिन्दुपरिमाणमुक्तं वाग्भटे—'प्रदेशिन्यङ्गुलीपर्वद्वयान्मग्नसमुद्धृतात् । यावत्पतत्यसौ बिन्दुर्दशाष्टौ षट्क्रमेण ते । मर्शस्योत्कृष्टमध्योना मात्रास्ता एव च क्रमात् । बिन्दुर्द्वयोनाः कल्पादेः' इति । सुश्रुतेऽपि नस्यप्रमाणं तु 'अष्टौ बिन्दवः प्रदेशिनीपर्वद्वयपरिस्रावो बिन्दुः, एषात्र प्रथमा मात्रा, द्वितीयात्र शुक्तिः, तृतीया पाणिशुक्तिः एतास्तिस्रो मात्रा यथाबलं प्रयोज्या भवन्ति' इति । शुक्तिपरिमाणं तु 'द्वात्रिंशद्बिन्दवश्चापि शुक्तिरित्यभिधीयते । द्वे शुक्ती पाणिशुक्तिश्च देयाऽत्र कुशलैर्नरैः' इति । स्नेहनस्यं न गिलेत् किंतु त्यजेदेव । तथाहि **सुश्रुतः**—'स्नेहनस्यं न चोपगि-

लेत्कथंचित्' इति । अथैतत्परिमाणमेकवारं बहुवारं वा देयमिति शङ्कायां समाधानमाह—एकैकेति । मर्शस्य इयं मात्रा पूर्वोक्ता एकैकस्मिन्नासापुटे देया । एतेनैकवारविषयं दर्शितम्। यदुक्तं—'प्रत्येकशो नस्तकयोर्नृणामिति विनिश्चयः' इति । 'वा' अथवा दोषबलाबलं दृष्ट्वा द्विवारं त्रिवारं वा सैव मात्रा देया इति ॥

नस्यदानकालमर्यादामाह—एकान्तरमिति । विचक्षणो वैद्यः। एकान्तरं एकदिवसान्तरं वा प्रयोज्य सप्ताहं यावत् परमदानेन सात्मीभवति। अत्राऽपि पुनःपुनरिति शेषः। यदुक्तं—'सप्ताहं तु परं देयं मिश्रितस्य पुनःपुनः' इति । वाग्रहणेन नवमदिवसादुपरि सात्म्यं भवति इत्युक्तत्वात्। तथाहि—'परं नवाहमूर्ध्वं तु नवाहात्सात्म्यतां व्रजेत्' इति ॥ मर्शे दोषोत्क्लेशाद्यापदो भवन्ति इत्यत आह—मर्शे इति। अथ तयोश्चिकित्सामाह—दोषोत्क्लेश इति। वमनशोधनमिति शिरोविरेचनादिरूपं नस्यम्। यथास्वमिति यथादोषं। बृंहणमिति स्नैहिकं नस्यं । बृंहणनस्यविषयमाह—शिर इति । शिरोरोगादिषु बृंहणं नस्यं युज्यते ॥ २४-३१ ॥

गू०—अथ बृंहणनस्यकल्पना—अथेति सुगमम्। स्नेहव्यापत् चिकित्सामाह—मर्शे शिरोविरेके इति। विविधा व्यापादस्तद्रोगाः स्मृताः। तद्दोषोत्क्लेशक्षयात् धातुक्षयात् ज्ञेयाः। दोषोत्क्लेशेषु किं कर्तव्यं ? तदाह युञ्ज्याद्वमनशोधनमिति येषु बृंहणं नस्यं दीयते तानाह—मन्या ग्रीवा, अंसः स्कन्धः, तद्गदे। स्नेहैर्घृताद्यैर्मधुरैः बृंहणं योज्यम् ॥ २४-३१ ॥

## कुङ्कुमनस्यम्।

**सशर्करं पयःपिष्टं भृष्टमाज्येन कुङ्कुमम् ॥ ३२ ॥**
**नस्यप्रयोगतो हन्याद्वातरक्तभवा रुजः।**
**भ्रूशङ्खाक्षिशिरःकर्णसूर्यावर्तार्धभेदकान् ॥ ३३ ॥**

दी०—कुंकुमनस्यमाह—शर्करा सितोपला, कुंकुमं केशरं काश्मीरजम्। आज्येन घृतेन कृत्वा घृतेन भर्जयित्वा सशर्करमिति समानशर्करम्। तदनु क्षीरेण पिष्ट्वा नस्यं देयम्। तद्धृतं नस्यप्रयोगतः भ्रूशङ्खादिरुजः हन्यात् इति ॥ ३२ ॥ ३३ ॥

गू०—स यथा—सशर्करं सितासहितं पयः दुग्धं, आज्येन घृतेन कुङ्कुमं केशरं पिष्ट्वा तन्नस्यप्रयोगतः वातरक्तादिरुजः हन्यात् ॥ ३२ ॥ ३३ ॥

## अन्यबृंहणनस्यमाह—

**नस्यं स्यादणुतैलेन तथा नारायणेन वा।**
**माषादिना वा सर्पिर्भिस्तत्तद्भेषजसाधितैः ॥ ३४ ॥**

दी०—अथाऽपराणि बृंहणनस्यादीन्याह—अणुतैलेनेति। अणुतैलेन नस्यं वातरक्तभवा रुजो हन्यादित्यत्र संबन्धः। 'गवां शकृत् क्वाथविपक्वमुत्तमं हितं च तैलं तिमिरेषु नस्यतः। घृतं तथा केवलमेव पैत्तिके तथाणुतैलं पवनासृगुच्छ्रयो'रिति। अणुतैलं तु वातव्याधिचित्सोक्तमन्यत्र ज्ञातव्यं । केषांचित् ज्ञापनार्थं यथा 'तिलपीडनोपकरणकाष्ठान्याहृत्यानल्पकालतैलपरिपीतान्यणूनि काण्डशः परिकल्प्यातिकुट्य च महाकटाहे पानीयेनाप्लाव्य क्वाथयेत् । ततः स्नेहमस्तुदृषत्सरकपाण्योरन्यतरेणादाय वातघ्नौषधप्रतीवापं स्नेहपाककल्केन विपचेत् । एतदणुतैलमुपदिशन्ति वातरोगेष्विति'। नारायणेन तैलेनेति शेषः । माषादिनेति। अत्राऽपि तैलेन सम्बन्धः । नारायणतैलं माषतैलं च वातव्याधिचिकित्सोक्तं ज्ञातव्यं तत्तद्भेषजसाधितैः सर्पिर्भिरिति। यानि यानि द्रव्याणि वातरक्तहृन्नाभिचक्षुःशिरःकर्णरोगाणां विहितानि तैस्तैर्द्रव्यैरेव साधितानि सर्पींषि तत्र तत्र योज्यानीत्यभिप्रायः ॥ ३४ ॥

गू०—अन्यदप्याह—अणुतैलेन अतसीतैलेन । सर्पिर्भिर्घृतैः तद्रोगनाशकैरौषधैः साधितं नस्यं बृंहणं स्यात् ॥ ३४ ॥

## दोषेषु स्नेहव्यवस्था।

**तैलं कफे स्याद्वाते च केवले पवने वसाम्।**
**दद्यान्नस्यं सदा पित्ते सर्पिर्मज्जानमेव च ॥ ३५ ॥**

---

१-वाग्भटे तु—'जीवन्ती-जल-देवदारुजलद-त्वक्-सेव्यगोपीहिमम् । दार्वीत्वङ्-मधुक-प्लवा-गुरुवरी-पुण्ड्राह्व-बिल्वोत्पलम् ॥ धावन्यौ सुरभिः स्थिरे कृमिहरं पत्रं त्रुटिं रेणुकम् । किञ्जल्कं कमलाद्बलां शतगुणे दिव्येऽम्भसि क्वाथयेत् ॥ तैलाद्रसं दशगुणं परिशोष्य तेन तैलं पचेत् सलिलकेन दशैव वारान् । पाके क्षिपेच्च दशमे समभागदुग्धं वैद्या महागुणमुशन्त्यणुतैलमेतत्' इति वर्णितम्।

दी०—अथ चतुःस्नेहस्य दोषविशेषेणोपादेयत्वमाह—तैलं कफे स्याद्वाते चेति । अत्र सवाते इति पाठान्तरं, केवले वाते स्वतन्त्रे अत्राणुतैलमेव प्रधानं । यदुक्तं 'चतुर्विधस्तु स्नेहस्य विधिरेषः प्रकीर्तितः । श्लेष्मस्थानविरोधित्वात्तेषु तैलं विशिष्यत' इति ॥ ३५ ॥

गू०—रोगभेदेन तैलादीनां नस्यभेदमाह—तैलमिति । सुगमम् ॥ ३५ ॥

## माषादिनस्यम् ।

**माषाऽऽत्मगुप्तारास्नाभिर्बलारुबुकरोहिषैः ।**
**कृतोऽश्वगन्धया क्वाथो हिङ्गुसैन्धवसंयुतः ॥ ३६ ॥**
**कोष्णो नस्यप्रयोगेण पक्षाघातं सकम्पनम् ।**
**जयेदर्दितवातं च मन्यास्तम्भापबाहुकौ ॥ ३७ ॥**

दी०—अथापरमपि योगमाह–आत्मगुप्ता कपिकच्छूः रास्ना सुरभी बला सामयान्दवाच्या रुबुक एरण्डः । रोहिषो गन्धतृणः अश्वगन्धया सह मिलित्वा क्वाथः हिङ्गुसैन्धवयोः प्रक्षेपः । तद्व्यवहारतो हिङ्गु रक्तिकाद्वयं सैन्धवं माषैकं प्रक्षेपः । जयेदर्दितवातं चेति चकारग्रहणात् कर्णनादरुजायां प्रशस्त इति प्रसिद्धिः । यदुक्तं–'माषबलाशूककशिम्बीकत्तृणरास्नोरुबूकाश्वगन्धानां । क्वाथो नस्यनिपीतो रामठलवणान्वितः कोष्णः । अपहरति पक्षाघातं मन्यास्तम्भं सकर्णरुजम् । दुर्जयमर्दितवातं सप्ताहाज्जयति चावश्य'मिति । इति मर्शविधिः ॥ ३६ ॥ ३७ ॥

गू०—अथ पक्षवातार्दितादौ नस्यम्—माषोऽन्नविशेषः, आत्मगुप्ता कपिकच्छूः, बला प्रसिद्धा, रुबुकः एरण्डः, रोहिषः कत्तृणः, अश्वगन्धा हयगन्धा कोष्णः क्वाथः सकम्पनं कम्पवातं हन्यात् ॥ ३६ ॥ ३७ ॥

### अथ प्रतिमर्शमाह—

**प्रतिमर्शस्य मात्रा तु द्विद्विबिन्दुमिता मता ।**
**प्रत्येकशो नस्तकयोः स्नेहेनेति विनिश्चितम् ॥ ३८ ॥**
**स्नेहे प्रन्थिद्वयं यावन्निमग्ना चोद्धृता ततः ।**
**तर्जनीयं स्रवेद्बिन्दुं सा मात्रा बिन्दुसंज्ञिता ॥ ३९ ॥**
**एवंविधैर्बिन्दुसंज्ञैरष्टभिः शाण उच्यते ।**
**स देयो मर्शनस्ये तु प्रतिमर्शो द्विबिन्दुकः ॥ ४० ॥**
**समयाः प्रतिमर्शस्य बुधैः प्रोक्ताश्चतुर्दश ।**
**प्रभाते दन्तकाष्ठान्ते गृहान्निर्गमने तथा ॥ ४१ ॥**
**व्यायामाध्वव्यवायान्ते विण्मूत्रान्तेऽञ्जने कृते ।**
**कवलान्ते भोजनान्ते दिवासुप्तोत्थिते तथा ॥ ४२ ॥**
**वमनान्ते तथा सायं प्रतिमर्शः प्रयुज्यते ।**
**ईषदुच्छिङ्कनात्स्नेहो यदा वक्त्रं प्रपद्यते ॥ ४३ ॥**
**नस्ये निषिक्तं तं विद्यात्प्रतिमर्शं प्रमाणतः ।**
**उच्छिन्दश्च पिबेच्चैतन्निष्ठीवेन्मुखमागतम् ॥ ४४ ॥**
**क्षीणे तृष्णास्यशोषार्ते बाले वृद्धे च युज्यते ।**
**प्रतिमर्शेन शाम्यन्ति रोगाश्चोर्ध्वजत्रुजाः ॥ ४५ ॥**
**वलीपलितनाशश्च बलमिन्द्रियजं भवेत् ।**

दी०—'प्रत्येकशो नस्तकयोरुपैति वदनं यथा । तथैतैर्विहितः स्नेहो नैवान्तः संप्रपद्यते' इति पाठान्तरम् । एतैः पदार्थैर्विरहितः स्नेहो यदा भवति तदान्तः न प्राप्नोति इति भावः । अयं पाठः केनाप्यत्र पठितः ॥ ३८–४५ ॥

गू०—अथ प्रतिमर्शमाह—प्रतिमर्शस्य नस्यमात्रा द्वित्रिबिन्दुमिता कथिता । प्रत्येकशो नासिकयोः स्नेहेन घृतेन । बिन्दुमात्रामाह—एवंविधैर्बिन्दुसंज्ञैरष्टभिः शाण उच्यते । स्नेहेति सुगमं । प्रतिमर्शनस्यसमयमाह—एषु चतुर्दशसमयेषु प्रतिमर्शं नस्यं प्रयुज्यते । धमनस्य निषिक्तलक्षणमाह—ईषदुच्छिङ्कनात् ईषत् छिङ्कनात् यदा स्नेहः वक्त्रं मुखं प्रपद्यते नस्ये निषिक्तं दत्तं प्रतिमार्षं प्रमाणं ततस्तदा तं उच्छिष्टं विद्यात् । तत्र किं कुर्यादित्याह—उच्छिष्टं न पिबेत्प्रतिमर्शं । अन्येषु केषु युज्यते तानप्याह—क्षीणे धातुक्षीणे तथा तृष्णा आस्यं मुखं तच्छोषार्ते बाले तथा वृद्धे च युज्यते प्रतिमर्शेन एते शाम्यन्ति तथा ऊर्ध्वजुजा ग्रीवामूलोर्ध्वजाः शाम्यन्ति तथा वलीपलितौ युज्यते वली त्वक्शैथिल्ये पलितं केशशौक्ल्यं तथा इन्द्रियजं बलं भवेत् ॥ ३८–४५ ॥

### अथ पलिते नस्यम् ।

**बिभीतनिम्बकम्भारी शिवा शेलुश्च काकिनी ॥ ४६ ॥**
**एकैकतैलनस्येन पलितं नश्यति ध्रुवम् ।**

गू०—बिभीतं बिभीतकमज्जानं निम्बं निम्बबीजं कम्भारी प्रसिद्धा, तस्या बीजं, शिवा हरीतकी मज्जा, शेलुः शाखोटकमज्जा, काकिनी किकईबीजं एषां एकैकतैलनस्येन पलितं नश्यति ॥ ४६ ॥

### अथ नस्यग्रहणे नस्यविधिमाह—

**अथ नस्यविधिं वक्ष्ये नस्यग्रहणहेतवे ॥ ४७ ॥**
**देशे वातरजोमुक्ते कृतदन्तनिघर्षणम् ।**

**विशुद्धं धूमपानेन स्विन्नभालगलं तथा ॥ ४८ ॥**
**उत्तानशायिनं किंचित्प्रलम्बशिरसं नरम् ।**
**आस्तीर्णहस्तपादं च वस्त्राच्छादितलोचनम् ॥ ४९ ॥**
**समुन्नमितनासाग्रं वैद्यो नस्येन योजयेत् ।**
**कोष्णमच्छिन्नधारं च हेमताराद्शुक्तिभिः ॥ ५० ॥**
**शुक्त्या वा यत्र युक्त्या वा प्लोतैर्वा नस्यमाचरेत् ।**
**नस्येष्वासिच्यमानेषु शिरो नैव प्रकम्पयेत् ॥ ५१ ॥**
**न कुप्येन्न प्रभाषेत नोच्छिंदेन्न हसेत्तथा ।**
**एतैर्हि विहितः स्नेहो नैवान्तः संप्रपद्यते ॥ ५२ ॥**
**ततः कासप्रतिश्यायशिरोऽक्षिगदसंभवः ।**
**श्रृङ्गाटकमभिप्लाव्य स्थापयेन्न गिलेद्द्रवम् ॥ ५३ ॥**

**गू०**—वातरजोमुक्ते देशे स्थाने कृतदन्तनिघर्षणं कृतदन्तधावनं, धूमपानेन विशुद्धं, तथा स्विन्नभालगलं धूमपानेन। यद्वा खेदितभालगलं तथा उत्तानशायिनं नरं नस्येन योजयेत् । प्लोतं प्लोतकं । स्पष्टमन्यत् । नस्यनिषिक्ते कथं निष्ठीवेदित्याह—नोच्छिंदेन्न किंचित्क्षोदयेत् । एतैः कोपादिभिः विहितः कृतः नस्यः अन्तर्मध्ये न प्रपद्यते ततः कासादयश्च भवन्तीत्याह—प्रतिश्यायो नासास्रावः । ततः कोपादेः श्रृङ्गाटकादिस्थापने शिक्षितमाह—श्रृङ्गाटकं नासावंशं भ्रूमध्यं आप्लाव्य नस्यं द्रवेणाप्लुत्य न स्थापयेत् । द्रवं न गिलेत्, स्पष्टमन्यत् ॥ ४७–५३ ॥

### अथ नस्यधारणार्थं मात्रासंख्यामाह—

**पञ्च सप्त दशैव स्युर्मात्रा नस्यस्य धारणे ।**

**दी०**—पञ्चसप्तादिसंख्याग्रहणं दोषादिबलाबलविषयम् । मात्राप्रमाणं तु वाग्भटे—'यावत्पर्येति हस्ताग्रं दक्षिणं जानुमण्डलम् । निमेषोन्मेषकालेन समं मात्रा तु सा स्मृता' इति ॥

### नस्यदानानन्तरं किं कर्तव्यं ? इत्यत आह—

**उपविश्याथ निष्ठीवेन्नासावक्त्रगतं द्रवम् ॥ ५४ ॥**
**वामदक्षिणपार्श्वाभ्यां निष्ठीवेत्संमुखे न हि ।**
**नीते नस्ये मनस्तापं रजः क्रोधं च संत्यजेत् ॥५५॥**
**शयीत निद्रां त्यक्त्वा च प्रोत्तानो वाक्शतं नरः ।**
**तथा वैरेचनश्चान्ते धूमो वा कवलो हितः ॥ ५६ ॥**

**दी०**—अथशब्द आनन्तर्ये । नस्यानन्तरं नासाद्द्रवं उपविश्य निष्ठीवेत् । काभ्यां ? वामदक्षिणपार्श्वाभ्यां । कथं ? सम्मुखं नहि निष्ठीवेत् । तिर्यक् निष्ठीवनात् सम्यग्द्रवनिर्गमो भवति इत्यर्थः । निष्ठीवनानन्तरं कर्तव्यमाह—नीते इति । क्रोधं चेति । चशब्दस्तन्त्रान्तरोक्तग्रहणार्थः । उक्तंच—'रजोधूममनस्तापस्नानक्रोधादिवर्जयेत्' इति । वाक्शतं गुर्वक्षरोच्चारणशतमात्रम् । वैरेचननस्यान्ते इति शिरोविरेचनस्योत्तरकाले, रजो धूलिः, धूमो वा कवलो हितः इति। धूमः स्निग्धादिरग्रे वक्ष्यमाणः, कवलः प्रागुक्तलक्षणः हितः पथ्यस्तस्मात्कर्तव्य इत्यर्थः ॥ ५४–५६ ॥

**गू०**—नस्ये नीते यत्कर्तव्यं तदाह—रजो धूलिः । यथा धूमप्रवेशो न भवेत् । स पीतनस्य उत्तानः सन् वाक्शतं भवेत् । विरेचननस्यान्ते धूमः कवलश्च हितः देयः ॥ ५४–५६ ॥

### अथ नस्ये कति लक्षणानि भवन्ति ? इत्याह—

**नस्ये त्रीण्युपदिष्टानि लक्षणानि प्रयोगतः ।**
**शुद्धिहीनातियोगानि विशेषाच्छास्त्रचिन्तकैः ॥५७॥**

**दी०**—प्रयोगत इति नस्यप्रयोगात् । शास्त्रचिन्तकैः शास्त्रं वैद्यकशास्त्रं तस्य चिन्तकाः विचारका इति ॥ ५७ ॥

**गू०**—शुद्ध्यादिभेदेन नस्ये लक्षणमाह—नस्ये इति । स्पष्टम् ॥ ५७ ॥

### नस्यशुद्धिलक्षणमाह—

**लाघवं मनसः शुद्धिः स्रोतसां व्याधिसंक्षयः ।**
**चित्तेन्द्रियप्रसादश्च शिरसः शुद्धिलक्षणम् ॥ ५८ ॥**

**दी०**—लाघवमिति शरीरस्य । शरीरग्रहणेनैव शिरोग्रहणे लब्धे पुनः शिरोग्रहणं देहस्योर्ध्वमूलादपि लाघवप्रतिपादनार्थम् । मनसः शुद्धिः मनसो ह्लादकत्वात् मनसः शुद्धिः । तथा स्रोतसां शुद्धिः स्रोतांसि प्राणधातुमलाम्भोऽन्नवाहिनां शुद्धता । तथा चित्तेन्द्रियप्रसादश्च मनसः इन्द्रियाणां चक्षुरादीनां प्रसन्नता । तथा व्याधिसंक्षयः व्याधयो नस्यसाध्या रोगाः । तन्त्रान्तरे तु—'प्रसन्नदृष्टिर्दृढदन्तकेशः शशाङ्कवक्त्रः पलितैर्विहीनः । पिकाभिकण्ठः कमलास-

गन्धो नस्योपसेवी भवतीह मर्त्यः' इति । अन्यत्राप्युक्तं—'इन्द्रियाणां च वैमल्यं कुर्यादास्यसुगन्धताम् । हनुदन्तशिरोग्रीवात्रिकबाहूरसां बलम् ॥ वलीपलितखालित्यं व्यङ्गानामप्यसंभव' इति ॥ ५८ ॥

गू०—शुद्धिमाह—लाघवं शिरसः मनसः शुद्धिर्मूर्च्छाद्यसाचत्वं स्रोतसां शुद्धिः व्याधिसंक्षयः, चित्तप्रसादश्च शिरसः शिरोरोगादिनाशः । प्रसन्नत्वं शिरसः शुद्धिः इदं शुद्धिलक्षणम् ॥ ५८ ॥

### अथ हीनशुद्धेर्लक्षणमाह—

**कण्डूपदेहौ गुरुता स्रोतसां कफसंस्रवः ।**
**मूर्ध्नि हीनविशुद्धेस्तु लक्षणं परिकीर्तितम् ॥ ५९ ॥**

दी०—अथ हीनशुद्धेर्लक्षणान्याह—हीनविशुद्धेः शिरसि लक्षणं । किं तत् । कण्डूपदेहाविति मुखनासिकादीनां उपदेहः श्लेष्मणाभिलिप्तमिव मुखं भवतीति । गुरुता चात्र शिरसः । स्रोतसां कफादिवहानां कफसंस्रव इति प्रचुरश्लेष्मसंभव इति तात्पर्यार्थः ॥ ५९ ॥

गू०—हीनविशुद्धेः शिरसि लक्षणमाह—उपदेहो लिप्तता, गुरुता गुरुत्वम्, स्रोतसां नासादीनाम् । कफसंस्रावः । हीनशुद्धेः अल्पशुद्धेः ॥ ५९ ॥

### अतिशयशुद्धस्य लक्षणमाह—

**मस्तुलुङ्गागमो वातवृद्धिरिन्द्रियविभ्रमः ।**
**शून्यता शिरसश्चापि मूर्ध्नि गाढं विरेचिते ॥६०॥**

दी०—अतिविरेचितलक्षणमाह—मूर्ध्नि शिरसि । अतिविरेचिते सति मस्तुलुङ्गागमादयो भवन्ति । मस्तुलुङ्गं मस्तिष्कम्, वातवृद्धिरित्यत्र वातदुष्टिरिति वा पाठः । इन्द्रियविभ्रमः इन्द्रियनाशः, शिरसः शून्यता मस्तकशून्यता । 'शून्यता मनसश्चाऽपि' इति पाठान्तरम् ॥ ६० ॥

गू०—मस्तुलुङ्गागमो मस्तिकाभ्यन्तरात् लुङ्गो मातुलुङ्गः तज्जलसदृशो निःसारः वातवृद्धिः, इन्द्रियविभ्रमः, शिरसः शून्यता, इदं गाढविरेचितशिरसो लक्षणम् ॥ ६० ॥

### हीनातिशुद्धौ चिकित्सामाह—

**हीनातिशुद्धे शिरसि कफवातघ्नमाचरेत् ।**
**सम्यक् विशुद्धे शिरसि सर्पिर्नस्ये निषेचयेत् ॥६१॥**

दी०—हीनातिशुद्धे शिरसि कफवातघ्नं क्रमादाचरेदिति ज्ञेयम् । हीनशुद्धे शिरसि कफघ्नं, अतिशुद्धे वातघ्नं, सम्यक्शुद्धे शिरसि, नस्येन सम्यक् शुद्धे सर्पिर्योजयेदित्यर्थः ॥ ६१ ॥

गू०—हीनातिशुद्ध्यादौ क्रियामाह—कफवातघ्नं नस्यमाचरेत् ॥ ६१ ॥

### अतिस्निग्धलक्षणचिकित्सामाह—

**कफप्रसेकः शिरसो गुरुतेन्द्रियविभ्रमः ।**
**लक्षणं तदतिस्निग्धे तत्र रूक्षं प्रदापयेत् ॥ ६२ ॥**
**भोजयेच्चानभिष्यन्दि तस्याचारिकमादिशेत् ।**

दी०—अतिस्निग्धे एतल्लक्षणम् । तत्किम् ? कफप्रसेकादि कफप्रसेकः स्रावः, शिरसः गुरुता शिरोजाड्यं, इन्द्रियाणां चक्षुरादीनां विभ्रमः । रूक्षं अन्नं प्रदापयेत् । अनभिष्यन्दि स्रोतसां यत्क्लेदकरं न भवति एतमाचारिकं आदिशेत् । उक्तं च वाग्भटे—'उष्णोदकोपचारी स्याद्ब्रह्मचारी क्षपाशयः । न वेगरोधी व्यायामक्रोधशोकहिमातपान् ॥ प्रवातपानयानाध्वभाष्याभ्यासनसंस्थितिः । नीचात्युच्चोपधानाहस्वप्नधूमरजांसि च' इति ॥ ६२ ॥

गू०—अतिस्निग्धे लक्षणमाह—इन्द्रियविभ्रमः भ्रान्तित्वं अयथार्थशक्तिः, अतिस्निग्धे इदं लक्षणम् । तत्र रूक्षमवचारयेत् । नस्येऽवरूक्षं दापयेत् । नस्ये भोजनाचारमाह—अनभिष्यन्दि महिषीदध्यादि नस्याचारिकं नस्ये ये शिष्टा आचरन्ति तदाचरेत् ॥ ६२ ॥

### प्रकरणार्थमुपसंहरति—

**वमनं रेचनं नस्यं निरूहश्चानुवासनम् ।**
**एतानि पञ्च कर्माणि कथितानि मुनीश्वरैः ॥ ६३ ॥**

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायामुत्तरखण्डे नस्यविधिर्नामाष्टमोऽध्यायः ॥

दी०—तानि कानि वमनादीनि ॥ ६३ ॥

इति श्रीवाक्यव्याख्यान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायामुत्तरखण्डे नस्यविधिर्नामाष्टमोऽध्यायः ॥

---

गू०—पञ्चकर्मसंख्यामाह—रेचनं विरेकः, निरूहं निरूहणबस्तिः । अनुवासनबस्तिः । ननु बस्तिकर्म एकविधं भवति तत्कथं द्विविधम्? उच्यते—अनुवासनस्य निरूहस्य च पृथक्करणात् ॥ ६३ ॥

इति श्रीकाशीराममिश्रकृतायां शार्ङ्गधरगूढार्थदीपिकायामुत्तरखण्डे नस्यवर्णनीयोऽध्यायः ॥

---

## नवमोऽध्यायः ।

### अथ धूमपानविधिः ।

### धूमसंख्या—

**धूमस्तु षड्विधः प्रोक्तः शमनो बृंहणस्तथा ।**
**रेचनः कासहा चैव वामनो घ्राणधूपनः ॥ १ ॥**
**शमनस्य तु पर्यायौ मध्यः प्रायोगिकस्तथा ।**
**बृंहणस्यापि पर्यायौ स्नेहिको मृदुरेव च ॥ २ ॥**
**रेचनस्यापि पर्यायौ शोधनस्तीक्ष्ण एव च ।**

दी०—तत्राऽयं सम्बन्धः—यथा नस्येन चोर्ध्वजत्रुरोगनाशस्तथा धूमेनाऽपि । उक्तंच वाग्भटे—'ऊर्ध्वजत्रुविकारेषु विशेषान्नस्यमिष्यते । जत्रूर्ध्वं कफवातोत्थविकाराणामजन्मने ॥ उच्छेदाय च वातानां पिबेद्धूमं सदात्मवान्' इति । तेन नस्याध्यायानन्तरं धूमपानाध्यायः ॥ अथ एवं कर्मपरिशेषात् शुद्धिकरत्वेन नस्यान्ते धूमपानविधिरारभ्यते । तत्र तावत्पूर्वं धूमसंख्यामाह—षोढा धूमपानप्रकारः । तत्र शमन इति । दुष्टदोषस्यानिर्हरणपूर्वकं शमनम् । अदुष्टस्यानुदीरणं च । व्याधिशमनेनेन प्रस्तुतव्याधिशमनं । अप्रस्तुतव्याधेरनुदीरणं । तदुक्तं वाग्भटे—'न शोधयति यद्दोषान् शमान्नोदीरयत्यपि । शमीकरोति च क्रुद्धान् तत्संशमनमुच्यत' इति । दोषशब्दोऽत्र दोषेषु दोषकार्यव्याधिष्वपि वर्तते कार्ये कारणोपचारात् । बृंहण इति । बृंहणो बलकरः । धातुवृद्धिकर इत्यन्ये । तदाश्रयत्वाद्दोषो बलं रेचन इति । शिरो विरेचयतीति रेचनः । कासहेति कासनिवारणाय यो दीयते स कासहा कथितः । वामन इति । वामयतीति वामनः । अथ घ्राणधूपन इति । नासिकया पीतो धूमो घ्राणधूपनसंज्ञः । एके घ्राणधूपनस्थाने व्रणधूपन इति पठन्ति व्याख्यानयन्ति च । एतदसंगतम् । अथ तेषां केषांचित्संज्ञान्तराणि दर्शयन्नाह—एकार्थवाचकाः शब्दाः परस्परं पर्याया उच्यन्ते । प्रयोगः स्वस्थस्य सततोपयोगः । तत्र साधुप्रायोगिकाः स्नेहा यत्र भवन्तीति स्नेहिकः ॥ १ ॥ २ ॥

गू०—तस्य षड्विधत्वमाह—शमनादिभेदेन षड्विधो धूमः प्रोक्तः कथितः । शमनबृंहणरेचनपर्यायानाह—शमनो दोषशमनस्तस्य पर्यायौ द्वौ एकः मध्यः मध्यनामा अपरः प्रायोगिकः प्रायोगिकनामा । बृंहणस्य द्वौ पर्यायौ एकः स्नेहनः एको मृदुः । रेचनस्याऽपि द्वौ पर्यायौ एकः शोधनः अपरस्तीक्ष्णः ॥ ॥ १ ॥ २ ॥

### येषां धूमो न विहितस्तानाह—

**अधूमार्हाश्च खल्वेते श्रान्तो भीतश्च दुःखितः ॥३॥**
**दत्तबस्तिर्विरिक्तश्च रात्रौ जागरितस्तथा ।**
**पिपासितश्च दाहार्तस्तालुशोषी तथोदरी ॥ ४ ॥**
**शिरोऽभितापी तिमिरी छर्द्याध्मानप्रपीडितः ।**
**क्षतोरस्कः प्रमेहार्तः पाण्डुरोगी च गर्भिणी ॥५॥**
**रूक्षः क्षीणोऽभ्यवहृतक्षीरक्षौद्रघृतासवः ।**
**भुक्तान्नदधिमत्स्यश्च बालो वृद्धः कृशस्तथा ॥ ६ ॥**

दी०—इदानीं ये धूमपानेषु नार्हास्तानाह—अधूमार्हाश्च खल्वेते इति । एते वक्ष्यमाणाः श्रान्तादयः ते तु न धूमयोग्या इत्यादि । श्रान्तो भारादिना । भीतो भययुक्तः । दुःखितो धनबन्धनादिना । दत्तबस्तिरिति कृतबस्तिः । बस्तिग्रहणेनानुवासनास्थापननिरूहबस्तयो गृह्यन्ते । विरिक्त इति विशेषेण रेचितः ।

---

१–अन्यत्र त्रिविधः प्रोक्तः । तथाहि चरके—'प्रायोगिकः स्नेहिकः दोषवैरेचनिकः' इति । तत्र प्रायोगिके कासहरं, वैरेचनिके वामनीयमन्तर्भाव्यम् । वाग्भटेऽपि स्निग्धो मध्यस्तीक्ष्णश्चेति । अत्राऽपि स्निग्धे शमनव्रणधूपनबृंहणानामन्तर्भावः । तीक्ष्णे रेचनवामयोरिति विरोधपरिहारः ॥

रात्रौ जागरित इति । रात्रिजागरणेन वातवृद्धिः स्यात् । शिरोऽभितापो शिरोरोगपीडितः । तिमिरीति मन्ददृष्टिः । छर्द्याध्मानप्रपीडित इति । छर्दिपीडितः, आध्मानपीडितश्च, आध्मान उदरापूरः । क्षतोरस्क इति उरःक्षती । प्रमेहार्त इति प्रमेहपीडितः । रूक्षो वातप्रकृत्या । अथवा रूक्षाऽऽहारेण जनितवाधुना पीडितः । क्षीण इति क्षीणधातुः । अभ्यवहृतक्षीरक्षौद्रघृतासव इति । अभ्यवहृतं विशेषेण भक्षितं क्षीरादिकं येन स तथा । तत्र क्षौद्रं मधु एते धूमपानविषये न योग्या इत्यभिप्रायः । तथेति ग्रहणात् ईदृशा अन्येऽपि बोद्धव्याः ॥ ३–६ ॥

**गू०**—एकान्ते श्रान्तादयः अधूमार्हा धूमयोग्याः न । श्रान्तः श्रमयुक्तः, भीरुर्भययुक्तः, दुःखितः दुःखार्तः, केनचित् दुःखेन पीडितः धननाशादिभिः । क्षतोरस्क इति । यस्य अभ्यवहृतं भक्षितं क्षीरं क्षौद्रं आसवो मद्यं येन सः अभ्यवहृतक्षीरक्षौद्रासवः पुमान् । तथा भुक्तान्नदधिमत्स्यः भुक्तं अन्नं दधि मत्स्याश्च येन सः बालः वृद्धः तथा कृशो दुर्बलः ॥ ३–६ ॥

## अकाले धूमपाने दोषं तत्प्रतीकारं चाह—

**अकाले चातिपीतश्च धूमः कुर्यादुपद्रवान् ।**
**तत्रेष्टं सर्पिषः पानं नावनाञ्जनतर्पणम् ॥ ७ ॥**
**सर्पिरिक्षुरसं द्राक्षां पयो वा शर्कराम्बु वा ।**
**मधुराम्लौ रसौ वापि शमनाय प्रदापयेत् ॥ ८ ॥**

**दी०**—अथ योग्यपीतस्य धूमपानस्य दोषमाह—अकाल इति । अस्य कालो विरेचनोक्तो बोद्धव्यः । अतिपीत इति । विहितपरिमाणादिभ्योऽन्यथा पीतः स्वमानाद्बहुपीतो वा । नासादेयस्तथा धूमो यावता वर्त्मवसाद इत्यादि । उपद्रवानत्र धूमोपहितजनितान् । ते तु तृष्णादाहज्वरक्षवथुसदनाघ्राणरोगाध्मानादयः । तत्प्रतीकारमाह—तत्रेति । धूमपानातिशयजनितोपद्रवेषु । इष्टं विहितं ग्राह्यमित्यर्थः । नासागतदोषदूरीकरणात् । यतो ग्रेयमप्यत्र वेत्तिवेत्युपद्रवत्वात् । अञ्जनमप्यत्र तद्विहितमेव । यतः । रोगोपद्रवः पीतलोहिततीक्ष्णैस्तन्निर्वर्णत्वात् । तर्पणं सन्तर्पणं । तृष्णादाहज्वरोपद्रवत्वात् । यतः । तृष्णादाहज्वरादीनां स्पर्शदोषेण सीदतीति । क्रियासु असमर्था भवन्तीत्यर्थः । अतएव तर्पणमिति । अपराण्याह—सर्पिरिक्षुरसमित्येको योगः । द्राक्षां पयो वेति द्वितीयः । शर्कराम्बु वेति तृतीयः । मधुराम्लौ रसौ वापीति चतुर्थः । शमनाय प्रदापयेदिति वमनप्राबल्यम् । तन्त्रान्तरोक्तं यथा 'वमनात्कोष्ठशुद्धिः स्याद्धूमगन्धश्च नश्यति । विधिनाऽनेन शाम्यन्ति सदनं क्षवथुर्ज्वराः' इत्यादि ॥ ७ ॥ ८ ॥

**गू०**—तथा अकाले असमये पीतो धूमः उपद्रवान् कुर्यात् । तत्र धूमोपद्रवे किं विहितं, तत्राह—तत्र धूमोपद्रवे सर्पिषः पानं इष्टं उचितं नावनं नस्यं तथाञ्जनतर्पणं मण्डादिकं सर्पिर्घृतपानं इक्षुरसं पौण्ड्रकादीनां रसं द्राक्षा गोस्तनी पयो दुग्धं गव्यं वा, शर्कराम्बु वा सितोदकं वा, मधुराम्लौ रसौ वा, शमनाय दापयेत्, सर्पिषः पुनरुक्तिर्विशेषघृतप्रयोगार्थम् । द्राक्षादिमधुद्रव्ये गृहीतेऽपि पुनर्मधुरग्रहणं तस्यैव विशेषयोगार्थम् ॥ ७ ॥ ८ ॥

## धूमः कदा गृह्यते को वा गुण इत्याह—

**धूमस्तु द्वादशाद्वर्षाद्गृह्यतेऽशीतिकाश्च च ।**
**कासश्वासप्रतिश्यायान्मन्याहनुशिरोरुजः ॥ ९ ॥**
**वातश्लेष्मविकारांश्च हन्याद्धूमः सुयोजितः ।**
**धूमप्रयोगात्पुरुषः प्रसन्नेन्द्रियवाङ्मनाः ॥ १० ॥**
**दृढकेशद्विजश्मश्रुः सुगन्धिवदनो भवेत् ।**

**दी०**—अथ धूमस्य वयोभेदेनोपादेयत्वमनुपादेयत्वमाह—द्वादशवर्षादुपरि अर्थाद्बाल्यावस्थायाः धूमपानो योज्यः । यावदशीतिवर्षाणि भवन्ति उपरि गृह्यते । अशीतिवर्षादुपरि धूमपानो न विहित इत्यभिप्रायः । एतद्विषयं प्रायोगिकधूमपाने स्वस्थोपयोगित्वेन दर्शितम् । यतोऽन्यत्र सर्वैर्निबन्धकारैरप्रशस्तत्वात् । अथ सम्यग् योजितस्य धूमपानस्य गुणमाह—धूमप्रयोगात् इति । सम्यक् पीतः । अथ धूमयोगेन फलमाह । इन्द्रियाणि बुद्धीन्द्रियाणि । तेषां प्रसन्नता तद्विषयग्रहणसामर्थ्यमित्यर्थः । वाक्वचनप्रागल्भ्यं मनः इन्द्रियत्वेनोभयात्मकत्वात्पुनर्ग्रहणम् । दृढकेशद्विजश्मश्रुरिति । केशाः शिरोरुहाः श्मश्रु नासाधोगतौष्ठोपरिलोमविशेषः । द्विजा दन्ताः । सुग-

१–तन्त्रान्तरोक्ता विषाशीरक्तपित्तीप्रभृतयः ।

२–तदुक्तं वाग्भटे—'रक्तपित्तान्ध्यबाधिर्यतृण्मूर्च्छामदमेहकृत्' इति ।

न्धिवदनो भवेदित्यस्य स्थाने सुगन्धिविशदानन इति केचित्पठन्ति व्याख्यानयन्ति च ॥ ९ ॥ १० ॥

**गू०**—धूमो द्वादशाद्वर्षात् गृह्यते अशीतिकाद्वर्षान्न गृह्यते तथा सुयोजितो धूमः कासादीन् हन्यात् । धूमोपयोगात् कीदृशः पुरुषो भवेदित्याह—दृढाः केशा द्विजा दन्ताः श्मश्रुः मुखकेशाश्च यस्य सः ॥ ९ ॥ १० ॥

### यया नाड्या धूमो गृह्यते तद्विधानमाह—

**धूमनाडी भवेत्तत्र त्रिखण्डा च त्रिपर्विका ॥ ११ ॥**
**कनिष्ठिकापरीणाहा राजमाषागमान्तरा ।**
**धूमनाडी भवेद्दीर्घा शमने रोगिणोऽङ्गुलैः ॥ १२ ॥**
**चत्वारिंशन्मितैस्तद्वद्द्वात्रिंशद्भिर्मृदौ मता ।**
**तीक्ष्णे चतुर्विंशतिभिः कासघ्नी षोडशोन्मितैः १३**
**दशाङ्गुलैर्वामनीये तथा स्याद्व्रणनाडिका ।**
**कलायमण्डलस्थूला कुलित्थागमरन्ध्रका ॥ १४ ॥**

**दी०**—इदानीं धूमपानार्थं नेत्रस्वरूपमाह—तत्रेति । धूमपानविषये धूमनाडी धूमपानार्थं नाडी नेत्राभिधाना । कथंभूता त्रिखण्डा । अतएव त्रिपर्विका कथिता । त्रिग्रन्थियुतेत्यादि । कनिष्ठिकापरीणाहेत्यनेन गोपुच्छाकारा कार्या । गोपुच्छाकारत्वं च त्रिखण्डानामिति भावः । अन्तरे सुषिरं तु राजमाषवद्वर्तुलानुरूपं कार्यमित्यर्थः । एके अन्तरनाडिकायाः प्रान्ते राजमाषसदृशं रन्ध्रं वदन्ति । मूलमुखं तु राजमाषात् किंचिदधिकं भवति । कनिष्ठिकापरिणाहाकारत्वात् । अथ नाडीस्वरूपमभिधाय संप्रति शमनादीनामङ्गुलभेदेन नाडीविभेदमाह । दशाङ्गुलैर्वामनीयः एतत्पञ्चप्रकारं मुख्यपानत्वेन नाडीविषयत्वाद्विहितम् । षोडा संज्ञकमवशिष्टं यत् घ्राणधूपनम् । तस्य नाडीस्वरूपं वक्ष्यमाणं बोद्धव्यम् । अतएव नाडीभेदेनैव पञ्चप्रकारं पूर्वमुक्तं तद्यथा—धूमनाडी । शमनेति शमनाख्यधूमपानयोग्येत्यर्थः । कथंभूता । आतुरस्य चत्वारिंशदङ्गुलैर्दीर्घा । ननु तन्त्रान्तरे अष्टचत्वारिंशदङ्गुलैः परिमिता नाडी प्रायोगिकाभिधाने शमनधूमपाने प्रशस्ता तथाच 'एलादिना कुष्ठनतोद्धृतेन क्षौमं विलिप्याङ्गुलकाष्ठमानम् । प्रायोगिके वर्तिरियं तु नेत्रमष्टाङ्गुलं षड्गुणितं प्रशस्तम्' इति सुश्रुतेनोक्तम् । अपरेतु षट्त्रिंशदङ्गुलं प्रायोगिके नेत्रमाहुः । तदुक्तं 'सार्द्धं त्र्यंशयुतः पूर्णो हस्तः प्रायोगिकादिषु' इति । तत्कथमत्र चत्वारिंशदङ्गुलैः परिमितं नेत्रम्? उच्यते । समलस्य तु मध्यः । प्रायोगिकस्तु द्वौ भेदौ दर्शितौ । तद्भेदत्वेन नाडीभेदमपि जानीयान्न दोषः । अथवा श्लेष्मप्रकृतौ बद्धदोषे च नरे षड्विंशदङ्गुला मात्रा । अन्यत्र त्वष्टचत्वारिंशदङ्गुलं तेन विरोधः । स्वमते त्वाचार्येण विशेषं विचार्य सामप्रतिपालनार्थं मध्यभावं नेत्रपरिमाणं लिखितमित्यदोषः । एवं वक्ष्यमाणपरिमाणेषु कुत्रचिद्विरोधेषु बोद्धव्यम् । मृदाविति बृंहणाख्ये धूमपाने द्वात्रिंशदङ्गुलमितं नेत्रं भवति । तीक्ष्ण इति रेचनाख्ये धूमपाने चतुर्विंशत्यङ्गुलमितं नेत्रमत्र । कासघ्ने धूमपाने षोडशाङ्गुलिप्रमितं । नाडीविषये वामनीये धूमपाने दशाङ्गुलं नेत्रमिति । पूर्वमुक्तं व्रणधूपनार्थं नाडीस्वरूपमन्यत्राह धूमनिमित्तम् । ईदृशी नाडिका नेत्राख्या भवति । कीदृशी । कलायमण्डलस्थूलेति । नाडिका उत्तरमुखं व्रणलग्नार्थम् । कलायसदृशं मण्डलं कार्यं कलायो वर्तुलकलायः । पुनः कथंभूता । कुलत्थागमरन्ध्रकेति । कुलत्थोऽन्नविशेषः प्रसिद्धः । तद्गमनशीलो रन्ध्रः सुषिरस्तेन संयुत इत्यर्थः । नाडिकारन्ध्रं तु कुलत्थसदृशं कार्यमिति भावः ॥ ११–१४ ॥

**गू०**—सामान्यतो या धूमनाडी भवेत्सा त्रिखण्डा त्रीणि खण्डानि दोरकानि यस्याः सा, त्रिपर्विका त्रीणि पर्वाणि ग्रन्थीर्यस्याः सा त्रिपर्विका कनिष्ठिकाङ्गुली । तत्परिमाणमाह—स्थूला पुनः राजमाषागमा अन्तरे मध्ये राजमाषः तद्रूपं छिद्रं अन्तरे भवति । इदानीं शमनादौ धूमनाडीप्रमाणमाह—शमने शमनधूमपाने या नाडी नलिका सा रोगिणां चत्वारिंशदङ्गुलैर्दीर्घा मता । मृदौ मृदुधूमपाने नाडी सा द्वात्रिंशदङ्गुलैर्दीर्घा । तीक्ष्णे तीक्ष्णधूमपाने चतुर्विंशैरङ्गुलैर्दीर्घा । कासघ्ने धूमपाने या नाडिका सापि दशाङ्गुलैरेव दीर्घा ईदृशी । स्थूलमानमाह । कलायो वर्तुलकस्तत् मण्डलवत्स्थूला पुना रन्ध्रे यथा कुलत्थागमनं भवेत्तद्वत् ॥ ११–१४ ॥

### इदानीं धूमपानार्थं ईषिकाविधानमाह—

**अथेषिकां प्रलिम्पेच्च सुश्लक्ष्णां द्वादशाङ्गुलाम् ।**
**धूमद्रव्यस्य कल्केन लेपश्चाष्टाङ्गुलः स्मृतः ॥ १५ ॥**
**कल्कं कर्षमितं लिप्त्वा छायाशुष्कं च कारयेत् ।**
**ईषिकामपनीयाथ स्नेहाक्तां वर्तिमादरात् ॥ १६ ॥**

**अङ्गारैर्दीपितां कृत्वा धृत्वा नेत्रस्य रन्ध्रके।**
**वदनेन पिबेद्धूमं वदनेनैव संत्यजेत् ॥ १७ ॥**
**नासिकाभ्यां ततः पीत्वा मुखेनैव वमेत्सुधीः।**
**शरावसंपुटे क्षिप्त्वा कल्कमङ्गारदीपितम् ॥ १८ ॥**
**छिद्रे नेत्रं निवेश्याथ व्रणं तेनैव धूपयेत्।**

**दी०**—इदानीं वर्तिविधानं दर्शयितुमाह—अथ ईषिकां प्रलिम्पेदिति। कोर्थः पिष्टैर्भेषजैः कर्पटावयवं प्रलिख्य तेन शरकाण्डमङ्गुलीसममष्टाङ्गुलमानेन वेष्टयित्वा ततः परिशोष्य वर्तिः कार्या। अवशिष्टं चतुरङ्गुलं शरकाण्डग्रहणार्थमुक्तम्। स्नेहकादिष्वपि वर्तिकरणम्। ईषिका काशमुच्यते। 'घागुरि' इति लोके। अथ कथं वर्तिः प्रज्वाल्य नेत्रे धार्या तत्प्रकारमाह। अदलादिति। दलमत्र पत्रलेपं। ईषिकावर्तिविधानं च प्रायोगिके प्रधानतमं। रोपणीया वर्तिरियम्। षड्भागगोधूमेन नेत्रमावर्त्यात्मानं प्रशस्यत इति। केचित् स्नेहेनाभ्यज्येदग्निना दग्ध्वा नेत्रे निवेश्य धूमः पेयः। यदा वदनेन मुखेन कृत्वा धूमं पिबेत् तदा मुखेनैव तन्निर्गमं कुर्यात्। नासिकाभ्यां पीतमपि मुखेनैवमेव वमेदित्यर्थः। नासिकाभ्यामिति द्विवचनेन नासिकारन्ध्रद्वयेन सम्बन्धः। तत इत्यनेन मुखपीतेनेतरमेव नासिकया पीतमित्यर्थः। तथाहि 'मुखेन तं वमेत्पूर्वं नासिकायां पुनः पिबेत्' इति। ननु तत्रान्तरे नासिकापीतं पश्चान्मुखपीतं धूमं दोषकरं भवति तथाच—'मुखपीतं मुखेनैव नस्तःपीतं च नस्ततः। यो वमेन्नस्ततो धूमं नस्तपीतं मुखेन वा। स नेत्रकर्णनासास्यसंश्रयात् लभते गदान्' इति। तत्कथमत्र नासिकाभ्यां ततः पीत्वा मुखेनैव वमेत् सुधीरिति ग्रहणं। उच्यते। सुधीरित्युदीरणेनाऽत्र विरोधपरिहारः कृतः। यतो धूमपानभेदेन रोगविशेषेपि कुत्रचिन्मुखपीतं कुत्रापि नासिकापीतं वा। मुखनासिकापीतमिति। तथाचोक्तं—'उरःकण्ठाश्रये रोगे मुखेनैव पिबेन्नरः। शिरःकण्ठाक्षिनासौष्ठे नासया सततं पिबेत्। तिर्यक्त्वे तु मुखेनैव नासया न कथंचन। प्रगाढं पानमिच्छन्ति धूमस्यांशेन तद्विद' इति। कथं पिबेदित्यपि दर्शनात् यथा तत्र प्रायोगिकं त्रींस्त्रीनुच्छ्वासानादद्यात्। घ्राणेन प्रीणयेत् त्रींश्चतुरोवेति। 'स्नैहिकं मुखनासाभ्यां यावदश्रु प्रवर्तनम्'। नासिकाभ्यां वैरेचनिकमादोषदर्शनात्। मुखेनैव कासहरं श्वासशुद्धिर्लाघवं शिरसि समः एवं विचार्य मुखपीतं मुखेनैव वमेत्। नासापीतं च नासिकयैव। उभाभ्यां पीतं मुखेनैव वमेदित्यदोषः। अतएव सुधीपदनिरूपणमत्र विरोधपरिहाराय बोद्धव्यम्। इदानीं धूमपानविषयत्वेन घ्राणधूपनमप्याह—कल्कमत्र निम्बवचादीनां विहितम्। यतः 'व्रणे निम्बवचादीनां धूपनं संप्रशस्यत' इति। छिद्रे इति शरावसंपुटरन्ध्रे। नेत्रमिति नाडीविशेषः। सा धूमपानार्थे कथितैव तद्वदत्रापि ज्ञेयम्। व्रणधूपनं तु वेदनास्रावशान्तये इति। अथवा पूर्वमुक्तं शमनादिधूमभेदं विहितं। अथवा—'शरावसंपुटयुतं व्रणधूमं नयेद्व्रणे। धूमनेत्रेण मतिमान् वेदनास्रावशान्तये' इति ॥ १५–१८ ॥

**गू०**—ईषिका शरतृणविशेषजन्या या दशाङ्गुलानां धूमद्रव्यकल्केन लिम्पेत् पुनः शुष्के वर्तिस्नेहोक्तं कृत्वा ईषिकां अपनीय दूरीकृत्य नेत्रस्य नलिकारन्ध्रे धृत्वा दीपितां कृत्वा वदनेन धूमं पिबेत्। वदनेनैव त्यजेत्। ततः नासिकाभ्यां एवं कृत्वा वदनेनैव वमेत्। व्रणधूमस्तु दीपनकल्कशरावे धृत्वा छिद्रे नेत्रं निवेश्य व्रणं धूमयेत् अयं धूमपानविधिः ॥१५–१८॥

## शमनधूमादौ यद्द्रव्यकल्को धूमार्थं देयस्तदाह—

**एलादिकल्कं शमने स्निग्धे सर्जरसं मृदौ ॥ १९ ॥**
**रेचने तीक्ष्णकल्कं च कासघ्नं क्षुद्रिकोषणम्।**
**वामने स्नायुचर्माद्यं दद्याद्धूमस्य पानकम् ॥ २० ॥**
**व्रणे निम्बवचाद्यं च धूपनं संप्रशस्यते।**

**दी०**—अथ पूर्वमुक्तं शमनादिधूमभेदं षट्प्रकारं तदर्थं कतिपयानि द्रव्याण्याह—शमने प्रायोगिके एलादिकल्कं धूमपानार्थमाहुः। एलादिगणमत्र सुश्रुतोक्तं तद्यथा—'एलातगरकुष्ठमांसीजलध्यामकां त्वक्पत्रनागपुष्पप्रियङ्गुहरेणुकाव्याघ्रीनखशुक्तिचण्डास्थौणेयकश्रीवेष्टकचोरकबालकगुग्गुलुसर्जतुरुष्कपुण्डरीकागरुस्पृक्कोशीरभद्रदारुकुङ्कुमानि पुराणकेसरं चे'ति। तत्र प्रायोगिकनिमित्तत्वेन कुष्ठः तयोः परित्यागः कार्यः मस्तिष्कस्रावभयात्। यदुक्तं 'नतकुष्ठे स्रावयतो धूमव-

१–चक्रदत्ते तु—'ओषधैर्वर्तिकां कृत्वा शरगर्भान्तशोधितां' इति शरग्रहणं, चरकेऽपि—'पिष्ट्वा लिम्पेच्छरेषीकां वर्तिं यवजसन्निभां' इति दृश्यते। तस्मादीषिकाणामलाभे शरकाण्डेन पिबेत् ॥

र्तिप्रयोजिते । मस्तुलुङ्गप्रभावेन तस्मात्तं न प्रयोजयेत्' इति । मृदाविति बृंहणाख्ये । स्निग्धमित्येरण्डादिफलमज्जाप्रायं । अथवा स्निग्धमित्यनेन समस्तधूमविधानं सस्नेहं कार्यमिति पूर्वोक्तत्वात् । सार्जरसमिति । सर्जरसप्रायं प्रायोगिकमित्यर्थः । तदुक्तं—'स्निग्धमज्जमधूच्छिष्टस्नेहगुग्गुलुसर्जकैः । स्नेहिका वर्त्तिरेभिस्तु नेत्रं द्वात्रिंशदङ्गुलम्' इति । रेचनतीक्ष्णकल्कमिति । रेचनमिति शोधनाख्यधूमपाने । तीक्ष्णकल्कमिति शिरोविरेचनद्रव्यकृतवर्तिरित्यर्थः । शिरोविरेचनैर्वर्तिर्नेत्रं हस्तमितमित्युक्तत्वात् । शिरोविरेचनैरित्यपामार्गबीजादिभिः । हस्तमितमिति चतुर्विंशदङ्गुलं । कासघ्ने क्षुद्रिकोषणमिति कासघ्ने धूमपाने । क्षुद्रिका कण्टकारिका । ऊषणमत्र त्रिकटुकं ग्राह्यं तन्त्रान्तरदर्शनात् । तद्यथा बृहत्त्र्यूषणं बृहती शृङ्गी चेङ्गुदीत्वग्मनःशिला । एषा कासहरा वर्तिर्नेत्रं षोडशकांगुलम्' इति । वामने स्नायुचर्मांद्यमिति । वामने धूमपाने । स्नायुचर्माद्यं वर्त्यै दद्यादित्यर्थः । आदिग्रहणात् अस्थिखुरवल्लूरमपि गृह्यते । तदुक्तं 'वामनीये तु वल्लूरस्नाय्वस्थिखुरचर्मभिः । वर्तिर्दशाङ्गुले नेत्रं धूमः पञ्चविधो मत' इति । वल्लूरं शुष्कमांसमिति । एके धूमस्य पानकमित्यनेन घ्राणधूपनस्यव्याख्यानं कुर्वन्ति तत्र धूमस्य घ्राणधूपनस्य पानकमिति तद्विहितद्रव्यमित्यर्थः । इति न सर्वमतं । 'धूमः पञ्चविधो मत' इत्यादिवचनात् ॥ १९ ॥ २० ॥

**गू०**—शमने एलादिकल्कं देयं । एलादिरेलादिगणः तन्नैलादिना कुष्ठवर्जेनेति **सुश्रुतः ।** तथा एलादिगणो **वाग्भटे**–'एलायुग्मरुक्कुष्ठफलिनीमांसीजलध्यामकं, स्पृक्काचोरकचोचपत्रसुगुरुस्थौलेयजातीरसाः । शुक्तिव्याघ्रनखोमराह्वमगरुः श्रीवासकः कुङ्कुमं, चण्डागुग्गुलुदेवधूपखपुरपुन्नागनागाह्वयाः । एलादिको वातकफौ विषं च विनियच्छति । वर्णप्रसादनः कण्डूपिडकाकोष्ठनाशनः' । एषा वर्तिः प्रायोगिके प्रायोगिकं तु त्रिःत्रि-श्वासेनाददीत विशेषतस्तु प्रायोगिकं घ्राणेनाददीत मृदौ स्निग्धं सर्जरसं स्नेहफलासारधूमोच्छिष्टसर्जरसगुग्गुलुप्रभृतिभिः स्नेहमिश्रैः स्नेहेनेति **सुश्रुतः ।** कासघ्ने क्षुद्रिकोषणं क्षुद्रा कण्टकारी व्योषणं मरिचं बृहती कण्टकारिका त्रिकटुकासमर्दक इङ्गुदीत्वङ्मनःशिला छिन्नरुहा कर्कटशृङ्गीप्रभृतिभिः कासहरैश्च कासघ्नैर्वामनैः स्नायुचर्माद्यं दद्यात् । स्नायुचर्मखुरं शृङ्गकर्कटास्थिशुष्कमत्स्यवल्लूरकमिश्रप्रभृतिभिर्वामनीयैः इति **सुश्रुतः ।** स्नायुनाडी **सुश्रुते** 'धूमः पञ्चविधो भवती'त्युक्तं तद्यथा प्रायोगिकः स्नेहनो विरेचनः कासघ्नो वामनीयश्चेति शमनधूमस्तु भिन्नप्रयोक्तस्तेन **शार्ङ्गधरेण** षड्विधो लिखितः ॥ १९ ॥ २० ॥

## बालग्रहादौ धूमपानमाह—
## अपराजितो धूपः

**अन्येऽपि धूमा गेहेषु कर्तव्या रोगशान्तये ॥२१॥**
**मयूरपिच्छं निम्बस्य पत्राणि बृहतीफलम् ।**
**मरिचं हिङ्गु मांसी च बीजं कार्पाससंभवम् ॥२२॥**
**छागरोमाहिनिर्मोकं विष्ठा बैडालिकी तथा ।**
**गजदन्तश्च तच्चूर्णं किंचिद्घृतविमिश्रितम् ॥ २३ ॥**
**गेहेषु धूपनं दत्तं सर्वान्बालग्रहाञ्जयेत् ।**
**पिशाचान्राक्षसाञ्जित्वा सर्वज्वरहरं भवेत् ॥ २४ ॥**

**दी०**—अथान्ये गृहधूमाः सन्ति तानपि प्रसङ्गतो दर्शयन्नाह—अयमपराजितसंज्ञो धूपः प्रसिद्ध एव । तत्र बृहतीफलं कण्टकारिकाफलं । मांसी जटाख्या । अहिनिर्मोकं सर्पकञ्चुलिकं । विष्ठा बैडालिकी मार्जारपुरीषम् । ननु तन्त्रान्तरे माहेश्वरधूपसंज्ञोऽयं कथमत्रापराजितसंज्ञः । उच्यते—तत्र माहेश्वरसंज्ञत्वेन रुद्रनिर्माल्याभिधानत्वाददोषः । तदुक्तं—'रुद्रजटागोशृङ्गविडालविष्ठोरगस्यनिर्मोकः । मदनफलभूतकेशीवंशत्वग् इति निर्माल्यम् । यवमसूरचन्द्रकच्छागलरोमाणि सर्षपाः सवचाः । हिङ्गुगजद्विजमरिचाः समभागाः छागमूत्रसंपिष्टाः । धूपनविधिना शमयन्त्येते सर्वज्वरान्नियतम् । ग्रहडाकिनीपिशाचप्रेतविकारापहो धूप' इति बहुद्रव्योक्तकल्पनाद्वा न दोषः ॥ २१–२४ ॥

**गू०**—मयूरपिच्छं मयूरपक्षं । अहिनिर्मोकं सर्पकंचुकम् ॥ २१–२४ ॥

## धूमपाने पथ्यं, नेत्रद्रव्याण्याह—

**परिहारस्तु धूमेषु कार्यो रेचननस्यवत् ।**
**नेत्राणि धातुजान्याहुर्नलवंशादिजान्यपि ॥ २५ ॥**

इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां
शार्ङ्गधरसंहितायामुत्तरखण्डे धूमपानविधि-
र्नाम नवमोऽध्यायः ॥ २ ॥

---

**दी०**—अथ धूमपानपरिहरं नेत्रार्थं द्रव्यं च दर्शयन्नाह—धूमेष्विति । षड्विधधूमपानविषयेषु परि-

हारस्त्वाज्याभिधः । सच विरेचननस्यवत् कार्यः । तत्तथैव ज्ञातव्यम् । अथवा परिहारस्तु धूमेषु कार्यो रेचनवत्तथेति पाठान्तरम् । यथा विरेचनोक्ते सति प्रवातसेवाम्बुस्नेहासंगमजीर्णतामित्यादिकं सेवेत तथा धूमपानके सति तत्र वातसेवादिपरित्याग इत्यभिप्रायः । नेत्राणीति । धूमपानार्थं नाडीयन्त्राणि तान्यनुक्तत्वादृशधातुजानि नलवंशादिजान्यपि बोद्धव्यानि । धातवोऽत्र सुवर्णाद्याः । आदिग्रहणादन्यकाष्ठदन्तशृङ्गघटितानीत्यर्थः ॥ २५ ॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायामुत्तरखण्डे धूमपानाध्यायः ॥

---

इति श्रीकाशीराममिश्रकृतायां शार्ङ्गधरगूढार्थदीपिकायां चिकित्सास्थाने धूमपानना-माध्यायः ॥

---

## दशमोऽध्यायः ।

### अथ गण्डूषकवलप्रतिसारणविधिः ।

ऊर्ध्वगतदोषहरत्वसामान्यात् धूमपानमभिधाय संप्रतिगण्डूषं कवलं प्रतिसारणविधिमारभ्यते ॥

**चतुर्विधः स्याद्गण्डूषः स्नैहिकः शमनस्तथा ।**
**शोधनो रोपणश्चैव कवलश्चापि तद्विधः ॥ १ ॥**
**स्निग्धैस्तु स्नैहिको वाते स्वादुशीतैः प्रसादनः ।**
**पित्ते कट्वम्ललवणैरुष्णैः संशोधनः कफे ॥ २ ॥**
**कषायतिक्तमधुरैः कटुष्णो रोपणो व्रणे ।**
**चतुष्प्रकारो गण्डूषः कवलश्चापि कीर्तितः ॥ ३ ॥**
**असंचारी मुखे पूर्णे गण्डूषः कवलश्चरः ।**
**तत्र द्रवेण गण्डूषः कल्केन कवलः स्मृतः ॥ ४ ॥**
**दद्याद्द्रवेषु चूर्णं च गण्डूषे कोलमात्रकम् ।**
**कर्षप्रमाणः कल्कश्च दीयते कवले बुधैः ॥ ५ ॥**

दी०—कवलश्चापि तद्विध इत्यनेन कवलोपि स्नेहादिचतुर्भेदैरेव बोद्धव्यः । यथा चतुःप्रकारो गण्डूषस्तथैव कवलश्चतुःप्रकारो भवतीत्यभिप्रायः । अथ यच्चतुःप्रकारं तत्प्रकारविधानमाह—स्निग्धैस्तु स्नैहिकमित्यस्य स्थाने सुश्रुते स्निग्धोष्णैः स्नैहिके वात इति पाठः साधुः । स्नैहिके गण्डूषकवलयोर्भेदः कार्य इति शेषः । स्वादुशीतः प्रसादनः पित्ते प्रशस्तः । स्वादुर्मधुरः शीतस्पर्शाद्वीर्याद्वा प्रसादनो गण्डूषपर्यायः । सचात्र शमनभेदो ज्ञेयः । कट्वम्ललवणैरिति संशोधनमिति गण्डूषकवलापरपर्यायवाचकाभिधानं कफे प्रशस्तम् । कैः कट्वाम्लादिभिरिति । उष्णैरित्यस्य स्थाने रूक्षैरिति पाठान्तरम् । कषायतिक्तमधुरैरिति व्रणे मुखजनितपिडकादिरूपे । रोपणो गण्डूषसंज्ञः । कट्वम्ल इत्यस्य स्थाने कटूष्ण इति पाठः प्रचरति । एभिश्चतुःप्रकारैः कृत्वा गण्डूषः कथितः । न केवलं गण्डूषः कवलश्चापीदृशोऽवगन्तव्यः । अस्यान्ते केचिदिति पठन्ति । 'एवं स्नेहः पयःक्षौद्ररसमूत्राम्लसंस्मृतः । कषायोष्णोदकाभ्यां च कवला दोषतो हिता' इति । बहुपुस्तकेषु न लिखितं । सर्वोक्तेनैव कृतार्थत्वात् । अथ गण्डूषकवलयोर्भिन्नत्वप्रतिपादनार्थं विधानमाह—पूर्णे मुखे संभृतमुखकुहरे यो संचारी भवति चलनादिरहितः स गण्डूषः कथितः । तद्विपरीतः कवल इति । अतएव द्रवद्रव्येण गण्डूषः कल्केन कवल इत्यर्थः । तथाचोक्तं चक्रदत्ते—'मुखं संचार्यते जानुमात्रा च कवलेन तु । असंचार्या तु या मात्रा गण्डूषे सा प्रकीर्तिता' इति । अयमेव पाठः सुश्रुते । गण्डूषकवलयोर्द्रव्याणां परिमाणमाह—गण्डूषे गण्डूषकरणविधौ चूर्णं वा । गण्डूषे कोमलमात्रकं कर्षप्रमाणकल्कं अकवले दीयते बुधैः । गण्डूषे गण्डूषकरणविधौ चूर्णं व्याधिविहितद्रव्यकृतं रजः कोमलमात्रमिति कर्षार्धं । द्रवेषु तोयक्षीरादिप्रभृतिषु संस्राव्य दद्यादित्यर्थः । द्रवपरिमाणमुक्तं यावन्मुखपूर्णं भवति तत्परिमाणं चैकवारं गण्डूषानिमित्तम् । पुनः पुनरर्थं च बहुतरद्रवं संगृह्य तदनुसारेण चूर्णमपि संस्राव्य देयम् । एवं सर्वं प्रज्ञातव्यम् । तथाचोक्तं सुश्रुते—'तावच्च धारयितव्योऽनन्यमनसा संचारयितव्यश्च । यावद्दोषप्रतिपूर्णगलकपोलत्वग्नासास्रोतोनयनपरिप्लवश्च भवति । तदा विमोक्तव्यः । पुनश्चान्यो गृहीतव्य' इति । शेषं सुगमम् ॥ १–५ ॥

---

१–सुश्रुते—स्नेही, प्रसादी, संशोधनरोपणावित्यन्यथा चतुर्विधत्वमुक्तम् । तथा तन्त्रान्तरे वैरेचनसंशमनाभ्यां षड्विधत्वमुक्तं तथाप्यत्र संशोधने वैरेचनस्य प्रसादने शमनस्यान्तर्भावान्न विरोधः ।

गू०—चतुर्विधत्वमाह—एकः स्नेहनः द्वितीयः शमनः तृतीयः शोधनः चतुर्थो रोपणः एवं चतुर्विधः कवलः । यैर्द्रव्यैर्दोषेषु स्नैहिकादयो भवन्ति तत्प्रकारमाह—वाते स्निग्धोष्णैर्द्रव्यैः स्नैहिकः स्वादुर्मधुरस्तथा शीतः पित्ते तैः प्रसादनः प्रशमनो भवति । कट्वम्ललवणैर्द्रव्यैः उष्णैः कफे संशोधनः । व्रणे कीदृशो देयस्तदप्याह—कषायतिक्तमधुरैर्द्रव्यैः कटूष्णः व्रणरोपण एवं चतुर्विधश्चतुःप्रकारो गण्डूषः कथितः, कवलश्चापि तत्प्रकारस्तद्विध एव, अतो गण्डूषकवलयोर्लक्षणमाह—तत्र द्रवेण पूर्णे मुखे असंचारी असंचरणशीलो गण्डूषः कल्कतश्चरश्चलनशीलः कवलः मुख एव । गण्डूषकल्कयोरौषधप्रमाणमाह-गण्डूषद्रव्यात् द्रवेषु चूर्णं कोलमात्रकं देयं कलाष्टकद्वयानां कवले द्रव्यात्कल्कः कर्षप्रमाणः । कर्षष्टंकचतुष्टयानाम् ॥ १–५ ॥

**कस्मिन् वयसि गण्डूषो धार्यते कियत्परिमिता गण्डूषाः कार्या इत्याह—**

**धार्यन्ते पञ्चमाद्वर्षाद्गण्डूषकवलादयः ।**
**गण्डूषान्सुस्थितः कुर्यात्स्विन्नभालगलादिकः ॥ ६ ॥**
**मनुष्यस्त्रींस्तथा पञ्च सप्त वा दोषनाशनात् ।**
**कफपूर्णास्यता यावच्छेदो दोषस्य वा भवेत् ॥ ७ ॥**
**नेत्रघ्राणस्रुतिर्यावत्तावद्गण्डूषधारणम् ।**

दी०—अथ कीदृशो गण्डूषकवलयोर्वयस्तमाह—पञ्चमाद्वर्षादुपरि बाल्यावस्थायामेव गण्डूषकवलादयो धार्यन्ते । आदिग्रहणात्प्रतिसारणस्याऽत्र संग्रहः । पञ्चमवर्षग्रहणं तन्त्रान्तरेऽपि दर्शितं । तद्यथा–'धूमो द्वादशवर्षस्य कवलः पञ्चमे हितः' इति । अथ कियत्संख्याभिर्गण्डूषविषयः तं दर्शयन्नाह—गण्डूषं अन्तःस्थितं मुखमध्यस्थितं यस्य स तथा; पुनः स्विन्ना भालगलादयो यस्य स तथा । भालः कपालः, आदिग्रहणान्नासास्रोतोनयनादीनां ग्रहणं । ईदृशो रोगी त्रिवेलं पञ्चवारं वा गण्डूषं कुर्यादित्यभिप्रायः । अथवा दोषनाशनान्मर्यादीकृत्येत्यर्थः । केचिन्निबन्धकारा 'गण्डूषान्सुस्थित' इत्यमुं श्लोकं वक्ष्यमाणं 'कफपूर्णास्यता' इति यावत् श्लोकं च न पठन्ति । क्षेपकाविति मन्यमानत्वात् । वक्ष्यमाणो यथा 'कफपूर्णास्यता यावच्छेदो दोषस्य वा भवेत् । नेत्रघ्राणस्रुतिर्यावत्तावद्गण्डूषधारणम्' । अस्माकं मते तु युक्तार्थत्वेन संगतावेव । बहुपुस्तकेषु लिखितदर्शनात् ॥ ६ ॥ ७ ॥

गू०—गण्डूषकवलादयः पञ्चमाद्वर्षाद्वयसः । गण्डूषधारणप्रमाणमाह—सुस्थितः मनुष्यः त्रीन् तथा पञ्च सप्त वा दोषनाशनात् गण्डूषान्कुर्यात् । सुस्थितः सुखेन स्थितः, किंभूतः ? स्विन्नभालगलादिकः स्विन्नः प्रस्वेदयुक्तो भालो गलादिकं च यस्य सः । अन्यदपि गण्डूषधारणे प्रमाणमाह—नेत्रघ्राणस्रुतिस्रावो वा यावत् तावदेव गण्डूषधारणं इदं वा प्रमाणम् ॥ ६ ॥ ७ ॥

**वाते स्नैहिकगण्डूषमाह—**

**तिलकल्कोदकं क्षीरं स्नेहो वा स्नैहिके हितः ॥ ८ ॥**
**तिला नीलोत्पलं सर्पिः शर्करा क्षीरमेव च ।**
**सक्षौद्रो हनुवक्त्रस्थो गण्डूषो दाहनाशनः ॥ ९ ॥**
**वैशद्यं जनयत्यास्ये संदधाति मुखव्रणान् ।**
**दाहतृष्णाप्रशमनं मधुगण्डूषधारणम् ॥ १० ॥**
**विषक्षाराग्निदग्धे च सर्पिर्धार्यं पयोऽथवा ।**
**तैलसैन्धवगण्डूषो दन्तचाले प्रशस्यते ॥ ११ ॥**
**शोषं मुखस्य वैरस्यं गण्डूषः काञ्जिको जयेत् ।**
**सिन्धुत्रिकटुराजीभिरार्द्रकेण कफे हितः ॥ १२ ॥**
**त्रिफलामधुगण्डूषः कफास्रक्पित्तनाशनः ।**

दी०—इदानीं चतुर्विधयोः कवलगण्डूषयोः कतिपयान् योगानाह—स्नैहिके गण्डूषे तिलकल्कवज्जातिष्पीडितमुदकमिति । क्षीरमत्र सामान्येन गोप्रभृतिजनितं । स्नेहश्चाप्येवम् । अथ क्षारादिदग्धवक्त्रस्य योगमाह । तिलेत्यादियोगो व्यस्तसमस्तश्च योज्यः । यदाह कश्चित्—'गण्डूषः शर्कराक्षौद्रपिष्टमांसपयस्तिलैः । व्यस्तैः समस्तैर्योज्यस्तु मुखे क्षारादितापित' इति । 'संदधाति मुखे व्रणान्' इत्यस्य स्थाने 'संनिहन्ति मुखव्रणानि'ति पाठः साधुः । दाहतृष्णादयो मुखस्येति विषक्षाराग्निदग्धे मुखे इति शेषः । धार्यमित्यनेन गण्डूषविषयं । अपराण्याह—तैलं काञ्जिकयोगं सैन्धवं विहाय क्षीरदग्धेऽपि प्रचरति । तथाह्युक्तं 'ताम्बूलमध्यस्थितचूर्णकेन दग्धं मुखं यस्य भवेत् कथंचित् । तैलेन गण्डूषमसौ विदध्यादम्लारनालेन पुनः पुनर्वा' इति । अथ दोषविशेषेण द्रव्यविशेषजनितान् प्रदर्शयन्नाह । सिंधुत्रिकटुराजीभिरित्यनेन कवलयोगमाहुः । सैन्धवादयो व्यस्ताः समस्ताश्च योज्याः । यद्येतेषां गण्डूषस्तदा कल्कं कृत्वा पटे विस्राव्य तद्द्रवेण गण्डूषः कार्य इत्यर्थः । त्रिफलेत्यादियोगः कथितो बोद्धव्यः ।

कल्क इति केचित्। कफासृक्पित्तप्रकोपमुखस्थितमिति भावः॥ ८-१२॥

गू०—स्नैहिके गण्डूषे तिलकल्कः उदकं जलं क्षीरं दुग्धं स्नेहो वा तैलादिकः हितः। वातरोगे एव वातस्य प्रयोगात्। अथ पित्ते गण्डूषः शमन एवोच्यते नीलादीनां हनुवक्त्रस्थो गण्डूषो दाहनाशनो भवति। दाहो मुखदाहः हन्वाश्रितं वक्त्रं तत्रस्थः। अथ मुखव्रणादौ मधुगण्डूषः वैशद्यं विशदत्वं। निर्मलतेति यावत् आस्ये मुखे मुखव्रणान् स्फोटान्संदधाति संधानं करोति। स्पष्टमन्यत्। विषादौ गण्डूषानाह—सर्पिर्घृतं, पयो दुग्धं। अथ दन्तचाले गण्डूषः तिलेति स्पष्टं। अथ मुखशोषे शोथेति सुगमं। अथ कफे संशोधनः राजी प्रसिद्धा। अथ कफासृक्पित्ते त्रिफलेति। सुगमम्॥ ८-१२॥

## अथ मुखपाके गण्डूषः—

### ( प्रतिसारणचूर्णम् )

**दार्वी गुडूची त्रिफला द्राक्षा जात्याश्च पल्लवाः १३**
**यवासश्चेति तत्क्वाथः षष्ठांशक्षौद्रसंयुतः।**
**शीतो मुखे धृतो हन्यान्मुखपाकं त्रिदोषजम्॥१४॥**
**यस्यौषधस्य गण्डूषस्तस्य वै प्रतिसारणम्।**
**कवलश्चापि तस्यैव ज्ञेयोऽत्र कुशलैर्नरैः॥ १५॥**
**केशरं मातुलुङ्गस्य सैन्धवोषणसंयुतम्।**
**हन्यात्कवलतो जाड्यमरुचिं कफवातजाम्॥१६॥**
**कल्कोऽवलेहश्चूर्णं च त्रिविधं प्रतिसारणम्।**
**अङ्गुल्यग्रगृहीतं च यथास्वं मुखरोगिणम्॥ १७॥**
**कुष्ठं दार्वी समङ्गा च पाठा तिक्ता च पीतिका।**
**तेजनी मुस्तलोध्रे च चूर्णं स्यात्प्रतिसारणम्॥१८॥**
**रक्तस्रुतिं दन्तपीडां शोथं दाहं च नाशयेत्।**

दी०—अपरमपि मुखपाकयोगमाह। दार्वी दारुहरिद्रा त्रिफला हरीतकीविभीतकामलकसंज्ञा। जाती मालती। यवास इत्यस्य स्थाने अंबष्ठा चेति तत्क्वाथः पाठः साधुः। अन्यतो दर्शनात्। तथाहि—'जातीपत्रामृताद्राक्षापाठादार्वीफलत्रिकैः। क्वाथः क्षौद्रयुतः शीतो गण्डूषो मुखपाकनुत्' इति। षष्ठांशक्षौद्रसंयुत इति। क्वथितजलस्य यत्षष्ठांशं तेन समं क्षौद्रमिति। अथवा षष्ठांशक्षौद्रसंयुत इति पाठः समीचीनो ज्ञेयः। तेन क्वाथस्य पञ्चभागाः षष्ठो भागः क्षौद्रस्येति व्याख्यानं समीचीनम्। मुखे धृत इत्यनेन गण्डूषविषयः। 'यस्यौषधस्य गण्डूषः तस्यैव प्रतिसारणम्। कवलश्चापि तस्यैव ज्ञेयोऽत्र कुशलैर्नरैः' अयं श्लोको बहुपुस्तकेषु न लिखितः। केनचित्संलिख्य स्वीकृतः। संगतोयमितिमन्यमानैरस्माभिरपि न त्याज्यः युक्तार्थत्वात्। अथ कवलार्थं योगमाह—मातुलुङ्गो बीजपूरकः। तस्य केशरं मध्यस्थितावयवविशेषं लोके चतूरीत्वात्मकं वाच्यं। सैन्धवोषणचूर्णं मनाक् देयं। उषणं मरिचं। जाड्यमिति मुखस्येति। पूर्वमुक्तं प्रतिसारणविषयं तदिदानीं दर्शयन्नाह। प्रतिसार्यते घृष्यते अनेनेति प्रतिसारणम्। ननु तन्त्रान्तरे प्रतिसारणविषयं चतुर्विधं तद्यथा—'विभज्य भेषजं बुद्ध्या कुर्वीत प्रतिसारणं। कल्को रसक्रिया क्षौद्रं चूर्णं चेति चतुर्विधं। अंगुल्यग्रप्रणीतं तु यथास्वं मुखरोगिणां। तस्य योगमयोगं च कवलाक्तं विभावयेत्'। तत्कथमत्र त्रिविधं। उच्यते। अत्रावलेहत्वेन रसक्रियाःक्षौद्रयोस्तदन्तः प्रचारः। तेनावलेहग्रहणेन द्वयोरपि ग्रहणमित्यदोषः। अथ प्रतिसारणचूर्णं दर्शयन्नाह—कुष्ठं रुक्, दार्वी दारुहरिद्रासमं गाञ्जलिकारिका, पाठा अम्बष्ठा, तिक्ता कटुकी, पीतिका हरिद्रा तेजनी चविका इति चक्रः। मूर्वा इति कार्तिकः। मुस्तं मेघः, लोध्रं प्रसिद्धम्। रक्तस्रुतिरत्र दन्तमूलगतदोषस्यैव बोद्धव्या। शोथदाहमपि मुखजनितमेव॥ १३-१८॥

गू०—दार्वी दारुहरिद्रा जाती मालतीपत्राणि वासकः क्वाथात् षष्ठांशः क्षौद्रं मधु यस्य गण्डूषस्यैव प्रतिसारणं कवलश्चेत्याह यस्येति सुगमं। कवलो यथा मातुलुङ्गस्य बीजपूरस्य केशरं मध्यस्थं सैन्धवं मरिचं एतत्कवलो जाड्यं मुखजडतां अरुचिं कफवातजां कफवातजातां। प्रतिसारणं त्रिविधं भवतीत्याह—कल्कः अवलेहः तथा चूर्णं त्रिविधं त्रिप्रकारं प्रतिसारणं भवति मुखरोगिणां यथासुखं यथादोषं त्रिविधं प्रतिसारणसंज्ञं भवति। किंभूतं अंगुल्यग्रगृहीतं कल्काद्यं प्रतिसारणं यथा कुष्ठं, दार्वी, दारुहरिद्रा, समङ्गा मञ्जिष्ठा, पाठा तिक्ता कटुकी, पीतिका हरिद्रा, तेजनी तेजोह्वा, मुस्तं भद्रमुस्तं, लोध्रं एतत्प्रतिसारणं चूर्णं अङ्गुल्यग्रेण घर्षयेत्। रक्तस्रावादीन् नाशयेत्॥ १३- १८॥

## हीनयोगमाह—

**हीनयोगात्कफोत्क्लेशो रसाज्ञानारुची तथा॥१९॥**
**अतियोगान्मुखे पाकः शोषस्तृष्णा क्लमो भवेत्।**

दी०—इदानीं हीनातियोगत्वेन गण्डूषादीनां दोषमाह—हीनयोगात् कफोत्क्लेश इति । कफाधिकचेतोत्क्लेश उपस्थितवमनोन्मुखता रसाज्ञानारुचिः । तथेति रसानां मधुरादीनां अज्ञानं रसनेन्द्रियविषयहानिरित्यभिप्रायः । अरुचिस्त्रिविधः । अरुचिरन्नाभिनन्दनम् । भक्तद्वेष इति । तद्यथा सत्यां बुभुक्षायामभ्यवहारासामर्थ्यमित्यरुचिः । अनभिलषितमप्यन्नं दीयमानमभ्यवहरतीत्यन्नाभिनन्दनम् । अन्नस्य श्रवणस्मरणदर्शनस्पर्शनैर्यत्रोद्वेजिते स भक्तद्वेष इति । अतियोगादिति । गण्डूषकवलादीनामेव । एके हीनातियोगविषयं शोधनाख्यगण्डूषं मानयन्ति । तथाचोक्तं 'शोधनीये विशेषेण भवत्येतत्तु लक्षणम्' इति ॥ १९ ॥

गू०—गण्डूषादीनां हीनयोगात् हीनमात्राकरणात् कफोत्क्लेशः कफाधिक्यं रसाज्ञानारुची रसानां मधुरादीनां अज्ञानं यथार्थस्वादलाभः तथा अरुचिरसारुचि अन्नारुचिर्वा एते भवतः । अतियोगात् गण्डूषादीनामतिकरणात् मुखे पाकः शोषस्तृष्णाक्लमो ग्लानिः एतद्भवेत् ॥ १९ ॥

**शुद्धगण्डूषलक्षणमाह—**

**व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवम् ॥ २० ॥**
**इन्द्रियाणां प्रसादश्च गण्डूषे शुद्धिलक्षणम् ।**

इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायामुत्तरखण्डे गण्डूषादिविधिर्नाम
दशमोऽध्यायः ॥ १० ॥

---

दी०—अथ सम्यक् शीलितस्य गण्डूषस्य शुद्धिलक्षणं । व्याधेरपचयो विनाशः । तुष्टिः संतोषः । वैशद्यं मुखस्येति । इन्द्रियाणां श्रवणनयनघ्राणरसनादीनां प्रसादः स्वविषयग्रहणसामर्थ्यं । एके अपचयस्थाने अपनयः, गण्डूषस्थाने कवल इति पठन्ति । तत्रापि स एवार्थः ॥ २० ॥

इति श्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायामुत्तरखण्डे
कवलाध्यायः ॥ १० ॥

---

गू०—गण्डूषे सततं शुद्धलक्षणं सम्यक् कृतं गण्डूषलक्षणं यद्वा मुखशुद्धिलक्षणं किं तल्लक्षणमित्याह—व्याधेरपचयो नाशः व्याधेः मुखे कफलिप्तताज्याद्देः तुष्टिसंतोषः वैशद्यं विशदता वक्त्रलाघवं गुरुतानाशः इन्द्रियाणां रसादीनां प्रसादः प्रसन्नता एतल्लक्षणं भवति ॥ २० ॥

इति श्रीकाशीराममिश्रकृतायां शार्ङ्गधरगूढार्थदीपिकायां
चिकित्सास्थाने गण्डूषादिविधि-
रध्यायः ॥ १० ॥

---

## एकादशोऽध्यायः ।

---

अथ कवलादीनां विधिमभिधाय संप्रतिलेपमूर्द्धतैलकर्णपूरणविधिमारभ्यते ।

**तत्र तावत्प्रलेपनामान्याह—**

**आलेपस्य च नामानि लिप्तो लेपश्च लेपनम् ।**
**दोषघ्नो विषहा वर्ण्यो मुखलेपस्त्रिधा मतः ॥ १ ॥**
**त्रिप्रमाणश्चतुर्भागत्रिभागाऽर्धाङ्गुलोन्नतः ।**
**आर्द्रो व्याधिहरः स स्याच्छुष्को दूषयति च्छविम् २**

दी०—त्रिधा मत इत्यनेन एको दोषघ्नः द्वितीयो विषहा कथितः अपरस्तु वर्ण्य इति त्रिधा संज्ञोसिन्मतेऽन्यत्रापि प्रसिद्ध एव । स एव वर्ण्यो मुखलेपः कथितः । ननु चत्वारो भेदाः वक्ष्यमाणत्वात् त्रिप्रमाण इति तेषां दोषघ्नादीनां त्रयाणां त्रय एव परिमाणा यथाऽनुक्रमेण बोद्धव्याः । स कथंभूतः । चतुर्भागत्रिभागार्धाङ्गुलोन्नत इति । एतेन किमुक्तं । दोषघ्नो लेपः अङ्गुलस्य चतुर्भागप्रमाणेनोत्सेधः कुर्यादित्यभिप्रायः । एवं विषहालेपस्तु त्रिभागोत्सेधः कार्यः । त्रिभागताङ्गुलस्येति संबन्धः । वर्ण्यो लेपश्चार्धाङ्गुलोन्नत एव कुर्यात् । अथार्द्रशुष्कयोः फलमाह । आर्द्रो व्याधिहर इत्यादि । स पूर्वोक्तो लेपो यावदार्द्रो भवति तावद्व्याधिहरो ज्ञेयः । यदा शुष्को भवति तदा न विदूषयति । छविः छाया सा च वर्णप्रभोपलक्षिता । 'तथाच वर्णप्रभाश्रिता या च छाया सा परिकीर्तिते'ति । ननु छायाप्रभयोस्तु को भेदः । उच्यते 'वर्णमात्रप्रतिच्छाया प्रभा वर्णप्रकाशिनी । आसन्नात् लक्ष्यते छाया प्रभा दूराच्च लक्ष्यते' इति । न केवलं वर्णप्रभाच्छायानां लक्षणभेदः । संख्याभेदोऽप्यस्तीति ।

तद्यथा चतुर्धा वर्णः गौरः कृष्णः श्यामः गौरश्याम इति। प्रभा च सप्तविधा रक्ता पीता सिता श्यामा हरिता पाण्डुरा सितेति। छायापि पञ्चविधा स्निग्धा विमला रूक्षा मलिना संक्षिप्ता इति ॥ १ ॥ २ ॥

गू०—अथ मूर्धतैलकर्णपूरणविधिः। तत्रादौ लेपः लिप्तो लेपः लेपनं तानि त्रीणि आलेपस्य नामानि भवन्ति। नामकथनं संज्ञार्थं पर्यायकथनार्थं च। स लेपस्त्रिधा त्रिप्रकारः सतः कथितः। एकः दोषघ्नः शोथादिनाशकः। दोषशब्देनापि रोगा उच्यन्ते। द्वितीयो विषहा भल्लातादिविषनाशकः। तृतीयो वर्ण्यः मुखव्यङ्गादिवर्णकरः। एवंभूतो मुखलेपः मुख्यो लेपः त्रिधा। मुखशब्देन मुख्य उच्यते। तथाच विश्वः 'मुखं च वदने मुख्ये आदौ द्वाराभ्युपाययोः' इति। पुनः लेपस्त्रिप्रमाणः त्रीणि प्रमाणानि यस्य सः। तद्विधानमाह—चतुर्भागः अङ्गुलस्य चत्वारो भागा यस्य सः पूर्णाङ्गुल इत्यर्थः। सतु दोषघ्नः। त्रिभागः त्रीणि अङ्गुलानि यस्य सः त्रिभागः सतु विषहा। अर्धाङ्गुलोन्नतः अर्धं अङ्गुलप्रमाणं उन्नत उच्चः, सतु वर्ण्यः वर्णकरः। स आर्द्रः अशुष्कः छविं कान्तिं दूषयति ॥ १ ॥ २ ॥

### दोषघ्नो लेपो यथा—

**पुनर्नवां दारु शुण्ठीं सिद्धार्थं शिग्रुमेव च।**
**पिष्ट्वा चैवारनालेन प्रलेपः सर्वशोथजित् ॥ ३ ॥**

दी०—पूर्वमुक्तं दोषघ्नो विषहा वर्ण्यो लेपस्त्रिधा। तत्र तावद्दोषघ्नो लेपो यथा। सिद्धार्थं सर्षपाः शिग्रुः शोभाञ्जनः आरनालं काञ्जिकभेदः तदभावेऽम्लतक्रं ग्राह्यमिति सर्वत्र। अयं लेपः सर्वशोथजिदित्यनेन वातकफप्रायं शोथं विशेषेण जयतीति प्रचरतीति। शोथोऽत्र दोषजनितः शोफरोगसंभवः। नतु व्रणशोथः तत्राप्यागन्तुजापीति संबन्धात् ॥ ३ ॥

गू०—पुनर्नवा दारु देवदारु शुण्ठी सिद्धार्थ सर्षपः शिग्रुः शोभाञ्जनः आरनालेन काञ्जिकेन। तदभावे गोमूत्रेण वा लेपः कार्यः स लेपः सर्वशोथहृद्भवति सर्वशोथेन च विषशोथः ॥ ३ ॥

### अथ दाहे लेपः

**बिभीतफलमज्जाया लेपो दाहार्तिनाशनः।**

दी०—अथापरः पित्तजदाहनाशनो लेपस्तमाह—अत्रापि आरनालेन पेषणमिति संबन्धो ज्ञेयः ॥

गू०—बिभीतफलं बिभीतकफलं तस्य मज्जालेपः ॥

### अथ दशाङ्गलेपो विसर्पशोथव्रणादौ—

### ( दशाङ्गलेपः )

**शिरीषं मधुयष्टी च तगरं रक्तचन्दनम् ॥ ४ ॥**
**एला मांसी निशायुग्मं कुष्ठं वालकमेव च।**
**इति संचूर्ण्य लेपोऽयं पञ्चमांशघृतप्लुतः ॥ ५ ॥**
**जलेन क्रियते सुज्ञैर्दशाङ्ग इति संज्ञितः।**
**विसर्पान्विषविस्फोटाञ्शोथान्दुष्टव्रणाञ्जयेत् ॥ ६ ॥**

दी०—अथ दशाङ्गलेपसंज्ञकं लेपमप्याह—अत्र शिरीषः शिरीषवृक्षत्वक्। एके पञ्चाङ्गशिरीषमत्र योजयन्ति प्रयोगान्तरदर्शनात्। तथाहि—'शिरीषपञ्चाङ्गतुषोदकेन कल्कीकृतं चैव घृतेन युक्तम्। निहन्ति विस्फोटकमुग्ररूपं सदाहपाकस्रुतिरागयुक्तं' इति। यत्र त्वङ्मूलपुष्पाणि फलान्यङ्गानि पञ्च वेति। निशायुग्ममिति हरिद्राद्वयं। पञ्चमांशघृतप्लुत इति। सकलद्रव्याणां समभागमिलितानां चूर्णं कृत्वा तदनु जलेन संपिष्य पश्चात्पञ्चमांशेन घृतेन संप्लाव्य लेपः कार्यः। पञ्चमांशमत्र द्रव्यपरिमाणात् ॥ ४–६ ॥

गू०—शिरीषं, मांसी जटामांसी, निशायुग्मं हरिद्राद्वयं, वालकं उदीच्यं, चूर्णात्पञ्चमांशं घृतं दशाङ्ग इति दश अङ्गानि औषधानि यस्य सः घृतं तु प्रक्षेपकद्रव्यं तद्भिन्नम् ॥ ४–६ ॥

### विषघ्नो लेपो यथा—

**अजादुग्धतिलैर्लेपो नवनीतेन संयुतः।**
**शोथमारुष्करं हन्ति लेपो वा कृष्णमृत्तिकैः ॥ ७ ॥**

दी०—अथ विषहा लेपमाह—आरुष्करो भल्लातकः तज्जनितः शोथ इति ॥ ७ ॥

गू०—आरुष्करं भल्लातकजनितं। स्पष्टमन्यत् ॥ ७ ॥

### अथ कीटघ्नलेपः—

**लाङ्गल्यतिविषालाबुजालिनीमूलबीजकैः।**
**लेपो धान्याम्बुसंपिष्टः कीटविस्फोटनाशनः ॥ ८ ॥**

दी०—अपरमप्याह—लाङ्गली कलिकारिका। अतिविषा 'अतीस' शब्दवाच्या। अलाबु कटुतुम्बी जा-

लिनी 'तोरई' शब्दवाच्या । मूलकं प्रसिद्धं तस्य बीजानि । एके अलाबुप्रभृतीनां त्रयाणां बीजानि गृह्णन्ति । धान्याम्बुसंपिष्ट इति । धान्याम्बु काञ्जिकभेदः । कीटविस्फोटः सविषकीटदष्टजनितविस्फोट इत्यर्थः । यथा लूतादयः ॥ ८ ॥

गू०—लाङ्गली कलिहारी, अतिविषा प्रसिद्धा अलाबु तुम्बी जालिनी कटुतुम्बीबीजानि मूलकबीजानि धान्याम्बु काञ्जिकम् ॥ ८ ॥

**वर्ण्यो लेपो यथा—**

**रक्तचन्दनमञ्जिष्ठालोध्रकुष्ठप्रियङ्गवः ।**
**वटाङ्कुरा मसूराश्च व्यङ्गघ्ना मुखकान्तिदाः ॥ ९ ॥**
**मातुलुङ्गजटा सर्पिः शिला गोशकृतो रसः ।**
**मुखकान्तिकरो लेपः पिटिकाव्यङ्गकालजित् ॥१०॥**
**लोध्रधान्यवचालेपस्तारुण्यपिटिकापहः ।**
**तद्वद्गोरोचनायुक्तं मरिचं मुखलेपनम् ॥ ११ ॥**
**सिद्धार्थकवचालोध्रसैन्धवैश्च प्रलेपनम् ।**
**व्यङ्गेषु चार्जुनत्वग्वा मञ्जिष्ठा वा समाक्षिका ॥१२॥**
**लेपः सनवनीतो वा श्वेताश्वखुरजा मषी ।**
**अर्कक्षीरहरिद्राभ्यां मर्दयित्वा विलेपनात् ॥ १३ ॥**
**मुखकार्ष्ण्यं शमं याति चिरकालोद्भवं ध्रुवम् ।**
**वटस्य पाण्डुपत्राणि मालती रक्तचन्दनम् ॥ १४ ॥**
**कुष्ठं कालीयकं लोध्रमेभिर्लेपं प्रयोजयेत् ।**
**तारुण्यपिटिकाव्यङ्गनीलिकादिविनाशनम् ॥ १५ ॥**

दी०—अथ विषहा लेपमभिधाय सम्प्रति वर्ण्यलेपमाह—रक्तचन्दनादीनि व्यस्तानि समस्तानि संगृह्य जलेनापिष्य लेपः कार्य इति संबन्धः । अत्र प्रियङ्गुर्लताविशेषः तस्याः फलानि । वटाङ्कुरा इति वटस्याभिनवाः पत्रमुकुलाः । मसूरोऽन्नविशेषः । मातुलुङ्गो बीजपूरकः तस्य जटा मूलं । शिला मनःशिला । गोशकृतो रस इति । गोशकृत् गोपुरीषं तस्य रस इत्यर्थः । धान्यं धानशब्दवाच्यम् । तद्वदतितारुण्यपिडकापहोप्ययं लेपो बोद्धव्यः । गोरोचना प्रसिद्धा सिद्धार्थक इति । अत्रापि तारुण्यपिडकापह इति संबन्धः । तेन सिद्धार्थादिद्रव्यचतुष्कैर्लेपो यौवनपिडकापहो भवतीति मतान्तरात् । अर्जुनो वृक्षविशेषः सच कौहाशब्दवाच्यः तस्य त्वक् छल्ली । मञ्जिष्ठा प्रसिद्धा । समाक्षिका धातुमाक्षिकसंयुक्ता । सचार्जुनत्वक् मञ्जिष्ठा वा । तेन विकल्पत्वात् त्वच एको योगः मञ्जिष्ठाया द्वितीयो योगः । अश्वखुरजनितस्य कज्जलस्य तृतीय इति । एके श्वेता अपराजितेति व्याख्यानयन्ति । एके अर्कक्षीरमिति भिन्नपदं हरिद्राभ्यामिति द्विवचनत्वेन हरिद्रा दारुहरिद्रा योज्येति व्याख्यानयन्ति । एतत्सर्वत्र न प्रचरति तेनार्कक्षीरहरिद्राभ्यामेव योगः साधुः । वटस्य वटवृक्षस्य पाण्डुपत्राणीति । परिणतत्वात्तेषु पाण्डुरत्वं तादृशानीत्यर्थः । मालती जाती तस्याः पत्राणि कालीयकं अगुरुभेदं शीतसारमिति लोके । केचिद्वटश्च पाण्डुपत्राणीति पठन्ति तत्र वट इत्यनेन वटवृक्षस्य पत्राणि पाण्डुः पटोलस्तस्यापि पत्राणीत्यर्थः । एतन्न सर्वमतम् । अप्रसिद्धत्वात् ॥ ९–१५ ॥

गू०—रक्तचन्दनेति सुगमं । व्यङ्गलेपः व्यङ्गच्छाया । अथ तारुण्यपिडकादौ—मातुलुङ्गो बीजपूरमूलं, सर्पिर्घृतं, शिला मनःशिला गोशकृत् गोपुरीषं तद्रसः कालं कालिमा । अथ तारुण्यपिडकादौ—धान्यं प्रसिद्धम् । सिद्धार्थकं सर्षपाः एते त्रयो योगाः पिडकादौ । अथ व्यङ्गे-अर्जुनत्वक् अर्जुनवृक्षत्वक् माक्षिकं मधु श्वेतो योऽश्वः घोटकस्तत् खुरजन्या मषी भस्म मुखश्यामतायां पुनः-मालती जाती कालीयकं दारुहरिद्रा ॥ ९–१५ ॥

**अथारुंषिकायां लेपः—**

**पुराणमथ पिण्याकं पुरीषं कुक्कुटस्य च ।**
**मूत्रपिष्टः प्रलेपोऽयं शीघ्रं हन्यादरुंषिकाम् ॥१६॥**
**खदिरारिष्टजम्बूनां त्वग्भिर्वा मूत्रसंयुतैः ।**
**कुटजत्वक्सैन्धवं च लेपो हन्यादरुंषिकाम् ॥१७॥**

दी०—पिण्याकं तिलकल्कजनितं खलिशब्दवाच्यं । तच्च पुरातनं वर्षोषितं ग्राह्यं । कुक्कुटः ताम्रचूडः तस्य पुरीषं । मूत्रमत्र गव्यम् ॥ १६ ॥ १७ ॥

गू०—पिण्याकं तिलखलः अन्यं च अरिष्टो निम्बः अरुंषिका अपिडकाः ॥ १६ ॥ १७ ॥

**दारुणे लेपः—**

**प्रियालबीजमधुककुष्ठमाषैः ससैन्धवैः ।**
**कार्यो दारुणके मूर्ध्नि प्रलेपो मधुसंयुतः ॥ १८ ॥**
**दुग्धेन खाखसं बीजं प्रलेपाद्दारुणं जयेत् ।**
**आम्रबीजस्य चूर्णं तु शिवाचूर्णसमं द्वयम् ॥ १९ ॥**
**दुग्धपिष्टः प्रलेपोऽयं दारुणं हन्ति दारुणम् ।**

दी०—प्रियालबीजं चिरौञ्जीति प्रसिद्धम् । मधुकं

यष्टीमधु। माषोऽन्नविशेषः। मधुसंयुत इत्यनेन प्रियालबीजादिबोद्धव्यम्। जलेन संपिष्य मनाक् मधुना संस्राव्य लेपः कार्यः। दुग्धमत्र गव्यं। खाखसं बीजमिति दानशब्दवाच्यम्। आम्रबीजस्य चूर्णमिति। आम्रफलमध्यस्थितमज्जाविशेषः। शिवा हरीतकी। दारुणं रोगविशेषं। द्वितीयं दारुणं दुःसाध्यमिति विशेषणम्॥ १८॥ १९॥

**गू०**—प्रियालबीजं चिरौंजीति प्रसिद्धं, मधुकं मधुयष्टी माषोऽन्नविशेषः। खाखसं शिवा हरीतकी दारुणे॥ १८॥ १९॥

## अथेन्द्रलुप्ते—

**रसस्तिक्तपटोलस्य पत्राणां तद्विलेपनात्॥ २०॥**
**इन्द्रलुप्तं शमं याति त्रिभिरेव दिनैर्ध्रुवम्।**
**इन्द्रलुप्तापहो लेपो मधुना बृहतीरसः॥ २१॥**
**गुञ्जामूलं फलं वापि भल्लातकरसोऽपि वा।**
**गोक्षुरस्तिलपुष्पाणि तुल्ये च मधुसर्पिषी॥ २२॥**
**शिरःप्रलेपनं तेन केशसंवर्धनं परम्।**
**हस्तिदन्तमषीं कृत्वा छागीदुग्धं रसाञ्जनम्॥२३॥**
**रोमाण्यनेन जायन्ते लेपात्पाणितलेष्वपि।**
**यष्टीन्दीवरमृद्वीकातैलाज्यक्षीरलेपनैः॥ २४॥**
**इन्द्रलुप्तं शमं याति केशाः स्युः सघना दृढाः।**
**चतुष्पदानां त्वग्रोमनखशृङ्गास्थिभस्मभिः॥ २५॥**
**तैलेन सह लेपोऽयं रोमसंजननः परः।**

**दी०**—तिक्तपटोलः कटुकपटोलः तस्य पत्राणां रस इत्यर्थः। तद्विलेपनादिति। तत्तस्य रसस्य लेपनात्। त्रिभिरेव दिनैरित्यनेनास्य विशिष्टत्वं दर्शितम्। नात्र त्रिदिनैरेव नियतप्रमाणं यतो बहुदिनसेव्योऽयं प्रयोगः। बृहतीरस इति पक्वबृहतीफलजनितरसस्यैको योगः। गुञ्जाया मूलं फलं वा द्वितीयो योगः। अत्राऽपि मधुप्रचारः। भल्लातकफलं तृतीयो योगः। एके भल्लातकरसोपि वेत्यस्य स्थानेऽर्कक्षीरेण संयुतमिति पठन्ति। तेन भेडीदुग्धेन गुञ्जाफलं संघृष्य लेपः कार्य इति संगतः। संप्रदाये तु इन्द्रलुप्तस्थानं प्रच्छयित्वा तदभावे संघृष्य पश्चाल्लेपः कार्य इति साधुः। उक्तमन्यत्रापि—'बृहतीफलरससंपिष्टं गुञ्जाफलमूलमिन्द्रलुप्तस्य। कनकविघृष्टस्य ततो दातव्यं प्रस्थितस्य सदे'ति। गोक्षुरः प्रसिद्धः। तिलपुष्पाणि विख्यातानि। तुल्ये साम्ये गोक्षुरे सतिलपुष्पे इत्यर्थः। मधुसर्पिषी च। तुल्येऽत्र ग्राह्ये। मषीकज्जलविशेषं हस्तिदन्तं दग्ध्वा कज्जलं कार्यम्। रसाञ्जनं द्विविधं एकं कृष्णपाषाणसदृशं द्रव्यविशेषं। अपरं दार्वीक्वाथसमुद्भवम्। तदभावे दारुहरिद्रैव ग्राह्या। अयं लेपः केशवर्धनार्थमित्याहुः। यष्टी मधुयष्टी इन्दीवरं नीलोत्पलं तदभावे पद्मबीजमपि ग्राह्यम्। पद्मबीजं गटाशब्दवाच्यम्। मृद्वीका गोस्तनी द्राक्षा। एके मृद्वीस्थाने मूर्वेति पाठान्तरं पठन्ति व्याख्यानयन्ति च। तैलानि प्रसिद्धानि। आज्यं घृतं क्षीरं गोपयः। तिलाज्यक्षीरस्थाने तिलाजक्षीरलेपनैरिति पाठः। तत्राऽजक्षीरमित्यर्थः। तिलाज्यक्षीरमार्कवैरित्यपि पाठान्तरं संगतम्। तथाप्युक्तं 'मधुकेन्दीवरमूर्वातिलाज्यगोक्षीरभृङ्गलेपेन। अचिराद्भवन्ति केशा घनदृढमूलायता मृदव' इति। चतुष्पदाः गोऽश्वाव्यजेभेणखरोष्ट्रादयः। तेषां त्वक् चर्म रोमनखशृङ्गास्थीनि प्रसिद्धानि। तेन त्वगादीनां दग्ध्वा भस्म कार्यं तैलं तिलसंभवम्॥ २०–२५॥

**गू०**—इन्द्रलुप्तं केशनाशलक्षणम्। तिक्तपटोलं बृहती कण्टकारी भल्लातकरसः पत्ररसः। इन्द्रलुप्ते—मधुसर्पिर्द्वयं तुल्यं तुल्ये औषधतुल्ये केशः संवर्धते हस्तिदन्तं तन्मषी भस्म रसाञ्जनं खर्परमञ्जनं वा। पाणितलेषु हस्ततलेऽपि रोमाणि जायन्ते। इन्द्रलुप्ते-यष्टी मधुयष्टी इन्दीवरं कमलं मृद्वी द्राक्षा तैलं तिलजं आज्यं गोघृतं क्षीरं गव्यं आजं वा। इन्द्रलुप्ते चतुःपादानां त्वक्रोमनखशृङ्गअस्थि एषां भस्मानि तैलेन लेपः रोमसञ्जननः इन्द्रलुप्ते॥ २०–२५॥

## पलिते लेपाः

**इन्द्रवारुणिकाबीजतैलेनाभ्यङ्गमाचरेत्॥ २६॥**
**प्रत्यहं तेन जायन्ते कुन्तला भृङ्गसंनिभाः।**
**अयोरजो भृङ्गराजस्त्रिफला कृष्णमृत्तिका॥ २७॥**
**स्थितमिक्षुरसे मासं लेपनात्पलितं जयेत्।**
**धात्रीफलत्रयं पथ्ये द्वे तथैकं बिभीतकम्॥ २८॥**
**पञ्चाम्रमज्जा लोहस्य कर्षैकं च प्रदीयते।**
**पिष्ट्वा लोहमये भाण्डे स्थापयेदुषितं निशि॥२९॥**
**लेपोऽयं हन्ति नचिरादकालपलितं महत्।**
**त्रिफला नीलिकापत्रं लोहं भृङ्गरजः समम्॥३०॥**
**अविमूत्रेण संपिष्टं लेपात्कृष्णीकरं स्मृतम्।**
**त्रिफला लोहचूर्णं च दाडिमत्वग्विसं तथा॥३१॥**
**प्रत्येकं पञ्चपलिकं चूर्णं कुर्याद्विचक्षणः।**

भृङ्गराजरसस्यापि प्रस्थषट्कं प्रदापयेत् ॥ ३२ ॥
क्षिप्त्वा लोहमये पात्रे भूमिमध्ये निधापयेत् ।
मासमेकं ततः कुर्याच्छागीदुग्धेन लेपनम् ॥ ३३ ॥
कूर्चे शिरसि रात्रौ च संवेष्ट्यैरण्डपत्रकैः ।
स्वपेत्प्रातस्ततः कुर्यात्स्नानं तेन च जायते ॥ ३४ ॥
पलितस्य विनाशश्च त्रिभिर्लेपैर्न संशयः ।

दी०—अयोरजो लोहचूर्णं तदभावे लोहमलमित्येके । इक्षुरसे इक्षुरसपूरिते भाण्डे मासमेकं यावत्स्थितं भवति । अयं कृष्णीकरणत्वात्पलितं जयेदित्यर्थः । केचिदत्र धात्रीफलादीनामपि कर्षाणि ग्राह्याणि । लोहचूर्णकर्षपरिमाणदर्शनात् । तेन धात्रीफलानां कर्षद्वयम् । हरीतकी कर्षद्वयमिता । कर्षैकं विभीतकफलम् । आम्रास्थिमज्जाः पञ्चकर्षा इति नैतत्सर्वसंमतम् । अस्मत्संप्रदाये तु धात्रीफलद्वयमेव ग्राह्यम् । एवं हरीतकीफलद्वयम् । एकं विभीतकफलं आम्रफलानां पञ्चसंख्याकं मज्जा एवं प्रचरति । प्रलेपोऽत्र जलेन । त्रिफला हरीतक्यादिकं । नीलिका नीलिनी विख्याता तस्याः पत्राणि लोहं लोहचूर्णं । भृङ्गो मार्कवः सममिति सकलं सममात्रम् । अजामूत्रेण संपिष्टमित्यस्य स्थाने अविमूत्रेण संपिष्टं इति पाठः । अविः मेडी । दाडिमत्वगित्यनेन दाडिमफलस्य त्वक् वल्कलं ग्राह्यं । बिसमिति मृणालकमलनालमित्यर्थः । प्रत्येकं पञ्चपलिकमित्यनेन त्रिफलायाः पञ्चदशपलानि ग्राह्याणि । भृङ्गराजरसस्य षट्प्रस्थाः । तेषां नव तिलानि रसस्येत्यर्थः । एतत्सिद्धं यदा भवति तदा आजदुग्धेन सह लेपनं देयमिति भावः । शेषं सुबोधम् ॥ २६–३४ ॥

गू०—केशकल्पे लेपः पातालयन्त्रेण तैलेन । काला अतिश्यामाः । केशकल्पे—अयोरजो लोहचूर्णं भृङ्गराजः भृङ्गराजचूर्णं कृष्णमृत्तिका तडागकर्दमः एतन्मासं इक्षुरसे स्थितं लेपात्पलितं केशशौक्ल्यं जयेत् । केशकल्पे-धात्री आमलकी फलत्रयं पथ्ये हरीतक्यौ द्वे एकं बिभीतकं पञ्च आम्राणां मज्जा लोहस्य कर्षं पिष्ट्वा लोहमये भाण्डे स्थापयेत् । उषितं निशि स्थापितमचिरात् शीघ्रमेवाकालपलितं स्वल्पदिनजन्यं केशशौक्ल्यं हन्ति । केशकल्पे—नीलिकापत्रं नीलपत्रं भृङ्गराजो मार्कवः अविः मेडः तन्मूत्रेण । कृष्णीकरं श्यामकरं । केशकल्पे-बिसं कमलमूलं स्पष्टमन्यत् ॥ २६–३४ ॥

## अथ रोमशातने—

शङ्खचूर्णस्य भागौ द्वौ हरितालं च भागिकम् ॥ ३५ ॥
मनःशिला चार्धभागा स्वर्जिका चैकभागिका ।
लेपोऽयं वारिपिष्टस्तु केशानुत्पाट्य दीयते ॥ ३६ ॥
अनया लेपयुक्त्या च सप्तवेलं प्रयुक्तया ।
निर्मूलं केशस्थानं स्यात्क्षपणस्य शिरो यथा ॥ ३७ ॥
तालकं शाणयुग्मं स्यात्षट्शाणं शङ्खचूर्णकम् ।
द्विशाणिकं पलाशस्य क्षारं दत्त्वा प्रमर्दयेत् ॥ ३८ ॥
कदलीदण्डतोयेन रविपत्ररसेन वा ।
अस्यापि सप्तभिर्लेपै रोम्णां शातनमुत्तमम् ॥ ३९ ॥

दी०—अथ रोमशातनमाह—शङ्खचूर्णमत्र भर्जितं देयमिति संप्रदायः । हरितालस्यैको भागः मनःशिला चार्धभागेति । तेन एकभागापेक्षयार्धभागा । एके स्वर्जिका चैकभागिका इति वा पाठः । शेषं सुगमं । तालकं हरितालं शाणद्वयं ग्राह्यं । कदलीकन्दतोयेन वेति पाठः साधुः । रविपत्ररसेन अर्कपत्रस्वरसेन वा । अयमपि शङ्खचूर्णं प्रचरति । अन्यतो दर्शनात् । तथाहि—'पलाशभस्माक्षिततलस्य चूर्णं रंभाम्बुमिश्रैरुपलिप्य भूयः । कन्दर्पगेहे मृगलोचनानां रोमाणि रोहन्ति कदापि नैव' । अस्यापि सप्तनिर्लेपादित्यनेन पूर्ववत्कार्यः ॥ ३५–३९ ॥

गू०—शङ्खचूर्णस्येति सुगमम् । अन्यच्च—रविरर्कः शाणयुग्मं टङ्कद्वयं तालकं हरितालं पलाशस्य क्षारं पलाशभस्म ॥ ३५–३९ ॥

## श्वित्रे लेपाः ।

सुवर्णपुष्पी कासीसं विडङ्गानि मनःशिला ।
रोचना सैन्धवं चैव लेपनाच्छ्वित्रनाशनम् ॥ ४० ॥
वायस्येडगजाकुष्ठकृष्णाभिर्गुटिका कृता ।
बस्तमूत्रेण संपिष्टा प्रलेपाच्छ्वित्रनाशिनी ॥ ४१ ॥
तालकं शाणमात्रं स्याच्चतुःशाणा च बाकुची ।
गोमूत्रपिष्टं तच्चूर्णं लेपनाच्छ्वित्रनाशनम् ॥ ४२ ॥
बाकुची वेतसो लाक्षा काकोदुम्बरिका कणा ।
रसाञ्जनमयश्चूर्णं तिलाः कृष्णास्तदेकतः ॥ ४३ ॥
चूर्णयित्वा गवां पित्तैः पिष्ट्वा च गुटिका कृता ।
अस्याः प्रलेपाच्छ्वित्राणि प्रणश्यन्त्यतिवेगतः ॥ ४४ ॥

दी०—अथ श्वित्रनाशनायाह—सुवर्णपुष्पी सोनीशब्दवाच्यो विटपविशेषः तदभावे बृहद्बला ग्राह्या

अपरे च स्थूलकं गृह्णन्ति । शीशं सीसकं । सीसकस्थाने कासीसमिति पाठः साधुः । रोचना गोरोचना प्रसिद्धा । लेपोऽत्र जलेन । वायसी काकमाची । एडगजः प्रपुन्नाटः तस्य बीजानि । कृष्णा पिप्पली । वत्स इति गोवत्सः । अथवा छागः इति पाठः । तालको हरितालः । बाकुची सोमराजी तस्याः फलानि प्रसिद्धानि शेषं सुगमम् । बाकुची प्रसिद्धा वेतसो निचुलः जलवेतस इति लोके वृक्षविशेषः । लाक्षा लक्तकजननी काकोन्दुम्बरिका कटुम्बरिशब्दवाच्या । कणा पिप्पली । रसाञ्जनं प्रसिद्धम् । तदभावे दारुहरिद्रा ग्राह्या तत्संभवत्वात् । अयश्चूर्णं लोहचूर्णं । कृष्णाखिल्य इति । श्वेततिलनिषेधार्थम् । गवां पित्तैरिति । गोयकृदेकखण्डैकदेशलग्नं द्रवरूपं पित्तमिति वाच्यम् । तदभावे गोमूत्रेण प्रचारः इति सर्वत्र ॥ ४०–४४ ॥

**गू०**—अथ श्वित्रे अन्यच्च-वाकुची वावची काकोदुम्बरिका कणा पिप्पली रसाञ्जनं प्रसिद्धम् । अयश्चूर्णं लोहचूर्णं गोपित्ताऽभावे गोमूत्रं देयं श्वित्रे लेपः ॥ ४०–४४ ॥

## अथ सिध्मे लेपः—

**धात्री सर्जरसश्चैव यवक्षारश्च चूर्णितः ।**
**सौवीरेण प्रलेपोयं प्रयोज्यः सिध्मनाशने ॥ ४५ ॥**
**दार्वी मूलकबीजानि तालकं सुरदारु च ।**
**ताम्बूलपत्रं सर्वाणि कार्षिकाणि पृथक्पृथक् ॥४६॥**
**शङ्खचूर्णं शाणमात्रं सर्वाण्येकत्र कारयेत् ।**
**लेपोऽयं वारिणा पिष्टः सिध्मानां नाशनः परः ॥४७॥**

**दी०**—अथ सिध्मरोगे । धात्री आमलकीफलं । सर्जरसः रालः सौवीरकं काञ्जिकभेदः । तच्च गोधूमजनितमित्येके । तथाच 'सौवीरकं सुवीराम्लं ज्ञेयं गोधूमसंभवमिति' । धात्रीरसः सर्जरसः इति पाठान्तरम् । तत्र रसो रसाञ्जनमिति व्याख्यानयन्ति केचित् नैतादृशः किंतु पूर्वेण प्रचारः संगत एव । दार्वी दारुहरिद्रा । मूलकं प्रसिद्धं तद्बीजानीति । तालको हरितालः । सुरदारुः देवदारुः । शेषं सुबोधम् ॥ ॥ ४५–४७ ॥

**गू०**—आमलकी सर्जरसो रालः सौवीरेण काञ्जिकेन लेपः सिध्मः श्वेतरोगः । अन्यच्च दार्वी दारुहरिद्रा मूलकं प्रसिद्धं तद्बीजानि तालकं हरितालं सुरदारु देवदारु स्पष्टमन्यत् । सिध्मेषु लेपः ॥४५–४७॥

## अथ नेत्ररोगे लेपः—

**हरीतकी सैन्धवं च गैरिकं च रसाञ्जनम् ।**
**बिडालको जले पिष्टः सर्वनेत्रामयापहः ॥ ४८ ॥**
**रसाञ्जनं व्योषयुतं संपिष्टं वटकीकृतम् ।**
**कण्डूपाकान्वितां हन्ति लेपादञ्जननामिकाम्॥४९॥**

**दी०**—अथ नेत्ररोगे रसाञ्जनं कृष्णपाषाणसदृशं द्रव्यविशेषं । तदभावे दार्वीकाथसमुद्भवं ग्राह्यम् । तदुभयोरलाभे च दारुहरिद्रा ग्राह्येति सर्वत्र प्रचारः । बिडालक इति बहिर्लेपसंज्ञः । तेनाक्ष्णोरुपरि लेपः कार्य इति तात्पर्यार्थः । अयं लेपोऽभिष्यन्दादिरोगे प्रायशः प्रचरति । रसाञ्जनं प्रसिद्धं तच्च द्विविधं पूर्वं व्याख्यातम् । व्योषं त्रिकटुकं तत्र शुण्ठीमरिचपिप्पलीसंज्ञं पेषणमत्र जलेनानुक्तत्वात् ॥ ४८ ॥ ४९ ॥

**गू०**—रसाञ्जनं खर्परं दार्वीकाथसमुद्भवं वा । बिडालको बहिर्लेपः द्रव्यमग्रे वक्ष्यति अन्यच्च रसाञ्जनं प्रसिद्धम् व्योषं त्रिकटुसंपिष्टं वटकीकृतं एतत् लेपादञ्जननामिकां कण्डूपाकान्वितां हन्ति । अञ्जननामिका नेत्ररोगे पठिता ॥ ४८ ॥ ४९ ॥

## अथ कण्ड्वादौ लेपः ।

**प्रपुन्नाटस्य बीजानि बाकुची सर्षपास्तिलाः ।**
**कुष्ठं निशाद्वयं मुस्तं पिष्ट्वा तक्रेण चैकतः ॥ ५० ॥**
**प्रलेपादस्य नश्यन्ति दद्रूकण्डूविचर्चिकाः ।**
**हेमक्षीरी विडङ्गानि दरदं गन्धकस्तथा ॥ ५१ ॥**
**दद्रुघ्नः कुष्ठसिन्दूरे सर्वाण्येकत्र मर्दयेत् ।**
**धत्तूरनिम्बताम्बूलीपत्राणां स्वरसैः पृथक् ॥ ५२ ॥**
**अस्य प्रलेपमात्रेण पामादद्रूविचर्चिकाः ।**
**कण्डूश्च रसकश्चैव प्रशमं यान्ति वेगतः ॥ ५३ ॥**
**दूर्वाऽभया सैन्धवं च चक्रमर्दः कुठेरकः ।**
**एभिस्तक्रयुतो लेपः कण्डूदद्रूविनाशनः ॥ ५४ ॥**
**दूर्वानिशायुतो लेपः कण्डूपामाविनाशनः ।**
**कृमिदद्रूहरश्चैव शीतपित्तापहः स्मृतः ॥ ५५ ॥**
**सिद्धार्थरजनीकुष्ठप्रपुन्नाटतिलैः सह ।**
**कटुतैलेन संमिश्रं दद्रुघ्नं च प्रलेपनम् ॥ ५६ ॥**

**दी०**—अथ कण्डूदद्रुप्रभृतीनां च योगमाह— प्रपुन्नाटः चक्रमर्दकः, तस्य बीजान्यत्र देयानि । बा-

कुची सोमराजी प्रसिद्धा तस्या अपि बीजानि । निशाद्वयं हरिद्राद्वयम् । शेषं सुबोधम् । चक्रमर्दः प्रसिद्धः, लोके पमाडशब्दवाच्यः । अभया हरीतकी । कुठेरको ग्रन्थिपर्णो निजनाम्ना प्रसिद्धः । स च द्विधा एकः क्षुद्रपर्णः, अपरो वटपत्र इति । निशा हरिद्रा । अत्रापि तक्रपिष्टो बोद्धव्यः । सिद्धार्थः सर्षपः । रजनी हरिद्रा । प्रपुन्नाट एडगजः प्रसिद्धः । एतत्सकलं जलेनापिष्य पश्चात् कटुतैलेन संप्लाव्योद्वर्तनं कार्यमिति भावः । एके सिद्धार्थरजनीकल्कैरिति पठन्ति व्याख्यानयन्ति च ॥ ५०–५६ ॥

गू०—प्रपुन्नाटः प्रसिद्धः, तद्बीजानि; बाकुची सोमराजी । सिद्धार्थाः सर्षपाः, निशाद्वयं हरिद्रा दारुहरिद्रा च, मुस्तं भद्रमुस्तं तक्रेण एकतः पिष्ट्वा लेपः कार्यः । विचर्चिका कुष्ठरोगविशेषः । अथ पामादौ लेपः हेमक्षीरी स्वर्णक्षीरी, विडङ्गं, दरदं हिङ्गुलं, दद्रुघ्नः प्रपुन्नाटः । एतत्समं धत्तूरादीनां रसेन संमर्द्य लेपः । रकसोऽपि क्षुद्रकुष्ठभेदः । अन्यच्च–दूर्वा, अभया हरीतकी, चक्रमर्दः दद्रुघ्नः, कुठेरकः उदुम्बरः, रामतुलसीत्यन्ये । स्पष्टमन्यत् । कण्ड्वादौ–निशायुग्मं हरिद्राद्वयम् । कण्डूशीतपित्तादौ सुगमम् । इति कण्ड्वादौ लेपः ॥५०–५६॥

### अथ वातविसर्पादौ लेपाः—

**रास्ना नीलोत्पलं दारु चन्दनं मधुकं बला ।**
**घृतक्षीरयुतो लेपो वातवीसर्पनाशनः ॥ ५७ ॥**
**मृणालं चन्दनं लोध्रमुशीरं कमलोत्पलम् ।**
**सारिवामलकी पथ्या लेपः पित्तविसर्पनुत् ॥५८॥**
**त्रिफला पद्मकोशीरं समङ्गा करवीरकम् ।**
**नलमूलमनन्ता च लेपः श्लेष्मविसर्पहा ॥ ५९ ॥**

दी०—अथ विसर्परोगे । रास्ना सुरभी, नीलोत्पलं नीलकमलम्, दारु देवदारु, चन्दनं रक्तचन्दनम्, मधुकं यष्टी, मधुकं, बला प्रसिद्धा, लोके शीसमशब्दवाच्या । बालस्थाने वचा इति पाठान्तरं न मनोहरम् । अप्रसिद्धत्वात् । घृतक्षीरेऽत्र गोसंभवे ग्राह्ये । मृणालं कमलनालम् । चन्दनमत्र रक्तम् । उशीरं गन्धमूलं तृणविशेषः । कमलं रक्तकमलं उत्पलं नीलोत्पलं । केचिदुत्पलमिति कुष्ठं व्याख्यानयन्ति । सारिवा आस्फोता सा च गोपवल्लीति प्रसिद्धा । आमलकी धात्रीफलं । पथ्या हरीतकी । अत्राऽपि क्षीरेण प्रचारः । अनुक्तत्वाज्जलेनेति सर्वत्र । त्रिफला हरीतकीप्रभृतिकं फलत्रयम् । पद्मकं काष्ठविशेषः । पद्माख इति लोके । उशीरं प्रसिद्धं । समङ्गा लज्जालुका मञ्जिष्ठा वा, करवीरको हयमारकः । एके करवीरजमिति पठन्ति । तत्र करवीरस्य मूलं ग्राह्यम् । अनन्ता यवासकः । शेषं सुगमम् ॥ ५७–५९ ॥

गू०—दारु देवदारु, मधुकं यष्टीमधु, बला प्रसिद्धा वातविसर्पे । मृणालं बिसं कमलं श्वेतं, उत्पलं रक्तकमलं, सारिवा अनन्ता पित्तविसर्पे । पद्मकं काष्ठविशेषः । समङ्गा मञ्जिष्ठा करवीरकं हयमारः नलमूलं, अनन्ता यवासा ॥ ५७–५९ ॥

### वातरक्ते पित्तरक्ते च योगः—

**मांसी सर्जरसो लोध्रं मधुकं सहरेणुकम् ।**
**मूर्वा नीलोत्पलं पद्मं शिरीषकुसुमैः सह ॥ ६० ॥**
**प्रलेपः पित्तवातास्रे शतधौतघृतप्लुतः ।**
**आमलं घृतभृष्टं तु पिष्टं काञ्जिकवारिभिः ॥ ६१ ॥**
**जयेन्मूर्ध्नि प्रलेपेन रक्तं नासिकया स्रुतम् ।**

दी०—अथ वातरक्ते पित्तरक्ते च लेपानाह—मांसी जटाख्या, सर्जरसो रालशब्दवाच्यः । मधुकं यष्टीमधु । हरेणु द्रव्यविशेषं हरेणुका इति वाच्यम् । तदभावे निर्गुण्डीबीजमिति सर्वत्र । पूर्वे चोरस्नायु मोरहरीति लोके । पद्ममित्यत्र रक्तकमलम् । शतधौतघृतप्लुत इति । शतवारं यावत् जलेन प्रक्षालितं घृतं शतधौतसंज्ञम् । आमलं घृतभृष्टं पिष्टं काञ्जिकवारिभिरिति काञ्जिकतोयैः । एके आमलकं घृतसंसृष्टमिति पठन्ति । तत्र पूर्वं घृतेन आमलकं मनाक् भर्जयित्वा पश्चात् काञ्जिकेन सह संपेष्य लेपः कार्यः । काञ्जिकाऽभावे शीतलजलमिति सर्वत्र । अथ शिरोरोगे–कुष्ठं काञ्जिकेन सह संपेष्य लेपः कार्यः काञ्जिकाभावे शीतलजलमिति सर्वत्र ॥ ६० ॥ ६१ ॥

गू०—मांसी जटामांसी, सर्जरसं रालः, मधुकं मधुयष्टी, सहरेणुः रेणुका, मूर्वा प्रसिद्धा, नीलोत्पलं नीलकमलं, पद्मं पद्मकाष्ठं, शिरीषपुष्पाणि । पित्तरक्ते वातरक्ते च लेपः आमलकं काञ्जिकाऽभावे तक्रम् ॥६०॥६१॥

### शिरोरोगे योगाः ।

**कुष्ठमेरण्डतैलेन लेपात्काञ्जिकपेषितम् ॥ ६२ ॥**
**शिरोऽर्तिं वातजां हन्यात्पुष्पं वा मुचुकुन्दजम् ।**
**देवदारु नतं कुष्ठं नलदं विश्वभेषजम् ॥ ६३ ॥**

**सकाञ्जिकः स्नेहयुक्तो लेपो वातशिरोऽर्तिनुत् ।**
**चन्दनोशीरयष्ट्याह्वबलाव्याघ्रनखोत्पलैः ॥ ६४ ॥**
**क्षीरपिष्टैः प्रलेपः स्याद्रक्तपित्तशिरोऽर्तिजित् ।**
**धात्रीकसेरुह्रीबेरपद्मपद्मकचन्दनैः ॥ ६५ ॥**
**दूर्वोशीरनलानां च मूलैः कुर्यात्प्रलेपनम् ।**
**शिरोऽर्तिं पित्तजां हन्याद्रक्तपित्तरुजं तथा ॥ ६६ ॥**
**हरेणुनतशैलेयमुस्तैलागरुदारुभिः ।**
**मांसीरास्नारुबूकैश्च कोष्णो लेपः कफार्तिनुत् ॥६७॥**
**शुण्ठीकुष्ठप्रपुन्नाटदेवकाष्ठैः सरोहिषैः ।**
**सुखोष्णैर्मूत्रपिष्टैश्च लेपः श्लेष्मशिरोऽर्तिनुत् ॥६८॥**
**सारिवाकुष्ठमधुकवचाकृष्णोत्पलैस्तथा ।**
**लेपः सकाञ्जिकस्नेहः सूर्यावर्तार्धभेदयोः ॥ ६९ ॥**
**वरी नीलोत्पलं दूर्वा तिलाः कृष्णाः पुनर्नवा ।**
**शङ्खकेऽनन्तवाते च लेपः सर्वशिरोऽर्तिजित्॥७०॥**

**दी०**—अथ शिरोरोगे । कुष्ठं तु काञ्जिकेन सह कल्कीकृत्य एरण्डतैलेनाप्लाव्य लेपः कार्यः । एरण्डतैलेनेत्यस्य स्थाने एरण्डमूलेनेति पाठान्तरं समीचीनम्। विकल्पेन मुचुकुन्दजं पुष्पं अनेनैव विधानेन तत्कार्यकरं भवति । मुचुकुन्दः कुन्दभेदः प्रसिद्ध एव। तौ तु शुक्ररक्तपुष्पभेदेन ज्ञातव्यौ । नतमत्र तगरं। नलदं मांसी । उशीरमिति केचित् । विश्वभेषजं शुण्ठी पूर्वं काञ्जिकेन सह संपिष्य पश्चात् स्नेहेनाप्लाव्य देयः। स्नेहोऽत्राप्येरण्डसंभवो ज्ञेयः। तदसंभवे तिलतैलमिति। चन्दनं रक्तचन्दनम् । व्याघ्रनखं नखभेदः । शुक्तिकाकारं सुगन्धद्रव्यविशेषः । उत्पलं कमलविशेषः । क्षीरमत्र गव्यं आजं वा । धात्री आमलकीफलं कसेरुः प्रसिद्धः । ह्रीबेरं वालकं पद्मकं । चन्दनं रक्तम् । मूर्वोशीरनालानां त्रयाणां मूलानि । तत्र मूर्वा चोरस्नायुः । उशीरं गन्धमूलं तृणभेदः । नलं प्रथितं । तच्च सुषिर······काण्डशराकारम् । अत्र पेषणार्थं क्षीरमित्याहुरेके । संप्रदायतस्तु अनुक्तत्वाज्जलमिति । हरेणुः रेणुकाशब्दवाच्या । नतं तगरं, शैलेयं शिलापुष्पं छल इति लोके, अगरु प्रसिद्धं, मांसीजटेति सुगन्धद्रव्यम् । रास्ना सुरभी, रुबूकं एरण्डः तस्याऽत्र स्नेहो ग्राह्यः । कफार्तिनुदित्यनेन कफजनितशिरोरोगपीडां नाशयेदित्यर्थः । प्रपुन्नाटश्चक्रमर्दः देवकाष्ठं सुरकाष्ठं सुरदारु रोहिषं गन्धतृणं विख्यातं, मूत्रमत्र गव्यम् । शेषं सुबोधम् । सारिवा गोपवल्लीसंज्ञा आस्फोता इति लोके। मधुकं यष्टीमधु। कृष्णोत्पलं नीलकमलं । तदभावे कमलबीजमिति। एके कृष्णोत्पलशब्देन रीठा(अरिष्टकफलं) शब्दद्रव्यविशेषं व्याख्यानयन्ति । तन्न सर्वमतम् । लेपः सकाञ्जिकः स्नेह इति । काञ्जिकस्नेहाभ्यां सह लेपः कार्य इत्यभिप्रायः । स्नेहग्रहणेनात्र सर्पिःस्नेहं वा यथादोषापेक्षया देयम् । उक्तं चान्यत्र 'वरी नीलोत्पलं मूर्वा तिलाः कृष्णाः पुनर्नवा' । वर्षाभूः प्रसिद्ध एव । शङ्खकमनन्तवातं च शिरोरोगे पठितम् ॥ ६२–७० ॥

**गू०**—अथ वातशिरोव्यथायां लेपः—कुष्ठेति स्पष्टम् । नतं तगरं, कुष्ठं, नलदं उशीरं, विश्वभेषजं शुण्ठी, स्नेहः एरण्डतैलः पूर्वोक्तत्वात् । वातशिरोरोगे नखं नखद्रव्यविशेषः, उत्पलं कमलं, क्षीरं गव्यम् । पित्तशिरोरोगे धात्री आमलकी, कसेरु, ह्रीबेरं वालकं, पद्मं कमलं, पद्मं पद्मककाष्ठविशेषं, चन्दनं श्वेतं, दूर्वा, उशीरं प्रसिद्धं नलमूलम् । पित्तशिरोरोगे तथा रक्तपित्ते लेपः—हरेणुः रेणुका, नतं तगरं, शैलेयं, मुस्तं भद्रमुस्तं, एला, अगरु, देवदारु, मांसी, रास्ना, रुबूक एरण्डः । कफशिरोरुजि प्रपुन्नाटः चक्रमर्दः, देवकाष्ठं देवदारु, रोहिषं तृणविशेषः। अथ सूर्यावर्तार्धभेदे श्लेष्मशिरोरोगे । लेपः । सारिवा अनन्तमूलं, मधुकं यष्टीमधु, कृष्णा पिप्पली, उत्पलं कमलं, स्नेहः एरण्डादितैलं । अथ शङ्खके अनन्तवातादौ तथा सर्वरोगेषु च लेपः कथ्यते। वरी शतावरी । वरा इति पाठे त्रिफला, कृष्णा पिप्पली ॥ ६२–७० ॥

### अथान्यो लेपविधिः कथ्यते—

**अथ लेपविधिश्चान्यः प्रोच्यते सुज्ञसंमतः[1] ।**
**द्वौ तस्य कथितौ भेदौ प्रलेपाख्यप्रदेहकौ ॥ ७१ ॥**
**चर्माद्रं माहिषं यद्वत्प्रोन्नतं सा मितिस्तयोः ।**
**शीतस्तनुर्विशोषी च प्रलेपः परिकीर्तितः ॥ ७२ ॥**
**आर्द्रो घनस्तथोष्णः स्यात्प्रदेहः श्लेष्मवातहा ।**
**रोमाभिमुखमादेयौ प्रलेपाख्यप्रदेहकौ ॥ ७३ ॥**
**वीर्यं सम्यग्विशत्याशु रोमकूपैः शिरामुखैः ।**
**न रात्रौ लेपनं कुर्याच्छुष्यमाणं न धारयेत् ॥७४॥**
**शुष्यमाणमुपेक्षेत प्रदेहं पीडनं प्रति ।**
**(तमसा पिहितो ह्यूष्मा रोमकूपमुखे स्थितः ॥७५॥**
**विना लेपेन निर्याति रात्रौ नो लेपयेदतः ।)**

१–दीपिकासम्मतः ।

**रात्रावपि प्रलेपादिविधिः कार्यो विचक्षणैः ॥ ७६ ॥**
**अपक्वशोथे गम्भीरे रक्तश्लेष्मसमुद्भवे ।**

**दी०**—अथान्यो लेपविधिस्तमपि दर्शयन्नाह—अथान्यो लेपविधिरिति । व्रणशोषप्रकरणे प्राचुर्यमस्य । तस्य लेपविधेः द्वौ भेदाविति । प्रलेपप्रदेहाख्याविस्यर्थः । अथ तयोर्लक्षणान्याह । एके विशोषीत्यस्य स्थाने निर्विशोषीति पठन्ति । निर्विशोषी अविशोषी अपीडयतो व्रणशोथः । विशोषी पीडयितव्यः । यतोऽन्येत्वाचार्याः शीतस्तनुरित्यादिलक्षणं प्रदेहस्येति वदन्ति । तत्र तनुरिति पत्तलः घनो निबिडः सघन इत्यर्थः । एष उष्णः शीतो वेति विषयः । तत्र वातबहुले कफबहुले वोष्णः पित्तरक्तबहुले शीतः, उष्णादिलक्षणं प्रलेपस्येति केचिन्मन्यन्ते । यतः प्रलेपप्रदेहयोरनन्तरं भेदः । अथ तनुत्वं घनभावं चपलस्य गुणः । तत्र कियत्प्रमाणोत्सेधं तस्मादद्वयमाह—तयोरित्यत्र प्रलेपप्रदेहयोः । क्वचिदपि प्रायेण प्रदेहस्तु महिषार्द्रचर्मोच्छ्रायापेक्षया स्थूल इति मन्यन्ते घनाभिधानात् । तनुत्वं देहगुणं मन्यन्ते तेषां मते किंचिन्न्यूनं प्रदेहः प्रलेपस्यैतत्प्रतिव्यवहारः । इदानीं तत्प्रतिलोमाभिलिम्पत्वेन फलमाह—तौ तु रोमाभिमुखं यथावसादौ लिम्पेदित्यभिप्रायः । यतस्तेन सम्यगौषधमवतिष्ठते । अतएवात्र प्रविशति च वीर्यमौषधस्येत्यर्थः । कैः कृत्वेत्याह । रोमकूपैरिति स्वेदवाहिभिः शिरामुखैः । एतेन रोमकूपान्तर्गतं प्रलेपयेदिति तात्पर्यार्थः । अथ लेपविशेषमाह । ननु रात्रौ लेपनं कुर्यादित्यनेन शैत्यमपि हितोष्मणस्तन्निर्गमाद्विकारप्रवृत्तिरिति । तथाप्युक्तं 'तमसा पिहितो ह्यूष्मा रोमकूपमुखे स्थितः । विना लेपेन निर्याति रात्रौ नालेपयेदतः' इति । लेपनमित्यनेनात्र प्रलेपस्य विधिः सूच्यते । ननु प्रदेहस्यायतो वा श्लैष्मिकपाकशोथे तु रात्रौ प्रदेह उपयोक्तव्यः । तथा विदह्यमाने शोथे प्रदेह एव क्षते तु कल्कोपि रात्रौ दातव्य इति । यथा पित्तजे शोथे वातपित्तजे च शतधौतघृताभ्यञ्जनादि दातव्यमिति । तथाहि । 'रात्रावपि प्रलेपादिविधिः कार्यो विचक्षणैः । अपाकिशोथे गंभीरे रक्तश्लेष्मसमुद्भव' इति । शुष्यमाणं न धारयेदिति । शुष्यमाणं लेपमिति शेषः । यतः शुष्को ह्यनर्थको रुक् ज्वरश्च भवति । प्रदेहं तु पीडनं प्रतिशुष्यमाणं यावदुपेक्षेत । पीडनं व्रणविशेषपीडनद्रव्यैर्मिश्रकाध्यायोक्तैर्यो व्रणः पीडनीयस्तं प्रतीत्यर्थः । तस्मादन्यच्छुष्यमाणं नोपेक्षेतेत्यर्थः । अस्याग्रे केचिदिति पठन्ति 'नच पर्युषितं दद्याद्दत्तं च पतितं तथा । न चापि मुखमालिम्पेत्तेन दोषः प्रसिच्यते' इति बहुपुस्तकेष्वदृष्टत्वादस्माभिरपि न लिखितः, नत्वसंगतोऽयं श्लोकः । ग्रन्थान्तरेष्वपि लिखितः ॥ ७१-७६ ॥

**गू०**—अथानन्तरं सुश्रुसंमतः अन्योऽपि लेपविधिः प्रोच्यते तस्य लेपविधेर्द्वौ भेदौ एकः प्रलेपकाख्यः । अपरः प्रदेहकः । प्रलेपप्रदेहयोः उन्नतत्वे प्रमाणमाह—यद्वदार्द्रं माहिषं चर्म प्रोन्नतं तावत्परिमाणं तयोः साम्यमिति मर्यादा । आलेपप्रदेहयोर्गुणानाह—शीतः शीतलः शीतवीर्यो वा, तनुः सूक्ष्मः स्रोतःप्रवेशी विशोषी विशेषेण शीतलः एवंभूतः प्रलेपः परिकीर्तितः कथितः । आर्द्रैः पुनः उष्णवीर्यैः उष्णानि तापिते वा एवंभूतः प्रदेहः श्लेष्मवातहा भवति । प्रलेपप्रदेहौ कुत्र दीयेते इत्याह—प्रलेपाख्यप्रदेहकौ एतौ द्वौ अभिमुखं रोमसन्मुखं आदेयौ यतः शिरामुखैः रोमकूपैः वीर्यं सम्यग्विशति । लेपधारणे निषिद्धमाह-रात्रौ लेपनं न कुर्यात् शुष्यमाणं च न धारयेत् । शुष्यमाणमुपेक्षेत प्रदेहं पीडनं प्रति भवति प्रदेहः प्रकृष्टं देहे पीडयति । रात्रिप्रतिषेधे हेतुमाह—तमसा अन्धकारेणापिहितः ऊष्मा रोमकूपे मुखे स्थितो भवति पुनः विना लेपनेनैव बहिर्निर्याति तस्माद्रात्रौ न लेपयेत् न लेपं कुर्यात् । येषां रात्रौ लेपः क्रियते तानाह—अपाकिशोथे तथा गम्भीरे गम्भीरव्रणे तथा रक्तश्लेष्मसमुद्भवे शोथे रात्रावपि प्रलेपादिविधिः कार्यः । निषेधो नास्ति ॥ ७१-७६ ॥

### इदानीं व्रणविषयक्रममाह—

**आदौ शोथहरो लेपो द्वितीयो रक्तसेचनः ॥ ७७ ॥**
**तृतीयश्चोपनाहः स्याच्चतुर्थः पाटनक्रमः ।**
**पञ्चमः शोधनो भूयात्षष्ठो रोपण इष्यते ॥ ७८ ॥**
**सप्तमो वर्णकरणो व्रणस्यैते क्रमान्मताः ।**

**दी०**—आदौ शोथहरो लेप इत्यस्य स्थाने आदौ विम्लापनं कुर्यादिति पठन्ति विम्लापनमित्यङ्गुल्यादिमर्दनेन शोथविलयनं परमार्थतस्तु नैतत्पाठान्तरम् । किंतु द्वयोरेवैकोऽभिप्रायः । यतः विम्लापनशब्दो बहिः-

प्रमार्जने शोफविलपनकरलेपपरिषेकाभ्यङ्गस्वेदादौ वर्तते । तेनादौ शोथहरो लेप इत्यत्र साधुः द्वितीयमवसेचनमिति । विम्लापनानन्तरं जलौकादिभी रक्तविश्रापणम् । विम्लापनं विनापि रक्तमोक्षणं प्रचरति । अपरे त्विति वदन्ति । अवसेचनशब्दोऽत्र वमनविरेचनशोणितविश्रावणाद्यन्तर्बहिःप्रमार्जने वर्तते । ननु केवल एव रक्तविश्रावणे । उपनाहो निबन्धपाचनोपनाहमपि पाचने वर्तते । चतुर्थः पाटनकम इति । पाटनं शस्त्रादिना । पाटनस्थाने पाचनमिति केचित् । शोधनमवरोपणं व्रणस्येत्यर्थः । सप्तमो वर्णकरण इति । सवर्णकरणं मांसजननं वेत्यभिप्रायः । अतएव तन्त्रान्तरे सप्तमं वैकृतापहमिति वचनात् ॥ ७७ ॥ ७८ ॥

**गू०**—व्रणे शोथहरादयः सप्तोपमास्तानाह—एते शोथहरादयः सप्त लेपाः व्रणे शरीरव्रणे क्रमादेते कथिताः ॥ ७७ ॥ ७८ ॥

**इदानीं स यथेत्यनेन व्रणस्य सप्तविषयक्रमाणां प्रत्येकं योगानाह—**

**बीजपूरजटा हिंस्रा देवदारु महौषधम् ॥ ७९ ॥**
**रास्नाग्निमन्थो लेपोऽयं वातशोथविनाशनः ।**
**मधुकं चन्दनं मूर्वा नलमूलं च पद्मकम् ॥ ८० ॥**
**उशीरं वालकं पद्मं पित्तशोथे प्रलेपनम् ।**
**कृष्णा पुराणपिण्याकं शिग्रुत्वक्सिकता शिवा ८१**
**मूत्रपिष्टः सुखोष्णोऽयं प्रदेहः श्लेष्मशोथहा ।**
**द्वे निशे चन्दने द्वे च शिवा दूर्वा पुनर्नवा ॥ ८२ ॥**
**उशीरं पद्मकं लोध्रं गैरिकं च रसाञ्जनम् ।**
**आगन्तुजे रक्तजे च शोथे कुर्यात्प्रलेपनम् ८३**
**शणमूलकशिग्रूणां फलानि तिलसर्षपाः ।**
**सवचः किण्वमतसी प्रदेहः पाचनः स्मृतः ॥८४॥**
**दन्ती चित्रकमूलत्वक्स्नुह्यर्कपयसी गुडः ।**
**भल्लातकास्थि कासीसं सैन्धवं दारणः स्मृतः ८५**
**चिरिबिल्वोऽग्निको दन्ती चित्रको हयमारकः ।**
**कपोतकङ्कगृध्राणां मलं लेपेन दारणम् ॥ ८६ ॥**
**स्वर्जिकायावशूकाद्याः क्षारा लेपेन दारणाः ।**
**हेमक्षीर्यास्तथा लेपो व्रणे परमदारणः ॥ ८७ ॥**
**तिलसैन्धवयष्ट्याह्वनिम्बपत्रनिशायुगैः ।**
**त्रिवृद्घृतयुतैः पिष्टैः प्रलेपो व्रणशोधनः ॥ ८८ ॥**
**निम्बपत्रघृतक्षौद्रदार्वीमधुकसंयुतः ।**
**तिलैश्च सह संयुक्तो लेपः शोधनरोपणः ॥८९॥**
**करञ्जारिष्टनिर्गुण्डी लेपो हन्याद्व्रणक्रिमीन् ।**
**लशुनस्याथवा लेपो हिङ्गुनिम्बभवोऽथवा ॥ ९० ॥**
**निम्बपत्रं तिला दन्ती त्रिवृत्सैन्धवमाक्षिकम् ।**
**दुष्टव्रणप्रशमनो लेपः शोधनरोपणः ॥ ९१ ॥**

**दी०**—अयं विम्लापनवारिणा वातशोथप्रत्यनीकत्वात्प्रलेप इति कार्यः । तेन तथा कार्यो यथा पीडयितव्यो व्रणशोथ इत्यभिप्रायः । अत्र हिंस्रा बृहद्दुहिंस्रा, महौषधं शुण्ठी, रास्ना सुरभी, अग्निमन्थोऽरणिः प्रसिद्धः, मधुकादीन्यत्र प्रसिद्धानि । चन्दनमत्र रक्तम् । पद्मकं काष्ठविशेषं पद्माख इति लोके । पद्मं कमलं । पित्तशोथ इति पित्तजनितव्रणशोथे । अस्याग्रे केचिदिति पठन्ति । 'शीतलाश्च गणाः सर्वे प्रलेपः पित्तशोथहृत् ।' इति सुश्रुतोक्तः । अयमपि संगतः । तत्र शीतलगणः काकोल्यादिः । उत्पलादि न्यग्रोधादयः सुश्रुतोक्ता बोद्धव्याः । कृष्णा पिप्पली । एके कृष्णेत्यनेन कृष्णमृदित्यत्र प्रचारः साधुरिति वदन्ति । पुराणपिण्याकमिति । पुराणं वर्षोषितं तिलकल्कजनितं खलिशब्दवाच्यं शिग्रु । शोभाञ्जनकः तस्य त्वक् छली । सिकता वालुका । शिवा हरीतकी । मूत्रमत्र गव्यम् । प्रदेह इति प्रलेपभेदः । सच पूर्वं व्याख्यात एव । अथागंतुजे रक्ते च व्रणे विम्लापनसंज्ञकं प्रलेपमाह—द्वे निशे हरिद्राद्वयं । चन्दने द्वे चेति श्वेतरक्तभेदेन । शिवा हरीतकी । रसाञ्जनं क्राथसमुद्भवम् । एके कृष्णपाषाणवद्द्रव्यविशेषं रसाञ्जनमामनन्ति । एतद्वयोरलाभे द्विगुणैव दारुहरिद्रा देया । शोथोऽत्र व्रणशोथः, पूर्वमुक्तं उपनाहमपि पाचने वर्तते । तद्विषयत्वात्पाचनमप्याह—शणः परिपाके सस्तनफलः प्रसिद्धः । मूलकोपि विख्यातः, शिग्रुः शोभाञ्जनकः । एतेषां त्रयाणां फलानि ग्राह्याणीत्यर्थः । तिलसर्षपे प्रसिद्धे, किण्वं तु सुराबीजं, तच्च यद्बहिः प्रक्षिप्यते । सवच इत्यस्य स्थाने सक्तव इति पठन्ति । तत्र सक्तवः शीतवीर्यत्वेपि संयोगविशेषेण प्रभावविशेषात् पाचनाः । एके सक्तवः किण्वमतसीद्रव्याण्युक्तानि पाचनमिति पठन्ति । तत्रोष्णद्रव्याणि उष्णवीर्याणि द्रव्याणि तानि कुष्ठागुरुप्रभृतीनि । एतेनानुक्तपाचनद्रव्यसंग्रह उक्तः पाचनव्रणशोथस्येत्यभिप्रायः । अथ पूर्वमुक्तं चतुर्थः पाटनः क्रमः स च शस्त्रसाधनो भवति । तदभावात्प्रलेपादिभि-

विदारणं कार्यम् । तद्विधानमाह—दन्ती लोके दातुनी-वाच्यं । मूलकं प्रसिद्धं तस्य मूलत्वक् । स्नुक् स्नुह्यर्कयोः क्षीरं स्नुक् सेहुण्डः गुडः प्रतीतः । कासीसं मृद्विशेषः भस्मवदल्पमृद् । अस्य भेदः पुष्पकासीसः सच किंचित्पीतः दारण इति प्रलेपद्वारेण पक्वव्रणस्य पाटनवद्विदारणो भवति । अपरमपि दारणमाह । चिरबिल्वो वृक्षकरञ्जः विरहुल इति लोके । आग्निकः कलिकारिकाकन्दः । अन्ये भल्लातकमाहुः । दन्ती 'दातुनी'वाच्यं, चित्रकः प्रसिद्धः । हयमारकः करवीरः । कपोतकंकगृध्राणां मलमिति । मलं पुरीषं कपोतो वनवासी पाण्डुकशब्दवाच्यः कङ्कमलं तु काकः गृध्रो मांसाशी पक्षिविशेषः । कपोतकङ्कगृध्राणामिति बहुवचनत्वेनान्येषामपि पुरीषेण दारणं बोद्धव्यम् । यथा दृश्यते हि कुक्कुटपारावतादीनां मलेन विदारणं भवति । आदिग्रहणादीदृशान्यप्यन्यानि देयानि । एके क्षारद्रव्याणि 'क्षारो वा दारणं' परिपठन्ति व्याख्यानयन्ति च । तत्र क्षारद्रव्याणि मधूककुटजपलाशाश्वकर्णपारिभद्रादीनि । क्षारो वेति । एतैर्द्रव्यैः संसिद्धः सच प्रतिसारणीयसंज्ञः क्षारः परमिति कृच्छ्रदारणमस्य प्रभावात् । अतएव बालवृद्धादिष्वपि योजनीयः । यतः द्विविधं हि पक्वशोथदारणं सुकुमारं कृच्छ्रं चेति । तत्र कपोतपुरीषादि सुकुमारम् । क्षुरः कृच्छ्र इति । इदानीं दारणमभिधायानन्तरं शोधनमाह । यष्ट्याह्वं यष्टीमधु निशायुग्मं हरिद्राद्वयं त्रिवृन्निशोथः घृतमत्र गव्यं । पेषणमत्र जलेन बोद्धव्यम् । व्रणशोधनः दुष्टपूयस्येत्यर्थः । अथ शोधनरोपणान्याह—क्षौद्रं मधु । दार्वी दारुहरिद्रा । शेषं सुगमम् । एतद्योगं व्यस्तं समस्तं वा योज्यं । तेन माक्षिकसैन्धवं शोधने प्रायशो योज्यं । निम्बपत्रं तिलाश्च रोपणे । त्रिवृद्दन्ती च रोपणे चेति व्यवहारः । दुष्टव्रणं नाडीव्रणप्रभृतिकम् । अतएव निम्बपत्रादीनां कल्करसे वर्तिमाहुरेके । शोधनं पुनरष्टविधं व्रणस्येति । तद्यथा । कषायवर्तिकल्कघृततैलरसक्रियाचूर्णधूपनभेदेनाष्टविधं मतम् ॥ ७९–९१ ॥

**गू०**—ते यथा–हिंस्रा प्रसिद्धा महौषधं शुण्ठी अग्निमन्थोऽरणिः । वातशोथे मधुकं यष्टी, मूर्वा प्रसिद्धा, पद्मकं पद्मकाष्ठविशेषः । पद्मं कमलम् । पित्तशोथे कृष्णा पिप्पली पुराणी, शिग्रु शोभाञ्जनं तस्य त्वक् वल्कलं । सिकता वालुका शर्करा वा । शिवा हरीतकी श्लेष्मशोथे द्वे निशे हरिद्रा दारुहरिद्रा द्वे चन्दने चन्दनं रक्तचन्दनं शिवा हरीतकी मूर्वा प्रसिद्धा । पुनर्नवा वर्षाभूः पद्मकं पद्मकाष्ठम् । रसाञ्जनं दार्वी क्वाथोद्भूतं आगन्तुजे प्रहारजे शोथे तथा रक्तजे प्रलेपः । शणादीनां फलानि, शणं, मूलकं मूलकबीजं, शिग्रुः शोभाञ्जनबीजानि । सक्तवः यवसक्तवः किट्टं लोहभवं अतसीबीजानि । पाचनो व्रणपाचनपाककारी प्रदेहो लेपः । दन्ती जयपालमूलं, चित्रकः तस्य मूलत्वक् स्नुक् सेहुण्डः, अर्कः प्रसिद्धः तयोः पयसि दुग्धे कासीसं(पिष्ट्वा लेपः कार्यः)अयं दारणविदीर्णकरः दारणे लेपः चिरबिल्वः करञ्जः अग्निको भल्लातः दन्ती जयपालमूलम् । चित्रकमूलं, हयमारः करवीरः कपोतः पाण्डुकः, कङ्कपक्षी गृध्रः, एषां मलं पुरीषं, पक्वव्रणदारणे लेपः यष्ट्याह्वा मधुयष्टी निशा हरिद्रा त्रिवृत् निःसृता एषां घृतयुतो लेपः व्रणशोधनरोपणो लेपः । क्षौद्रं मधु । दार्वी दारुहरिद्रा मधुकं यष्टी शोधनरोपणे अरिष्टो निम्बः निर्गुण्डी एषां लेपः लशुनस्यैकस्य वा हिङ्गुनिम्बभवो वा लेपः । व्रणे कृमयः ये कीटास्तान्हन्यात् । व्रणकृमिषु लेपः निम्बेति सुगमं शोधनरोपणे ॥ ७९–९१ ॥

### अथोदरशूलादौ लेपः—

**मदनस्य फलं तिक्तां पिष्ट्वा काञ्जिकवारिणा ।**
**कोष्णं कुर्यान्नाभिलेपं शूलशान्तिर्भवेत्ततः ॥ ९२ ॥**

**दी०**—अयं मदनफलादियोगः केनापि भ्रमत्वादत्र लिखितः । अप्रसंगत्वात् । यद्वा अन्तर्गतविद्रधिजनितशूलशान्त्यर्थं कथित इत्येके ॥ ९२ ॥

**गू०**—मदनस्य फलं, तिक्ता कटुकी, कोष्णं ईषदुष्णम् ॥ ९२ ॥

### इदानीं व्रणरोपणक्रमद्वारेण सर्वेषां व्रणजातीनां शमनयोगानाह तत्र तावत्पूर्वं विद्रधौ—

**शिग्रुशेफालिकैरण्डयवगोधूममुद्गकैः ।**
**सुखोष्णो बहलो लेपः प्रयोज्यो वातविद्रधौ ॥ ९३ ॥**
**पैत्तिके सर्पिषा लाजामधुकैः शर्करान्वितैः ।**
**प्रलिम्पेत्क्षीरपिष्टैर्वा पयस्योशीरचन्दनैः ॥ ९४ ॥**
**इष्टिका सिकता लोहकिट्टं गोशकृता सह ।**
**सुखोष्णः स्यात्प्रदेहोऽयं मूत्रैः स्याच्छ्लेष्मविद्रधौ ९५**

**रक्तचन्दनमञ्जिष्ठानिशामधुकगैरिकैः ।**
**क्षीरेण विद्रधौ लेपो रक्तागन्तुनिमित्तजे ॥ ९६ ॥**

दी०—अनेन स्वेदोपनाहश्च कर्तव्य इति संप्रदायः। उपनाहः कोष्णबहुललेपः। तच्च सर्पिःषु प्रलेपो बोद्धव्यः। स्वेदस्तु शाल्वलस्वेदवत्कार्यः। तेषु शिग्रुः शोभाञ्जनकः। शेफालिका निर्गुण्डी। एरण्डस्य स्नेहः तदभावे जटा। यवगोधूममुद्गाश्चान्नविशेषाः प्रसिद्धाः। पैत्तिके इति पित्तजनितविद्रधौ सर्पिषा गोघृतेन लाजा भृष्टधान्योद्भवा। तथा द्वितीयो योगः पयस्योशीरचन्दनैरिति। अत्रापि क्षीरपिष्टैरिति सम्बन्धः। तत्र पयस्या क्षीरविदारी तस्याः कन्दं, उशीरं सुगन्धमूलं तृणविशेषम्। चन्दनं रक्तं प्रलेपत्वात्। इष्टका प्रसिद्धा, सिकता वालुका, लोहकिट्टं लोहसिङ्घाणकम्। गोशकृत् गोमयं, मूत्रैरित्यत्र गोमूत्रैः इष्टकासिकतालोहगोशकृत्तुषपांशुभिरिति पाठान्तरं तत्र। लोहं लोहचूर्णं तुषयवगोधूमजनितं त्वग्विशेषं व्यवहारतस्तु यवगोधूमा एव देयाः। पांशुभिरित्यनेन मृद्ग्राह्या। सा चात्र पीता कृष्णा वा। एके तुषपांशुभिरित्यनेन तुषदग्धभस्मभिरिति व्याख्यानयन्ति। निशा हरिद्रा मधुकं यष्टीमधु क्षीरं गव्यम्। आगन्तुजः शस्त्रलगुडादिप्रहारजनितः ॥ ९३–९६ ॥

गू०—अथ वातविद्रधौ लेपः। शिग्रुः शोभाञ्जनम्, निर्गुण्डी एरण्डजटायवगोधूममुद्गैः सुखोष्णो बहुलेपनः एषां लेपः वातस्य या विद्रधिः व्रणभेदः वध इति प्रसिद्धः इति वातविद्रधौ लेपः। पैत्तिकजन्ये विद्रधौ लेपः सर्षपाः सिद्धार्थाः लाजा भृष्टधान्यानि मधुकं यष्टी, शर्करा सितोपला इत्येकप्रकारः क्षीरपिष्टैर्दुग्धपेषितैः। पित्तविद्रधौ इष्टिकासिकतावालुकालोहकिट्टं गोशकृत्पुरीषं श्लेष्मविद्रधौ लेपः निशा हरिद्रा मधुकं यष्टी गैरिकरक्तागन्तुजविद्रधौ ॥ ९३–९६ ॥

### अथ गलगण्डे—

**निचुलः शिग्रुबीजानि दशमूलमथापि वा ।**
**प्रदेहो वातगण्डेषु सुखोष्णः संप्रदीयते ॥ ९७ ॥**
**देवदारु विशाला च कफगण्डे प्रदेहकः ।**
**सर्षपारिष्टपत्राणि दग्ध्वा भल्लातकैः सह ॥ ९८ ॥**
**छागमूत्रेण संपिष्टमपचीघ्नं प्रलेपनम् ।**
**सर्षपाः शिग्रुबीजानि शणबीजातसीयवाः ॥ ९९ ॥**
**मूलकस्य च बीजानि तक्रेणाम्लेन पेषयेत् ।**
**गण्डमालार्बुदं गण्डं लेपेनानेन शाम्यति ॥१००॥**

दी०—अथ गण्डमालायां। निचुलो जलवेतसः। शिग्रुः शोभाञ्जनः तस्य बीजानि। एतद्द्वयेन एको योगः। दशमूलेन कृत्वा द्वितीयः। दशमूलं प्रसिद्धम्। दशद्रव्याणि मूलैर्मिलितं दशमूलम्। तद्यथा 'शालिपर्णी पृष्ठिपर्णी बृहती कण्टकारिका। तथा गोक्षुरको बिल्वः स्योनाकः पाटलस्तथा। अग्निमन्थश्च कुम्भारी दशमूलमिति स्मृत'मिति। अत्र पेषणार्थं छागमूत्रं देयम्। व्याधिसाधर्म्यत्वेन वक्ष्यमाणत्वात्। अस्याग्रे 'देवदारु विशालं च कफगण्डे प्रदेहक' इति पठन्ति केचित्। 'वातगण्डे प्रदेहार्थमौषधं यदुदीरितम्' इत्यस्य स्थाने 'छागमूत्रेण तत्पिष्टमपचीघ्नं प्रलेपनात्'। वातगण्डे द्रव्यं निचुलशिग्रुबीजानि दशमूलकं। तदत्रापि योज्यम्। अनयोर्भेदस्तु प्रदेहप्रलेपविषयत्वात्। एको वातगण्डे प्रदेहार्थमौषधम्। यदुदीरितमित्यस्य स्थाने 'सर्षपारिष्टपत्राणि दग्धभल्लातकैः सह' इति पठन्ति व्याख्यानयन्ति च। अयं लेपो ग्रन्थिष्वपि योज्यः। सर्षपादयो विख्याता एव ॥ ९७–१०० ॥

गू०—निचुलो जलवेतसः, शिग्रुबीजानि शोभाञ्जनबीजानि, दशमूलं प्रसिद्धम्। वातगलगण्डे विशाला इन्द्रवारुणीजटा। कफगलगण्डे प्रदेहको लेपः। अथापच्यां लेपः सर्षपादीनि दग्ध्वा छागमूत्रेण लेपः। अपचीगण्डमालाभेदः। अथाऽर्बुदादौ लेपः। अतसी प्रसिद्धा। स्पष्टमन्यत् ॥ ९७–१०० ॥

### अथ गृध्रस्यादिषु लेपः—

**तक्षयित्वा क्षुरेणाङ्गं केवलानिलपीडितम् ।**
**तत्र प्रदेहं दद्याच्च पिष्टं गुञ्जाफलैः कृतम् ॥१०१॥**
**तेनापबाहुजा पीडा विश्वाची गृध्रसी तथा ।**
**अन्यापि वातजा पीडा प्रशमं याति वेगतः १०२**

गू०—अपबाहुको विश्वाची बाहुरोगो निदानोक्तः। गृध्रसी जङ्घारोगः। केचित्केवलविषेणैव शीताङ्गादौ प्रदेहं कुर्वन्ति ॥ १०१ ॥ १०२ ॥

### अथ श्लीपदे—

**धत्तूरैरण्डनिर्गुण्डीवर्षाभूशिग्रुसर्षपैः ।**
**प्रलेपः श्लीपदं हन्ति चिरोत्थमपि दारुणम् ॥१०३॥**

**दी०**—अथ श्लीपदे । वर्षाभूः पुनर्नवाशब्दवाच्या । प्रलेपोऽत्र गोमूत्रेण व्यवहारात् । तदभावे जलेन प्रचारः ॥ १०३ ॥

**गू०**—वर्षाभूः पुनर्नवा शिग्रुः शोभाञ्जनं सर्षपं सिद्धार्थः । निर्गुण्डी लेपः । श्लीपदो रोगः करकर्णादौ भवति । एतैर्धत्तूरादिभिर्लेपः ॥ १०३ ॥

### अथ अण्डवृद्धौ लेपः ।

**अजाजीहपुषाकुष्ठमेरण्डबदरान्वितम् ।**
**काञ्जिकेन तु संपिष्टं कुरण्डघ्नं प्रलेपनम् ॥ १०४ ॥**

**दी०**—अथ कुरण्डे । अजाजी कृष्णजीरकः । हपुषं द्रव्यविशेषं विटपसंज्ञं । हनुशब्दवाच्यम् बदरल्येके बदरान्वितमिति बदरफलान्वितं । अयमपि लेपो व्रध्नरोगे प्रशस्तः ॥ १०४ ॥

**गू०**—अजाजी हपुषा बदरी । कुरण्डोऽण्डवृद्धिः ॥ १०४ ॥

### अथोपदंशे—

**करवीरस्य मूलेन परिपिष्टेन वारिणा ।**
**असाध्यापि व्रजत्यस्तं लिङ्गोत्था रुक्प्रलेपनात् १०५**
**दहेत्कटाहे त्रिफलां सा मषी मधुसंयुता ।**
**उपदंशे प्रलेपोऽयं सद्यो रोपयति व्रणम् ॥ १०६ ॥**
**रसाञ्जनं शिरीषेण पथ्यया च समन्वितम् ।**
**सक्षौद्रं लेपनं योज्यमुपदंशगदापहम् ॥ १०७ ॥**

**दी०**—अथोपदंशे । एतेनोपदंशादिजनितव्यथा अस्तं व्रजन्ति नाशं यान्तीत्यर्थः । असौ योगोऽपि लिङ्गलेपात् वीर्यस्तम्भकरत्वेन दर्शितः । द्रावणयोगोऽपि कथितः । कटाहे लोहपात्रे त्रिफलाहरीतकीप्रभृतिकम् । एके तां मषीमित्यस्य स्थाने समाषामिति वदन्ति व्याख्यानयन्ति च । यथाचोक्तं 'समाषां त्रिफलां लोहपात्रे भृष्टं विचूर्णयेत् । हन्ति क्षौद्रेण लेपोऽस्य लिङ्गदोषानशेषतः । रसाञ्जनं शिरीषेण पथ्यया च समन्वितम् । सक्षौद्रलेपनं योज्यमुपदंशगदापहम्' । रसाञ्जनमत्र दार्वीक्काथोद्भवं ग्राह्यं तदभावे दारुहरिद्रैव । शिरीषेणेति शिरीषवृक्षस्य त्वचा पथ्या हरीतकी तया सह । शेषं सुबोधम् ॥१५०–१०७॥

**गू०**—करवीरो हयमारः तस्य मूलं वारिणा पिष्ट्वा लेपः कार्यः लिङ्गोत्था रुक् उपदंशः । अन्यच्च त्रिफलाबिभीतक्यामलकहरीतक्यादिकं कटाहे दहेन्मधुना लेपः । अन्यच्च रसाञ्जनं दार्वी क्काथोद्भवं, शिरीषं, हरीतकी, एतदपि चूर्णितं सक्षौद्रं मधुयुतं व्रणान् उपदंशव्रणान् सद्यो रोपयति । अन्यच्च चिंचिणी अम्लिका तस्यास्त्वचा चूर्णं मधुयुक्तमपि उपदंशे ॥ १०५–१०७ ॥

### अथाग्निदग्धे—

**अग्निदग्धे तुगाक्षीरीप्लक्षचन्दनगैरिकैः ।**
**सामृतैः सर्पिषा स्निग्धैरालेपं कारयेद्भिषक् ॥१०८॥**
**तिन्दुकीत्वक्कषायैर्वा घृतमिश्रैः प्रलेपयेत् ।**
**यवान्दग्ध्वा मषी कार्या तैलेन युतया तया १०९**
**दद्यात्सर्वाग्निदग्धेषु प्रलेपो व्रणरोपणः ।**

**दी०**—अथाग्निदग्धे । तुगाक्षीरी वांसी । प्लक्षः क्षीरवृक्षः पिलुखनि इति लोके । सामृतैरिति । अमृता गुडूची तया सह । ननूष्णवीर्या गुडूची दाहनिवारणाय कथं समर्था? । उच्यते गुडूचीव्यवहारादुष्णवीर्या । स्पर्शात् सुशीतलैव । तर्हि शीतस्पर्शकाञ्जिकादौ विद्यमानगुडूच्यैव चरकग्राह्येति न वाच्यम् । यतः स्वभावादियं शीतस्पर्शेषु विशेषेण दाहशमन एव । एष **भट्टारकहरिश्चन्द्रा**भिप्रायः । गुडूच्या दाहनिर्वापकत्वं, इति । **चक्रस्तु** उष्णवीर्या ग्राह्यापि गुडूची आचार्यपाठानुरोधेन द्रव्यान्तरसंयोगमहिम्ना न दोषः । तिन्दुकः प्रसिद्धः, तस्य त्वक् छल्ली तज्जनितकषायैरिति । कषायशब्देनात्र पञ्चप्रकारं सूचयति । तद्यथा । स्वरसक्काथफाण्टहिमकल्कस्वरूपं । घृतमिश्रैरिति पञ्चप्रकारेष्वपि घृतप्रचारः । द्वितीययोगमाह—यवानित्यादि । यवोऽन्नविशेषः, तान् दग्ध्वा मषी कज्जलं कार्यं, तिलैः तिलतैलं । तया मषीकृतया । दग्धयवा मषीजनितप्रलेपेनेत्यर्थः । सर्वाग्निदग्धेष्विति । चतुर्विधेष्वग्निदग्धेष्वित्यर्थः । यतः प्लुष्टं दुर्दग्धं सम्यग्दग्धमतिदग्धमित्येषां विस्तरोन्यत्र ज्ञातव्यः ॥ १०८ ॥ १०९ ॥

**गू०**—तुगाक्षीर्याद्यैर्लेपं कारयेत् । तुगाक्षीरी वंश-

१—तथाहि सुश्रुते—'तत्र यद्विवर्णं प्लुष्यतेऽतिमात्रं तत् प्लुष्टम्, यत्र उत्तिष्ठन्ति स्फोटास्तीव्राश्चोषदाहरागपाकवेदनाश्चिराच्च उपशाम्यन्ति तद्दुर्दग्धम्; सम्यग्दग्धमनवगाढं तालफलवर्णं सुसंस्थितं पूर्वलक्षणयुक्तं च; अतिदग्धे मांसाऽवलम्बनं, गात्रविश्लेषः, सिरास्नायुसन्ध्यस्थिव्यापादनमतिमात्रं ज्वरदाहपिपासामूर्च्छाश्च उपद्रवा भवन्ति; व्रणश्च अस्य चिरेण रोहति रूढश्च विवर्णो भवति' इति सु. सू. १२ ।

रोचना, ह्रक्षः पीलुखनि, अमृता गुडूची । आमलकं वा तण्डुलीयकं, त्वक् तजः, तयोः कषायैः । यद्वा तण्डुलीयत्वक्कषायैरित्येकं पदं । अन्यच्च यवानिति सुगमम् ॥ १०८ ॥ १०९ ॥

**इदानीं लेपप्रकरणत्वादन्यानपि लेपानाह तत्रादौ भगसंकोचः—**

**पलाशोदुम्बरफलैस्तिलतैलसमन्वितैः ॥ ११० ॥**
**मधुना योनिमालिम्पेद्गाढीकरणमुत्तमम् ।**
**माकन्दफलसंयुक्तमधुकर्पूरलेपनात् ॥ १११ ॥**
**गतेऽपि यौवने स्त्रीणां योनिर्गाढाऽतिजायते ।**

दी०—पलाशोदुम्बरौ प्रसिद्धौ । तयोः फलानि । शेषं सुबोधं । माकन्दः सहकारः तस्य मूलं जटा । आम्रजटेत्यर्थः । मधुको वृक्षविशेषः, पूरलेपनाद्बहललेपनात्तु भगसङ्कोचनः ॥ ११० ॥ १११ ॥

गू०—पलाशः प्रसिद्धः उदुम्बरं योनिदार्ढ्ये माकन्दं मधु कर्पूरं च लेपः; यद्वा माजूफलचूर्णेन योनिसंकोचः ॥ ११० ॥ १११ ॥

**अथ लिङ्गवृद्धौ योनिसंकोचे—**

**मरिचं सैन्धवं कृष्णा तगरं बृहतीफलम् ॥ ११२ ॥**
**अपामार्गस्तिलाः कुष्ठं यवा माषाश्च सर्षपाः ।**
**अश्वगन्धा च तच्चूर्णं मधुना सह योजयेत् ॥११३॥**
**अस्य संततलेपेन मर्दनाच्च प्रजायते ।**
**लिङ्गवृद्धिः स्तनोत्सेधः संहतिर्भुजकर्णयोः ॥११४॥**
**सिताश्वगन्धासिन्धूत्थच्छागक्षीरैर्घृतं पचेत् ।**
**तल्लेपान्मर्दनाल्लिङ्गवृद्धिः संजायते परा ॥ ११५ ॥**
**इन्द्रवारुणिकापत्ररसैः सूतं विमर्दयेत् ।**
**रक्तस्य करवीरस्य काष्ठेन च मुहुर्मुहुः ॥ ११६ ॥**
**तल्लिप्तलिङ्गसंयोगाद्योनिद्रावोऽभिजायते ।**
**ताम्बूलपत्रचूर्णं तु चूर्णं कुष्ठशिवाभवम् ॥ ११७ ॥**
**वारिणा लेपनं कुर्याद्गात्रदौर्गन्ध्यनाशनम् ।**
**कुलित्थसक्तवः कुष्ठं मांसी चन्दनजं रजः ॥११८॥**
**सक्तवश्चणकस्यैव त्वक्चैवैकत्र कारयेत् ।**
**स्वेददौर्गन्ध्यनाशश्च जायतेऽस्यावधूलनात् ॥११९॥**
**वचा सौवर्चलं कुष्ठं रजन्यौ मरिचानि च ।**
**एतल्लेपप्रभावेण वशीकरणमुत्तमम् ॥ १२० ॥**

दी०—लिङ्गलेपमाहुरेके । अयं श्लोकः क्षेपक इति मन्यमानैरस्माभिरपि न स्वीकृतः । बहुपुस्तकेष्वदृष्टत्वात् ॥ ११२–१२० ॥

गू०—कृष्णा पिप्पली, बृहती कण्टकारिका, अपामार्गः प्रसिद्धः माषोऽन्नविशेषः सर्षपाः सिद्धार्थकाः, स्पष्टमन्यत् । स्तनोत्सेधः स्तनवृद्धिः तथा भुजकर्णयोः संहतिर्वृद्धिः । अथ लिङ्गवृद्धौ सिताश्वगन्धा श्वेतपुष्पाऽश्वगन्धा सिन्धूत्थच्छागक्षीरं घृताच्चतुर्गुणं एतैर्घृतं पचेत् लिङ्गवृद्धिर्भवति । अथ योनिद्रावे सूतं पारदं इन्द्रवारुणिकापत्ररसैः रक्तकरवीरकाष्ठेन मर्दयेत् तल्लिप्तलिङ्गसंयोगात् । अथ गात्रदौर्गन्ध्ये ताम्बूलं नागवल्लिः तत्पत्रचूर्णं, कुष्ठं शिवा हरीतकी वारिणा जलेन लेपः गात्रदौर्गन्ध्यनाशनं भवति । अथ स्वेददौर्गन्ध्ये कुलत्थानां सक्तवः, कुष्ठं, मांसी जटामांसी चन्दनजो रजः चूर्णं, चणकस्य भर्जितस्य सक्तवः, त्वक् तजः, अस्यावधूलनात्स्वेददौर्गन्ध्यनाशः जायते । अथ वशीकरणे रजन्यौ द्वे हरिद्रा दारुहरिद्रा ॥ ११२–१२० ॥

**अथ मूर्धतैलम्—**

**अभ्यङ्गपरिषेकश्च पिचुर्बस्तिरिति क्रमात् ।**
**मूर्धतैलं चतुर्धा स्याद्बलवच्च यथोत्तरम् ॥ १२१ ॥**
**त्रयोऽभ्यङ्गादयः पूर्वं प्रसिद्धाः सर्वतः स्मृताः ।**

दी०—अथ मूर्धतैलस्य विधानमाह—अभ्यङ्गेति । अभ्यङ्गादिचतुःप्रकारैः कृत्वा मूर्धतैलमाहुः । तच्च यथोत्तरं बलवद्बोद्धव्यं यो यस्मादुत्तरो यथोत्तरः । तेनाभ्यङ्गात्परिषेको बलवत्तरो भवति । परिषेकः पिचुः पिचोर्बस्तिरिति । अभ्यङ्गश्चपटनमात्रः शिरस्येव । परिषेकोदरादिभिः सेचनरूपः पिचुः प्लोतः स च तैले तूलपटलं निक्षिप्य शिरसि देय इति पिचुसंज्ञः । बस्तिर्वक्ष्यमाणविधानत्वात्प्रगट एव ॥ १२१ ॥

गू०—अभ्यङ्गः मर्दनं, परिषेकः तैलावगाहनं, पिचुः प्लोतः तूलवस्त्रादि तैलाक्तधारणं, बस्तिचर्मजन्या तद्वक्ष्यति मूर्धतैलं मस्तकधारणतैलं चतुर्धा स्याद्भवेत् । तच्च यथोत्तरं बलवत् बलकारि मूर्धप्रयोगात् अभ्यङ्गः परिषेकादेर्वक्तव्यः ॥ १२१ ॥

**अथाभ्यङ्गबस्तिप्रकारमाह—**

**शिरोबस्तिविधिश्चात्र प्रोच्यते सुज्ञसंमतः ॥१२२॥**
**शिरोबस्तिश्चर्मणः स्याद्द्विमुखो द्वादशाङ्गुलः ।**
**शिरःप्रमाणं तं बध्वा मस्तके माषपिष्टकैः ॥१२३॥**

१ इदं त्वसङ्गतम् । मधु माक्षिकं, कर्पूरं प्रसिद्धं एतैर्लेपनम् । इत्येवाभिप्रायो ग्रन्थकर्तुः ।

**सन्धिरोधं विधायाशु स्नेहैः कोष्णैः प्रपूरयेत् ।**
**तावद्धार्यस्तु यावत्स्यान्नासाकर्णमुखस्रुतिः ॥१२४॥**
**वेदनोपशमो वापि मात्राणां वा सहस्रकम् ।**
**विना भोजनमेवात्र शिरोबस्तिः प्रशस्यते ॥१२५॥**
**प्रयोज्यस्तु शिरोबस्तिः पञ्चसप्ताहमेव वा ।**
**विमोच्य शिरसो बस्तिं गृह्णीयाच्च समन्ततः १२६**
**ऊर्ध्वकायं ततः कोष्णनीरैः स्नानं च कारयेत् ।**
**अनेन दुर्जया रोगा वातजा यान्ति संक्षयम् १२७**
**शिरःकम्पादयस्तेन सर्वकालेषु युज्यते ।**

**दी०**—अथ चतुर्भेदेषु बस्तिविधिरधुनोच्यते। शिरोबस्तिविधिरिति शिरोबस्तिः कर्तव्यविधानं शिरसश्चर्मनिर्मितः पात्राकारो बस्तिरित्युच्यते। सुश्रसंमतत्वेनेन स्वबुद्ध्या न लिखितेत्यभिप्रायः । तदिदानीं बस्तेः स्वरूपमाह—द्विमुख इति उभयतो मुखः । द्वादशाङ्गुल इत्यौन्नत्येन । शिरःप्रमाणमिति विस्तारभेदेन । ननु तन्त्रान्तरे शिरोबस्तिप्रमाणं षोडशाङ्गुलोत्सेधं दर्शितम् । तथाहि—'आशिरो व्यायतं चर्म प्रयोज्यं षोडशाङ्गुलम्' इति तत्कथं द्वादशाङ्गुलमुक्तम् । उच्यते, तच्चर्म त्र्यङ्गुलत्रयपट्टेन शिरसि बध्वा तदधो माषकल्केन लेपयेत् । उपरिभागं त्वेकाङ्गुलपरिमितं चर्म तैलहीनं कार्यमिति व्यवहारः । तेन द्वादशाङ्गुलं चर्म तैलेन पूर्यते इति भावः । यतः 'चर्माधस्त्र्यङ्गुलैर्हीनं कृत्वोर्ध्वं चाङ्गुलोन्मितम् । षोडशाङ्गुलं यच्छेषं तत्तैलेन प्रपूरयेत्' इति संप्रदायोक्तत्वात् । तस्मादत्राचार्येण तैलपूरणार्थमेव द्वादशाङ्गुलं स्वीकृतम् । शेषं तु व्यवहारतो दृष्ट्वा चतुरङ्गुलं कार्यमित्यदोषः । आशु इत्यनेन तत्कालमेव तैलनिक्षेपणं कुर्याद्यावन्माषपिष्टं शुष्कं न भवतीत्याशुपदाभिप्रायः । यतः शुष्केण माषपिष्टेन तैलक्षरणं भवति आर्द्रेण तन्न भवतीत्यर्थः । स्नेहैरिति यथाव्याधि तैस्तैलैः । अथ कियत्कालं बस्तिधारणं तमाह—एतद्बस्तिधारणसंकेतत्रयं दोषकालादिविषयं, नासाकर्णमुखस्रुतिरित्यनेन तन्मलस्रवणं । कुतः शिरःस्थितरोमकूपगतैलप्रभावात् । दोषसंवलनाद्वा । अथवा वेदनया यावदुपशमः शीतस्तावच्छिरोबस्तिर्धार्य इत्यर्थः । एतद्द्वितयस्य कदाचिदनियतत्वात् तृतीयं नियतकालमाह—मात्राणां वा सहस्रकमिति यावत् सहस्रमात्राणि भवन्ति तावदेव धार्यः । वाग्रहणेनात्रापि पञ्चशतमात्राष्टशतं वा दोषापेक्षयाऽवगन्तव्या इति प्रचारः । अस्याग्रे केचिदिति पठन्ति 'धारयेदरुजः शान्तेर्यामं यामार्धमेव वा इति । अयं तन्त्रान्तरादत्र केनचिल्लिखितः । न स्वमतं । पूर्वेणैव कृतार्थत्वात् । अस्य व्याख्या—आ रुजः शान्तेर्धारयेद्वाते पित्ते यामं, यामार्धं कफे इति । मात्रालक्षणं च यथा वाग्भटे—'यावत्पर्येति हस्ताग्रं दक्षिणं जानुमण्डलम् । निमेषोन्मेषकालेन समं मात्राऽस्य सा स्मृता' इति । अथ कस्मिन् काले शिरोबस्तिः कार्यस्तमाह—विना भोजनं विनेत्यनेन पूर्वाह्णेऽस्य प्रचारः समीचीनः । अत्रेति चतुर्धा मूर्धतैले। तेन केवलबस्तिरेव भोजनादौ कार्यः । नाभ्यङ्गादित्रितयमित्यभिप्रायः। अथ यावद्दिनपर्यन्तं बस्तियोगो विधेयः तावद्दिनसंख्यां दर्शयितुमाह—पञ्चाहं सप्ताहं यावद्दोषादिबलापेक्षयावगन्तव्यं । पञ्चसप्तदिनग्रहणमत्र सामान्यम् । व्यवहारस्त्वेकदिनमारभ्य यावद्रोगसंक्षयस्तावद्दिनपर्यन्तं कार्यं इत्यस्मदीयसंप्रदायस्याभिप्रायः । अथ केन प्रकारेण बस्त्यपनयनं तमाह। शिरसो मस्तकात् बस्तिचर्मपुटकं विमोच्य यत्नेन दूरीकृत्य समन्ततः परितो गृह्णीयात् तैलमिति शेषः । अर्थात्पूर्वं तद्गततैलशेषेणापि नियतबस्तिं विमोचयेदिति भावः । पश्चात्कार्यमाह—ऊर्ध्वकायमित्यादि। ऊर्ध्वकायं मस्तकं कोष्णनीरैरीषदुष्णैः । ननूष्णजलैः शिरःपरिषेको न पथ्यतमः । तथाच 'उष्णाम्बुनाधःकायस्य परिषेको बलावहः । तेनैव तूत्तमाङ्गस्य बलहृत्केशचक्षुषा'मिति । तत्कथमत्र विहितं? उच्यते, अत्र कोष्णैरित्यनेन किंचिदुष्णजलेन सकृदेव स्नानं, नतु बहुलोष्णजलेनेत्यर्थः । इदानीं बस्तिविधानेन कृते सति तद्गुणविशेषमाह—अनेन बस्तिविधानेन दुर्जया वातजा रोगाः शिरःकम्पादयः महारोगत्वाद्वातजनिता दुर्जया एव । वातग्रहणेनैव पित्तकफगता अपि रोगा वेदितव्याः । तत्प्रधानत्वात् । यतः 'एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेत्' इति वचनात् । अतएव सर्वकालेषु युज्यत इति । सर्वकालं शीतोष्णवर्षालक्षणं । तेन षड्ऋतुषु शिरोबस्तिः कार्य इति तात्पर्यार्थः ॥ १२२–१२७ ॥

**गू०**—पूर्वं ये उक्ता अभ्यङ्गादयस्ते सुप्रसिद्धा लोकविहिताः । सुश्रसंमतः शिरोबस्तिविधिः । अत्र प्रोच्यते तत्प्रकारमाह—शिरोबस्ति सुगमम् । एकं मुखं स्वल्पं उपरि तैलपातनार्थं अधोमुखं मस्तकप्रमाणम् । बस्ते धारणप्रमाणमाह—यावन्नासानेत्रमुखस्रुतिः जलस्रावः स्यात् तावद्बस्तिधारणं; वा पक्षान्तरे याव-

द्वेदनेनोपशमः शिरोरोगादिनाशनं; तावद्धारणं; यावन्मात्राणां सहस्रैकं तावद्धारणं; मात्रालक्षणं तु पूर्वोक्तं 'या तु मण्डलमात्रस्ये'त्यादि। अथ बस्तिधारणकालमाह पञ्चाहं पञ्चदिनं वा प्रयोगः शिरोबस्तेः। उक्तक्रियामाह—सुगमम्। अथ बस्तिदाने के रोगा यान्तीत्याह—अनेनेति सुगमं। इति बस्तिकर्म ॥ १२२–१२७ ॥

**पूर्वमुक्तं लेपमूर्धतैलकर्णपूरणं तदिदानीं कर्णपूरणमाह—**

**स्वेदयेत्कर्णदेशं तु किञ्चिन्नुः पार्श्वशायिनः ॥१२८॥**
**मूत्रैः स्नेहै रसैः कोष्णैस्ततः श्रोत्रं प्रपूरयेत्।**
**कर्णं च पूरितं रक्षेच्छतं पञ्च शतानि वा ॥ १२९ ॥**
**सहस्रं वापि मात्राणां श्रोत्रकण्ठशिरोगदे।**
**स्वजानुनः करावर्तं कुर्याच्छोटिकया युतम् ॥१३०॥**
**एषा मात्रा भवेदेका सर्वत्रैवैष निश्चयः॥**
**रसाद्यैः पूरणं कर्णे भोजनात्प्राक्प्रशस्यते ॥ १३१ ॥**
**तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते।**

**दी०**—मूत्रैरिति। बहुवचनत्वेनात्राष्टानां मूत्राणां मध्येऽन्यतमेन कदुष्णेन कर्णपूरः कार्यः। तथाच तन्त्रान्तरे 'अष्टानामपि मूत्राणां मूत्रेणान्यतमेन वा। कोष्णेन पूरयेत्कर्णं कर्णसूलोपशांतय' इति। मूत्राष्टकं यथा—'मूत्रं गोनागमहिषीहयाजाविखरोष्ट्रक'मिति। स्नेहैरिति। घृततैलादिभिः पक्वैरपक्वैर्वेति प्रचारः। अत्रापि कोष्णैरिति संबन्धः। रसैरिति स्वरसैः। तेन सद्योरसैः क्वथितरसैर्वेति व्यवहारः। यतस्त्रिविधो रसोऽत्र रसकल्पनायां प्रतिपादितः। तत्तत्रैव ज्ञातव्यं अत्रापि ईषदुष्णैरिति योज्यम्। अथ यावत्कालं कर्णपूरणं धार्यं तावत्कालप्रमाणमाह—पूरणमत्र तैलमूत्रादिभिः। शतं पञ्चशतानि चेति मात्राविषयं। मात्रालक्षणं तु 'यावत्पर्येति हस्ताग्रं दक्षिणे जानुमण्डलम्। निमेषोन्मेषकालेन, समं मात्रास्य सा स्मृता' इति। श्रोत्रकण्ठशिरोगद इति। श्रोत्रगदे कण्ठगदे शिरोगदे इति। एतेन किमुक्तं श्रोत्रगदे शतमात्रं। कण्ठगदे पञ्चशतमात्रं। शिरोगदे सहस्रमात्रमित्यभिप्रायः। इदानीं कर्णपूरणस्य तैलरसविषयत्वात्कालविभागमाह—रसाद्यैरित्यादिग्रहणात् क्वाथकल्कपुटपाकादिभिः। भोजनात्प्राक् प्रातःकालाद्यैरिति आदिशब्दान्मूत्रघृतक्षीरादिभिः। भास्करेस्तमुपागते इति सायंकाले॥ १२८–१३१ ॥

**गू०**—अथ कर्णपूरणम्। किंचित्पार्श्वशायिनः नुः मनुष्यस्य कटिदेशं स्वेदयेत्, ततः श्रोत्रं कर्णं मूत्राद्यैः प्रपूरयेत्। नुरिति नृशब्दस्य षष्ठी। मूत्रैः गोमूत्राद्यैः स्नेहैः तैलाद्यै रसैः औषधरसैः कोष्णैरीषदुष्णैः कर्णपूरितं कियत्कालं इत्याह-श्रोत्रं कर्णं, कण्ठो गलः, शिरः प्रसिद्धं तद्रोगे मात्राणां शतं पञ्चशतानि वा सहस्रं वा पूरितं कर्णं रक्षयेत्। मात्रालक्षणमाह—स्वजानुतः करेण स्पर्शनाच्छोटिकया लक्षणया करावर्तं हस्तसंकोचं कुर्यात्। एषा मात्रा एका भवेत्। इदं बस्तिकर्म आदौ तैलावगाहनादौ प्रमाणं उक्तं ईदृशी शतमात्राऽवधारयेत्। रसादिना पूर्णकालमाह—रसाद्यैः औषधरसाद्यैः भोजनात्प्राक् प्रथमं तैलाद्यैर्भास्करे सूर्ये अस्तं गते प्राप्ते सति प्रशस्यते॥ १२८–१३१ ॥

**कर्णशूले योगाः—**

**पीतार्कपत्रमाज्येन लिप्तं वह्नौ प्रतापयेत् ॥१३२॥**
**तद्रसः श्रवणे क्षिप्तः कर्णशूलहरः परः।**
**कर्णशूलातुरे कोष्णं बस्तमूत्रं ससैन्धवम् ॥ १३३ ॥**
**निक्षिपेत्तेन शाम्यन्ति शूलपाकादिका रुजः।**
**शृङ्गबेरं च मधुकं मधु सैन्धवमामलम् ॥ १३४ ॥**
**तिलपर्णीरसस्तैलं टङ्कणं निम्बुकद्रवम्।**
**कदुष्णं कर्णयोर्देयमेतद्वा वेदनापहम् ॥ १३५ ॥**
**कपित्थमातुलुङ्गाम्लशृङ्गबेररसैः शुभैः।**
**सुखोष्णैः पूरयेत्कर्णं कर्णशूलोपशान्तये ॥ १३६ ॥**
**अर्काङ्कुरानम्लपिष्टांस्तैलाक्तांल्लवणान्वितान्।**
**संनिदध्यात्स्नुहीकाण्डे कोरिते तच्छदावृते ॥१३७॥**
**पुटपाकक्रमं कृत्वा रसैस्तच्च प्रपूरयेत्।**
**सुखोष्णैस्तेन शाम्यन्ति कर्णपीडाः सुदारुणाः १३८**

**दी०**—संप्रति कर्णपूरणार्थं योगवरानाह—पीतं पीतवर्णं यदर्कस्य पत्रं तत् आज्येन घृतेन लिप्त्वा वह्नौ प्रताप्य तद्रसो ग्राह्यः। पीतत्वमत्र परिपाकाद्भवति। कर्णशूलातुरे इति। अत्रादिपदं लुप्तं ज्ञेयं तेन इत्यादिशब्दात् सशब्दे। कर्णरोगेऽस्य प्रचारः। शृङ्गबेरमार्द्रकं, तदभावे शुण्ठीति सर्वत्र। मधु चेलस्य स्थाने मधुकपाठः संगतः। तत्र मधुयष्टी शुण्ठ्यादीनां प्रत्येकः प्रयोगः कार्यः। केचित्तु शृङ्गबेरप्रभृतीनां कल्केन तैलं संपाच्य देयमिति व्याख्यानयन्ति। कपित्थादीनां स्वरसेन कर्णपूरणं कार्यं तच्चात्र व्यस्तं समस्तं वा ग्राह्यम्। कपित्थो दधिफलः। मातुलुङ्गो

बीजपूरकः । अम्लोऽम्लवेतसः । शृङ्गवेरमार्द्रकम् । शुभैरित्यनेन तेषां सद्योरसैः नतु श्वतपीडनादिजनितैः । अर्काङ्कुरोऽत्र कोमलपल्लवः तत्संभवत्वात् । अम्लपिष्टानिति । अम्लः काञ्जिकः । तैलं तिलसंभवम् । लवणः सैन्धवः, सुही सेहुण्डः तच्छदाः सेहुण्डपत्राणि । पुटपाककर्म पुटपाकविधानेन बोद्धव्यम् । शेषं सुगमम् ॥ १३२–१३८ ॥

**गू०**—पीतार्कपत्रं पीतवर्णमर्कपत्रं आज्येन लेपयेत्तलिप्तं पुनः वह्नौ अग्नौ तप्तं कारयेत् पुनस्तद्रसं निष्कासयेत् तद्रसः श्रवणे कर्णे क्षिप्तः शूलहरो भवति, बस्तः छागः कर्णस्य शूले पाके च, शृङ्गबेरं शुण्ठी आर्द्रकं वा, मधु क्षौद्रं सैन्धवं लवणं आमलं आमलकं तिलपर्णी शाकवर्गे, तैलं कटुतैलं, टङ्कणं सौभाग्यं, निम्बुकद्रवः निम्बूरसः, कदुष्णं ईषदुष्णं कर्णयोः पूरणे देयम् एतद्वेदनाशूलहरम् । कर्णशूले मातुलुङ्गः अम्लो अम्लवेतसः, शृङ्गबेरमार्द्रकं, स्पष्टमन्यत् । कर्णशूले–अर्काङ्कुरान् अम्लपिष्टान् अम्लं निम्बुकादि, पुनः लवणान्वितान् प्राप्तान् कृत्वा कोरिते छिद्रिते सुहीकाण्डे सेहुण्डकाण्डे तत् छदा घृते तत्पत्रावृते मृल्लिप्ते पुटपाककर्म कुर्यात् तद्रसः कर्णे पूरयेत् । इति कर्णे रसपूरणम् ॥ १३२–१३८ ॥

## दीपिकातैलम् ।

**महतः पञ्चमूलस्य काण्डान्यष्टाङ्गुलानि च ।**
**क्षौमेणावेष्ट्य संसिच्य तैलेनादीपयेत्ततः ॥ १३९॥**
**यत्तैलं च्यवते तेभ्यः सुखोष्णं तेन पूरयेत् ।**
**ज्ञेयं तद्दीपिकातैलं सद्यो गृह्णाति वेदनाम् ॥१४०॥**
**एवं स्याद्दीपिकातैलं कुष्ठे देवतरौ तथा ।**

**दी०**—महत्पञ्चमूलस्य प्रत्येकं अष्टाङ्गुलमितानि काष्ठानि । महत्पञ्चमूलं यथा 'बिल्वोऽग्निमन्थः स्योनाकः काश्मर्यः पाटला महत्' इति । देवतरुर्देवदारुः ॥ १३९ ॥ १४० ॥

**गू०**—कर्णशूले–महतः बृहतः बिल्वादेः पञ्चमूलस्य काण्डानि अष्टाङ्गुलानि क्षौमेण वेष्टयेत्कार्यसमये वा पुनः तैलेनाऽसिच्य पुनर्दीपयेत् ज्वालयेत् । ततः यत्तैलं च्यवते तद्दीपिकातैलं तेन पूरयेत् ॥ १३९ ॥ १४० ॥

## स्योनाकतैलम् ।

**तैलं स्योनाकमूलेन मन्देऽग्नौ परिपाचितम्॥१४१॥**
**हरेदाशु त्रिदोषोत्थं कर्णशूलं प्रपूरणात् ।**

**दी०**—स्योनाकमूलस्य कल्ककाथेनेत्यर्थः ॥१४१॥

**गू०**—स्योनाकः अरलुवृक्षः तन्मूलकल्केन तैलं पचेत् इति कर्णशूले स्योनाकतैलम् ॥ १४१ ॥

## यष्टीवसा ।

**कल्कक्काथेन यष्ट्याह्वकाकोलीमाषधान्यकैः॥१४२॥**
**शूकरस्य वसां पक्त्वा कर्णनादार्तिनाशिनी ।**

**दी०**—कल्कक्काथेनेत्यादि योगः, सुगमम् ॥१४२॥

**गू०**—अथ कर्णनादे यष्ट्यादिकल्कक्काथेन कल्केन पक्त्वा शूकरवसा स्नेहः कर्णनादहरो भवति । धान्यकं प्रसिद्धम् । माषो माषान्नम् ॥ १४२ ॥

## स्वर्जिकातैलम् ।

**स्वर्जिका मूलकं शुष्कं हिङ्गु कृष्णासमन्वितम् १४३**
**शतपुष्पा च तैस्तैलं पक्वं सूक्तचतुर्गुणम् ।**
**प्रणादं शूलबाधिर्यं स्रावं कर्णस्य नाशयेत् ॥१४४॥**

**दी०**—स्वर्जिकेत्यादि । स्वर्जिका क्षारविशेषः, मूलकं प्रसिद्धं तच्च शुष्कं ग्राह्यं, कृष्णा पिप्पली, हिङ्गु रामठं, मूलकं शुष्कं शुक्तं काञ्जिका सा च चतुर्गुणा ग्राह्या । स्वर्जिकादीनामत्र जलेन कल्कमाहुः । एके हिङ्गुकृष्णासमन्वितमित्यस्य स्थाने हिङ्गुकृष्णामहौषधमिति पठन्ति । महौषधं शुण्ठीति प्रचारोऽसाधुः ॥ १४३ ॥ १४४ ॥

**गू०**—कर्णनादे—स्वर्जिकाक्षारः, मूलकं शुष्कं ग्राह्यम् । हिङ्गु, कृष्णा पिप्पली, शतपुष्पा । इदं कल्कद्रव्यं तैलाच्चतुर्थांशं, शुक्तं अम्लविशेष आसवोक्तः । एतत्तैलं व्रणादीन् नाशयेत् । इति स्वर्जिकाद्यं तैलं कर्णनादादौ । अपामार्गभस्मजलं चतुर्गुणं दत्त्वा वस्त्रपूतं कारयेत् तज्जलेन क्षारमेव कल्कितं काकरूपं क्षिपेत् तेन पक्वं तैलं बाधिर्यं जयेत् ॥ १४३॥१४४ ॥

## अपामार्गक्षारतैलं बाधिर्ये—

**अपामार्गक्षारजले तत्क्षारं कल्कितं क्षिपेत् ।**
**तेन पक्वं जयेत्तैलं बाधिर्यं कर्णनादकम् ॥ १४५ ॥**

**दी०**—अपामार्गः प्रसिद्धः तस्य क्षारोदके कल्कितं तत्क्षारमिति । अपामार्गपञ्चाङ्गकल्कं तत्र घोलयित्वा तेन तैलं विपाच्य देयमित्यर्थः । तन्त्रान्तरेऽपि अपामार्गक्षारजलेन तत्कृतकल्केन साधितं तिलजमित्यादि

परिभाषोक्तत्वात् । क्षारोदकं तैलाच्चतुर्गुणं देयम् । कल्कं तु चतुर्थांशमिति ॥ १४५ ॥

## शम्बूकतैलम्—

**शम्बूकस्य तु मांसेन पचेत्तैलं तु सार्षपम् ।**
**तस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति ॥ १४६ ॥**

**दी०**—शम्बूको जलशुक्तिः स्यात्तन्मध्यगतमांसविशेषेण तैलाच्चतुर्गुणेन मांसक्काथजलेनेत्यर्थः । मांसं तु तैलसाम्यमिति व्यवहारात् ॥ १४६ ॥

**गू०**—शम्बूको जलशुक्तिः, तन्मांसेन तैलं पचेत् तैलाच्चतुर्थांशं मांसं इति । शम्बूकतैलं कर्णनाडीषु ॥ १४६ ॥

## कर्णस्रावे योगाः—

**चूर्णं पञ्चकषायाणां कपित्थरसमेव च ।**
**कर्णस्रावे प्रशंसन्ति पूरणं मधुना सह ॥ १४७ ॥**
**तिन्दुकान्यभया लोध्रः समङ्गा चामलक्यपि ।**
**ज्ञेयाः पञ्च कषायास्तु कर्मण्यस्मिन्भिषग्वरैः १४८**

**दी०**—चूर्णं पञ्चकषायाणामिति । चूर्णमित्येको योगः। कपित्थरसेन मधुयुक्तेन द्वितीयः । एके पञ्चकषायाणामेव चूर्णं कपित्थरसेनालोड्य मधुयुक्तं च कर्णपूरणमाहुः । पञ्चकषायाणि यथा—तिन्दुकेति । एके आरग्वधशिरीषजम्बूअश्वत्थसर्जानां पञ्चकषायत्वं कथयन्ति ॥ १४७ ॥ १४८ ॥

**गू०**—कर्णस्रावे । तिन्दुकं वृक्षविशेषः अभया हरीतकी लोध्रः समङ्गा मञ्जिष्ठा आमलकी एते कषायवृक्षाः एषां चूर्णं अस्मिन्कर्मणि कर्णपूरणे ॥ १४७ ॥ ॥ १४८ ॥

## स्वर्जिकारसयोगः—

**स्वर्जिकाचूर्णसंयुक्तं बीजपूररसं क्षिपेत् ।**
**कर्णस्रावरुजादाहाः प्रणश्यन्ति न संशयः ॥१४९॥**

**दी०**—बीजपूरफलस्वरसं, तच्च मनाक् स्वर्जिकाक्षारप्रक्षिप्तं देयम् ॥ १४९ ॥

**गू०**—स्वर्जिकाक्षारः, तच्चूर्णं तथा बीजपूररसम् ॥ १४९ ॥

## आम्रादितैलम् ।

**आम्रजम्बूप्रवालानि मधुकस्य वटस्य च ।**
**एभिः संसाधितं तैलं पूतिकर्णोपशान्तिकृत् १५०**

**दी०**—अत्र जम्बूपत्राणि जम्ब्वाम्रयोस्तरुणपत्राणीत्यर्थः । एवं मधुकस्य वटस्य चेति । तैलमत्र निम्बकरञ्जसर्षपजनितमपि देयम् । तथाच—'एतैः शृतं निम्बकरञ्जतैलं ससार्षपं स्रावहरं प्रदिष्टम्' इति । निम्बादीनां तैलं जलेन साध्यं मिलितत्वात् ॥१५०॥

**गू०**—कर्णस्रावे-आम्रजम्बूनां पत्राणि मधुकस्य वटस्य च पल्लवानि एभिः साधितं कृतं तैलं पूतिकर्णरोगशान्तिकृत् । पूतिकर्णे पूरणमिति सुगमम् ॥ १५० ॥

## कर्णकीटे हरितालादियोगः—

**पूर्णं हरितालेन गवां मूत्रयुतेन च ।**
**अथवा सार्षपं तैलं कर्णकीटहरं परम् ॥ १५१ ॥**

**दी०**—मूत्रयुतेन हरितालेनैको योगः । केवलसार्षपतैलेन द्वितीयः । अस्मत्संप्रदाये तु गोमूत्रेण हरितालं संपिष्य तेन कटुतैलं विपाच्य तत्तैलं ग्राह्यमिति प्रचरति । 'अथवा सार्षपं तैलं कर्णकीटहरं परम्'इत्यस्य स्थाने 'धूपनं कर्णदौर्गन्ध्ये गुग्गुलुः श्रेष्ठ उच्यते' इति केचित्पठन्ति व्याख्यानयन्ति च ॥ १५१ ॥

## कर्णकीटे—शिग्रुस्वरसादियोगः—

**स्वरसं शिग्रुमूलस्य सूर्यावर्तरसं तथा ।**
**त्र्यूषणं चूर्णितं चैव कपिकच्छूजटारसम् ॥ १५२ ॥**
**कृत्वैकत्र क्षिपेत्कर्णे कर्णकीटहरं परम् ।**

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायामुत्तरखण्डे लेपादिविधिर्नामैकादशोऽध्यायः ॥ ११ ॥

---

**दी०**—सूर्यावर्ता सुवर्चला । सा द्विधा एका मोचलीशब्दवाच्या । अपरा ब्रह्मसौवर्चलीति । त्र्यूषणं त्रिकटुकम् । कपिकच्छू वानरी । शेषं सुबोधम् ॥ १५२ ॥

इति श्रीभावसिंहात्मजेनाढमल्लेन विरचिते शार्ङ्गधरदीपिकायामुत्तरखण्डे लेपमूर्धतैलकर्णपूरणाऽध्यायः ॥ ११ ॥

---

**गू०**—कर्णकीटे-शिग्रुः शोभाञ्जनम्, तस्य स्वरसः सूर्यावर्ता सुवर्चला तस्या वा स्वरसः, त्र्यूषणं त्रिकटुचूर्णं तथा कपिकच्छू वानरी । सद्योनिःसृतस्वरसं । सुदारुणं कर्णकीटहरं कर्णपूरणात् ॥ १५२ ॥

इति श्रीकाशीराममिश्रकृतायां गूढार्थदीपिकायां चिकित्सास्थाने लेपनादिविधिरध्यायः ॥ ११ ॥

---

## द्वादशोऽध्यायः ।

### अथ शोणितविस्रावविधिरधुना विधीयते

### अथ शोणितस्रावविधिः ।

सम्बन्धश्चायं यथा लेपादयो देहकान्तिकरास्तद्वच्छोणितविस्रावणमपि ।

**अतः शोणितस्रावणमाह—**

**शोणितं स्रावयेज्जन्तोरामयं प्रसमीक्ष्य च ।**
**प्रस्थं प्रस्थार्धकं वापि प्रस्थार्धार्धमथापि वा ॥ १ ॥**
**शरत्काले स्वभावेन कुर्याद्रक्तस्रुतिं नरः ।**
**त्वग्दोषग्रन्थिशोथाद्या न स्यू रक्तस्रुतेर्यतः ॥ २ ॥**

**दी०**—प्रस्थमत्र सार्धत्रयोदशपलानि । तथाचोक्तं 'वमने च विरेके च तथा शोणितमोक्षणे । सार्धत्रयोदशपलं प्रस्थमाहुर्मनीषिण' इति । ननु तन्त्रान्तरे प्रस्थं प्रस्थद्वयं च क्रमेण रक्तस्रावं कथितं तथाहि—'जघन्यमध्यप्रवलेषु वेगाश्चत्वार इष्टा वमने षडष्टौ । दशैव ते द्वित्रिगुणा विरेके प्रस्थस्तथा शोणितमोक्षणे च' इति । तत्कथमत्र प्रस्थं प्रस्थार्धं च कथितं, कथं? उच्यते । तन्त्रान्तरे यदिदं तद्बहुदोषस्यावजिनः पुरुषस्य परं प्रमाणमामनन्ति । अत्र तु सशेषदोषरक्तं रक्षणीयमित्यालोच्याचार्येण प्रस्थादिसंग्रहः कृत इत्यदोषः । तथाहि 'रक्तं स्वभावादतुविहितत्वादनातुरस्यापि रक्तस्रुतिः प्रशस्ता' इति । यतः पित्तं शरदि कुप्यतीति वचनाद्रक्तस्यापि कोपो भवतीति नियमः । तथाच पित्तप्रकोपेणैव शोणितं च प्रकुप्यतीति । तस्माच्छरदि शोणितविस्रावणं विहितम् । तत्स्रावणात् त्वग्दोषादयोऽपि न स्युः । त्वग्दोषा अष्टादश कुष्ठानि न्यच्छनीलिकादयश्च । ग्रन्थयो वातादिमिलित्वा शिराग्रन्थिश्च । शोथा दोषदुष्टिभवा व्रणशोथादयः । आदिग्रहणात् अन्येऽपि शोणितजा रोगा रक्तगुल्मविद्रधिविसर्पादयः ॥ १ ॥ २ ॥

**गू०**—अथ शोणितस्रावविधिं व्याख्यास्यामः । आमयं रक्तजन्यं कुष्ठाद्यं रोगं प्रसमीक्ष्य दृष्ट्वा जन्तोः प्राणिनः शोणितं स्रावयेत् । कियत्परिमितं स्रावयेदित्याह—प्रस्थं मुख्यं प्रस्थार्धं मध्यं प्रस्थार्धार्धं न्यूनं वा कदा रक्तं स्रावयेत् स्वभावेन रक्तस्रावस्वभावेन शरत्काले रक्तस्रुतिं स्रावं कुर्यात्, कुतः? त्वग्दोषा ग्रन्थिशोथाद्या रक्तस्रुतेर्यतो न स्युः कुष्ठवातरक्तादयः । ग्रन्थिर्व्रणादिग्रन्थिः ॥ १ ॥ २ ॥

**आदौ रक्तस्य रसवर्णगुणादीनाह—**

**मधुरं वर्णतो रक्तमशीतोष्णं तथा गुरु ।**
**शोणितं स्निग्धविस्रं स्याद्विदाहश्चास्य पित्तवत् ॥३॥**
**विस्रता द्रवता रागश्चलनं विलयस्तथा ।**
**भूम्यादिपञ्चभूतानामेते रक्तगुणाः स्मृताः ॥ ४ ॥**

**दी०**—अथ शोणितस्य प्रकृतिं वक्तुमाह । मधुरं वर्णत इति । मक्षिकापिपीलिकादीनां प्राचुर्यमुपसर्पणान्माधुर्यमस्य प्रतीतम् । वर्णतो रक्तमिति । रक्तमारक्तं इन्द्रगोपप्रकाशमित्येके, तदेवपद्मालक्तगुञ्जाफलवर्णमप्युक्तम् । अथवा वस्त्रादिलग्नं सत्प्रक्षाल्यमानमपि न विवर्णतां यातीत्यपरे । अशीतोष्णमिति । नचैकान्ततः शीतं नात्युष्णमिति । यतोऽग्नीषोमीयाद्रक्तस्य तत्तुल्यगुणयोरम्लशीतयोरभिलाषो रक्तक्षये भवतीति दर्शनात् । अथवा प्रकोपोऽस्य दोषैरेव तन्मूलत्वदोषानुरूपमनुष्णशीतम् । तथाहि—'यस्माद्रक्तं विना दोषैर्न कदाचित्प्रकुप्यति । तस्मात्तस्य यथादोषं कालं विद्यात्प्रकोपनं' इति । स्निग्धविस्रं स्यादिति । स्निग्धं विक्षुण्णं विस्रमामगन्धि विदाहश्चास्य पित्तवदिति पित्तस्य येन वस्तुना यथा विदाहस्तेन वस्तुना तथा विदाहः शोणितस्यापीत्यर्थः । अथ शोणिते पाञ्चभौतिकत्वं प्रतिपादयन्नाह—यस्मादेति विस्राद्यः पृथिव्यादीनां गुणाः शोणिते दृश्यन्ते तस्माद्रक्तं पाञ्चभौतिकमिति । तत्र विस्रता विगन्धो भूमिगुणः द्रवता द्रवभागोऽयमम्बुगुणः । रागो रक्तता तेजोगुणः । चलनं नैकत्र स्थितिशीलत्वमयं वातगुणः सादनमित्यपरे । विलय इति विलयनोप्याकाशगुणः । एके विलयस्थाने लघुतेति पठन्ति व्याख्यानयन्ति च । भूम्यादिपञ्चभूतानामिति । आदिशब्देन अप्तेजोवाय्वाकाशानि गृह्यन्ते ॥ ३ ॥ ४ ॥

**गू०**—रक्तं आदौ रसतो मधुरं, वर्णतो रक्तं, गुणत अशीतोष्णं, तथा गुरुमात्रया गुरु, तथा स्निग्धं, सचिक्कणं, विस्रं आमगन्धि, विदाहो दाहकर्तृत्वं च अस्यापि तदेव । रक्ते भूम्यादीनां भूतानां गुणाश्च सन्ति तानाह—विस्रता आमगन्धिता भूमिगुणः सच्छिद्रता वा । एते गुणाः भूम्यादिपञ्चभूतानां क्रमात्स्मृताः ॥३॥४॥

दुष्टरक्तलक्षणे किं भवतीत्याह—

**रक्ते दुष्टे वेदना स्यात्पाको दाहश्च जायते ।**
**रक्तमण्डलता कण्डूः शोथश्च पिटिकोद्गमः ॥ ५ ॥**
**वृद्धे रक्ताङ्गनेत्रत्वं सिराणां पूरणं तथा ।**
**गात्राणां गौरवं निद्रा मदो दाहश्च जायते ॥ ६ ॥**
**क्षीणेऽम्लमधुराकाङ्क्षा मूर्च्छा च त्वचि रूक्षता ।**
**शैथिल्यं च सिराणां स्याद्वातादुन्मार्गगामिता ॥७॥**
**अरुणं फेनिलं रूक्षं परुषं तनु शीघ्रगम् ।**
**अस्कन्दि सूचिनिस्तोदि रक्तं स्याद्वातदूषितम् ॥८॥**
**पित्तेन पीतं हरितं नीलं श्यावं च विस्रकम् ।**
**अस्कन्द्युष्णं मक्षिकाणां पिपीलानामनिष्टकम् ॥९॥**
**शीतलं बहलं स्निग्धं गैरिकोदकसंनिभम् ।**
**मांसपेशीप्रभं स्कन्दि मन्दगं कफदूषितम् ॥ १० ॥**
**द्विदोषदुष्टं संसृष्टं त्रिदुष्टं पूतिगन्धकम् ।**
**सर्वलक्षणसंयुक्तं काञ्जिकाभं च जायते ॥ ११ ॥**
**विषदुष्टं भवेच्छ्यावं नासिकोन्मार्गगं तथा ।**
**विस्रं काञ्जिकसंकाशं सर्वकुष्ठकरं बहु ॥ १२ ॥**

**गू०**—इदानीं दुष्टरक्तस्याऽपि लक्षणमाह—रक्ते दुष्टे इति । वातादिदोषदूषिते वेदना पीडा पाको दाहश्च व्रणेष्वेव प्राचुर्यमस्याभिहितम् । रक्तमण्डलतेति रक्तवर्णमण्डलोत्पत्तिः । कण्डूः पामाविशेषः, शोथो व्रणशोथः, पिडका ग्रन्थ्यादयः । अथ रक्तातिवृद्धौ सत्यां किं लक्षणं तदाह—रक्ताङ्गनेत्रत्वमिति । तेन रक्ताङ्गनेत्रता च भवति, सिराणां पूर्णता तथेति । सिराश्चात्र रक्तवहा ज्ञेयाः, तासां पूर्णता रक्तेत्यर्थः । मेदो मेदोवृद्धिः प्रायेणात्रास्थिगतमेदोवृद्धिः स्यादित्यत्र विषयः यतः 'स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तराश्रिता । अथेतरेषु सर्वेषु सततं मेद उच्यत' इति । क्षीणेऽम्लमधुराकाङ्क्षेति । शोणितक्षये सति वातवृद्धौ सत्यां तत्प्रतीकारार्थत्वादम्लरसेच्छा । तथा रक्तस्य द्रवत्वात्तत्क्षये सति तेजोवृद्धौ सत्यां मधुरप्रार्थना । एके क्षीणेऽम्लशीतलाकाङ्क्षेति पठन्ति । तत्रापि स एवार्थः । त्वग्विरूक्षतेति वातवृद्धितः सिराणां रक्तवहानां च शैथिल्यं भवति । अतिरक्तत्वात् । घातात्प्रहारात् उन्मार्गगामिता रक्तस्येत्यर्थः । इदानीं दुष्टरक्तस्य वातादीनां प्रत्येकलक्षणान्याह । अरुणाद्युक्तलक्षणैः कृत्वा वातदूषितं रक्तं जानीयात् । तत्रारुणमीषद्रक्तं कृष्णाभावं व्याख्यानयन्ति । फेनिलं फेनयुक्तं परुषमपिच्छिलं, तनु अच्छं, शीघ्रगमाशुप्रवृत्ति अतएवावस्कन्दादीनि । अस्कन्दि स्त्यानरहितम् । सूचीभिरिव निस्तोदनं गात्रेषु पित्तेन यदा दुष्टं रक्तं स्यात्तदा एतादृशं भवति किं तत्पीतमिति । पीतं पीतवर्णम् । तच्च निरामावस्थायां भवति । हरितं श्यामवत्प्रतिभासम् । नीलं हरितश्यावम् । तच्च सामावस्थायां भवति । श्यावं हरितकृष्णम् । विस्रकमामगन्धिकम् । अस्कन्दि चेति स्त्यानरहितम् । मक्षिकापिपीलिकानामनिष्टमिति । अनिष्टमप्रियम् । यतः तासां मतेऽनुसरणादनिष्टत्वमवगन्तव्यं कफदूषितं रक्तमीदृशं भवति शीतलं स्पर्शाद्वीर्यात् बहलं घनं गैरिकोदकसन्निभमिति पाण्डुलोहितं कथितम् । मांसपेशीप्रभमित्यतिस्त्यानत्वात् । पाण्डुलोहितमिति भावः । अतएव स्कन्दि कथितम् । स्कन्दित्वादेवमवर्गत्वमस्योक्तम् । अथ संसर्गसन्निपातान्वितरक्तविकृतेर्लक्षणान्याह—द्विदोषदुष्टं शोणितमिति शेषः, यतो द्वाभ्यां दोषाभ्यां दूषितं तत्संसृष्टमिति कथितम् । एतेन द्वाभ्यां लक्षणाभ्यां मिलितं भवतीति भावः । त्रिदुष्टं रक्तं सन्निपातदूषितं कथितं त्रिभिर्दोषैर्दूषितं त्रिदुष्टम् । तच्च पूतिगन्धिकं भवति । सर्वलक्षणसंयुक्तमिति । सर्वेषां वातपित्तकफानां लक्षणैर्युक्तमिति । तदेव काञ्जिकाभं च भवतीति । इदानीं विषदुष्टस्य रक्तस्याकृतिं दर्शयन्नाह—विषं स्थावरजङ्गमं तेन दुष्टं दूषितमित्यर्थः । ईदृशं केन लक्षितं तदाह—श्यावमिति । हरितकृष्णं वर्णतो भवति । नासिकोन्मार्गगं तथेति । नासिकया उन्मार्गगामि भवति । तेन नाधः प्रवर्तते इति तात्पर्यार्थः । विषप्रभावात् नासिकोपलक्षितत्वात्तेन मुखनेत्रकर्णैरपि प्रवर्तत इति भावः । विस्रमित्यामगन्धि । सर्वकुष्ठकरमिति विषप्रभावात् । तथाहि 'विषेण दूषितं रक्तं सर्वकुष्ठकरं मतम्' इति ॥ ५–१२ ॥

**गू०**—दुष्टे कुपिते रक्ते वेदना पीडा स्यात्पाकादयश्च जायन्ते । रक्तवृद्धिलक्षणमाह—वृद्धे रक्ते रक्ताङ्गादिलक्षणं भवति रक्ताङ्गत्वं रक्तनेत्रत्वं सिराणां धमन्यादीनां पूरणं रक्तेनैव, गात्राणां गौरवं गुरुता, मदः पूगभक्षणवत्, दाह उष्णत्वम् । क्षीणे रक्ते किं लक्षणं भवतीत्याह—क्षीणे इदं भवति-अम्लमधुराकाङ्क्षा स्पृहा, मूर्च्छा मूर्च्छितं क्षीणे त्वचि रू-

क्षता शैथिल्यं वातस्यैव उन्मार्गगामिता च । वातदुष्टरक्तलक्षणमाह-वातदूषितं रक्तं एवंविधं स्यात् । किंभूतं तदाह-अरुणरक्तं फेनिलं फेनवत्, रूक्षं स्नेहरहितं, तनु अघनं, परुषं कर्कशं, शीघ्रगमनं शीलं अस्कन्दि, घनत्वरहितं, विस्रावविशेषः स्रावयुक्तं, पित्तदूषितरक्तमाह—पित्तेन दूषितं पीतहरितादिवर्णं रक्तं भवति तदाह—विस्रकं स्रावगन्धि अस्कन्दि चाश्यरहितं मक्षिकादीनां अनिष्टकं भक्षणे हितं न । कफदूषितरक्तमाह-कफदूषितं शीतलादिलक्षणं भवतीत्याह-शीतलं शीतगुणं स्पर्शेन वा शीतलं, बहुलं बहुतरं, स्निग्धं सचिक्कणं, गैरिकोदकसन्निभं गैरिकजलसदृशं, पुनः मांसपेशीप्रभं ग्रन्थिरूपं, स्कन्दि घनत्वसदृशं, मन्दगं मन्दगमनं, द्विदोषत्रिदोषदुष्टलक्षणमाह—द्विदोषदुष्टसंसृष्टद्विदोषलक्षणमाह-द्विदोषदुष्टसंसृष्टं द्विदोषलक्षणयुक्तं भवति त्रिदुष्टं त्रिदोषदुष्टं पूतिगन्धं दुर्गन्धं तथा काञ्जिकाभं च जायते । विषदुष्टमाह-विषदुष्टं विषयुक्तं श्यामवर्णं भवेत् नासिकागन्धं तथा उन्मार्गगम् । विस्रं आमगन्धि, काञ्जिकसंकाशं काञ्जिकतुल्यं तथा सर्वकुष्ठकरं, तथा बहु अधिकम् ॥५-१२॥

**प्रकृतिस्थरक्तलक्षणमाह—**

**इन्द्रगोपप्रभं ज्ञेयं प्रकृतिस्थमसंहतम् ।**

**दी०**—अथ विकृतरक्तमभिधाय प्रकृतिस्थं दर्शयन्नाह—यः प्रावृट्कालजो जन्तुविशेषः इन्द्रवधूरिति लोके । स चानेकप्रकारवर्णः, अत्र तु रक्त एव गृह्यते । असंहतमिति नात्यच्छं नातिघनं न स्त्यायतीत्यन्ये ॥

**गू०**—इन्द्रगोपो वीरवधूटी तद्वत् रक्तं तथा असंहतं अस्त्यानम् एवंभूतं प्रकृतिस्थं रक्तं ज्ञेयम् ॥

**येषु रक्तस्रावो विहितस्तानाह—**

**शोथे दाहेऽङ्गपाके च रक्तवर्णेऽसृजः स्रुतौ ॥१३॥**
**वातरक्ते तथा कुष्ठे सपीडे दुर्जयेऽनिले ।**
**पाणिरोगे श्लीपदे च विषदुष्टे च शोणिते ॥ १४ ॥**
**ग्रन्थ्यर्बुदापचीक्षुद्ररोगरक्ताधिमन्थिषु ।**
**विदारीस्तनरोगेषु गात्राणां सादगौरवे ॥ १५ ॥**
**रक्ताभिष्यन्दतन्द्रायां पूतिघ्राणास्यदेहके ।**
**यकृत्प्लीहविसर्पेषु विद्रधौ पिटिकोद्गमे ॥ १६ ॥**
**कर्णौष्ठघ्राणवक्त्राणां पाके दाहे शिरोरुजि ।**
**उपदंशे रक्तपित्ते रक्तस्रावः प्रशस्यते ॥ १७ ॥**
**एषु रोगेषु शृङ्गैर्वा जलौकालाबुकैरपि ।**
**अथवापि सिरामोक्षैः कुर्याद्रक्तस्रुतिं नरः ॥ १८ ॥**

**दी०**—अथ रक्तस्रावो येषां विहितस्तानाह—शोथे व्रणशोथे एकाङ्गजेऽपि स्राव्यः । यतः सर्वाङ्गशोथो निषिद्धश्च स चाम्लभोजननिमित्तः । पाण्डुरोगयर्शसोदरिशोषिगर्भिणीनां च श्वयथौ, अङ्गदाहे अङ्गपाके च । रक्तवर्णेऽसृजः स्रुताविति केवलरक्तपित्ते । सपीडे दुर्जयेऽनिले इति । तथाहि-'उष्णाम्ललवणादेर्वातहरस्योपयोगात्कुपितेन शोणितेनावृतो वातो यदा वेदनाकारी तदा सिराव्यध इति । पाणिरोगे दाहादौ तेन बाहुरोगोऽपि गृह्यते । यदुक्तं-शोणितावृतवातजनितशोर्बाहुशोषापबाहुकयोरप्यंशयोरन्तरे सिराव्यधः । अपच्यामिति । उत्पन्नमात्रायामित्यर्थः । नतु रूढायां तस्याम् । क्षुद्ररोगेषु अरूंषिकादिषु । विद्रधाविति षड्विधविद्रधिषु मध्ये पञ्च विस्राव्याः तदुक्तं—'स्राव्या विद्रधयः पञ्च भवेयुः सर्वपादत' इति । उपदंशे इति । उपदंशग्रहणात् परिवर्तिकशूकदोषशुक्रव्यापत्सु च मेढ्रमध्ये सिराव्यधः । रक्तपित्तमिति । रोमकूपोद्गतमित्येके । शेषं सुबोधम् । अथ शोणितविस्रावं यैर्वस्तुभिः कुर्यात्तानि दर्शयन्नाह-एषु पूर्वोक्तेषु शोथप्रभृतिषु रोगेषु शृङ्गादिचतुःप्रकारा यथायोग्यानुरूपतो योज्या । शृङ्गं तु गोशृङ्गं तच्च सप्ताङ्गुलविस्तीर्णं भवति । तथाच 'स्रावे तु श्वेतगोशृङ्गं वक्रं सप्ताङ्गुलायतं । क्षिप्त्वान्तःपिचुपेशीकं योज्यं वातयुतेऽसृजि । अङ्गुष्ठमूलवन्मूलं छिद्रमग्रेऽस्य मुद्रवत् । वस्त्रपट्टावनद्धं च रक्तमाचूषणाद्धरेत्' इति । जलौकाः प्रसिद्धाः, ताश्च द्वादशधा भवन्ति । तासां षट् सविषाः तावन्त्य एव निर्विषाश्च[1] । विस्तारोऽपि तासामन्यत्र ज्ञातव्यः । अत्र ग्रन्थगौरवभयान्न लिखितः । अलाबुका तुम्बीशब्दवाच्या । तस्या लक्षणं केनचिदिति दर्शितम् । तद्यथा—अङ्गुष्ठाङ्गुलपरिणाहा चतुरङ्गुलाऽनाशसंमिता सुमुखा कृष्णमृदालिप्ततनुः श्रेष्ठा रक्ता च सेवनेऽलाबूः । सान्तर्दीर्घमयुता तया च

१-सविषलक्षणं वाग्भटे—'इन्द्रायुधविचित्रोर्ध्वराजयो रोमशाश्च याः । सविषा वर्जयेत्ताभिः कण्डूपाकज्वरभ्रमः' इति । जलमौकः स्थानं यासां ताः । द्विविधा स्त्रियः पुरुषाश्च । तन्वङ्ग्योऽत्यन्तमृदवः स्त्रियो विपरीताः पुरुषाः । स्त्रियः सुकुमारेषु, असुकुमारेषु पुरुषा योज्याः ।

विस्रावयेद्रक्तमिति। शिरामोक्षैरिति शिरा रक्तवहास्तासां मोक्षः शस्त्रेण कुर्यादिति। मोक्षो रुधिरस्येति॥ १३–१८॥

गू०—शोथे दाहेति शोथादिरोगेषु नृणां रक्तस्रावः प्रशस्यत इत्यन्वयः। रक्तवर्णे देहे असृजः स्रुतौ सादिस्रावे सपीडे पीडासहिते अनिले दुर्जये जेतुमशक्ये गात्रसादो गात्रशैथिल्यं रक्ताभिष्यन्दं आरक्तनेत्रं, स्पष्टमन्यत्। एषु रोगेषु केन रक्तं स्रावयेदित्याह—जलौका निर्विषा पुरातनाश्च 'मह्यकां वाजयवनयाज्यपौतनया (?) शुभा' इति सुश्रुतोक्तत्वात् अलाबु तुम्बीशिरा तद्विधानस्थानं तद्विधा निपुणैर्वैद्यैर्ज्ञेयम्॥ १३–१८॥

## येषु सिरामोक्षो निषिद्धः तानाह

**न कुर्वीत सिरामोक्षं कृशस्यातिव्यवायिनः।**
**क्लीबस्य भीरोर्गर्भिण्याः सूतिकापाण्डुरोगिणाम्॥ १९॥**
**पञ्चकर्मविशुद्धस्य पीतस्नेहस्य चार्शसाम्।**
**सर्वाङ्गशोथयुक्तानामुदरश्वासकासिनाम्॥ २०॥**
**छर्द्यतीसारदुष्टानामतिस्विन्नतनोरपि।**
**ऊनषोडशवर्षस्य गतसप्ततिकस्य च॥ २१॥**
**आघातस्रुतरक्तस्य सिरामोक्षो न शस्यते।**
**एषां चात्ययिके रोगे जलौकाभिस्तु निर्हरेत्॥ २२॥**

दी०—अथ येषां सिरामोक्षणं न स्यात्तानाह—कृशस्य क्षीणस्य पुंसः। क्लीबो नपुंसकः। पञ्चकर्मेति। वमनविरेचननिरूहानुवासननस्यानि तैः शोधितस्य पुंसः। सर्वाङ्गशोथयुक्तानामिति। सर्वाङ्गत्वेन व्रणशोथा एकाङ्गता अपि गृह्यन्ते। आघातात्प्रहारादिना स्रुतं रक्तं यस्य सिरामोक्षो द्विविधः प्रच्छन्नः सिराव्यधश्च। 'न कुर्वीत सिरामोक्षं कृतस्यातिव्यवायिन' इत्यादिव्याख्या पूर्वं प्रतिपादिता। अधुनाऽपि विशेषमाह। कृशस्य गर्भिणीनां चोपक्षीणधातुत्वाद्देहभयात्। अतिव्यवायिनो वातप्रकोपभयान्न विध्येत्। क्लीबस्य प्रधानधातुक्षये अल्पसत्वेन च निःसृतविनाशात्। भीरोश्च तमोबहुलत्वाल्लोहितदर्शनेन मूर्च्छाभयान्न विध्येत्। सूतिकाया गर्भिणीवत्। पञ्चकर्मविशुद्धस्येत्यादि। वान्तविरिक्तयोरक्तसर्जनयोरपीतस्नेहयोर्वमनविरेचनानन्तरमेव वातप्रकोपभयाच्छिरां न विध्येत्। आस्थापितजागरितयोर्मरुत्प्रकोपभयान्न विध्येत्। अनुवासितस्य मन्देऽग्नौ भूयोऽभिमान्द्यभयात्। अन्ये व्यथा अनुमानतो निरूपणीयाः। सिरामोक्षो न शस्यत इति द्विरुक्ते सति विशेषेण सिरानिषेधपरत्वात् वाच्यः, आत्ययिके तु शृङ्गालाबुजलौकाप्रभृतिपरत्वाच्चावेक्ष्य। अथात्ययिके कृशादीनामपि शोणितविस्रावविषयं वक्तुमाह—एषामिति। पूर्वोक्तानां कृशादीनामपि यदि आत्ययिके रोगे सति तदा जलौकाभिर्निर्हरेत्। परमसुकुमारयोगत्वान्निर्हरेद्विस्रावयेच्छोणितमिति शेषः। अत्ययोऽविनाशो भवत्यस्मादित्यात्ययिको विद्रध्यादिरनन्यसाध्यः। तथा विषजुष्टानां पुरुषाणामपि जलौकाभिस्तु निर्हरणं कर्तव्यम्। न केवलं जलौकाभिः सिरामोक्षेणापि विषप्रभावेण सकलशरीरदूषितत्वात् सर्वं रक्तं दूषितमेव। अतएव सिरामोक्षः। यतः 'सिरासर्वाङ्गशोधिनी' इति वचनात्॥ १९–२२॥

गू०—कृशस्य दुर्बलस्य अतिव्यवायिनः अतिस्त्रीसक्तस्य पञ्चकर्माणि वमनादीनि तच्छुद्धस्य अतिस्विन्नतनोः अतिस्वेदितस्य ऊनषोडशवर्षस्य बालस्य गतसप्ततिकस्य अत ऊर्ध्वं वृद्धस्येत्यर्थः। आघ्राणेन नासिकया रक्तं स्रुतस्य एषां च आत्ययिके न कार्यं जलौकाभी रक्तं न हरेत्॥ १९–२२॥

## वातादिदुष्टं केन स्रावयेदित्याह—

**तथा च विषदुष्टानां शिरामोक्षोऽपि शस्यते।**
**गोशृङ्गेण जलौकाभिरलाबुभिरपि त्रिधा॥ २३॥**
**वातपित्तकफैर्दुष्टं शोणितं स्रावयेद्बुधः।**
**द्विदोषाभ्यां तु संदुष्टं त्रिदोषैरपि दूषितम्॥ २४॥**
**शोणितं स्रावयेद्युक्त्या सिरामोक्षैः पदैस्तथा।**
**गृह्णाति शोणितं शृङ्गं दशाङ्गुलमितं बलात्॥ २५॥**
**जलौका हस्तमात्रं तु तुम्बी च द्वादशाङ्गुलम्।**
**पदमङ्गुलमात्रस्य सिरा सर्वाङ्गशोधिनी॥ २६॥**
**शीते निरभ्रे मूर्च्छायां तन्द्राभीतिमदश्रमैः।**
**स्रुतानां न स्रवेद्रक्तं तथा विण्मूत्रसङ्गिनाम्॥ २७॥**

दी०—अथ दोषविशेषेण शृङ्गादिविषयं विभजन्नाह—भिषगिति ग्रहणाद्दृष्टकर्मो ज्ञेयः। तेन वातदुष्टं शृङ्गेण, यतः 'उष्णं समधुरं शृङ्गं गव्यं स्निग्धं प्रकीर्तितम्। तस्माद्वातोपसृष्टेषु हितं तदवसेचने' इति। पित्तदुष्टं तु रुधिरं जलौकाभिर्निर्हरेत्। तथाहि 'शीताधिवासा मधुरा जलौका वारिसंभवा। तस्मात्पित्तोपसृष्टे तु हिता सा त्ववसेचने' इति। कफ-

दुष्टं तु—अलाबुभिरिति । अथातिव्यस्तमभिधाय पित्तदोषदुष्टस्य रक्तस्रावसेचनोपायमाह—द्विदोषाभ्यामित्यादिपदैः कूरप्रधानैः युक्तेत्यनेन यथायोग्यानुरूपं योज्यम् । तेन पदोपलक्षितत्वाच्छृङ्गालाबुप्रचारोऽवगन्तव्यः । यदुक्तं 'सर्वाणि वातपित्तकफदुष्टानि शोणितानि' । सर्वैरिति शृङ्गादिभिर्यथायोग्यमित्यभिप्रायः । अथ शृङ्गादीनां कियद्दूरे प्रचारस्तं दर्शयन्नाह—दशाङ्गुलमित्युभयतः । तेन चतुर्दिक्षु दशाङ्गुलमिति भावः । एवं सर्वत्र विषयपदं प्रच्छन्नम् । अतएवाह कश्चित्—'अवगाढे जलौका स्यात्प्रच्छन्नं पिण्डिते हितम् । सिरा च व्यापके रक्ते शृङ्गालाबु त्वचि स्थिते' इति । अथ शोणितं न स्रावयेत्तानाह—शीते इति । शीते शीतार्दिते देशे पुरुषे च निरभ्रे इति लङ्घिते । अतितन्द्रा निद्रानाशः। यदुक्तं 'मदमूर्च्छाश्रमार्तानां वातविण्मूत्रसङ्गिनाम् । निद्राऽभिभूतभीतानां नृणां नाऽसृक् प्रवर्तते' इति । विण्मूत्रसंगिनामिति । विण्मूत्रादीनां संगो प्रवृत्तिस्तद्युक्तानामित्यर्थः । विण्मूत्रग्रहणेनैव वातसंगस्याप्यवरोधः ॥ २३-२७ ॥

गू०—शृङ्गादीनां शोणितग्रहणे प्रमाणमाह—सुगमम् । येषां रक्तं न स्रावयेत् तानाह—शीते शीतकाले विण्मूत्रसंगिनां अप्रवर्तिनाम् ॥ २३-२७ ॥

**रक्ते विधानमाह—**

**अप्रवर्तितरक्ते च कुष्ठत्रिकटुसैन्धवैः ।**
**मर्दयेद्व्रणवक्त्रं च तेन सम्यक्प्रवर्तते ॥ २८ ॥**

दी०—इदानीमप्रवर्तितस्य शोणितस्य चिकित्सायोगं वक्तुमाह—यदा शीतादिहेतुभिर्न स्रवेत्तदा त्रिकटुकादिचूर्णं कृत्वा व्रणं घर्षयेत् । त्रिकटुकं शुण्ठीमरिचपिप्पलीसंज्ञं, कुष्ठं प्रसिद्धं, सैन्धवं च, शेषं सुगमम् ॥ २८ ॥

गू०—व्रणवक्त्रं व्रणमुखं, शोणितसमयविधानं चाह, सुगमम् ॥ २८ ॥

**इदानीं सुखविस्रावणार्थं हितोपदेशमाह—**

**तस्मान्न शीते नात्युष्णे न स्विन्ने नातितापिते ।**
**पीत्वा यवागूं तृप्तस्य स्रावयेच्छोणितं बुधः ॥२९॥**

दी०—तस्मादिति पूर्वोक्ताप्रवर्तितरक्तविषयदर्शनात् । न शीते नात्युष्णेति साधारणकाले । अतएवोक्तं सुश्रुते—'व्यभ्रे वर्षासु विध्येत ग्रीष्मकाले तु शीतले । हेमन्तकाले मध्याह्ने शस्त्रकालास्त्रयो मताः' इति । न स्विन्ने इति स्वेदिते । नातितापिते इति श्रमादिभिः संतप्ते । सूर्यतापादित्यन्ये । पीत्वा यवागूं तृप्तस्येति । यवागूरत्र तिलयवागूः तस्याः सद्यःस्नेहनीयत्वात् । रक्तोत्क्लेशकारित्वाच्च । अन्ये तु यवागूर्विरलद्रवेति बहुस्रुताम् । तृप्तस्येति कथनात् ॥ २९ ॥

**अथ केन हेतुना रक्तातिप्रवृत्तिस्तद्दर्शयन्नाह—**

**अतिस्विन्नस्योष्णकाले तथैवातिसिराव्यधात् ।**
**अतिप्रवर्तते रक्तं तत्र कुर्यात्प्रतिक्रियाम् ॥ ३० ॥**
**अतिप्रवृत्ते रक्ते च लोध्रसर्जरसाञ्जनैः ।**
**यवगोधूमचूर्णैर्वा धवधन्वनगैरिकैः ॥ ३१ ॥**
**सर्पनिर्मोकचूर्णैर्वा भस्मना क्षौमवस्त्रयोः ।**
**मुखं व्रणस्य बद्ध्वा च शीतैश्चोपचरेद्व्रणम् ॥ ३२ ॥**
**विध्येदूर्ध्वं सिरां तां च दहेत्क्षारेण वाग्निना ।**
**व्रणं कषायः संधत्ते रक्तं स्कन्दयते हिमम् ॥३३॥**
**व्रणास्यं पाचयेत्क्षारो दाहः संकोचयेत्सिराम् ।**
**वामाण्डशोथे दक्षस्य करस्याङ्गुष्ठमूलजाम् ॥ ३४ ॥**
**दहेत्सिरां व्यत्यये तु वामाङ्गुष्ठसिरां दहेत् ।**
**सिरादाहप्रभावेण मुष्कशोथः प्रणश्यति ॥ ३५ ॥**
**विषूच्यां पार्ष्णिदाहेन जायतेऽग्नेः प्रदीपनम् ।**
**संकुचन्ति यतस्तेन रसश्लेष्मवहाः सिराः ॥ ३६ ॥**
**यदा वृद्धिर्यकृत्प्लीह्नोः शिशोः संजायतेऽसृजः ।**
**तदा तत्स्थानदाहेन संकुचन्त्यसृजः सिराः ॥३७॥**
**रक्ते दुष्टेऽवशिष्टेऽपि व्याधिर्नैव प्रकुप्यति ।**
**अतः स्राव्यं सावशेषं रक्तं नातिक्रमो हितः ॥३८॥**
**आन्ध्यमाक्षेपकं तृष्णां तिमिरं शिरसो रुजम् ।**
**पक्षघातं श्वासकासौ हिक्कां दाहं च पाण्डुताम् ३९**
**कुरुतेऽतिसृतं रक्तं मरणं वा करोति च ।**
**देहस्योत्पत्तिरसृजा देहस्तेनैव धार्यते ॥ ४० ॥**
**विना तेन व्रजेज्जीवो रक्षेद्रक्तमतो बुधः ।**

दी०—अतिस्विन्नेत्यस्यार्थं स्वेदिते पुरुषे देशे वा । सोष्णकाले ग्रीष्मर्तौ शरदृतौ वा । अतिसिराव्यधादिति अज्ञप्रयुक्तेन शस्त्रेणावगाढव्यधनाद्रक्तातिस्रुतिर्भवति । पूर्वमुक्तं तत्र कुर्यात्प्रतिक्रियामित्यतः तां प्रतिक्रियां दर्शयन्नाह—अत्र सर्जरसो रालः । रसाञ्जनं प्रसिद्धं । यच्च दार्वीक्वाथसमुद्भवं रसाञ्जनसंज्ञं केचिदिति व्याख्यानयन्ति । सर्जः शालभेदः । रसाञ्जनं

तदेव । धवो वृक्षविशेषः प्रसिद्धः । धन्वनो धामन इति प्रसिद्धः । लोध्रादिभिश्चूर्णीकृताभिर्व्रणमुखमवचूर्ण्याङ्गुल्यग्रेणावपीडयेदिति प्रचारः । सर्पनिर्मोकः सर्पकञ्चुलिका । क्षौमवस्त्रयोर्भस्मेति । पटाम्बरदग्धभस्म क्षौमं अतसीभवम् । तद्दग्ध्वा भस्मकार्यं एवं वस्त्रस्य वस्त्रग्रहणात् कार्पाससंभवं भस्मापि मुखव्रणस्य । बध्वेति यथोक्तव्रणबन्धनद्रव्यैर्गाढं बध्नीयादित्यर्थः । शीतैश्चोपचरेद्व्रणं शीताच्छादनभोजनागारैः शीतैः प्रदेहपरिषेकैश्च व्रणं शस्त्रादिजनितं यद्युपचरेत् । वा पक्षान्तरप्रकारमाह—विध्येदूर्ध्वमित्यादि । प्राक्तनव्यक्तात् परस्थाने तामेव पूर्वविद्धां सिरां विध्येत् । रक्तगतिच्छेदनार्थम् क्षारेणाग्निना वा दहेदिति वस्त्रादिपदाभिप्रायः । अथ लोध्रादीनां शोणितातिप्रवृत्तौ प्रयुक्तानां प्रत्येकफलमाह–कषायोऽत्र लोध्रसर्जरसाञ्जनप्रभृतिकः । सच व्रणघर्षणार्थं पूर्वमेवात्र दर्शितः । अन्ये तु हरीतक्यादिः पञ्चवल्कलादिकः । एतेन किमुक्तं, अयं कषायः व्रणं शस्त्राघातजं रुधिरं संधत्ते निवारयेदित्यर्थः । व्रणग्रहणेन जलौकामुखक्षतजमपि ग्राह्यम् । हिमं शीतलम् । रक्तमित्यतिप्रवर्तितं स्कन्दयेदस्त्यानीभूतं करोतीत्यर्थः । क्षारोऽत्र विहितोऽपामार्गादिजनितः क्षौमादिजनितो वेत्यत्र विहितः, सच व्रणास्यं व्रणमुखं पाचयेत् । तेनातिप्रवर्तितरक्तं संस्थाप्य सम्यक्प्ररोहयेदित्यभिप्रायः । दाहोऽग्निकृतः शलाकाप्रवृत्तिभिः सच शिरां रक्तवहां संकोचयेत् । तेनातिप्रवर्तितं सम्यगवतिष्ठते । इदानीं रक्तातिस्रावे उपदेशं दर्शयन्नाह । अतः स्राव्यं सावशेषं इति । सावशेषं दोषरक्तं पुनः संशमनादिभिर्जयेदित्यभिप्रायः । यथातियोगनिःसृतस्य रक्तस्य व्यापदं दर्शयन्नाह । आन्ध्यमन्धताम् । अत्रोर्ध्वजत्रुगतरोगं शिरस्यतिप्रवृत्तं रक्तं करोति । शेषं सुबोधम् । अथ रक्तस्रावणे भूयोभूयोतिक्रमो न करणीय इत्याह । उत्पत्तिरिति । उपस्थितिप्रलयेषु शोणितमेव हेतुः शोणितेन । एतेनैव धार्यते स्थाप्यते । शेषं सुगमम् ॥ ३०-४० ॥

गू०—अतिस्विन्नस्येति सुगमम् । अतिप्रवृत्ते क्रियामाह–अतिप्रवृत्ते रक्ते एवं कुर्यात्तदाह—लोध्रं, सर्जो रालः, रजाञ्जनं दार्वीक्वाथोद्भवं, यवः काष्ठधन्वनः । सर्पनिर्मोकं सर्पकंचुकं वस्त्रं चीरं क्षौमं पट्टवस्त्रम् । शीतैः शीतोपचारैः तां शिरां बाहु ऊर्ध्वं विध्येत् । ऊर्ध्वं तस्मात् शिराबन्धात् ऊर्ध्वम् । तथाच वाग्भटे 'तामेव वा शिरां विध्येद्व्यधात्तस्मादनन्तरम्' इति । क्षारेण दहेत् लिंपेत्क्षारेण टङ्कणादिना क्षारेण वह्निना वा दहेद्दाहं कुर्यात् । कषायः कषायद्रव्यं रोध्रादि व्रणं संधत्ते संनहनं संकुरुते । हिमं शीतलं चन्दनादिद्रव्यं रक्तं स्कन्दयते शोषयति स्थापयति वा, क्षारः व्रणं पाचयति, दाहः शिराः संकोचयेत् दाहो यथा सुगमम् । विसूच्यामिति सुगमम् । दुष्टे रक्ते निःसृते किंचिदवशिष्टेऽपि व्याधिर्न कुप्यति अतः सावशेषं स्राव्यम् । अतिक्रमो न हितः । रक्तस्य निःशेषस्रावे दोषस्रावणात्तदाह—अतिस्रुतं अतिनिःसृतं रक्तस्य जीवस्य साम्ये । तद्देहस्रोतःपातादीनाह—सुगमम् ॥ ३०-४० ॥

**स्रुते रक्तेऽपि दोषकोपे प्रतीकारमाह—**

**शीतोपचारैः कुपिते स्रुतरक्तस्य मारुते ॥ ४१ ॥**
**कोष्णेन सर्पिषा शोथं सव्यथं परिषेचयेत् ।**
**क्षीणस्यैणशशोरभ्रहरिणच्छागमांसजः ॥ ४२ ॥**
**रसः समुचितः पाने क्षीरं वा षष्ठिका हिताः ।**

दी०—अथ शोणितावशेके पश्चात् कर्म दर्शयन्नाह । शीतोपचाराः सेकाद्याः । एतेन किमुक्तं, अनतिशीतादिकं प्रयत्नतः उपाचरणीयमिति सुबोधम् । अतएव कोष्णेन सर्पिषेति । ईषदुष्णेन सर्पिषेत्यर्थः । अथ रक्तातिक्रमेण क्षीणस्य पुरुषस्यानन्तरं भेषजमाह–क्षीणस्येति । रक्तक्षीणपुरुषस्येत्यर्थः । एणः कृष्णमृगः । उरभ्रो मेषः । हरिणस्ताम्रवर्णो मृगः । एषां मांसैः संस्रुतो रस इति । एके हरिणच्छागसंभवः रक्तः समुचित इति पठन्ति व्याख्यानयन्ति च । क्षीरं वा षष्ठिका हिता इति । क्षीरादिसिक्तमोदनं भुञ्जीतेत्यभिप्रायः ॥ ४१ ॥ ४२ ॥

गू०—स्रुते रक्ते व्रणस्थाने कुपिते दाहादित्वात् शीतोपचारैः उपचरेत्स्रुतरक्तस्य मारुते कुपिते सव्यथं शोथं कोष्णेन सर्पिषा सेचयेत् । रक्ते क्षीणे क्रियामाह–क्षीणस्य रक्तस्रावणक्षीणस्य पुरुषस्य एणादीनां मांसरसः हितः । षष्ठिकायुक्तं क्षीरं वा हितम् । एणो हरिणः, शशः, उरभ्रो मेषः, हरिणः कृष्णवर्णो मृगः, एणो रक्तवर्णः छागः ॥ ४१ ॥ ४२ ॥

**अथ रक्तस्रावणात् सम्यक् शुद्धिलक्षणान्याह—**

**पीडाशान्तिर्लघुत्वं च व्याधेरुद्रेकसंक्षयः ॥ ४३ ॥**
**मनःस्वास्थ्यं भवेच्चिह्नं सम्यग्विस्राविते ऽसृजि ।**

दी०—पीडाशांतिर्वेदनाव्यपगमः । लघुत्वं शरीरस्येति । एतच्छारीरं विस्रावितलिङ्गम् । मनःस्वास्थ्यमिति मनसः प्रसादः । एतेन मानसं लिङ्गं शेषं सुगमम् ४३

गू०—सम्यक् स्रुतरक्तलक्षणमाह—असृजि रक्ते सम्यक्विस्राविते सति पीडाशान्त्यादिलक्षणं भवतीति योजना । पीडा व्यथा तच्छान्तिः लघुत्वं देहस्य व्याधेः रोगस्य पुनः उद्रेक आधिक्यं तस्य संक्षयः सम्यक् नाशः मनःस्वास्थ्यम् ॥ ४३ ॥

**रक्तमोक्षे निषेधवर्गमाह—**

**व्यायाममैथुनक्रोधशीतस्नानप्रवातकान् ॥ ४४ ॥**
**एकाशनं दिवास्वप्नं क्षाराम्लकटुभोजनम् ।**
**शोकं वादमजीर्णं च त्यजेदाबलदर्शनात् ॥ ४५ ॥**

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण विरचितशार्ङ्गधरसंहितायामुत्तरखण्डे शोणितस्रावविधिर्नाम द्वादशोऽध्यायः ॥ १२ ॥

---

इदानीं रक्तस्रुतेः किं त्याज्यं तद्दर्शयन्नाह—अत्रातिशयं निषिद्धं नतु सकृदेव । शोकं धनबन्धुनाशादिजनितम् । वादमित्यतिभाषणम् । आबलदर्शनादिति । रक्तस्रुतस्य यावद्बलो न भवति तावद्व्यायामादयो निषिद्धा इत्यभिप्रायः ॥ ४४ ॥ ४५ ॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायामुत्तरखण्डे शोणितविस्रावविधिरध्यायः ॥ १२ ॥

---

गू०—व्यायामं श्रमं, मैथुनं स्त्रीसेवां, शीतं जलं, तेन स्नानं, प्रवातो बहुवातसेवनं, एकासनं, एकभोजनं, अम्लो अम्लरसः, कटु कटुरसः; क्षारो यवक्षारादिः, न सैन्धवनिषेधः तस्य क्षाराभावात्; वादं वाग्वादं अजीर्णं बहुभोजनजन्यं यावत् बलाधिक्यं भवति तावत् एतान् त्यजेत् ॥ ४४ ॥ ४५ ॥

इति श्रीकाशिराममिश्रकृतायां शार्ङ्गधरगूढार्थदीपिकायां चिकित्सास्थाने रक्तमोक्षविधिर्नामाध्यायः ॥ १२ ॥

---

# त्रयोदशोऽध्यायः ।

**अथ नेत्रप्रसादनकर्माणि व्याख्यास्यामः ।**

सम्बन्धश्चायं—शिराव्यधेनाऽपि नेत्रप्रसादनं भवति, तद्वत्सेकादिभिरपि । अत आह—

**तानि कानि कर्माणीत्याह—**

**सेक आश्चोतनं पिण्डी बिडालस्तर्पणं तथा ।**
**पुटपाकोऽञ्जनं चैभिः कल्पैर्नेत्रमुपाचरेत् ॥ १ ॥**

दी०—अथेदानीं नेत्रप्रसादनकर्माणि व्याख्यास्यामः । सेकोऽत्र धारादिना स्वेदरूपः । आश्च्योतनं नेत्रमध्ये तैलादिक्षेपणरूपम् । निमीलितोन्मीलनाक्षिभेदेन सेकआश्च्योतनयोर्भेदमाहुः । पिण्डीति प्रसिद्धा । अक्ष्णोर्बहिर्लेपः स बिडालसंज्ञः । तर्पणमिति नेत्रतृप्तिकरं कर्म तच्च नेत्रबस्तिरिति प्रसिद्धम् । पुटपाक इति । पुटपाक उक्त्या द्रव्यस्य रसो नेत्रप्रसादने विहितः स पुटपाकः कथितः । अस्यापि द्विविधं कर्म व्याचक्षते । एकं तर्पणवत् कार्यं अपरं आश्च्योतनवदिति । अञ्जनं प्रसिद्धं तच्च नानाविधम् चकारात् शस्त्रकर्माप्यत्र बोद्धव्यमिति केचित् । न स्वमतम् । तदन्यत्र ज्ञातव्यम् ॥ १ ॥

गू०—अथ नेत्रप्रसादनकर्माणि । एभिः सेकादिभिः कल्पैर्नेत्ररोगं उपाचरेत् । एषां लक्षणानि वक्ष्यति ॥ १ ॥

## सेकविधिः ।

**सेकस्तु सूक्ष्मधाराभिः सर्वस्मिन्नयने हितः ।**
**मीलिताक्षस्य मर्त्यस्य प्रदेयश्चतुरङ्गुलात् ॥ २ ॥**
**स चापि स्नेहनो वाते रक्ते पित्ते च रोपणः ।**
**लेखनश्च कफे कार्यस्तस्य मात्राऽधुनोच्यते ॥ ३ ॥**
**षड्वाक्शतैः स्नेहनेषु चतुर्भिश्चैव रोपणे ।**
**वाक्शतैश्च त्रिभिः कार्यः सेको लेखनकर्मणि ॥४॥**
**कार्यस्तु दिवसे सेको रात्रौ चात्ययिके गदे ।**

दी०—पूर्वमुक्तं सेक आश्च्योतनपिण्डीत्यादिकम् । तत्र तावत्सेकविधिरधुना विधीयते सूक्ष्मधारा नेत्राञ्जनशलाकाऽनुरूपं निर्गता द्रवपात्रात् । सर्वस्मिन्नयने इति सर्वाक्षिरोगे यथा दोषापेक्षया वा सर्वग्रहणं । समस्तनेत्रमण्डले इत्येके । चतुरङ्गुलमिति चतुरङ्गुलं यथा-

स्यात् तेन चतुरङ्गुलोत्सेधं धारां कृत्वा सेचयेदित्यभिप्रायः। यद्वा यथा सुखोत्सेधं सेचयेदित्यपि। अथवा चतुरङ्गुलेनाक्षिविस्तारं यावत् तावन्मर्यादीकृत्य द्रव्यकल्कं कृत्वा कर्पटे बध्वाक्षिसेकः कर्तव्य इति संप्रदायः। तथाह्युक्तं—'अव्यक्तेऽक्षिगदे कार्यं क्षौतस्थैर्गुण्डनं बहिः'इत्यादि। अथ दोषविशेषेण सेकस्य कर्मविशेषमाह—वाते केवलानिलजनितेऽक्षिरोगः, स्नेहनः स्नेहकृतस्वेदः कार्य इत्यर्थः। यथा—'सर्पिर्मांसवसामज्जामेदःस्वादौषधैः कृतः। स्नेहन इति विख्यातः'। रक्तपित्त इति व्यस्ते मिलिते वा रोपणः स्वेदः। रोपणस्तु तन्त्रान्तरे यथा—'स्तन्यजाङ्गलमध्वाज्यतिक्तकद्रवयाचितः। दृष्टेर्बलार्थं शीतश्च स्वेदः कार्योऽपि रोपण' इति। कफे कफप्रायेऽक्षिरोगे लेखनः स्वेद इति लेखनो दोषलेखन इति, सच स्निग्धस्य विहितः। तथाहि—'स्नेहो हितोतिरूक्षस्य स्निग्धस्यापि हि लेखनः। जाङ्गलानां यकृन्मांसैर्लेखनद्रवसंयुतैः॥ कृष्णलोहरजस्ताम्रशङ्खविद्रुमसिन्धुजैः। समुद्रफेनकासीसस्रोतोजदधिमस्तुभिः। लेखने लेखनस्वेदो विहितोयं भिषग्वरैः' इति। तस्येति त्रिविधसेकस्य मात्रापरिमाणं कार्यं कालं वा अधुना इदानीं तस्य मात्राऽधुनोच्यते इत्युक्तं प्राक् तदिदानीं तन्मात्राविशेषमाह—स्नेहः तेषु स्वेदेषु षट्शतवाक्यानि यावत् भवन्ति तावत् स्नेहस्वेदः कर्तव्य इत्यभिप्रायः। गुर्वक्षरोच्चारणं वा। तथाहि 'निमेषोन्मेषणं पुंसामङ्गुल्या च्छोटिकाथवा। गुर्वक्षरोच्चारणं वा वाङ्मात्रेयं स्मृता बुधैः' इति। अत्रैकलघ्वक्षरोच्चारणं वागिति पठन्ति। रोपणे स्वेदश्चतुर्भिरिति चतुःशतवाक्यैः लेखनकर्मणीति लेखनस्वेदे। एकशतवाक्यैः कृत्वा तावत् स्वेदः कार्य इत्यर्थः। अथाक्षिस्वेदस्य कालमाह—आसन्तके गदे प्रकुपितेऽक्षिरोगे रुजादिभिः पीडित इत्यर्थः। रात्रौ वेत्यत्र वाग्रहणात् निशायाः प्रथमो यामोऽभिप्रेतः। तथाहि—'स्निग्धोष्णैर्वातजः पित्तरक्तो मृदुशीतलैः। तीक्ष्णरूक्षोष्णविशदैः प्रशाम्यति कफात्मकः। तीक्ष्णोष्णमृदुशीतानां व्यत्यासात् सान्निपातिकः। तस्य कालो दिवा सर्वो यामः स्यात् प्रथमो निशि' इति॥ २–४॥

**गू०**—अथ सेकः। मीलिताक्षणः मुद्रितनेत्रस्य पुरुषस्य सेकः प्रदेयः। सेकः सेचनं, स सेकः सर्वस्मिन्नयने चतुरङ्गुलात् सूक्ष्मधाराभिहितः। धाराशब्दो दुग्धादिवाचकः। सेकस्य स्नेहादिभेदेन त्रिविधत्वमाह—स एव सेकः सेचनं वाते च रोपणः कफे लेखनः तस्य सेकस्य मात्राप्रमाणं अधुना उच्यते तां मात्रामाह–स्नेहेषु षड्भिर्वाक्शतैः सेकः कार्यः। चतुर्भिर्वाक्शतैः रोपणे सेकः कार्यः। लेखनकर्मणि त्रिभिर्वाक्शतैः सेकः कार्य इत्यर्थः। सेकः कदा कार्य इत्याह–सेकस्तु दिवस एव कार्यः। अन्यदपि असाधुको रात्रावपि॥ २–४॥

**अथ त्रिविधाक्षिस्वेदानां प्रयोगद्वारेण कर्म दर्शयन्नाह—**

स यथा—

स यथेत्यादिना दर्शयति ग्रन्थकारः।

**एरण्डत्वक्पत्रमूलैः शृतमाजं पयो हितम्॥ ५॥**
**सुखोष्णं सेचनं नेत्रे वाताभिष्यन्दनाशनम्।**
**परिषेको हितो नेत्रे पयः कोष्णं ससैन्धवम्॥ ६॥**
**रजनीदारुसिद्धं वा सैन्धवेन समन्वितम्।**
**वाताभिष्यन्दशमनं हितं मारुतपर्यये॥ ७॥**
**शुष्काक्षिपाके च हितमिदं सेचनकं सदा।**
**साबरं मधुकं तुल्यं घृतभृष्टं सुचूर्णितम्॥ ८॥**
**छागक्षीरे धृतं सेकात्पित्तरक्ताभिघातजित्।**
**त्रिफलालोध्रयष्टीभिः शर्कराभद्रमुस्तकैः॥ ९॥**
**पिष्टैः शीताम्बुना सेको रक्ताभिष्यन्दनाशनः।**
**लाक्षामधुकमञ्जिष्ठालोध्रकालानुसारिवाः॥ १०॥**
**पुण्डरीकयुतः सेको रक्ताभिष्यन्दनाशनः।**
**श्वेतलोध्रं घृते भृष्टं चूर्णितं पटविस्रुतम्॥ ११॥**
**उष्णाम्बुना विमृदितं सेकाच्छूलघ्नमम्बके।**

**दी०**—एष च वाताभिष्यन्दे प्रशस्तः। अभिष्यन्दो नेत्रामयः सरसपाकरुजः। अयमपि सर्वाक्षिरोगोत्पादक इत्यर्थः। तथाहि 'वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः। प्रायेण जायते घोरः सर्वनेत्रामयाकर' इति। एरण्डपत्रेत्यादियोगे क्षीरसाधनं क्षीरपरिभाषयैव बोद्धव्यम्। तन्त्रान्तरेऽयमधिमन्थनाम्ना विहितः तत्र कण्टकारीयुतामिति पठन्ति। तथाच—'कण्टकारीशिफैरण्डमूलत्वक्पत्रसाधितम्। क्षीरमाजं हितं सेके चक्षुःस्पन्दाधिमन्थयोः' इति। अन्यच्च 'परिषेके हितं नेत्रे पयः कोष्णं ससैन्धवम्। रजनीदारुसिद्धं वा सैन्धवेन समन्वितम्। वाताभिष्यन्दशमनं हितं मारुतप-

र्यये । शुष्काक्षिपाके विहितमिदं सेचनकं सदा ।' परिषेकं सेकाभिधानं पयोत्राजं गव्यं वा मानुषमिति केचित् । कोष्णमीषदुष्णम् । सैन्धवमिति ससैन्धवचूर्णप्रक्षिप्तम् । अथवा रजनीदारुसिद्धं पय इति योगः । क्षीरपाकमत्र क्षीरपरिभाषया कर्तव्यम् । रजनी दारुहरिद्रा । एके रजनीदारुद्रव्यद्वयं वदन्ति । तत्र रजनी हरिद्रा दारु देवदारु । मारुतपर्यायेपि हितमेतत् । मारुतपर्यायं तत् सर्वाङ्गं अक्षिरोगे पठन्ति । तद्यथा 'वारं वारं च पर्येति भ्रुवौ नेत्रे च मारुतः । रुजश्च विविधास्तीव्राः स ज्ञेयो वातपर्यय' इति । शुष्काक्षिपाके च इदमेव सेचनं सदा सर्वस्मिन्काले ऋतौ वा हितमित्यर्थः । शुष्काक्षिपाकमपि स चाक्षिगत एव बोद्धव्यः । तद्यथा 'यत् कूणितं दारुणरूक्षवर्त्म संलक्षनेत्राविलदर्शनं यत् । सरुक्षणं यत् प्रतिबोधने च शुष्काक्षिपाकोपहतं तदक्षि'इति । इदानीं रक्तपित्ताभिष्यन्दनाशनार्थं योगमाह–पित्ताभिघातोभिष्यन्द एव । यष्टीमधु यष्टी भद्रमुस्तकः श्रेष्ठमुस्तः नागरमोथा इति लोके पिष्ट इति कल्कीकृतः । अयं पोट्टलकः बद्धेन छेदो विहितः । पोट्टलकद्वारेणैव तदधरासेक इत्यन्ये । तगरं, सारिवा आस्फोता, पुण्डरीकं कमलं तदभावे तद्बीजान्यत्र गृह्यन्ते । अत्र क्वाथरूपेण सेको बोद्धव्यः । अथाक्षिसादनहरयोगमाह । अयं धाराभिधानोपि स्वेदः पोट्टलकेन बध्वा कर्तव्य इति संप्रदायः । अम्बके नेत्रे ॥ ५–११ ॥

**गू०**—स यथा–सुखोष्णं आजं पयः नेत्रे सेचने हितं । किंभूतं पयः । एरण्डत्वक्पत्रमूलैः शृतं क्वथितं । पुनः किंभूतं । वाताभिष्यन्दं आगतः पाकं नेत्रं । वाताभिष्यन्दे सेकः, अन्यच्च परिषेके सेचने ससैन्धवं कोष्णं पयश्छागीदुग्धं नेत्रे हितं, रजनी हरिद्रा दारु देवदारु सैन्धवेन समन्वितं तत्सिद्धं च हितं । किंभूतं । वाताभिष्यन्दशमनं तथा मारुतपर्यायेण रोगे । तथा शुष्काक्षिपाके हितं वाताभिष्यन्दे वातपर्यये शुष्काक्षिपाके सावरं लोध्रं मधुकं यष्टी एतत् तुल्यं संचूर्णितं घृतभृष्टं पुनः छागीक्षीरे स्थितं सेकात् सेचनात् पित्तरक्ताभिघातजिद्भवति । अभिघातो नेत्राभिघातः । नेत्राभिघाते सेकः शर्करा सिताऽभिष्यन्दे कालानिसारिवा कलिसारि । पुण्डरीकं श्वेतकमलं, रक्ताभिष्यन्दे पटविसृतं वस्त्रपूतं, पुनः उष्णाम्बुना मर्दितं, अम्बके नेत्रे सेकात्सेचनात् शूलघ्नं भवति नेत्रशूलेति ॥ ५–११ ॥

## आश्च्योतनम् ।

**अथाश्च्योतनकं कार्यं निशायां न कथंचन ॥ १२ ॥**
**उन्मीलितेऽक्षिण दृङ्मध्ये बिन्दुभिर्द्व्यङ्गुलाद्धितम् ।**
**बिन्दवोऽष्टौ लेखनेषु स्नेहने दश बिन्दवः ॥ १३ ॥**
**रोपणे द्वादश प्रोक्तास्ते शीते कोष्णरूपिणः ।**
**उष्णे च शीतरूपाः स्युः सर्वत्रैवैष निश्चयः ॥१४॥**
**वाते तिक्तं तथा स्निग्धं पित्ते मधुरशीतलम् ।**
**तिक्तोष्णरूक्षं च कफे क्रमादाश्च्योतनं हितम् ॥१५॥**
**आश्च्योतनानां सर्वेषां मात्रा स्याद्वाक्शतं हिता ।**
**निमेषोन्मेषणं पुंसामङ्गुल्योश्छोटिकाऽथवा ॥ १६ ॥**
**गुर्वक्षरोच्चारणं वा वाङ्मात्रेयं स्मृता बुधैः ।**

**दी०**—अथाश्च्योतनमाह—आश्च्योतनं नेत्रसेचनं, तच्चादावेव सर्वेषामक्षिरोगाणाम् । उक्तंच वाग्भटे—'सर्वेषामक्षिरोगाणामादावाश्च्योतनं हितम् । रुक्तोष्णकण्डूघर्षाश्रुदाहरोगनिबर्हणम्' इति । अत्रादाविति निरामावस्थायां वातपित्तवज्ज्ञेयम् । निरामावस्था च रुक्षाद्युपलक्षिता ज्ञेया । उक्तंच विदेहे—'अभिष्यन्देऽवमन्थे च नेत्रयोः कफसंभवे । उत्पन्न एव कर्तव्यं नेत्रयोः कफनाशनम् । लाक्ष्याश्चाक्ष्णोः परीषेकस्तीक्ष्णश्चाश्च्योतनादिकम्' इति । अत्र सामनिरामलक्षणं च यथा—'उदीर्णवदनं नेत्रं रागद्वेषसमन्वितम् । घर्षनिस्तोदशूलास्रयुक्तमामान्वितं विदुः । मन्दवेदनताकण्डूः संरम्भस्तु प्रसन्नता । प्रशस्तवर्त्मता चाक्ष्णोः संपक्वं गदमादिशेत्' इति । निशायां न कथंचन इति । रात्रौ न कर्तव्यमेवेत्यनेन दिवा कर्तव्यताऽस्य प्रतिपादिता । द्व्यङ्गुलादिति । द्व्यङ्गुलोत्सेधं कृत्वा द्व्यङ्गुलोच्चेनोपादेयमित्यर्थः । बिन्दुभिरिति । बिन्दुपरिमाणं च वाग्भटे—'प्रदेशिन्यङ्गुलपर्वद्वयान्मग्नसमुद्धृतात् । यावत्पतत्यसौ बिन्दुर्दशाष्टौ षट् क्रमेण ते' इति । लेखनादिषु बिन्दुसंख्यामाह—बिन्दव इति । बिन्दवो लेखनेऽष्टौ, स्नेहने दश, रोपणे द्वादश । ते शीते कोष्णरूपिण इति । ते बिन्दवः शीते शीतकाले हेमन्ते शिशिरे च कोष्णरूपिणः कोष्णाः । एवं उष्णकाले शीतरूपिणः । एष निश्चयः सर्वत्र लेखनादौ ज्ञेयः । वातादिक्रमात् स्निग्धादिक्रमाह—वात इति । वातोऽत्र नेत्राभिष्यन्दादौ तिक्तरसप्रायं स्निग्धं च हितम् । पित्ते मधुरशीतलप्रायं, कफे तिक्तोष्णरूक्षं च आश्च्योतनं नेत्रसेचनरूपं इति । अथाऽश्च्योतने मात्रास्वरू-

पमाह—आश्च्योतनेष्विति । सर्वेषु लेखनादिषु वाक्-शतमिति । गुर्वक्षरोच्चारणं वाक् नेत्रसेचने तु स्नेहनादिषु मात्राविशेषः प्रोक्तः । अत्र तु नेत्रमध्ये बिन्दुक्षेपणत्वेन सर्वेषु वाक्शतमात्रमेव । केचिदत्र मात्रालक्षणं पठन्ति तद्यथा—'निमेषोन्मेषणं पुंसामङ्गुल्या छोटिकाथवा । गुर्वक्षरोच्चारणं वा वाङ्मात्रेयं स्मृता बुधैः' इति । अयं पाठो बहुपुस्तकेषु नास्ति ॥ १२-१६ ॥

गू०—अथाश्च्योतनम् । अथानन्तरं आश्च्योतनं कथ्यते तत् आश्च्योतनं निशायां रात्रौ न कार्यं कथंचन । तल्लक्षणमाह—उन्मीलित उद्घाटितेऽक्षिण दृङ्मध्ये द्व्यङ्गुलात् बिन्दुभिर्यद्दीयते तदेवाश्च्योतनम् । लेखनादौ कियन्तो बिन्दवो देयास्तदाह—ते बिन्दवः शीते शीतकाले कोष्णरूपिणः उष्णे उष्णकाले शीतरूप एष निश्चयः । वातादौ कीदृशा आश्च्योतना देयास्तदाह—सुगमम् । आश्च्योतननामान्याह—बुधैः पण्डितैः इयं वाङ्मात्रा स्मृता । केयं तदाह सर्वेषां आश्च्योतनानां वाङ्मात्रा हिता निमेषोन्मेषणं निमेषो नेत्रनिमेषस्तन्यउन्मेषकरणं तथा अङ्गुल्याच्छोटिकी गुर्वक्षरो दीर्घाक्षरस्तस्योच्चारणं द्वयं वाङ्मात्रा एका ॥ १२-१६ ॥

### अथाश्च्योतनार्थं योगानाह—

**बिल्वादिपञ्चमूलेन बृहत्येरण्डशिग्रुभिः ॥ १७ ॥**
**क्वाथ आश्च्योतने कोष्णो वाताभिष्यन्दनाशनः ।**
**अम्बुपिष्टैर्निम्बपत्रैस्त्वचं लोध्रस्य लेपयेत् ॥ १८ ॥**
**प्रताप्य वह्निना पिष्ट्वा तद्रसो नेत्रपूरणात् ।**
**वातोत्थं रक्तपित्तोत्थमभिष्यन्दं विनाशयेत् ॥१९॥**
**त्रिफलाश्च्योतनं नेत्रे सर्वाभिष्यन्दनाशनम् ।**
**स्त्रीस्तन्याश्च्योतनं नेत्रे रक्तपित्तानिलार्तिजित् ॥२०॥**
**क्षीरसर्पिर्घृतं वापि वातरक्तरुजं जयेत् ।**

दी०—अरणिः अग्निमन्थभेदः तदभावे अग्निमन्थ एव द्विगुणः कार्य इति परिभाषोक्तत्वात् । अथान्यप्रकारमाह—लोध्रो वृक्षविशेषः तस्य त्वक् त्वच एव लोध्रसंज्ञा विख्याता । अत्र स्त्रीदुग्धं संमिश्र्याश्च्योतनं कार्यमिति व्यवहारः । तन्त्रान्तरेऽपि 'निम्बस्य पत्रैः परिलिप्य लोध्रं स्वेदाग्निना चूर्णमथापि कल्कम् । आश्च्योतनं मानुषदुग्धयुक्तं पित्तास्रदाहापहमग्र्यमुक्त'मिति । अपरमपि 'त्रिफलाश्च्योतनं नेत्रे सर्वाभिष्यन्दनाशनम्' । त्रिफलाश्च्योतनमिति क्वाथरूपम् । अथवा-हिमकषायरूपं बोद्धव्यं कल्करूपमित्येके । यदुक्तं 'जाता रोगा विनश्यन्ति न भवन्ति कदाचन । त्रिफलायाः कषायेण प्रातर्नयनधावनः ॥ स्त्रीस्तन्याश्च्योतनं नेत्रे रक्तपित्तानिलार्तिजित् । क्षीरसर्पिर्घृतं चापि वातरक्तरुजं जयेत्' । क्षीरसर्पिरिति दोहनमात्रेणैवोत्पन्नं तं हैयङ्गवीनमित्याहुः । क्षीरमत्र गव्यम् । तथाच 'गव्यक्षीरोत्थितं सर्पिस्तर्पणार्थं विधीयते । दृष्टिप्रसादनं श्रेष्ठं तिमिरस्यापि कर्षण'मिति । यद्वा क्षीरेण साधितं सर्पिः क्षीरसर्पिः घृतमिति केवलं गव्यमाजं वा ग्राह्यम् । स्त्रीस्तन्यादियोगोयमपि आगन्तुजदोषे प्रशस्त इत्याहुः । तन्त्रान्तरीयोक्तत्वात् । यदुक्तं 'आगन्तुदोषं प्रसमीक्ष्य कार्यं वक्त्रोष्मणा स्वेदनमादितस्तु । आश्च्योतनं स्त्रीपयसा च सद्यो यच्चापि पित्तक्षतजापहं स्यात्' इति ॥ १७-२० ॥

गू०—तद्यथा-बिल्वादिपञ्चमूलेन 'बिल्वाग्निमन्थस्योनाकपाटला कुम्भकारा बृहती कण्टकारी वाताभिष्यन्दे अम्बु जलं तत्पिष्टैर्निम्बपत्रैर्लोध्रस्य त्वचं लेपयेत् । तां त्वग्निना प्रताप्य पिष्ट्वा तद्रसः नेत्रपूरणाद् अभिष्यन्दं विनाशयेत् । रक्तवातपित्ताभिष्यन्दे क्षीरसर्पिर्दुग्धघृतैः । घृतं मन्थनोत्थं, आश्च्योतने अभिष्यन्दशूले ॥ १७-२० ॥

### इदानीं पिण्डिकाविधानमाह—

**पिण्डी कवलिका प्रोक्ता बध्यते पट्टवस्त्रकैः ॥२१॥**
**नेत्राभिष्यन्दयोग्या सा व्रणेष्वपि निबध्यते ।**
**अभिष्यन्देऽधिमन्थे च संजाते श्लेष्मसंभवे ॥२२॥**
**स्निग्धस्विन्नोत्तमाङ्गस्य शिरस्तीक्ष्णैर्विरेचयेत् ।**
**अधिमन्थेषु सर्वेषु ललाटे व्यधयेच्छिराम् ॥ २३ ॥**
**अशान्ते सर्वथा मन्थे भ्रुवोरुपरि दाहयेत् ।**
**अभिष्यन्देषु सर्वेषु बध्नीयात्पिण्डिकां बुधः ॥२४॥**

दी०—व्रणेष्वपि निबध्यत इति । व्रणमत्र शस्त्रक्षाराग्निकृतं जलौकापातनकृतं वा तत्रैव बोद्धव्यम् । अन्यद्व्रणं च यन्नेत्रयोर्दोषजनितम् । तथागन्तुजे पिण्डीविहिता अथास्याग्रेऽभिष्यन्दाधिमन्थयोः कर्मान्तरोक्तं श्लोकद्वयमाहुरेके । एतद्द्वयं च प्रकरणान्तरोक्तत्वेनास्माभिरपि नात्र वर्णितम् । असंगतत्वात् । अथ सर्वा-

भिष्यन्दिपिण्डिकाविषयमाह—सर्वेष्विति । वातपित्तकफरक्तस्वरूपेषु । बुधैरिति ग्रहणेन यथायोग्यं द्रव्यादिकं विचार्य बध्नीयादित्यर्थः । अतएव वाताभिष्यन्दे स्निग्धोष्णा पिण्डिका देया । एवं पित्तरक्तादिके मधुरशीतेत्यभिप्रायः ॥ २१–२४ ॥

गू०—अथ पिण्डिका वस्त्रपट्टकैः बध्यते सा पिण्डिका बलिका च प्रोक्ता सा नेत्राभिष्यन्दयोग्या । व्रणेष्वपि सा वध्यते । अथाभिष्यन्दे शिरोविरेचनमाह श्लेष्मसंभवे अभिष्यन्दे तथाधिमन्थे नेत्ररोगे स्निग्धस्विन्नोत्तमाङ्गस्य पुरुषस्य शिरस्तीक्ष्णैर्नस्यैर्विरेचयेत् स्रावयेत् । स्निग्धकृततैलाभ्यङ्गस्विन्नं स्वेदितम् उत्तमाङ्गं मस्तकं यस्य सः । तस्य अधिमन्थान्याक्रियामाह—सुगमम् ॥ २१–२४ ॥

**इदानीं पिण्डिकार्थं प्रयोगवरानाह—**

**वाताभिष्यन्दशान्त्यर्थं स्निग्धोष्णा पिण्डिका भवेत्**
**एरण्डपत्रमूलत्वङ्निर्मिता वातनाशिनी ॥ २५ ॥**
**पित्ताभिष्यन्दनाशाय धात्रीपिण्डी सुखावहा ।**
**महानिम्बफलोद्भूता पिण्डी वा पित्तनाशिनी ॥२६॥**
**शिग्रुपत्रकृता पिण्डी श्लेष्माभिष्यन्दनाशिनी ।**
**निम्बपत्रकृता पिण्डी श्लेष्मपित्तहरा भवेत् ॥२७॥**
**त्रिफलापिण्डिका प्रोक्ता नाशने श्लेष्मपित्तयोः ।**
**पिष्ट्वा काञ्जिकतोयेन घृतभृष्टा च पिण्डिका ॥२८॥**
**लोध्रस्य हरति क्षिप्रमभिष्यन्दमसृग्भवम् ।**
**शुण्ठीनिम्बदलैः पिण्डी सुखोष्णा स्वल्पसैन्धवा २९**
**धार्या चक्षुषि संयोगाच्छोथकण्डूव्यथापहा ।**

दी०—तत्र वाताभिष्यन्दनाशनीं यथा (वातेति) । अत्रैरण्डस्य पत्राणि मूलं त्वक् चाङ्गत्रयं संगृह्य कल्कमाहुः । कल्कार्थं चात्र पयः इत्यपरे । सामान्यत्वेन जलं देयमिति सर्वत्र । वातनाशिनीत्यनेनैव केवलं वाताभिष्यन्दे कथितं किन्तु अधिमन्थादीनां वातरुजायामपि शस्तमेतत् । एवं पित्तकफयोरपि बोद्धव्यम् । अथ पित्ताभिष्यन्दनाशनार्थं पिण्डीयोगमाह—धात्री आमलकीफलं । अत्र पेषणार्थं काञ्जिकं जलं वा सर्वत्र । महानिम्बो निम्बार्कः सच वकाणनिंबशब्दवाच्यः । अत्राप्युक्ते जलम् । एके शिग्रुपत्रकृतेत्यादिकं पाठमन्यथा पठन्ति 'शिग्रुपत्रकृता पिण्डी श्लेष्माभिष्यन्दहारिणी । निम्बपत्रकृता पिण्डी वातपित्तविनाशिनी' इति श्लेष्मपित्तयोरिति । अथ श्लेष्माभिष्यन्दे योगमाह । शिग्रुः सोभाञ्जनकः त्रिफला हरितक्यादिकम् । अत्रापि कल्कार्थं यथायोग्यं विहितं द्रवं देयम् । अथ रक्ताभिष्यन्दार्थं योगमाह—पिष्ट्वा काञ्जिकतोयेनेति । काञ्जिकद्रवभागेन । तदभावे जलमत्र ग्राह्यम् । तेन पूर्वं लोध्रं काञ्जिकेन संपिष्य पश्चात् घृतेन संपाच्य पिण्डिका कार्या । अथाभिष्यन्दादीनां शोथकण्डूहरणार्थं योगोत्तममाह । अत्र शुण्ठीनिम्बदलापेक्षया स्वल्पो देयः । स्वल्पसैन्धवेति शुण्ठीमानाल्लघुतरम् । संयोगो पिण्डीविशेषणम् । तेन संयोगयुक्ता वस्त्रपट्टादिभिः सुसंहता इत्यर्थः । एके संयोगादिति पञ्चम्यन्तं पठन्ति । तत्रास्याः संयोगादेव शोथादयो यान्तीति भावः ॥ २५–२९ ॥

गू०—अथाभिष्यन्दे क्रियामाह । अथ वातादिनाशे पिण्डिकामाह—महानिम्बफलेति । वाते पित्ते च पिण्डी । अथ श्लेष्माभिष्यन्दे पिण्डी शिग्रुः शोभाञ्जनः । अथ श्लेष्मपित्तरक्ताभिष्यन्दे पिण्डी घृतभृष्टा काञ्जिकपिष्टा लोध्रपिण्डिका असृग्भवं रक्तभवं अभिष्यन्दं हरति । शोथकण्ड्वादौ पिण्डी निम्बदलैः निम्बपत्रैः । स्पष्टमन्यत् ॥ २५–२९ ॥

## अथ बिडालविधिः ।

**बिडालको बहिर्लेपो नेत्रे पक्ष्मविवर्जितः ॥ ३० ॥**
**तस्य मात्रा परिज्ञेया मुखलेपविधानवत् ।**

दी०—इदानीं बिडालकविषयमाह—मुखलेपविधानवदित्यनेन यथा मुखलेपविधिस्तद्वदत्रापि बोद्धव्यं, मुखलेपविधिस्तु पूर्वाध्याये लेपनमूर्धतैलकर्णपूरणाख्ये ज्ञातव्यः ॥ ३० ॥

गू०—अथ बिडालः नेत्रपक्ष्मविवर्जिते बहिर्भागे यो लेपः स बिडालक उच्यते तस्य मात्रा मुखलेपमात्रा मुखलेपविधानवद्विज्ञेया ॥ ३० ॥

## अथ लेपः ।

**स यथा—**

दी०—अथ लेपमाह—स यथेत्यनेन योगान् दर्शयति ग्रन्थकारः ।

**यष्टीगैरिकसिन्धूत्थदार्वीतार्क्ष्यैः समांशकैः ॥ ३१ ॥**
**जलपिष्टैर्बहिर्लेपः सर्वनेत्रामयापहः ।**
**रसाञ्जनेन वा लेपः पथ्याविश्वदलैरपि ॥ ३२ ॥**
**कुमारिकाग्निपत्रैर्वा दाडिमीपल्लवैरपि ।**
**वचाहरिद्राविश्वैर्वा तथा नागरगैरिकैः ॥ ३३ ॥**
**दग्ध्वा ससैन्धवं लोध्रं मधूच्छिष्टयुते घृते ।**
**पिष्टमञ्जनलेपाभ्यां सद्यो नेत्ररुजापहम् ॥ ३४ ॥**
**लोहस्य पात्रे संघृष्टो रसो निम्बफलोद्भवः ।**
**किंचिद्घनो बहिर्लेपान्नेत्रबाधां व्यपोहति ॥ ३५ ॥**
**संचूर्ण्य मरिचं केशराजस्वरसमर्दनात् ।**
**लेपनादर्मणां नाशं करोत्येष प्रयोगराट् ॥ ३६ ॥**
**खिन्नां भित्त्वा विनिष्पीड्य भिन्नामञ्जननामिकाम् ।**
**शिलैलानतसिन्धूत्थैः सक्षौद्रैः प्रतिसारयेत् ॥३७॥**

**टी०**—यष्टी मधुयष्टी। एके यष्टीस्थाने पथ्यां पठन्ति व्याख्यानयन्ति च । पथ्या हरीतकी सिन्धूत्थं सैन्धवं दार्वी हरिद्रा तार्क्ष्यं रसाञ्जनं तदभावे दारुहरिद्रा द्विगुणा ग्राह्या तद्गवत्वात् अपरमपि वक्ष्यमाणचतुष्टयं सर्वनेत्रामये विहितमिति शेषः। किं तदाह—रसाञ्जनेन लेप एको योगः। रसाञ्जनं दार्वीक्वाथसमुद्भवं द्रव्यविशेषः । विश्वादलैरपि पथ्या विश्वदलैरपि द्वितीयो योगः। पथ्या हरीतकी विश्वं शुण्ठी एतयोर्दलानि पत्राणि अथवा दलस्थाने जलेति पाठः। तत्र जलं वालकं। वचा हरिद्रा विश्वैः कृत्वा तृतीयो योगः। नागरगैरिकैश्चतुर्थः विश्वानागरशब्दाभ्यां शुण्ठी कथिता। बध्वा ससैन्धवं लोध्रं मधूच्छिष्टघृतपिष्टमञ्जनलेपाभ्यां सद्यो नेत्ररुजापहं सैन्धवमत्र मनाक् देयम्। मधूच्छिष्टं सिक्थकम्। लोके मोमशब्दवाच्यम्। घृतमत्र गव्यं लेपोत्र पुनर्जलेन प्रचरति अञ्जनं तु घृतेनैव व्यवहारः। सद्यो नेत्ररुजापहमिति। अभिष्यन्दोधिमन्थादीनां वेदनापहमिति । अयः 'लोहपात्रेण संघृष्टो रसो निम्बूफलोद्भवः। किंचिद्घनो बहिर्लेपो नेत्रबाधं व्यपोहति'। निम्बूफलरसस्तु लोहपात्रे प्रक्षिप्य तदनु लोहदण्डेनापि घर्षयेत् यावत् घनो भवति । एके लोहपात्रेणेत्यस्य स्थाने कांस्यपात्रेणेति पठन्ति मानयन्ति च । नेत्रबाधामिति नेत्रव्यथां तेनाभिष्यन्दादीनामित्यर्थः । अथार्मनाशनार्थं योगमाह । केशराजो मार्कवः लोके घमराशब्दवाच्यः। अर्मातिरक्तार्मसंज्ञं, नेत्राभ्यन्तरेस्य प्रचार इत्येके। प्रयोगराट् प्रयोगश्रेष्ठः। खिन्नां भित्वा विनिष्पाद्य भिन्नामञ्जननामिकां शिलैलामनसिन्धूत्थैः सक्षौद्रैः प्रतिसारयेत्। प्रतिसारयेदिलनेन शिलाचूर्णं कृत्वा क्षौद्रेण संप्लाव्य योज्यं। कुत्र योज्यं तदाह अञ्जननामिकामिति। गुह्यञ्जनीति लोके। सा च पटलान्ते पक्ष्मसमीपे भवति। खिन्नामिति तां पूर्वं संस्वेद्य पश्चात् शस्त्रेण भित्वा विदार्य तदनु निष्पीड्यत इति पूयमानीय पश्चात् प्रतिसारयेत्। अतएव भिन्नामिति विशेषणमस्याः शिलैलनतसिन्धूत्थैरिति शिला मनःशिला एला क्षुद्रैला, नतं तगरं, सिन्धूत्थं सैन्धवम् ॥ ३१-३७ ॥

**गू०**—स यथा—यष्टी मधुयष्टी, दार्वी दारुहरिद्रा, तार्क्ष्यः खर्परं, समांशकैः समभागैः सर्वनेत्रामयापहः सर्वे ये नेत्रामया अभिष्यन्दादयस्तान् हन्ति। अन्यच्च रसाञ्जनं दार्वीक्वाथोद्भवं, पथ्या हरीतकी, विश्वा शुण्ठी, दलं पत्रजं, कुमारी, अग्निपत्रैः एतैः षड्योगाः। अन्यच्च लोध्रं सैन्धवं अग्नौ दग्ध्वा मधूच्छिष्टे घृते कृतं एतत्पिष्टं अञ्जनलेपाभ्यां सद्यो नेत्ररुजापहं भवति। अन्यच्च सुगमम्। अथार्मसु लेपः मरिचं संचूर्णयित्वा केशराजो भृङ्गराजः, तस्य स्वरसमर्दनात् पुनः लेपनात् एषः प्रयोगराट् अर्मणां नाशं करोति। अर्म व्रणविशेषः। अथ प्रतिसारणं अञ्जननामिकां खिन्नां स्वेदितां पुनः भित्वा विदारयित्वा पुनः विनिष्पीड्य पीडयित्वा शिला एला नतं तगरं सिन्धूत्थं सैन्धवं सक्षौद्रैरेतैः प्रतिसारणं कुर्यात्। नेत्राञ्जननामिका नेत्रपिडका ॥ ३१-३७ ॥

## तर्पणम्।

**अथ तर्पणकं वच्मि नेत्रतृप्तिकरं परम् ।**
**यद्रूक्षं परिशुष्कं च नेत्रं कुटिलमाविलम् ॥ ३८ ॥**
**शीर्णपक्ष्मशिरोत्पातकृच्छ्रोन्मीलनसंयुतम् ।**
**तिमिरार्जुनशुक्राद्यैरभिष्यन्दाधिमन्थकैः ॥ ३९ ॥**
**शुष्काक्षिपाकशोथाभ्यां युक्तं वातविपर्ययैः ।**
**तन्नेत्रं तर्पणे योज्यं नेत्ररोगविशारदैः ॥ ४० ॥**
**दुर्दिनात्युष्णशीतेषु चिन्तायासभ्रमेषु च ।**
**अशान्तोपद्रवे चाक्ष्णि तर्पणं न प्रशस्यते ॥ ४१ ॥**
**वातातपरजोहीने देशे चोत्तानशायिनः ।**
**आधारौ माषचूर्णेन क्लिन्नेन परिमण्डलौ ॥ ४२ ॥**
**समौ दृढावसंबाधौ कर्तव्यौ नेत्रकोशयोः ।**
**पूरयेद्घृतमण्डेन विलीनेन सुखोदकैः ॥ ४३ ॥**

अथवा शतधौतेन सर्पिषा क्षीरजेन वा ।
निमग्नान्यक्षिपक्ष्माणि यावत्स्युस्तावदेव हि ॥४४॥
पूरयेन्मीलिते नेत्रे तत उन्मीलयेच्छनैः ।
धारयेद्वर्त्मरोगेषु वाङ्मात्राणां शतं बुधः ॥ ४५ ॥
स्वच्छे कफे सन्धिरोगे मात्रापञ्चशतं हितम् ।
शुक्ले च षट्शतं कृष्ण-रोगे सप्तशतं मतम् ॥४६॥
दृष्टिरोगेष्वष्टशतमधिमन्थे सहस्रकम् ।
सहस्रं वातरोगेषु धार्यमेवं हि तर्पणम् ॥ ४७ ॥
स्विन्नेन यवपिष्टेन स्नेहवीर्येरितं ततः ।
यथास्वं धूमपानेन कफमस्य विशोधयेत् ॥ ४८ ॥
एकाहं वा त्र्यहं वापि पञ्चाहं चेष्यते परम् ।
तर्पणे तृप्तिलिङ्गानि नेत्रेष्वेतानि भावयेत् ॥ ४९ ॥
सुखस्वप्नावबोधं च वैशद्यं वर्णपाटवम् ।
निवृत्तिर्व्याधिशान्तिश्च क्रियालाघवमेव च ॥५०॥
अथ सास्रु गुरु स्निग्धं नेत्रं स्यादतितर्पितम् ।
रूक्षमस्राविलं रुग्णं नेत्रं स्याद्धीनतर्पितम् ॥ ५१ ॥
रूक्षस्निग्धोपचाराभ्यामेतयोः स्यात्प्रतिक्रिया ।

दी०—इदानीं तर्पणविधानं दर्शयन्नाह—अथेत्यादि । विडालानन्तरं तर्पणकं दृष्टिप्रसादनकं कर्म वच्मि । कीदृशं नेत्रं तर्पणयोग्यं भवति तदाह—यद्रूपमित्यादि । यादृशं रूक्षं परिशुष्कमिति वाताभिष्यन्दादेव । आविलं कलुषं शीर्णपक्ष्मेति रोमशातनं शिरोत्पात इति यथा—'अवेदना वापि सवेदना वा यस्याक्षिराज्यो हि भवन्ति ताम्राः । मुहुर्विरज्यंति च याः स तादृग्व्याधिः शिरोत्पात इति प्रदिष्ट' इति । कृच्छ्रोन्मीलनसंयुतमिति कृच्छ्रोन्मीलनः आकुंचनसंज्ञः । यथा—'वाताद्या वर्त्मसंकोचं जनयन्ति गता यदा । तदा द्रष्टुं न शक्नोति कुंचनं नाम तद्विदुः' इति । तिमिरार्जुनशुक्राद्यैरिति तिमिरं तु लिङ्गनाशस्य मूलमेव । यतश्चतुर्थपटलगतो दोषस्तिमिरं करोति तच्च नानारूपं भवति । अर्जुनमिति शुक्लभागगतरोगविशेषः । यदुक्तं 'एको यः शशरुधिरोपमश्च बिन्दुः शुक्लस्थो भवति तदर्जुनं वदन्ती'ति । शुक्रमिति कृष्णभागगतं तच्च त्रिविधं शुद्धशुक्रं शिराशुक्रं क्षतशुक्रं चेति । शुक्रमत्र पुष्पशब्दवाच्यं फूलीति लोके । आदिग्रहणादेतादृशैरन्यैरपि । अभिष्यन्दाधिमन्थकैरिति अभिष्यन्दो नेत्रामयः । अयमपि सर्वनेत्ररोगोत्पादक इत्यर्थः । अधिमन्थो नेत्रे शोथरूपो रुजावांश्च भवति स च वृद्धेनाभिष्यन्देनैव क्रियावतां तत्पुरुषाणां चतुर्विधो जायते । शुष्काक्षिपाकशोथाभ्यामिति शुष्काक्षिपाकः सर्वाक्षिगतरोगे पठितः स यथा-'यत्कूणितं दारुणरूक्षवर्त्म संदह्यते चाविलदर्शनं यत् । सुदारुणं यत्प्रतिबोधने च शुष्काक्षिपाकोपहतं तदक्षी'ति । शोथ इति । शोथजनेत्रपाकः । यतः—'कण्डूपदेहाश्रुयुतः पक्वोदुम्बरसन्निभः । संरंभी पच्यते यस्तु नेत्रपाकः स शोथज' इति । वातविपर्ययैर्युत इति वातविपर्ययो नेत्ररोगविशेषः । अयमपि सर्वाक्षिगतरोगे पठितः । यथा 'वारंवारं च पर्येति भ्रुवौ नेत्रे च मारुतः । रुजश्च विविधास्तीक्ष्णाः स ज्ञेयो वातपर्यय' इति । तं नेत्रं तर्पणे योज्यमिति यत्पूर्वोक्तरोगविशेषे वर्णितं तन्नेत्रमित्यर्थः । तर्पणं तु वक्ष्यमाणं बोद्धव्यम् । अथ तर्पणक्रियायामयोग्यविषयमाह—दुर्दिनात्युष्णशीतैरित्यनेन शीतोष्णवर्षास्वरूपं कालं तर्पणविहितम् । प्राप्तिनिषेधत्वात् । दुर्दिनमिति वर्षा मेघवृष्ट्याकुलं दिनं निषिद्धं नान्यत् । एवमत्युष्णमिति । ग्रीष्मे खरतरकिरणतापितदिवसम् । अतिशीतं वातादिव्याप्तं दिनमिति संभ्रमेष्विति भ्रमश्चकारूढस्येवार्थासंवित्तिः । अशांतोपद्रवे चाक्ष्णीति । आमदोषजननोपद्रवसहितं नाक्षि तर्पयेदित्यभिप्रायः । तद्यथा—'उदीर्णवेदनं नेत्रं रागशोषसमन्वितम् । घर्षनिस्तोदशूलाश्रुयुक्तमामान्वितं विदु'रिति । इदानीं तर्पणस्य कर्तव्यविधावपि कर्मविधानमाह—तर्पणार्थी पुरुषः प्रथममेव शोभनं स्थानमन्विच्छेत् । तत्र वातातपरजोरहिते इति । एतयोर्लक्षणत्वेनाग्निधूमरहिते इति ग्रहणं । यदुक्तं-'प्रतिसूर्याग्निरहिते नीरुजो धूममारुते । गृहे सुखे निराबाधं तर्पणं च समाचरेदि'ति । उत्तानशायिनेत्यनेन निश्चलस्य वीतक्रोधतयास्य चावरोधः तन्त्रान्तरदर्शनात् 'उत्तानशायिनः कार्यं निश्चलस्य यथासुखम् । तर्पणं नेत्रयुगले वीतक्रोधभयस्य चे'ति । अथ पश्चात्कर्माह—आधारौ माषचूर्णेन नेत्रकोशयोरिति नेत्रपुटयोः । द्वौ आधारौ कुर्यात् । आधारो माषपिष्टीमयः पलीसंज्ञः । क्लिन्नेन माषचूर्णेनेति । क्लिन्नं जलेन मर्दितम् । कथंभूतावाधाराविति । परिमण्डलौ परि समन्ततो भावेन मण्डलाकारौ तेनार्धाङ्गुलोत्सेधः द्व्यङ्गुलविस्तारं यथा स्यात् कुर्यादित्यभिप्रायः । तथाहि 'अर्धाङ्गुलोऽर्धविस्तारं यथा स्यान्नाक्षिरोधकृत्' इति । पुनः कथंभूतावाधारौ । समाहितौ

न विषमैः । दृढाविति न शीर्णौ । असंबाधाविति संधिरहितौ । एतेन तन्निपुणेन कार्याविलर्थः । इदानीं तर्पणार्थं द्रव्यविशेषमाह—पूरयेन्नेत्राधाराविति शेषः । केन पूरयेत्तमाह—घृतमण्डेनेत्यादि । विलीनघृतस्य घनीभूतस्योपरितनो भागो घृतमण्ड इत्युच्यते । कीदृशेन सुखोदकैः कृत्वा विलीने । एके सुखोदकैरेवाक्षिपूरणमाहुः । तदसंगतम् । अथवेत्यनेन द्रव्यान्तरमाह—धौतेन सर्पिषेत्यर्थः । क्षीरमथनात्समुद्भूतं नवनीतघृतं क्षीरघृतमित्युच्यते । क्षीरमत्र गव्यं ग्राह्यं तद्विहितत्वात् । तथाहि—'गव्यक्षीरोत्थितं सर्पिस्तर्पणार्थं विधीयते । दृष्टिप्रसादनश्रेष्ठं तिमिरस्यापकर्षण'मिति । अथ कियत्परिमाणेन पूरणं कार्यं तमाह—एके तु 'पक्ष्माणि यावन्मज्जन्ति रोमवत्ता यदा भ्रुवो'रिति पठन्ति व्याख्यानयन्ति च तत उन्मीलयेच्छनैरिति । उन्मीलनं तु शनैः कुर्यात् । शनैरित्यनेन कर्मान्तरं सूचयति । कथमुन्मीलयेत्तदाह चरकः—'ततो वस्त्रेण पीतेन नीलेन हरितेन वा । पत्रैराच्छाद्य नयने ततः पश्येद्यथासुखमि'ति । अथ तर्पणस्य धारणं कियत्कालेन कार्यं तदाह—वर्त्मरोगेष्विति कृच्छ्रोन्मीलनपक्ष्मघातप्रभृतिषु । वाङ्मात्राणां शतमिति । गुर्वक्षरोच्चारणं वाक् तेषां शतमित्यर्थः । अथवाङ्गुल्योः छोटिकास्वरूपं वाङ्मात्रात्मत्वेन कथितम् । तथाच 'निमेषोन्मेषणं पुंसामंगुल्याच्छोटिकाथवा । गुर्वक्षरोच्चारणं वा वाङ्मात्रेयं स्मृता बुधैरि'ति । स्वस्थे कफे इति प्रकृतिस्थे कफे अथवा स्वस्थे पुरुषे नीरोगे, निरुपद्रवे इत्यन्ये अतएव सोपद्रवे दोषे तर्पणं न विहितमिति पूर्वोक्तमेव । संधिरोगजलस्रावप्रभृतिके कृष्णरोगे शुद्धशुक्रशिराशुक्रप्रमुखे कफेच विकाराभिपन्ने अतएव षट्शतमित्यर्थः । पञ्चशतान् दृष्टिरोगेष्विति पित्ते नकुलान्ध्यप्रभृतिषु दृष्टिरोगेष्विति बहुवचनत्वेन पित्तजे रक्तजे वाऽष्टौशतानि कुर्यात् । अधिमन्थे सहस्रकमित्यस्य स्थाने अधिमन्थे नवशतमिति पठन्ति । सहस्रं वातरोगेष्विति बहुवचनत्वेनापि सन्निपातात्मके व्याधौ सहस्रमात्रं यावद्देयं । तन्त्रान्तरे सप्तशतमात्राभिः सन्निपाते विहितम् । तथाच'वातां सहस्रमात्रा स्याद्धारयेन्मारुतव्यथे । पित्तजे रक्तजे वा......निव । सन्निपातात्मके सप्तपञ्च स्वस्थविधौ तथे'ति विषयोवगन्तव्यः । अथ कफस्नेहोपनयनं कुर्यात्तमाह—इदानीं दोषादिविशेषेण तर्पणविशेषस्य दिनान्तरमाह—एकाहमिति । एकदिनान्तरं ग्रन्थकारदर्शनात् । तथा च–'अहन्यहनि वातोत्थे पित्तरक्ते दिनान्तरम् । तर्पणं सन्निपातोत्थेऽन्तरं त्र्यंतरं कफे' इति । तत्र पित्तरक्तादिदोषे तर्पणं कार्यम् । वाग्रहणेन वातोत्थेपि अहन्यहनि कार्यं द्वितीयवाग्रहणेनापि थंतरं बोद्धव्यं सन्निपातविषयं एके कटूष्णमिति । पठन्ति त्र्यहमिति त्रिदिनान्तरं तच्च कफेत्युक्ते स्वस्थादावपि । पञ्चाहमिति पञ्चदिनान्तरम् । अथ तर्पणलिङ्गानि यस्य भवन्ति तानाह—सुखं यथा स्यात् । स्वप्नावबोधो भवति । वैशद्यं नेत्रस्येति । वर्णपाटवमिति वर्णं श्वेतकृष्णादिकं तस्य पाटवं निर्मलत्वं एतेन व्यक्तवर्त्मने भवतः । निवृत्तिरवलोकनप्रचारो दृढतरो भवति । क्रियालाघवमिति सूक्ष्मावलोकनेपि समर्थदृष्टिर्भवतीत्यर्थः । अथातितर्पितस्य लक्षणान्याह—अथेति सुगमं । अथ हीनतर्पितस्य लक्षणमाह—रूक्षमस्निग्धं, अस्राविलं अश्रैर्नेत्रजलैराविलं कलुषीकृतं रागमारक्ततां हीनतर्पितनेत्रमिति । अथ हीनातितर्पितस्य नेत्रस्य किंचित्प्रकारमाह—एतयोर्हीनातितर्पितयोः । तेनातितर्पितस्य नेत्रस्य किंचित्प्रकारतो रूक्षक्रियाहीनतर्पिता स्निग्धा क्रियेत्यभिप्रायः ॥ ३८–५१ ॥

गू०—अथ तर्पणं अथानन्तरं तर्पणकं चिकित्सितं वच्मि कथयामि । तर्पणकं नेत्रतृप्तिकरं । केषु रोगेषु तर्पणं क्रियते तानाह—यन्नेत्रं रूक्षं भवति । शुष्कं कुटिलं वक्रं आविलं मलयुक्तं शीर्णपक्ष्म शीर्णं गतं पक्ष्म नेत्ररोगं यस्य तत् । एते वातपर्यन्तादयो नेत्ररोगनिदाने ज्ञेयाः । एवंभूतं नेत्रं तर्पणे योज्यं । नेत्ररोगविशारदैर्वैद्यैः यत्र तर्पणं न विहितं तदाह—सुगमम् । यत्र तर्पणं न हितं येन विधानेन वा तदाह—वातादीनां हीने रहिते देशे उत्तानशायिनः पुरुषस्य नेत्रकोशयोः उपरिभागे क्लिन्नेन आर्द्रेण माषचूर्णेन परिमण्डलौ मण्डलाकारौ समौ दृढौ असंबाधौ कर्तव्यौ । तत्र नेत्रे विलीनेन द्रुतेन घृतगण्डेन पूरयेत् । सुखोदकैर्वा अथवा शतधौतेन सर्पिषा क्षीरोत्थितेन सर्पिषा वा यावत् अक्षिपक्ष्माणि निमग्नानि भवन्ति तावत् कार्यं । मीलिते नेत्रे पूरयेत् । पूरणानन्तरं ततः शनैः उन्मीलयेत् । धारणे प्रमाणमाह—वाङ्मात्रालक्षणं गुर्वक्षरोच्चारणादिकं पूर्वोक्तमेव । सुगमं चान्यत् । तर्पणे दाहकफाधिक्ये प्रतीकारमाह—ततः स्नेहवीर्येण ईरितं अस्य कफस्निग्धेन यवपिष्टेन यथास्वं धूमपानेन विशो-

धयेत्। तर्पणं कियद्दिनपर्यन्तं कर्तव्यं तदाह—एकाहं त्र्यहं परं प्रमाणं पञ्चाहं वा इष्यते। अथ तर्पणे तृप्तिलक्षणमाह—तर्पणे नेत्रस्य सुखस्वप्रादीनि तृप्तिलिङ्गानि भावयेत् विचारयेदिति पूर्वेणान्वयः। सुखेन स्वप्नत्वं सुखेन बोधत्वं वैशद्यं विशदता नेत्रस्य। वर्णस्य पाटवं पटुत्वं निर्वृतिर्निराबृत्तिः स्पष्टदर्शनत्वं व्याधिशान्तिः। क्रियालाघवं निमेषोन्मेषक्रियालघुत्वम्। अतितर्पितमाह—सास्रु–अस्रुयुक्तं गुरु स्निग्धं च। अथ हीनतर्पितनेत्रमाह—रूक्षं असाविलं रक्ताविलं रुग्णं रोगयुक्तं हीनतर्पितं नेत्रं एवं स्यात्। अतितर्पितहीनतर्पितयोः प्रतिकारमाह—रूक्षोपचारेणातिस्निग्धस्य न हीनस्निग्धेनेति यावत्॥ ३८–५१॥

## पुटपाकः।

सम्बन्धश्चायं—तर्पणोक्तविधानक्रियाव्यापत्तिसमानधर्मत्वं पुटपाकमाह—

अत ऊर्ध्वं प्रवक्ष्यामि पुटपाकस्य साधनम्॥ ५२॥
द्वौ बिल्वमात्रौ मांसस्य पिण्डौ स्निग्धौ सुपेषितौ।
द्रव्याणां बिल्वमात्रं तु द्रवाणां कुडवो मतः॥५३॥
तदेकस्थं समालोड्य पत्रैः सुपरिवेष्टितम्।
पुटपाकेन तत्पक्त्वा गृह्णीयात्तद्रसं बुधः॥ ५४॥
तर्पणोक्तविधानेन यथावदुपचारयेत्।
दृष्टिमध्ये निषेच्यः स्यान्नित्यमुत्तानशायिनः॥५५॥
स्नेहनो लेखनश्चैव रोपणश्चेति स त्रिधा।
हितः स्निग्धोऽतिरूक्षस्य स्निग्धस्यापि हि लेखनः ५६
दृष्टेर्बलार्थमितरः पित्तासृग्व्रणवातनुत्।
सर्पिर्मांसवसामज्जामेदःस्वाद्वौषधैः कृतः॥ ५७॥
स्नेहनः पुटपाकश्च धार्यो द्वे वाक्शते दृशोः।
जाङ्गलानां यकृन्मांसैर्लेखनद्रव्यसंयुतैः॥ ५८॥
कृष्णलोहरजस्ताम्रशङ्खविद्रुमसिन्धुजैः।
समुद्रफेनकासीसस्रोतोजदधिमस्तुभिः॥ ५९॥
लेखनो वाक्शतं धार्यस्तस्मैतावद्विधारणम्।
स्तन्यजाङ्गलमध्वाज्यतिक्तकद्रव्यपाचितः॥ ६०॥
लेखनात्त्रिगुणो धार्यः पुटपाकस्तु रोपणः।
वितरेत्तर्पणोक्तां तु क्रियां व्यापत्तिदर्शने॥ ६१॥

दी०—अथ पुटपाकविधानमाह—अथ पुटपाकस्य त्रैविध्यमाह—स पुटपाकः। अथ तेषां त्रयाणां मध्ये कः कस्य विहितस्तमाह—अतिरूक्षस्य पुरुषस्य स्निग्धस्यापि पुरुषस्येति शेषः। लेखनो लेखनः पुटपाकः। दृष्टेर्बलार्थं दृष्टिदृढीकरणार्थं इतरो रोपणपुटपाकः। स एव पित्तासृग्व्रणवातनुत्। व्रणवातादयो नेत्रगता एव बोद्धव्याः। इदानीं स्नेहनपुटपाकमादौ प्रदर्शयन्नाह—वसामांसाश्रितः। स्नेह इति शेषः। तथाच 'शुद्धमांसभवः स्नेहः सा वसा परिकीर्तिता' मज्जा मस्तकमज्जा स्थूलास्थिषु च भवति। मेद उदरस्थत्वगस्थिषु च। तथाचोक्तं 'स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तराश्रिता। अथेतरेषु सर्वेषु सरक्तं मेद उच्यत' इति। दृश इति। दृशि मध्ये निषेव्य इति विषयः। अथ लेखनपुटपाकमाह—जाङ्गलानां जन्तूनां यकृन्मांसैरिति। यकृत्कालखण्डः। यद्यपि जाङ्गलवर्गोऽष्टविधः कथितः। तद्यथा जाङ्गला विष्किराः प्रतुदाः गुहाशयाः। प्रसहाः पर्णमृगा बिलेशया ग्राम्याश्चेति। तथापि केषांचिन्मते पंचैव श्रेष्ठतमाः जाङ्गलविष्किरप्रतुदपर्णमृगबिलेशयाश्च ते के जाङ्गलादयस्तान् केषांचित् ज्ञापनार्थमाह—एणहरिणपर्णकुरङ्गादयो जाङ्गलाः। लावतित्तिरकपिञ्जलवर्तीरुर्वादयः। विष्किराः कपोतपारावतकलिङ्गादयः। प्रतुदाः सिंहव्याघ्र(घ्रा?)श्वकश्र्गालमार्जारादयो गुहेशयाः। काककङ्ककुररचापभासादयः। प्रसहाः मृदुभूरिवकवृक्षशायिकावानरप्रभृतयः। पर्णमृगाः श्वाविच्छशगोधानकुलादयो बिलेशयाः। अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छप्रभृतयो ग्राम्या इति जाङ्गलवर्गः समासेन प्रोक्तः। यद्यस्य दोषस्य विहितं तत्तत्रैव ज्ञातव्यम्। लेखनद्रव्यसंयुतैरिति लेखनद्रव्यैर्वक्ष्यमाणकृष्णलोहरजःप्रभृतिकैः ईदृशैश्चेत्यभिप्रायः। कृष्णलोहरजःकृष्णसारवर्णताम्ररजश्च विद्रुमं प्रवालं सिंधुजं सैंधवं कासीसं द्विविधं एकं भस्मसदृशं किंचिदम्ललवणरसं, द्वितीयं पुष्पकासीसं ईषत्पीतं तुवरं तद्भवमेव स्रोतोञ्जनमिति। रसाञ्जनशब्दवाच्यं तच्च द्विविधम्। एकं स्रोतोञ्जनकृष्णपाषाणाकृति द्रव्यम्। अपरं तु दारुहरिद्राक्काथेन कृत्रिमं पीतलोहितं। मस्तु दध्नस्तोयविशेषम्। तथाच 'दध्नस्तु यद्धस्तोयं तन्मस्तु परिकीर्तित'मिति। अथातो रोपणपुटपाकमाह—स्तन्यं स्त्रीदुग्धं तदभावे गव्यमाजं वा। जाङ्गलशब्देन जाङ्गलप्राणिनां वसा मज्जा मेदो ग्राह्यं रोपणक्रियायां विहितत्वात्। मधु क्षौद्रं आज्यं घृतं तिक्तकगव्यं निंबप्रभृतिकं लेखनत्रिगुणो धार्य इत्यनेन वाक्शतत्रयं सूचितम्। अथ पुटपाकव्यापत्तिचिकित्सामाह—वितरेदिति। पुटपाकव्यापत्तिदर्शने हीनातियोगे

तर्पणोक्तां क्रियां चिकित्सां कारयेत् । एतेन तानि लक्षणानि अत्राऽपि ज्ञेयानि इति ग्रन्थकृता सूचितम् । तथाहि—'तर्पणं पुटपाकं च नस्यार्हे नच योजयेत् । यावन्त्यहानि युञ्जीत द्विस्ततो हितभाक् भवेत्' इति ॥ ५२-६१ ॥

गू०—अथ पुटपाकः । अतः ऊर्ध्वं अतः परं पुटपाकस्य साधनं वक्ष्यामि कथयिष्यामि । तत्साधनमाह—मांसस्य जाङ्गलमांसस्य बिल्वमात्रौ द्वौ पिण्डौ स्निग्धौ सुचिक्कणौ तथा सुपेषितौ सूक्ष्मपेषितौ बिल्वद्रव्याणां शुष्काणां बिल्वमात्रं द्रवः कुडवयुतः । फलं तन्मांसौषधं एकत्वं समालोड्य सम्यक् मेलयित्वा पत्रैर्जम्ब्वादिभिर्वेष्टितं कृत्वा पुनः मृत्तिकां वेष्ट्य पुटपाकयुक्त्या तद्रसं गृह्णीयात् । तर्पणोक्तविधानेन अवचारयेत् । तस्य ग्रहणविधानमाह—सः स्नेहादिभेदेन त्रिधाभूतः । उत्तानशायिनो नित्यं निषेव्यः स्यात् तस्य किंविधो हितस्तदाह—सुगमम् । स्नेहमाह—सर्पिर्घृतं मांसादीनि मेदांतानि जाङ्गलानि स्वाद्वौषधैः काकोल्यादिभिः कृतस्नेहनस्तेन पुटपाकः ईदृशः इष्यते वाङ्मात्रा द्वे शते धार्याः । लेखनमाह—लेखनद्रव्याणि कृष्णलोहादीनि कृष्णलोहरजश्चूर्णं सिंधुस्रोतोञ्जनः चूर्णं दधिमस्तु दधिजलं लेखनो वाक् शतं धार्यः । एतावदेव तस्य धारणम् । अथ रोपणमाह—स्तन्यं दुग्धं जाङ्गलं जाङ्गलमांसं मधु क्षौद्रं आज्यं घृतं तिक्तकद्रव्याणि कटुक्यादीनि तैः पाचितः लेखनात् । रोपणः त्रिगुणप्रमाणो धार्यः । लेखने वाक्शतादिधारणे व्यापत्तिदर्शने उपद्रवे तर्पणोक्तां क्रियां वितरेत् ॥ ५२-६१ ॥

## अञ्जनम् ।

**अथ संपक्वदोषस्य प्राप्तमञ्जनमाचरेत् ।**
**हेमन्ते शिशिरे चैव मध्याह्नेऽञ्जनमिष्यते ॥ ६२ ॥**
**पूर्वाह्णे चापराह्णे च ग्रीष्मे शरदि चेष्यते ।**
**वर्षासु नाभ्रे नात्युष्णे वसन्ते च सदैव हि ॥ ६३ ॥**
**लेखनं रोपणं चैव तथा स्यात्स्नेहनाञ्जनम् ।**
**लेखनं क्षारतीक्ष्णाम्लरसैरञ्जनमिष्यते ॥ ६४ ॥**
**कषायतिक्तरसयुक्सस्नेहं रोपणं मतम् ।**
**मधुरं स्नेहसंपन्नमञ्जनं तु प्रसादनम् ॥ ६५ ॥**
**गुटिकारसचूर्णानि त्रिविधान्यञ्जनानि च ।**
**कुर्याच्छलाकयाऽङ्गुल्या हीनानि च यथोत्तरम् ६६**
**श्रान्ते प्ररुदिते भीते पीतमद्ये नवज्वरे ।**
**अजीर्णे वेगघाते च नाञ्जनं संप्रशस्यते ॥ ६७ ॥**
**हरेणुमात्रां कुर्वीत वर्तिं तीक्ष्णाञ्जने भिषक् ।**
**प्रमाणं मध्यमेऽध्यर्धं द्विगुणं तु मृदौ भवेत् ॥ ६८ ॥**
**रसक्रिया तूत्तमा स्यात्त्रिविडङ्गमिता हिता ।**
**मध्यमा द्विविडङ्गा स्याद्धीना त्वेकविडङ्गिका ॥ ६९ ॥**
**वैरेचनिकचूर्णं तु द्विशलाकं विधीयते ।**
**मृदौ तु त्रिशलाकं स्याच्चलस्तः स्नैहिकेऽञ्जने ॥ ७० ॥**
**मुखयोः कुण्ठिता श्लक्ष्णा शलाकाष्टाङ्गुलोन्मिता ।**
**अश्मजा धातुजा वा स्यात्कलायपरिमण्डला ॥ ७१ ॥**
**ताम्रलोहाश्मसंजाता शलाका लेखने मता ।**
**सुवर्णरजतोद्भूता शलाका स्नेहने मता ॥ ७२ ॥**
**अङ्गुलीव मृदुत्वेन कथिता रोपणे बुधैः ।**
**सायं प्रातर्वाञ्जनं स्यात्तत्सदा नैव कारयेत् ॥ ७३ ॥**
**नातिशीतोष्णवाताभ्रवेलायां संप्रशस्यते ।**
**कृष्णभागादधः कुर्यादपाङ्गं यावदञ्जनम् ॥ ७४ ॥**

दी०—अथ अञ्जनप्रकारमाह—अथशब्दोऽत्रामदोषानन्तरं सूच्यते । तेनापरिपक्वदोषस्य प्राप्तमञ्जनमप्रशस्तमित्यभिप्रायः । यतः 'अञ्जनं पूरणं क्वाथपानमामे न शस्यते' इति । प्राप्तमञ्जनमिति यद्यस्य समयस्योक्तं तत्तत्रैव योज्यमिति प्राप्तशब्देन वर्णितं । अथ कथमाचरेत्तदाह—हेमन्त इत्याद्यंजनविषयं सामान्यं विशेषो यथा । अथ त्रिविधाञ्जनमाह—शुक्रादिषु रोपणं क्लेदकण्डूपक्ष्मप्ररोहणादिषु स्नेहनं दृष्टिप्रसादनं तच्च तिमिरादिषु अथ त्रयाणां सामान्येन द्रव्याण्याह—क्षारादिवस्तुनिर्मितं लेखनाञ्जनं कथितं क्षारे यवक्षारप्रभृतिकं तीक्ष्णं मरिचादिकं अम्लरसं अम्लीकमातुलुङ्गप्रमुखं रोपणाञ्जनं तु कषायादिनिर्मितं भवति । कषायो हरीतक्यादिः तिक्तो निम्बादिः । सस्नेहमिति । स्नेहं घृततैलादिकं प्रसादाञ्जनं तु स्नेहनसंज्ञं कथितम् । तत्तु मधुरादिनिर्मितं भवति । मधुरं मधुररसप्रायं द्रव्यम् । मधुरं घृतगुडादिस्नेहसंपन्नमिति स्नेहार्थम् । अतएव स्नेहनं कथितम् । अथ त्रिविधाञ्जनस्य रूपमाह—गुटिकारसचूर्णादीनां लक्षणं बोद्धव्यम् । तत्रिविधं तु शलाकया अङ्गुल्या वा यथायोग्यं कुर्यात् । अञ्जनमिति तानि यथोत्तरं तु हीनानि ज्ञातव्यानि यो यस्मादुत्तरं यथोत्तरं तेन गुटिकाञ्जनाद्रसक्रियाञ्जनं हीनं रसाच्चूर्णाञ्जनमिति । अथ येषां रोगिणामञ्जनं न

प्रशस्तं तानाह—श्रान्ते पुरुषे । श्रान्तता च छर्दनवाहनजा भवति । प्ररुदिते प्रकर्षरोदने कृते । भीते भययुक्ते पीतमद्ये पीतं मद्यं येन अजीर्णे आमाजीर्णे विष्टब्धे तु शूलादौ विहितमेतत् । वेगाघाते मूत्रपुरीषादीनां चकाराच्छुक्रवति रात्रिजागरणे च नाञ्जनं विहितं तथाचोक्तम्-'भुक्तवांस्तु शिरःस्नातश्रान्तश्छर्दनवाहनैः । रात्रौ जागरितश्चापि नातिज्वरित एव चे'ति । अथाञ्जनस्य परिमाणमाह—हरेणुमात्रमिति । हरेणुस्त्रिपुटः । कलायः रेणुकेत्यपरे । मध्यमेऽञ्जने सार्धैकप्रमाणं यथा स्याद्वर्तिं कुर्यादित्यभिप्रायः । मृदाविल्यञ्जने द्विगुणं हरेणुद्वयं यथा स्यात्तथा वर्तिं कुर्यादिति शेषः । अथ रसक्रियाञ्जनमाह—रसक्रिया वक्ष्यमाणाञ्जनसमूहाञ्जनविशेषोऽवगन्तव्यः । उत्तममात्रा मृद्वञ्जनो विडङ्गो द्रव्यविशेषो व्याख्यातः । मध्यमेति न तीक्ष्णे मृदुरिति हीनेति तीक्ष्णाञ्जन इत्यर्थः । एकविडङ्गपरिमिता रसक्रिया वर्तिमात्रा बोद्धव्या । तदुक्तं—'विडङ्गमात्रं त्वपरे मध्यं द्व्युत्तमत्रयं । रसक्रियाणां वर्तीनां प्रमाणं परिकीर्तितं' इति । अथापराञ्जनानां मानमन्यत्तदाह—वैरेचनिकं चूर्णमञ्जनप्रस्तावे बोद्धव्यं । तच्च तीक्ष्णाञ्जनं कथितं अतएव द्विशलाकोन्मितमेव मृदाविति मृदुचूर्णाञ्जने स्नेहनेञ्जने चतस्रः शलाकाः । तेन चतुःशलाकोन्मिताञ्जनं प्रोक्तमित्यर्थः । शलाकालक्षणं विधानमपि वक्ष्यमाणं बोद्धव्यम् । अथाञ्जनशलाकामाह—मुखयोरिति । शलाकाया ऊर्ध्वाधोभागगतयोरेव मुखशब्दो वाच्यः । तौ तु कुण्ठितौ विगतधारौ कुर्यादित्यभिप्रायः । तेन मुकुलाकारावित्यपरे । तथाच 'वक्त्रान्ते मुकुलाकारा कलायपरिमण्डले'त्यादि । श्लक्ष्णेति । सर्वत्रैव श्लक्ष्णा कार्या मृदुत्वेन सन्निवेश्येत्यर्थः । अष्टाङ्गुलोन्मिता अष्टभिरङ्गुलैः कृत्वा परिमिता कार्या अश्मजा स्फटिकादिपाषाणरचिता । न केवलं पाषाणजनिता धातुजा वा । धातुशब्देन सुवर्णादिकं गृह्यते । तेन सुवर्णरौप्यताम्रकाष्ठास्थिमयाः । कृता शलाका अञ्जने शस्ता अष्टाङ्गुलमिता शुभा इति । कलायपरिमण्डलेत्यनेन परिसमन्ताद्वर्तुला कार्या इत्यभिप्रायः । कलायो वर्तुलकलायः ॥ अस्याग्रे केचिदिति पठन्ति 'वामे करतले कृत्वा सजलं निकषोपलम् । दक्षिणेनाञ्जनं नीत्वा करेण निकषेच्छनैः ॥ तेन कल्केन मतिमान् शलाकाग्रं प्रलिप्य च । उत्थाप्य चोत्तरं वर्त्म वामेनाङ्गुष्ठपर्वणा ॥ वर्त्म शुक्लान्तरे चाल्पां शलाकां सुप्रवर्तयेत् । प्रथमं सव्यनेत्रे च पश्चादञ्ज्यात्तु दक्षिणं । शलाकांगुष्ठदेशिन्या नवांतर्नयनं स्पृशेत्' इत्यादि कैश्चित्तन्त्रान्तरादवगम्यात्र लिखितं न स्वमतं । लेखने लेखनाञ्जने स्नेहने स्नेहनाञ्जने । रोपणे रोपणाञ्जने । रोपणाञ्जनं तु दृष्टिप्रसादनं । बुधैरिति ग्रहणेन यथायोग्यं अन्यवस्तुजनिता शलाका योज्या । अथाञ्जनकर्मणः कालमाह—सायंप्रातः इत्यनेन सायं तीक्ष्णांजनं कुर्यात् । प्रातः गण्डूषानन्तरं यथा सदाचारे रसांजनादिकं तद्वदन्यदपि सदा सर्वकाले तदञ्जनं न कारयेदित्यर्थः । यतः । चक्षुस्तेजोमयं तस्य विशेषात् । 'योजयेत्सप्तरात्रे तु स्रवणार्थे रसाञ्जनमि'ति । तीक्ष्णाञ्जनं यथा 'दिवा नतु प्रयोक्तव्यं नेत्रयोस्तीक्ष्णमञ्जनं । विरेकदुर्बला दृष्टिरादित्यं प्राप्य सीदति । तस्मात् सायं निशायां तु ध्रुवमञ्जनमिष्यते । रात्रौ स्वप्नगुणादक्षिपुष्टा ह्यञ्जनकर्षितेति' । न केवलं सर्वकालं निषिद्धं किंतु यदा अतिशीतोष्णवाताभ्रं च भवति तदा तस्यां वेलायामपि नाञ्जनं कार्यमित्यर्थः । कुत्र स्थानेञ्जनं कुर्यात्तदाह—कृष्णभागादित्यादि सुगमम् ॥ ६२–७४ ॥

**गू०**—अथाञ्जनं अथ अथानन्तरं पक्वदोषस्य पुरुषस्य दिवसपञ्चकानन्तरं आगतपाकेऽक्षिण अञ्जनं आचरेत् । इदानीं साधारणाञ्जनविधिमाह—हेमन्ते इत्यादौ । हेमन्ते शिशिरे मध्याह्नेञ्जनं इष्यते ग्रीष्मे शरदि च पूर्वाह्ने अपराह्ने वर्षासु अनभ्रे अभ्ररहिते । नात्युष्णे न उष्णसमये वसन्ते सदैव इष्यते । लेखनादिभेदेनाञ्जनभेदानाह—लेखनं रोपणं च प्रसादनं चेत्यंजनभेदः । लेखनं तत्र क्षारादिरसैः कषायादिभिः । प्रसादनं गुटिकादिभिः । त्रिविधमञ्जनमाह—गुटिकादीनि त्रिविधान्यंजनानि शलाकया अङ्गुल्या वा क्रियते । येषु अञ्जनं न देयं तानाह—वेगघाते । मूत्राद्यवरोधे वर्त्यादौ । अञ्जनप्रमाणं तीक्ष्णेऽञ्जने हरणुमात्रां वर्तिं कुर्वीत । हरेणु रेणुका कलापो वा मध्यमे तीक्ष्णान्मध्यार्धा हरेणुमात्रातः अर्धार्धे सा हरेणुमात्रा मृदौ तीक्ष्णान्मृदौ द्विगुणं हरेणुतो द्विगुणं सक्रिया । उत्तमादि प्रमाणमाह—सुगमम् । वैरेचनादौ कियन्त्यः शलाका इत्याह—यतो वैरेचनिकं चूर्णं नेत्रे बहुस्रावकरं तद्वैरेचनिकं अञ्जनं वारद्वयं शलाकया दीयते । स्नेहकाले चतस्रः शलाका विधीयन्ते । शलाकाप्रमाणं यथा कस्य शलाकेति ।

च मुखयोर्द्वयोः। कुण्ठिता श्लक्ष्णा शलाकाङ्गुलोन्मिता। मुखयोर्द्वयोः कुण्ठिता न तीक्ष्णा श्लक्ष्णा सुन्दरा अष्टाङ्गुलोन्मिता अष्टाङ्गुलप्रमाणा अश्मजा पाषाणजा धातुजा स्वर्णादिधातुजा कलायपरिमण्डला। कलायो वर्तुलकस्तत्परिमाणा स्थूला। लेखनादौ कीदृशी शलाका विधीयते तामाह—सुगमम्। कस्मिन्कस्मिन् समये कस्मिन् भागे अञ्जनं कुर्यादित्याह—सायंसंध्यायां प्रातः वा अञ्जनं स्यात्। अञ्जनं तदा न कारयेत्। तत् अञ्जनं अतिशीतोष्णवाताभ्रवेलायां न प्रशस्यते। अतिशीते अत्युष्णे काले नाञ्जनं कार्यमित्यर्थः॥ ६२–७४॥

**दी०**—पूर्वमुक्तं लेखनरोपणस्नेहनभेदेन त्रिविधाञ्जनेषु वर्तिरसचूर्णत्रिविधरूपं, तत्रादौ लेखनीवर्तिरधुना विधीयते।

## चन्द्रोदया।

**शङ्खनाभिर्विभीतस्य मज्जा पथ्या मनःशिला।**
**पिप्पली मरिचं कुष्ठं वचा चेति समांशकम्॥७५॥**
**छागीक्षीरेण संपिष्य वर्तिं कृत्वा यवोन्मिताम्।**
**हरेणुमात्रां संघृष्य जलैः कुर्यात्दथाञ्जनम्॥ ७६॥**
**तिमिरं मांसवृद्धिं च काचं पटलमर्बुदम्।**
**राज्यान्ध्यं वार्षिकं पुष्पं वर्तिश्चन्द्रोदया जयेत् ७७**

**दी०**—इयं चन्द्रोदया वर्तिर्लेखनी कथिता। राज्यञ्जनयोगेन चन्द्रोदयाभिधानमस्याः। तीक्ष्णाञ्जनत्वात्। शङ्खनाभिरिति मध्ये आवर्तत्वेन लघुचक्राकारं द्रव्यविशेषं समुद्रजं शंखं शङ्खनाभिशब्देन वाच्यम्। अथवा शङ्खस्य नाभिर्मध्ये ग्राह्यम्। अतिनिर्मलत्वात्। विभीतकस्य विभीतकफलमज्जा पथ्या हरीतकी। यवोन्मितेति। यवपरिमाणां वर्तिं कुर्यादित्यर्थः। अञ्जनार्थं तु हरेणुमात्रा संघृष्याञ्जयेत्। लेखनाञ्जनत्वात् जलैरित्यनेन पूर्वं वर्तिः क्षीरेण संपिष्य कार्या पश्चादञ्जनसमये पानीयेन सह घृष्याञ्जयेदिति भावः। मांसवृद्धिर्मांदिजनिता शेषं सुगमम्॥ ७५–७७॥

**गू०**—अथ वर्तिः। शङ्खनाभिः शङ्खमध्यभागा। एतान्संपिष्य यवोन्मितां वर्तिं कुर्यात्। हरेणुमात्रां रेणुकामात्रां संघृष्य अञ्जनं कुर्यात्। अस्याञ्जनस्य चन्द्रोदयावर्तिरिति संज्ञा तिमिरादीन् जयेत्। वार्षिकं पुष्पं वर्षप्रभवं जयेत्। इति चन्द्रोदयावर्तिः॥ ७५–७७॥

## करञ्जवर्तिः।

**पलाशपुष्पस्वरसैर्बहुशः परिभाविता।**
**करञ्जबीजवर्तिस्तु हन्ति पुष्पं विनाशयेत्॥७८॥**

**दी०**—अथ पुष्पार्थलेखनीवर्तिद्वयमाह—पलाशपुष्पं किंशुकाभिधानं बहुशः इत्यनेन सप्तवारमित्यभिप्रायः। करञ्जबीजवर्तिरिति। करञ्जो बृहत्करञ्जः॥७८॥

**गू०**—अथ लेखनीवर्तिः पलाशपुष्पस्वरसेन करञ्जीबीजरेणुः बहुशः भाविता तद्वर्तिः शुक्रादीन् समुल्लिखेत् दूरीकुर्यात्॥ ७८॥

## समुद्रफेनादिवर्तिः।

**समुद्रफेनसिन्धूत्थशङ्खदक्षाण्डवल्कलैः।**
**शिग्रुबीजयुतैर्वर्तिः शुक्रादींश्छस्त्रवल्लिखेत्॥ ७९॥**

**दी०**—अन्ययोगमाह—समुद्रफेनेत्यादि। समुद्रफेनं प्रसिद्धं सिन्धूत्थं सैन्धवं शंखं प्रसिद्धं दक्षाण्डवल्कलैरिति। दक्षः कुक्कुटः तस्यांडत्वगेव ग्राह्या। एके समुद्रफेन इत्यादिकं विपरीतं पठन्ति तद्यथा–'समुद्रफेनदक्षाण्डत्वक्सिन्धूत्थैः समाक्षिकैः। शिग्रुबीजयुतैर्वर्तिः शुक्रघ्नी शिग्रुवारिणे'ति। व्याख्यानयन्ति तत्र माक्षिकं धातुमाक्षिकं शिग्रुवारिणा शिग्रुस्वरसेन शस्त्रवल्लेखनेन लेखनी कथिता॥ ७९॥

**गू०**—अन्यच्च समुद्रफेनशङ्खदक्षाण्डकुक्कुटाण्डवल्कलैः शिग्रु शोभाञ्जनं तद्बीजैः तद्वर्तिः शुक्रं पुष्पं लेखनी वर्तिः॥ ७९॥

## दन्तवर्तिः।

**दन्तैर्दन्तिवराहोष्ट्रगोहयाजखरोद्भवैः।**
**शङ्खमुक्ताम्भोधिफेनयुतैः सर्वैर्विचूर्णितैः॥ ८०॥**
**दन्तवर्तिः कृता श्लक्ष्णा शुक्राणां नाशिनी परा।**

**दी०**—अथ लेखनीदन्तवर्तिमाह—दन्ती हस्तीति रूढिः, वराहः शूकरः, उष्ट्रः क्रमेलकोऽपि गोवृषभोऽपि, हयो घोटकः, अजो बस्तः छागसंज्ञः। खरो गर्दभः एतेषां दन्तैरित्यर्थः। कथंभूतैः

१–तत्र समीचीनं, सर्वत्र शंखनाभेर्नेत्राञ्जनयोग्यत्वात्। शंखनाभिश्च शोधिता ग्राह्या। दी.

१–सप्तवारमित्यर्थः। २–अत्र सशर्करैरिति पाठः। चंद्रटोऽपि तथैव पठति। शंखः शंखनाभिः। ३–मरिचपादिकैरिति पठनीयं वाग्भटसंवादात्।

शङ्खमुक्ताम्भोधिफेनयुतैरिति। शङ्खशब्देन सर्वत्र शङ्खनाभिर्ग्राह्या। मुक्ता मौक्तिकं अम्भोधिफेनं समुद्रफेनं श्लक्ष्णा इति सूक्ष्मत्वेन संश्लिष्टा यथा स्यात्। परा उत्कृष्टा अत्रानुक्ते पेषणार्थं जलमेव ग्राह्यम्॥ ८०॥

**गू०**—अथ लेखनी दन्तवर्तिः दन्ती हस्ती तदादीनां दन्तैः अजः छागः खरो गर्दभ अम्भोधिफेनं समुद्रफेनं। दन्तवर्तिः लेखनीवर्तिः॥ ८०॥

## नीलोत्पलवर्तिः।

**नीलोत्पलं शिग्रुबीजं नागकेशरकं तथा॥ ८१॥**
**एतत्कल्कैः कृता वर्तिरतिनिद्रां निवारयेत्।**

**दी०**—नीलोत्पलमित्यादि। इयमपि लेखनीवर्तिः कथिता। नीलोत्पलं नीलकमलं तदभावे पद्मबीजं ग्राह्यमिति। सर्वत्र कल्कार्थमत्र जलमाहुः। अनुक्तत्वात्॥ ८१॥

## पुष्पवर्तिः।

**तिलपुष्पाण्यशीतिः स्युः षष्टिः पिप्पलितंडुलाः ८२**
**जातीकुसुमपञ्चाशन्मरिचानि च षोडश।**
**सूक्ष्मं पिष्ट्वा जले वर्तिः कृता कुसुमिकाभिधा॥८३॥**
**तिमिरार्जुनशुक्राणां नाशिनी मांसवृद्धिहृत्।**
**(एतस्याश्चाञ्जने मात्रा प्रोक्ता सार्धहरेणुका॥८४॥)**

**दी०**—इदानीं रोपणीवर्तिविधानमाह—तिलेति। इयं रोपणी कुसुमिकावर्तिः कथिता। अत्र तिलपुष्पाणि अशीतिसंख्याकानि पिप्पलीतंडुलाः पिप्पलीमध्यगतबीजानि सर्षपाकाराणि षष्टिसंख्याकानि ग्राह्याणि। जाती सुमनाः तस्याः पुष्पाण्यपि पञ्चाशद्गणितानि मरिचानि च षोडशसंख्याकानीत्यर्थः। जलैरिति बहुवचनत्वेन कुत्रापि क्षीरेण प्रचारः। तिमिरोपलक्षितत्वेन गर्तं चक्षुः निवर्तयेदित्यपि योज्यं रोपणत्वात्। केचिदस्याग्रे इति पठन्ति। एतस्याश्चाञ्जने मात्रा प्रोक्ता सार्धहरेणुका एतत्पूर्वं कथितमेव तस्माद्बहुभिर्न स्वीकृतं पौनरुक्त्यभयात्। एके षष्टिः पिप्पलितंडुला इत्यस्य स्थाने 'षष्टिसंख्याः कणाः स्मृता' इति पठन्ति एतन्न मनोहरम्॥ ८२–८४॥

**गू०**—अथ रोपणीवर्तिः। अशीतिः तिलपुष्पाणि। कणा पिप्पली तस्याः कणिकाः षष्टिसंख्याः। जातीमुकुलानि पुष्पाणि पञ्चाशत्। इयं कुसुमिका वर्तिः। तस्या मात्रा सार्धहरेणुका। कुसुमिका वर्तिस्तिमिरादौ॥ ८२–८४॥

## रसाञ्जनवर्तिः।

**रसाञ्जनं हरिद्रे द्वे मालतीनिम्बपल्लवाः।**
**गोशकृद्रससंयुक्ता वर्तिर्नक्तान्ध्यनाशिनी॥ ८५॥**

**दी०**—अथान्यां रोपणीवर्तिमाह—रसाञ्जनं कृष्णपाषाणाकृतिधातुद्रव्यं तदभावे दार्वीक्वाथसमुद्भवं ग्राह्यं। हरिद्रे द्वे हरिद्रा दारुहरिद्रा मालतीपल्लवा निम्बपल्लवा इति। मालती जाती निम्बः प्रसिद्धः एतयोः पल्लवानि कोमलपत्राणि। गोशकृद्रस इति गोपुरीषस्वरसः। शकृदित्यस्य स्थाने यकृदिति पाठान्तरम्॥ ८५॥

**गू०**—रसाञ्जनं द्वे हरिद्रे हरिद्रा, दारुहरिद्रा, मालती जाती निम्बः तयोः पल्लवाः कोमलपत्राणि गोशकृत् गोपुरीषं तद्रसं जलं तेन वर्तिः कृता नक्तान्ध्यं रात्र्यान्ध्यं जयेत्॥ ८५॥

## धात्र्यादिवर्तिः।

**धात्र्यक्षपथ्याबीजानि एकद्वित्रिगुणानि च।**
**पिष्ट्वा वर्तिं जलैः कुर्यादञ्जनं द्विहरेणुकम्॥ ८६॥**
**नेत्रस्रावं हरत्याशु वातरक्तरुजं तथा। ***

**दी०**—इदानीं स्नेहनीवर्तिं दर्शयन्नाह–धात्र्यक्षेति। इयं स्नेहनी वर्तिः कथिता। एकद्वित्रिगुणानि यथाक्रमं योज्यानि। वातरक्तरुजं तथेत्यनेन वातजनितां रक्तजनितामभिष्यन्दादीनां रुजं हरतीत्यन्ये व्याख्यानयन्ति। संमतोयमन्यत्रोक्तत्वात्। यथा 'पथ्याक्षधात्रीफलमध्यबीजैस्त्रिद्व्येकभागैर्विदधीत वर्तिः। तथाञ्ज-

---

१ प्रक्षिप्तम्।

* अस्याग्रे–पारावतमलं निष्कं मरिचं माषमात्रकम्। घृष्ट्वा च निम्बवर्तीनां तोयं पर्युषितं जयेत्॥ नक्तांध्यं चिरकालस्थं हंति साध्यं न संशयः। श्वेतं पलाण्डुस्वरसं हंति नक्तांध्यमानवम्॥ सौराष्ट्रीकर्षमेकं तु तत्समं खर्परे न्यसेत्। टंकार्धं तुत्थकं योज्यं सूक्ष्मं कृत्वा स चैकतः॥ कांस्यपात्रेण ताम्रेण घर्षयेन्निम्बुकद्रवैः। चतुर्थेदिनपर्यन्तं मर्दयेच्छोधयेत्पुनः॥ घृतेन संहितां युक्त्या वटिकां कारयेद्बुधः। नार्याः स्तन्येन वर्तिः सा नेत्रदृष्टिप्रसादिनी॥ आजन्मगतवर्त्मानः पुनरेव भवंति च। कण्डूस्रावं हरेच्छीघ्रं गृध्रदृष्टिर्भवेन्नरः॥' इत्यधिकमुपलभ्यते कुत्रचित्॥

येदश्रुमतिप्रवृद्धमक्ष्णोर्हरेत् कष्टमपि प्रकोपमिति ॥८६॥

**गू०**—धात्री आमलकी अक्षं बिभीतकं पथ्या हरीतकी क्रमेण एकद्वित्रिगुणानि एतानि द्विहरेणुमात्रं अञ्जनं कुर्यात् । नेत्रस्रावं हरति स्नेहनी वर्तिका नेत्रस्रावे ॥ ८६ ॥

## रसक्रिया।

**तुत्थमाक्षिकसिन्धूत्थं सिताशङ्खमनःशिलाः ॥८७॥**
**गैरिकोदधिफेनं च मरिचं चेति चूर्णयेत्।**

**संयोज्य मधुना कुर्यादञ्जनार्थं रसक्रियाम् ॥ ८८ ॥**
**वर्त्मरोगार्मतिमिरकाचशुक्रहरां पराम्।**

**दी०**—अथ रसक्रियामाह—इयं च लेखनीसंज्ञका रसक्रियाञ्जनार्थं विहिता, अत्र तु माक्षिकं धातुमाक्षिकं, सिन्धूत्थं सैन्धवं, सिता शर्करा, शङ्खं शङ्खनाभिः, उदधिफेनं-समुद्रफेनं चेति चूर्णयेदिति । अनेन समानमानमेतेषां ग्राह्यम् । संयोज्य मधुना कुर्यादिति कोऽर्थः । एतच्चूर्णं मधूकशलाकया संगृह्य शुक्रादिदेशं घर्षयेदित्यभिप्रायः । मधुप्लावितां वर्तिमाहुरेके ॥ ८७–८८ ॥

**गू०**—अथ लेखनीरसक्रिया तुत्थं माक्षिकं स्वर्णमाक्षिकं, सिन्धूत्थं सैन्धवं, सिता सितोपलं, शंखं, मनःशिला, गैरिकं, उदधिफेनं, मरिचं, मधुनाञ्जनं इमां रसक्रियां रसानां तुत्थकादीनां क्रिया रसक्रिया, यद्वा रसविशिष्टा यतः पुष्पहरी रसक्रियायां धातुः नास्ति कर्पूरमेवास्ति ॥ ८७–८८ ॥

## तथाच लेखनी रसक्रिया—

**वटक्षीरेण संयुक्तो मुख्यः कर्पूरजः कणः ॥ ८९ ॥**
**क्षिप्रमञ्जनतो हन्ति कुसुमं तु द्विमासिकम्।**

**दी०**—अथापरां लेखनीं रसक्रियामाह—कर्पूरजः कणः कर्पूरजः शकलः तेन कर्पूरशकलं संगृह्य वटक्षीरेण सह संघृष्याञ्जयेदित्यर्थः । मुख्य इत्युत्तमः । यतः कर्पूरस्त्रिविधो भवति । तद्यथा 'ईशावासो हिमसंज्ञः पोतास इति स त्रिधा । अपक्वे कथ्यते भेदः कर्पूरे तु भिषग्वरैः' । लक्षणेनापि 'ईशावासो भृशं श्वेतो हिमसंज्ञस्तथाङ्कुरः । श्वेतः पोताश्रयः सर्वे रसवीर्यविपाकतः । प्रभावेनापि ते प्रोक्ताः पूर्वपूर्वगुणाधिकाः । तत्रापि यो नवक्षुद्रः स्फटिकाभः स उत्तमः' इति मुख्यशब्देन व्याख्यातः । एके 'वटक्षीरेण संयुक्तं श्लक्ष्णं कर्पूरजं रजः । क्षिप्रमञ्जनतो हन्ति तमः सूर्योदयादिव' इति पठन्ति ॥ ८९ ॥

**गू०**—अथ पुष्पहरी रसक्रिया सुगमम् ॥ ८९ ॥

## अतिनिद्रायां योगः—

**क्षौद्राश्वलालासंघृष्टैर्मरिचैर्नेत्रमञ्जयेत् ॥ ९० ॥**
**अतिनिद्रा शमं याति तमः सूर्योदयादिव।**

**दी०**—क्षौद्रं मधु अश्वलाला घोटकवक्त्रजनितो द्रवविशेषः । अतिनिद्रापि सन्निपातज्वरजनिता बोद्धव्या । इयमपि लेखनी रसक्रिया कथिता ॥ ९० ॥

**गू०**—अथातिनिद्रायामञ्जनं सुगमम् ॥ ९० ॥

## प्रबोधनाञ्जनम्।

**जातीपुष्पं प्रवालं च मरिचं कटुकी वचा ॥ ९१ ॥**
**सैन्धवं बस्तमूत्रेण पिष्टं तन्द्राघ्नमञ्जनम्।**
**शिरीषबीजगोमूत्रकृष्णामरिचसैन्धवैः ॥ ९२ ॥**
**अञ्जनं स्यात्प्रबोधाय सरसोनशिलावचैः।**

**दी०**—तत्र जातीपुष्पं, मालतीपुष्पं, प्रवालं विद्रुमं कटुका कटुरोहिणी, बस्तमूत्रं छागमूत्रम् । शेषं सुबोधम् । इयमपि गोमूत्रेण कल्कीकृत्य वर्तिस्वरूपा लेखिनी रसक्रिया कथिता । अथवा कृष्णा पिप्पली । कथंभूतैः शिरीषबीजादिभिः सरसोनशिलावचैरिति । रसोनो लशुनवाच्यः । शिला मनःशिला वचा विख्याता एतानि द्रव्याणि अत्र गोमूत्रं विहाय सममात्राणि ग्राह्याणि । गोमूत्रमानं तु कल्कार्थं यावत् । प्रबोधयेत्यनेन सन्निपातज्वरजनितं तन्द्रीविनाशनायाञ्जनमत्राहुः ॥ ९१-९२ ॥

**गू०**—अथ निद्रायामञ्जनं, जाती मालती तस्याः पुष्पं, प्रवालं विद्रुमं, कटुकी वचा । बस्तश्छागस्तन्मूत्रेणाञ्जनं, अथ सन्निपातेऽञ्जनम् । शिरीषः प्रसिद्धः । तद्बीजं कृष्णा पिप्पली रसोनः लसुनः शिला मनःशिला वचा एतैरञ्जनम् ॥ ९१–९२ ॥

## दार्व्यादिरसक्रिया।

**दार्वी पटोलं मधुकं सनिम्बपद्मकोत्पलम् ॥ ९३ ॥**
**प्रपौण्डरीकं चैतानि पचेत्तोये चतुर्गुणे।**
**विपाच्य पादशेषं तु सूतं नीत्वा पुनः पचेत् ॥९४॥**

**शीते तस्मिन्मधु सितां दद्यात्पादांशिकां नरः ।**
**रसक्रियैषा दाहाश्रुरक्तरागरुजो हरेत् ॥ ९५ ॥**

**दी०**—इदानीं लेखिनीरसक्रियामभिधाय रोपणीरसक्रियामाह—दार्वीति । दार्वी दारुहरिद्रा, मधुकं यष्टीमधु, पद्मकं काष्ठविशेषः । पद्माख इति लोके । यत्र पद्ममस्ति तत्र कमलं ग्राह्यं सर्वत्र, कमलाऽभावे पद्मबीजमिति । सर्वत्रचतुर्गुणता च क्वाथ्यद्रव्याणाम् । क्वाथ्यद्रव्यं तु दार्व्यादिकं च सममात्रं देयं पादशेषं चतुर्थं सुश्रुतं क्वथितं तच्च पादशेषं पुनः पचेदित्यर्थः । सान्द्रीभूते हिमसदृशे तस्मिन् । सिता मधु च मेलयित्वा पादांशं क्षिपेदिति । पादांशं क्वाथशेषात् । नर इति वैद्यः । इति रोपणी रसक्रिया प्रोक्ता । दाहादयोऽत्र नेत्रस्येति संबन्धः ॥ ९३–९५ ॥

**गू०**—अथ रोपणीरसक्रिया । दार्वी दारुहरिद्रा, पटोलं, मधुकं, यष्टी, निम्बं, पद्मकं, उत्पलं कमलं, प्रपौंडरीकं तद्वत्; एतानि तुल्यानि चतुर्गुणे तोये जले पचेत् । चतुर्थांशं शृतं क्वाथं नीत्वा पुनः पचेत् । मधुसिता सितोत्पलम् । पादांशं क्वाथात् । एषा रसक्रिया दाहादिहरी रसरूपैका क्रिया रसक्रिया । यद्वा रसानां तुत्थादिधातूनां क्रिया रसक्रिया । यद्वा द्रव्याणां क्रिया रसक्रिया अश्रुस्रावादौ ॥ ९३–९५ ॥

## रसाञ्जनादिरसक्रिया ।

**रसाञ्जनं सर्जरसो जातीपुष्पं मनःशिला ।**
**समुद्रफेनो लवणं गैरिकं मरिचानि च ॥ ९६ ॥**
**एतत्समांशं मधुना पिष्ट्वा प्रक्लिन्नवर्त्मनि ।**
**अञ्जनं क्लेदकण्डूघ्नं पक्ष्मणां च प्ररोहणम् ॥ ९७ ॥**

**दी०**—इयमपि रोपणीरसक्रियाञ्जनसमूहे विहिता । तत्र रसाञ्जनं दार्वीक्वाथोद्भवं, सर्जरसोऽग्निवल्लभः । लोके राल इति । लवणमत्र सैन्धवं नेत्रहितत्वात् । तथाच–'मधु यवपादासंगः शतावरीमुद्गसैन्धवामलकी । चक्षुष्यः संक्षेपाद्वर्गः कथितो भिषग्भिरग्र्यम्' इति । शेषं सुगमम् ॥ ९६–९७ ॥

**गू०**—अथ पक्ष्मप्ररोहणादौ क्रिया । रसाञ्जनं दार्वीक्वाथोद्भवम् । सर्जरसो रालः । जाती मालती तत्पुष्पं प्रक्लिन्नवर्त्मनि, क्लेदः क्लिन्नता, स्पष्टमन्यत् ॥ ९६–९७ ॥



**गू०**—अथ पक्ष्मरोगादौ तिमिरादौ अर्मसूरतिमिरादौ—

## गुडूचीरसक्रिया ।

**गुडूचीस्वरसः कर्षः क्षौद्रं स्यान्माषकोन्मितम् ।**
**सैन्धवं क्षौद्रतुल्यं स्यात्सर्वमेकत्र मर्दयेत् ॥ ९८ ॥**
**अञ्जयेन्नयनं तेन पिल्लार्मतिमिरं जयेत् ।**
**काचं कण्डूं लिङ्गनाशं शुक्लकृष्णगतान्गदान् ॥ ९९ ॥**

**दी०**—अथान्या रोपणी रसक्रिया अपि दर्शयन्नाह—गुडूचीत्यनेन । लतायाः सद्यो रसः सैन्धवं क्षौद्रतुल्यमिति । क्षौद्रतुल्यं माषपरिमितं मर्दनमस्य कांस्ये ताम्रजे वा पात्रे इत्यस्मदीयसंप्रदायः । शेषं सुबोधम् ॥ ९८ ॥ ९९ ॥

## पुनर्नवारसक्रिया ।

**दुग्धेन कण्डूं क्षौद्रेण नेत्रस्रावं च सर्पिषा ।**
**पुष्पं तैलेन तिमिरं काञ्जिकेन निशान्धताम् १०० ॥**
**पुनर्नवा जयेदाशु भास्करस्तिमिरं यथा ।**

**दी०**—अत्र क्षीरादीनां व्यस्तेन कृत्वा सर्वरोपणी रसक्रिया ज्ञातव्या दुग्धमत्र स्त्रीभवं सर्पिरत्राजं गव्यं वा तैलं तिलसंभवं काञ्जिकं शुक्तविशेषं प्रसिद्धम् । पुनर्नवेति पुनर्नवास्वरसः ॥ १०० ॥

**गू०**—अथ पुनर्नवानुपानमञ्जने पुनर्नवा दुग्धादिना कण्ड्वादीन् जयेत् यथा भास्करस्तिमिरम् ॥ १०० ॥

## बब्बूलरसक्रिया ।

**बब्बूलदलनिःक्वाथो लेहीभूतस्तदञ्जनात् ॥ १०१ ॥**
**नेत्रस्रावं जयत्येष मधुयुक्तो न संशयः ।**

## हिज्जलरसक्रिया ।

**हिज्जलस्य फलं घृष्ट्वा पानीये नित्यमञ्जनम् ॥ १०२ ॥**
**चक्षुःस्रावोपशान्त्यर्थं कार्यमेतन्महौषधम् ।**

**दी०**—बब्बूलदलाच्चतुर्गुणं पानीयं दत्वा निःक्वाथ्य पादशेषं पटे विस्राव्य नीत्वा पुनर्विपचेत् यावत् सान्द्रो भवति । पश्चात् पादयुक्तेन मधुना संस्राव्याञ्जयेदित्यभिप्रायः । इयमपि रोपणी रसक्रिया व्याख्याता । हिज्जलस्य फलं कतकफलमिति प्रसिद्धं । एतन्महौषध-

मिति महाञ्जनवरमेतदित्यर्थः । अयमपि योगो रोपणीरसक्रियायां कथितः ॥ १०१ ॥ १०२ ॥

गू०—अथ नेत्रस्रावेऽन्यः प्रयोगः सुगमम् । बब्बूलदलं पत्रं तस्य क्वाथो लेहीभूतः लेहाकारस्तस्याञ्जनं हिंगलो हिंगोठः तत्फलं घृष्ट्वा पानीयेनाञ्जनम् ॥ १०१ ॥ १०२ ॥

इदानीं स्नेहनी रसक्रिया

## कतकरसक्रिया ।

**कतकस्य फलं घृष्ट्वा मधुना नेत्रमञ्जयेत् ॥ १०३ ॥**
**ईषत्कर्पूरसहितं स्मृतं नेत्रप्रसादनम् ।**

दी०—नेत्रप्रसादनं दृष्टिप्रसादनम् । तस्याः प्रसन्नत्वेन नेत्रस्याऽपि प्रसन्नत्वम् । तथाचोक्तं दृष्टान्तेन यथाहि—'कनकस्यानां मणीनां विविधात्मनाम् । धौतानां विमला शुद्धिस्तैले वेलकरादिभिः । एवं नेत्रेषु वर्त्मा च अञ्जनाश्च्योतनादिभिः । दृष्टिर्निराकुला भाति निर्मले नभसीन्दुवत्' इति ॥ १०३ ॥

गू०—अथ स्नेहनी रसक्रिया । कतकफलं निर्मली इति लोके प्रसिद्धा । किंचित् भीमसेनकर्पूरेणाञ्जयेत् । नेत्रप्रसादनं नेत्रप्रसन्नकरं, नेत्रप्रसादने ॥ १०३ ॥

## अथ शिरोत्पाते रसक्रिया ।

**सर्पिः क्षौद्रं चाञ्जनं स्याच्छिरोत्पातस्य शान्तये १०४**

गू०—सर्पिर्घृतम् ॥ १०४ ॥

## कृष्णसर्पवसारसक्रिया ।

**कृष्णसर्पवसा शङ्खः कतकात्फलमञ्जनम् ।**
**रसक्रियेयमचिरादन्धानां दर्शनप्रदा ॥ १०५ ॥**

## लेखनाञ्जनम् ।

**दक्षाण्डत्वक्शिलाकाचशङ्खचन्दनसैन्धवैः ।**
**द्रव्यैरञ्जनयोगोऽयं पुष्पार्मादिविलेखनः ॥ १०६ ॥**

## कणारसक्रिया ।

**कणा छागयकृन्मध्ये पक्त्वा नेत्रयुगेऽञ्जिता ।**
**अचिराद्धन्ति नक्तान्ध्यं तद्वत्सक्षौद्रमूषणम्॥१०७॥**

## चूर्णाञ्जनम् ।

**शाणार्धं मरिचं द्वौ च पिप्पल्यर्णवफेनयोः ।**
**शाणार्धं सैन्धवं शाणा नव सौवीरकाञ्जनात् १०८**
**पिष्टं सुसूक्ष्मं चित्रायां चूर्णाञ्जनमिदं शुभम् ।**
**कण्डूकाचकफार्तानां मलानां च विशोधनम् १०९**

दी०—अत्र विविधरसक्रियामभिधाय संप्रति चूर्णाञ्जनविषये कैश्चित् प्रतिपादितामेकां रसक्रियामाह—अञ्जनं रसाञ्जनं शङ्खप्रभृतीनां चूर्णं कृत्वा पूर्वं सर्पवसाक्तशलाकया पश्चात् चूर्णलिप्तयाञ्जयेदिति भावः । कुत्रचिद्रसाञ्जनं विना प्रचरति तत्राञ्जनशब्देन कज्जलमेतत् कार्यमिति शेषः ॥ १०५ ॥

अथ लेखनं चूर्णाञ्जनमाह—दक्षः कुक्कुटः, शिला मनःशिला, चन्दनमत्र रक्तं नेत्रहितकरत्वात् । दक्षाण्डत्वगित्यादियोगश्चूर्णाञ्जनम् । अस्मत्संप्रदाये तु मधूक्तशलाकया च गृहीत्वाञ्जनं कार्यं एवं सर्वत्र । चूर्णाञ्जने एके सैन्धवैरित्यस्य स्थाने गैरिकैरिति पठन्ति, द्रव्यैरञ्जनयोगोऽयमित्यस्य स्थाने तुल्यं रसाञ्जनं देयमिति कथयन्ति । एतत्पदद्वयमपि संगतं तन्त्रान्तरदर्शनात् । तथाच—'दक्षाण्डत्वक्शिलाशङ्खकाचचन्दनगैरिकैः । तुल्यं रसाञ्जनं देयं पुष्पार्मादिविलेखनम्' इति ॥ १०६ ॥

अपरमपि लेखनाञ्जनमाह—कणा पिप्पली, छागयकृत् छागकालखण्डम् । पक्त्वा । केचित् 'पक्त्वा नेत्रयुगेऽञ्जिता' इत्यस्य स्थाने 'पक्त्वा तद्रसपेषिता' इति पठन्ति । तत्र तद्रसपेषितेति तत् स्वेदाम्बुना पिष्ट्वा इत्यभिप्रायः । तद्वदिति छागयकृन्मध्ये च स्विन्नं तद्रसपिष्टं च ऊषणं मरिचं क्षौद्रमत्र योगद्वयेऽपि प्रचरति । केचिन्मधुना सह भक्षणयोगद्वयमिदमाहुः । केषांचिन्मते यकृदित्युपलक्षणत्वेन तल्लग्नं पित्तं ग्राह्यम् । तन्मध्ये पिप्पली मरिचं मेलयित्वा धार्यं पश्चात् शुष्कं तन्मधुना संघृष्याञ्जयेदिति न स्वमतम् ॥ १०७ ॥

अथान्यच लेखनाञ्जनमाह—शाणार्धं माषकद्वयमितं मरिचमिति पिप्पल्यर्णवफेनयोश्च द्वौ शाणौ तेन प्रत्येकं शाणमितमित्यर्थः । अर्णवफेनः समुद्रफेनः । एके द्वाविंशतेन मिलित्वा शाणैकमाहुः । तन्न मनोहरं । सौवीरकाञ्जनात्रव शाणा ग्राह्याः । शाणष्टङ्कः कथितः । स चतुर्माषकप्रमितो ज्ञेयः । सौवीराञ्जनं सुवीराशब्दवाच्यं तच्च कृष्णनदीसंभवं भवति । तदभावे रसाञ्जनमेव ग्राह्यं, मलश्च नेत्रसंभव एव ॥ १०८ ॥ १०९ ॥

गू०—अथ चूर्णाञ्जनम् । दक्षाण्डत्वक् इति । दक्षाण्डत्वक् कुक्कुटाण्डवल्कलं, शिला मनःशिला, काचं

श्वेतकाचं शङ्खं चन्दनं सैन्धवं एभिर्द्रव्यैः पिष्टैरयमञ्जनयोगः पुष्पादिलेखनः । पुष्पादौ नक्तान्ध्ये-कणा पिप्पली छागयकृन्मध्ये पक्त्वा पुनस्तद्रसपेषिता तद्रसः यकृद्रसः । अचिरात् शीघ्रेण नक्तान्ध्यं रात्रौ दृष्टिमन्दतां हन्ति । तद्वत् ऊषणं मरिचं च कृतम् । सक्षौद्रं मधुसहितम् । नक्तान्ध्ये चूर्णाञ्जनं चूर्णरूपमञ्जनं चूर्णाञ्जनं । अर्णवफेनं समुद्रफेनं मरिचं शाणार्धं पिप्पल्यर्णवफेनयोर्द्वौ शाणौ प्रत्येकं शाणाष्टकः सैन्धवं अर्धशाणं सौवीरकाञ्जनं नवशाणं चित्रायां चित्रानक्षत्रे सूक्ष्मं पिष्टं शुभं चूर्णाञ्जनं भवति । कण्ड्वादौ ॥१०५—१०९ ॥

## इदानीं रोपणचूर्णाञ्जनमाह—

### (मृदुचूर्णाञ्जनम्)

**शिलायां रसकं पिष्ट्वा सम्यगाप्लाव्य वारिणा ।**
**गृह्णीयात्तज्जलं सर्वं त्यजेच्चूर्णमधोगतम् ॥ ११० ॥**
**शुष्कं च तज्जलं सर्वं पर्पटीसंनिभं भवेत् ।**
**विचूर्ण्य भावयेत्सम्यक्त्रिवेलं त्रिफलारसैः ॥१११॥**
**कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत् ।**
**अञ्जयेन्नयने तेन सर्वदोषहरं हि तत् ॥ ११२ ॥**
**सर्वरोगहरं चूर्णं चक्षुषोः सुखकारि च ।**

दी०—एतन्मृदुचूर्णाञ्जनत्वेन रोपणत्वेन कथितं शिलायां रसकं पिष्ट्वेत्यादि । शिलायां पाषाणघटिता पेषणार्थं पात्रविशेषः । रसकं खर्परकं तच्च तुत्थभेदः । खपरीयाशब्दवाच्यो लोके । सम्यगाप्लाव्य वारिणा च । असत् संप्रदाये तु तद्रसकं जलेनैव दृषदि संपेष्य पश्चान्निर्मलपात्रे बहुजले संप्लाव्य मुहूर्तं विलम्ब्य तदुपरि स्वच्छं जलमपनीयाधःस्थितं तत् पर्पटसंनिभं द्रव्यं भवति तद्ग्राह्यमित्यर्थः । कर्पूरचूर्णं तु दशमांशं पर्पटीस्वरूपद्रव्यात् । सर्वदोषमिति वातपित्तकफरुधिरं । सर्वरोगमिति नेत्राभिष्यन्दाधिमन्थप्रभृतिकं । चक्षुषोः सुखकारीत्यनेन दृष्टिप्रसादनं कथितम् ॥ ११०—११२ ॥

गू०—अथ प्रसादनाञ्जनं चूर्णं । रसकं खर्परं शिलायां पिष्ट्वा वारिणा सम्यक् आप्लाव्य चालयित्वा वारिणा जलेन तत् पात्रान्तरे गृह्णीयात् । अधोगतं पाषाणादिकं त्यजेत् । तत् शुष्कं पर्पटीसंनिभं पुनः संचूर्ण्य त्रिवेलं त्रिफलारसेन भावयेत् । दशमांशेन कर्पूररजः क्षिपेत् । स्पष्टमन्यत् ॥ ११०—११२ ॥

## प्रसादनाञ्जनम् ।

### ( सौवीराञ्जनम् )

**अग्नितप्तं हि सौवीरं निषिञ्चेत्त्रिफलारसैः ॥ ११३ ॥**
**सप्तवेलं तथा स्तन्यैः स्त्रीणां सिक्तं विचूर्णितम् ।**
**अञ्जयेत्तेन नयने प्रत्यहं चक्षुषोर्हितम् ॥ ११४ ॥**
**सर्वानक्षिविकारांस्तु हन्यादेतन्न संशयः ।**

दी०—अथ स्नेहनामिधं प्रसादनसंज्ञकं चूर्णाञ्जनमाह—अग्नितप्तं सौवीरमिति । सौवीरं सौवीराञ्जनं तच्च सुरमाशब्दवाच्यं त्रिफला हरीतक्यादिकं तस्याः सद्यो रसः क्वथितरसो वा तथेत्यनेन स्त्रीदुग्धेनापि सप्तवेलमाहुः । स्तन्यैरिति बहुत्वेनाजं गव्यं वा क्षीरं ग्राह्यं । सिक्तमित्यत्राप्यग्नितप्तमिति संबन्धः ॥ ११३ ॥ ११४ ॥

गू०—अन्यच्च सौवीरं सुरमा स्त्रीणां स्तन्यैर्दुग्धैः स्पष्टमन्यत् ॥ ११३ ॥ ११४ ॥

## अथ दृष्टिप्रसादनी नागशलाका विख्याता, तामपि दर्शयन्नाह—

**त्रिफलाभृङ्गशुण्ठीनां रसैस्तद्वच्च सर्पिषा ॥ ११५ ॥**
**गोमूत्रमध्वजाक्षीरैः सिक्तो नागः प्रतापितः ।**
**तच्छलाका हरत्येव सर्वान्नेत्रभवान्गदान् ॥ ११६ ॥**

दी०—तद्वदित्यनेन पूर्वोक्तसौवीराञ्जनविधानवदत्रापि सप्तवारं प्रत्येकं त्रिफलादिद्रव्येण निर्वापणमाहुः । उक्तमन्यत्रापि-'त्रिफलाभृङ्गमहौषधसर्पिर्गोमूत्रमध्वजाक्षीरैः । नागं सप्तनिषिक्तं करोति गरुडोपमं चक्षुः' इति । अन्यत्रोक्तं दृष्टान्तेन द्रढयति । 'त्रिफलसलिलयोगे भृङ्गराजद्रवेण हविषि च विषमिश्रे क्षीर आज्ये मधूके । प्रतिपदमभितप्तं सप्तधा सीसमेकं प्रणिहितगतिपश्चात् कारयेत्तच्छलाकम् ॥ तिमिरपटलकण्डूस्रावरक्तप्रकोपाशुपचितबहुदोषाचर्मसंज्ञांस्तु रोगान् । सवितुरुदयकाले साञ्जना व्यञ्जना वा हरति नयनरोगान् शोध्यमाना शलाका' इति । वाग्भटेऽपि-'श्रेष्ठाजलं भृङ्गरसं सविषाज्यमजापयः । यष्टीरसं च यत् सीसं सप्तकृत्वः पृथक् पृथक् ॥ तप्तं तप्तं पायितं तच्छलाका नेत्रे युक्ता साञ्जना व्यञ्जना वा । तैमिर्यार्मस्रावपैच्छिल्यपैल्लं कण्डूं जाड्यं रक्तराजीं च हन्ति' इति ( वा. उ. १३।३४।३५) ॥ ११५ ॥ ११६ ॥

गू०—अथ सीसकशलाका । त्रिफला भृङ्गं भृङ्गराजः शुण्ठी एषां रसैः जलैः सर्पिषा घृतेन गोमूत्रमधु अजा-

क्षीरैः एतैः सप्तसप्तवारं सिक्तः सेचितो नागः । सीसकशलाका नेत्ररुजः हरेत्। त्रिफलादिभिः प्रत्येकं रसैः सप्त सप्तधा सिक्त इत्यर्थः । तथाच सुश्रुते-'त्रिफलाभृङ्गमहौषधसर्पिर्गोमूत्रमध्वजाक्षीरैः । नागं सप्तनिषिक्तं करोति गरुडोपमं चक्षुः' इति । त्रिफलादीनां समाहारः द्वन्द्वात्प्रत्येकं रसे निषेचनमिति ध्वनितम् । इति सीसकशलाका ॥ ११५ ॥ ११६ ॥

## प्रत्यञ्जनम्।

**गतदोषमपेताश्रु संपश्यन्सम्यगम्भसि ।**
**प्रक्षाल्याक्षि यथादोषं कार्यं प्रत्यञ्जनं ततः ॥११७॥**
**न वाऽनिर्गलदोषेऽक्षिण धावनं संप्रयोजयेत् ।**
**प्रत्यञ्जनं तीक्ष्णतप्ते नेत्रे चूर्णं प्रसादनम् ॥ ११८ ॥**

## नयनामृताञ्जनम्।

**शुद्धे नागे द्रुते शुद्धं तुल्यं सूतं विनिक्षिपेत् ।**
**कृष्णाञ्जनं तयोस्तुल्यं सर्वमेकत्र चूर्णयेत् ॥ ११९ ॥**
**दशमांशेन कर्पूरं तस्मिंश्चूर्णे प्रदापयेत् ।**
**एतत्कृताञ्जनं नेत्रगदजिन्नयनामृतम् ॥ १२० ॥**

दी०—इदानीं चूर्णाञ्जनान्तर्गतं प्रत्यञ्जनविधानमाह—अक्षि प्रक्षाल्य ततः प्रत्यञ्जनं कार्यम् । नेत्रे तीक्ष्णप्रतप्ते प्रसादनं चूर्णं हितम् । शेषं सुगमम् ॥ ११७ ॥ ११८ ॥

अथ प्रसादनं चूर्णाञ्जनमाह—नागं सीसकं नागशुद्धिस्तु पूर्वं धातुशोधनाऽध्याये कथिता । सूतं पारदं शुद्धमिति शोधितं । शुद्धिरस्य पूर्वं रसशोधनाध्याये प्रतिपादिता । कृष्णाञ्जनमिति रसाञ्जनशब्दवाच्यं तच्च द्विविधं एकं कृष्णपाषाणाकृतिधातुद्रव्यं । अपरं तु दारुहरिद्राक्काथेन कृत्रिमं पीतलोहितं तयोस्तुल्यमिति पारदसीसकसाम्यं रसाञ्जनमित्यर्थः । त्रयाणां दशांशेनात्र कर्पूरमिति । इदं नयनामृतं नाम प्रसादाञ्जनचूर्णं प्रसिद्धमेव कृताञ्जनस्थाने प्रत्यञ्जनमिति पाठान्तरम् ॥ ११९ ॥ १२० ॥

गू०—प्रत्यञ्जनकरणे विधानमाह—सीसकशलाकया वह्नितप्तया अञ्जने कृते दोषनाशे प्रत्यञ्जनं कर्तव्यमित्याह—गतदोषं तथा नयनास्रं गतनेत्रजलं अक्षि नेत्रं अम्भसि संपश्यन् । ततः अक्षि प्रक्षाल्य यथा दोषानुरूपं प्रत्यञ्जनमञ्जनं सदोषे नेत्रे धावनं नेत्रमित्यप्याह—अनिर्वान्तदोषेऽक्षिण धावनं न प्रयोजयेत् । न कारयेत् । प्रत्यञ्जनं कारयेत् । प्रक्षालनं विनैवेति ध्वनितार्थः । तीक्ष्णं तप्ते नेत्रे प्रसादनश्चूर्णो वा कार्यः । स यथा—शुद्धे तैलादिभिः शुद्धे वा शलाकाकारेण शुद्धे नागे सीसके सति द्रुतं वह्निना द्रावितं नागं शुद्धं सूतं हिङ्गुलोत्थं अष्टकर्मशुद्धं वा तुल्यं निक्षिपेत् । तयोः सीसकसूतकयोस्तुल्यं कृष्णाञ्जनं चूर्णयेत् । ततः सर्वमेकत्र चूर्णयेत् । तस्मिन् चूर्णे कर्पूरं भीमसेनाख्यं दशमांशेन प्रदापयेत् । एतत्प्रत्यञ्जनंनाम नेत्रगदहा नयनामृतं प्रत्यञ्जनं चूर्णम् ॥११७–॥ १२० ॥

## सर्पविषे संजीवनाञ्जनम्।

**जयपालभवां मज्जां भावयेन्निम्बुकद्रवैः ।**
**एकविंशतिवेलं तु ततो वर्तिं प्रकल्पयेत् ॥ १२१ ॥**
**मनुष्यलालया घृष्ट्वा ततो नेत्रे तयाऽञ्जयेत् ।**
**सर्पदष्टविषं जित्वा संजीवयति मानवम् ॥ १२२ ॥**

दी०—अथ नेत्रप्रकरणपारिशेष्यात् विषहरीं वर्तिमाह—जयपालं दन्तिबीजं प्रसिद्धम् । तन्मध्यगता मज्जा ग्राह्या । मज्जेति मेज्जीशब्दवाच्या सर्पदष्टविषमपि विषसाधर्म्यात् स्थावरविषतक्षणेप्यस्याः प्रचारः । एके सन्निपातविषयेऽञ्जनमस्याः प्रवदन्ति ॥ १२१ ॥ १२२ ॥

गू०—अथ सर्पविषहरमञ्जनम् । सुगमम् ॥१२१॥ ॥ १२२ ॥

## अथ दृष्टिप्रसादनार्थं सार्वकालिकं योगद्वयमाह—

**भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्दीयते यदि ।**
**जाता रोगा विनश्यन्ति तिमिराणि तथैव च १२३**
**शीताम्बुपूरितमुखः प्रतिवासरं यः**
**कालत्रयेण नयनद्वितयं जलेन ।**
**आसिञ्चति ध्रुवमसौ न कदाचिदक्षि-**
**रोगव्यथाविधुरतां भजते मनुष्यः ॥ १२४ ॥**

दी०—भुक्त्वा पाणितलमित्यादि सुगमम् । जाता-रोगा इत्यादि पदद्वयं केचिदन्यथा पठन्ति । यथा 'अचिरेणैव तद्वारि तिमिराणि व्यपोहतीति' द्वितीययोगे प्रतिवासरं प्रतिदिनं कालत्रयं प्रातर्मध्याह्नापराह्णादिकम् । जलेनेति मुखगण्डूषजनितेन आसिञ्चतीत्यनेन वारंवारं सेचनमभिहितम् । तथाचोक्तं 'जलगण्डूषैः प्रातर्बहुशो-

म्भोभिः प्रपूर्य मुखरन्ध्रम् । निर्दयमज्जनक्षि क्षपयति तिमिराणि नासाय' इति । एके भुक्त्वा पाणितलमित्यादि योगद्वयं नात्र पठन्ति । नासङ्गतमिति मन्यमानैरस्माभिरपि लिखितम् ॥ १२३—१२४ ॥

**दी०**—अथ नेत्रविषय-प्रधानत्वेन तदर्थं सर्वकालं यत्न विधेयमिति मत्वा तत् प्रतिपालनार्थमुपदेशमाह—

**'चक्षूरक्षायां सर्वकालं मनुष्यै-**
**र्यत्नः कर्तव्यो जीविते यावदिच्छा ।**
**व्यर्थो लोकोऽयं तुल्यरात्रिन्दिवानां**
**पुंसामन्धानां विद्यमानेऽपि वित्ते ॥'**

अयमपि तन्त्रान्तरादाहृत्य केनापि लिखितः न स्वमतम् । अस्यार्थस्तु सुगम एव ॥

अथ त्रिखण्डानां पारिशेष्यात् कविरपि स्वगुणप्रकर्षतां सौष्ठवचनेन द्योतयति—

**आयुर्वेदसमुद्रस्य गूढार्थमणिसंचयम् ।**
**ज्ञात्वा कैश्चिद्बुधैस्तैस्तु कृता विविधसंहिताः १२५**
**किंचिदर्थं ततो नीत्वा कृतेयं संहिता मया ।**
**कृपाकटाक्षनिक्षेपमस्यां कुर्वन्तु साधवः ॥ १२६ ॥**
**विविधगदार्तिदरिद्रनाशनं या**
**हरिरमणीव करोति योगरत्नैः ।**
**विलसतु शार्ङ्गधरस्य संहिता सा**
**कविहृदयेषु सरोजनिर्मलेषु ॥ १२७ ॥**
**अल्पायुषामल्पधियामिदानीं**
**कृतं समस्तश्रुतिपाठशक्त्या ।**
**तदत्र युक्तं प्रतिबीजमात्र-**
**मभ्यस्यतामात्महितं प्रयत्नात् ॥ १२८ ॥**

इति श्रीदामोदरसूनुना शार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायामुत्तरखण्डे नेत्रकर्मविधिर्नाम त्रयोदशोऽध्यायः ।

---

**दी०**—आयुर्वेदसमुद्रस्य अर्थमणिसञ्चयः । गूढ एव गूढो गुप्तः, यथा समुद्रे मणिसमूहः प्रच्छन्नः सर्वैरेव न दृश्यः तथाऽयुर्वेदेऽपि अर्थोऽभिप्रायः । सर्वैरेव नाधिगत इत्यर्थः । अतएव कैश्चिद्बुधैर्ज्ञातः । अर्थमणिसंचय इति संबन्धः । यैरेव ज्ञातस्तैस्तु विविधा संहिताः कृताः । विविधसंहिता हारीतसुश्रुतभृगवग्निवेशादयः । अथ कविः स्वात्मीयविषयमाह—किंचिदर्थमित्यादि । तत इति संहितासमूहात् । मया शार्ङ्गधराचार्येण किंचिदर्थं स्वबुद्ध्या एकदेशीयप्रयोजनं नीत्वा आहृत्य इयं संहिता कृता निबद्धेत्यभिप्रायः । न तु स्वकपोलकल्पिता । एतेन मुनिप्रणीतत्वं संक्षेपत्वं च दर्शितम् । अथ कविविज्ञप्तिमाह—कृपाकटाक्षनिक्षेपमित्यादि । अस्यां संहितायां साधवः सज्जनाः कृपाकटाक्षनिक्षेपं कृपया कटाक्षस्य दृष्टेः किंचिद्भागस्य निक्षेपं कुर्वन्तु । अनुमतार्थक्रिया अवश्यमेवेति भावं सूचयति । तेनावश्यमेव कटाक्षनिक्षेपं कुर्वन्तु । यतः कटाक्षमात्राऽवलोकनेनाऽपि हृदयंगमा क्षमा भवति किमुत सकलदृष्ट्या । एतेन ग्रन्थस्य समीचीनता दर्शिता । इदानीं कविरेव निजग्रन्थस्योत्कृष्टत्वमाह—या इयं संहिता हरिरमणीव लक्ष्मीरिव योगरत्नैः प्रयोगमणिसमूहैः कृत्वा विविधगदार्तिदरिद्रनाशनं करोति । विविधगदानां व्याधीनां आर्तिरेव दारिद्र्यं तस्य नाशनं यथा लक्ष्मीर्बहुधनप्रदानेन अकिंचनपुरुषस्य दरिद्रनाशं करोति तथा इयमपि संहिता सुयोगैः कृत्वा नानारोगजनितपीडां हन्तीति भावः । एतेनास्याः प्रयोगसाफल्यं दर्शितम् । तत् प्रयोगसाफल्यस्य व्यापारमाह—विलसत्वित्यादि । सा संहिता, संहिता निरुक्तिस्तु पूर्वाध्याये दर्शिता । शार्ङ्गधराचार्यस्य सा संहिता शार्ङ्गधराचार्यनिर्मिता सा इत्यभिप्रायः । नान्या । एतेन ग्रन्थस्य सर्वमतानुबन्धत्वं दर्शितं, सरोजनिर्मलेषु कविहृदयेष्विति विलसतु विलासं करोतु कमलनिर्मलहृदयपुरुषेषु स्थितिं करोत्वित्यभिप्रायः । ननु पिशुनहृदयेषु तेषां हृदयानामनिर्मलत्वात् न तस्याः स्थितेरवकाशः । यतस्ते स्वभाववशगाः कथं परगुणमवधारयितुं समर्थाः । तस्मात् सज्जनहृदयेष्वेव विलास इति भावः । सहृदयत्वात् । एतेन ग्रन्थस्य निर्मलत्वं सूचितं यतो निर्मलस्य निर्मलैः सह संबन्धः सुकर एव ॥ १२५—१२८ ॥

विविधमुनिनिबन्धा ये महत्सुप्रसिद्धाः,
सुमतिदुरवबोधास्ते मया नैव दृष्टाः ।
तदपि गुरुसकाशाद्यच्छ्रुतं तद्व्यलेखि
द्व्यढमलभिषजाऽस्यां भावसिंहात्मजेन ॥ १ ॥

अभिनवनिबन्धरचनां श्रोतुं कः कोऽत्र लोलुपो भवति ।
यः कृपया परकाव्यं पश्यति सुदृशा स वै धीरः ॥२॥

---

१ वाग्भटात् । ( वा. उ० १४।१७ )

एकादशसहस्राणि तथा····················।
शकनामाढमल्लो हि पञ्जिकायां विनिर्ममे ॥३॥
गोवर्धनोद्धरणहृष्टसमस्तगोप-
नानाश्रुतिश्रवणलज्जितमानसस्य (?)।
इन्दुकलासमानं दंष्ट्रोद्युति
क्षितिहरेरवतु स्मितं वः ॥ ४ ॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरसंहितायां दीपिकायामुत्तरखण्डे नेत्रकर्मादिविधिरध्यायः समाप्तः ॥

**गू०**—अथ समाप्तौ ग्रन्थकारः स्वकीयं विनयं करोति। सुगमम्। विनयं कृत्वा औत्कृष्ट्यमाह—शार्ङ्गधरस्य संहिता कविहृदयेषु विलसतु विशेषेण लसतु प्रकाशतु। कथंभूतेषु हृदयेषु। सरोजनिर्मलेषु कमलवत् शुद्धेषु। सा का? या हरिरमणीव लक्ष्मीरिव योगरत्नैर्विविधगदार्तिदरिद्रनाशं करोति। युज्यन्त इति योगाः क्वाथचूर्णादीनां गणा रसादयश्च, तैः नानाविधज्वरादिरोगाणां आर्तिः पीडा तस्या यो दरिद्रस्तन्नाशं करोति ॥ १२५—१२८ ॥

श्रीमत्शाहसलेमस्य राज्ये कन्यागते रवौ।
··· ··· ··· ··· ··· ॥ १ ॥
काशीरामभिषग्वरो मधुकरः श्रीकृष्णपादाब्जयोः
प्राचां ग्रन्थकृतां निबन्धकुसुमादाहृत्य माध्वीमिव।
वैद्यानामुपकारकृत्तनुभृतां रोगप्रहारे क्षमां
सश्रीशार्ङ्गधरप्रबन्धविशदव्याख्यामकार्षीत्स्वयम् ॥ २ ॥

इति श्रीकाशीरामवैद्यविरचितायां गूढार्थदीपिकायां चिकित्सास्थाने नेत्रकर्मप्रसादननामाध्यायः।

## इति त्रयोदशोऽध्यायः।

## शार्ङ्गधरसंहिता समाप्ता।

# अथ शार्ङ्गधरसंहिताया रोगपरौषधसूची ।


विषयः — पृष्ठं.

**औषधगुणाः ।**

- अरतिहरमधूकपुष्पादिफांटः ... १७१
- आयुष्यं चंदनादितैलम् २३२
- कान्तिकृत्कैशोरगुग्गुलुः ... २०३

**केशोत्पादकानि ।**

- यष्टिमधुकतैलम्... २२८
- केशस्थिरीकरणनीलिकादितैलम् ,,
- केशवृद्धौ लेपः ३५८
- केशोत्पादकलेपः ३५८
- २ केशोत्पादकप्रलेपः ,,
- केशश्यामीकरणलेपः ,,

**केशशातनम् ।**

- करवीरादितैलम् २३१
- रोमशातनलेपौ ३५९
- क्षारगुणाः ... १८२

**गर्भप्रदम् ।**

- योगराजगुग्गुलुः २०२
- वंध्यायै कामदेवघृतम् २१६
- वंध्यायै पुत्रदं त्रिफलाघृतम् ... २१७
- शतायुःपुत्रदं फलघृतम् ... २२१
- गर्भपुष्टिदं लाक्षादितैलम् ... २२२
- पुत्रदं नारायणतैलम् २२३
- बलादितैलम् ... २२४
- दशमूलारिष्टः ... २३९

**ग्राही ।**

- गुडूच्यादिक्काथः... १५१
- न्यग्रोधादिक्काथः १५८
- तंडुलादियवागूः १६७
- हरीतक्यादिचूर्णम् १८४
- लघुगंगाधरचूर्णम् १८४
- दाडिमाष्टकचूर्णम् १८५

**तर्पणकरम् ।**

- तंडुलादियवागूः १६७
- विलेपीपानम् ... १६८
- लवंगादिचूर्णम् ... १८६

**त्रिदोषहरणम् ।**

- धान्यादिमंडः १६९
- अभयादिकल्कः १७७
- सुदर्शनचूर्णम् ... १८२
- लवंगादिचूर्णम् ... १८६
- चंद्रप्रभागुटी ... २००
- त्रिफलामोदकः ... २०५
- उत्कटदोषेषु प्रधानं ३४१
- त्रिफलालक्षणगुणाः १७९
- त्र्यूषणचूर्णं तद्गुणाश्च १७९

**दीपनानि ।**

- धान्यादिक्काथः ... १५२
- २ धान्यादिक्काथः ,,
- गुडूच्यादिक्काथः १५१
- उष्णोदकपानम् १६६
- शुंठ्यादिमंडः ... १६८
- धान्यादिमंडः ... १६९
- पथ्यादिकल्कः ... १७७
- आमलक्यादिचूर्णम् १७८
- त्रिफलाचूर्णम् ... १७९
- त्र्यूषणचूर्णम् ... १७९
- पंचकोलचूर्णम् ... १८०
- लवणपंचकचूर्णम् १८१
- दाडिमाष्टकचूर्णम् १८५
- लवणभास्करचूर्णम् १९४
- ग्रहणीकपाटरसः २८१
- मधुतैलबस्तिः ... ३३५
- यापनबस्तिः ... ,,

**पाचनानि ।**

- धान्यादिक्काथः ... १५२
- धान्यादिक्काथः ... ,,
- ह्रीबेरादिक्काथः... १५३
- गुडूच्यादिक्काथः १५१
- शुंठ्यादियुक्तमंडः १६८
- पथ्यादिकल्कः ... १७७
- आमलक्यादिचूर्णम् १७८
- पंचकोलचूर्णम् ... १८०
- तालीसादिचूर्णम् १९३
- लवणभास्करचूर्णम् १९४

**पुष्टिकराणि ।**

- धान्यादिमंडः ... १६९
- चंदनादितैलम् ... २३२
- प्रतिमर्शनस्यम् ... ३४४

**बल्यानि ।**

- तंडुलादियवागूः १६७
- लवंगादिचूर्णम् ... १८६
- चंद्रप्रभागुटी ... २००
- कूष्मांडकावलेहः २०९
- अगस्त्यहरीतकी २१०
- कामदेवघृतम् ... २१६
- चंदनादितैलम् ... २३२
- कुमार्यासवः ... २३५
- द्राक्षारिष्टः ... २३८
- दशमूलारिष्टः ... २३९
- मृगांकपोटली० ... २६८
- लोहरसायनम् ... २८३
- मधुतैलबस्तिः ... ३३५
- बृंहणनस्यम् ... ३४३
- इन्द्रियबलदं प्रतिमर्शनस्यम् ... ३४४

**भेदीनि ।**

- आमलक्यादि० १७८
- त्रिफलादिचूर्णम् १७९

**बृंहणम् ।**

- विलेपीपानम् ... १६८
- जीवनीयगणः ... १८०
- कूष्मांडकावलेहः २०९
- कुमार्यासवः ... २३५

**मेध्यानि बुद्धिहितानि च ।**

- सूरणादिवटकोमे० १९९
- च्यवनप्राशावलेहो० २०८
- बुद्धिहितं नारायणतैलम् ... २२३
- स्वर्णभस्म ... २४२
- सर्पिष्पानम् ... २८८

**रसायनानि ।**

- त्रिफलाचूर्णम् ... १७९
- पंचनिम्बचूर्णम् १९४
- बाहुशालगुडः ... १९७
- सूरणादिवटकः ... १९९
- चंद्रप्रभागुटी ... २००
- च्यवनप्राशाव० २०८
- अगस्त्यहरीतकी २१०
- कामदेवघृतम् ... २१६
- सुवर्णभस्म ... २४२
- अभयामोदकः ... ३१६

**रोपणम् ।**

- कासीसादिघृतम् २१८

**वशीकरणम् ।**

- चन्दनादितैलम् २३२
- वचादिलेपः ... ३६८

**वृष्याणि ।**

- जीवनीयगणः ... १८०
- लवंगादिचूर्णम् ... १८६
- सूरणादिवटकः ... १९९
- चंद्रप्रभागुटी ... २००
- कूष्मांडकावले० २०९
- फलघृतम् ... २२१
- शतावरीतैलम् ... २२६
- कुमार्यासवः ... २३५
- लोहरसायनम् ... २८३
- मधुतैलबस्तिः ... ३३५

**वर्णकरम् ।**

- चातुर्जातचूर्णम्... १८०
- च्यवनप्राशावलेहः २०८
- अगस्त्यहरीतकी २१०
- कामदेवघृतम् ... २१६
- कासीसादिघृतं २१८
- कुमार्यासवः ... २३५
- लोहरसायनम् ... २८३
- मधुतैलबस्ति ... ३३५
- मुखकांतिकृल्ले० ३५७
- शरीररक्तवर्णरोगे रक्तस्रावविधिः ३७३

विषयः — पृष्ठं.

**वाजीकरणम् ।**

शतावर्यादिचूर्णम् १९५
माषादिमोदकः... २०६
च्यवनप्राशावलेहः २०८
मदनकामदेवरसः २८२
कंदर्पसुंदरो रसः २८२

**शुक्रदम् ।**

कामदेवघृतम् ... २१६
दशमूलारिष्टः ... २३९
शुक्रस्तंभनमाकारकरभादिचूर्णं १९६

**शोधनम् ।**

कंठहृद्बस्तिशोधनः सप्तमुष्ट्यादियूषः १६५
बस्तिशोधनमुष्णोदकपानम् ... १६६
बस्तिशोधनोऽष्टगुणमंडः ... १६९
स्रोतःशोधनो धान्यादिहिमः ... १७३
कासीसादिघृतं ... २१८
मलशोधनो द्राक्षारिष्टः २३८

**हृद्यम् ।**

विलेपीपानम् ... १६८
मरिचादिचूर्णम् १८४
कामदेवघृतम् ... २१६

**सर्वरोगहरम् ।**

सुदर्शनचूर्णम् ... १८२
चंद्रप्रभागुटी ... २००
कैशोरगुग्गुलुः ... २०३

---

**अग्निदग्धरोगे ।**

तुगाक्षीर्यादिलेपः ३६७
रोपणो यवादिलेपः ,,
सर्पिषः पयसो वा गंडूषः ... ३५३

**अग्निविकाररोगे ।**

विषमाग्नौ हपुषादिचूर्णम् ... १८९

**( १ मंदाग्नौ । )**

अरलुत्वक्पुटपा० १४२
गुडूच्यादिगणक्वाथः १४६
त्रिफलादिचूर्णम् १७९
हरीतक्यादिचूर्णम् १८४
महाखाण्डवचूर्णम् १८७
दाडिमाष्टकचूर्णम् १८५
लवंगादिचूर्णम् ... १८६
मरिचादिचूर्णम् १८५
नारायणचूर्णम् ... १८८
लवणत्रितयादिचू० १९०
चित्रकादिचूर्णम् १९१
वडवानलचूर्णम् १९१
यवानीखांडवचूर्णम् १९२
सितोपलादिचूर्णम् १९३
लवणभास्करचूर्णम् १९४
चित्रकादिचूर्णम् १९१
सूरणादिवटकः ... १९९
पिप्पलीमोदकः... २००
चंद्रप्रभागुटी ... २००
योग्यराजगुग्गुलुः २०२
कैशोरगुग्गुलुः ... २०३
कूष्मांडखंडकाव० २०९
क्षीरषट्पलघृतं ... २१५
पानीयकल्याणघृतं २१७
कुमार्यासवः ... २३५
लोहासवः ... २३६
कुटजारिष्टः ... २३७
दशमूलारिष्टः ... २३९
लोकनाथरसः ... २६६
हेमगर्भपोटलीरसः २६८
अग्नितुण्डवटी ... २७९
लोहरसायनम् ... २८३
वमनम् ... ३०४
अभयामोदकः ... ३१६
निरूहबस्तिः ... ३३०

**( २ महाग्नये । )**

वसालेहपानम् ... २८९

**( ३ दीप्ताग्नये । )**

मज्जालेहपानम् ... २८९

**अजीर्णरोगे ।**

निदिग्धिकादि० १५०
नारायणचूर्णम् ... १८८
हपुषादिचूर्णम् ... १८९
सञ्जीवनीवटी ... १९९
गुडचतुष्टयगुटी... २१९
मण्डूरवटकः ... २०९
लोकनाथो रसः... २६६
अग्नितुण्डवटी ... २७९
अजीर्णकंटकरसः २७९
कनकसुन्दरो रसः २८०
वमनम् ... ... ३०४

**अतिसाररोगे**

स्थूलबब्बूलिकापत्ररसः ... १३९
स्योनाककुटजत्व० ,,
कुटजत्वक्पुट० ,,
तंडुलवारि ... १४२
अरलुत्वक्पुटपाकः १४२
तित्तिरपुटपाकः १४२
सोपद्रवातिसारे कुटजादिक्काथः ... १५३
चिरोत्थातिसारे ह्रीबेरादिकषायः १५३
बालानामतिसारे धातक्यादिशृतः १५३
इन्द्रयवादिक्काथः १५४
आम्रास्थ्यादि०... १५४
अंकोलमूलकल्कः १७६
लघुगंगाधरचूर्णम् १८४
बृहद्गङ्गाधरचूर्णम् १८४
कपित्थाष्टकचूर्णम् १८५
दाडिमाष्टकचूर्णम् १८५
लवंगादिचूर्णम् ... १८६
मरिचादिचूर्णम्... १८४
यवानीखांडवचूर्णम् १९२
तालीसादिचूर्णम् १९३
कुटजावलेहः ... २११
कुटजाष्टकावलेहः २११
मसूरादिघृतम् ... २१६
कब्बूल्यरिष्टः ... २३८
लोकनाथरसः ... २६६
हेमगर्भपोटलीरसः २६८
वमनम् ... ... ३०४

**( १ आमातिसारे । )**

शुंठीपुटपाकः ... १४३
वत्सकादिशृतः ... १५३
शुंठ्यादिचूर्णम् ... १९२
हरीतक्यादिचूर्णम् १८४

**( २ त्रिदोषोत्थातिसारे )**

आनंदभैरवो रसः २७०

**( ३ रक्तातिसारे । )**

जम्ब्वाम्रामलकीनां पल्लवरसः ... १३९
मुस्तादिप्रमथ्या १६४
बदरीमूलकल्कः १७६
वमनम्... ... ३०४

**अपस्माररोगे ।**

द्वितीयरसोनकल्कः १७५
योगराजगुग्गुलुः २०२
त्रिफलादिघृतम् २१७
लाक्षादितैलम् ... २२२
चंदनादितैलम् ... २३२
कुमार्यासवः ... २३५
वमनम्... ... ३०४
रेचननस्यम् ... ३४१
द्वितीयं रेचननस्यम् ३४२

**अंगपाकरोगे ।**

रक्तस्रावविधिः ... ३७३

**अंडवृद्धिरोगे ।**

चंद्रप्रभागुटी ... २००
नारायणतैलम् ... २२३
लोहरसायनम् ... २८३
वमनम्... ... ३०४
निरूहबस्तिः ... ३३०
मुष्कशोथे शिरादाहः ३७७

**अंत्रवृद्धौ**

रास्नादिक्काथः ... १५५
२ रास्नादिक्काथः १५५

**( २ कुरंडरोगे ।)**

अजाज्यादिलेपः ३६७

**अंसरोगे ।**

बृंहणनस्यम् ... ३४२

**अम्लपित्तरोगे ।**

कुटजावलेहः ... २११
वसंतकुसुमाकररसः २७२
निरूहबस्तिः ... ३३०

**अरोचकरोगे ।**

आर्द्रकस्वरसः ... १४०
गुडूच्यादिगण० १५२
निदिग्धिकादि० १५०

विषयः पृष्ठं.
वर्धमानपिप्प० १७४
आमलक्यादि० १७८
सामाऽरुचौ त्र्यूषण-चूर्णम् ... १७९
पंचकोलचूर्णम् ... १८०
चातुर्जातचूर्णम्... १८०
कट्फलादिचूर्णम् १८३
बृहत्कट्फलादिचूर्णम् १८३
दाडिमाष्टकचू० १८५
लवंगादिचूर्णम् ... १८६
जातीफलादिचूर्णम् १८७
चित्रकादिचूर्णम् १९०
२ चित्रकादिचूर्णम् १९१
हिंग्वादिचूर्णम् १९२
यवानीखांडवचूर्णम् १९२
तालीसादिचूर्णम् १९३
सितोपलादिचूर्ण १९३
व्योषादिगुटिका १९९
चंद्रप्रभागुटिका ... २००
योगराजगुग्गुलुः २०२
अगस्त्यहरीतकी २१०
कुटजावलेहः ... २११
क्षीरषट्पलघृतम् २१५
कुमार्यासवः ... २३५
लोहासवः ... २३६
रोहितारिष्टः ... २३९
दशमूलारिष्टः ... २३९
लोकनाथरसः ... २६६
मृगांकपोटली ... २६८
हेमगर्भपोटली ... २६९
वमनविधिः ... ३०४
विरेकविधिः ... ३११
रेचननस्यम् ... ३४१

**अर्बुदरोगे ।**

चंद्रप्रभागुटी ... २००
कांचनारगुग्गुलुः २०५
खदिरारिष्टः ... २३८
वमनम् ... ... ३०४
सर्षपादिलेपः ... ३६६
रक्तस्रावः ... ३७२

**अर्शोरोगे ।**

सूरणपुटपाकः ... १४३
वर्धमानपिप्पलीकल्कः १७४
मरिचादिचूर्णम् १८४
महाखांडवचूर्णम् १८७
नारायणचूर्णम्... १९१
हपुषादिचूर्णम् ... १८९
पंचसमचूर्णम् ... १८९
लवणत्रितयादिचूर्णम् १९०
हिंग्वादिचूर्णम् ... १९२
यवानीखांडवचूर्ण १९२
लवणभास्करचूर्ण १९४
चित्रकादिचूर्णम् १९१
बाहुशालगुडः ... १९७
गुडाभयायोगः ... १९९
वृद्धदारकादिमोदकः १९९
सूरणादिपिंडिका „
सूरणादिवटकः... „
मंडूरवटकः ... २००
चंद्रप्रभागुटी ... २००
कांकायनगुटिका २०१
योगराजगुग्गुलुः २०२
त्रिफलागुग्गुलुः... २०४
कूष्मांडावलेहः ... २०९
अगस्त्यहरीतकी २१०
कुटजावलेहः ... २११
कुटजाष्टकावलेहः २११
चांगेरीघृतम् ... २१६
पञ्चतिक्तकघृतम् २२२
कासीसादितैलं ... २२६
उशीरासवः ... २३५
पिप्पल्यासवः ... २३६
लोहासवः ... „
देवदार्वरिष्टः ... २३७
रोहितारिष्टः ... २३९
दशमूलारिष्टः ... २३९
लोकनाथरसः ... २६६
पूर्वे स्नेह्याः ... २९७
विरेकविधिः ... ३११
अभयामोदकः ... ३१६

**( १ रक्तार्शःसु । )**

अपामार्गबीजानां कल्कः ... १७६
तिलकल्कः ... १७७
महातिक्तघृतम् ... २१८

**अश्मरीरोगे ।**

चंद्रप्रभागुटी ... २००
गोक्षुरादिगुग्गुलुः २०४
कुमार्यासवः ... २३५
विडंगारिष्टः ... २३७
त्रिविक्रमो रसः... २७४
पूर्वे स्नेह्याः ... २९७
अभयामोदकः ... ३१६
निरूहबस्तिः ... ३३०

**आनाहरोगे ।**

पंचकोलचूर्णम् ... १८०
हिंग्वादिचूर्णम् ... १९२
यवानीखांडवचूर्णम् १९२
चंद्रप्रभागुटी ... २००
चांगेरीघृतम् ... २१६
निरूहबस्तिः ... ३३०

**आमरोगे ।**

चित्रकादिचूर्णम् १९०
व्योषादिगुटिका १९९
गुडशुंठीयोगः ... १९९
विरेकविधिः ... ३११

**आमवातरोगे ।**

शुंठीपुटपाकः ... १४३
धान्यादिकाथः... १५२
रास्नादिकाथः ... १५५
रास्नादिकाथः ... १५५
सप्तमुष्टियूषः ... १६५
उष्णोदकम् ... १६६
शुंठ्यादिकल्कः ... १७६
पंचसमचूर्णम् ... १८९
अजमोदादिचूर्ण १८४
लवणभास्करचूर्ण १९४
बाहुशालगुडः ... १९७

**आर्तवरोगे ।**

चंद्रप्रभागुटी ... २००
योगराजगुग्गुलुः २०२

**इन्द्रियध्वंसरोगे ।**

नारायणतैलम् ... २२३

**उदर्दरोगे ।**

सिद्धार्थादिलेपः... ३५७

**उदररोगे ।**

पुनर्नवादिकाथः १५४
चव्यादिकाथः ... १५९
पुनर्नवादिकाथः १५९
वर्धमानपिप्पलीकल्कः १७४
पंचकोलचूर्णम् ... १८०
मरिचादिचूर्णम्... १८४
महाखांडवचूर्णम् १८७
नारायणचूर्णम् ... १८८
हपुषादिचूर्णम् ... १८९
पंचसमचूर्णम् ... १८९
नाराचचूर्णम् ... १८९
लवणत्रितयादिचूर्णम् १९०
तुंबर्वादिचूर्णम् ... १९०
लवणभास्करचूर्णम् १९४
चित्रकादिचूर्णम् १९१
योगराजगुग्गुलुः २०२
कैशोरगुग्गुलुः ... २०३
त्रिफलामोदकः ... २०५
षड्बिन्दुघृतम् ... २१९
कुमार्यासवः ... २३५
पिप्पल्यासवः ... २३६
लोहासवः ... „
रोहितारिष्टः ... २३९
महावह्निरसः ... २७८
विरेकविधिः ... ३११
अभयादिमो० ... ३१६
निरूहबस्तिः ... ३३०

**( १ प्लीहोदरे । )**

पथ्यादिकाथः ... १६०
चंद्रप्रभागुटी ... २००
खदिरारिष्टः ... २३८
लोकनाथरसः ... २६६

**( २ वातोदरे । )**

बाहुशालगुडः ... १९७

**उदावर्तरोगे ।**

योगराजगुग्गुलुः २०२
षड्बिन्दुघृतम् २१९
कुमार्यासवः ... २३५
नाराचरसः ... २७२
निरूहबस्तिः ... ३३०
मधुतैलबस्तिः ... ३३५

| विषयः | पृष्ठं. |
|---|---|
| **उपदंशरोगे ।** | |
| पटोलत्रिफलाक० | १६१ |
| मंजिष्ठादिक्राथः | १६२ |
| पञ्चवल्कलशृतः | १६४ |
| कासीसादिघृतं ... | २१८ |
| करवीरादिलेपः ... | ३६७ |
| रोपणत्रिफलाले० | ,, |
| रसांजनादिलेपः | ,, |
| रक्तस्रावविधिः ... | ३७३ |
| **उन्मादरोगे ।** | |
| ब्राह्मीस्वरसः ... | १४० |
| षड्ग्रंथीस्वरसः | ,, |
| शंखिनीस्वरसः | ,, |
| कूष्मांडस्वरसः | ,, |
| द्वितीयरसोनकल्कः | १७५ |
| पानीयकल्याणघृतम् | २१७ |
| लाक्षादितैलम् ... | २२२ |
| चंदनादितैलम् ... | २३२ |
| वमनविधिः ... | ३०४ |
| रेचननस्यम् ... | ३४१ |
| **( १ भूतोन्मादे । )** | |
| भूतयक्षरक्षोहरं पानीयकल्याणघृतम् | २१७ |
| यक्षराक्षसदूरीकरणं लाक्षादितैलम् | २२२ |
| पिशाचराक्षसजिद्धूपनम् ... | ३५१ |
| **उरोग्रहरोगे ।** | |
| • वर्धमानपिप्पलीकल्कः | १७४ |
| हिंग्वादिचूर्णम् ... | १९२ |
| योगराजगुग्गुलुः | २०२ |
| च्यवनप्राशावलेहः | २०८ |
| **उरोघातरोगे ।** | |
| लाक्षाकल्कः ... | १७६ |
| कूष्मांडकावलेहः | २०९ |
| **ऊर्ध्वजत्रुरोगे ।** | |
| प्रतिमर्शनस्यम् ... | ३४४ |
| **कपालरोगभेदेऽरुंषिकारोगे ।** | |
| पिण्याकादिप्रलेपः | ३५७ |
| खदिरादिप्रलेपः | ,, |
| **कफरोगे ।** | |
| वासास्वरसः ... | १३९ |
| कण्टकारीपुटपाकः | १४३ |
| वरुणादिगणक्राथः | १६० |
| सप्तमुष्टियूषः ... | १६५ |
| उष्णोदकपानं ... | १६६ |
| वाट्यमंडः ... | १६९ |
| राजमंडः ... | ,, |
| वर्धमानपिप्पलीकल्कः | १७४ |
| निंबकल्कः ... | ,, |
| आमलक्यादिचूर्णं | १७८ |
| त्रिफलाचूर्णम् ... | १७९ |
| त्र्यूषणचूर्णम् ... | १७९ |
| चातुर्जातचूर्णम्... | १८० |
| कट्फलादिलेहः... | १८३ |
| कट्फलादिचूर्णम् | १८३ |
| जातीफलादिचूर्णं | १८७ |
| नाराचचूर्णम् ... | १८९ |
| चित्रकादिचूर्णम् | १९१ |
| अजमोदादिचूर्णम् | १९१ |
| मण्डूरादिवटकः | २०० |
| योगराजगुग्गुलुः | २०२ |
| चांगेरीघृतम् ... | २१६ |
| प्रसारणीतैलम् ... | २२५ |
| मृगांकपोटलीरसः | २६८ |
| हेमगर्भपोटलीरसः | २६९ |
| मंथानभैरवोरसः | २७९ |
| लोहरसायनम् ... | २८३ |
| तैलस्नेहपानम् ... | २८८ |
| वमनम्... ... | ३०४ |
| रेचननस्यम् ... | ३४० |
| सैंधवादिगंडूषः ... | ३५३ |
| त्रिफलादिगंडूषः | ,, |
| **( २ तंद्रारोगे । )** | |
| रेचननस्यम् ... | ३४० |
| बृंहणनस्यम् ... | ३४३ |
| नीलोत्पलादिलेखनीवर्तिः ... | ३९० |
| जातिपुष्पाद्यंजनं | ३९१ |
| **( ३ निद्रारोगे । )** | |
| नीलोत्पलादिलेखनीवर्तिः ... | ३९० |
| क्षौद्रादिलेखनीरसक्रिया ... | ३९२ |
| **कर्णरोगे ।** | |
| मयूरघृतम् ... | २२१ |
| क्षारतैलम् ... | २३० |
| विरेकविधिः ... | ३११ |
| रेचननस्यम् ... | ३४० |
| सर्जिकादितैलं ... | ३७१ |
| कर्णकीटहरयोगाः ... | ३७२ |
| **( १ कर्णनाडीरोगे । )** | |
| शंबूकतैलम् | ,, |
| **कर्णनादरोगे ।** | |
| बृंहणनस्यम् ... | ३४३ |
| यष्ट्यादितैलं ... | ३७१ |
| अपमार्गक्षारतैलं | ३७१ |
| **( २ कर्णपाकरोगे । )** | |
| कोष्णवस्तमूत्रपूरणम् | ३३० |
| दाहे च रक्तस्रावः | ३७३ |
| पूतिकर्णे आम्रादितैलम् ... | ३७२ |
| **( ३ बाधिर्यरोगे )** | |
| बिल्वादितैलम् ... | २३० |
| अपामार्गक्षारतैलं | ३७१ |
| **( ४ कर्णस्रावे दाहे च )** | |
| कर्णस्रावे चूर्णम् | ३७२ |
| कर्णस्रावदाहयोः–सर्जिकाचूर्णयोगः | ,, |
| **कामलारोगे ।** | |
| वासास्वरसः ... | १३९ |
| त्रिफलारसः ... | ,, |
| दार्वीरसः ... | ,, |
| निंबरसः ... | ,, |
| अलंबुषास्वरसः... | १४० |
| फलत्रिकादिक्राथः | १५४ |
| सुदर्शनचूर्णम् ... | १८२ |
| हपुषादिचूर्णम् ... | १८९ |
| मण्डूरवटकः ... | २०० |
| चंद्रप्रभागुटी ... | २०० |
| कुटजावलेहः ... | २११ |
| कामदेवघृतम् ... | २१६ |
| शतावरीतैलम् ... | २२६ |
| दशमूलारिष्टः ... | २३९ |
| **कासरोगे ।** | |
| वासास्वरसः ... | १३९ |
| आर्द्रकस्वरसः ... | १४० |
| वृषपत्रपुटपाकरसः | १४३ |
| क्षुद्रायाः पुटपाकरसः | ,, |
| बिभीतकत्वक्पुटपाकः | ,, |
| निदिग्धिकादिकः | १५० |
| पुनर्नवादिक्राथः | १५४ |
| वासादिक्राथः ... | १५४ |
| वासकक्राथः ... | १५४ |
| २ वासादिक्राथः | १५४ |
| क्षुद्रादिक्राथः ... | १५४ |
| क्षुद्राक्राथः ... | १५४ |
| दशमूलशृतः ... | १४९ |
| उष्णोदकपानम्... | १६६ |
| पंचमूलीक्षीरपाकः | १६७ |
| वासाहिमः ... | १७३ |
| वर्धमानपिप्पली | १७४ |
| सुदर्शनचूर्णम् ... | १८२ |
| त्रिफलादिचूर्णम् | १७९ |
| कट्फलादिचूर्णम् | १८३ |
| बृहत्कट्फलादिचूर्णम् | १८३ |
| कट्फलादिलेहः... | १८३ |
| दाडिमाष्टकचूर्णम् | १८५ |
| बृहद्दाडिमाष्टकचूर्णम् | १८६ |
| लवंगादिचूर्णम् ... | १८६ |
| जातीफलादिचूर्णं | १८७ |
| मरिचादिचूर्णम् ... | १८५ |
| नारायणचूर्णम् ... | १८८ |
| लवणत्रितयचूर्णं | १९० |
| हिंग्वादिचूर्णम् ... | १९२ |
| तालीसादिचूर्णम् | १९३ |
| सितोपलादिचूर्णम् | १९३ |
| लवणभास्करचूर्णं | १९४ |
| मरिचादिगुटी ... | १९८ |
| शुंठ्यादिगुटी बिभीतकत्वक्च ... | १९८ |

| विषयः | पृष्ठं. |
|---|---|
| व्योषादिगुटिका | १९९ |
| सूरणादिवटकः ... | १९९ |
| पिप्पलीमोदकः ... | २०० |
| चंद्रप्रभागुटी ... | २०० |
| योगराजगुग्गुलुः | २०२ |
| कैशोरगुग्गुलुः ... | २०३ |
| कंटकार्यावलेहः | २०७ |
| च्यवनप्राशावलेहः | २०८ |
| कूष्मांडकावलेहः | २०९ |
| अगस्त्यहरीतकी ... | २१० |
| पानीयकल्याणघृतम् | २१० |
| लाक्षादितैलम् ... | २२२ |
| लोहासवः ... | २३६ |
| खदिरारिष्टः ... | २३८ |
| बब्बूल्यरिष्टः ... | ,, |
| द्राक्षारिष्टः ... | ,, |
| दशमूलारिष्टः ... | २३९ |
| लोकनाथरसः ... | २६६ |
| द्वितीयलोकनाथरसः | २६७ |
| मृगांकपोटली ... | २६८ |
| हेमगर्भपोटली ... | २६९ |
| द्वितीयहेमगर्भपोटलीरसः ... | ,, |
| स्वयमग्निरसः ... | २७३ |
| लोहरसायनम् ... | १८३ |
| वमनम् ... ... | ३०४ |
| अभयामोदकः ... | ३१६ |
| धूमः ... ... | ३४७ |
| **कुष्ठरोगे ।** | |
| मंजिष्ठादिक्वाथः | १६२ |
| बृहन्मंजिष्ठादिक्वाथः | १६२ |
| त्रिफलाचूर्णं ... | १७९ |
| त्र्यूषणचूर्णम् ... | १७९ |
| नारायणचूर्णम् ... | १८८ |
| हपुषादिचूर्णम् ... | १८९ |
| लवणभास्करचू० | १९४ |
| पंचनिंबचूर्णम् ... | १९४ |
| चित्रकादिचूर्णम् | १९१ |
| मंडूरवटकः ... | २०० |
| चंद्रप्रभागुटी ... | २०० |
| योगराजगुग्गुलुः | २०२ |
| कैशोरगुग्गुलुः ... | २०३ |
| त्रिफलामोदकः | २०५ |
| कांचनारगुग्गुलुः | २०५ |
| अमृताघृतम् ... | २१७ |
| महातिक्तघृतम् ... | २१८ |
| कासीसादिघृतं ... | २१८ |
| षड्बिन्दुघृतम् ... | २१९ |
| पञ्चतिक्तकघृतम् | २२२ |
| वज्रतैलम् ... | २३१ |
| उशीरासवः ... | २३५ |
| लोहासवः ... | २३६ |
| खदिरारिष्टः ... | २३८ |
| बब्बूल्यरिष्टः ... | ,, |
| रोहितारिष्टः ... | २३९ |
| दशमूलारिष्टः ... | ,, |
| महातालेश्वररसः | २७५ |
| कुष्ठकुठाररसः ... | २७५ |
| स्वर्णक्षीरीरसः ... | २७७ |
| कनकसुंदररसः ... | २८० |
| वमनम् ... ... | ३०४ |
| विरेकः ... ... | ३११ |
| अभयामोदकः ... | ३१६ |
| रेचननस्यम् ... | ३४० |
| रक्तस्रावः ... | ३७३ |
| **( १ दद्रुरोगे । )** | |
| कासीसादिघृतं ... | २१८ |
| देवदार्वरिष्टः ... | २३७ |
| उदयादित्यरसः ... | २७६ |
| प्रपुन्नाटादिलेपः ... | ३६० |
| हेमक्षीर्यादिलेपः | ,, |
| दूर्वादिलेपः ... | ,, |
| **( २ पामारोगे ।)** | |
| कासीसादिघृतं ... | २१८ |
| अर्कतैलम् ... | २२७ |
| मरिचादितैलम् ... | २२७ |
| प्रपुन्नाटादिलेपः ... | ३६० |
| हेमक्षीर्यादिलेपः | ,, |
| **( ३ पुंडरीककुष्ठे । )** | |
| मरिचादितैलम् ... | २२७ |
| **( ४ मंडलकुष्ठे )** | |
| सर्वेश्वरो रसः ... | २७६ |
| **( ५ रक्तव्यङ्गे )** | |
| मरिचादितैलम् ... | २२७ |
| **( ६ श्वित्रकुष्ठे )** | |
| पटोलादिक्वाथः ... | १६१ |
| मरिचादितैलम् ... | २२७ |
| श्वित्रहरलेपौ ... | ३५९ |
| **( ७ श्वेतकुष्ठे )** | |
| उदयादित्यो रसः | २७६ |
| **( ८ सिध्मकुष्ठे )** | |
| मरिचादितैलम् ... | २२७ |
| सिध्महरप्रलेपौ ... | ३६० |
| **कृमिरोगे** | |
| त्रिफलादिक्वाथः | १५४ |
| निंबदलकल्कः ... | १७४ |
| त्रिवृतादिकल्कः ... | १७७ |
| मरिचादिचूर्णम् ... | १८४ |
| मुसलीकंदादिचूर्णं | १९६ |
| कांकायनगुटिका | २०१ |
| गौराद्यं घृतम् ... | २२० |
| पञ्चतिक्तकघृतम् | २२२ |
| उशीरासवः ... | २३५ |
| कुमार्यासवः ... | २३५ |
| खदिरारिष्टः ... | २३८ |
| विरेकः ... ... | ३११ |
| कृमिकोष्ठे तैलस्नेहपानम् ... | २८५ |
| मधुतैलबस्तिः ... | ३३५ |
| अवपीडननस्यम् | ३४१ |
| **क्षयरोगे** | |
| वासास्वरसः ... | १३९ |
| वृषपत्रपुटपाकरसः | १४३ |
| वासकक्वाथः ... | १६३ |
| धान्यकादिहिमः | १७३ |
| वर्धमानपिप्पलीक० | १७४ |
| लाक्षाकल्कः ... | १७६ |
| जीवनीयगणः ... | १८० |
| अष्टवर्गचूर्णम् ... | १८१ |
| कट्फलादिचूर्णम् | १८३ |
| बृहत्कट्फलादिचूर्णम् | १८३ |
| कपित्थाष्टकचूर्णम् | १८५ |
| दाडिमाष्टकचूर्णम् | १८६ |
| लवंगादिचूर्णम् ... | १८६ |
| जातीफलादिचूर्णं | १८७ |
| यवानीखांडवचू. | १९२ |
| तालीसादिचूर्णम् | १९३ |
| सितोपलादिचूर्णम् | १९३ |
| लवणभास्करचूर्णम् | १९४ |
| बाहुशालगुडः ... | १९७ |
| सूरणादिवटकः ... | १९९ |
| योगराजगुग्गुलुः | २०२ |
| च्यवनप्राशावलेहः | २०८ |
| कूष्मांडकावलेहः | २०९ |
| अगस्त्यहरीतकी | २१० |
| पानीयकल्याणचूर्णम् | २१७ |
| नारायणतैलम् ... | २२३ |
| शतावर्यादितैलम् | २२६ |
| चंदनादितैलम् ... | २३२ |
| कुमार्यासवः ... | २३५ |
| पिपल्यासवः ... | २३६ |
| बब्बूल्यरिष्टः ... | २३८ |
| द्राक्षारिष्टः ... | २३८ |
| दशमूलारिष्टः ... | २३९ |
| लोकनाथरसः ... | २६६ |
| मृगांकपोटलीर० | २६८ |
| हेमगर्भपोटलीर० | २६९ |
| द्वितीयहेमगर्भपोटलीरसः ... | ,, |
| राजमृगांकरसः ... | २७३ |
| स्वयमग्निरसः ... | २७३ |
| लोहरसायनम् ... | २८३ |
| अभयामोदकः ... | ३१६ |
| **( १ उरःक्षतरोगे )** | |
| वासादिक्वाथः ... | १५४ |
| लवंगादिचूर्णम् ... | १८६ |
| च्यवनप्राशावलेहः | २०८ |
| कूष्मांडकावलेहः | २०९ |
| कामदेवघृतम् ... | २१६ |
| द्राक्षारिष्टः ... | २३८ |
| **क्षुद्ररोगे ।** | |
| महातिक्तघृतम् ... | २१८ |
| रक्तस्रावः ... | ३७४ |

| विषयः | पृष्ठं. |
|---|---|
| **( १ कच्छूरोगे )** | |
| अर्कतैलम् ... | २२७ |
| मरिचादितैलम् ... | २२७ |
| जात्यादितैलम् ... | २२९ |
| **( २ कंडूरोगे )** | |
| चंद्रप्रभागुटी ... | २०० |
| पानीयकल्याणघृतं | २१७ |
| लाक्षादितैलम् ... | २२२ |
| मरिचादितैलम् ... | २२७ |
| भृंगराजतैलम् ... | २२९ |
| लोहासवः ... | २३६ |
| हेमक्षीर्यादिलेपः | ३६० |
| दूर्वादिलेपः ... | ,, |
| **( ३ नीलिकारोगे )** | |
| मातुलुंगादिलेपः | ३५७ |
| वटपत्रादिलेपः ... | ,, |
| **( ४ रकसरोगे )** | |
| हेमक्षीर्यादिलेपः | ३६० |
| **विचर्चिकारोगे** | |
| चंद्रप्रभागुटी ... | २०० |
| कासीसादिघृतं ... | २१८ |
| अर्कतैलम् ... | २२७ |
| मरिचादितैलम् ... | २२७ |
| उदयादित्यो रसः | २७६ |
| प्रपुन्नाटादिलेपः... | ३६० |
| हेमक्षीर्यादिलेपः... | ,, |
| **( ५ विदारीरोगे )** | |
| वमनम्... ... | ३०४ |
| रक्तस्रावः ... | ३७३ |
| **( ६ विस्फोटरोगे )** | |
| कासीसादिघृतं ... | २१८ |
| गौरादिघृतम् ... | २२० |
| विरेकः ... ... | ३११ |
| दशांगलेपः ... | ३५६ |
| लांगल्यादिलेपः | ,, |
| **( ७ व्यंगरोगे )** | |
| चन्दनादिलेपः ... | ३५७ |
| मातुलुंगादिलेपः | ,, |
| अर्जुनत्वगादिलेपः | ,, |
| वटपत्रादिलेपः | ,, |

| विषयः | पृष्ठं. |
|---|---|
| **गंडमालारोगे** | |
| अलंबुषास्वरसः... | १४० |
| कांचनारत्वचः काथः ... | १६० |
| वरुणत्वचः क्वाथः | १६० |
| कांचनारगुग्गुलुः | २०५ |
| महातिक्तघृतम् ... | २१८ |
| वचादितैलम् ... | २३२ |
| लांगलीतैलम् ... | २३२ |
| विडंगारिष्टः ... | २३७ |
| सर्षपादिलेपः ... | ३६६ |
| **गंडापचीरोगे** | |
| कन्यास्वरसः ... | १४० |
| अलंबुषास्वरसः... | १४० |
| कांचनारगुग्गुलुः | २०५ |
| वमनम्... ... | ३०४ |
| सर्षपादिलेपः ... | ३६६ |
| रक्तस्रावविधिः ... | ३७३ |
| **गुदरोगे** | |
| लवणत्रितयादिचूर्णम् | १९० |
| विरेकः ... ... | ३११ |
| **गुदभ्रंशरोगे** | |
| चांगेरीघृतम् ... | २१६ |
| लोहरसायनम् ... | २८३ |
| **गुल्मरोगे** | |
| दशमूलशृतः ... | १५७ |
| पथ्यादिकाथः ... | १६० |
| वरुणादिगणकाथः | १६० |
| त्र्यूषणचूर्णम् ... | १७९ |
| मरिचचूर्णम् ... | १८४ |
| कपित्थाष्टकचूर्णम् | १८५ |
| दाडिमाष्टकचूर्णम् | १८६ |
| लवंगादिचूर्णम् ... | १८६ |
| महाखांडवचूर्णम् | १८७ |
| नारायणचूर्णम् ... | १९१ |
| हपुषादिचूर्णम् ... | १८९ |
| लवणत्रितयचू० | १९० |
| तुंबर्वादिचूर्णम् ... | १९० |
| चित्रकादिचूर्णम् | १९१ |
| बाहुशालगुडः ... | १९७ |
| सञ्जीवनीगुटिका | १९८ |

| विषयः | पृष्ठं. |
|---|---|
| कांकायनगुटिका | २०१ |
| योगराजगुग्गुलुः | २०२ |
| कैशोरगुग्गुलुः ... | २०३ |
| त्रिफलागुग्गुलुः ... | २०४ |
| त्रिफलामोदकः ... | २०५ |
| कांचनारगुग्गुलुः | २०५ |
| महातिक्तघृतम् ... | २१८ |
| बिन्दुघृतम् ... | २१९ |
| पिप्पल्यासवः ... | २३६ |
| लोहासवः ... | ,, |
| खदिरारिष्टः ... | २३८ |
| रोहितारिष्टः ... | २३९ |
| दशमूलारिष्टः ... | ,, |
| लोकनाथरसः ... | २६६ |
| विद्याधररसः ... | २७८ |
| विरेकः ... ... | ३११ |
| अभयामोदकः ... | ३१६ |
| मधुतैलबस्तिः ... | ३३५ |
| **( २ कफगुल्मरोगे )** | |
| हिंग्वादिचूर्णम् ... | १९२ |
| लवणभास्करचू० | १९४ |
| **( ३ वातगुल्मरोगे )** | |
| हिंग्वादिचूर्णम् ... | १९२ |
| लवणभास्करचूर्णं | १९४ |
| **ग्रन्थिरोगे** | |
| कांचनारगुग्गुलुः | २०५ |
| खदिरारिष्टः ... | २३८ |
| विरेकः ... ... | ३११ |
| रक्तस्रावविधिः ... | ३७३ |
| **ग्रहणीरोगे** | |
| आम्रादियवागूः... | १६४ |
| तिलकल्कः ... | १६७ |
| बृहतीकल्कः ... | १७७ |
| गङ्गाधरचूर्णम् ... | १८४ |
| मरिचादिचूर्णम् ... | १८४ |
| कपित्थादिचूर्णम् | १८५ |
| दाडिमाष्टकचूर्णम् | १८६ |
| लवंगादिचूर्णम् ... | १८६ |
| जातीफलादिचूर्णम् | १८७ |
| नारायणचूर्णम् ... | १९१ |
| चित्रकादिचूर्णम् | १९१ |

| विषयः | पृष्ठं. |
|---|---|
| हिंग्वादिचूर्णम् ... | १९२ |
| यवानीखांडवचूर्णं | १९२ |
| तालीसादिचूर्णम् | १९३ |
| लवणभास्करचूर्णं | १९४ |
| बाहुशालगुडः ... | १९७ |
| कांकायनगुटिका | २०१ |
| योगराजगुग्गुलुः | २०२ |
| अगस्त्यहरीतकी | २१० |
| कुटजावलेहः ... | २११ |
| चांगेरीघृतम् ... | २१६ |
| मसूरादिघृतम् ... | २१८ |
| पिप्पल्यासवः ... | २३६ |
| लोहासवः ... | ,, |
| देवदार्वरिष्टः ... | २३७ |
| रोहितारिष्टः ... | २३९ |
| दशमूलारिष्टः ... | २३९ |
| लोकनाथरसः ... | २६६ |
| मृगांकपोटली ... | २६८ |
| हेमगर्भपोली ... | २६९ |
| द्वितीयहेमगर्भपोटलीरसः ... | २६९ |
| हंसपोटलीरसः | २७४ |
| ग्रहणीकपाटरसः | २८१ |
| ग्रहणीवज्रकपाटरसः | २८१ |
| लोहरसायनम् ... | २८३ |
| **आमसंग्रहण्याम्** | |
| गुडूच्यादिकाथः | १५२ |
| **वातग्रहण्याम्** | |
| शालिपर्ण्यादिकाथः | १५३ |
| पिप्पल्यादिचूर्णं ... | १८३ |
| सूरणादिवटकः ... | १९९ |
| **( २ कफग्रहणीरोगे– )** | |
| सूरणादिवटकः | १९९ |
| **छर्दिरोगे** | |
| बीजपूरपुटपाकः | १४२ |
| आम्रपुटपाकरसः | ,, |
| जंबुजटापुटपाकः | ,, |
| गुडूच्यादिगणः | १४६ |
| आम्रादिफांटः | १७१ |
| मरिचादिहिमम् | १७२ |
| निंबदलकल्कः | १७४ |

विषयः — पृष्ठं.

कट्फलादिचूर्णं ... १८३
बृहत्कट्फलादिचूर्णम् १८३
महाखांडवचूर्णम् १८७
यवानीखांडवचूर्णं १९२
तालीसादिचूर्णम् १९३
कूष्मांडकावलेहः २०८
दशमूलारिष्टः ... २३९
लोकनाथरसः ... २६६
विरेकः... ... ३११

( २ त्रिदोषच्छर्दिरोगे )

बिल्वत्वक्क्वाथः १५५
गुडूचीक्काथः ... १४६
मसूरसक्तुमंथः ... १७१
एलादिचूर्णम् ... १९४

( ३ पित्तच्छर्दौ )

पर्पटक्काथः ... १५५

ज्वररोगे ।

वासकस्वरसः ... १३९
वृषपत्रपुटपाकः... १४३
गुडूच्यादिगणः ... १४६
लघुक्षुद्रादिक्काथः १४८
कट्फलादिक्काथः १५०
निदिग्धिकादिक्काथः १५०
ह्रीबेरादिक्काथः ... १५३
वासादिक्काथः ... १५४
षडङ्गपानम् ... १६५
उष्णोदकपानम्... १६६
अष्टगुणमंडः ... १६९
लाजामंडः ... ,,
आम्रादिफांटः ... १७१
वासाहिमः ... १७३
धान्याकादिहिमः ,,
वर्धमानपिप्पलीकल्कः १७४
आमलक्यादि० १७८
जीवनीयगणचूर्णम् १८०
सुदर्शनचूर्णम् ... १८२
त्रिफलादिचूर्णम् १७९
कट्फलादिचूर्णम् १८४
कट्फलादिलेहः १८३
दाडिमाष्टकचूर्णं... १८५
नारायणचूर्णम् ... १८८
यवानीखांडवचूर्णं १९२
तालीसादिचूर्णं ... १९३

सितोपलादिचूर्णं १९३
कूष्मांडकावलेहः २०९
अगस्त्यहरीतकी २१०
पानीयकल्याणघृतम् २१७
महातिक्तघृतम् ... २१८
अंगारकतैलम् ... २२३
नारायणतैलम् ... २२३
चंदनादितैलम् ... २२२
कुटजारिष्टः ... २३७
ज्वरांकुशो रसः... २६४
ज्वरारिरसः ... २६४
ज्वरघ्नी गुटिका... २६५
लोकनाथरसः ... २६६
कनकसुंदरो रसः २८०
वमनम् ... ३०४
अपराजितधूपः ३५१

( १ नवज्वरे । )

नागरादिपाचनम् १५१
पाचनाय पटोलादिः कंटकार्यादिश्च क्काथः १४९
पटोलादिक्काथः ... १४९

( २ वातज्वरे )

गुडूच्यादिक्काथः १५१
शालिपर्ण्यादिक्काथः १४६
काश्मर्यादिक्काथः १४६
लोकनाथरसः ... २६६

( ३ पित्तज्वरे )

कट्फलादिक्काथः १५०
पर्पटादिक्काथः ... १४६
द्राक्षादिक्काथः ... १४६
पर्पटादिक्काथः ... १४६
पर्पटक्काथः ... १४६
लोकनाथरसः ... २६६

( ४ कफज्वरे )

पाचनाय बीजपूरादिक्काथः ... १४७
भूनिंबादिक्काथः... १४८
पटोलादिक्काथः ... १५१
त्रिकंटकादियुक्तदुग्धपाकः ... १६७

लोकनाथरसः ... २६६

वातपित्तज्वरे

पर्पटपंचभद्रक्काथः १४८
मधूकपुष्पादिफांटः १७०
नीलोत्पलादिहिमं १७३

वातकफज्वरे

क्षुद्रादिक्काथः ... १५१
आरग्वधादिः ... १४८
शालिपर्ण्यादिः ... १४६
पिप्पल्यादिक्काथः १५०
हिंग्वादिचूर्णगु० १९२

( ५ पित्तकफज्वरे )

अमृताष्टकक्काथः १४९
पटोलादिक्काथः ... १४९
वासकक्काथः ... १५४

( ६ त्रिदोषज्वरे ।)

लघुक्षुद्रादिक्काथः १४८
अभयादिक्काथः... १४९

( ७ सन्निपातज्वरे )

शालिपर्ण्यादिः ... १४६
पिप्पल्यादिक्काथः १५०
अष्टादशाङ्गक्काथः... १५०
कुलित्थादियूषः
संजीवनीगुटी ... १९८
लघुसूचिकाभरणरसः २७०
जलबन्धुरसः ... २७१
पंचवक्त्ररसः ... २७१
उन्मत्तरसः ... २७२
अंजनरसः ... २७२
कनकसुंदररसः ... २८०
सन्निपातभैरवो रसः २८०
अवपीडननस्यं ३४१
रेचननस्यम् ... ३४०
प्रबोधाय शिरीषबीजाद्यंजनम् ३५२

( ८ जीर्णज्वररोगे )

गुडूचीक्काथः ... १४६
पंचमूलीक्षीर० १६७
अमृताहिमः ... १७३
विरेकः ... ३११

( ९ विषमज्वररोगे )

तुलसीपत्ररसः ... १३९
द्रोणपुष्पीरसः ... ,,
क्षुद्रादिक्काथः ... १४८
मुस्तादिक्काथः ... १५१
पटोलादिक्काथः ... १४९
रसोनकल्कः ... १७५
त्रिफलाचूर्णम् ... १७९

(१० धातुस्थसर्वज्वरेषु)

पिप्पलीमोदकः... २००
क्षीरषट्पलघृतम् २१५
पञ्चतिक्तकघृतम् २२२
लाक्षादितैलम् ... २२२
ज्वरारिरसः ... २६४
महाज्वरांकुशो रसः २६४
अभयामोदकः ... ३१६
निरूहबस्तिः ... ३३०
अवपीडननस्यं ... ३४१

( ११ शीतज्वरे । )

क्षुद्रादिक्काथः ... १५१
शीतारिरसः ... २६५

( १२ एकाहिकज्वरे )

पटोलादिक्काथः ... १५१

(१३ तृतीयकज्वरे )

गुडूच्यादिक्काथः १५१
पानीयकल्याणकघृतं २१७

( १४ चातुर्थिकज्वरे )

देवदार्वादिक्काथः १५२
पानीयकल्याणकघृतं २१७

( १५ ज्वरातिसाररोगे )

बृहद्गुडूच्यादिक्काथः १५२
नागरादिक्काथः ... १५२

तारुण्यपिटिकारोगे

लोध्रादिलेपः ... ३५७
वटपत्रादिलेपः ... ,,

तृष्णारोगे

गुडूच्यादिगणः ... १४६
षडङ्गपानम् ... १६५
लाजमंडः ... ७६९

विषयः — पृष्ठं.

मधूकपुष्पादिफांटः १७०
आम्रादिफांटः ... १७१
२ मधूकपुष्पादिफांटः १७०
यवसक्तुमंथः ... १७२
मरिचादिहिमः ... १७२
धान्याकहिमः ... १७३
धान्यकादिहिमः ,,
जीवनीयगणः ... १८०
आमलादिगुटी ... १९८
च्यवनप्राशावलेहः २०८
कूष्मांडकावलेहः २०९
सभक्तस्नेहसेवनं २९०
निरूहवस्तिः ... ३३०
प्रतिमर्शनस्यं ... ३४४
मधुगंडूषः ... ३५३

दाहरोगे ।

गुडूच्यादिगणक्वाथः १४६
त्रिफलादिकाथः १५७
न्यग्रोधादिकाथः १५८
मधूकपुष्पादिफांटः १७०
२ मधूकपुष्पादिफांटः ,,
यवसक्तुमंथः ... १७२

( २ अन्तर्दाहे )

धान्याकहिमः १७३
धान्याकादिहिमः ,,
जीवनीयगणचूर्णं १८०

( ३ हस्तपादाङ्गदाहे )

सितोपलादिचूर्णं १९३

( ४ उरोदाहे )

कामदेवघृतम् २१६
अभयामोदकः ... ३१६
मधुगंडूषः ... ३५३
बिभीतकमज्जाप्रलेपः ३५३
रक्तस्रावविधिः ... ३७३

द्विजिह्वकरोगे ।

वमनम् ... ... ३०४

धातुक्षयरोगे ।

पिप्पलीमोदकः... २००

( २ शुक्रौजःक्षये । )

कामदेवघृतम् ... २१६

( ३ नष्टशुक्रे । )

नारायणतैलम् ... २२३
दशमूलारिष्टः ... २३९

नासारोगे ।

मयूरघृतम् ... २२१
विरेकविधिः ... ३११
रेचननस्यम् ... ३४०
बृंहणनस्यम् ... ३४३

( २ नासाऽर्शोरोगे । )

गृहधूमादितैलं ... २३०

( ३ क्षवथुरोगे )

कुष्ठादितैलं वा घृतम् २३१

(४ नासादाहे । )

रक्तस्रावः ... ३११

( ५ नासापाके । )

वमनम् ... ... ३०४
रक्तस्रावविधिः ... ३११

( ६ पीनसरोगे ।)

निदिग्धिकादिक्वाथः १५०
वासादिक्वाथः ... १६३
त्र्यूषणचूर्णम् ... १७९
दाडिमाष्टकचूर्णं... १८६
लवंगादिचूर्णम् ... १८६
बाहुशालगुडः ... १९७
व्योषादिगुटिका १९९
अगस्त्यहरीतकी २१०
पाठादितैलम् ... २३०
रेचननस्यम् ... ३४०

( ७ पूतिनासारोगे । )

व्याघ्र्यादितैलम्... २३१
रक्तस्रावः ... ३११

(८ प्रतिश्यायरोगे । )

आर्द्रकस्वरसः ... १४०
बिभीतकपुटपाकः १४२
जातीफलादिचूर्णं १८७
बाहुशालगुडः ... १९७
व्योषादिगुटिका... १९९
पानीयकल्याणघृतम् २१७
लाक्षादितैलम् ... २२२
रेचननस्यम् ... ३४०

(९ नासारक्तस्रावरोगे ।)

लोकनाथरसः ... २६६
आमलादिलेपः ... ३६१
रक्तस्रावविधिः ३११

नेत्ररोगे ।

मंजिष्ठादिक्वाथः १६२
अमृतादिक्वाथः १६३
त्रिफलाचूर्णम् ... १७९
चंद्रप्रभागुटी ... २००
योगराजगुग्गुलुः २०२
कैशोरगुग्गुलुः ... २०३
त्रिफलादिघृतम् २२०
मयूरघृतम् ... २२१
अभयामोदकः ... ३१६
रेचननस्यम् ... ३४०
बृंहणनस्यम् ... ३४३
हरीतक्यादिलेपः ३६०
रसांजनादिलेपः ३६०
यष्ट्यादिलेपः ... ३८४
रसांजनादिलेपः... ,,
सैंधवादिलेपः ... ,,
निम्बुरसलेपः ... ,,
तर्पणम् ... ... ,,
चंद्रोदयावर्तिः ... ३९०
मृदुचूर्णाञ्जनम् ... ३९५
सौवीरांजनम् ... ,,
नानौषधसिक्तनागशलाका ... ,,
प्रत्यंजनप्रयोजनम् ,,
प्रसादनचूर्णावकाशः ,,
नयनामृतांजनम् ,,
नयनप्रसादनपाणितलस्पर्शप्रकारः ३९६
नयनप्रसादनशीतोदकसेचनप्रकारः ३७९

( २ नेत्राभिघातरोगे । )

साबरादिसेकः ... ३८०

( ३ नेत्राधिमंथरोगे । )

रक्तस्रावविधिः ... ३११
शिरोविरेचनम्... ३४१
अधिमंथोपचारौ ३८२

( ४ अभिष्यंदरोगे । )

( वाताभिष्यंदे )

एरंडादिसेकः ... ३८०
बिल्वाद्याश्च्योतनं ३८२
आश्च्योतनम् ... ३८१
स्त्रीस्तन्याश्च्योतनम् ३८२
पिंडिका... ... ३८२

( पित्ताभिष्यंदे )

आश्च्योतनम् ... ३८१
स्त्रीस्तन्याश्च्योतनं ३८२
पिंडिके ... ... ३८३
पिंडिका... ... ३८२
त्रिफलापिंडिका... ३८३

( श्लेष्माभिष्यंदे ।)

शिरोविरेचनम् ... ३४१
पिंडिका ... ३८२
पिंडिका ... ,,
त्रिफलापिंडिका... ३८३

( रक्ताभिष्यंदरोगे । )

रक्तस्रावः ... ३११
सेकौ ... ... ३८०
आश्च्योतनम् ... ३८१
स्त्रीस्तन्याश्च्योतनं ३८२
पिंडिका ... ३८२

( सर्वाभिष्यंदरोगे । )

आश्च्योतनम् ... ३८१
पिंडिकाबंधनम्... ,,

(५ अश्रुरोगे । )

दार्व्यादिक्रिया ... ३९२

(६ अंजननामिकारोगे । )

प्रतिसारणम् ... ३८४

(७ अन्धत्वरोगे । )

अंजनम् ( कतकरसक्रिया ) ... ३९४

( ८अर्जुनरोगे । )

रोपणी वर्तिः ( पुष्पवर्तिः ) ... ३९१

( ९ अर्मरोगे । )

मरिचादिलेपः ... ३८४
तुत्थादिरसः ... ३९२

विषयः पृष्ठं.

लेखनचूर्णम् ... ३९४
(१०नेत्रस्य कफादिमल०)
लेखनांजनम् ... ३९४
( ११ नेत्रकंडूरोगे । )
शुंठ्यादिपिंडिका ३८३
रोपणी रसक्रिया ३९३
गुडूच्यादिरसक्रिया ३९३
सानुपानः पुनर्नवायोगः ... ,,
लेखनांजनम् ... ३९४
( १२ काचरोगे । )
तुत्थादिरसः ... ३९२
गुडूच्यादिरसः ... ३९३
लेखनांजनम् ... ३९४
( १३ क्लेदरोगे । )
रोपणीरसक्रिया ३९३
( १४ तिमिररोगे । )
स्नेहपानम् ... २९३
रोपणी वर्तिः(पुष्पवर्तिः) ... ३९१
तुत्थादिरसः ... ३९२
गुडूच्यादिरसः ... ३९३
( १५ नेत्रदाहरोगे । )
दार्व्यादिरसः ... ३९३
( १६ नक्तान्ध्यरोगे । )
पथ्यादिषडङ्गक्वाथः १६२
रसांजनादिवर्तिः ३९१
सानुपानः पुनर्नवायोगः ... ३९३
लेखनांजनम् ... ३९४
( १७ पटलरोगे । )
पथ्यादिषडङ्गक्वाथः १६२
( १८ पक्ष्मरोगे । )
रोपणी रसक्रिया ३९४
( १९ नेत्रपाकरोगे । )
पयआदिसेकः ... ३८०
( २० पित्तविकारे । )
शाबरादिसेकः ... ३८०
( २१ नेत्रपुष्परोगे । )
द्विमासिककुसुमहरो वटक्षीरादिरसः ... ३९२

सानुपानः पुनर्नवायोगः ... ३९३
लेखनचूर्णांजनम् ३९४
( २२ अ्रूरोगे । )
त्रिफलामोदकः २०५
( २३ मांसवृद्धिरोगे । )
रोपणी वर्तिः ... ३९१
( २४ नेत्ररक्तरोगे । )
शाबरादिसेकः ... ३८०
धात्र्यादिस्नेहनी वर्तिः ३९१
दार्व्यादिक्रिया ... ३९३
( २५ लिङ्गनाशरोगे । )
गुडूच्यादिक्रिया ३९३
( २६ वर्त्मरोगे । )
तुत्थादिरसक्रिया ३९२
( २७ नेत्रवातरोगे । )
पयआदिसेकः ... ३८०
धात्र्यादिस्नेहनीवर्तिः ८६
नेत्रशिरोत्पातरोगेऽजनं ... ३९४
( २८ शुक्ररोगे । )
पथ्यादिषडङ्गक्वाथः १६२
शुक्रादिरोगेऽञ्जनवर्तिप्रकारौ ... ३९०
लेखनी दंतवर्तिः ३९०
रोपणी वर्तिः ... ३९१
तुत्थादिरसक्रिया ३९२
(२९ शुक्लकृष्णमार्गरोगे ।)
गुडूच्यादिक्रिया ३९३
( ३० शुष्कनेत्ररोगे । )
पयआदिसेकः ३८०
( ३१ नेत्रशोथरोगे । )
शुंठ्यादिपिंडिका ३८३
( ३२ नेत्रस्रावरोगे । )
धात्र्यादिस्नेहव० ३९१
सानुपानपुनर्नवायोगः ... ३९३
रोपणी रसक्रिया ३९३
२ रोपणी रसक्रिया ,,

परिकर्तिकरोगे ।
नारायणचूर्णम् ... १८८
परिणामशूलरोगे ।
विष्णुक्रान्ताजटाकल्कः ... १७५
पांडुरोगे ।
पुनर्नवादिक्वाथः १६०
वर्धमानपिप्पली १७४
नारायणचूर्णम् ... १८८
हपुषादिचूर्णम् ... १८९
हिंग्वादिचूर्णम् ... १९२
यवानीखांडवचूर्णं १९२
तालीसादिचूर्णम् १९३
चित्रकादिचूर्णम् १९१
बाहुशालगुडः ... १९७
मंडूरवटकः ... २००
पिप्पलीमोदकः ... २००
चंद्रप्रभागुटी ... २००
योगराजगुग्गुलुः २०२
कैशोरगुग्गुलुः ... २०३
कुटजलगवले० २११
कामदेवघृतं ... २१६
पानीयकल्याणघृतम् २२०
महातिक्तघृतम् ... २१८
पञ्चतिक्तघृतम् ... २२२
शतावरीतैलं ... २२६
उशीरासवः ... २३५
पिप्पल्यासवः ... २३६
लोहासवः ... ,,
खदिरारिष्टः ... २३८
रोहितारिष्टः ... २३९
दशमूलारिष्टः ... २३९
लोहरसायनम् ... २८३
विरेकः ... ... ३११
अभयामोदकः ... ३१६
पित्तरोगे ।
वासास्वरसः ... १३९
पर्पटजः क्वाथः ... १४६
विलेपीपानम् ... १६८
यवमंडः... ... १६९
लाजमंडः ... ,,

मधूकपुष्पफांटः १७१
निंबजकल्कः ... १७४
त्रिफलाचूर्णम् ... १७९
सितोपलादिचूर्णं १९३
योगराजगुग्गुलुः २०२
च्यवनप्राशावलेहः २०८
लाक्षादितैलम् ... २२२
वसंतकुसुमाकरो रसः २७२
सर्पिष्पानम् ... २८८
वमनम् ... ... ३०४
विरेकः ... ... ३११
बृंहणनस्यम् ... ३४२
शमनसंज्ञगंडूषः ३५३
( १ विड्भंगरोगे । )
नारायणचूर्णम् ... १८८
मसूरादिघृतम् ... ११६
( २ शरीरदुर्गंधरोगे । )
लाक्षादितैलम् ... २२२
लेपौ ... ... ३६८
पृष्ठरोगे ।
प्रधमननस्यम् ... ३४१
पूतिदेहरोगे ।
रक्तस्रावः ... ३११
प्रदररोगे ।
सशूलप्रदरे दार्व्यादिक्वाथः ... १५८
गोक्षुरादिगुग्गुलुः २१८
महातिक्तघृतम् ... २१८
( २ रक्तप्रदरे । )
तंदुलीयजटाकल्कः १७६
शतावरीतैलम् ... २२६
निरूहबस्तिः ... ३३०
प्रमेहरोगे ।
अमृतास्वरसः ... १३८
धात्र्याः स्वरसः ,,
वरादिक्वाथः ... १५८
न्यग्रोधादिक्वाथः १५८
त्रिफलाचूर्णम् ... १७९
त्र्यूषणचूर्णम् ... १७९
लवंगादिचूर्णम् ... १८६

| विषयः | पृष्ठं. |
| --- | --- |
| बाहुशालगुडः ... | १९७ |
| सूरणादिवटकः ... | १९९ |
| मंडूरादिवटकः ... | २०० |
| चंद्रप्रभागुटी ... | २०० |
| योगराजगुग्गुलुः | २०२ |
| कैशोरगुग्गुलुः ... | २०३ |
| गोक्षुरादिगुग्गुलुः | २०४ |
| पानीयकल्याणघृतम् | २१७ |
| शतावर्यादितैलं ... | २२६ |
| उशीरासवः ... | २३५ |
| कुमार्यासवः ... | २३५ |
| विडंगारिष्टः ... | २३७ |
| देवदार्वरिष्टः ... | २३७ |
| बब्बूल्यरिष्टः ... | २३८ |
| दशमूलारिष्टः ... | २३९ |
| वसंतकुसुमाकरो रसः | २७२ |
| प्रमेहबद्धरसः ... | २७७ |
| वमनम् ... ... | ३०४ |
| विरेकः ... ... | ३११ |
| अभयामोदकः ... | ३१६ |
| निरूहवस्तिः ... | ३३० |
| **( २ प्रमेहपिडिकारोगे । )** | |
| कैशोरगुग्गुलुः ... | २०३ |
| मातुलुंगादिलेपः | ३५७ |
| रक्तस्रावः ... | ३११ |
| **प्रवाहिकारोगे ।** | |
| गङ्गाधरचूर्णम् ... | १८४ |
| बृहद्गङ्गाधरचूर्णम् | १८४ |
| कुटजाष्टकावलेहः | २११ |
| २. कुटजाष्टकावलेहः | ,, |
| चांगेरीघृतम् ... | २१६ |
| मसूरादिघृतम् ... | २१६ |
| **प्लीहरोगे ।** | |
| कन्यास्वरसः ... | १४० |
| मरिचादिचूर्णम्... | १८४ |
| हपुषादिचूर्णम् ... | १८९ |
| लवणत्रितयादिचूर्णम्... ... | १९० |
| हिंग्वादिचूर्णम् ... | १९२ |
| यवानीखांडवचूर्णं | १९२ |
| तालीसादिचूर्णं ... | १९३ |
| लवणभास्करचूर्णं | १९४ |
| सूरणादिवटकः ... | १९९ |
| मंडूरादिवटकः ... | २०० |
| त्रिफलामोदकः ... | २०५ |
| क्षीरषट्पलघृतम् | २१५ |
| शतावर्यादितैलम् | २२६ |
| लोहासवः ... | २३६ |
| रोहितारिष्टः ... | २३९ |
| विद्याधरो रसः ... | २७८ |
| वमनम् ... ... | ३०४ |
| विरेकः ... ... | ३११ |
| अभयामोदकः ... | ३१६ |
| मधुतैलबस्तिः ... | ३३५ |
| रक्तस्रावः ... | ३११ |
| **बालरोगे ।** | |
| अतिसारे धातक्यादिश्रृतः ... | १५३ |
| कासश्वासज्वरहरं कट्फलादिचूर्णं | १८३ |
| कासज्वरच्छर्दिषु शृंग्यादिलेहो वा विषालेहः ... | १८३ |
| कासेषु यवक्षारादिलेहः ... | १८४ |
| **( बालग्रहेषु । )** | |
| चंदनादितैलं ... | २३२ |
| धूपनम् ... ... | ३५१ |
| बालस्रीहि दाहः... | ३७७ |
| **भगन्दररोगे ।** | |
| खदिरादिक्काथः ... | १६१ |
| नारायणचूर्णम् | १८८ |
| लवणभास्करचूर्णं | १९४ |
| चित्रकादिचूर्णम् | १९१ |
| सूरणादिवटकः ... | १९९ |
| चंद्रप्रभागुटी ... | २०० |
| योगराजगुग्गुलुः | २०२ |
| त्रिफलागुग्गुलुः... | २०४ |
| त्रिफलामोदकः ... | २०५ |
| कांचनारगुग्गुलुः | २०५ |
| कासीसादिघृतं ... | २१८ |
| षड्बिन्दुघृतम् ... | २१९ |
| लोहासवः ... | २३६ |
| विडंगारिष्टः ... | २३७ |
| दशमूलारिष्टः ... | २३९ |
| कनकसुंदरो रसः | २८० |
| पूर्वस्वेदः ... | २९७ |
| विरेकः ... ... | ३११ |
| अभयामोदकः ... | ३१६ |
| **भग्नरोगे ।** | |
| न्यग्रोधादिक्काथः | १५८ |
| **भ्रुजरोगे ।** | |
| रेचननस्यम् ... | ३४० |
| बृंहणनस्यम् ... | ३४२ |
| रक्तस्रावविधिः ... | ३११ |
| **भ्रमरोगे ।** | |
| मधूकपुष्पादिफांटः | १७० |
| २. मधूकपुष्पादिफांटः | ,, |
| कूष्मांडकावलेहः | २०९ |
| वमनम् ... ... | ३०४ |
| अभयामोदकः ... | ३१६ |
| **मदात्ययरोगे ।** | |
| मद्यविकारे खर्जूरादिमंथः ... | १७१ |
| **मदरोगे ।** | |
| दुष्टकोद्रवोत्थमदे कूष्मांडकस्वरसः | १४१ |
| मधूकपुष्पादिफांटः | १७० |
| **मनोविकाररोगे ।** | |
| अवपीडनस्यं ... | ३४१ |
| **मुखरोगे ।** | |
| महाखांडवचूर्णम्... | १८७ |
| इरिमेदादितैलं ... | २२९ |
| क्षारतैलम् ... | २३० |
| विरेकः ... ... | ३११ |
| ताल्वोष्ठपाके वमनं | ३०४ |
| मुखपाके गंडूषः | ३५४ |
| ओष्ठवक्त्रपाके दाहे च रक्तस्रावः | ३११ |
| मुखकार्ष्ण्ये लेपः | ३५७ |
| मुखव्रणे मधुगंडूषः | ३५३ |
| मुखशोषवैरस्ययोर्गंडूषः | ,, |
| पूतिमुखे रक्तस्रावः | ३११ |
| **( २ गलरोगे । )** | |
| त्र्यूषणचूर्णम् ... | १७९ |
| कपित्थादिचूर्णम् | १८५ |
| लवंगादिचूर्णम् ... | १८६ |
| महाखांडवचूर्णम् | १८७ |
| यवानीखांडवचूर्णम् | १९२ |
| त्रिफलामोदकः | २०५ |
| मयूरघृतम् ... | २२१ |
| द्राक्षारिष्टः ... | २३८ |
| अवपीडननस्यम् | ३४१ |
| रेचननस्यम् ... | ३४० |
| **( ३ गलगंडरोगे । )** | |
| अभयामोदकः ... | ३१६ |
| सर्षपादिलेपः ... | ३६६ |
| वातगलगंडे निचूलादिलेपः ... | ,, |
| कफगलगंडे देवदार्वादिलेपः ... | ,, |
| **( ४ गलग्रहरोगे । )** | |
| दाडिमाष्टकचूर्णं... | १८६ |
| नारायणचूर्णम् ... | १८८ |
| हिंग्वादिचूर्णम् ... | १९२ |
| **( ५ गलशुंडीरोगे । )** | |
| वमनम् ... ... | ३०४ |
| **( ६ जिह्वारोगे । )** | |
| यवानीखांडवचूर्णं | १९२ |
| त्रिफलामोदकः... | २०५ |
| बलादिघृतम् ... | २२१ |
| **( ७ उपजिह्वकरोगे । )** | |
| नीलिकादितैलं ... | २२८ |
| **( ८ सुप्तजिह्वारोगे । )** | |
| सितोपलादिचूर्णं | १९३ |
| **( ९ तालुरोगे । )** | |
| त्रिफलामोदकः ... | २०५ |

विषयः पृष्ठं.

(१० दंतरोगे।)
चंद्रप्रभागुटी २००
नारायणतैलं २२३
इरिमेदादितैलं २२९
बृंहणनस्यम् ३४२
दंतचाले गंडूषः ३५३
दंतपाते पथ्यादिकाथः १६२
दंतरक्तस्रुतिपीडाशोथदाहेषु प्रतिसारणं ३५४
मूत्ररोगे विरेकः ३१२

मूत्रकृच्छ्ररोगे।
सदाहमूत्रकृच्छ्रे हरीतक्यादिकाथः १५७
गोक्षुरकाथः १५८
हिंग्वादिचूर्णम् १९२
जीरगुडयोगः १९९
चंद्रप्रभागुटी २००
गोक्षुरादिगुग्गुलुः २०४
च्यवनप्राशावलेहः २०८
चांगेरीघृतम् २१६
कामदेवघृतम् २१६
पानीयकल्याणघृतम् २१७
कुमार्यासवः २३५
देवदार्वरिष्टः २३७
दशमूलारिष्टः २३९
लोहरसायनम् २८३
अभयामोदकः ३१६
निरूहबस्तिः ३३०

(२ मूत्राघातरोगे।)
वीरतर्वादिकाथः १५७
चंद्रप्रभागुटी २०२
गोक्षुरादिगुग्गुलुः २०४

मूर्च्छारोगे।
मधूकपुष्पादिफांटः १७०
आम्रादिफांटः १७१
योगराजगुग्गुलुः २०२
निरूहबस्तिः ३३०

मेढ्ररोगे।
रास्नादिकाथः १५६
मेहनव्यथायामेरंडादिकाथः १५६

(२ मेहनग्रंथिरोगे।)
चंद्रप्रभागुटी २००
विरेकः ३११
लिंगस्तनवृद्धिकरौ लेपौ ३६८

मेदोरोगे।
न्यग्रोधादिकाथः १५८
बिल्वादिकाथः १५९
त्रिफलाकाथः १५९
उष्णशीताम्बु १५९
शाखोटकादिकाथः १६०
वरुणादिगणकाथः १६०
मंजिष्ठादिकाथः १६२
उष्णोदकपानम् १६६
त्र्यूषणचूर्णम् १७९
योगराजगुग्गुलुः २०२
तैलस्नेहपानम् २८८
वमनम् ३०४
मधुतैलबस्तिः ३३५

यकृद्रोगे।
लवणत्रितयादिचूर्णम् १९०
हिंग्वादिचूर्णम् १९२
रक्तस्रावः ३११
शिशोर्यकृति दाहः ३७७

योनिरोगे।
न्यग्रोधादिकाथः १५८
लघुफलघृतम् २२२
विरेकः ३११
योनिगाढीकरणलेपौ ३६८
योनिद्रावणे लेपः ,,

(२ वंध्यायोनिरोगे।)
रास्नादिकाथः १५६
जीवनीयगणचूर्णं १८०
पुत्रदं शतावरीतैलं २२६

रक्तरोगे।
ह्रीबेरादिकाथः १५३
ऊर्ध्वगरक्ते सितोपलादिचूर्णम् १९३
कुटजत्वगाद्यवलेहः २११

(२ रक्तक्षयरोगे।)
धान्यादिमंडः १६९
लाक्षाकल्कः १७६
वसास्नेहपानम् २८९
स्नेहपानम् २९२

रक्तपित्तरोगे।
वासास्वरसः १३९
वृषपत्रपुटपाकरसः १४३
बृहत्क्षुद्र्यादिकाथः १५२
वासादिकाथः १५४
वासककाथः ,,
त्रिफलादिकाथः १५७
यवमंडः १६९
मधूकपुष्पादिफांटः १७०
यवसक्तुमंथः १७२
आम्रादिहिमः ,,
वासाहिमः १७३
धान्यकादिहिमः ,,
जीवनीयगणः १८०
कूष्मांडकावलेहः २०९
कुटजत्वगाद्यवलेहः २११
कामदेवघृतम् २१६
महातिक्तघृतम् २१८
शतावरीतैलम् २२६
चन्दनादितैलम् २३१
उशीरासवः २३५
कुमार्यासवः २३५
लोकनाथो रसः २६६
त्रिफलादिगंडूषः ३५३
चंदनादिलेपः ३६२
रक्तस्रावः ३११

लूतारोगे।
कासीसादिघृतम् २१८
गौराद्यं घृतम् २२०

वातरोगे।
वीरतर्वादिकाथः १६०
गोक्षुरकाथः १५८
सप्तमुष्टियूषः १६५
तंडुलादियवागूः १६७
वर्धमानपिप्पलीकल्कः १७४
रसोनस्य कल्कः १७५
जीवनीयगणचूर्णं १८०
कट्फलादिचूर्णम् १८३
२. कट्फलादिचूर्णम् १८३
जातीफलादिचूर्णं १८७
नारायणचूर्णम् १८८
अजमोदादिचूर्णं १९१
योगराजगुग्गुलुः २०२
गोक्षुरादिगुग्गुलुः २०४
च्यवनप्राशावलेहः २०८
चांगेरीघृतम् २१६
लाक्षादितैलम् २२२
नारायणतैलम् २२३
बलादितैलम् २२४
प्रसारण्यादितैलम् २२५
माषादितैलम् २२५
देवदार्वरिष्टः २३७
दशमूलारिष्टः २३९
हेमगर्भपोट्टली २६९
द्वितीयहेमगर्भपोट्टली २६९
स्वच्छंदभैरवः २७४
वातनाशनो रसः २७९
लोहरसायनम् २८३
सर्पिष्पानम् २८८
तैलस्नेहपानम् २८८
वसास्नेहपानम् २८९
मज्जास्नेहपानम् २८९
स्नेहपानम् २९९
महाशाल्वणप्रयोगः ३०१
वमनम् ३०४
विरेकः ३११
अभयामोदकः ३१६
अनुवासनतैलम् ३२७
निरूहबस्तिः ३३०
बृंहणनस्यम् ३४२
स्नैहिकगंडूषः ३५४
शिरोबस्तिः ३६८

| विषयः | पृष्ठं. |
|---|---|
| सपीडदुर्जयेऽनिले रक्तस्रावविधिः | ३११ |
| वृषणवाते आर्द्रकस्वरसः | १४० |
| उष्णवायौ गोक्षुर. | १५८ |
| मूढवाते सूरणावलेहः | २७८ |
| मूढवाते महावह्निरसः | २७८ |
| अनंतवातरोगे वर्यादिलेपः | ३६२ |
| ( २ अपतंत्रकरोगे । ) | |
| मधूकसारादिनस्यम् | ३४२ |
| पक्करसोनकल्कः | १७५ |
| अपबाहुकरोगे । | |
| गुंजापिष्टलेपः | ३६६ |
| ( ३ अंगपीडारोगे । ) | |
| गात्राणां सादगौरवे रक्तस्रावः | ३११ |
| ( ४ अंगशोषे । ) | |
| नारायणतैलं | २२३ |
| (५ अर्दितवायुरोगे । ) | |
| निदिग्धिकादिक्वाथः | १५० |
| मंजिष्ठादिक्वाथः | १६२ |
| द्वितीयरसोनकल्कः | १७५ |
| मयूरघृतम् | २२१ |
| नस्यम् | ३४२ |
| ( ६ अष्ठीलिकारोगे ) | |
| हिंग्वादिचूर्णम् | १९२ |
| ( ७ आध्मानरोगे । ) | |
| रास्नादिक्वाथः | १५६ |
| महाखाण्डवचूर्णम् | १८७ |
| नारायणचूर्णम् | १८८ |
| हपुषादिचूर्णम् | १८९ |
| पंचसमचूर्णम् | १८९ |
| नाराचचूर्णम् | १८९ |
| लवणत्रितयादि. | १९० |
| तुंबर्वादिचूर्णम् | १९० |
| तालीसादिचूर्णम् | १९३ |
| बिंदुघृतम् | २१९ |
| शतावर्यादितैलं | २२६ |
| नाराचरसः | २७२ |
| इच्छाभेदीरसः | २७२ |
| विरेकः | ३११ |
| अभयामोदकः | ३१६ |
| ( ८ ऊरुग्रहरोगे । ) | |
| पार्श्वपृष्ठोरुपीडायां रास्नादिक्वाथः | १५६ |
| द्वितीयरसोनकल्कः | १७५ |
| पिप्पल्यादिकल्कः | ,, |
| त्रिफलावटकः | २०० |
| विडंगारिष्टः | २३७ |
| ( ९ कटिग्रहरोगे । ) | |
| जंघाकटिग्रहे रास्नादिक्वाथः | १५५ |
| स्तनस्कंधकटिमेढ्रहृदयोत्थव्यथोपरि एरंडमूलादिक्वाथः | १५७ |
| संधिकटिपृष्ठगुदजंघानां रुज्यजमोदादिचूर्णं | १९१ |
| त्रिकपृष्ठग्रहे लाक्षादितैलम् | २२२ |
| ( १० कंपरोगे । ) | |
| हस्तशिरोमन्याशिराकंपे वारुण्यादितैलं | २२४ |
| ( ११ कार्श्यरोगे । ) | |
| कुटजलगाद्यवलेहः | २११ |
| कामदेवघृतम् | २१६ |
| पिप्पल्यासवः | २३६ |
| दशमूलारिष्टः | २३९ |
| लोकनाथरसः | २६६ |
| मृगांकपोट्टलीरसः | २६८ |
| ( १२ कोष्ठवायुरोगे । ) | |
| बीजपूररसः | १४० |
| ( १३ गृध्रसीरोगे । ) | |
| दशमूलशृतः | १४९ |
| शेफालीपत्रशृतः | १५५ |
| रास्नादिक्वाथः | १५६ |
| महानिम्बजटाकल्कः | १७४ |
| द्वितीयरसोनकल्कः | १७५ |
| अजमोदादिचूर्णं | १९१ |
| नारायणतैलम् | २२३ |
| शतावर्यादितैलं | २२६ |
| गुंजापिष्टलेपः | ३६६ |
| ( १४ तूणीरोगे । ) | |
| अजमोदादिचूर्णं | १९१ |
| ( १५ दंडापतानकरोगे । ) | |
| शतावर्यादितैलं | २२६ |
| ( १६ निद्रानाशरोगे । ) | |
| लोकनाथरसः | २६६ |
| ( १७ पक्षाघातरोगे । ) | |
| मंजिष्ठादिक्वाथः | १६२ |
| माषादिनस्यम् | ३४४ |
| ( १८ प्रतूणीरोगे । ) | |
| अजमोदादिचूर्णं | १९१ |
| ( १९ प्रत्यष्ठीलारोगे । ) | |
| विडंगारिष्टः | २३७ |
| ( २० प्रसुप्तिरोगे । ) | |
| मंजिष्ठादिक्वाथः | १६२ |
| सर्वेश्वरो रसः | २७६ |
| स्वर्णक्षीरीरसः | २७७ |
| ( २१ बद्धविट्करोगे । ) | |
| नाराचचूर्णम् | १९० |
| (२२ मन्यास्तंभरोगे । ) | |
| मन्यापृष्ठग्रहे मयूरादिघृतम् | २२१ |
| रेचननस्यम् | ३४० |
| बृंहणनस्यम् | ३४२ |
| नस्यम् | ३३८ |
| ( २३ विड्ग्रहरोगे ) | |
| हरीतक्यादिक्वाथः | १५७ |
| लवणपंचकचूर्णं | १८१ |
| लवणत्रितयादिचूर्णं | १९० |
| यवानीखांडवचूर्णं | १९२ |
| लवणभास्करचूर्णं | १९४ |
| चंद्रप्रभागुटी | २०० |
| नाराचरसः | २७२ |
| इच्छाभेदीरसः | २७२ |
| ( २४ विश्वाचीरोगे । ) | |
| अजमोदादिचूर्णम् | १९१ |
| गुंजापिष्टलेपः | ३६६ |
| ( २५ गात्रस्फुरणरोगे । ) | |
| लाक्षादितैलम् | २२२ |
| ( २६ हनुस्तंभरोगे । ) | |
| विडंगारिष्टः | २३७ |
| रेचननस्यम् | ३४० |
| (२७ विविधवातरोगे । ) | |
| रास्नादिक्वाथः | १५६ |
| ( २८ सपीडदुर्जयेऽनिले । ) | |
| रक्तस्रावविधिः | ३११ |
| वातरक्तरोगे । | |
| अमृतादिक्वाथः | १६१ |
| सदाहे पटोलादिः | १६१ |
| मंजिष्ठादिक्वाथः | १६२ |
| वर्धमानपिप्पली | १७४ |
| योगराजगुग्गुलुः | २०२ |
| त्रिदोषवातरक्ते कैशोरगुग्गुलुः | २०३ |
| गोक्षुरादिगुग्गुलुः | २०४ |
| च्यवनप्राशावलेहः | २०८ |
| कामदेवघृतम् | २१६ |
| पानीयकल्याणघृतम् | २१७ |
| अमृताघृतम् | २१७ |
| महातिक्तघृतम् | २१८ |
| कासीसादिघृतं | २१८ |
| सदाहे शतावरीतैलम् | २२६ |
| पिंडतैलम् | २२७ |
| लोकनाथो रसः | २६६ |
| कुष्ठकुठारो रसः | २७५ |
| लोहरसायनम् | २८३ |
| विरेकः | ३११ |
| निरूहबस्तिः | ३३० |
| पित्तवातरक्ते मांस्यादिलेपः | ३६१ |
| रक्तस्रावविधिः | ३११ |
| विभ्रमिरोगे । | |
| विडंगारिष्टः | २३७ |

| विषयः | पृष्ठं. |
|---|---|
| विरेकः | ३११ |
| रक्तस्रावः | ३११ |
| (२ मध्यविद्रधिरोगे।) | |
| शिग्रुक्काथः | १६० |
| वरुणादिगणक्काथः | १६० |
| (३ अभ्यंतरविद्रधौ।) | |
| वरुणादिगणः | १६० |
| (४ वातविद्रधौ।) | |
| शिग्र्वादिलेपः | ३६५ |
| (५ पित्तविद्रधौ।) | |
| लाजादिलेपः | ,, |
| (६ कफविद्रधौ।) | |
| इष्टकादिलेपः | ,, |
| (७आगन्तुकरक्तविद्रधौ।) | |
| रक्तचंदनादिलेपः | ३६६ |
| विषरोगे। | |
| न्यग्रोधादिक्काथः | १५८ |
| अंकोलमूलकल्कः | |
| चातुर्जातचूर्णम् | १८० |
| नारायणचूर्णम् | १८८ |
| गौराद्यं घृतम् | २२० |
| शतावर्यादितैलं | २२६ |
| सुवर्णभस्म | २४२ |
| कनकसुंदररसः | २८० |
| सर्पिष्पानम् | २८८ |
| वमनम् | ३०४ |
| गरव्याप्ते विरेकः | ३११ |
| दुग्धस्य सर्पिषो वा गंडूषः | ३५४ |
| दशांगलेपः | ३५६ |
| विषघ्नलेपौ | ,, |
| विषदुष्टशोणिते रक्तस्रावविधिः | ३११ |
| (२ द्विविधविषरोगे।) | |
| वंध्याककौटिकामूलकल्कः | १७६ |
| पाटलाजटाकल्कः | १७६ |
| बिल्वजटाकल्कः | ,, |
| नारायणचूर्णम् | १८८ |
| पानीयकल्याणघृतं | २१७ |

| विषयः | पृष्ठं. |
|---|---|
| (३ कीटविषरोगे।) | |
| लांगल्यादिलेपः | ३११ |
| (४ मूषकविषे।) | |
| योगराजगुग्गुलुः | २०२ |
| (५ सर्पविषे।) | |
| संजीवनीगुटिका | १९८ |
| लघुसूचिकाभरणरसः | २७० |
| अंजनम् | ३९६ |
| विषूचिकारोगे। | |
| महाखांडवचूर्णम् | १८७ |
| संजीवनीगुटिका | १९८ |
| अजीर्णकंटकरसः | २७९ |
| विरेकः | ३११ |
| पार्ष्णिदाहकर्म | ३७७ |
| विसर्परोगे। | |
| पानीयकल्याणकघृतम् | २१७ |
| महातिक्तघृतम् | २१८ |
| कासीसादिघृतं | २१८ |
| गौरादिघृतम् | २२० |
| पञ्चतिक्तघृतम् | २२२ |
| कनकसुंदरो रसः | २८० |
| वमनम् | ३०४ |
| दशांगलेपः | ३५६ |
| रक्तस्रावः | ३११ |
| वातविसर्पे रास्नादिलेपः | ३६१ |
| पित्तविसर्पे मृणालादिलेपः | ,, |
| कफविसर्पे त्रिफलादिलेपः | ,, |
| विसंज्ञरोगे। | |
| प्रधमननस्यम् | ३४१ |
| रेचननस्यम् | ३४० |
| व्रणरोगे। | |
| गांगेरुकीमूलरसः | १४१ |
| न्यग्रोधादिक्काथः | १५८ |
| पञ्चवल्कलक्काथः | १६४ |
| व्रणशोधनरोपणो निंबदलकल्कः | १७४ |
| कैशोरगुग्गुलुः | २०३ |
| कांचनारगुग्गुलुः | २०५ |
| नाडीदुष्टव्रणेषु कासी- | |

| विषयः | पृष्ठं. |
|---|---|
| सादिघृतम् | २१८ |
| जात्यादिघृतम् | २१९ |
| गौराद्यं घृतम् | २२० |
| त्रिफलादितैलम् | २२८ |
| जात्यादितैलम् | २२९ |
| सर्पिष्पानम् | २८८ |
| विरेकः | ३११ |
| अभयामोदकः | ३१६ |
| धूमपानम् | ३४७ |
| (२ दुष्टव्रणे।) | |
| दशांगलेपः | ३५६ |
| शोधनरोपणार्थं लेपः | ३६४ |
| (३ शोथगंभीरव्रणे।) | |
| रात्रौ प्रलेपः | ३६४ |
| व्रणेषु लेपक्रमः | ३६४ |
| व्रणवातशोथेप्रलेपः | ,, |
| व्रणपित्तशोथेप्रलेपः | ,, |
| व्रणस्य कफशोथे प्रलेपः | ,, |
| व्रणस्याऽऽगंतुकोरक्तशोथयोः प्रलेपः | ,, |
| (४ व्रणपक्तये।) | |
| शणादिलेपः | ,, |
| व्रणदारणलेपः | ,, |
| व्रणशोधनप्रलेपः | ,, |
| व्रणशोधनरोपणप्रलेपः | |
| व्रणकृमिहरलेपाः | ,, |
| शिरोरोगे। | |
| त्रिफलामोदकः | २०५ |
| मयूरघृतम् | २२१ |
| विरेकः | ३११ |
| रेचननस्यम् | ३४० |
| बृंहणनस्यम् | ३४२ |
| चंदनादिलेपः | ३६२ |
| वर्यादिलेपः | ,, |
| रक्तस्रावः | ३११ |
| (२ अकालपलितरोगे।) | |
| निंबबीजतैलम् | २२८ |
| नीलिकादितैलं | २२८ |
| भृंगराजतैलम् | २२९ |

| विषयः | पृष्ठं. |
|---|---|
| जरापलितरोगेऽभ्रकभस्म | २५० |
| लोहरसायनम् | २८३ |
| अभयामोदकः | ३१६ |
| बृंहणनस्यम् | ३४२ |
| वलीपलितघ्नं प्रतिमर्शनस्यम् | ३४४ |
| नस्यम् | ३३८ |
| पलितहरलेपाः | ३५८ |
| (३ अर्धशिरोरोगे।) | |
| पथ्यादिक्काथः | १६२ |
| (४ अर्धावभेदकरोगे।) | |
| बृंहणनस्यम् | ३४२ |
| सारिवादिलेपः | ३६२ |
| (५ कफशिरोरोगे।) | |
| प्रलेपौ | ३६२ |
| (६ शिरःकंपादिरोगे।) | |
| शिरोबस्तिः | ३६८ |
| (७ शिरोग्रहरोगे।) | |
| नारायणतैलम् | २२३ |
| (८ दारुणरोगे।) | |
| नीलिकादितैलम् | २२८ |
| प्रियालादिप्रलेपः | ३५७ |
| खाखसबीजादिलेपः | ,, |
| (९ पित्तशिरोरोगे।) | |
| धात्र्यादिलेपः | ३६२ |
| (१० वातशिरोरोगे) | |
| प्रलेपौ | ३६२ |
| (११ शंखकरोगे।) | |
| वर्यादिलेपः | ३६२ |
| (१२ सूर्यावर्तरोगे।) | |
| बृंहणनस्यम् | ३४२ |
| सारिवादिलेपः | ३६२ |
| (१३ शिरःस्फोटरोगे।) | |
| कासीसादिघृतम् | २१८ |
| शर्कराश्मरीरोगे। | |
| वीरतर्वादिक्काथः | १५७ |
| एलादिक्काथः | १५८ |
| दशमूलारिष्टः | २३९ |

| विषयः | पृष्ठं. |
|---|---|
| **शुक्ररोगे ।** | |
| रास्नादिक्काथः | १५६ |
| चंद्रप्रभागुटी | २०० |
| योगराजगुग्गुलुः | २०२ |
| गोक्षुरादिगुग्गुलुः | २०४ |
| च्यवनप्राशावलेहः | २०८ |
| क्षीणरेतसि बलादितैलम् | २२४ |
| कुमार्यासवः | २३५ |
| शुष्कशुक्रे वसापानम् | २८९ |
| क्षीणरेतसि स्नेहपानम् | २९२ |
| **शूकरोगे ।** | |
| कासीसादिघृतं | २१८ |
| **शूलरोगे ।** | |
| निदिग्धिकादिक्काथः | १५० |
| पुनर्नवादिक्काथः | १५४ |
| दशमूलक्काथः | १४९ |
| कट्फलादिचूर्णम् | १८३ |
| बृहत्कट्फलादिचूर्णम् | १८३ |
| पंचसमचूर्णम् | १८९ |
| तुंबर्वादिचूर्णम् | १९० |
| यवानीखांडवचूर्णम् | १९२ |
| लवणभास्करचूर्णं | १९४ |
| चंद्रप्रभागुटी | २०० |
| कांकायनगुटिका | २०१ |
| षड्बिन्दुघृतम् | २१९ |
| दशमूलारिष्टः | २३९ |
| लोकनाथो रसः | २६६ |
| नाराचरसः | २७२ |
| स्वच्छंदभैरवः | २७४ |
| शूलगजकेसरी | २७८ |
| विरेकः | ३११ |
| निरूहबस्तिः | ३३० |
| **( २ अंगशूले । )** | |
| शतावरीतैलम् | २२६ |
| **( ३ आमशूले ) ।** | |
| धान्यादिक्काथः | १५२ |
| ह्रीबेरादिक्काथः | १५३ |
| दुग्धपाकविधिः | १६७ |
| **( ४ उदरशूले । )** | |
| मदनफलादिलेपः | ३६५ |
| **( ५ कटिशूले । )** | |
| सुदर्शनचूर्णम् | १८२ |
| लवणत्रितयादिचूर्णम् | १९० |
| चंद्रप्रभागुटी | २०० |
| पानीयकल्याणकघृतं | २१७ |
| **( ६ कफशूले । )** | |
| एरंडमूलक्काथः | १५७ |
| **( ७ कर्णशूले । )** | |
| पथ्यादिक्काथः | १६० |
| हिंग्वादितैलम् | २२९ |
| पंच प्रयोगाः | ३७० |
| दीपिकादितैलं | ३७१ |
| सोनाकतैलम् | ,, |
| **( ८ गुदशूले । )** | |
| हिंग्वादिचूर्णम् । | १९२ |
| **( ९ जानुशूले । )** | |
| सुदर्शनचूर्णम् | १८२ |
| **( १० त्रिकशूले ) ।** | |
| सुदर्शनचूर्णम् | १८२ |
| **( ११ नाभिशूले । )** | |
| योगराजगुग्गुलुः | २०२ |
| **( १२ नेत्रशूले । )** | |
| लोध्रादिसेकः | ३८० |
| **( १३ पक्तिशूले । )** | |
| कुमार्यासवः | २३५ |
| त्रिनेत्रो रसः | २७८ |
| **( १४ पार्श्वशूले । )** | |
| बीजपूररसः | १४० |
| एरंडमूलक्काथः | १५७ |
| पंचमूलीक्षीरपाकः | १६७ |
| सुदर्शनचूर्णम् | १८२ |
| सितोपलादिचूर्णं | १९३ |
| कामदेवघृतम् | २१६ |
| नारायणतैलम् | २२३ |
| **( १५ पित्तशूले । )** | |
| शतावरीरसः | १४० |
| त्रिफलादिक्काथः | १५७ |
| नाराचचूर्णम् | १८९ |
| **( १६ पृष्ठशूले । )** | |
| सुदर्शनचूर्णम् | १८२ |
| **( १७ बस्तिशूले । )** | |
| बीजपूररसः | १४० |
| हिंग्वादिचूर्णम् | १९२ |
| **( १८ योनिशूलरोगे । )** | |
| हिंग्वादिचूर्णम् | १९२ |
| फलघृतम् | २२२ |
| शतावरीतैलम् | २२६ |
| **( १९ रक्तशूले । )** | |
| वत्सकादिशृतः | १५३ |
| **( २० वातशूले । )** | |
| नागरादिक्काथः | १५७ |
| **( २१ शिरःस्थले । )** | |
| वरुणादिगणक्काथः | १६० |
| पथ्यादिक्काथः | १६० |
| शतावरीतैलम् | २२६ |
| रेचननस्यम् | ३४० |
| **( २२ हृदयशूले । )** | |
| बीजपुरो रसः | १४० |
| हरिणशृंगपुटपाकः | १४४ |
| एरंडमूलक्काथः | १५७ |
| हिंग्वादिचूर्णम् | १९२ |
| **शोथरोगे ।** | |
| सर्वाङ्गशोथे पुनर्नवादिक्काथः | १६० |
| २. पुनर्नवादिक्काथः | १५९ |
| पञ्चवल्कलशृतः | १६४ |
| त्रिफलाचूर्णम् | १७९ |
| हपुषादिचूर्णम् | १८९ |
| अजमोदादिचूर्णं | १९१ |
| लवणभास्करचूर्णं | १९४ |
| चित्रकादिचूर्णम् | १९१ |
| सूरणादिवटकः | १९९ |
| त्रिफलावटकः | २०० |
| योगराजगुग्गुलुः | २०२ |
| कैशोरगुग्गुलुः | २०३ |
| त्रिफलागुग्गुलुः | २०४ |
| कुटजत्वगाद्यवलेहः | २११ |
| कासीसादिघृतं | २१८ |
| षड्बिन्दुघृतम् | २१९ |
| उशीरासवः | २३५ |
| लोहासवः | २३६ |
| रोहितारिष्टः | २३९ |
| विरेकः | ३११ |
| रेचननस्यम् | ३४० |
| दोषघ्नलेपः | ३५६ |
| दशांगलेपः | ,, |
| रक्तस्रावविधिः | ३११ |
| पाणिपादोदरमुखशोथे पुनर्नवादिक्काथः | १६० |
| वातकफकृतवृषणशोथे फलत्रिकक्काथः | १६० |
| **शोषरोगे ।** | |
| जीवनीयगणचूर्णं | १८० |
| अष्टवर्गचूर्णम् | १८१ |
| कूष्मांडकावलेहः | २०९ |
| **( २ मुखशोषे । )** | |
| आमलादिगुटी | १९८ |
| बृंहणनस्यम् | ३४२ |
| प्रतिमर्शनस्यम् | ३४४ |
| **( ३ व्यवायशोषे । )** | |
| च्यवनप्राशावलेहः | २०८ |
| व्यायामकर्षिताय—वसापानम् | २८९ |
| **श्लीपदरोगे ।** | |
| रास्नादिक्काथः | १५६ |
| शाखोटकादिक्काथः | १६० |
| मंजिष्ठादिक्काथः | १६२ |
| सूरणादिवटकः | १९९ |
| वमनम् | ३०४ |
| धत्तूरादिलेपः | ३६६ |
| रक्तस्रावविधिः | ३११ |
| **श्वासरोगे ।** | |
| आर्द्रकस्वरसः | १४० |
| बिभीतकत्वक्पुटपाकः | १४३ |
| निदिग्धिकादिक्काथः | १५० |
| पुनर्नवादिक्काथः | १५४ |

| विषयः | पृष्ठं. |
|---|---|
| वासादिक्काथः | १५४ |
| क्षुद्रादिक्काथः | १५४ |
| दशमूलशृतः | १४९ |
| वासादिक्काथः | १५४ |
| उष्णोदकपानम् | १६६ |
| पंचमूलीक्षीरपाकः | १६७ |
| वर्धमानपिप्पली-कल्कः | १७४ |
| सुदर्शनचूर्णम् | १८२ |
| पिप्पलीचूर्णम् | १८३ |
| कट्फलादिचूर्णम् | १८३ |
| २. कट्फलादिचूर्णम् | १८३ |
| कट्फलादिलेहः | ,, |
| लवंगादिचूर्णम् | १८६ |
| जातीफलादिचूर्णम् | १८७ |
| नाराचचूर्णम् | १८९ |
| २ नाराचचूर्णम् | १८८ |
| लवणत्रितयादिचूर्णम् | १९० |
| शुंठ्यादिचूर्णम् | १९२ |
| हिंग्वादिचूर्णम् | १९२ |
| तालीसादिचूर्णम् | १९३ |
| सितोपलादिचूर्णम् | १९३ |
| लवणभास्करचूर्णम् | १९४ |
| शुंठ्यादिगुटी वा बिभी-तकत्वक् | १९८ |
| व्योषादिगुटिका | १९९ |
| सूरणादिवटकः | १९९ |
| पिप्पलीमोदकः | २०० |
| चंद्रप्रभागुटी | २०० |
| योगराजगुग्गुलुः | २०२ |
| कंटकार्याद्यवलेहः | २०७ |
| च्यवनप्राशावलेहः | २०८ |
| कूष्मांडकावलेहः | २०९ |
| अगस्त्यहरितकी | २१० |
| लाक्षादितैलम् | २२२ |
| लोहासवः | २३६ |
| खदिरारिष्टः | २३८ |
| बब्बुल्यरिष्टः | २३८ |
| द्राक्षारिष्टः | २३८ |
| दशमूलारिष्टः | २३९ |
| लोकनाथरसः | २६६ |
| मृगांकपोट्टली-रसः | २६८ |
| हेमगर्भपोट्ट-लीरसः | २६९ |
| द्वितीयहेमगर्भ-पोट्टलीरसः | २६९ |
| लोहरसायनम् | २८३ |
| वमनम् | ३०४ |
| **( २ तमकरोगे। )** | |
| लवंगादिचूर्णम् | १८६ |
| **सूतिकारोगे।** | |
| सूतिकायाः शूलकास-ज्वरश्वासमूर्च्छाकं-पशिरोऽर्तिजिह्वदा-र्वादिक्काथः | १५८ |
| बलादितैलम् | २२४ |
| **स्तनरोगे।** | |
| रक्तस्रावविधिः | ३११ |
| **( २ स्तन्यरोगे। )** | |
| वमनम् | ३०४ |
| **( ३ स्तन्यनाशे। )** | |
| जीवनीयगणचूर्णम् | १८० |
| **स्वरभंगरोगे।** | |
| बिभीतकत्वचः पुट-पाकः | १४३ |
| वासादिक्काथः | १५४ |
| कट्फलादिचूर्णम् | १८३ |
| दाडिमाष्टकादिचूर्णम् | १८५ |
| व्योषादिगुटिका | १९९ |
| स्वरक्षीणतायां च्यव-नप्राशावलेहः | २०८ |
| कामदेवघृतम् | २१६ |
| रेचननस्यम् | ३४० |
| **( २ हलीमकरोगे। )** | |
| हपुषाद्यं चूर्णम् | १८९ |
| चंद्रप्रभागुटी | २०० |
| कामदेवघृतम् | २१६ |
| **हिक्कारोगे।** | |
| रेणुकादिक्काथः | १५५ |
| लवङ्गादिचूर्णम् | १८६ |
| लवणत्रितयादि-चूर्णम् | १९० |
| हिंग्वादिचूर्णम् | १९२ |
| सूरणादिवटकः | १९९ |
| कंटकार्याद्यवलेहः | २०७ |
| अगस्त्यहरी-तकी | २१० |
| लोकनाथो रसः | २६६ |
| **हृद्रोगे।** | |
| एरंडादिक्काथः | १५७ |
| दशमूलशृतः | १४९ |
| सुदर्शनचूर्णम् | १८२ |
| लवंगादिचूर्णम् | १८६ |
| महाखाण्डवचूर्णम् | १८७ |
| नारायणचूर्णम् | १८८ |
| लवणत्रितयादिचूर्णम् | १९० |
| शुंठ्यादिचूर्णम् | १९३ |
| यवानीखांडवचूर्णं | १९२ |
| लवणभास्करचूर्णं | १९४ |
| चित्रकादिचूर्णम् | १९१ |
| कांकायनगुटिका | २०१ |
| च्यवनप्राशावलेहः | २०८ |
| महातिक्तघृतम् | २१८ |
| लोहासवः | २३६ |
| खदिरारिष्टः | २३८ |
| रोहितारिष्टः | २३९ |
| वमनम् | ३०४ |
| विरेकः | ३११ |
| निरूहबस्तिः | ३३० |
| **( २ हृल्लासरोगे। )** | |
| गुडूच्यादिगण-क्काथः | १४६ |
| वमनम् | ३०४ |

## निर्णयसागरस्थविक्रेयपुस्तकानि ।

### अष्टाङ्गहृदयमूलम् ।

श्रीमद्वाग्भट्टविरचितं । मूल्यं १॥ रू., मा. ४ आ.

### चरकसंहिता ।

अग्निवेशकृता चरकप्रतिसंस्कृता, मूलमात्रा. मूल्यं ४ रू., मा. १ रू.

### द्रव्यगुणसंग्रहः ।

अत्र नानाविधौषधीनां गुणागुणविवेचनं सम्यक्कृतमस्ति. मूल्यं १२ आ., मा. २ आ.

### माधवनिदानम् ।

**श्रीमन्माधवकरविरचितम्, श्रीमद्विजयरक्षित-श्रीकण्ठदत्ताभ्यां प्रणीतया मधुकोश-आतंकदर्पणव्याख्याभ्यां सहितम् ।**

अयं ग्रन्थो लोके सुप्रसिद्ध एवास्ति । अस्मिन्प्रायः सर्वेषां रोगाणां निदान-पूर्वरूप-रूप-उपशय-संप्राप्ति-उपद्रव-साध्यासाध्यविचारादिविषयजातं यथावत्प्रतिपादितमस्ति.

मूल्यं २। रू., मा. ८ आ.

### योगरत्नाकरः ।

अयं नात्यर्वाचीनो ग्रन्थोऽखिलभिषग्गणमान्योस्ति । अत्र सर्वेषां रोगाणां निदानपूर्विका चिकित्सा सविस्तरा सप्रमाणा च प्रतिपादितास्ति । तथा विविधरसायनकषायासवारिष्टावलेह-गुटिकापाकादीनां प्रक्रियाप्रमाणानुपानादिप्रपञ्चोऽपि यथावत्कृतोस्तीत्ययं ग्रन्थः सर्वोपयुक्तः स्यात् ।

मूल्यं २॥ रू., मा. ६ आ.

### शार्ङ्गधरसंहिता ( मूलमात्रा ) ।

अञ्जननिदानसहिता. मूल्यं १ रू., मा. ३ आ.

# सुश्रुतसंहिता ।

## श्रीडल्हणाचार्यविरचितया निबन्धसंग्रहाख्यव्याख्यया सहिता ।

अयं ग्रन्थो भगवतो धन्वन्तरेरुपदेशानुगुणं महर्षिश्रीसुश्रुतप्रणीतोऽखिलायुर्वेदनिबन्धेषु मूर्धन्यमणित्वेन वरीवर्ति । चरकाख्ये निबन्धे केवलं शारीरचिकित्साप्रतिपादनमेवास्ति सुश्रुते त्वखिलविषयाणां सारल्येन प्रतिपादनं सर्वोत्कृष्टतया कृतमस्ति । निबन्धकृतो हृद्यार्थप्रकाशनाय श्रीमत् डल्हणाचार्यप्रणीता व्याख्यापि सर्वाङ्गसुन्दरत्वेन विराजते । तया सह संयोज्यायं ग्रन्थोऽधुनास्माभिर्मुद्रितोस्ति । भागद्वयस्य । मूल्यं १० रू., मार्ग. १ रू.

---

श्रीलौगाक्षिभास्करप्रणीतः

# अर्थसंग्रहः ।

## श्रीमत्परमहंसरामेश्वरशिवयोगिभिक्षुप्रणीतमीमांसार्थ-संग्रहकौमुदीव्याख्यासहितः ।

अयं ग्रन्थो निखिलमीमांसापदार्थनिरूपणपरत्वेन जैमिनीयतन्त्रप्रविविक्षूणां सर्वेषामत्यन्तोपकारकः सर्वान्मीमांसाप्रकरणग्रन्थानतिशेते । अयमनेकत्रानेकवारमङ्कितोऽप्यशुद्धिबाहुल्यादनुचितसंबन्ध आसीत्सोऽस्माभिर्महता यत्नेन सुप्रसिद्धविद्वद्द्वारा संशोधय्य टिप्पण्यादिभिरलंकृत्य मुद्रितोस्ति । मूल्यं १४ आ., मा. ४ आ.

# वेदस्तुतिः ।

## लोकेव्यवायेतिश्लोकः, जन्माद्यस्येतिश्लोकश्च, काशीनाथोपाध्यायकृतव्याख्योपबृंहितश्रीधरीव्याख्या ।

श्रीमद्भागवते वेदस्तुत्यादयो निर्दिष्टा विषया अखिलवेद्या गभीरार्थाश्चेति न तिरोहितं विदुषाम् । मूलविषयगाम्भीर्याच्छ्रीधरीव्याख्यापि दुरूहैवासीदिति परमकारुणिकैर्धर्माब्धिकारैः काशीनाथोपाध्यायैः प्रणीतया श्रीधरीप्रकाशव्याख्यया सह मुद्रितास्ति । मूल्यं १० आ., मा. ४ आ.

# वेदान्तसारः—

## नृसिंहसरस्वतीस्वामिकृता सुबोधिनी तथा रामतीर्थविरचिता विद्वन्मनोरञ्जनी च ।

निर्दिष्टव्याख्याद्वयोपेतोऽयं ग्रन्थः जे. ई. जेकब इत्यनेन पाठान्तरैः आङ्ग्लटिप्पणैश्च सनाथीकृत्य संस्कृतः । अस्य प्रथमावृत्तौ सार्धैकरूप्यकमासीत्परं च संप्रति ग्राहकसौलभ्यायास्यां द्वितीयावृत्तौ केवलं सपादैकरूप्यं रक्षितम् । मूल्यं १। रू., मा. ४ आ.

**पाण्डुरङ्ग जावजी,**

निर्णयसागरमुद्रणालयाधिपतिः.